

7042

PRODUCED BY THE UNITED STATES INFORMATION SERVICE

Nepal Sanskrit University, Balmiki Campus, Kathmandu

ध० शा० ९८

January 1925.

THE

CHOWKHAMBÂ SANSKRIT SERIES;

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 325.

कमलाकरभट्टविरचितो-

निर्णयसिन्धुः

कृष्णंभट्टकृतव्याख्यासहितः ।

श्रीधर्माधिकारिपाठशालायां प्रधानाध्यापकेन श्रीयुत पं०
व्याकरणोपाध्याय नेने-इत्युपाख्यगोपालशास्त्रिणा
तदीयगुरुवर म० म० पं० पर्वतीयनित्यानन्द-
पन्तप्रदर्शितरीतिमनुसृत्य संशोधितो
टिप्पण्या परिष्कृतश्च ।

NIRNAYA SINDHU;

of Kamalakara Bhatta
With Commentary of Krishnam Bhatta.
Edited With Notes by Vyakaranopadhyaya
Gopala shastri Nene.

FASCICULUS XI-११.

UBLISHED & SOLD BY THE SECRETARY
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO; BOOKSELLERS LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1924.

श्री मास्टर खेलाड़ी लाल ९

पै. नं. १००१ दोवि

५१८.

सर्वसुलभ

१८५३

*वध्वाः मातामहगोत्रापेक्षया तु त्रिगोत्रान्तर्गतेन विवाहप्रसङ्ग इति संबन्धतत्त्वादयो गौडग्रन्थाः। संबन्धविवेके शूलपाणिरप्याह—*पञ्चमात्सप्तमाच्चार्वागपि त्रिगोत्रान्तरिता विवाह्या।

*असंबद्धा भवेन्मातुः पिण्डेनैवोदकेन वा।
सा विवाह्या द्विजातीनां* त्रिगोत्रान्तरिता च या॥

इति बृहन्मनूक्तेः,

सन्निकर्षेऽपि कर्त्तव्यं त्रिगोत्रात्परतो यदि।

इति देवलोक्तेश्चेति। *एतच्च दाक्षिणात्या न मन्यन्ते।

हितुर्द्वितीयं गोत्रं तद्दौहित्र्यां तच्चतुर्थमिति तत्पुत्र्याः त्रिगोत्रानन्तर्गतत्वापत्तिः। विवक्षयोक्तापत्तिं वारयति—*वध्वा इति। मातामहगोत्रापेक्षया त्रिगोत्रात्यये इत्यस्य गोत्रवृत्तित्रित्वानाश्रयमातामहगोत्रका वधूर्विवाह्येत्यर्थः। प्रकृते च पितामहदौहित्र्या गोत्रं तृतीयं तदेव च वधूमातामहगोत्रमिति न तद्विवाहप्रसङ्गः। याज्ञवल्क्यवचनेऽप्याह—*पञ्चमादिति। गोत्रैक्ये सप्तपुरुषपर्यन्तं सापिण्ड्यं, तद्भेदे तु त्रिगोत्रं, तस्य सापिण्ड्यसङ्कोचकत्वात्। तच्चाशौचोपयोगि,

सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी।

इति शङ्खोक्तेः। विवाहप्रतिबन्धके पितृसापिण्ड्ये त्रिगोत्रान्तरितत्वं तदनन्तरितत्वं च स्फुटम्। मातृसापिण्ड्ये त्वाह—*असंबद्धेति। मातुः पिण्डेनासम्बद्धेत्यन्वयः। पिण्डो देहः, मातृदेहसम्बन्धशून्या। मातुरुदकेनेति मातृबन्धुनेत्यर्थः, असम्बद्धेत्यत्रान्वयः। *त्रिगोत्रेति। पितृमातृसापिण्ड्यद्वयसंकोचकं, स्वगोत्रसाधारणत्रित्वानाश्रयेत्यर्थः। अयमनुकल्पः, कूटस्थमारभ्य सप्तमीत्वाद्यनाश्रयाविवाहो मुख्यकल्पः, सन्निकर्षेपीत्यपिशब्दात्। *एतच्चेति। सम्बन्धतत्त्वमते पितृतोऽष्टमीं मातृतश्च षष्ठीमु-

यत्तु वसिष्ठः—

*पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा । इति;

यच्च विष्णुपुराणम्—

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृप ॥ इति

तत्पञ्चमीं सप्तमीमतीत्येति व्याख्येयम् ।

पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया ।
क्रियापरा अपि हि ते पतिताः शूद्रतां गताः ॥

इत्यपरार्के मरीचिवचनात् । हारलतायां शङ्खलिखितौ—

*सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी ।
पिण्डश्चोदकदानं च आशौचं च तदानुगम् ॥

गोत्रं संतानम् । आशौचं तानभिव्याप्य गच्छती-
त्यर्थः ।

द्वहेत्, पितृष्वसुर्नवमीं मातुः पितृष्वसुः सप्तमीं च त्यजेदित्यनौचि
त्यापत्तेः। तस्मान्नारदवाक्ये मर्यादायामाङ्, सन्तानादिति शेषः
सन्तानं मर्यादीकृत्येत्यर्थः । तथाच पितृमातृसन्तानभेदारम्भकः
थमादिसमुदायात् तत्समुदायमादाय सप्तमत्वपञ्चमत्वाक्रान्तसन्त
नपर्यन्तमविवाह्येत्येवार्थः । शूलपाणिमते कैमुतिकन्यायेन पञ्च
सप्तमे चैवेति वाक्यविरोध इति । *पञ्चमीमिति । उद्वहेदिति वर्त्तते
पञ्चमे इत्यादेः कूटस्थात्पञ्चमे इत्यादिरर्थः, कूटस्थाच्चतुर्थो म
ता षष्ठश्च पिता भवतीत्यभिप्रायः । नन्वत्र पञ्चमे इति कूटस्थारि
न्नगोत्रघटितपञ्चान्तर्गतविवाहनिन्दा, सप्तमे इति च कूटस्थसमा
गोत्रसप्तान्तर्गतविवाहनिन्दा चेति वाग्मिनः परिष्कुर्वन्तीत्यत्राह
*सपिण्डतेति । सर्वेषां ब्राह्मणादीनां, गोत्रतः कूटस्थस
नगोत्रगर्भं, पिण्डश्चेत्यादि और्ध्वदेहिकोपलक्षणं, तदानुगं

शुद्धिविवेके शुद्धिचिन्तामणौ च ब्राह्मे—

सर्वेषामेव वर्णानां विज्ञेया साप्तपौरुषी ।
सपिण्डता ततः पश्चात्समानोदकधर्मता ॥
ततः कालवशात्तत्र विस्मृतौ नामगोत्रतः ।
समानोदकसंज्ञा तु तावन्मात्रापि नश्यति ।

सप्तोर्ध्वं त्रयः सोदकाः, ततो गोत्रजाः । तत्रैव ब्राह्मे—

अविभक्तधनास्त्वेते सपिण्डाः परिकीर्तिताः ।

तेनाविभक्तधनाभावे विभक्तः सपिण्डो धनहारी, नान्यथेत्यर्थः । तेन विवाहे आशौचे धनग्रहणे च त्रिधा सापिण्ड्यं सिद्धम् । यत्तु—‘पञ्चमीं मातृतः परिहरेत्सप्तमीं पितृतस्त्रीन्मातृतः, *पञ्च पितृतो वा’ इति पैठीनसिस्मृतौ ‘त्रीनित्यनुकल्पः’ इति माधवोक्तेः,

---

इशापिण्डतानुसारि । तथाच कूटस्थसमानगोत्रसप्तपुरुषनिष्ठसापिण्ड्यमौर्ध्वदेहिकादावनुकूलमित्यर्थः । सापिण्ड्यमौर्ध्वदेहिकादावनुकूलं विवाहप्रतिबन्धकं च । तत्र एतस्यैव विवाहप्रतिबन्धकत्वे यत्र कूटस्थात्षष्ठी पञ्चममातृककन्या, षष्ठः पञ्चमपितृकवरः, तौ च भिन्नगोत्रान्तर्गतौ तत्र तयोर्विवाहप्रसङ्ग इत्यर्थः । यदि च गोत्रतः सन्तानात् । एवञ्च कूटस्थसन्ताने साप्तपौरुषी सपिण्डता इत्यर्थ आद्रियते तदा कूटस्थकन्यातत्कन्यादिक्रमेण षष्ठी कन्यैव सप्तमश्च पुरुषः, तत्राप्येतत्सत्त्वेन कूटस्थकन्यान्तरमादाय पञ्चम्यां कन्यायां च तत्सत्त्वेन न तयोर्विवाहः । शङ्खादिवचनवशात्तु समानगोत्रसप्तपुरुषवृत्तित्वेनाशौचाद्यानुकूल्यमिति बोध्यम् ।

*त्रीनिति । चतुर्थीं कन्यामुद्वहेदित्यत्र तात्पर्यम् । *पञ्चेति । षष्ठीमुद्वहेदित्यर्थः । यद्यपि त्रीन् परिहरेत् पञ्च परिहरेत् इत्युक्तया तदत्यागे दोष गौरवमिति लभ्यते तथापि अनुकल्पत्वेन

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ।
*दशभिः पुरुषैः ख्याताच्छ्रोत्रियाणां महाकुलात् ॥
उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम् ।
*पञ्चमीं तदभावे तु पितृपक्षेऽप्ययं विधिः ॥
सप्तमीं च तथा षष्ठीं पञ्चमीं च तथैव च ।
एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः ॥
तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि ।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः ॥
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् ।
नित्यं स व्यवहार्यः स्याद्वेदाचैतत्प्रदृश्यते ॥

इति चतुर्विंशतिमतात्,

चतुर्थीमुद्वहेत्कन्यां चतुर्थः पञ्चमोऽपि वा ।
पराशरमते षष्ठीं पञ्चमो* न तु पञ्चमीम् ॥

इति पराशरोक्तेश्चानुकल्पत्वेनापदि*पञ्चम्यादिपरिणयनं कार्यमिति प्रतीयते । *अत्र हि तदभावे इति स्पष्टमेवानुकल्पत्वमुक्तम्, तन्न यथाश्रुतं ज्ञेयं, *पूर्वोक्त-

---

केषांचित्समाधानमुत्थापयति-*दशभिरिति । 'कुलमग्रे परीक्षेत' इति कुलस्यैव गौरवात्तदनुसारेण सापिण्ड्यसंकोचः, न तु तद्धियाऽधमकुलकन्यास्वीकार इत्याशयः। *पञ्चमीं तदभावे त्विति मातृपक्षे। अयं क इत्यत्राह-पञ्चमीमिति । *न तु पञ्चमीमिति । पञ्चमः पञ्चमीं नोद्वहेदित्यर्थः । *पञ्चम्यादीति । यद्यपि तृतीयादिपरिणयनमिति वाच्यं 'तृतीयां च' इत्युक्तेः, तथापि 'वेदाचैव' इत्यनेन तस्य दृढीकारात्तस्य स्वातन्त्र्येण निराकरणीयतया न तथोक्तम् । अनुकल्पत्वं कुत इत्यत्राह-*अत्र हीति । *पूर्वोक्तेति । पञ्चमे सप्तमे चैवेत्यादि । अत्रानुकल्पोऽपि विकल्प

मरीचिवचोऽविरोधात्। *वस्तुनि विकल्पासम्भवात्।

*पञ्चमात्सप्तमाद्धीमान्यः कन्यामुद्वहेद्द्विजः।
गुरुतल्पी स विज्ञेयः सगोत्रां चैवमुद्वहन्॥

इति विष्णूक्तेः, पराशरस्य (१)मूलाभावाच्च। तस्मान्मदनपारिजाताद्युक्तादिशा *दत्तकसापत्नसम्बन्धाद्यनुप्रवेशे *ब्राह्मणादीनां क्षत्त्रियादिसपिण्डविषये वा पूर्वोक्तानि *नेयानि, *न त्वनुकल्प इति भ्रमितव्यम्। *यत्तु

एव सप्तमोर्ध्वां सप्तमीं चोद्वहेदित्यर्थादित्याशयेन दूषयति-*वस्तुनीति। क्रियाभिन्ने इत्यर्थः। नन्वेवं चेत्तदा सप्तमोर्ध्वोद्वाहं वा कुर्यादित्यस्तु क्रियाविकल्प इत्यत्राह-*पञ्चमादिति। कुलहीनतायां तादात्म्येन पञ्चमादिर्हेतुः कुललक्षण एव पञ्चमाद्यन्यत्वं विवाहप्रयोजकविशेषणमिति पञ्चमत्वादिना कुलहीनेत्यर्थः। एतद्वचन एव निर्भरः न तु मरीचिवाक्येऽपि, क्रियापराः विप्रसेवादिरूपविहितपरा अपि शूद्राः पतिता इति शूद्रमात्रपरत्वसम्भवात्। *दत्तकेति। द्व्यामुष्यायणदत्तकस्य मातृकुले सपत्नमातामहकुले च त्रिपुरुषं सापिण्ड्यम्। आदिना—

पुरुषत्रयपर्यन्तं भ्रात्रादेर्नैतदिष्यते।

इत्यस्य परिग्रहः। तथाविधसापिण्ड्यशून्यायाः पञ्चम्यादेः परिणयनकार्यताबोधकानीत्यर्थः। *ब्राह्मणादीनामिति। तत्रापि त्रिपुरुषमेव सापिण्ड्यादिति भावः। *नेयानीति। एतेन मदनपारिजाताद्युक्तदिक् क्षोदक्षमाऽस्तु वा, मा वा, तदनुसरणे भवतां न दोष इति सूचितम्। *न त्विति। अयमभिप्रायः—दशभिरित्यादिना वस्तुतो महापापातिपापोपपापादिरहितत्वश्रोत्रियत्व-

---

[१] 'मूलाभावश्च' क०

स्मृतिचन्द्रिकामाधवादय आहुः—*"तृतीये सङ्गच्छावहै, चतुर्थे सङ्गच्छावहै" इति शतपथश्रुतेः, *'तृप्तां जुहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव' इति, 'ग-

---

दानादिकर्मत्रयकर्तृत्वसपरिहारयागाद्यकर्तृत्वादियुक्तमहाकुलीनानां सप्तमीमुद्वहेदित्यभिधानेन तादृशगुणाधिक्ये एव न दोषः, अन्यथा तु दोष इति रीत्या सप्तगोद्वाहनिन्दनात् शाकटायन इत्यभिधानेन च स्वरूपव्याक्रियैत्र पराक्रियेति न्यायात् जर्त्तिलयवाग्वा वा जुहुयादिसादेः पयोहोमस्तुत्यर्थत्ववत्कैमुतिकन्यायेनाष्टमोद्वाहविधिस्तुत्यर्थत्वमेव पञ्चम्याद्युद्वाहविधीनामुपेयं, न तु अनुकल्पतयापि तत्कर्तव्यतार्थकत्वं सगोत्रां चैवमुद्वहन्निति दृष्टान्तेन बलवदनिष्टसाधनत्वावेदनादिति ।

इदानीं तृतीयोद्वाहमुत्थापयति—*यच्चिवाति । *तृतीये इति । दर्शपूर्णमासप्रकरणे स्रुग्व्यूहनार्थवादः एकस्मात् मिथुनाद्वावुत्पन्नौ मिथः सङ्कल्पयतः—तृतीये वा चतुर्थे वा विवहावहै इति तदर्थः । अत्र प्रमाणान्तराविरोधादर्थवादाद्विधिः कल्प्यः । *तृप्तामिति । "आयाहीन्द्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व" इति पूर्वार्धम् । ततश्चायमर्थः—हे इन्द्र त्वमीळितैः प्रशस्तैः पथिभिः मार्गैः नोऽस्माकं यज्ञमायाहि आगच्छ । आगत्य च तृप्तामाज्यप्लुतां वपां भागधेयं जुषस्व सेवस्व, तत्र द्वौ दृष्टान्तौ । मातुलस्य जुहुः अपत्यं योषा स्त्री भागिनेयस्य भाग इव, पैतृष्वसेयी च मातुलपुत्रस्य भाग इव चेति । गर्भे तु नौ जनिता दम्पतीकर्देवस्त्वष्टा सविता विश्वरूप इति । अयमर्थः—यमी यमं स्वभ्रातरं मैथुनार्थं याचितवती ततो यमेन प्रत्याख्याता वदति—कः प्रजापतिः विश्वरूपो विश्वात्मा सविता त्वष्टा नौ आवयोर्गर्भे दम्पती

र्भे तु नौ (१)जनिता दम्पतीकः' इति च मन्त्रवर्णात्,

*मातृष्वसृसुतां केचित्पितृष्वसृसुतां तथा ।
विवहन्ति क्वचिद्देशे सङ्कोच्यापि सपिण्डताम् ॥

इति शातातपोक्तेश्च मातुलकन्योद्वाहः कार्यः । यद्यपि पितृष्वसृकन्योद्वाहोऽपि प्राप्तस्तथापि ।

अस्वर्ग्यं*लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ।

इति निषेधाद्वचनान्तरेण तदुद्वाहस्याविधानाच्च न कार्यः । अयं तु*दाक्षिणात्यशिष्टाचारात्कार्य इति । नच पूर्वोक्तश्रुतीनामर्थवादमात्रता मानान्तरेणा *सिद्धौ *'उपरि हि देवेभ्यो धारयति' इतिवदनुवादानुपपत्त्या विधिकल्पनात् । यत्तु शातातपः—

जनिता। तथाचावयोरपत्ययो(२)(र्भाविदम्पत्यनिश्चयात्तद्द्वारमावामेव दम्पतीभावाय इति । *मातृष्वसृसुतामिति । माता स्वसा यस्य स मातृष्वसा मातुलस्तत्सुतामित्यर्थः) मातुलस्य सुतामिति पाठान्तरात् । *लोकविदिति । लोचृ दर्शने । लोक्यते इति लोकम् इष्टानिष्टसाधनतया ज्ञायमानं सदसत्कर्म, तद्वेदिभिर्द्विष्टं द्वेषविषयीकृतं विहितमपि नाचरेदित्यर्थः, द्विष्टसाधनतया द्वेषोदयादिति भावः । *दाक्षिणात्येति ।

उद्वहेद्दक्षिणे विद्वान्मातुलस्य च वै सुताम् ।
उत्तरे नोद्वहेद्विप्रो ह्येष धर्मः सनातनः ॥
मातुलस्य सुतां विप्रो दक्षिणे तां समुद्वहेत् ।
वर्जनीया प्रयत्नेन सैव वाजसनेयिभिः ॥

इति आचारानुरोधिवाक्यात् । *असिद्धाविति । अप्राप्तार्थस्य स्तावकत्वासम्भवात्। *उपरि हीति। "अधस्तात्समिधं धारयन्नतुद्रवेत" इत्यस्योपरि हीति न स्तावकम्, अप्रसिद्धत्वात्। अतो यथा

---

[१] 'जनिना' ग० (२) कक्षान्तर्गतं नास्ति ख० ।

मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥

यच्च मनुः—

पैतृ(१)ष्वसेयीभगिनीं स्वस्रीयां (२)मातुरेव च ।
मातुश्च भ्रातुरा*प्तस्य गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत् बुद्धिमान् ॥

यच्च व्यासः—

मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिः । इति,

तद्*गान्धर्वादिविवाहोढमातृविषयम् । तत्र*पितृगोत्रानिवृत्तेः । अत एव मार्कण्डेयपुराणम्—

गान्धर्वादिविवाहेषु पितृगोत्रेण (३)धर्मवित् । इति ।

उपरि समिधं धारयन्ननुद्रवेदिति विधिः कल्प्यते, तथा मातुलसुतामुद्वहेदिति विधिः कल्प्य इत्यर्थः । *आप्तस्य सन्निकृष्टस्य सपिण्डस्य मातुलस्येति यावत् । *गान्धर्वादीति ।

ब्राह्मादिषु विवाहेषु ऊढा कन्या यदा भवेत् ।
भर्तृगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया ॥

इति प्रकृत्येत्यादि ।

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः ।

इति मनुवाक्ये उद्देश्यविशेषणस्य पुंस्त्वस्याविवक्षितत्वेन कर्मणो जनककुले सम्बन्धनिवृत्तेः सापिण्ड्यस्यापि निवृत्तिरुक्ता । एवञ्च ब्राह्मादिविवाहे कन्याया दानसत्त्वेन सापिण्ड्यनिवृत्तेस्तत्परं मातुलकन्यापरिणयनवचनम् । आसुरादिषु तदभावान्न सापिण्ड्यनिवृत्तिरिति तत्पराणि प्रायश्चित्तवचांसीत्यर्थः । *पितृगो-

---

(१) 'पितृष्वसेयीं' क०
(२) 'मातुलस्य' क०
(३)'धर्मवत्' क०

*ब्राह्मादिविवाहे तु परिणेयैवेति। भट्टसोमे(१)श्वरोऽपि तृतीयेऽध्याये वाक्यपादे मातुलकन्योद्वाहमुदाहृत्य स्मृतिविरोधेनाचारप्राप्तस्यास्य वार्तिके बाधोक्तावपि पूर्वोक्तश्रौतलिङ्गबलीयस्त्वादस्य कर्तव्यतामाह। तदेतद्दत्तकस्य पालकद*त्रिममातृसोदरकन्याविषयत्वेनासवर्णमातुलकन्याविषयत्वेन युगान्तर(२)परत्वेन चोपपन्नमपि*अविचारितरमणीयं यथा, तथास्तु; तथा(३)पि कलौ तावन्निषिद्धमेव।

श्रौतेति। पितृसापिण्ड्येत्यर्थः। यथाश्रुते ब्राह्मादिविवाहे पितृसापिण्ड्यानिवृत्त्यनभिधानेन हेतुन्यूनताप्रसङ्गात्। वस्तुतस्तु प्रागुक्तरीत्या दत्त्रिमवाक्ये पुंस्त्वविवक्षाया आवश्यकतया 'स्वगोत्राद्भ्रश्यते नारी' इत्येव गोत्रनिवृत्तिरिति सगोत्रत्वाविशिष्टसापिण्ड्याभावान्मातुलकन्याविवाहो भवत्येवेत्याह-*ब्राह्मादीति। दत्तकस्य पालकेऽन्वयः। संबन्धिकतया देवदत्तस्य गुरुकुलमितिवत् दत्तकस्येति षष्ठीमतः (४)*दत्त्रिमेति। तत्र पालिके ये दत्तकृत्रिमे मातरौ तयोः सोदरेत्यर्थः। दत्तकस्य पालकमातृकुले त्रिपुरुषं पाञ्चपुरुषं वा सापिण्ड्यं, परन्तु माता दत्तेति तत्प्रतिगृहीतृकुले एव तत् न तु तस्या जनककुले, एवं कृत्रिमाया मातुर्जनककुले तन्नास्तीति भावः। *अविचारितरमणीयमिति। विचार्यमाणे तु न रमणीयम्। तथाहि "गर्भे तु नौ" इति मन्त्रो मातुलकन्या परिणयवि-

---

(१) 'सोमेश्वरेणापि' ख०।

(२) 'युगान्तरत्वेन' ख०।

(३) संस्कारकौस्तुभे तु-'कलावपि येषां कुले देशे अनुकल्पत्वेन सापिण्ड्यसंकोचः परंपरया समागतः, तेषां तादृशसंकोचेन विवाहे न दोषः। अस्ति च भार्यात्वोपपत्तिः। अन्येषां तैः सह व्यवहारे नैव दोषः। हेमाद्र्यादौ श्राद्धनिषेधोपि स्वकुलदेशे परंपरयाऽनागतसापिण्ड्यसंकोचेन कृतविवाहविषय एवेति बोध्यम्।' इत्युक्तम्।

(४) 'षष्ठीमतो कृत्रिमेति' ख० घ०ङ०।

धिं कल्पयितुं नालं, तथा सति “प्रजापतिरुषस्यभ्यैत् स्वां दुहितरम्” इत्यादावपि अन्योऽपि स्वदुहितरं गच्छेदिति विधिकल्पनापत्तेः। प्रत्यक्षस्मृत्यन्तरानुमितश्रुतिविरोधान्न तत्कल्पनमिति चेन्मातुलकन्यापरिणये किमयं पाणिपिहितः? तस्मात् पूर्वाचरितमत्र कीर्तितमित्येतावन्मात्रं ((१)विधिं कल्पयितुं नालम्।) वस्तुतस्तु नौ आवां जनिता जनकः गर्भे तु गर्भ एव कः कृतवान् इत्येवार्थः। करिति रेफान्तदर्शनात्, जनितेत्यस्य अन्तोदात्तत्वेन तृजन्तत्वाच्च। लुडन्तत्वे तु “तिङ्ङतिङः”(अष्टा०सू०८-१-२८) इति निघातापत्तेः तस्मात् जनितेत्यस्य जनयिष्यतीति व्याख्यानमयुक्तम्। अत एव “नवा उ ते तन्वा तन्वां संपपृच्यां पापमाहुर्यः स्वसारं निगच्छत्। अन्येन मत् प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत्” इति यमोक्तप्रत्याख्यानं संगच्छते। अस्या अर्थः—हे सुभगे ते तव तन्वा शरीरेण तन्वां स्वां तनुं नवा उ नैव संपपृच्यां संपर्कयिष्यामि। कुतः? यः स्वसारं निगच्छत् गच्छति तं लोका देवाश्च पापिष्ठमाहुः। तर्हि मत्संतोषः कथं स्यात्तत्राह—मत् मत्तः जायमानः प्रमुदः त्वम् अन्येन पुंसा कल्पयस्व अर्जयस्व। ते भ्राता यमः एतत्कर्म न वष्टि न काङ्क्षते इति। ‘आयाहीन्द्र’ इत्यपि च रागप्राप्तानुवादः। अप्राप्तार्थस्य हि “उपरि हि” इत्यादिवद्विधिकल्पकत्वं, न तु रागप्राप्तार्थकस्येति। यत्तु दानेन सापिण्ड्यं निवर्त्तते इत्युक्तं, तन्न, “दद्यान्माता पिता वा” इति हि पुंस्त्वविशिष्टमनूद्यैव संज्ञा कन्याया दत्त्रिमसंज्ञाविरहात्। दत्त्रिममनूद्य च सापिण्ड्यनिवृत्तिर्विधीयमाना न कन्याया भवति। नन्वेवं दत्त्रिमस्य सापिण्ड्यनिवृत्तौ जनककन्यादिपरिणयनं स्यात् “ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो मातृबन्धुभ्यश्च पञ्चमाद्बीजिनश्च सप्तमात्” इति वचनेन जनककुलेऽपि आसप्तमं विवाहनिषेधात्।

---

(१) कंसान्तर्गतं नास्ति घ०।

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा ।

इत्या(१)दिपुराणात् । *माधवीये बौधायनोऽप्यस्य निन्दामाह—'पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथो(२)त्तरत ऊर्णाविक्रयोनुपेतेन स्त्रिया च सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपारिणयनम्' इति । 'अथोत्तरतः (३)सीधुपानादिकमुक्त्वा इतर इतरस्मिन्कुर्वन्दुष्यति इतर इतरस्मिन्' इति । *भट्टसोमेश्वरेणाऽपि स्मृतिविरुद्धानां मातुलकन्योद्वाहादीनामस्माद्वचनादप्रामाण्यमि-

स्वगोत्राद् भ्रश्यते नारी विवाहात्सप्तमे पदे ।

इति वचनात्तु गोत्रनिवृत्तिरिति । (४)(नचासुरादिविवाहेऽपि सप्तपद्यादेः सत्त्वाद्गोत्रनिवृत्तिप्रसङ्ग इति वाच्यं पूर्वोत्तराङ्गसहितदानमेव तन्निवर्त्तकम् । असुरादिषु) दानाभावान्न तन्निवृत्तिरिति(५) (माधवाचार्याणामपि मातुलकन्यापरिणये निर्भरो नास्तीत्याह—*माधवीये[ऽपि]इति । दक्षिणतः तथोत्तरतः यानि दक्षिणतस्तान्यनुव्याख्यास्यामः । यथाऽनुपेतेन स्त्रिया च सहभोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमिति । अथोत्तरत ऊर्णाविक्रयः, शीधुपानं, उभयतोदद्भिर्व्यवहारः, आयुधीयकं समुद्रयानमिति पाठः । मातुलदुहितृगमनमित्यन्वयः । शीधु मद्यम् उभयतो दन्ता येषां तैः व्यवहारः क्रयविक्रयादिः, आयुधीयकम् आयुधेन जीवनम् । न च तदनन्तरम् 'इतरस्मिन्कुर्वन् दुष्यति' इति बौधायनवाक्याद्दाक्षिणे मातुलकन्यापरिणये कथं दोष इति वाच्यम् । विप्रतिपत्तिपदेनाचारत्वोक्तेः दुष्यतीत्यनेनापाङ्क्तत्वविशिष्टपातकोक्तेः । *भट्टसोमेश्व-

---

(१) 'इत्यादित्यपु' क० ।

(२) 'तथोत्तरतः यानि दक्षितसस्तान्यनुव्याख्यास्यामः यथैतदनुपेतेन स्त्रिया च' क० । (३) 'सिंधु' क० ।

(४) कंसान्तर्गतं नास्ति घ० ।

(५) कंसान्तर्गतं नास्ति घ० ।

त्युक्तम् । बृहस्पतिरपि—

उदूह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ।
मत्स्यादाश्च नराः पूर्वे, व्यभिचाररताः स्त्रियः ॥
उत्तरे मद्यपाश्चैव स्पृश्या नृणां*रजस्वलाः ॥

इत्यनाचारत्वमाह । अत एव हेमाद्रौ मात्स्ये कर्णाटकादीनां तत्कारिणां श्राद्धे निषेधः । बोपदेवेनापि लिखितं ब्राह्मम्—

यत्र मातुलजोद्वाही यत्र वै वृषलीपतिः ।
श्राद्धं न गच्छेत्तद्विप्राः कृतं यच्च निरामिषम् ॥ इति ।

तस्मान्मातृतः पञ्च, पितृतः सप्त त्यक्त्वोद्वहेदिति

रेखापीति । प्राग्भट्टसोमेश्वरेण (१) (कर्तव्यत्वोक्तिविरोधस्तु न)

वसुदेवाङ्गजाता च कौन्तेयस्य विरुध्यते ।

इति भट्टपादैस्तदकर्तव्यत्वोक्तेस्तट्टीकायां भट्टसोमेश्वरेणापि तथोक्तेः । (नच सकललोकादर्शभूतस्य भगवतोऽर्जुनप्रद्युम्नादेर्मातुलकन्योद्वाहरूपदुराचारप्रवर्तकत्वं कथमिति वाच्यं युगान्तरीयत्वेनादोषात् । वस्तुतस्तु भगवतो नारायणत्वादर्जुनस्य नरत्वेन नारायणांशत्वाद्रुक्मिण्यंशभूतसुभद्राविवाहो न मानुषः । शास्त्रस्य मनुष्याधिकारत्वाच्च तत्र न प्रवृत्तिः । किञ्च देवादिभिः कृतं मनुष्यैर्न कार्यम् ।

अनुष्ठितं च यद्देवैर्मुनिभिर्यदनुष्ठितम् ।
नानुष्ठेयं मनुष्यैस्तत्तदुक्तं धर्ममाचरेत् ॥

इति बौधायनोक्तेः । *रजस्वला इति ।

सनाताश्चापि गृह्णन्ति भ्रातृभार्यामभर्तृकाम् ।
सर्वदेशेष्वनाचारो रथ्याताम्बूलचर्वणम् ॥

इत्युत्तरश्लोकेनानाचारत्वं प्रतिपाद्यते । तस्य ईदृशकर्माणि प-

---

(१) कंसान्तर्गतं नास्ति घ० ।

*सिद्धम् ।

संबन्धविवेके सुमन्तुः–‘ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्मविच्छित्तिर्भवति, आसप्तमाद्रिक्थविच्छित्तिर्भवति, आतृतीयात्पिण्डविच्छित्तिः, अन्यथा (१)पिण्डशौचक्रियाविच्छेदाद्ब्र(२)ह्महतुल्यो भवति ।’ अस्यार्थमाह शूलपाणिः–‘जीवत्पित्रादित्रिकस्य वृद्धप्रपितामहादयस्त्रयः श्रा(३)द्धदेवतात्वात्पिण्डभाजो भवन्ति, तदूर्ध्वं त्रयो नवपुरुषपर्यन्ता लेपभाजः, श्राद्धकर्ता च दशम इति दशमादूर्ध्वं*सापिण्ड्यनिवृत्तिः । दशमादित्युपलक्षणम् । तेन पितृपि(४)तामहजीवने नवपुरुषपर्यन्तं, पितृजीवने चाष्टपुरुषपर्यन्तं सापिण्ड्यमिति ज्ञेयम् । अपुत्रधनग्रहणे संनिहिताभावे सप्तपुरुषपर्यन्तमधिकारः धनग्राहिणमारभ्य तृतीयः पौत्रः तदूर्ध्वं श्राद्धविच्छेदः । अन्यथा धनहारित्वेऽपुत्रश्राद्धाद्यकरणे ब्रह्म-

रलोकभयमात्रं न त्वैहिकभयमिति तात्पर्यम् ।*सिद्धमिति ।(५)(नन्वसपिण्डापर्युदासेन सपिण्डोद्वाहनिवृत्तिर्न लभ्यते) इति चेत् ? न, सपिण्डोद्वाहे प्रायश्चित्ताम्नायेन सपिण्डोद्वाहनिषेधे पर्युदासपर्यवसानात्, प्रायश्चित्तस्य वा पर्युदासातिक्रमनिमित्तकत्वात् ।

“दशाभिः पुरुषैः ख्याताच्छ्रोत्रियाणां महाकुलात् ।
उद्वहेत्सप्तमादूर्ध्वम्” इत्यत्र तादृशमहाकुलादूर्ध्वं तदभावे सप्तमादूर्ध्वमुद्वहेदिति मतमाह–सम्बन्धेति । धर्मविच्छित्तिपदार्थमाह–*सापिण्ड्यनिवृत्तिरिति । इत्यर्थ इत्यन्तः शूलपा-

---

(१) ‘पिण्डाशौच’ क० ।
(२) ‘ब्रह्महत्यातुल्या भवन्ति’ क० ।
(३) ‘श्राद्धदेवता’ क० ।
(४) ‘पितृमातामह’ क० । (५) कंसान्तर्गतं नास्ति घ० ।

हेत्यर्थः। *आ तृतीयादित्यनूढकन्याविषयम्, 'अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते' इति वसिष्ठोक्तेः। एतच्चाशौचविषयं सापिण्ड्यं, न तु विवाहादौ। तत्र पूर्वोक्तवचनैः पञ्चमत्वसप्तमत्वानियमादिति मेधातिथिप्रमुखा दाक्षिणात्याः। *वाग्दानोत्तरमेतदिति शुद्धिविवेकः। मातृकुलविषयं कानीन(१)कन्यकाविषयं चैतत्। अन्यथा—

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम्।
प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः प्रजापतिः॥

इति कौर्मेण विरोधः स्यादिति रत्नाकरस्मृतितत्त्वादिगौडग्रन्थाः। युक्तं चैतत्, अन्यथा कन्योत्पत्तौ पुरुषत्रयपर्यन्तमेव सूतकं स्यान्नोर्ध्वम्।

*सापत्नमातामहकुले त्वाह मिताक्षरायां शङ्खः—

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु॥

पृथक्क्षेत्राः भिन्नजातीयस्त्रीषु जाताः। पृथ(२)ग्ज-

णिग्रन्थः। अत्रदर्शपर्यन्तं सापिण्ड्यसत्त्वं दूषयितुमाह-*आतृतीयादिति। एतन्मते धर्माविच्छित्तिरित्यस्य लेपकरणान्तो धर्मस्तस्य विच्छित्तिरित्यर्थः। आसप्तमादिति च छलत उपेताशौचविषयम्। *वाग्दानोत्तरमिति। मतद्वयं चाशौचसापिण्ड्यप्रपञ्चः।

*सापत्नेति। असवर्णायाः सवर्णाया वा सापत्नमातुर्जनकतया सापत्नमातामहो द्वेधा। तत्राद्यामादाय पृथक् क्षेत्रा इति, अन्त्यामालम्ब्य पृथग्जना इति। ते एकपिण्डाः सपिण्डाः। पृथक्

---

(१) 'कानीनकन्या' क०।
(२) 'पृथग्जनाः' नास्ति क पुस्तके।

नाः सजातीयभिन्नमातृषु जाताः । *अत्र त्रिपुरुषं सापिण्ड्यमिति विज्ञानेश्वरो व्याचख्यौ । पृथ्वीचन्द्रोदये सापिण्ड्यदीपिकायां चैवम् । मदनपारिजाते तु पृथक्क्षेत्रजाः भिन्नमातृजाः, पृथग्जनाः भिन्नजातीयाः । *एतद्वि*जातीयसापत्नमातृकुलविषयम् । सवर्णसापत्नमातृकुले चतुःपुरुषं सापिण्ड्यम्,

पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा ।

इति वसिष्ठोक्तेः । *सप्तमीमिति ब्राह्मणादीनां*क्षत्रियादिदारोत्पन्न(१)पितृकुलविषयं चेत्युक्तं तत्स्व*कपोलकल्पितत्वात् ग्रन्थान्तरविरोधाच्च निर्मूलम्, *'पितृपत्न्यः सर्वा मातरः' इत्युक्त्वा सुमन्तुना 'तदपत्यानि

शौचाः । शौचं तु आशौचप्रकरणे वक्ष्यति । पृथक् शौचत्वं भिन्नजातीयत्वात् । पिण्डः एकशरीरावयवान्वयः । सापिण्ड्यं त्रिषु अतीतेषु आवर्त्तते निवर्त्तते इति । अस्य तात्पर्यमाह—*अत्रेति । सजातीयानां सापत्नमातामहकुले त्रिपुरुषं मातामहपर्यन्तं सापिण्ड्यमत्राशौचे आशौचानुकूलमित्यर्थः । *एतत् त्रिपुरुषसापिण्ड्यम् । *विजातीयेति । तादृशमातुः प्रसवे तदुत्पन्नमरणे वा इति यावत् । मातृनः पञ्चमीमिति । पिण्डः (?)सजेदित्यर्थः । तथा च चतुःपुरुषं सापिण्ड्यमित्याशयः । पितृतः सप्तमीं त्यजेत् । पिण्ड इत्यस्य विषयमाह—*सप्तमीमिति । *क्षत्रियादीति । क्षत्रियादिदारोत्पन्नस्य यत्पितृकुलमित्यर्थः । तत्र षट्पुरुषं सापिण्ड्यमित्यर्थः । इदमपि सापिण्ड्यद्वयमाशौचोपयोगि । *स्वकपोलेति । *पितृपत्न्य इति । (२) (भ्रातृणां मातुलत्वे भगिनीनां

---

(१) 'दारोत्पन्नमातृकुल' क० ।

(२) कंसान्तर्गतं ङ पुस्तके नास्ति ।

भागिनेयानि' इति पृथङ्निषेधाच्च । अन्यथा सापिण्ड्यत्वेन निषेधात्सापत्नमातुलत्वादिनिर्देशो व्यर्थः । अत एव तेन स्मृतिकौमुद्यां सवर्णसापत्नमातामहकुलपरत्वेन तथैव शङ्खवचनं व्याख्यातम् । तेन वासिष्ठं 'पञ्चमीं सप्तमीमतीत्य' इति व्याख्येयम् । तस्मात्प्राच्येव व्याख्या युक्ता । *प्रयोगरत्ने भट्टैः स्मृतितत्त्वादिगौडग्रन्थेषु च सपत्नमातामहकुले यावदुक्तं वाचनिकमेव सापिण्ड्यमुक्तम् । यथाह सुमन्तुः—*'मातृपितृसं(१)बद्धा आ सप्तमादविवाह्या भवन्ति, *आ पञ्चमादन्येषां, पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसारस्त*द्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि; अन्यथा संकरकारिणः स्युस्तथाध्यापयितुरेतदेव' इति ।

मातृष्वसृत्वस्यार्थसिद्धत्वेन वसिष्ठवाक्यस्य विवाहसापिण्ड्यपरत्वमेव, पञ्चमीत्यादिस्त्रीलिङ्गनिर्देशात् । तस्याशौचसापिण्ड्यपरत्वं तु कल्पितमित्यर्थः । ग्रन्थान्तरमिति । तत्र त्रिपुरुषं सापिण्ड्योक्त्या चतुःपुरुषे तद्विरोधः । अत्र पाठान्तरं फल्गुत्वान्नादृतम् । तत् मातामहसंततौ कियद्दूरमविवाह इत्यत्राह—*प्रयोगेति । *मात्रिति । पिता च माता च इति विग्रहः । अन्येषां मातृसंबन्धात् आपञ्चमादविवाह्याः । मातरमारभ्य पञ्चमं विना चतुर्थपर्यन्तं ये संबन्धास्ते विवाहप्रतिकूला इत्यर्थः । तत्र वरकन्यान्यतरस्य वैमातृकाणां त्वाह—*आपञ्चमादिति । एवमन्येषां पितृसंबन्धा आसप्तमादविवाह्या इत्यत्रापि भ्रातॄणां मातुलत्वे भगिनीनां मातृष्वसृत्वस्यार्थसिद्धत्वेन 'तद्भगिन्यो मातृष्वसारः' इत्यस्य पाठाभावेऽपि न कश्चिद्दोषः । *तद्दुहितर इति । तयोः तद्भ्रातृतद्भगिन्यो-

---

(१) 'सम्बन्धा' क० ।

दुहितर इत्यर्थः, तदपत्यानीति सामान्योपादानात् । अत्र केचित्-यावद्वचनं वाचनिकमिति न्यायेन परिगणितेष्वेव सापिण्ड्यं न तु सप्तमादिपर्यन्तमित्यर्थमाहुः । वस्तुतस्तु यावदुक्तं वाचनिकमित्यस्यायमभिप्रायः—वाक्यभेदपरिहाराय सपत्नमातामहात्कूटस्थाच्चतुःपुरुषं सापिण्ड्यमातिदेशिकमनेन विधीयते । अतो मातुलदुहितृष्विव तत्पुत्रेष्वपि (सा (१)पिण्ड्यात्कन्यायाः) सपत्नमातुलपुत्रेण न विवाहः । तद्दुहितर इत्यत्र तत्पदं मातुलतद्भगिन्योः परामर्शार्थम् । दुहितृपदं पुत्राणामप्युपलक्षणम् । तदपत्यानीति तत्पदं च दुहितृपुत्रयोः परामर्शार्थम् । तेन तदपत्यानीत्यस्य दुहित्रपत्यानि पुत्रापत्यानि चार्थः । तदयमर्थः—मातृभगिनीदुहित्रपत्यशब्दोऽसपत्नमातामहात्कूटस्थात् चतुर्थमभिव्याप्य सपत्नमातामहकुलं लक्षयित्वा तेन सह यस्य सपत्नमाता तस्य मातुलमातृष्वसृभगिनीभागिनेयपदैर्लक्षितं (सा (२)पिण्ड्यं विधीयते । एवञ्च यस्य सपत्नमाता तदपत्यस्यासाण्ड्येऽपि निषेधः,)

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

इति मानवनिषेधात् । अत्र चकारेण पितुरसपिण्डापि ग्राह्या, एवं चकारेण मातुरसगोत्रापि ग्राह्या । तेन दत्त्रिमस्य यः प्रतिग्रहीता स तज्जनन्या असपिण्डोऽपि सगोत्र इति तत्कुलनिवृत्तिः । दारकर्मणि दारत्वसंपादके विवाहादौ । मैथुने मिथुनसाध्येऽग्न्याधानादौ । नन्विदं 'पञ्चमात्सप्तमादूर्ध्वम्' इत्यनेन समानार्थमेवास्तु, लक्षणापत्तेः । नचैवं मातृतः षष्ठे पितृतोऽष्टमे वा विवाहो न स्यात् कन्याया मात्रादिसापिण्डत्वादिति वाच्यं, मातुः पितुर्वा सगोत्रां सपिण्डां च नोद्वहेदिति हि मनुवचनं पर्यवसन्नं, तच्च नौपदेशिकसापिण्ड्येन प्रवर्त्तते षष्ठाष्टमयोः पञ्चमात्सप्तमादूर्ध्वमित्यभ्यनुज्ञाना-

---

(१) कंसान्तर्गतं नास्ति घ०

(२) कंसान्तर्गतं नास्ति घ०

त्, तादृशीमपि वैधीं प्राप्तिमुपजीव्य निषेधप्रवृत्तौ विकल्पाप्रवृत्तेः, किन्त्वातिदेशिक एव। तत्र कस्यचिदुद्वाहविधेरभावाद्रागप्राप्तस्यैवायं निषेध इति न कस्यापि बाधः। अन्ये तु एवंविधलक्षणाङ्गीकारो व्यर्थः। यत्रैकरूपेण बुबोधयिषा ‘काकेभ्यो दधि’इत्यादौ तत्रैव हि लक्षणा, न तु प्रकृते, सपत्नमातरि विवाहप्रसक्त्यभावेनेदृशसापिण्ड्यातिदेशवैयर्थ्यात्। तस्मात् पितृपत्नीत्वावच्छेदेन मातृत्वमतिदिश्यत इत्येक एवायमतिदेशविधिः। तद्वशाच्च तद्भ्रात्रादिसन्ताने भगिनीत्वादिकथनं मुख्यभ्रात्रादिसंतानवद्विवाहवत्प्रतिबन्धकतापरम्। एवञ्च तदपत्यानां भागिनेयत्वातिदेशेऽपि तत्कन्यानां न भागिनेयकन्यात्वापत्तिः मातुलकन्यानां भगिनीत्वातिदेशेऽपि तत्सुतानां न भ्रातृत्वातिदेश इति परिगणितेष्वेव सापिण्ड्यमिति पक्षं समर्थयन्ते। तदेतदपेशलम्। एवं हि लोभेन विवाह्यानां कन्यानां बहुतरत्वं संपादयसि, सपत्नमातुलदौहित्र्या अविवाह्यत्वे सपत्नमातुलपौत्र्या विवाह्यत्वे इष्टापत्तिं च करिष्यसि, तदेतत्सर्वमनुचितमिति। तस्मात्पितृपत्न्यां मातृत्वोक्तिः तद्भ्रातरि मातुलोक्तिश्च तत्पितुः कूटस्थत्वप्रकाशार्था। मातुलाद्युपादानं च द्वितीयतृतीयगणनार्थम्। मातृष्वसार इति च सन्तानभेदप्रदर्शनं कूटस्थत्वदृढीकाराय। तत्पाठाभावे तु मातृमातुलाभ्यामेव तद्व्यक्तिः। भगिनीत्वादिकथनं च तदुद्वाहस्यात्यन्तनिन्द्यत्वार्थम्। व्यक्तिचतुष्टयगणनञ्च तदग्रे उद्वाहप्रतिबन्धवारणाय। किञ्च मातृत्वातिदेशोऽपि तत्पुत्रादौ भ्रातृत्वाद्यतिदेशाभावे तत्पौत्रीदौहित्र्योर्विवाहः प्रसज्येत। लोकविद्विष्टत्वात्तद्वारणमिति चेत्? तर्हि (मा(१)तुलपुत्र्यादिविवाहस्यापि तथैव सुवारत्वाद्भगिनीत्वाद्यतिदेशमपि त्यजेः। तस्मात्तादृशा) कूटस्थात्पञ्चमीमुद्वहेदित्यर्थः। आतिदेशिकसापिण्ड्यमिति च विवाहप्रतिबन्धकतायां परिभाषामात्रम् तादृशपरिभाषा च “अस-

---

[१] कंसान्तर्गतं नास्ति घ०

आ पञ्चमादिति मातृकुले त्रिगोत्रान्तरिताविषयं वेति *प्राच्याः। मात्स्ये—

समानप्रवरा चैव*शिष्यसन्ततिरेव च।
*ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते॥

तद्भगिन्यो मातृष्वसार इति तु आकरे न पठितम्। क्वचिद्वचनादविवाहः। (१)यथा गृह्यपरिशिष्टे-'आविरुद्धसम्बन्धामुप(२)गच्छेत इत्युक्त्वा विरुद्धसम्बन्धः स्वयमेवोक्तः। यथा*'भार्यास्वसुर्दुहिता पितृव्यपत्नी स्वसा च' इति। बौधायनः—

मातुः सपत्न्या भगिनीं तत्सुतां च विवर्जयेत्।
((३)पितृव्यपत्न्या भगिनीं तत्सुतां च विवर्जयेत्)॥

अतो मातृष्वसुः*सापत्नपुत्रकन्याप्यविवाह्या। 'सापिण्डा च या मातुः'' इत्यादावुपयोगिनी। अन्यथा वरकन्यान्यतरस्य पितृमातृसम्बन्धिसप्तमपञ्चमान्तर्गतस्य सपत्नमातृसम्बन्धिचतुर्थान्तर्गतस्य च विवाहे इत्यर्थोपगमान्न कोपि विरोध इति। *प्राच्या इत्यरुचिः स्पष्टैव। अध्यापयितुरेतदेवेत्युक्तं स्पष्टयति–*शिष्येति। *ब्रह्म गायत्री। केचित्तु पुरुषत्रयमित्यग्रेऽनुपदं स्पष्टम्। *भार्येति। अत्र वध्वा वरो भ्रातृस्थानीयः। अत्र भार्यास्वसानिषेध आर्थिकः। एतदर्थकमेव"मातुः सपत्न्या" इति बौधायनवाक्यं, मातुः सपत्न्या अपि भार्यात्वेन सङ्ग्रहात् पितृव्यपत्नीस्वसुः सुताया वारणार्थं तत्। अतो विरुद्धसम्बन्धस्य हेयत्वात्। *सापत्नेति। मातृष्वसुः सपत्नी सापत्नमातृस्थानीयेत्यर्थः। पितृव्येति। अत्र वरस्य वधूर्मातृस्थानीयेति (स(४)म्बन्धविशेषः।)

---

(१) 'तथा च' क०
(२) 'मुपयच्छेत' क० ख०
(३) कंसान्तर्गतं नास्ति क०
(४) कंसान्तर्गतं नास्ति घ०

पत्नमातृकुलजाम्’ इति मदनपारिजातोक्तेरिति केचित् । केचित्तु ‘ज्येष्ठो भ्राता पितुः समः’ इति मनूक्तेस्तत्पत्न्याः मातृत्वात्तत्पितुर्मातामहत्वाज्ज्येष्ठभ्रातृपत्नीभगिनी न विवाह्या । तथा—

उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ।

इति मनूक्ते*र्गुरुणा त्रिपुरुषं सापिण्ड्यम्, सखापि निर्वाप्यः, अतस्तेषां कन्या नोद्वाह्याः,

गायत्र्या उपदेष्टुश्च कन्यां नैवोद्वहेद्द्विजः ।
*गुरोश्च कन्यां शिष्यो वा तत्सन्तत्यापि नेष्यते ॥
पुरुषत्रयपर्यन्तं*भ्रात्रादेर्नैतादिष्यते ।

*गुरुणेति । गुरुणा त्रिपुरुषं सखापि निर्वाप्य इति पाठः । *गुरोरिति । गायत्र्युपदेशाकरणेऽपि चतुर्दशविद्यान्यतमस्य चतुःषष्टिकलान्यतमकलाशास्त्रस्य वाऽध्यापकस्य चेत्यर्थः । ततः तस्मात् तेन गुरुणापि पुरुषत्रयपर्यन्तमित्यन्वयः, तत्सन्तत्या चेति पाठान्तरं सुगमम् । एवञ्च शिष्यसन्ततिरपि पुरुषत्रयपर्यन्तं ग्राह्या । *भ्रात्रादेः गुर्वादिभ्रात्रादेः सन्ततौ उद्वाहनिषेधो नेत्यर्थः । (गु(१)रुणा सापिऽण्ड्यं सखापि निर्वाप्यः । निर्वाप्यापिण्डान्वयरूपसापिण्ड्यमित्यर्थः । गुरोः सख्युश्च त्रिपुरुषं न विवाह इति यावत्) सर्वोपि निर्वाप्य इति पाठः सुगमः । केचित्तु गायत्रीदातृमात्रस्य कन्या त्याज्या, न तु गोत्रं कुलं च,

सावित्रीं यस्य यो दद्यात्तत्कन्यां न विवाहयेत् ।
तद्गोत्रे तत्कुले वापि विवाहो नैव दोषकृत् ॥

इति वचनादित्याहुः । एतत्स्वगोत्राज्ञानविषयमिति नारायणः ।

गुरोः सगोत्रप्रवरा नोद्वाह्या क्षत्रवैश्ययोः ।
स्वगोत्राद्यनभिज्ञैस्तु विप्रैराचार्यगोत्रजाः ॥

---

(१) कंसान्तर्गतं घ पुस्तके नास्ति ।

वाक्सम्बन्धकृतानां तु स्नेहसम्बन्धभागिनाम् ॥
विवाहोऽत्र न कर्तव्यो लोकगर्हा प्रसज्यते ॥

इति वचनाच्चेत्याहुः । *तत्र मूलं चिन्त्यम् ।

दत्तकविषये तूच्यते । तत्र गौतमः–'ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्' इति । बन्धुग्रहणान्न दत्तकमात्रपरमिदं, किन्तु सन्तानेपि । एतत्क्षेत्रजादि*सर्वद्व्यामुष्यायणपरमिति हरदत्तः । अत्र इति विशेष इत्यप्याहुराचार्याः । *तत्रेति । शाखान्तरे सखित्वदीक्षोक्तेस्तत्परमेव वाक्सम्बन्धकृतानामिति । (१)यथाश्रुतार्थे मूलमित्यर्थः ।

बन्धुभ्य इति तादर्थ्ये चतुर्थी । तथाच पालकपितृघटितसन्तानभेदारम्भककूटस्थादिसमुदायार्थः पालकपितृप्रभृतिसन्तानार्थश्च यः सप्तमस्तस्मादूर्ध्वमित्यर्थः ।) *सर्वेति । यदा क्षेत्री रुग्णो बन्धुभ्यः प्रार्थयते मम (२)क्षेत्रे पुत्रमुत्पादयेति, यदा वा सन्तानक्षये गुरवो विधवां नियुञ्जते, यथा विचित्रवीर्यक्षेत्रे सत्यवती व्यासं, तत्र जातः पुत्रः क्षेत्रिणो बीजिनश्चेति द्व्यामुष्यायणः ।

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ (३)रिक्थी पिण्डदाता च धर्मतः ॥

इति याज्ञवल्क्यात् । अत्रोभयत्रापि संवित्करणं द्व्यामुष्यायणत्वबीजम् ।

तथैवाक्षेत्रिणो बीजं परक्षेत्रे प्रवापिणः ।
कुर्वन्ति क्षेत्रिणामर्थं न बीजी लभते फलम् ॥
क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत्प्रदीयते ।
तस्येह स्वामिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥

---

(१) गुरुणा सापिण्ड्यं सखापिनिर्वाप्यः घ०, कंसान्तर्गतंनास्ति ।
(२) क्षेत्रमुत्पादयेति घ० (३) सौरिक्थपिण्ड घ० ।

स्मृतिचन्द्रिका-'नियोगात् य उत्पादयति तस्माद्वी*जिनोप्यूर्ध्वं सप्तमादित्यर्थः' इति । *दत्तकस्य*जनकविषयमेतादिति सापिण्ड्यमीमांसायाम् । *तेन दत्तकस्य जनककुले साप्तपौरुषं, जननीकुले पा(१)ञ्चपौरुषं सापिण्ड्यम्,

दत्तक्रीतादिपुत्राणां बीजवप्तुः सपिण्डता ।
सप्तमी पञ्चमी चैव गोत्रित्वं पालकस्य च ॥

इति बृहन्मनूक्तेः, 'बीजिनश्च' इति गौतमोक्तेश्च । पालकपितृकुले तु पञ्चपुरुषम्, पालकमातृकुले त्रिपुरुषम् । तथा चापरार्के पैठीनसिः-'त्रीन्मातृतः पञ्च पितृतः पुरुषानतीत्योद्वहेत्' इति । एतत्स एव व्याचख्यौ-'दत्तका-

इति मनूक्तेः । व्याख्यातं चैतत् । (२)यत्तु—

य एतेऽभिहिताः पुत्राः प्रसङ्गादन्यबीजजाः ।
यस्य ते बीजतो जातास्तस्य ते नेतरस्य तु ॥ इति,

तत्तु सत्यौरसपुत्रे पुत्रिकायां च न ते कार्या इत्येवंपरम् । एवं स्वयंदत्ते द्व्यामुष्यायणः। यथा बह्वृचब्राह्मणे 'देवरातोः यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम्' इत्यादिना 'अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः' इत्याद्यन्तेन जातोपनयनो द्व्यामुष्यायण उक्तः, "दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेणार्षेण जातास्ते असम्मतकुलीना द्व्यामुष्यायणाः" इति पैठीनस्युक्तेः । नचेदं दत्तकमात्रविषयं 'गोत्ररिक्थे जनयितुः' इत्यनेन विरोधात् । एवम् अन्येतुमते प्राक् द्व्यामुष्यायणा उक्तास्ते चेह धर्तव्याः । *बीजिनोपि अपिना क्षेत्री समुच्चीयते । एतन्मते द्व्यामुष्यायणान्तरानुक्तेर्न्यूनता । *दत्तकस्येति । अयं ग्रन्थो द्व्यामुष्यायण एव दत्तकः संस्कारानन्तरं च स नास्तीति मतेन । *जनकेति । न तु पालकविषयम् ।

---

(१) 'पञ्चपौरुषं' ख० (२) यत्तु मनुः परातेऽभि घ०

दीन्पुत्रान् पितृपक्षतो निवृत्त *पिण्डगोत्रार्षेयान्प्रत्येतदुच्यते पञ्च पितृन इति, ना(१)न्यान्प्रति' इति । यत्तु वृद्धगौतमः—

स्वगोत्रेषु कृता ये स्युर्दत्तक्रीतादयः सुताः ।
विधिना गोत्रमायान्ति न सापिण्ड्यं विधीयते ॥

यच्च वसिष्ठः—

अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः ।
स्वगोत्रेण स्वशाखोक्तविधिना स्यात्स्वशाखभाक् ॥

इति । यच्च नारदः—

धर्मार्थं वर्धिताः पुत्रास्तत्तद्गोत्रेण पुत्रवत् ।
*अंशपिण्डविभागित्वं तेषु केवलमीरितम् ॥

तत् पालककुले साप्तपौरुषं सापिण्ड्यं नेत्येवंपरं, न(२)तु सर्वथा सापिण्ड्यनिषेधपरमिति सापिण्ड्यमीमांसायाम् । *मदनपारिजाता(३)दपि दत्तकानुप्रवेशोऽल्पं सापिण्ड्यं प्रतिभाति । तथाहि, तेन त्रीनतीत्येत्युदाहृत्य *यस्य माता दत्तपुत्री प्रतिग्रहीत्रा पुत्रीकृता तस्याः प्रतिग्रहीतृकुले त्रीनतीत्येति, पञ्च पितृन इति

तत्र (४)न्यूनसापिण्ड्यादित्याह—*तेनेति । *पिण्डः सापिण्ड्यम्, आर्षेयं प्रवरः । अयं ग्रन्थः केवलदत्तकाभावात्केवलासगोत्रदत्तकपरः । स्वगोत्रेणोपनायित इत्यन्वयः । गोत्रपदात्सापिण्ड्यनिवृत्तिरित्यभिमानः ? *अंशपिण्डविभागित्वम् अंशपिण्डशून्यत्वमित्यभिमानः । *मदनेति । एतन्मते जनकपरमेव पालकस्य गोत्रित्वमात्रं, तत्कथम् ? पञ्च मातृत सप्त पितृतोतीत्येत्यनेन विरोधात् । अतो दत्तकानुप्रवेशोऽङ्गीकृतः । *यस्येति । दत्तस्य

---

(१) 'नान्यत्प्रतीतिः' क० (२) 'ननु' क०
(३) 'जातादावपि' क० (४) न्यूनतासापि ख०

यस्य दत्तपुत्रः पिता तस्य दत्तस्य यज्जनककुलं तद्विषयमित्युक्तम् । वस्तुतस्तु पूर्ववचसां महानिबन्धेषु क्वाप्यनुपलम्भादपरार्कादिलिखनाभावात् पूर्वोक्तव्यवस्थायाश्च प्रातिभज्ञानतुल्यत्वाद्यैरेतल्लिखितं तेषामेव शोभते ।

मम तु पालककुले एकपिण्डदानक्रियान्वयित्वरूपं साप्तपौरुषमेव सापिण्ड्यम् । 'बीजिनश्च' इति गौतमोक्तेर्जनककुलेपि तावदेव । 'त्रीन् मातृतः' इत्यादि तु सवर्णसापत्नमातृकुलपरं, 'यद्येकजाता बहवः'इति शाङ्खवाक्यत्वादिति युक्तं प्रतिभाति । अत एवास्य द्व्यामुष्यायणत्वं हेमाद्रिप्रवरमञ्जरीवृत्तिकृन्नारायणादिभिरुक्तम् । भट्टसोमेश्वरेणापि–'पृथायाः कुन्तिभोजस्य पालककन्यात्वेपि ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो बीजिनश्च' इति गौतमोक्तेर्दत्त्रिमायाः पृथायाः जनकस्य शूरसेनस्य कुलेपि साप्तपौरुषं, पालककुलेपि तावदेव सापिण्ड्यमुक्तम् "अपि वा कारणाग्रहणे" (जै० सू० ४-१-३-५) इत्यत्र । सापिण्ड्यदीपिकायां तु दत्तक्रीतादीनां जनकगोत्रेणोपनयने कृते जनककुले साप्तपौरुषं सापिण्ड्यम्, पालकमातापितृकुले त्रिपुरुषम्, पिण्डनिर्वापान्निर्वाप्यलक्षणं त्रिपुरुषं सापिण्ड्यम्, पालकगोत्रेणोपनयने तत्कुले साप्तपौरुषमित्युक्तम् । तन्न,

चूडोपायनसंस्कारा निजगोत्रेण वै कृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥

इति कालिकापुराणादुपनयनोत्तरं दत्तकनिषेधात् । त्रिपुरुषमित्यत्रापि मूलं मृग्यमित्यलं बहुना ।

मातापितृद्वारकसापिण्ड्यवतीनां कन्यानामियं संख्या

रामवाजपेयिनोक्ता—

*उद्वोढुः पितरौ पितुश्च पितरौ तज्जन्मकृद्दम्पति-
द्वन्द्वं तस्य चतुष्कमष्ट च ततोऽप्यस्य क्रमात्षोडश ।
वंशारम्भकदम्पतीप्रमितिरित्यासप्तकक्षं रदा
*एकैकान्वयकन्यकाः पितृकुले त्वासप्तकक्षं ब्रुवे ॥
*यद्यप्येकस्य बहवः सुताः स्युस्तदपीह तु ।
सम्बन्धसाम्यादेकैव गणितेत्यवधार्यताम् ॥
*एकस्मान्मिथुनात्सुतोथ दुहिता द्वन्द्वद्वयं तद्द्वयात्
तस्माद्द्वन्द्वचतुष्कमष्ट च ततोऽतः षोडशाऽतो रदाः ।
यावत्सप्तमकक्षमग्निऋतवः कन्या इहैकान्वये
ता दन्तैर्गुणिता रसैकखदृशो वंशे सपिण्डाः पितुः॥

पुत्री दत्ता तत्र प्रतिग्रहीतृकुले प्रतिग्रहीता ततोदत्तततोदत्तेति त्रिपुरुषस्य प्रतिग्रहीतुरित्य(१)र्थः ।

*उद्वोढुरिति । वरः प्रथमः, ततो द्वितीयस्थाने स्थितं वरपितरौ द्वन्द्वं, तृतीयस्थाने पितुः पितरौ द्वन्द्वं, चतुर्थस्थाने तयोः प्रत्येकं जनके द्वन्द्वे पञ्चमस्थाने द्वन्द्वद्वयघटकपुंद्वयस्त्रीद्वययोः जनकद्वन्द्वानि चत्वारि, षष्ठस्थाने तद्घटकाष्टसङ्ख्यस्त्रीपुंव्यक्तिजनकानि द्वन्द्वानि अष्टौ, सप्तमस्थाने तद्घटकषोडशव्यक्तिजनकानि द्वन्द्वानि षोडश इति । रदाः दन्ताः द्वात्रिंशत् द्वन्द्वानि । आसप्तकक्षं वंशारम्भकदम्पतिप्रमितिरित्यन्वयः । इतः परं तत्कन्याः प्रतिजानीते—*एकैकेति । पितृकुले आसप्तकक्षम् एकैकान्वयकन्यकाः ब्रुवे इत्यन्वयः। एकैकस्य द्वन्द्वस्यान्वये यदि कन्याद्वयादि तत्र संख्यावृद्धिमाशङ्क्य समाधत्ते—*यद्यपीति । सुगमम् । उक्तद्वात्रिंशद्द्वन्द्वानां मध्ये एकद्वन्द्वं कुले उद्वोढुः सपिण्डकन्यानां (२)त्रिषष्टिरूपामवान्तरसंख्यामाह—*एकस्मादिति । प्रथममेकं मिथुनं,

---

(१) 'रित्यर्थः । दत्तकः' ख० ङ० (२) 'त्रिषष्टिरूपा' घ०।

*मातुर्जन्मददम्पती च मिथुनद्वन्द्वं तयोः सागराः
तस्याः पञ्चमकक्षमश्वमितिरित्येकान्वयः पुंसुते ।
द्वन्द्वाद्द्वन्द्वयुगं ततोऽब्धय इतोऽष्टौ पञ्चकक्षं शर-
क्षोण्यः सप्तगुणाः शराभ्रविधवो मातुः सपिण्डाः कुले
*कुलद्वयस्य कन्यकायुता मिथः सपिण्डकाः ।
हिमांशुदृग्धरादृशो विवाहकर्मवर्जिताः ॥ इति ।

एतच्च सर्ववर्णसाधारणं, सर्वत्र सापिण्ड्यसद्भावादिति

ततः पुत्रः कन्या चेति द्वन्द्वं द्वितीये स्थाने, ततः प्रत्येकं ताभ्यां पुत्रः कन्या चेति द्वन्द्वद्वयं तृतीये, ततो द्वन्द्वद्वयात्तद्रीत्यैव द्वन्द्वचतुष्टयं चतुर्थे, ततः तच्चतुष्टयात्तद्रीत्यैव द्वन्द्वाष्टकं पञ्चमे, ततः तदष्टकात्तथैवं रीत्या षोडश द्वन्द्वानि षष्ठे, तेभ्यो द्वन्द्वेभ्यो द्वात्रिंशद्द्वन्द्वानि सप्तमे, इति रीत्या एकैकस्यान्वये सप्तमकक्षं यावत् (१)अग्निऋतवः त्रिषष्टिः कन्या इत्यर्थः । ता दन्तैर्द्वात्रिंशद्भिर्गुणिताः रसैकखदृशः रसाः षट्, एक, खं शून्यं, दृक् द्विः, अङ्कानां वामतो गतिः २०१६ षोडशाधिकसहस्रद्वयम् उद्वोढुः पितुः वंशे उद्वोढुः सपिण्डा इत्यर्थः । *मातुरिति । उद्वोढुरिति वर्त्तते । वरपितरौ द्वितीयस्थानस्थं द्वन्द्वं, तृतीयस्थाने मातुः पितरौ द्वन्द्वं, चतुर्थस्थाने द्वे द्वन्द्वे, पञ्चमस्थाने सागराः चत्वारि द्वन्द्वानि इति तस्याः मातुः आपञ्चमकक्षम् अश्वमितिः सप्तसंख्या । प्रथमद्वन्द्वस्य प्रागगणनात् तत्र एक द्वन्द्वस्यान्वयः पुत्रकन्ये इति एकं द्वन्द्वम् । तस्मात् द्वन्द्वात् द्वन्द्वयुगं द्वन्द्वद्वयं, ततः अब्धयश्चत्वारि द्वन्द्वानि, ततोऽष्ट द्वन्द्वानि इति आपञ्चकक्षं शरक्षोण्यः शराः पञ्च, क्षोणी एकः, वामगत्या १५ पञ्चदश । ते सप्तगुणाः शराभ्रविधवः पञ्चाधिकशतम्, उद्वोढुर्मातुः कुले उद्वोढुः सपिण्डा इत्यर्थः । *कुलेति । मिथोयुताः संकलिताः हिमांशुदृग्धरादृशः, सप-

---

(१) 'अग्निक्षणवः त्रिषष्टिः' घ० ।

विज्ञानेश्वरोक्तेः,

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात् ।
सपिण्डता निवर्तेत सर्ववर्णेष्वयं विधिः ॥

इति हरनाथधृतदेवलवचनाच्च । सम्बन्धतत्त्वे सुमन्तुः–'पितृष्वसृसुतां मातृष्वसृसुतां मातुलसुतां *मातृसगोत्रां समानार्षेयीं विवाह्य चान्द्रायणं चरेत्परित्यज्यैनां मातृवद् बिभृयात्' इति दिक् ।

ष्टमेकविंशत्यधिकमेकाविंशातिशतम् उद्वोढुर्विवाहकर्माणि वार्जिता इत्यर्थः । मातुलकन्यादिविवाहे तु ईदृशधार्मिकोक्तसंख्याभङ्गः स्यादिति अभिप्रायः ।*मातृसगोत्रां मातुलसगोत्राम् । अधिकमग्रे । विवाहमात्रे इदं, मैथुनादौ तु सपिण्डापत्यदारेष्वित्यादि स्मृत्यन्तरोक्तं द्रष्टव्यम् । अत एव मातृवदिति दृष्टान्तः । दिगर्थस्तु सपिण्डादिषु भार्यात्वं नोत्पद्यते । रोगिण्यादौ तदुत्पद्यते इति मिताक्षरा । रोगिण्यादौ ऋक्षादिनाम्नीषु च भार्यात्वानुत्पत्तौ तज्जन्यपुत्रादेर्वर्णत्वानापत्तिभये भार्याभिन्नागमने प्रायश्चित्तापत्त्या च तत्र तदुत्पत्तिस्वीकारे सपिण्डादिष्वपि प्रत्युद्विवाहितादिवत् भार्यात्वं स्वीकार्यम् । तत्परिणेतुरिव सपिण्डादिपरिणेतुरपि निषेधबलात् पापमात्रमित्यन्ये ।

परे तु यस्या गमने मरणान्तं नैमितिकं तदुत्पन्नस्य 'पतितोत्पन्नः पतितो भवति' इति वचनेन पातित्याद् 'अनिन्द्येषु विवाहेषु' इत्यादौ राक्षसादीनामिव पातित्यप्रयोजकनरकप्रयोजकानामपि विवाहानां ग्रहणान्न वर्णत्वम् । प्रत्युद्वाहादिजन्ये रोहिण्यादिजन्ये च पातित्याभावाद्विवाहस्य तादृशनरकाप्रयोजकत्वाच्च वर्णत्वम् । अतः प्रथमे वैयर्थ्याद्भार्यात्वं नोपेयते, द्वितीये तदुपेयते इत्याहुः ।

भ्रातृमतीमिति पुत्रिकाकरणशङ्कानिरासाय,

यस्यास्तु न भवेद् भ्राता न विज्ञायेत वा पिता ।

*ऋषेरिदमार्षं प्रवरः, गोत्रं *प्रसिद्धम्, समाने आर्षगोत्रे यस्य तस्माज्जाता या न भवति ताम् ॥

अथ संक्षेपेण गोत्रप्रवरनिर्णयः। तौ च भिन्नौ निषेधे निमित्तं, *'सगोत्राय दुहितरं न प्रयच्छेत्' इति आपस्त-

नोपयच्छेत्तु तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥

इति मनूक्तेः । यस्याः पिता पुत्रिकाकरणाभिप्रायवान्न वेत्ति न विज्ञायेतेत्यर्थः । अनेनापरिभाषिताऽपि पितुरभिप्रायमात्रेण पुत्रिका भवतीति गम्यते । अभिसंधेराकारमाह मनुः—

अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम् ।
यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम् ॥ इति ।

वरेण सह संप्रतिपत्तौ तु पुत्रिकाकरणं स्पष्टमेव । सा च संप्रतिपत्तिर्द्वेधा—केवलमातामहसम्बन्धित्वेन उभयसम्बन्धित्वेन चेति । आद्ये दानमन्त्रमाह मनुः—

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ॥ इति ।

अन्त्ये चाह कात्यायनः—

अपुत्रोऽहं प्रदास्यामि तुभ्यं कन्यां, भवानपि ।
पुत्रार्थी चेदिहोत्पन्नः स नौ पुत्रो भवेदिति ॥

यत्र च नैतादृशशङ्का तामभ्रातृकामपि उद्वहेदिति । असमानार्षगोत्रजामिति स्त्रीविशेषणं व्याचष्टे-*ऋषेरिति । *प्रसिद्धमिति । यद्यपि पाणिनिना "अपत्यं पौत्रप्रभृतिगोत्रम्" (अष्टा० सू०४-१-१६२) इति पारिभाषितं तथापि सा परिभाषा शब्दशास्त्र एव, इह तु पुत्रपौत्रादिपरम्परैव । सा च वक्ष्यमाणविश्वामित्रादिऋषिवंश इत्यर्थः । *सगोत्रायेति । द्व्यामुष्यायणादीनां संकृतीनां वसिष्ठैः सह प्रवरभेदेन विवाहे प्रसक्ते प्रथमो निषेधः, एवं वत्सार्ष्टिषेणयोर्गोत्रभेदेऽपि विवाहे प्राप्ते

स्वोक्तेः, 'असमानप्रवरैर्विवाहः' इति गौतमोक्तेश्च । तत्र गोत्रलक्षणमाह प्रवरमञ्जर्यां बौधायनः—

विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गौतमः ।
अत्रिर्वसिष्ठः कश्यप इत्येते सप्त ऋषयः ॥

सप्तानामृ*षीणामगस्त्याष्टमानां यदपत्यं त*द्गोत्रम् । इति । यद्यपि केवलभार्गवेष्वार्ष्टिषेणादिषु केवलाङ्गिरसेषु हरितादिषु च *नैतत्, भृग्वाङ्गिरसोरु*क्तेष्वनन्तर्गतेः; तथाप्यत्रे*ष्टापत्तिरेवेति केचित् *अ-

---

द्वितीयश्च निषेध आवश्यकः । तथाच प्रथमे सगोत्रत्वाद्द्वितीये समप्रवरत्वान्न विवाह इत्यर्थः । *ऋषीणामिति । ऋषित्वं मन्त्रद्रष्टृत्वम् 'ऋषिर्दर्शनात्' इति यास्कोक्तेः । सप्तर्षिशब्दश्च रूढः पञ्चजनशब्दवत् । *गोत्रमिति । अगस्त्याष्टमानामित्यस्यानुवृत्तिः । तेन अगस्त्याष्टमसप्तर्ष्यपत्यम् ऋषिभूतं यत्तदेतेषां गोत्रमित्यर्थः । यथा जमदग्नेर्गोत्रं वत्सादयः । तथा गौतमस्य आयास्यादयः, भरद्वाजस्य दक्षगर्गादय इत्यादि । ऋषित्वोपादानादस्मदादौ तदपत्यत्वेऽपि नातिव्याप्तिः । *नैतदिति । तेषां सप्तर्ष्यपत्यत्वाभावात् । *उक्तेषु सप्तर्षिषु । *इष्टापत्तिरेवेति । न चैवम्—"अन्यत्र भृग्वाङ्गिरो गणात्" इति बौधायनोक्ताग्रिमपर्युदासानुपपत्तिः, भृग्वाङ्गिरोगणेषु समानगोत्रत्वस्यैवाप्राप्तेः;—इति वाच्यं, तेषां हि गोत्रत्वं दुरुपपादमेव । गोत्रसंदंशपाठात्तु जामदग्न्यभृगुगणस्य गौतमभरद्वाजाङ्गिरोगणयोश्च गोत्रत्वात्तत्सादृश्येन गोत्रत्वभ्रान्त्या प्रसक्तिमपेक्ष्य पर्युदासः, श्राद्धे कुण्डगोलकवत् । एवं सति आर्ष्टिषेणगोत्रोऽयं हरितगोत्रोऽयमिति व्यवहारो गोत्रभूतभृग्वङ्गिरोगणसादृश्याद्भ्रान्त्यैव । नन्वेवं तत्र केवलानामगोत्रत्वे किम्विवाहप्रयोजकमित्यत्राह—*अतएवेति । केचिदित्यरुचिः । सा च यद्यपि 'सगोत्राय दुहितरं न प्रयच्छेत्' इत्यत्र सप्तर्ष्यपत्यत्वमेव गो-

त एव स्मृत्यर्थसारे प्रवरैक्यादेवात्राविवाह उक्तः । यद्यपि वसिष्ठादीनां न गोत्रत्वं युक्तम्, तेषां सप्तर्षित्वेन तदपत्यत्वाभावात्; तथापि *तत्पूर्वभाविवासिष्ठाद्यपत्यत्वेन गोत्रत्वं युक्तम् । *अत एव *पूर्वेषां परेषां चैत-

---

त्रत्वम् 'असमानप्रवरैर्विवाहः' इति पृथक् निषेधात् ; तथाऽपि तावत्समानगोत्रत्वमित्यत्र प्रवरवत्त्वं गोत्रत्वम् 'प्रवराण्युक्तातैर्गोत्राणि' इति सत्याषाढोक्तेः । इहापि 'प्रवरेष्वनुवर्त्तते' इत्युक्तेश्च । तस्य च भृग्वाङ्गिरोगणेऽपि एकप्रवरत्वेन प्राप्तेः पर्युदासोपपत्तिरिति ।

अन्ये तु प्रवरवत्त्वं गोत्रत्वम् 'असमानप्रवरैः' इति पृथक्निषेधवैयर्थ्यात् । किन्तु 'गोत्रं वंशपरम्पराप्रसिद्धम्' इति विज्ञानेश्वराद्युक्तेः, सगोत्रत्वेन ये पठितास्तेषां यमुपक्रम्य प्रवराम्नानं स गोत्रम् । बौधायनोक्तिस्तूपलक्षणम् । तेन भृग्वाङ्गिरोगणेषु सप्तर्षिभिन्नत्वेऽपि अधिकाराद्गोत्रत्वम् । एवञ्च भृग्वादेरनुवृत्त्या च वत्सार्ष्टिषेणाद्योः सगोत्रत्वे प्रसक्ते पर्युदासोपपत्तिरित्याहुः ।

नतु—

भृग्वाङ्गिरोऽन्यं यत्किञ्चिद्दृषेर्यावत्सुवर्त्तनम् ।
तावत्समानगोत्रत्वमिति केचित्समूचिरे ॥
तन्नैवं सति सर्वत्र सगोत्रत्वनिबन्धने ।
अनुद्वाहे तु कुत्र स्यात्प्रवरैक्यं प्रयोजकम् ? ॥

वत्सत्वादिना सगोत्रत्वस्यैव सत्त्वादिति चेत् ? वत्सार्ष्टिषेणयोर्गोत्रभेदेपि प्रवरैक्यादेवाविवाहादिति । *तत्पूर्वेति । वसिष्ठादीनामिति वर्त्तते । *अत एव । युत्रवासिष्ठस्य प्राचीनवासिष्ठापत्यत्वादेव । *पूर्वेषामिति । तथाचागस्त्याष्टमप्रोक्तसप्तर्षीणां यदृषिभूतं पुत्रपौत्रादि अपत्यं तत्पूर्वभाविनामुत्तरभाविनां च गोत्रामित्यर्थः । तेन वत्सो जमदग्निगोत्रमिति तत्पुरुषेण, वयं वत्सगोत्रा इति बहुव्रीहिणा च क्रमेण व्यवहारः । वसिष्ठस्य प्राची-

ङ् गोत्रम् । अत्र *विशेषोऽस्मत्कृतप्रवरदर्पणे ज्ञेयः ॥

प्रवरास्तु प्रवरणानि प्रवराः । *कल्पकारा हि 'वानवसिष्ठापत्यत्वाभावे तस्य गोत्रत्वाभावापत्तिरित्युपष्टंभसङ्गतिः । अगस्त्याष्टमसप्तर्षीणां तु न गोत्रत्वं, तदपत्येषु गोत्रत्वव्यवहारानुपपत्तेः । केचित्तु वसिष्ठादेर्गोत्रत्वमौपचारिकं कुण्डिनादेः स्वगोत्रे एकगोत्रत्वेनाविवाहप्रयोजकत्ववद्वासिष्ठादेः सर्वस्वगणेषु सदृशगोत्रत्वप्रयोजकत्वेनाविवाहप्रयोजकतया सा(१)दृश्यमित्याहुः, तदसत् । न ह्यघमर्षणकौशिकविश्वामित्रेति गोत्रभूतो विश्वामित्रो निर्दिश्यते, तथा सति तस्य द्विप्रवरत्वापत्त्या विश्वामित्राणां त्र्या(२)र्षेय इत्यादिनिर्देशानुपपत्तेः । नचैकस्यैव गोत्रत्वं प्रवरत्वं च(३)सम्भवति अभेदे षष्ठ्यनुपपत्तेः । तस्माद् ऋष्यपत्यभूता एव तुल्यनामानो गौतमादय ऋषयः गोत्रत्वेन प्रवरत्वेन च स्वीकार्या इति । *विशेषः गोत्रस्य व्रियमाणतयानुवृत्तिखण्डनम् ।

वरणानि ऋषिसम्बन्धेनाग्निप्रार्थनानि, तान्युपपादयति—*कल्पकारा हीति । कल्पसूत्रेषु आश्वलायनानां मन्त्रः (४)'अग्ने महाँ असि ब्राह्मणभारत' इत्यादिः । अग्निर्देवो होता देवानित्या(दि(५)श्च । तत्र प्रथमो होतृमन्त्रः । तत्र हे अग्ने त्वं महाँ असीति प्रार्थ्य वासिष्ठ इति पुनः प्रार्थ्यते । यथाऽयं यजमानो वासिष्ठः वसिष्ठवंशोत्पन्नत्वात्, तथा त्वमपि वासिष्ठः, तेनोत्पादितत्वात् । एतेन प्रसिद्धब्राह्मण्यानां वसिष्ठानां यथा हविस्त्वया देवान्प्रति नीयते, तथा तद्वंश्यस्यास्य यजमानस्य प्रसिद्धब्राह्मण्यस्य हविर्देवान्प्रति त्वया नेयमिति प्रार्थना ध्वन्यते । द्वितीयश्चाध्वर्युमन्त्रः ।

---

(१) 'सादृशमि' ख० घ० (२) 'ऽयार्षेय इ' ङ०

(३) 'सम्भवति अभवति अभेदे' घ० ङ

(४) 'अग्ने महाँ अ' घ० ङ (५) कंसान्तर्गतं नास्ति । घ० ङ

सिष्ठेति होता' 'वासिष्ठवदित्यध्वर्युः, इत्यादिना *येषां प्र*वरणममनान्ति ते प्रवराः। तच्च वरणं यद्यपि *गोत्रभूतस्यापि क्वचिद्दृश्यते तथापि पूर्ववदृ*षिभेदो द्रष्टव्यः। *अन्यथा *तेषां त्र्यार्षेये 'एकार्षे' इत्यादिनिर्देशानुपपत्तेः। अन्येतु तद्गोणां त्र्यार्षेय इति भेदमाहुरिति *दिक्। तत्त्वं तु गोत्रभूतस्य पितृपितामहप्रपितामहा एव प्रवराः, 'पितैवाग्रेऽथ पुत्रोऽथ पौत्रः' इति शतपथश्रुतेः,

तत्र मन्त्रे वासिष्ठवदित्यग्निः प्रार्थ्यत इत्यर्थः। आदिपदात् भार्गवच्यावनाप्नवानौर्वजामदग्न्येति अण्णन्तादिना होता, तद्वैपरीत्येन -जमदग्निवदूर्ववदप्नवानवच्च्यवनवद्भृगुवदित्यध्वर्युरित्यस्य ग्रहः। एवं कात्यायनादिमन्त्रा ऊह्याः। *येषाम्। ऋषीणाम्।) *वरणम् अग्निप्रार्थनम्। सम्बन्धः षष्ठ्यर्थः *गोत्रभूतस्यापीति। यथा वासिष्ठेति होता वसिष्ठवदित्यध्वर्युरित्यादौ। *ऋषिभेदः वृद्धवसिष्ठोऽन्यः, युववासिष्ठो ऽन्यः। *अन्यथा ऋषिभेदानुपगमेन गोत्रभूतस्य प्रवरत्वासम्भवेन *तेषां वसिष्ठादीनाम्। वासिष्ठेन्द्रप्रमदाभरद्वाजास्त्रित्यत्र वासिष्ठेत्यत्र च गोत्रभूतवसिष्ठत्यागे त्र्यार्षेयत्व एकार्षेयत्वयोर्लोपापत्तेरित्यर्थः। नन्वेवम(७)ग्नेर्वरणकर्मत्वे "मन्त्रकृतो वृणीते" इत्यृषीणां कर्मताभङ्गापत्तिरित्यत आह-*दिगिति। ऋषीणां वरणकर्मत्वं नास्त्येव। तदुपगमे वासिष्ठेति वसिष्ठवदिति प्रत्ययवैयर्थ्यापत्तेः। वासिष्ठादेः प्रार्थनाकर्मत्वे सम्बुध्यन्तशब्दापेक्षणात्। तस्मादग्निरेव प्रार्थनाकर्म। मन्त्रकृत इति षष्ठी। मन्त्रकृतश्च ऋषयः तत्सम्बन्धेन होत्रादयः प्रार्थनाकर्तार इति सर्वं सुस्थम्। माधवस्तु गोत्रप्रवर्तकस्य ऋषेर्व्यावर्त्तको मुनिगणः प्रवरः। यथा गोत्रप्रवर्त्तकस्य भरद्वाजस्य व्यावर्त्तकावङ्गिरोबृहस्पती। आङ्गिरसबार्हस्पत्यभारद्वाजेति त्रिप्रवरान्वितभारद्वाजगोत्रोऽहमिति प्रयोगादि-

'परं परं प्रथमम्' इत्याश्वलायनोक्तेश्च । *अत्र विशेषमाह बौधायनः—

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्यत्र भृग्वङ्गिरसां गणात् ॥ इति

स्मृत्यर्थसारे—

*व्रिय(१)माणतया वापि सत्तया वाऽनुवर्तनम् ।

त्याह । तन्न, वासिष्ठेत्येकप्रवरान्वितवासिष्ठगोत्रोऽहमित्यादौ वसिष्ठभेदं(२) विनाऽगतेः । दिगर्थस्तु—गोत्रभूत(३)स्यर्षेः पितृपितामहप्रपितामहादय एव प्रवराः, तेषां च पितृपुत्रपौत्रक्रमेण(४)वरणे प्रवेशः 'पितैवाग्रेऽथ पुत्रोऽथ पौत्रः' इति शतपथ श्रुतेः 'परं परं प्रथमम्' इत्याश्वलायनवृत्तौ तथोक्तेश्च । अत एवाऽऽङ्गिरसबार्हस्पत्यभारद्वाजेत्यादौ तथैव दृश्यते । आङ्गिरसेत्यादि तद्धितस्तु यजमानस्य ऋषिसम्बन्धद्योतनार्थः । गोत्रात्पूर्वेषां मन्त्रकृतामेव प्रवरत्वं 'मन्त्रकृतो वृणीते' इति सूत्रादिति । तद्गोत्राणामिति । तथाच (५)'तेषां त्रार्षेय' इति न निर्देशः, किन्तु तद्गोत्राणां तदपत्यानां त्र्यार्षेय इत्येव । तथाच 'वसिष्ठेन्द्रप्रमदाभरद्वाजस्त्विति वसिष्ठानाम्' इत्यत्र वसिष्ठापत्यानां त्रयः प्रवरा इति (५॥)अत्र वसिष्ठस्य प्रवरत्वे बाधकाभाव इत्यर्थः । (६)वयं वसिष्ठगोत्रा इत्यादि प्रयोगः । *अत्रेति । सगोत्रायेति (७)निषेधे । अविवाहप्रयोजकसमानगोत्रत्वे इत्यर्थः । भृग्वङ्गिरोभिन्नैकऋष्यनुवृत्त्यैव सगोत्रत्वं नान्यथेत्यर्थः । ननु सा कुतो ज्ञायते इत्यत आह—*व्रियमा-

---

(१) 'व्रीयमाणा तथा' ग० ।
(२) 'विनाअयगतेः' ख० घ० ।
(३) 'तस्यर्षे' ख० ।
(४) 'वरणं प्र' घ० ।
(५) 'ते त्र्यार्षेय' घ० ।
(५॥) एकप्रवरस्थले ।
(६) 'वयं वासिष्ठगोत्रा' घ० ङ० ।
(७) 'निषेधः वि' घ० ङ० ।

*एकस्य दृश्यते यत्र तद्गोत्रं तस्य कथ्यते ॥

भृग्वङ्गिरोगणेषु तु माधवीये स्मृत्यन्तरे—

पञ्चार्षे त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः ।
(१)भृग्वाङ्गिरोगणेष्वेव शेषेष्वे*कोपि वारयेत् ॥

शेषगोत्रेषु एकोऽपि समानः प्रवरो विवाहं वारयेदित्यर्थः। बौधायनोऽपि भृग्वङ्गिरसावधिकृत्य "द्व्यार्षेयसान्निपातेऽविवाहस्त्र्यार्षेयाणां, त्र्यार्षेयसान्निपातेऽविवाहः पञ्चार्षेयाणाम्" इति। *भृग्वङ्गिरोगणेष्वपि

णत्तयेति। *एकस्य अष्टान्यतमस्य। यस्य अनुवर्त्तनं यत्र दृश्यते तस्यर्षेः अपत्यं गोत्रमुच्यते इत्यर्थः। तयोः सगोत्रत्वमिति यावत्। सगोत्रत्वमेकसप्तर्ष्यपत्यत्वं च तदनुवृत्त्या ज्ञायते। तदनुवृत्तिश्च द्वेधा–व्रियमाणतया, सत्तया च। तत्राद्या वत्सादिषु जमदग्न्यादेः तत्प्रवरेषु जामदग्न्यादिपदसंकीर्त्तनात्। द्वितीया च कपिषु भारद्वाजस्य। तत्प्रवरेषु आङ्गिरसामहैय्यौरुक्ष(२)यसेषु भारद्वाजपदसङ्कीर्तनाभावेऽपि केवलं सूत्रादिगततदनुक्रमणेषु भारद्वाजगोत्र(३)संदंशपाठेन तदनुवृत्तिप्रतीतेः। व्रियमाणत्वं पदेन प्रार्थनाकर्मसम्बन्धितया प्रार्थनाकर्मत्वम्। व्रियमाणतया वाऽनुवृत्तिर्न सार्वत्रिकीत्यतः सत्तयेत्युक्तम्। अधिकारेण क्वचिदुत्पादकतया च। अत एव भरद्वाजस्य कप्युत्पादकत्वमपि वदन्ति। *एकोपीति। शेषेष्वित्यनुवर्त्तते। भृग्वङ्गिरोगणभिन्नेषु इति तदर्थः। भृग्वङ्गिरोगणेषु त्वेकप्रवरसाम्ये विवाहो भवत्येवेति भावः। एतच्च केवलभृग्वङ्गिरोगणविषयम्। भृग्वङ्गिरोगणान्तर्गतगणेषु त्वाह—*भृग्वित्ति। सप्तमीनिर्देशाज्जमदग्न्यादिगणत्रयेन्तर्गतत्वलाभः। एकेति जमदग्निषु भार्गवच्यावनाप्नवानेति, भार्गवौर्वजामदग्न्येति, गौतमेषु

---

(१) 'भृग्वङ्गिरोगणेष्वेवं' क०।

(२) 'यसेसु' ख०। (३) 'सदंशपाठेन' ख०।

जमदग्निगौतमभरद्वाजेष्वेकप्रवरसाम्ये *सर्वेषामप्यसाम्ये वा *सगोत्रत्वादेवाविवाह इति *दिक् ।

अथ गोत्राणि प्रवराश्चोच्यन्ते । तत्र बौधायनः—

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।

आङ्गिरसौ(१)शिजकाक्षीवतेति, आङ्गिरसौतथ्यदैर्घतमसेति, भ(२)रद्वाजेषु आङ्गिरसबार्हस्पत्यभारद्वाजेति आङ्गिरसतैत्तिरिकापिभुवेति त्रिप्रवरेषु । *सर्वेषामिति । भरद्वाजेषु भारद्वाजगार्ग्यसैन्येति, आङ्गिरसतैत्तिरिकापिभुवेति । *सगोत्रत्वादेवेति । अविवाहप्रयोजकं सगोत्रत्वं तावद्द्वेधा—एकगोत्रत्वं सदृशगोत्रत्वं च । तत्राद्यमेकैकगणांतःपातिषु, तत्र मूलभूतस्य वत्सादेरेकस्यैव गोत्रत्वात् । यत्रापि गणावान्तरऋषीणामेव गोत्रत्वं, तत्रापि तदपत्यानि प्रति तस्यैकत्वमेव । द्वितीयं तु भिन्नभिन्नगणान्तःपातिषु, वत्सविदयोर्भिन्नयोरपि गोत्रयोरेकसप्तर्ष्यपत्यत्वेन सादृश्यात् । [*दिगिति ।] दिगर्थस्तु—समानप्रवरत्वं द्वेधा—एकप्रवरसाम्यं द्वि(३)प्रवरसाम्यं च । आद्यं भृग्वङ्गिरोगणव्यतिरिक्तेषु शेषेषु इति वचनात् । (४)द्वितीयं भृग्वङ्गिरोगणेषु । तच्चासङ्कीर्णं तत्राविवाहप्रयोजकं, तेषां गोत्रत्वाभावेन समानगोत्रत्वाप्रसक्तेः । अत एव च तेषु द्वित्रिप्रवरसाम्याभावे विवाह एव भवति । समानगोत्रत्वं चासङ्कीर्णं कपीनां भरद्वाजगणैः सहाविवाहप्रयोजकम् । तेषां भरद्वाजगणस्थत्वेनाङ्गिरोगणस्थत्वादेकप्रवरसाम्येऽपि अपेक्षितद्वि-

---

(१) 'क्षितकाक्षीवेति' ख० ।

(२) 'भरद्वाजेषु आङ्गिरसतैत्तिरिकापिभुवेत्यादि सगोत्रत्वादेवेति' ख० घ० ।

(३) 'द्वित्रिप्रवरसाम्यं आ' घ० ङ० ।

(४) 'द्वितीये भृ' । ङ० घ० ।

*ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥

तत्र*सप्त भृगवः । वत्सा बिदा आर्ष्टिषेणा (१)यास्का मित्रयुवो वैन्याः शुनका इति । *वत्सानां भार्गवच्यावनाप्नवानौर्वजामदग्न्येति, भार्गवौर्वजामदग्न्येति वा, भार्गवच्यावनाप्नवानेति वा । *बिदानां पञ्च—भार्गवच्यावनाप्नवानौर्वबैदेति, भार्गवौर्वजामदग्न्येति वा । एतौ

त्रिप्रवरसाम्याभावादिति । अन्यत्र सर्वत्र प्रायश एते सङ्कीर्णे इति बोध्यम् ।

*ऊनपञ्चाशादिति । तथाच बौधायनमते कारिका—

सप्तेह भृगवः, सप्तदशाङ्गिरस एव च ।
ततोऽत्रयश्च चत्वारो, बोद्धव्याः (२)कश्यपास्त्रयः ॥
चत्वारोत्र वसिष्ठाः स्युर्विश्वामित्रास्ततो दश ।
अगस्तयश्च चत्वार इति संग्रहकृद्वचः ॥ इति ।

*सप्तेति । भृगवो द्विविधाः—जामदग्न्याः, केवलाश्च । तत्र द्वौ वत्सबिदौ जामदग्न्यौ । वत्सादयः षट् केवला एव । बिदा अपि केवला इति केचित् । इह तु वत्सत्वादिना एकीकृत्य दर्शिताः । *वत्सानामिति । जामदग्न्यवत्सानामाद्यद्वयं, तत्र और्वजामदग्न्यशब्दयोः सत्त्वात् । (३)तृतीयं तु अजामदग्न्यवत्सानाम् । तत्र और्वजामदग्न्यशब्दयोरसत्त्वादिति विवेकः । 'तृतीयं केवलजामदग्न्यगोत्रस्येत्याश्वलायनः' इति दर्पणः । *बिदानामिति । तत्र त्रिप्रवरेषु बिदेषु और्वजामदग्न्यशब्दयोः । सत्त्वाज्जमदग्नेर्त्रिप्रमाणतयाऽप्यनुवृत्तिः । पञ्चप्रवरेषु बिदेषु जामदग्न्यशब्दाभावेऽपि

---

(१) 'यस्का' ग० । (२) 'कश्यपस्त्रयः' ख० ।
(३) 'तृतीयं तु तत्र' ख० ।

द्वौ जामदग्न्यसंज्ञौ । आर्ष्टिषेणानां भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति, भार्गवार्ष्टिषेणानूपेति वा । *एषां त्रयाणां परस्परमविवाहः । *वात्स्यानां भार्गवच्यावनाप्नवानेति । वत्सपुरोधसयोः पञ्च । भार्गवच्यावनाप्नवानवात्सपौरोधसेति । बैजवानिमतिथयोः पञ्च । भार्गवच्यावनाप्नवानबैजमतिथेति । एते त्रयः क्वचित् । एषामपि *पूर्वैरविवाहः । अत्र तत्तद्गणस्था ऋषयोऽन्यश्च विशेषो मत्कृते प्रवरदर्पणे ज्ञेयः । यस्कानां भार्गववै-

जामदग्न्यत्वप्रयुक्तौर्वशब्दमत्त्वाज्जमदग्नेः सत्तयाऽनुवृत्तिः, आश्वलायनसूत्रवृत्तौ "और्वजामदग्न्यशब्दौ जामदग्न्यत्वप्रयुक्तौ" इत्युक्तेः । ये तु जामदग्न्यबिदानामिदम्, "अजामदग्न्यबिदानां भार्गवौर्वबैदेति त्रय इति कात्यायनः" इति अजामदग्न्यबिदानामाहुः, तेषामौर्वशब्दसत्त्वेऽपि कात्यायनोक्त्याऽजामदग्न्यत्वमभिमतम् । आर्ष्टिषेणप्रभृतिपञ्चानां न जामदग्न्यत्वं जमदग्न्येः सत्तयाऽप्यनुवृत्त्यभावात् । *एषामिति । आर्ष्टिषेणानां वत्सबिदाभ्यां सहाविवाहः, त्रिप्रवरसाम्यात् । यद्यपि त्रिप्रवरार्ष्टिषेणानां नान्याभ्यां सह द्विप्रवरसाम्यं, तथापि पञ्चार्षेयपक्षसंमतत्वमपि प्रवरसाम्येऽत्राविवाहप्रयोजकं, (१)"वत्सा बिदा आर्ष्टिषेणा इत्येतेषामविवाहः" इति बौधायनात् । एवञ्च जामदग्न्यवत्सबिदयोः सगोत्रत्वसप्रवरत्वाभ्यामविवाहः, अजामदग्न्यवत्सार्ष्टिषेणाभ्यां तयोः सप्रवरत्वादेवेति । तदुक्तम्—

जामदग्न्यौ वत्सबिदावार्ष्टिषेणाः परस्परम् ।
नान्वियुः प्रवरैक्येन, सगोत्रत्वेन चादिमौ ॥ इति ।

*वात्स्यानामिति । अत्राच्यानां भार्गवच्यावनावाच्येति दर्पणः । *पूर्वैरिति । परस्परं चेति शेषः । त्रिप्रवरत्वसाम्यादिति

---

(१) 'वत्साविष्टदा आ' ङ० घ० ।

तहव्यसावेतसेति । (१)*मित्रयुवां भार्गव*वाध्र्यश्वदैवो(२)दासेति, भार्गवच्यावनदैवो(३)दासेति वा, वाध्र्यश्वेत्येको वा । वैन्यानां भार्गववैन्यपार्थेति । एत एव श्यैताः । शुनकानां शुनकेति वा गार्त्समदेति वा भार्गवगार्त्समदेति द्वौ वा । भार्गवशौनहोत्रगार्त्समदेति त्रयो वा (४)वेदविश्वज्योतिषां भार्गव(५)वेदवैश्वज्योतिषेति । शाठरमाठराणां भार्गवशाठरमाठरेति । एतौ द्वौ क्वचित् । यस्कादीनां स्वगणं त्यक्त्वा (६)सर्वैर्विवाहः । तदुक्तं स्मृत्यर्थसारे—

(७)यस्का मित्रयवो वैन्याः शुनकाः प्रवरैक्यतः ।
स्वं स्वं हित्वा गणं *सर्वे विवहेयुः परावरैः ॥ इति ॥

भावः । (८)यास्कानां वैतहव्येति नामान्तरम् । [*(९)मित्रयूनामिति पाठः ।] एषां दिवोदासा इति नामान्तरम् । *वाध्र्यश्वेति । अन्त्योपान्त्ययोर्व्यत्ययो वा । शौनहोत्रस्थाने शौनकेति केचित् । *सर्वे विवहेयुः परावरैरिति । वक्ष्यमाणैः सर्वैः प्रागुक्तवत्सविदार्ष्टिषेणैश्च त्रिभिः परस्परं यास्कादीनां चतुर्णां स्वस्वगणं हित्वा विवाहो भवति, म्रियमाणतया सत्तया वा एकस्यानुवृत्त्यभावेन सगोत्रत्वाभावात् प्रवरैक्याद् द्वित्रिप्रवरसाम्याभावाच्चेत्यर्थः । मित्रयूनां पाक्षिक(१०)द्विप्रवरसाम्यात् (११)द्विप्रवरव-

---

(१) 'मित्रयुवानां' क० ।
(२) 'दिवोदासेति' क० । (३) 'दिवादोसेति वा' क० ख० ।
(४) 'वेदानां' क० । (५) 'वदैवैश्व' क० ।
(६) 'सर्वे विवाहः' क० ।
(७) 'यस्का मित्रयुवो वैन्याः' क० । 'यस्का मित्रयुवा वैन्याः' ख० ।
(८) 'यस्कानां वैतहव्येति' ङ० घ० ।
(९) कंसान्तर्गतं नास्ति ।
(१०) 'द्वित्रिप्रवर' ख० । (११) 'त्रिप्रवरैर्व' ङ० घ० ।

अथाङ्गिरसः। ते गौतमाः, भरद्वाजाः, केवलाङ्गिरसश्चेति त्रिधा। (१) अत्र गौतमा *दश—आयास्याः,

---

त्सादिभिस्सहाविवाह इति केचित्। तत्पक्षग्राहिणामविवाहः, पक्षान्तरग्राहिणां मित्रयूनां विवाह एवेत्यन्ये। चतुर्विधशौनकानामेकगणस्थत्वाद्गोत्रत्वाभावेऽपि अविवाह एव, "एतेषामविवाहः" इति कात्यायानादिभिः सर्वेषामविवाहाभिधानात्। अधिकगणद्वयस्यापि परस्परं पूर्वोक्तैश्च विवाहः, द्वित्रिप्रवरसाम्याभावात्। हारावल्यां तु शुनकानां गार्त्समदेति, मित्रयूनां वाध्यूश्चेति च नामान्तरम्।

कात्यायनेन तु गणा भृग्वोर्द्वादश कीर्तिताः।
जामदग्न्याश्चतुर्भेदास्तथैवाजामदग्न्यकाः॥
वात्स्यायना अवाच्याश्च वैजवाः (२)शाबरादिकाः।
बिदार्ष्टिषेणा वत्सादि वेदविश्वादयस्तथा।
पार्थश्यैता आपिशला वीतहव्याद्वगृत्समाः॥

(३) बिदादयोष्टावजामदग्न्याः। वात्स्यायना जामदग्न्यवत्सा एवेति। तत्प्रवराः—अवाच्यानां भार्गवच्यावनावाच्येति त्रयः। (४)वैजवमैमथितयोः शाबरमाठराणां चोक्ता एव। बिदानां भार्गवच्यावनाप्नवानेति त्रय एव। वत्सपुरोधसां प्रोक्ता एव, भार्गववत्सपुरोधसेति त्रयो वा। मित्रयूनामपि शालायनेति। वन्यानां पार्थश्यैनेति, यस्कादीनां वीतहव्येति, शुनकानां गृत्समदेति नामान्तरं, मित्रयूनां शालायनेति नामान्तरमिति लौगाक्षिरित्युक्तम्।

*दशेति। "सप्तदशाङ्गिरस एव" इति संग्रहवचने सप्तैव गौतमा

---

(१) 'तत्र' क०।
(२) 'शाठरादिकाः' घ० ङ०।
(३) 'विषादयोष्टा' ख०। (४) 'वैजननेम' ङ० घ०।

शरद्वन्ताः, कौमण्डाः, दीर्घतमसः, (१)औशनसाः, कारेणुपालेयाः, राहूगणाः, सोमराजकाः, वामदेवाः, बृहदुक्थाश्चेति । तत्राद्यास्यानामाङ्गिरसायास्यगौतमेति । (२)शरद्वतानामाङ्गिरसगौतमशा(३)रद्वतेति । कौमण्डानामाङ्गिरसौतथ्यकाक्षीवतगौतमकौमाण्डेति वा, *आङ्गिरसायास्यौशिजगौतमकाक्षीवतेति वा, आङ्गिरसौत-

थ्याद्याः, राहूगणानां सोमराजकानां बृहदुक्थानां च बौधायनेनानुक्तेः । चत्वारो भरद्वाजाः षट् केवलाङ्गिरस इति सप्तदशेत्यर्थः । आयास्यानां गौतमेति नामान्तरम् । शरद्वन्तेत्यकारान्तं, शरद्वदिति तान्तं वा नाम पुष्पवन्तपदवत् । वर्णादिविपर्यासे च न प्रवरादिभेदो यथौतथ्य औ(४)चथ्येत्यादि । *आङ्गिरसायास्येति । पञ्च प्रवराः । आयास्यौशिजानामित्यन्ये । "आङ्गिरसौतथ्यगौतमौशिजकाक्षीवतेति पञ्चकाक्षीवतानाम्" इत्याश्वलायनः । आङ्गिरसौशिजेति (५)त्रयः औशिजानामित्यन्ये । *वामदेव्येति । गौतमवामदेवेति वा । अत्र राहूगणादित्रयस्याश्वलायनोक्तत्वादिहोक्तिः । अयास्यबृहदुक्थकाक्षीवद्दीर्घतमऋक्षपृषदश्वोतथ्याः सप्तान्ये आश्वलायनोक्ताः तत्रा(६)द्याश्चत्वारः सङ्ग्रहोक्त(७)सप्ता-

---

(१) 'औशनसः' क० ख० ।

(२) 'शरद्वन्तानां' क० ख० ।

(३) 'शरद्वन्तेति' क० ख० ।

(४) 'औचथेत्यादि' ख० ।

(५) 'त्रयः प्रवराः औशिनाना' ङ० घ० ।

(६) तत्राद्यास्त्रयः सप्तमश्चेति चत्वार इत्यर्थः ।

(७) 'सप्तान्तर्भाविना एव' घ० ङ० ।

थ्यगौतमौशिजकाक्षीवतेति वा, आङ्गिरसौशिजकाक्षीवतेति त्रयो वा। दीर्घतमसामाङ्गिरसौतथ्यकाक्षीवतगौतमदैर्घन(१)मसेति, आङ्गिरसौतथ्यदैर्घतमसेति त्रयो वा। औशनसानामाङ्गिरसगौतमौशनसेति त्रयः। (२)कारेणुपालेयानामाङ्गिरसगौतमकारेणुपालेति त्रयः। राहूगणानामाङ्गिरसराहूगणगौतमेति। सोमराजकानामाङ्गिरससोमराजकगौतमेति। वामदेवानामाङ्गिरस*वामदेव्यगौतमेति। बृहदुक्थानामाङ्गिरसबार्हदुक्थगौतमेति, आङ्गिरसवामदेवबार्हदुक्थेति वा। *उतथ्यानामाङ्गिरसौतथ्यगौतमेति। औशिजानाम्—'आङ्गिरसौशिजकाक्षीवत' इत्यापस्तम्बः, "आङ्गिरसायास्यौशिजगौतमकाक्षीवत" इति कात्यायनः। एतौ द्वौ क्वचित्। *रा(३)घुवानामाङ्गिरसराघुवगौतमेति के(४)चित्। तत्र मूलं चिन्त्यम्। एषां*सर्वेषां गौतमानामविवाहः॥

अथ भरद्वाजाः। ते चत्वारः—भरद्वाजाः, गर्गाः,

न्तर्भाविता एव। ऋक्षपृषदश्वा अग्रे वाच्यौ। उतथ्यमाह—*उतथ्यानामिति। ग्रन्थान्तरे औतथ्यआयास्यौशिजराहूगणसोमराजकबृहदुक्थकक्षीवद्राघुवा उक्ताः। तत्र सप्तानामन्तर्भूतत्वाद्राघुवानाह—*राघुवानामिति। *सर्वेषामिति। गौतमस्य ध्रियमाणतया सत्तया वाऽनुवृत्तेर्गोत्रैक्यात्, प्रायेण द्वित्रिप्रवरसाम्याच्च। तदुक्तम्—

गौतमाः सप्त चायस्याः शरद्वन्तस्तथापरे।
कौमण्डा दैर्घतमसस्तथा कारेणुपालयः॥
वामदेवा औशनसा गोत्रैक्यान्नान्वियुर्मिथः॥ इति।

---

(१) 'तमसेति वा आङ्गि' क०। (२) 'कारेणुपालानामाङ्गिरस' क० ख०। (३) 'रघुवाना' ख०। (४) 'क्वचित्' क०।

*ऋक्षाः, कपय इति । भरद्वाजानामाङ्गिरसबार्हस्पत्यभारद्वाजेति त्रयः । गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजसैन्यगार्ग्येति पञ्च, आङ्गिरससैन्यगार्ग्येति त्रयो वा *अन्त्ययोर्व्यत्ययो वा, भारद्वाजगार्ग्यसैन्येति वा । *गर्गभेदानामाङ्गिरसतैत्तिरिकापिभुवेति । ऋक्षाणां कपिलानां चाङ्गिरसबार्हस्पत्यभरद्वाजवान्दनमातवचसेति पञ्च, आङ्गिरसवान्दनमातवचसेति त्रयो वा । कपीनामाङ्गिरसामहीयवौरुक्षयसेति । आत्मभुवामाङ्गिरस*भारद्वाजबार्हस्पत्यमन्त्रवरात्मभुवेति पञ्च । अयं क्वाचित् । *भरद्वाजानां सर्वेषामविवाहः ॥

---

*ऋक्षाः आश्वलायनोक्ता एव । रौक्षायणा इति बौधायनोक्ताः। *अन्त्ययोरिति। उभयत्रापीति शेषः। शैन्येति तालव्यादिः क्वचित् । *गर्गभेदानामिति । तित्तिरयः कपिभूमयः खण्डिता इतिगर्गभेदास्त्रयः । कापिभुवेत्यस्यानन्तरम् आङ्गिरससैन्यगार्ग्येति वेति पाठः । 'आमहीयवा' इत्याश्वलायनः । आमहय्येति बौधायनः । "प्रागृक्षाणां कपीनां च" इति लिखनात्पञ्चप्रवरः कपिः ऋक्षान्तर्भूतः । गर्गान्तर्भूत इत्यन्ये । तस्यानेन कपिना सगोत्रत्वान्न विवाहः । तदुक्तम्—

भरद्वाजगणस्यापि तथा कपिगणस्य च ।
विवाहो न विधेयः स्यादन्योऽन्यं तु कदाचन ॥ इति ।

यद्यपि चाश्वलायनेन गौतमेषु ऋक्षाः पृषदश्वाश्च पठितास्तथापि आपस्तम्बादिभिः ऋक्षाणां भरद्वाजेषु पाठात् त्रियमाणतया सत्तया वा भारद्वाजानुवृत्तेः सगोत्रत्वात्प्रायेण द्वित्रिप्रवरसाम्याच्च । केचित्तु आङ्गिरसबार्हस्पत्यभारद्वाजेति, आङ्गिरसभारद्वाजकापेयेति पक्षद्वयमाहुः । *भारद्वाजेति । भारद्वाजबार्हस्पत्ययोर्व्यत्ययो वा । *भरद्वा-

अथ केवलाङ्गिरसः । (ते(१)च षट्–हारिताः, कुत्साः, कण्वाः, रथीतराः, मुद्गलाः, विष्णुवृद्धाश्चेति) हारितानाम् आङ्गिरसाम्बरीषयौवनाश्वेति । आद्यो*मान्धाता वा । कुत्सानामाङ्गिरसमान्धातृकौत्सेति । कण्वानामाङ्गिरसाजमीढकाण्वेति, आङ्गिरसघोरकाण्वेति वा । रथीतराणामाङ्गिरसवैरूपराथीतरेति, आङ्गिरसवैरूपपार्षदश्वेति वा, *अष्टादंष्ट्रपार्षदश्ववैरूपेति वा, अन्त्ययोर्व्यत्ययो वा । मुद्गलानामाङ्गिरस (भा(२)र्म्यश्वमौद्गल्येति, आद्यस्तार्क्ष्यो वा, आङ्गिरसतार्क्ष्यमौद्गल्येति वा । विष्णुवृद्धानामाङ्गिरस)पौरुकुत्स्यत्रासदस्यवेति । एषां*स्वगणं विहाय*सर्वैर्विवाहो भवति ।

*हारितकुत्सयोस्तु जानामिति । भारद्वाजाङ्गिरसामित्यर्थः । पृषदश्वानां केवलाङ्गिरोगणे रथीतरेषु पाठाच्चैतैरेव सहाविवाहः, गौतमैस्तु सह भवत्येव विवाह इति । तदुक्तम्—

भरद्वाजाः सकपयो गर्गा रौक्षायणा इति ।
चत्वारोऽपि भरद्वाजगोत्रैक्यान्नान्वियुर्मिथः ॥ इति ।

*मान्धातेति । मान्धात्राम्बरीषयौवनाश्वेतीत्यर्थः [*अष्टादंष्ट्रेति] । "अष्टादंष्ट्रेत्यष्टादंष्ट्राणाम्" इत्याश्वलायनः । *स्वगणामिति । *सर्वैरिति । परस्परं पूर्वैरङ्गिरोभिश्चेत्यर्थः सगोत्रत्वाभावात्, द्वित्रिप्रवरसाम्याभावाच्च । स्वस्वगणे तु न विवाहः । तदुक्तम्—

केवलाङ्गिरसश्चैके विष्णुवृद्धाः सकण्वजाः ।
हरिता रथीतराश्च मुद्गलाः प्रवरैक्यतः ॥
स्वं स्वं हित्वा गणं सर्वे विवहेयुः परावरैः ॥ इति ।

*हारितेति । आर्षेयाणां पाक्षिकद्व्यार्षेयसान्निपातात् । "हरित-

---

(१) 'कंसान्तर्गतं नास्ति क० । (२) कंसान्तर्गतं नास्ति ।

न भवति ॥

अथा(१)त्रयः । ते चत्वारः-अत्रयः, वाद्भुतकाः, गविष्ठिराः, मुद्गला इति । *आद्यानामात्रेयार्चनानसश्यावाश्वेति । वाद्भुतकानाम्-आत्रेयार्चनानसवाद्भुतकेति । धनंजयानामात्रेयार्चनानसधानञ्जयेति क्वचित् । गविष्ठिराणामात्रेयार्चनानसगाविष्ठिरेति, आत्रेयगाविष्ठिरपौर्वातिथेति वा । मुद्गलानामात्रेयार्चनानसपौर्वातिथेति । वामरथ्यसुमङ्गलबैजवापानामात्रेयार्चनानसातिथेति, आत्रेयार्चनानसगाविष्ठिरेति वा । सुमङ्गलानामात्रिसुमङ्गलश्यावाश्वेति केचित् । *अत्रेः पुत्रिकापुत्राणामात्रेयवामरथ्यपौत्रिकेति । अत्रीणां*सर्वेषामविवाहः ।

कुत्सपिङ्गशंखदर्भभैमगवानाम्" इत्याश्वलायनेन सर्वप्रवरसाम्योक्तेश्च ।

*आद्यानामिति । अत्रीणामाद्यत्रीति नामान्तरम् । *अत्रेरिति । वामरथ्याः वालेयाः हालेयाः कौद्रेयाः शौभ्रेयाः गोपवना इत्यत्रेः पुत्रिकापुत्राः । एषामत्रिवासिष्ठाभ्यां न विवाहः । अत्रिविश्वामित्राभ्यामित्यन्ये । तदुक्तम्—

विश्वामित्रात्रिगोत्रेण नोद्वहेयुर्धनञ्जयाः ।
अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा ॥
तथैव जातूकर्ण्याश्च वासिष्ठैरत्रिभिः सह ॥ इति ।

उक्तश्लोकस्यैवैकान्वय इति प्रथमं मतम् । प्रथमश्लोकस्यैवैकान्वय इत्युत्तरं मतम् । *सर्वेषामिति । सगोत्रत्वात्सप्रवरत्वाच्च । तदुक्तम्—

---

(१) 'अथात्रेयः' क० ख० ।

अथ विश्वामित्राः। ते दश-कुशिकाः, लोहिताः (१)रौक्षकाः, का(२)मकायनाः, अजाः, कताः, धनंजयाः, अघमर्षणाः, पूरणाः, इन्द्रकौशिका इति। कुशिकानां वैश्वामित्रदेवरातौदलेति। लोहितानां वैश्वामित्राष्टकलौहितेति, अन्त्ययोर्व्यत्ययो वा, वैश्वामित्रमाधुच्छन्दसाष्टकेति वा, (वैश्वा(३)मित्राष्टकेति द्वौ वा)। रौक्षकाणां वैश्वामित्रगाथिनरैवणेति, वैश्वामित्ररौक्षकरैवणेति वा। कामकायनानां वै(४)श्वामित्रदेवश्रवसदै(५)वतरसेति। अजानां वैश्वामित्रमाधुच्छन्दसाजेति, वैश्वामित्राश्मरथवाधूलेति वा। (ध(६)नंजयानां विश्वामित्रमाधुच्छन्दसधानंजयेति, वैश्वामित्रमाधुच्छन्दसाघमर्षणेति वा। कतानां वैश्वामित्रकात्यात्कीलेति।) अघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति। पूरणानां वैश्वामित्रपौरणेति द्वौ, वैश्वामित्रदेवरातपौरणेति वा। इन्द्रकौशिकानां वैश्वामित्रेन्द्रकौशिकेति द्वौ। एते बौधायनोक्ताः। रौहिणानां वैश्वामित्रमाधुच्छन्दसरौहिणेति। रेणूनां वैश्वामित्र(७)गाथिनरैणवेति। वेणूनां वैश्वामित्रगाथि-

चत्वारोऽत्रय आ(८)द्यत्रिवाद्भूतकगाविष्ठिराः।
मुद्गलाश्चेति गोत्रैक्यात्प्रवरैक्याच्च नान्वियुः॥ इति।

लोहितानामष्टकेति, रौक्षकाणां रेवणेति, कामकायनानां श्रौतमतेति, अघमर्षणानां विश्वामित्रेति, रेणूनां हर्यश्वेति(९)गाधिनेति च, जन्हूनां कौशिकेति शालङ्कायनेति च, आश्मरथ्यानाम् अजेति कुशि-

---

(१) 'रौक्षाकाः' क०।
(२) 'कामायनाः' ख०।
(३) कंसान्तर्गतं नास्ति क०।
(४) 'वैश्वामित्रदैवश्रवस' क०।
(५) 'दैवतरसेति वा' ख०।
(६) कंसान्तर्गतं नास्ति क०।
(७) 'गाथिनवणवेति' क०।
(८) 'आद्यात्रिवा' घ० ङ।
(९) 'गाथिनेति' घ० ङ०।

नवैणवेति । जह्नूनां वैश्वामित्रशालङ्कायनकौशिकेति । आश्मरथ्यानां वैश्वामित्राश्मरथ्यवाधूलेति । उदवेणूनां वैश्वामित्रगाथिनवैणवेति । एते आश्वलायनमात्स्योक्ताः । अन्यैस्त्वन्येपि*षड्गणा उक्ताः । तेऽन्यत्र मत्कृतौ ज्ञेयाः । *एषां विश्वामित्राणामविवाहः ॥

अथ कश्यपाः । ते पञ्च—निध्रुवाः (१)कश्यपाः, रेभाः, शण्डिलाः, लौगाक्षयश्च । निध्रुवाणां काश्यपावत्सारनैध्रुवेति । कश्यपानां काश्यपावत्सारासितेति । रेभाणां काश्यपावत्साररैभ्येति । (२)शण्डिलानां काश्यपावत्सारशाण्डिल्येति । *अन्त्यस्थाने देवलो वा, सितो वा,

क्षेति च नामान्तरम् । उदवेणूनां वेणूनां च प्रवरैक्यम् । *षडिति । (३)"साहुलानां वैश्वामित्रसा(४)हुलमाहुलेति, हिरण्यरेतसां वैश्वामित्रहैरण्यरेतसेति द्वौ, सुवर्णरेतसां वैश्वामित्रसौवर्णरेतसेति द्वौ, कपोतरेतसां वैश्वामित्रकापोतरेतसेति द्वौ, घृतकौशिकानां वैश्वामित्रघृतकौशिकेति द्वौ, कथकानां वैश्वामित्रकाथकक्राथकेति त्रय इत्यर्थः । "अष्टकरोहितानां विश्वामित्राष्टकेति द्वौ" इति आपस्तम्बः । *एषामिति । परस्परमिति शेषः सगोत्रत्वात् समप्रवरत्वाच्च । तदुक्तम्—

कुशिका लोहिताश्चैव रौक्षकाः कामकायनाः ।
(५)कता धनञ्जया अजा अघमर्षणपूरणाः ।
इन्द्रकौशिकजाश्चेति विश्वामित्रगणा दश ।
नोद्वहेयुः सगोत्रत्वात्क्वचिच्च प्रवरैक्यतः ॥ इति ।

[*अन्त्यस्थाने इत्यादि ।] आसितो वेति च्छेदः । कृष्य-

---

(१) 'कश्यपाः शण्डिलाः रेभाः' क० । (२) 'शाण्डिलानां' ग० ।

(३) 'सौहुलानां ख० । (४) 'साहुलामा' ख० ।

(५) 'कता धनञ्जया अजाघमर्षणपूरणाः' ख० ।

*शाण्डिलासितदेवलेति वा, काश्यपासितदेवलेति वा, अन्त्ययोर्व्यत्ययो वा, देवलासितेति द्वौ वा । लौगाक्षीन् वक्ष्यामः । एषां कश्यपानामविवाहः ।

अथ वसिष्ठाः । ते पञ्च–वसिष्ठाः, कुण्डिनाः, उपमन्यवः, पराशराः, जातूकर्ण्याश्चेति । वासिष्ठानां वासिष्ठेन्द्रप्रमदाभरद्वस्विति, वासिष्ठेत्येको वा । कुण्डिनानां वासिष्ठमैत्रावरुणकौण्डिन्येति । उपमन्यूनां वासिष्ठेन्द्रप्रमदाभ(१)रद्वस्विति, वासिष्ठभरद्वस्विन्द्रप्रमदेति वा, आद्ययोर्व्यत्ययो वा । पराशराणां वासिष्ठशाक्त्यपाराशर्येति । जातूकर्ण्यानां व(२)सिष्ठात्रिजातूकर्ण्येति । *वसिष्ठानां न्तरमते काश्यपानामयं (३)प्रवरः । *शाण्डिलेति । शाण्डलेति च ऋष्यन्तरमते । आसितदैवलशाण्डिल्येति भवदेवः । शाण्डिलासितदैवलेति प्रवरपक्षे सत्तयैव कश्यपस्यानुवृत्तिः । शाण्डिलानां निध्रुवै रेभैश्चाविवाहः, काश्यपावत्सारशाण्डिल्येति पाक्षिकप्रवरमादाय समप्रवरत्वात्सगोत्रत्वाच्च । अन्येषां तु कश्यपस्य म्रियमाणतया सत्तया चानुवृत्तेः सगोत्रत्वात्समप्रवरत्वाच्च । तदुक्तम्—

त्रयश्च कश्यपगणा निध्रुवा रैभशाण्डिलाः ।
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परम् ॥ इति ।

(४)आभरद्वसव्येति अभरद्वस्विति वा । पराशराणां प्रवरा आद्यवासिष्ठानां केचिदाहुः । *वसिष्ठानामिति । गोत्रैक्यात्प्रवरैक्याच्च । तदुक्तम्—

वसिष्ठाः कुण्डिनाश्चैव उपमन्यु पराशराः ।
वसिष्ठा इति चत्वारो गोत्रैक्यान्नान्वियुर्मिथः ॥ इति ।

---

(१) 'भरद्वासव्येति वसिष्ठाभर' क० ख० ।
(२) 'वासिष्ठात्रि जातू' ख० ग० ।
(३) 'प्रवरः शाण्डिल्येति शाण्डिलेति' घ० ङ० ।
(४) 'अभरद्वसव्येति' ख० ।

सर्वेषामविवाहः, *अन्त्यस्यात्रिभिश्च ।

अथागस्त्याः । ते चत्वारः-इध्मवाहाः, साम्भवाहाः, सोमवाहाः, यज्ञवाहाश्चेति । आद्यानामागस्त्यदा(१)र्ढ्यच्युतैध्मवाहेति, आग(२)स्त्येत्येको वा । सोमवाहानामागस्त्यदा(३)र्ढ्यच्युतसोमवाहेति । सा(४)म्भवाहानां साम्भवाहोऽन्त्यः, यज्ञवाहानां यज्ञवाहोऽन्त्यः, आद्यौ पूर्वोक्तावेव । सारवाहानां तदन्तास्त्रयः । दर्भवाहानां तदन्तास्त्रयः । अगस्तीनामागस्त्यमाहेन्द्रमायोभुवेति । पूर्णमासानामागस्त्यपौर्णमासपारणेति । हिमोदकानामागस्त्यहै(५)मवर्चिहैमोदकेति । पाणिकानामागस्त्यपैनायकपाणिकेति । एते षट् क्वचित् । *अगस्तीनां सर्वेषामविवाहः ।

अथ *द्विगोत्राः । शौङ्गशैशिरीणामाङ्गिरसबार्हस्प-

---

*अन्त्यस्येति । द्विगोत्रत्वादिति वक्ष्यति ।

*अगस्तीनामिति । सगोत्रत्वात्सप्रवरत्वाच्च । तदुक्तम्—

अगस्तयः साम्भवाहाः सोमवाहा इति त्रयः ।
गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परम् ॥

*द्विगोत्रा इति । ते च भरद्वाजानां केवलाङ्गिरसामत्रीणां कश्यपानां वासिष्ठानां च, नान्येषाम् । तेषां त्रयो भेदाः-शौङ्गशैशिरयः, संकृतयः, लौगाक्षयश्च । तत्र भारद्वाजात् शुङ्गाद्विश्वामित्रस्य (६)शैशिरेक्षेत्रे जातः शौङ्गशैशिरिः । तदुक्तम्—

भारद्वाजेन शुङ्गेन विश्वामित्रस्य शैशिरे ।
क्षेत्रे जातो द्विगोत्रीशः प्रोच्यते शौङ्गशैशिरिः ॥

---

(१) 'दार्ढच्युतै' क० । (२) 'अगस्त्येको वा' ख० ।
(३) 'दार्ढच्युत' क० । (४) 'साम्भवानां' क० ।
(५) 'हैमवर्चि' ग० । (६) 'शैशरे' घ० ङ० ।

त्यभारद्वाजका(१)त्याक्षीलेति पञ्च, कात्याक्षीलयोः स्थाने शौङ्गशैशिरिर्वा, । *आङ्गिरसका(२)त्याक्षीलेति त्रयो वा । एषां भरद्वाजैर्विश्वामित्रैश्चाविवाहः । *एवं कपिलानां कतानां च । *संकृति*पूतिमाषादीनां आङ्गिरसगौरि(३)वीतिसांकृत्येति, शाक्त्यगौरि(४)वीतिसांकृत्येति वा, ((५)अन्त्ययोर्व्यत्ययो वा) । एषां स्वगणस्थैर्वासि-

विंश्वामित्रभरद्वाजैस्तज्जानां तेन नान्वयः ॥ इति ॥

*आङ्गिरसकात्येति । आद्यो भारद्वाजो वा । *एवमिति । भरद्वाजैर्विश्वामित्रैश्चाविवाह इति सम्बध्यते । तत्र कपिलानाम् आङ्गिरसबार्हस्पत्यभारद्वाजवान्दनमातवचसेति पञ्चोक्ताः । न चात्र विश्वामित्रसम्बन्धे मानाभावः । विश्वामित्रं देवरातं प्रकृत्य "तस्यैते कापिलेयबाभ्रवाः" इत्यैतरेयब्राह्मणे कापिलेयोक्त्या लिङ्गविधया मानत्वात् । कपिलानां वैश्वामित्रत्वाभावे एषां वैश्वामित्रत्वानुपपत्तेः । कतानां वैश्वामित्र(६)कात्यात्कीलेति त्रय उक्ताः । न चैषां भरद्वाजसम्बन्धे मानाभावः, शौङ्गशैशिरीणां भारद्वाजकात्येति प्रवरपक्षे कतस्य भरद्वाजसम्बन्धलाभात् । अतएव कतः 'शौङ्गशैशिरिः' इत्युच्यते । *संकृतीति । संकृतीनां निर्भेदत्ववारणाय ।*पूतिमाषादीति । उभयत्रापि गौरिवीतसांकृत्ययोर्व्यत्ययो वा बोध्यः । एषां सर्वेषां वासिष्ठत्वमप्यस्ति आपस्तम्बादिभिर्वसिष्ठगणे पाठात्, वासिष्ठशक्तेः पाक्षिकवरणाच्च । एते आङ्गिरसयु(७)ताः वासिष्ठैः क्रयक्रीता इति केचित् । वसिष्ठपुत्रस्य शक्तेर्दत्तपुत्रा इत्यन्ये । अत एव वासिष्ठैर्लौगाक्षिभिश्च सगोत्रत्वा-

---

(१) 'कात्यात्कीलेति पञ्च, कात्यात्कीलयोः' क० ।

(२) 'कात्यात्कीलेति' क० ।

(३) 'गौरिवीत' क० ।

(४) 'वीतसांकृत्येति' क० ।

(५) 'कंसान्तर्गतं नास्ति क० ।

(६) 'कात्कात्कीलेति' ख० ।

(७) 'युताः' ख० ।

ष्ठैः *शौङ्गशैशिरैर्लौगाक्षिभिश्चाविवाहः । *कश्यपैरपीति प्रयोगपारिजाते । लौगाक्षीणां काश्यपावत्सारवासिष्ठेति, काश्यपावत्सारासितेति वा । एतेऽहर्वसिष्ठा नक्तंकश्यपाः । *एषां वसिष्ठैः कश्यपैः (१)संकृतिभिस्समप्रवरत्वाच्चाविवाहः । (२)स्वगणस्थैरिति च सर्वेऽपि वासिष्ठा इत्येवमर्थम् । यद्यपि एषां केवलाङ्गिरसत्वमस्ति बौधायनेन केवलाङ्गिरोगणमध्ये पाठात्तथापि तैः सह न विवाहप्रतिबन्धः सगोत्रत्वाभावात्, द्वित्रिप्रवरसाम्याभावाच्च । *शौंगशैशिरैरिति । एषां भारद्वाजाङ्गिरसत्वमाश्रित्य भारद्वाजाङ्गिरोभिः शौङ्गशैशिरैश्च सह विवाहो न भवतीत्यभिप्रायेण । अन्ये तु केवलाङ्गिरोगणमध्ये एवैषां पाठः । भरद्वाजस्य सत्तयाऽनुवृत्तौ कपिवत् ज्ञापकाभावान्न भरद्वाजाङ्गिरसत्वं, नापि शौङ्गशै(३)शिरत्वमिति मन्यन्ते । परेतु आङ्गिरसशब्दादाङ्गिरसत्वं, शक्तिगौरिवीतशब्दाच्च वासिष्ठत्वं वासिष्ठस्य व्रियमाणतयाऽनुवृत्त्यभावेऽपि सत्तयाऽनुवृत्तेः । तदुक्तम्—

संकृतीनां द्विवंश्यत्वाद्वासिष्ठैश्च चतुर्विधैः ।
स्ववर्गीयैः सगोत्रत्वात्प्रवरैक्याच्च नान्वयः ॥ इति ।

अतः शौङ्गशैशिरैर्वसिष्ठैश्चाविवाहो युक्त एवेति प्राहुः । *कश्यपैरिति ।

काश्यपेयगणस्यापि वासिष्ठस्य गणस्य च ।
संकृतिपूतिमाषाभ्यां विवाहो न परस्परम् ॥ इति ।

केचित्तु तत्र एतत्कारिकामात्रं मूलं, तन्नाश्रयणीयं कश्यपगणे पाठाभावादित्याहुः । *एषामिति । सगोत्रत्वात् क्वचित्समप्रवरत्वाच्च । तदुक्तम्—

---

(१) 'संकृत्याद्यैश्चा' क० ख० । (२) 'अन्ये तु स्वगणस्थै' घ० ङ० ।
(३) 'शिशिरत्वमिति' ख० ।

श्चाविवाहः । *देवरातस्य जामदग्न्यैर्विश्वामित्रैश्चाविवाह इति प्रयोगपारिजाते। तदयुक्तम् । ब(१)ह्वृच श्रुतौ—

यथैवाङ्गिरसरसः सन्नुपेयां तव पुत्रताम् ।
आङ्गिरसो जन्मनास्याजी(२)गर्तिः श्रुतः कविः ॥

इत्यङ्गिरोगणस्थत्वेन भार्गवजामदग्न्यत्वस्मृतेर्हरिवंशादिस्मृतेश्च बाधात् । (३)तेन द्वौ देवरातौ एक आङ्गिरसः श्रुत्युक्तः, अन्यो भार्गवः । तयोः कल्पभेदेऽप्याङ्गिरसेन देवरातेन जामदग्न्यैर्भवत्येव विवाहः, भार्गवे-

---

वासिष्ठैः काश्यपैर्नित्यं लौगाक्षीणामनन्वयः ।
अहर्वासिष्ठतोक्तिस्तु प्रयाजाद्यादि गोचर ॥ इति ।

*देवरातस्येति । देवरातानां वैश्वामित्रदेवरातौदलेति त्रयः प्रवराः । तदुक्तम्—

जमदग्निगणस्यापि विश्वामित्रगणस्य च ।
न देवरातगोत्रेण विवाहः स्यात परस्परम् ॥ इति ।

न च देवरातस्य बौधायनादिभिर्जामदग्न्येष्वकथनात् जामदग्न्यत्वे मानाभावः, तत्र जमदग्न्यनुजत्वप्रसिद्धेः । तथा च हरिवंशे—

और्वस्यैव मृचीकस्य सत्यवत्यां महायशाः ।
जमदग्निस्तपोवीर्यो जज्ञे ब्रह्मविदां वरः ॥
मध्यमस्तु शुनःशेपः शुनःपुच्छः कनिष्ठकः ।
देवैर्दत्तः शुनः शेपो विश्वामित्राय भार्गवः ॥
देवैर्दत्तः स वै यस्माद्देवरातस्ततोऽभ(४)वत ॥

इतिजमदग्निसम्बन्धकथनात् । न चैतावता देवरातस्य भार्ग-

---

(१) 'बह्वृच' नास्ति क० । (२) 'जीगर्तः' क० ।
(३) 'तेन प्रत्यक्षश्रुत्या हरिवंशादि द्वौ' ख० ।
(४) 'भवेत्' घ० ङ० ।

ण तु नेति तत्त्वम् । *धनंजयानां विश्वामित्रैरात्रिभिश्चाविवाहः । *जातूकर्ण्यानां वसिष्ठैरात्रिभिश्चाविवा-

वत्त्वं भविष्यति न जामदग्न्यत्वमिति वाच्यं, मत्स्यपुराणे जमदग्नेर्जामदग्न्यविदेषु पाठाज्जामदग्न्यत्वे तद्भ्रातुर्देवरातस्यापि तथात्वात् । एकर्ष्युत्पन्नयोर्भिन्नगोत्रप्रवरत्वासम्भवात् । न च विदान्तर्गतस्य जमदग्नेर्देवरातज्येष्ठत्वे किं मानमिति वाच्यं, भार्गवत्वस्यैव तन्मानत्वात् । यत्तु देवरातौ द्वौ एको भार्गवः, अन्य आङ्गिरसः । यथैवाङ्गिरसः सन्नुपेयां तव पुत्रताम् । आङ्गिरसो जन्मना(१)ह्याजीगर्त्तिः श्रुतः कविः इति श्रुतेः । तत्र हरिवंशो न प्रवर्त्तते तस्य भार्गवदेवरातत्वात् । तथाचाभार्गवेण देवरातेन जामदग्न्यैर्विवाहो भवत्येवेति । तदपि न, कल्पभेदेन तादृशश्रुत्युपपत्तेराङ्गिरसदेवरातस्यैव भार्गवत्वात्, भृग्वङ्गिरसोः पञ्चप्रवरत्वादिनाऽतिसाम्येन भार्गवेणैवाङ्गिरसेत्यभिधानसम्भवाच्च । *धनञ्जयानामिति । वैश्वामित्रमाधुच्छन्दसधानञ्जयेति त्रयः प्रवराः । आत्रेयार्चना(२)नासधानञ्जयेति पक्षान्तरे प्रवरसाम्यात् सगोत्रत्वात् विश्वामित्रानुवृत्तेश्च । तदुक्तम्—

आत्रेयस्य गणस्यापि विश्वामित्रगणस्य च ।
धनञ्जयाख्यगोत्रेण नान्योऽन्यं पाणिपीडनम् ॥ इति ।
अत्रेस्तु पुत्रिकापुत्रा वामरथ्यादयस्तथा ।
विश्वामित्रात्रिगोत्राभ्यां नोद्वहेयुर्धनञ्जयाः ॥ इति ।

वामरथ्या धनञ्जयाश्च विश्वामित्रात्रिभ्यां नोद्वहेयुरित्यर्थः । *जातूकर्ण्यानामिति । वासिष्ठयात्रेयजातूकर्ण्येति त्रयः प्रवराः, वासिष्ठात्र्योरनुवृत्तेः । तदुक्तम्—

तथैव जातूकर्ण्याश्च वसिष्ठैरत्रिभिस्सह । इति

---

(१) 'स्वाजीगर्त्तिः' घ० ङ० ।
(२) 'नानस' घ० ङ० ।

हः । एवं(१)दत्तक्रीतकृत्रिमस्वयंदत्तपुत्रिका *पुत्रादीनाम् उत्पादकपालकयोः पित्रोर्गोत्रप्रवरा वर्ज्या इति प्रवरमञ्जरीनारायणवृत्तिप्रयोगपारिजातादयः । अत्र सर्वत्रो*पपत्तयः मूलं च मत्कृते प्रवरदर्पणे ज्ञेयमिति दिक् ॥

नोद्वहेयुरितिवर्त्तते *पुत्रादीनामिति । आदिना क्षेत्रजग्रहः *उपपत्तय इति । तुल्यन्यायात् ।

द्व्यामुष्यायणका ये च दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाह्याः शौङ्गशैशिरयोर्यथा ॥

इति संग्रहोक्तेश्च, "अथ ये दत्तक्रयक्रीतकृत्रिमाः पुत्रिकापुत्राः परपरिग्रहेणार्षेया जातास्ते द्व्यामुष्यायणा भवन्ति । यथैते शौङ्गशैशिरिणो यानि चान्यानि एवं समुत्पत्तीनि कुलानि भवन्ति" इति कात्यायनवचनाच्च । नारायणवृत्तौ जनकपालकयोर्दत्तादीनां गोत्रनिषेधः, शौङ्गशैशिरिग्रहणस्य प्रदर्शनार्थत्वादित्युक्तेश्च । यत्तु—

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ इति

मानवेन जीवद्दशायाम् आर्षिणवर्णाभिवादेषु, मृते श्राद्धदेवतात्वे, ज(२)नकगोत्रसम्बन्धनिवृत्त्यर्थम् , उत्तरार्द्धे तथैवोक्तेः । अतएव—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।

इत्यत्र पितृशब्देन दत्तकस्य जनक एवोक्तः । अन्यथा पितृशब्दवैयर्थ्यात् । अत्र चावयोरयमिति संविदिं निराकृत्य केवलदत्तकनिराकरणं दिगर्थः श्राद्धे विस्तरः । वस्तुतस्तु मनुवचनमपि द्व्यामुष्यायणदत्तकपरमेव । तस्यापि च विवाहो जनकगोत्राया निषिद्ध एव । स्वस्वजनकगोत्रसम्बन्धाभावेन तस्याः स्वगोत्रत्वाभावेऽपि पितृसगोत्रत्वात् । एतदर्थमेव 'असगोत्रा च या पितुः' इ-

---

(१) 'दत्तकक्रीत' ख० ।

(२) 'जनकागोत्रसम्बन्धनिवृत्त्यर्थम् उत्तरार्द्धे' घ० ङ० ।

क्षत्रियवैश्ययोस्तु पुरोहितगोत्रप्रवरावेवेति *सर्वसिद्धान्तः। यद्यपि बह्वृचपरिशिष्टे कपि(१)भरद्वाजयोर्वि-

त्युक्तं मनुनेति प्रपञ्चितं प्राक्। द्व्यामुष्यायणानां सर्वेषां गोत्रद्वयसम्बन्धिवरणे प्राप्ते व्यवस्थामाहाश्वलायनः—"तेषामुभयतः प्रवरान् प्रवृणीते एकमितरतो द्वावितरतः द्वौ वा इतरतः त्रीनितरतः न हि चतुर्णां प्रवरोऽस्ति न पञ्चानाम्" इति। तत्रापि कात्यायनो लौगाक्षिश्च—'पू(२)र्वःप्रवर उत्पादयितुः उत्तरः प्रतिग्रहीतुः' इति विशेषमाहेति।

*सर्वेति। क्षत्रियाणां मनुगोत्रम्। मानवैलपौरूरवसेति त्रयः प्रवराः। वैश्यानां भलन्दनं गोत्रम्। भालन्दनवात्सप्रमाङ्किलेति त्रयः प्रवराः।

मनुर्वैवस्वतश्चैव इडो राजा पुरूरवाः।
क्षत्रियाणां वरा ह्येते विज्ञेया मन्त्रवादिनः॥
भलन्दनश्च वत्सश्च माङ्किलश्चेति ते त्रयः।
एते मन्त्रकृतो ज्ञेया वैश्यानां प्रवराः सदा॥

इति मात्स्यात्। यद्वा पुरोहितगोत्रप्रवरा एव तेषामिति। तत्रान्त्यपक्ष एव सर्वसम्मतः। मन्वादेरगस्त्याष्टमसप्तर्षित्वाभावेन गोत्रत्वाभावादिति हि विज्ञानेश्वरः। तयोरेकरूपगोत्रप्रवरत्वे सर्वेषां परस्परमविवाहप्रसङ्ग इति प्रवरमञ्जरीकारादयः। तथाच क्षत्रियवैश्ययोः विवाहे पुरोहितगोत्रप्रवरावेव वर्ज्यौ।

गुरोः सगोत्रप्रवरा नोद्वाह्या क्षत्रविड्जनैः।

इति स्मृत्यर्थसारात्। एतेन क्षत्रवैश्ययोः सजातीयैरविवाहप्रसङ्ग इति न शङ्क्यम्। तेषां प्रवराणां विवाहनिषेधाप्रयोजकत्वात्। तदुक्तम्—

समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः।

---

(१) 'भारद्वाजयो' क०। (२) 'पूर्वाप्रवर' ख०।

वाह उक्तस्त*थापि—

भरद्वाजाश्च कपयो गर्गा रौक्षायणा इति ।
चत्वारोपि भरद्वाजगोत्रैक्यान्नान्वयुर्मिथः ॥
कपिगर्गभरद्वाजा मिथो रौक्षयणा द्विजाः ।
नोद्वहेयुः सगोत्रत्वात्प्रवरैक्याच्च कुत्रचित् ॥

इति स्मृत्यर्थसाराद्युक्तेरविवाह एव तयोरिति(१) ॥

स्वगोत्राद्यज्ञाने तु सत्याषाढः—'अथाज्ञानबन्धोः पुरोहितप्रवरेणा*चार्यप्रवरेण वेति' ।

आचार्यगोत्रप्रवरानभिज्ञस्तु द्विजः स्वयम् ।
दत्त्वात्मानं तु कस्मैचित्तद्गोत्रप्रवरो भवेत् ॥
यद्वा स्वगोत्रप्रवरविधुरो जामदग्निजः ।
विवाहं च न तेनैव गोत्रेण तु समाचरेत ॥

प्रवरान्मानवेत्यस्मात्प्रवराच्चान्यगोचरः ॥ इति ।

अस्मात् भालन्दनेत्यादितः । कर्माणि वरणादौ वैच्छिको विकल्प इति बहवः । *तथापीति। पञ्चप्रवरोऽपि कपिर्गर्गान्तर्भूतः त्रिप्रवरकापिना सगोत्रश्चेति कपिना कपेर्न विवाह इत्युक्तप्रायम् ।

*आचार्येति । उपनेता आचार्यः, तद्गोत्रप्रवरेणेत्यर्थः । एत-

---

(१) प्रवरमञ्जर्यां यद्यपीदमुक्तं, तथापि भृग्वङ्गिरोगणेषु भवत्येव । तथा बह्वृचपरिशिष्टे बौधायनः—एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते । तावत्समानगोत्रत्वमृते भृग्वङ्गिरोगणात् ॥ माधवीये स्मृत्यन्तरे—पञ्चानां तु त्रिसामान्यादविवाहस्त्रिषु द्वयोः । भृग्वङ्गिरोगणेष्वेवं शेषेष्वेकोपि वारयेत् ॥ इति देशाचाराच्च । सोप्याभीरदेशे प्रसिद्धः । चतुर्विंशतिमते—यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत् । नित्यं स व्यवहार्यः स्याद्वेदाश्चैतत्प्रदृश्यते॥ इति दिक् । तथाच भृगुः—यस्मिन् देशे पुरे ग्रामे त्रैविद्ये नगरेपि वा । यो यत्र विहितो धर्मस्तं धर्मं न विचालयेत् ॥ इति । पुनश्चतुर्विंशतिमते—यस्मिन् देशे य आचारः पारंपर्यक्रमागतः । वर्णानां किल सर्वेषां सदाचारः स उच्यते ॥ ख०

इति कश्चित् । दिवोदासीयेपि—

स्वगोत्रप्रवराज्ञाने जमदग्निमुपाश्रयेत् ।

अथ मातृगोत्रवर्जननिर्णयः । शातातपः—

मातुलस्य सुतामूढ्वा *मातृगोत्रां तथैव च ।
समानप्रवरां चैव गत्वा चान्द्रायणं चरेत् ॥

यद्यपि—

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञानेप्युद्वहेदविशङ्कितः ॥

इति व्यासोक्तेरज्ञातनामत्वे न सगोत्रत्वदोषस्तथापि नेदं कलौ प्रवर्तते ।

ञ्च विवाहादौ । 'अथाज्ञातबन्धुमाचार्यामुष्यायणमनुब्रवीताचार्यप्रवरं वृणीत' इति बौधायनवचनात् । यत्तु—

स्वगोत्रस्यापरिज्ञाने काश्यपं गोत्रमुच्यते । इति,

तदाचार्यगोत्राज्ञाने एव विवाहातिरिक्तश्राद्धादि परम् ।

*मातृगोत्रामिति । सगोत्रानिषेधेनैव मातृगोत्रानिषेधे सिद्धे मातुर्विवाहात् पूर्वं गोत्रमित्यर्थात् मातामहगोत्रमित्यर्थः । 'मातुलस्य सुतामूढ्वा' इति पृथङ्निर्देशस्तु दोषाधिक्यार्थम् । मातुः सगोत्रामपीति सम्बन्धः । अग्रे मातुरित्यनुवृत्त्या मातुः सगोत्रत्वदोष इति सम्बन्धः । मातुः सगोत्रामित्यस्य कन्यात्वसमये यन्मातुर्गोत्रं न तु मातृत्वसमये, तदुत्पन्नाम् । अयं च यावदस्मन्मातृकुले जातादस्मा(१)देतन्नाम्नोऽस्या जन्मेति विशिष्य ज्ञायते तावत्पर्यन्तमेव निषेधो न तदूर्ध्वमित्यर्थः । पूर्वार्धेन सामान्यतस्तदविवाह्यत्वं मतान्तरीयत्वेनाभिधायोत्तरार्द्धेन तन्निष्कर्ष इति ।

---

(१) 'देतन्नाशेस्याजन्मेति' घ० ङ० ।

*गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा ।

इति कलिवर्ज्यत्वोक्तेः । इदंमातृगोत्रवर्जनं माध्यन्दिनीयानामेव । 'मातृगोत्रं माध्यन्दिनीयानाम*पुत्रायाश्च' इति सत्याषाढोक्तेरिति क(१)श्चित्, तन्निर्मूलम् । *अत एवाह प्रवरमञ्जरीकारः—*'दोषस्यातिगुरुत्वात्सर्वेषां मातृगोत्रं वर्ज्यम्' इति । (२)यत्तु-

एकस्मिन्प्रवरे तुल्ये मातृगोत्रे वरस्य च ।
तमुद्वाहं न कुर्वीत सा कन्या भगिनी स्मृता ॥

इति मातृकुले प्रवरचिन्तनमुक्तं, तदा*सुरादिविवाहोढापरमिति दिक् । विस्तरस्तु ग्रन्थान्तरेभ्यो ज्ञेयः ।

सगोत्रादिविवाहे प्रायश्चित्तं स्मृत्यर्थसारे—

इत्थं सगोत्रसम्बन्धविवाहविषये स्थिते ।
यदि कश्चिज्ज्ञानतस्तां कन्यामूढ्वोपगच्छति ॥

*गोत्रादिति । मातुर्गोत्रात् मातुः सपिण्डाच्चेति सम्बन्धः । तत्र मातुर्गोत्रमेव गोत्रं यस्य तस्मादित्यर्थः । मातृपदं च मातामहार्थकं प्राग्वत् । *अपुत्रायाश्चेति । भर्तृगोत्राज्ञाने इत्यन्यत्र विस्तरः । निर्मूलत्वे हेतुमाह-*अतएवेति । *दोषस्येति । चण्डालत्वादिदोषस्येत्यर्थः । *आसुरादीति । पुत्रिकापुत्रोपलक्षणमिदम् । पुत्रिकापुत्राणाम् आसुरादिविवाहजानां च मातुर्दानाभावेन पितृगोत्रसम्बन्धो न निवर्त्तते, अतस्तत्सुतेन मातृगोत्रा न विवाह्या ।

प्रवरान् पितृगोत्रेषु मातृगोत्रे न चिन्तयेत् ।
गोत्रमेव त्यजेन्मातुरिति कात्यायनोऽब्रवीत् ॥

---

(१)-'कश्चिन्महाराष्ट्रकल्पितम् तन्निर्मूलम् । अन्यथा गुर्जरादेः कातीयस्य कुतो न निषेधः' क० ।

(२) 'यत्तु गुर्जरादीनां माध्यन्दिनीयानामप्याचरणाच्च एकस्मिन्प्रवरे' क० ।

गुरुतल्पव्रताच्छुद्ध्येद्गर्भस्तज्ज्ञोऽन्त्यतां व्रजेत् ।
भोगतस्तां परित्यज्य पालयेज्जननीमिव ॥
अज्ञानादैन्दवैः शुद्ध्येत्त्रिभिर्गर्भस्तु काश्यपः ॥

एवं सापिण्ड्येऽपि–

इत्यभियुक्तवचनमपि तत्परमेवेत्यर्थः । दिगर्थस्तु ब्रा(१)ह्यादिविवाहचतुष्टये 'स्वगोत्राद्भ्रश्यते नारी' इति स्वगोत्रभ्रंशेऽपि तद्गोत्राविवाहः सर्वैरपि कलौ न कार्य इत्युक्तमिति । अत्राहुः–'उक्तसत्याषाढवचनस्य निर्मूलत्वमयुक्तम् । न च सत्याषाढसूत्रे तन्नोपलभ्यते इति प्रवरमञ्जर्यामुक्तमिति वाच्यम्, बहुभिः प्रामाणिकैस्तस्य तत्रोक्त एवं कातीयत्वेनाभिधानात् प्रवरमञ्जरीकारीयाऽऽग्रहस्य हेयत्वात् । गुर्जरेषु तद्वचनं कुतो न प्रवर्तते? इत्यपि न शङ्क्यं, तेषामृग्वेदादिसम्बन्धेन तदाचाराचरणात् । एवञ्च माध्यन्दिनीयानामृग्वेद्यव्यूढानामित्यर्थः । न च सर्वेषां तद्विवाहः कलिवर्ज्यः, तस्य द्व्यामुष्यायणपरत्वात् । 'असगोत्रा च या पितुः' इत्यत्र चकारेण मातुः समुच्चयेन मातुरसगोत्रेत्यस्य दत्तकपरत्वोक्त्या तदेकवाक्यत्वाच्च, "पुरोडाशं चतुर्धा करोति" "आग्नेयं चतुर्धा करोति" इत्यादाविव सामान्यतो मातृगोत्रानिषेधस्य माध्यन्दिनीयेषूपसंहाराच्च । एवं दोषातिगुरुत्वोक्तिरपि न समञ्जसा, प्रायश्चित्तैक्यश्रवणात् । "सगोत्रां मातुरप्येके नेच्छन्ति" इत्यत्रेच्छन्तीत्यभिधानेन तदपरिणयपक्षेऽरुचिध्वननाच्च । एवमेकगोत्रत्वमेवाविवाहप्रयोजकं, न सदृशगोत्रत्वं; मातृगोत्रामिति विशेषोपादानात् । सगोत्रामिति निषेधेऽपि सगोत्रपदेन एकगोत्रमेव ग्राह्यम् । तेन न गणैक्यप्रयुक्तदोषः, असमानगणामिति निषेधस्य क्वाप्यनभिधानाच्चेति ।

---

(१) 'त्रीह्यादि' घ० ङ०, 'माह्यादि' ख० ।

सपिण्डापत्यदारेषु *प्राणत्यागो विधीयते ।

इति बृहद्यमोक्तेः । तिथितत्त्वे बौधायनः—'सपिण्डां सगोत्रां चेदमत्योपयच्छेन्मातृवदेनां बिभृयात् ॥'

कन्याविवाहकाल उक्तो ज्योतिर्निबन्धे—

---

*प्राणत्याग इति । गुरुतल्पव्रतमित्यर्थः । सगोत्रसप्रवरोद्वाहे प्रायश्चित्तमाह शातातपः—

परिणीय सगोत्रां तु समानप्रवरां तथा ।
त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेत् ॥

सगोत्रा पितृसगोत्रा "पितृगोत्रं कुमारीणाम्" इत्युक्तेः । एवं समानप्रवरा इत्यत्रापि । सपिण्डाऽपीह बोध्या । एतच्च प्रमादेन सगोत्रादिपरिणयमात्रे । कामतः परिणये प्रजोत्पत्तौ च (स(१)गोत्रां) समानप्रवरां च कामतः परिणीय प्रजामुत्पाद्य गुरुत(२)ल्पव्रतं चरेत्, प्रजां चण्डालेषु निक्षिपेत् । अकामतस्तु संभोगे अर्द्धकृच्छ्रं, कामतो गर्भाभावे गुरुतल्पव्रतार्द्धमिति हारावली । अकामतः प्रजोत्पादने चान्द्रायणम् । प्रजाया भरद्वाजगोत्रान्तर्भावः । विवाहमात्रे कृच्छ्रम् । सर्वत्र व्रतांते ऽष्टोत्तरशतं समिद्धोमः । तां परित्यजेदिति दैवज्ञशंकरः । मातुलसुतादिविवाहमात्रे चान्द्रं, 'मातुलस्य सुता(३)मूढ्वा' इति वचनात् । एवं सगोत्रादिरपि ग्राह्या । 'परिणीय सगोत्रां तु' इति वचनात् । अत्र प्रतिगमनं चान्द्रायणावृत्तिरित्येके । अज्ञानात्सकृद्गमने चान्द्रद्वयं, ज्ञानात्तु कृच्छ्राब्दः । अज्ञानादेकादिने अभ्यासे त्रैवार्षिकं, ज्ञानतस्तु षड्वार्षिकम् । एकरात्रादूर्ध्वमकामतो ऽभ्यासे च वार्षिकं, तत्रैव कामतोऽग्निप्रवेशरूपं मरणान्तम् । एतद्बहुकालमविच्छिन्नाभ्यासे । अल्पकालाभ्यासे तु द्वादशाब्दम् । रेतःसे-

---

(१) 'सगोत्रां' नास्ति घ० ङ० ।
(२) 'तल्पं' ख० ।
(३) 'मुद्वेति' घ० ङ० ।

कादर्वाङ् निवृत्तौ मासोपवासः, चान्द्रायणद्वयं वेति दर्पणः । अत्र त्यागं (१)कृत्वेत्यत्र भोगत इति चन्द्रिका ।

समानप्रवरां कन्यामेकगोत्रामथापि वा ।
विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम् ।
उत्सृज्यतां ततो भार्यां मातृवत् परिपालयेत् ॥

इति शातातपेन मातृवदित्युक्तेः, "ब्राह्मणीं त्यजेन्मातृव(द्भ(२)गिनीवत्) इति बौधायनोक्तेश्च ।

भोगतस्तां परित्यज्य पालयेज्जननीमिव ।

इति दृष्टान्तविवरणात् । धर्मकार्येऽपीत्यन्ये, 'व्रतपरिनिष्ठिते ब्राह्मणीं त्यजेत्' इति बौधायनोक्तेः । मूढपदादज्ञानतो विवाहे एतत् । ज्ञाने द्विगुणं,

विहितं यदकामानां कामात्तद्द्विगुणं भवेत् ।

इति स्मृतेः । ऊढ्वोपगमने तु सगोत्रागमनप्रायश्चित्तेन समुच्चयः । निमित्तयोः परस्परं व्यभिचारात् ।

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य च ।
तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते ॥

इति बौधायनात् । "अकामतः परिणयने कृच्छ्रं, प्रजोत्पादने चांद्रायणम्" इति बौधायनोक्तेः । गमनप्रायश्चित्ते एकत्वमविवक्षितं, विज्ञानेश्वरेण अज्ञानतः सकृत्सगोत्रागमने चान्द्रद्वयोक्तेः । यद्वा चान्द्रं विवाहपरं गमनफलकस्य विवाहस्य गमनपदेनाभिधानात् । गमनप्रायश्चित्तं तु गुरुतल्प(३)समत्वप्रयुक्तं षडब्दं सगोत्रासमानयोगचाण्डाल्यादिगमने विहितम् ।

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥

---

(१) 'कृत्वेव भोगतः' घ० ङ० ।

(२) कंसान्तर्गतं नास्ति घ० ङ० । (३) 'समयत्व' ख०

इति वचनात् । सगोत्रागमने तु (१)अब्दं चान्द्रद्वयादि च विज्ञानेश्वरोक्तविधया माधवाद्युक्तविधया व्यवस्थितं बोध्यम् । अधिकविस्तरे ग्रन्थान्तरतो ज्ञेयः । सगोत्राद्यपत्यानामज्ञानत उत्पत्तौ जन्यजनकभावस्य यौ न संसर्गस्य सद्यः पातित्यापादकत्वात् तत्प्रयुक्तं प्रायश्चित्तं कारयित्वा कश्यपगोत्रेण व्यवहारः कार्यः, "गर्भस्तु काश्यपः" इत्युक्तेः, "भोगेन दुष्यति (२)काश्यप इति विज्ञायते" इति बौधायनोक्तेश्च । ज्ञानत उत्पत्तौ तु चण्डालत्वमेव ।

आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रतः ।
सगोत्रोढासुतश्चैवं चण्डालास्त्रय ईरिताः ॥

इति वचनादिति प्रवररत्नः । विश्वादर्शे—

अज्ञानाद्यदि वोद्वाहः प्रायश्चित्तं तथैव च ।
सगोत्रप्रवरायाश्च ततः संग्रहणे विधिः ॥

षट्त्रिंशन्मते—

समानप्रवरां मातृसगोत्रां मातृनामिकाम् ।
परिणीय सपिण्डां वा प्रायश्चित्तीयते द्विजः ॥
प्रायश्चित्तं वदन्त्यत्र युगधर्मव्यवस्थया ।
मोहोद्वाहे तु दम्पत्योरेकं चान्द्रायणं स्मृतम् ॥
द्वैगुण्यं ज्ञानतस्तत्र परिणीतौ विधीयते ।
कन्यादातुर्भवेत्कृच्छ्रं ज्ञानतो द्विगुणं भवेत् ॥
व्रतस्यकरणाशक्तौ प्रत्याम्नायं समाचरेत् ।
चीर्णव्रतां दुहितरं पिताचीर्णव्रतः शुचिः ॥
भारद्वाजेषु विप्रेषु कश्यपेष्वथवा क्षिपेत् ।
दुहितृत्वेन संगृह्य भारद्वाजोऽथ कश्यपः ॥
घृतकुम्भस्य गर्भे तु तामादध्याद्विधानतः ।

---

(१) 'त्र्यब्दं' घ० ङ० । (२) 'कश्यप' घ० ङ० ।

जातकर्माद्यावन्नप्राशनं चौलमेव च ॥
विधाय मधुपर्कं च मन्त्रमात्रेण मन्त्रवित् ।
मुहूर्ते विप्रकथिते शुचि तामप्यलङ्कृताम् ॥
संस्कारार्थाय मानाय पत्येतु प्रतिपादयेत् ।
वैवाहिकानथो मन्त्रानशेषानप्यतन्द्रितः ॥
स्वगृह्योक्तक्रमेणैव पठेद्धृतवधूकरः ।
चतुर्थीकर्मपर्यन्तं विधिमेवं समाप्य तु ॥
कृताशीर्वचनो विप्रैर्दक्षिणाभिः सुतोषयेत् ।
प्रणम्य विसृजेद्देवान् पश्चाद्भोजयते तथा ॥
कृ(१)त्वेत्थं पुनरुद्वाहं न किल्बिषमवाप्नुयात् ।
अन्यथा कुरुते यस्तु संग्रहं स नराधमः ॥
व्रजेत्स पितृभिः सार्द्धं नरकानेकविंशतिम् ।
मातृनाम्नीविवाहे तु विशेषोऽत्राभिधीयते ॥
परिवर्त्यैव नामास्याः पुनरुद्वाहमाचरेत् ।
नैवं विवोढुरेनः स्यादित्येवं मुनयो विदुः ॥
त्रिरात्रं ब्रह्मचर्यं स्यात्पुनरुद्वाहकर्मणि ।
सगोत्रापरिणीतौ तु परित्यागो विधीयते ॥

सगोत्राशब्दः समानप्रवराया अप्युपलक्षकः, 'समानप्रवराम्' इत्युपक्रमबलात् । एवञ्च मातृनाम्नीविवाहे पुनरुद्वाहमात्रं, नतु तत्परित्याग इति गम्यते। तत्र-

ज्ञानाज्जातमपत्यं तु काश्यपत्वं प्रपद्यते ।
ऐन्दवद्वयतः शुध्येन्निमन्दाहुत्या च तत्पिता ॥ इति ।

दुहितृत्वेनेति । भारद्वाजाय (२)कश्यपाय वा इमां कन्यां दुहितृत्वेन संप्रददे इत्युक्त्वा दद्यादित्यर्थः । घृतकुम्भस्य गर्भे इति

---

(१) 'कृत्वेत्थं' ख०
(२) 'कश्यपाय इमां' ख० ।

सामीप्ये षष्ठी, तादृशघृतकुम्भसम्भवे त्वधिकरणत्वमेव । प्रत्याम्नायमिति ।

कृच्छ्रे गामेकिकां दद्यात्तिस्रश्चान्द्रायणे तु ताः ।

इति स्मृत्युक्तम् । ऐन्दवद्वयं चान्द्रायणद्वयम् । निन्दाहुत्येति जात्यैकवचनम् । तथाच “यन्म आत्मनो निन्दाऽभूत्” “पुनराग्निश्चक्षुरदात्” इति द्वयलाभः । (१)पाठान्तरे “निन्दा च मेऽनिन्दा च मे” “तन्म उभयव्रतम्” इत्याहुतिद्वयम् । तथाच त्रिकाण्डमण्डनः—

परिणीतसगोत्रायामज्ञानाज्जनितः शिशुः ।
काश्यपो न तु चण्डालः पितुः कृच्छ्रद्वयं स्मृतम् ॥
निन्दाहुती द्वे जुहुयाद्धन्तान्ते दीप्तपावके ॥ इति ।

पुनरुद्वाहे नोत्तरायणादिकालनियमः, “सार्वकालिकमेके विवाहम्” इत्याश्वलायनोक्तेः । ईदृशवचनस्येदृशस्थल एव चारितार्थ्यात् । विधान(२)परिधाने—

वसिष्ठौ द्वौ च विज्ञेयौ ब्रह्मपुत्रोऽथ शापतः ।
मैत्रावरुणिरित्येव वसिष्ठो विग्रहान्तरात् ॥
ब्रह्मात्मजाच्छक्तिपराशरव्यासशुकादयः ।
ज्ञेया, विवेकस्त्वनयोर्द्वितीयात्कुण्डिनादयः ॥

अतएव भिन्नगोत्रत्वाद्भिन्नशरीरत्वाच्च वसिष्ठवा(३)सिष्ठगणयोर्विवाहो भवति ।

वासिष्ठ इन्द्रप्रमदो भरद्वाजस्तु (४)संकृतिः ।
कौण्डिन्यः प्रतिभाषश्च गौरिवीतः पराशरः ॥
मैत्रावरुणिशक्तीद्वावुपमन्युगणः स्मृतः ।
एकादश वसिष्ठस्य गोत्राण्यस्मिन्नदोग्रहः ॥

---

(१) निन्दाहुत्येति पाठान्तरे इत्यर्थः । (२) ‘पारिधाने’ घ० ङ० ।
(३) ‘वासिष्ठ’ नास्तिः घ० ङ० । (४) ‘संक्रामिः’ घ० ङ० ।

*षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः ।
सोमो भुङ्क्ते ततस्तद्वद्गन्धर्वश्च तथाऽनलः ॥

राजमार्तण्डः—

अयुग्मे दुर्भगा नारी युग्मे तु विधवा भवेत् ।
तस्माद्गर्भान्विते युग्मे विवाहे सा पतिव्रता ॥
मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेपि मासत्रयमेवयावत् ।
विवाहशुद्धिंप्रवदन्तिसन्तोवात्स्यादयःस्त्रीजनिजन्ममासात्

पराशरमाधवीये तु—

जन्मतो गर्भाधानाद्वा पञ्चमाब्दात्परं शुभम् ।
कुमारीवरणं दानं मेखलाबन्धनं तथा ॥

इत्युक्तम् । सम्बन्धतत्त्वे यमः—

कन्या द्वादशवर्षाणि याऽप्रदत्ता वसेद् गृहे ।
ब्रह्महत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ॥

भारते—

मा(१)त्स्ये–मैत्रावरुणयोर्बदर्याश्रमे तपस्यतोः उर्वशीं दृष्ट्वा रेतः स्कन्नम् । तच्च ताभ्यां पापभयाज्ज(२)लकुम्भे निक्षिप्तम् । ततो वसिष्ठ अगस्तिश्चाभूत् । ततो वसिष्ठादरुन्धत्यां शक्तिरुत्पन्नः, ततः पराशरस्ततो व्यास इत्युक्तम् । निमिमुख्यवासिष्ठयो(३)र्याजनप्रसङ्गे मिथः शप्तयोर्विदेहयोर्ब्रह्मवाक्यादेव कुम्भे जन्य जातं, निमिस्तु निमेषरूपेण नेत्रयोर्जातः । एतौ द्वौ भिन्नपितृकौ पृथग्भूतात्रमातृकौ भिन्नजात्योरेकगृहोत्पत्तिवत् एककुम्भे जातावित्यनयोर्विवाहो भवतीति ।

*षडब्देति ।

---

(१) 'मात्स्ये तु' घ० ङ० ।

(२) 'जलपूर्णकुम्भे' घ० ङ० ।

(३) 'याजप्रसङ्गेन मिथः शप्तयोर्विदेहयोर्ब्रह्मणोर्ब्रह्म' घ० ङ० ।

त्रिंशद्वर्षः षोडशाब्दां भार्यां विन्देत (१)नग्निकाम् ।
अष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥
अतोऽप्रवृत्ते रजसि कन्यां दद्यात्पिता सकृत् ।

तत्रैव—

सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः ।
कन्यायाः शस्यते राजन्नन्यथा धर्मगर्हितः ॥

राजमार्तण्डः—

राहुग्रस्ते तथा युद्धे पितॄणां प्राणसंशये ।
*अतिप्रौढा च या कन्या चन्द्रलग्नबलेन तु ॥

भविष्ये—

उभयस्यापि पक्षस्य मनोऽभ्युदयपूर्वकम् ।
कुमार्यास्त्वष्टवर्षायाः शस्यते पाणिपीडनम् ॥

गर्भाष्टमोऽपि बोध्यः ।

वैवाहिको विधिः स्त्रीणामौपनायनिकः परः ।

इत्युक्तेर्ये गर्भाष्टमपञ्चमवर्षादयः कालास्ते कन्याविवाहेऽपि ग्राह्याः । अत एव मनुरपि—

उत्कृष्टायानुरूपाय सदृशाय वराय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद्विचक्षणः ॥ इति ।

अप्राप्तपञ्चवर्षादिकालामप्याह । *अतिप्रौढा चेति । चकारादतिबालाऽपि, अस्याः पित्रोः प्राणसंशयानुरोधेन विवाह्यत्वात् ।

---

(१) नग्निकालक्षणं तूक्तं गृह्यसंग्रहे-'नग्निकां तु वदेत् कन्यां यावन्नर्तुमती भवेत् । ऋतुमती त्वनग्निका तां प्रयच्छेत्तु नग्निकाम् ॥ अप्राप्ता रजसो गौरी प्राप्ते रजसि रोहिणी । अव्यञ्जिता भवेत् कन्या कुचहीना च नग्निका ॥' इति । तथा रजोदर्शनात्प्रागेव विवाहकारणमुक्तं तत्रैव । यथा—'व्यञ्जनैस्तु समुत्पन्नैः सोमो भुञ्जीत कन्यकाम् । पयोधरैस्तु गन्धर्वा रजसाऽग्निः प्रकीर्तितः ॥ तस्माद्व्यञ्जनोपेतामरजामपयोधराम् । अभुक्तां चैव सोमाद्यैः कन्यकां तु प्रशस्यते ॥' इति ।

मनुः—

त्रिंशद्वर्षो वहेत्कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥

यद्यपि--

विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः ।

इति संवर्तोक्तेः, 'अत ऊर्ध्वं रजस्वला' इत्यादेश्च दशवर्षादूर्ध्वं विवाहो निषिद्धः, तथापि दातुरभावे द्वादशषोडशाब्दे ज्ञेये ।

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।

इति पराशरमाधवीये बौधायनोक्तेश्च । मनुः—

स्त्रीसंबन्धे दशैतानि कुलानि परिवर्जयेत् ।
हीनक्रियं निःपुरुषं निश्छन्दोरोमशार्शसम् ॥
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ।
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् ॥
न पक्ष्यहिप्रेष्यनाम्नीं(१)न बिभीषणनामिकाम् ।

यमः—

तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् ।

तथा मूलजादीनां फलं प्रागुक्तम् । तथा*वर्णवश्यग्रहमैत्र्यादिघटितविचारो ज्योतिर्विद्भ्यो ज्ञेयः । विस्तरात्तु नोच्यते ।

अथ गुर्वर्कबलम् । ज्योतिर्निबन्धे गर्गः—

स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलम् ।
तयोश्चन्द्रबलं श्रेष्ठमिति गर्गेण भाषितम् ॥
जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः ।
विवाहेऽथ चतुर्थाष्टद्वादशस्थो मृतिप्रदः ॥

*वर्णेति ।

---

(१) 'न च भीषणनामिकाम्' क० ।

देवलः—

नष्टात्मजा धनवती विधवा कुशीला
पुत्रान्विता हतधवा सुभगा विपुत्रा ।
स्वामिप्रिया विगतपुत्रधवा धनाढ्या
वन्ध्या भवेत्सुरगुरौ क्रमशोभिजन्मा ॥

बृहस्पतिः—

झषचापकुलीरस्थो जीवोप्यशुभगोचरः ।
अतिशोभनतां दद्याद्विवाहोपनयादिषु ॥

लल्लः—

द्वादशदशमचतुर्थे जन्मनि षष्ठाष्टमे तृतीये च ।
प्राप्ते पाणिग्रहणे जीवे वैधव्यमाप्नोति ॥

गर्गः—

सर्वत्रापि शुभं दद्याद्द्वादशाब्दात्परं गुरुः ।
पञ्चषष्ठाब्दयोरेव शुभगोचरता मता ॥
सप्तमात्पञ्चवर्षेषु स्वोच्चस्वर्क्षगतो यदि ।
अशुभोपि शुभं दद्याच्छुभर्क्षेषु किं पुनः ॥
रजस्वलायाः कन्याया गुरुशुद्धिं न चिन्तयेत् ।
अष्टमेऽपि प्रकर्तव्यो विवाहस्त्रिगुणार्चनात् ॥
अर्कगुर्वोर्बलं गौर्या रोहिण्यर्कब(१)ला स्मृता ।
कन्या चन्द्रबला प्रोक्ता वृषली लग्नतो बला ॥
अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

विलोक्य जन्मनक्षत्रे राशिकूटादिकं शुभम् ।
सुलग्ने सुमुहूर्ते च दद्याद्वैव यथाविधि ॥

---

(१) ‘बलान्विता’ क० ।

अथ बृहस्पतिशान्तिः । शौनकः—

*कन्यकोद्वाहकाले तु आ(१)नुकूल्यं न विद्यते ।
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥
सुवर्णेन गुरुं कृत्वा पीतवस्त्रेण वेष्टयेत् ।
ईशान्यां धवलं कुम्भं धान्योपरि निधाय च ॥

इति भविष्यात् ।

*कन्यकोद्वाहकाले त्विति । प्रकारान्तरं स्कान्दे—

कन्याविवाहकाले तु शुद्धिर्यस्या न विद्यते ।
ब्राह्मणस्योपनयने गुरोर्विधिरुदाहृतः ॥
एभिः पूजा गुरोः कार्या विधिवद्भक्तिभावितैः ।
मदन्तीकामपुष्पाणि पत्रपालाशसर्षपाः ॥

मदन्ती पूतिका, कामो मदनः ।

गु(२)डूचीवान्यपामार्गविडङ्गं शङ्(३)खिनी वचा ।
सहदेवी विष्णुक्रान्ता सर्वौषध्यः शतावरी ॥
तथैवाश्वत्थभङ्गाश्च पञ्चगव्यं जलं तथा ।
नूतनं सोदकु(४)म्भं च पीतवस्त्रसमन्वितम् ॥
पञ्चरत्नैः समायुक्तमीशान्यां स्थापितानलात् ।
या ओषधीति मन्त्रेण सर्वास्तस्मिन्विनिक्षिपेत् ॥
कुम्भस्योपरिभागे तु स्थापयित्वा बृहस्पतिम् ।
सुवर्णपात्रे सौवर्ण्यां प्रतिमायां युधिष्ठिर ॥
कारयेत्तु यथाशक्त्या वित्तशाठ्यविवर्जितः ।
पीतवस्त्रयुगच्छन्नां पीतयज्ञोपवीतिकाम् ॥
पूजयेद्गन्धपुष्पाद्यैस्ततो होमं समाचरेत् ।
समिधोऽश्वत्थवृक्षस्य होम्या अष्टोत्तरं शतम् ॥

---

(१) 'अनुकूल्यं' क० । (२) 'गडूची' ख० ।
(३) 'शङ्खनी' ख० । (४) 'कुम्भे' घ० ङ० ।

दमनं मधुपुष्पं च पलाशं चैव सर्षपान् ।
मांसी गुडूच्यपामार्गो विडङ्गी शाङ्खिनी वचा ॥
सहदेवी हरिक्रान्ता सर्वौषधिशतावरी ।
बला च सहदेवी च निशाद्वितयमेव च ॥
कृत्वाज्यभागपर्यन्तं स्वशाखोक्तविधानतः ।
ग्रहोक्तमण्डलेऽभ्यर्च्य पीतपुष्पाक्षतादिभिः ॥

ततो होमावसाने तु पूजयेच्च बृहस्पतिम् ।
पीतगन्धैस्तथा पुष्पैर्धूपैर्दीपैश्च शक्तितः ॥
दध्योदनं च नैवेद्यं फलताम्बूलसंयुतम् ।
मंत्रेणानेन कौन्तेय समभ्यर्च्य पुनः पुनः ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ बृह(१)स्पते ।
क्रूरग्रहैः पीडितानाममृताय नमो नमः ॥
पूजयित्वा सुराचार्यं पश्चादर्घ्यं निवेदयेत् ।
गम्भीरदृढरूपाङ्ग देवेड्य सुमते प्रभो ॥
नमस्ते वाक्पते शान्त गृहाणार्घ्यं नमोऽस्तु ते ।
अर्घ्यं दत्वा सुरेशाय जपहोमं समापयेत् ॥
भक्त्या यत्ते सुराचार्य होमपूजादि (२)यत्कृतम् ।
तत्त्वं गृहाण शान्त्यर्थं बृहस्पते नमो नमः ॥
मन्त्रेणानेन सङ्कल्प्य पश्चात्सम्प्रार्थयेन्नृ(३)प ।
"जीवो बृहस्पतिः सूरिराचार्यो गुरुराङ्गिराः ॥
वाचस्पतिर्देवमन्त्री शुभं कुर्यात्सदा मम" ॥

प्रार्थनामन्त्रः ।

एवं तं प्रार्थयेद्देवमाचार्यं च प्रपूजयेत् ।
सर्वोपस्करसंयुक्तां प्रतिमां तां युधिष्ठिर ॥

---

(१) 'बृहस्पतेः' घ० ङ० ।
(२) 'मत्कृतं' घ० ङ० । (३) 'नृपः' घ० ङ० ।

देवपूजोत्तरे काले ततः कुम्भानुमन्त्रणम् ।
अश्वत्थसमिधश्चाज्यं पायसं सर्पिषा युतम् ॥
यवव्रीहितिलाः साज्या मन्त्रेणैव बृहस्पतेः ।
अष्टोत्तरशतं सर्वं होमशेषं समापयेत् ॥
पुत्रदारसमेतस्य अभिषेकं समाचरेत् ।
कुम्भाभिमन्त्रणोक्तैश्च समुद्रज्येष्ठमन्त्रतः ॥
प्रतिमां कुम्भवस्त्रं च आचार्याय निवेदयेत् ।
ब्राह्मणान्भोजयेत्पश्चाच्छुभदः स्यान्न संशयः ॥

इति बृहस्पतिशान्तिः ।

प्रणम्य च गवा युक्तामाचार्याय निवेदयेत् ।
अथाचार्यस्तु नियतो वेदवेदाङ्गपारगः ॥
यजमानं सपत्नीकं शान्तचित्तं जितेन्द्रियम् ।
कुम्भोदकं गृहीत्वा तु मन्त्रैरेतैः प्रसिञ्चयेत् ॥
(१)इदमापोऽथ मन्त्रेण तामग्निमित्यृचा तथा ।
या ओषधीरश्वावतीः कूष्माण्डैश्चा(२)भिषेचयेत् ॥
पश्चात्सम्भोजयेद्विप्रान् यथाशक्त्या युधिष्ठिर ।
एवं पूजां गुरोः कृत्वा सर्वान्कामानवाप्नुयात् ॥ इति ।

अथ

वरस्य भास्करं लग्नं कन्यायाश्च गुरोर्बलम् ।

इतिवचनाद्वरस्य रविबलाभावे कुमारस्योपनयने च दुष्टरवौ रविशान्तिमाह शौनकः—

ब्राह्मणस्योपनयने नानुकूलो भवेद्रविः ।
तस्य शान्तिं प्रवक्ष्यामि मन्त्रौषधिविधानतः ॥
उपायनात्तु पूर्वेद्युः कृत्वा पुण्याहवाचनम् ।
गृहस्येशानदिग्भागे गोमयेनोपलेपयेत् ॥

---

(१) 'इममा' घ० ङ० । (२) 'श्चाभिषिञ्चयेत्' घ० ङ० ।

शौनकः—

गुर्वादित्ये व्यतीपाते वक्रातीचारगे गुरौ ।
नष्टे शशिनि शुक्रे वा बाले वृद्धेऽथवा गुरौ ॥
पौषे चैत्रेऽथ वर्षासु शरद्यधिकमासके ।
केतूद्गमे*निरंशेऽर्के सिंहस्थेऽमरमन्त्रिणि ॥
विवाहव्रतयात्रादिपुरहर्म्यगृहादिकम् ।
क्षौरं विद्योपविद्यां च यत्नतः परिवर्जयेत् ॥

मदनपारिजाते ज्योतिःसागरे—

बाले शुक्रे वृद्धे शुक्रे वृद्धे जीवे नष्टे जीवे ।
बाले जीवे जीवे सिंहे सिंहादित्ये जीवादित्ये ॥
तथा मलिम्लुचे मासि सुराचार्येऽतिचारगे ।
वापीकूपविवाहादिक्रियाः प्रागुदितास्त्यजेत् ॥

कुङ्कुमेनोल्लिखेत्पद्ममष्टपत्रं सकेसरम् ।
सुवर्णेन रविं कृत्वा द्विभुजं पद्मधारिणम् ॥
कृत्वाज्यभागपर्यन्तं तन्त्रं कृत्वा तु पूर्ववत् ।
स्वशाखोक्तविधानेन आचार्यो होममाचरेत् ॥
आकृष्णेनेति मन्त्रेण समिदाज्यचरून्हुनेत् ।
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ॥
तिलव्रीहींश्च हुत्वाऽथ होमशेषं समापयेत् ।
दारपुत्रसमेतस्य ऋत्विग्भिरभिषेचयेत् ॥
कुम्भाभिमन्त्रणोक्तैश्च समुद्रज्येष्ठमन्त्रकैः ।
ऋत्विग्भ्यो दक्षिणां दत्त्वा आचार्याय च शक्तितः ॥
प्रतिमां वस्त्रयुग्मं च आचार्याय प्रदापयेत् ।
एवं यः कुरुते शान्ति सर्वदोषो विनश्यति ॥ इति ।

त्रिषडायस्थो रविरुत्तमः, तद्भिन्नोऽशुभः तत्राष्टमोऽधिकाशुभः ।

सिंहस्थं मकरस्थं च गुरुं*यत्नेन वर्जयेत् ।

लल्लः—

अतिचारगतो जीवस्तं राशिं नैव चेत्पुनः ।
लुप्तः संवत्सरो ज्ञेयः सर्वकर्मबाहिष्कृतः ॥

सिंहस्थगुरोर*पवादमाह पराशरः—

*गोदाभागिरथीमध्ये नोद्वाहः सिंहगे गुरौ ।
*मघास्थे सर्वदेशेषु तथा मीनगते रवौ ॥

वसिष्ठोऽपि-

विवाहो दक्षिणे कूले गौतम्यां, नेतरत्र तु ।
भागीरथ्युत्तरे कूले गौतम्या दक्षिणे तथा ॥
विवाहो व्रतबन्धश्च सिंहस्थेज्ये न दुष्यति ।

---

*निरंशे । राशिप्रथमभागस्थे । *यत्नेनेति । प्रागुदितासु क्रियासु इति विपरिणतमनुवर्तते । विशेषतोऽपि स्कान्दे—

सिंहस्थिते गुरौ राजन् विवाहं नैव कारयेत् ।
मकरस्थे न कर्तव्यं यदीच्छेदात्मनः शुभम् ॥
व्रतबन्धं प्रतिष्ठां विवाहं मन्दिरप्रवेशं च ।
यात्रां च याम्यदेशे कुर्यादार्यो न सिंहांशे ॥

इत्यादि सिंहस्थे गुरौ सर्वदेशेषु विवाहादि सर्वमपि कर्म न कार्यमित्यर्थः । *अपवादमिति । आवश्यके कर्मणीत्यादि । *गोदेति । गङ्गागोदान्तरालं हित्वा सिंहांशोत्तीर्णे गुरौ कार्यमित्यर्थः,

नीचराशिगतो जीवः प्रशस्तः सर्वकर्मसु ।
नीचांशकगतस्त्याज्यो यस्मादंशेषु नीचता ॥

इति वसिष्ठोक्तेः । *मघास्थे इति । मघास्थे गुरौ सर्वदेशेषु नोद्वाह इत्यन्वयः ।

माघ्यां यदि मघा न स्यात्सिंहे गुरुरकारणम् ।
सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत् ॥

क(१)न्यादातृक्रममाह याज्ञवल्क्यः—

*पिता पितामहो भ्राता *सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ ।
(२)गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् ॥

भ्रातॄणां संस्कृतानामेवाधिकारमाह (३)स एव याज्ञवल्क्यः—

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ।
भगिन्यश्च निजादंशाद्दत्त्वांशं तु तुरीयकम् ॥

*अत्र चकारेण पूर्वसंस्कृतैरित्यस्यानुवृत्तेर्विवाहपर्याप्तद्रव्यदाने (४)स्वांशचतुर्थभागदाने वा संस्कृतग्रहणं *व्यर्थं स्यात्, अतः कर्तृनियमोऽयम् । तेनानुपनीतभ्रातृमात्रादिसत्त्वे मात्रादेरेवाधिकारो न भ्रातुरित्युक्तं सं-

अन्यत्र सिंहभागे तु विवाहादिकमाचरेत् ।

इति केचित् । मीनगते रवौ चैत्रे सर्वदेशेषु नोद्वाह इत्यन्वयः ।

*पितेति । प्रकृतिस्थः । उन्मादादि दोषहीनः । *सकुल्यः पितृव्यतत्पुत्रादिः । नाशोऽसान्निध्याद्यपि । अतएव 'पिता दद्यात्स्वयं कन्याम्' इत्यादि क्रमान्तरमनुपदं वक्ष्यति । गम्यं स्वयं वरं कुर्यादित्यन्वयः । गम्यं गमनार्हं सावर्ण्यादिगुणयुक्तम् । नन्वसंस्कृता भ्रातरः पूर्वसंस्कृतैर्भ्रातृभिः संस्कार्याः, असंस्कृता भगिन्यश्च भ्रातृभिः संस्कार्या इत्यर्थे अनुपनीतभ्रातॄणां भगिनीविवाहेऽधिकारापत्तिरित्यत्राह—*अत्रेति । तुरीयांशस्यात्याधिक्येऽतिन्यूनत्वे वा दोष इति विवाहपर्याप्तपरं तुरीयपदमिति भावः । *व्यर्थं

---

(१) 'कन्यावाग्दातृक्रम' ख० । (२) 'गम्यत्वभावे' ख० ।
(३) 'सएव' नास्ति क० । (४) 'स्वांशसमांशे च' क० ख० ।

बन्धतत्त्वादौ। कन्यास्वयंवरे मातुर्दातृत्वे च ताभ्या-
मेव नान्दीश्राद्धं कार्यम्। *तत्र च स्वयं प्रधानसंकल्प-
मात्रं कृत्वाऽन्यद्ब्राह्मणद्वारा कारयेदिति प्रयोगपारिजा-
ते। *वरस्तु संस्कृतभ्रात्राद्यभावे स्वयमेव नान्दीश्राद्धं
कुर्यात् न माता,

पुत्रेषु विद्यमानेषु नान्यं वै कारयेत्स्वधाम्।

इति निषेधात्, उपनयनेन कर्माधिकारस्य जातत्वाच्चे-
ति पृथ्वीचन्द्रोदयः। माधवीयेऽपरार्के च नारदः--

*पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमते पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते।
तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः॥
सकुल्यः पितृपक्षीयो बान्धवो मातृवंशजः।

मदनपारिजाते कात्यायनः--

*स्वयमेवौरसीं दद्यात्पि(१)त्रभावे स्वबान्धवाः।
मातामहस्ततोऽन्यां (२)हि माता वा धर्मजां सुताम्॥

स्यादिति। तावद्द्रव्यदातृत्वेनैवार्थतः संस्कृतत्वलाभादिति भावः। अनुकल्पमाह-*तत्र च स्वयमिति। *वरस्तु इति।

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः।

इत्यत्राधिकं स्फुटी करिष्यामः। *पितेति। पितामहादीनां कन्यादानेऽधिकारः पूर्वनाशे एव, 'पूर्वनाशे' इत्युक्तेः। प्रतिनिधित्वं च 'पितुरनुमते' इत्युक्तेः। पितृपक्षीय उक्तः। मातृवंश्यः मातुलपुत्रादिः। मातामहमातुलयोरभावे सकुल्यस्याधिकारे प्राप्ते आह-*स्वयमिति। स्वयं पिता, स्वबान्धवाः पितुर्भ्रातृपितामहा-

---

(१) 'पितृभावे' ख०।   (२) 'वै' क०।

ततोऽन्यामौरसीभिन्नां धर्मजां नियोगात्क्षेत्रजां मातामहो (१) माता मातुलो वा दद्यात् । तेनौरसीदाने पितृबन्धुषु सत्सु मातामहादीनां नाधिकारः अनुमतिं विना । अस्यापवादस्तत्रैव–

दीर्घप्रवासयुक्तेषु*पौगण्डेषु च बन्धुषु ।
माता तु समये दद्यादौरसीमपि कन्यकाम् ॥

मनुः--

यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् ।

परकीयकन्यादाने विशेषो मदनरत्ने स्कान्दे--

*आत्मीकृत्य सुवर्णेन परकीयां तु कन्यकाम् ।
धर्मेण विधिना दानम*सगोत्रेऽपि युज्यते ॥

अत्र प्रकृतिस्थग्रहणादप्रकृतिस्थेन कृतमकृतमेव,

स्वतन्त्रो यदि तत्कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः ॥

इत्यपरार्के नारदोक्तेः । यदि तु सप्तपदीविवाहहोमादि प्रधानं जातं तदाङ्गवैकल्येऽपि नावृत्तिर्विवाहस्य ।

दयः । *पौगण्डेषु पञ्चाब्दात्किञ्चिदधिकेषु ।

*आत्मीकृत्योति । इयं च कन्या क्रीतेति नन्दपण्डितोक्तं न युक्तम् ,

अनाथां (२)कन्यकां दत्त्वा सदृशाभ्यधिके वरे ।
द्विगुणं फलमाप्नोति कन्यादाने यदीरितम् ॥

इति स्कान्दे एवमन्यकन्याया धर्मार्थमन्येन दानव्यञ्जनात् । आत्मीकृत्येत्यस्यात्मन इव कृत्वेत्यर्थः । *असगोत्रेऽपीति । असपिण्डोऽप्यर्थः । कन्याया एव सगोत्रसपिण्डादि वर्ज्य-

---

(१) 'माता' नास्ति क० । (२) 'कन्यकां दृष्ट्वा' ख० ।

गौडा अप्येवमाहुः। तत्रैव मरीचिः--

*गौरीं ददन्नाकपृष्ठं, वैकुण्ठं रोहिणीं ददत्।
कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम्॥

अथ मासनिर्णयः। तत्र जन्ममासे विशेषः प्रागुक्तः। ज्योतिःप्रकाशे व्यासः--

माघफाल्गुनवैशाखे यद्यूढा मार्गशीर्षके।
ज्येष्ठे वाऽऽषाढमासे च सुभगा वित्तसंयुता॥
श्रावणे वापि पौषे वा कन्या भाद्रपदे तथा।
चैत्राश्वयुक्कार्तिकेषु याति वैधव्यतां*लघु॥

नारदः--

माघफाल्गुनवैशाखज्येष्ठ*मासाः (१)शुभप्रदाः।
कार्तिको मार्गशीर्षश्च मध्यमौ,*निन्दिताः परे॥

म्। *गौरीमिति। मनुः—

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला॥

*लघु शीघ्रम्। आषाढस्त्वार्द्राप्रवेशात्प्राक् ग्राह्यः,

न कदाचिद्दशर्क्षेषु भानोरार्द्राप्रवेशनात्॥

इत्युक्तेः। *मासाः सौराः 'सौरो मासो विवाहादौ' इत्युक्तेः। चान्द्रोऽपि कश्यपेनोक्तः—

उपवासव्रतोद्वाहयात्राक्षौरोपनायनम्।
तिथिवर्षादिनिखिलं चान्द्रमानेन गृह्यते॥ इति।

*निन्दिता इति। यत्तु—

वात्स्यो वर्षम(२)नूनमिच्छति, तथा रैभ्योऽयनं चोत्तरम्।
श्रीवासोन्त्य(३)मृतुं विहाय मुनयो माण्डव्यशिष्या जगुः॥

---

(१) 'शुभावहाः' क०।

(२) 'मनूक्तमि' घ० ङ०। (३) 'मृतुं विवाहमु' ख०।

वासिष्ठः--

*पौषेऽपि कुर्यान्मकरस्थितेऽर्के
चैत्रे भवेन्मेषगतो यदा स्यात् ।
प्रशस्तमाषाढकृतं विवाहं
वदन्ति गर्गा मिथुनस्थितेऽर्के ॥

आचार्यचूडामणौ ज्योतिर्गर्गराजमार्तण्डौ--

माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्जिताः ॥

आपस्तम्बः-'सर्वे ऋतवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमं च नैदाघम् ।' 'अत्र माघफाल्गुनाषाढवर्जं नव मासा मुख्यः कालः' इति सुदर्शनभाष्ये इडविलायां ब्रह्मविद्यातीर्थैश्चोक्तम् । बौधायनसूत्रेऽपि-'स-

---

चैत्रं प्रोज्झ्य, पराशरः परिणये पौषं च दौर्भाग्यदम् ।
आषाढादि च तुष्टयं न हि तथा कैश्चित्प्रदिष्टं बुधैः ॥ इति ।
माङ्गल्येषु विवाहेषु कन्यासंवरणेषु च ।
दश मासाः प्रशस्यन्ते चैत्रपौषविवर्जिताः ॥

इत्यादि, तत्सर्वं प्रत्यासन्नऋतुकालाया विवाहविषयम् ।

ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति ॥

इति वाक्यात् । पाठान्तरं काल्पनिकम् । *पौषेपीति । अपवादः ।

(१)झषो न निन्द्यो यदि फाल्गुने स्यात्
मेषस्तु वैशाखगतो न निन्द्यः ।

इत्यादिरपि द्रष्टव्यः । कृत्तिकास्थमिति, अज्येष्ठेति चात्यावश्यकविषयम् ।

---

(१) 'ऋक्षो न' ख० ।

वैं मासा विवाहस्य, शुचितपस्तपस्यवर्जमित्येके’। तेन ‘पूर्वोत्तरौ शिशिरसंबंधिनौ मासौ पौषचैत्रौ विहाय’ इति निर्णयामृतव्याख्यानं मौर्ख्यकृतमित्युपेक्ष्यम्। नि-शि चेत्सर्वेषु द्वादशस्वपि मासेषूद्वहेदिति कालादर्शः। ये(१) तु ज्योतिषे माघादिविधयस्ते गृह्यसूत्राणां द्विज-परत्वेन प्राबल्याच्छूद्रादिपराः। ज्योतिषे—

वात्स्यो वर्षमनूनमिच्छति तथा रैभ्योऽयनं चोत्तरम्।
श्रीवासोऽन्तमृतुं विहाय मुनयो माण्डव्यशिष्या जगुः॥
चैत्रं प्रोज्झ्य पराशरः परिणये पौषं च दौर्भाग्यदम्।
ह्याषाढादि चतुष्टयं न हितदं कैश्चित्प्रदिष्टं बुधैः॥

चण्डेश्वरः—

मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम्।
ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत्॥
कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठपुत्रस्य कारयेत्।
उत्सवादिषु कार्येषु दिनानि दश वर्जयेत्॥

रत्नकोशे—

जन्मर्क्षे जन्मदिवसे जन्ममासे शुभं त्यजेत्।
ज्येष्ठे मास्याद्यगर्भस्य शुभं वर्ज्यं स्त्रिया अपि॥

पराशरः—

अज्येष्ठा कन्यका यत्र ज्येष्ठपुत्रो वरो यदि।
व्यत्ययो वा तयोस्तत्र (२)ज्येष्ठमासः शुभप्रदः॥

मिहिरः—

ज्येष्ठस्य ज्येष्ठकन्याया विवाहो न प्रशस्यते।
तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते॥
द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकं ज्येष्ठं शुभावहम्।

---

(१) ‘यत्तु ज्योतिषे’ ख०। (२) ‘ज्येष्ठो मासः’ क०।

ज्ये(१)ष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतम् ॥

यत्तु-'सार्वकालमेके विवाहम्' इति, तदासुरादिविवाहाविषयम्, 'धर्म्येषु विवाहेषु कालपरीक्षणं, नाधर्म्येषु' इति गृह्यपरिशिष्टात । रत्नमालायामप्येवम् । तेनासुरादयो माघचैत्रादिनिषिद्धकालेष्वपि भवन्ति । मासाः सौराः 'सौरो मासो विवाहादौ' इत्युक्तेः ।

झषो न निन्द्यो यदि फाल्गुने स्यात्
अजस्तु वैशाखगतो न निन्द्यः ।

इति त्वपवादः ॥

अथ दश दोषाः । व्यवहारोच्चये—

वेधश्च लत्ता च तथैव पातः खर्जूरवेधो दशयोगचक्रम् ।
युतिश्च जामित्रमुपग्रहश्च बाणाख्यवज्रे च दशैव दोषाः ॥

एषां लक्षणं ज्योतिषे ज्ञेयम् ।

अतिचारगे गुरौ तु वासिष्ठः—

अतिचारगते जीवे वर्जयेत्तदनन्तरम् ।
विवाहादिषु कार्येषु अष्टाविंशतिवासरान् ॥

रत्नमालायाम्—

एकपञ्चनवयुग्मषड्दशत्र्याणि सप्तचतुरष्ट(२)लाभगः ।
द्वादशाजवृषभादिराशितोघातचन्द्रइतिकीर्तितो बुधैः ॥

नारदः—

भूबाणनन्दहस्ताश्च रसादिग्वह्निशैलजाः ।
वेदा वसुशिवादित्या घातचन्द्रो(३) यथाक्रमम् ॥
यात्रायां युद्धकार्येषु घातचन्द्रं विवर्जयेत् ।
विवाहे सर्वमाङ्गल्ये चौलादौ व्रतबन्धने ॥
घातचन्द्रो नैव चिन्त्य इति पाराशरोऽब्रवीत् ।

---

(१) 'ज्येष्ठत्रये' ख० । (२) 'लाभदः' क० ।(३) 'घातचन्द्रा' क० ।

ज्योतिर्निबन्धे—

विवाहचौलव्रतबन्धयज्ञे पट्टाभिषेके च तथैव राज्ञाम् ।
सीमन्तयात्रासु तथैव जाते नो चिन्तनीयः खलु घातचन्द्रः ॥

नारदः—

अकालजा भवेयुश्चेद्विद्युन्नीहारवृष्टयः ।
प्रत्यर्कपरिवेषेन्द्रचापाभ्रध्वनयो यदि ॥
दोषाय मङ्गले नूनं न दोषायैव (१)कालजाः ॥

अकालवृष्टिस्वरूपमाह लल्लः—

पौषादिचतुरो मासाः प्रोक्ता वृष्टिरकालजा । इति ।

शार्ङ्गधरः—

निर्घाते क्षितिचलने ग्रहयुद्धे राहुदर्शने चैव ।
आ पञ्चदिनात्कन्या परिणीता नाशमुपयाति ॥
उल्कापातेन्द्रचापप्रबलघनरजोधूमनिर्घातविद्युद्-
वृष्टिप्रत्यर्कदोषादिषु सकलबुधैस्त्याज्यमेवैकरात्रम् ।
दुःस्वप्ने दुर्निमित्ते ह्यशुभफलदशो दुर्मनोभ्रान्तबुद्धौ
चौले मौञ्जीनिबन्धे परिणयनविधौ सर्वदा त्याज्यमेव ॥

ज्योतिः प्रकाशे—

अर्वाक् षोडश नाड्यः संक्रान्तेः पुण्यदाः परतः ।
उपनयनव्रतयात्रापरिणयनादौ विवर्ज्यास्ताः ॥

गर्गः—

दिग्दाहे दिनमेकं च (२)ग्रहे सप्तदिनानि तु ।
भूकम्पे च समुत्पन्ने त्र्यहमेव तु वर्जयेत् ॥
उल्कापाते त्रिदिवसं धूमे पञ्च दिनानि च ।
वज्रपाते चैकदिनं वर्जयेत्सर्वकर्मसु ॥
दर्शनादर्शनाद्राहुकेत्वोः सप्तदिनं त्यजेत् ।

---

(१) 'कालजः' ख० । (२) 'गृहे' ख० ।

यावत्केतूद्गमस्तावदशुभः समयो भवेत् ॥

अस्यापवादोऽद्भुतसागरे—

अथ दिवसत्रयमध्ये मृदु पानीयं यदा भवति ।
उत्पातदोषशमनं तदैव संप्राहुराचार्याः ॥

संबन्धतत्त्वे—

भूकम्पादेर्न दोषोऽस्ति वृद्धिश्राद्धे कृते सति ॥

अथापरिहार्ये (१)कन्यावैधव्ययोगे विशेष उच्यते ।

मार्कण्डेयपुराणे—

बालवैधव्ययोगे तु कुम्भद्रुप्रतिमादिभिः ।
कृत्वा लग्नं (२)रहः पश्चात्कन्योद्वाह्येति चापरे ॥

अत्र पुनर्भूदोषाभाव उक्तो विधानखण्डे—

स्वर्णाम्बुपिप्पलानां च प्रतिमा विष्णुरूपिणी ।
तया सह विवाहे तु पुनर्भूत्वं न जायते ॥

सूर्यारुणसंवादे—

*विवाहात्पूर्वकाले च चन्द्रताराबलान्विते ।
विवाहोक्ते च तां कन्यां कुम्भेन सह चोद्वहेत् ॥

---

*विवाहादिति । विवाहात्पूर्वकाले चन्द्रतारानुकूले नवीनं पूर्णकुम्भं सूत्रं गन्धपुष्पादिसामग्रीं च संपाद्यास्याः कुमार्या जन्मलग्नात्सप्तमादिस्थानगतभौमसूचितदोषपरिहारार्थमस्याः पत्युर्दीर्घकालजीवनार्थं च कुम्भविवाहं करिष्ये इति संकल्प्य कुम्भं संपूज्य 'वरुणाङ्गस्वरूपाय कुम्भाय नमः' इति मन्त्रेण हरिद्राकुङ्कुमाभ्यां लिप्त्वा कुमारीमपि लिप्त्वा इमां कन्यां (३)काश्यपगोत्रां वरुणाङ्गस्वरूपाय कुम्भाय तुभ्यमहं सम्प्रददे इति दत्त्वा पश्चाद्दशतन्तुसूत्रेणोभौ संवेष्ट्य "परित्वा" इति मन्त्रेण ततः सूत्रमुद्वास्य

---

(१) 'कन्याया वैधव्य'क० । (२) 'ततः'क० ख० ।
(३) 'काश्यपसगोत्रां' घ० ङ० ।

सूत्रेण वेष्टयेत्पश्चाद्दशतन्तुविधानतः ।
कुङ्कुमालंकृतं देहं तयोरेकान्तमन्दिरे ॥
ततः कुम्भं च निःसार्य प्रभज्य सलिलाशये ।
ततोऽभिषेचनं कुर्यात्पञ्चपल्लववारिभिः ॥

कुम्भप्रार्थना तत्रैव—

वरुणाङ्गस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः ।
ततोऽलंकारवस्त्राढ्यां वराय प्रतिपादयेत् ॥

इति कुम्भविवाहः ॥

कुम्भकण्ठे बध्वा कुम्भं प्रार्थयेत् । तत्र मंत्रः—

वरुणाङ्गस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः ॥

इति सम्प्रार्थ्य कुम्भं निःसार्य नद्यादौ भङ्क्त्वाऽऽचम्य गृहमेत्य पञ्चपल्लवैः कन्यायाः पुण्यजलैः 'शान्तिरस्तु' इति (१)पञ्चवाक्यैरभिषेकः कार्य इति कौस्तुभे । अथ प्रयोगः—विवाहकर्त्ता पित्रादिः देशकालौ संकीर्त्य कन्यावैधव्यहरं कुम्भविवाहं करिष्ये इति संकल्प्य गणेशपूजनादि नान्दीश्राद्धान्तं कृत्वा वरुणविष्णुप्रतिमयोरग्न्युत्तारणं कृत्वा महीद्यौरित्यादिक्रमेण कुम्भं संस्थाप्य तत्र वरुणं पूजयित्वा तत्र विष्णुप्रतिमां संस्थाप्य आवाहनादिषोडशोपचारैः सम्पूज्य प्रार्थयेत्—

वरुणाङ्गस्वरूपाय जीवनानां समाश्रय ।
पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु ॥
देहि विष्णो वरं देव कन्यां पालय दुःखतः ॥ इति ।

---

(१) 'पञ्चनुवाक्यैः' ख० ।

मूर्तिदानमपि तत्रैवोक्तम्—

ब्राह्मणं साधुमामन्त्र्य संपूज्य विविधार्हणैः ।
तस्मै दद्याद्विधानेन विष्णोर्मूर्तिं चतुर्भुजाम् ॥
शुद्धवर्णसुवर्णेन *वित्तशक्त्याथ वा पुनः ।
निर्मितां रुचिरां शङ्खगदाचक्राब्जसंयुताम् ॥
दधानां वाससी पीते (१)कुमुदोत्पलमालिनीम् ।
सदक्षिणां च तां दद्यान्मन्त्रमेत (२)मुदीरयेत् ॥
यन्मया (३)प्राचि जनुषि घ्नन्त्या पतिसमागमम् ।
विषोपविषशस्त्राद्यैर्हतो वातिविरक्तया ॥
प्राप्यमानं महाघोरं यशः सौख्यधनापहम् ।
वैधव्याद्यतिदुःखौघनाशाय शुभलब्धये ॥
बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुम् ।
सौवर्णीं निर्मितां शक्त्या तुभ्यं संप्रददे द्विज ॥

ततो विष्णुरूपिणे कुम्भायेमां कन्यां श्रीरूपिणीं समर्पयामीति समर्प्य "परित्वा" इत्यादिमन्त्रैर्मन्त्रावृत्त्याऽधस्तादुपरिष्टाच्च कुम्भं कन्यां च परिवेष्ट्य ततः कुम्भं निस्सार्य सलिलाशये प्रभञ्जयित्वा 'समुद्रज्येष्ठा' इत्यादि मन्त्रैः शुद्धजलेन पञ्चपल्लवैः कन्यामभिषिच्य ब्राह्मणान् भोजयेदिति । *वित्तशक्त्येति । (४)रचितम् पलतदर्द्धतदर्धान्यतरमध्ये इति बोध्यम्, दानपरिभाषायां तथा दर्शनात् । अथ प्रयोगः—कन्या स्नानाचमने कृत्वा देशकालौ संकीर्त्य मम वैधव्यहरं महाविष्णुप्रतिमादानमहं करिष्ये इति संकल्प्य गणेशपूजां कृत्वा स्वस्तिवाचनं च कृत्वाऽकृत्वा वाऽऽचार्यं कृत्वा यथाशक्ति संपूज्य विष्णुप्रतिमायास्तद्धस्तेनाग्न्युत्तारणं षोडशोप-

---

(१) 'कमलोत्पल' क० ।
(२) 'दुदीरयेत्' क० ।
(३) 'प्राञ्चजनुषि' ग० ।
(४) अस्याग्रे 'इतिशेषः' इत्यपेक्षितम् ।

अनघाद्याहमस्मीति त्रिवारं प्रजपेदिति ।
एवमस्त्विति तस्याशीर्गृहीत्वा स्वगृहं विशेत् ॥
ततो वैवाहिकं कुर्याद्विधिं दाता मृगीदृशः ।

अन्येऽप्यश्वत्थाविवाहवृक्षसेचनादयस्तत्रैव ज्ञेयाः । विस्तरभयान्नोच्यन्ते ॥

अथ (१)प्रतिकूलादि । ज्योतिर्निबन्धे गर्गः—

*कृते तु निश्चये पश्चान्मृत्युर्भवति कस्यचित् ।
तदा न मङ्गलं कुर्यात्कृते वैधव्यमाप्नुयात् ॥

ज्योतिर्मेधातिथिः—

वधूवरार्थे घटिते सुनिश्चिते वरस्य गेहेऽप्यथ कन्यकायाः ।
मृत्युर्यदि स्यान्मनुजस्य कस्यचित्तदा न कार्यं खलु मङ्गलं बुधैः ॥

मङ्गलं विवाहः । स्मृतिचन्द्रिकायाम्—

कृते वाङ्निश्चये पश्चान्मृत्युर्भवति गोत्रिणः ।
तदा न मङ्गलं कार्यं नारीवैधव्यदं ध्रुवम् ॥

भृगुः—

वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः ।
तदोद्वाहो नैव कार्यः स्ववंशक्षयदोषतः ॥

शौनकः—

वरवध्वोः पिता माता पितृव्यश्च सहोदरः ।

चारपूजनं [च] कार्यम् । तत्र पीते वाससी कुमुदोत्पलमाला च दापनीया । ततो देवं कन्या प्रणम्य यन्मयेत्यादि मन्त्रान् पठित्वा ब्राह्मणाय दद्यात् । ततः सुवर्णमितं यथाशक्ति वा हेमदक्षिणां दद्यात् । ततः "अनघाद्याहमस्मि" इति त्रिर्वदेत् । 'एवमस्तु' इति ब्राह्मणोऽपि त्रिः। ततो यथाशक्तिब्राह्मणान् भोजयित्वा विवाहयोग्या भवेत इति । *कृते त्विति । एतेन "वाग्दानादि चरेव

---

(१) 'प्रातिकुलादिः' क० ।

एतेषां प्रतिकूलं च महाविघ्नप्रदं भवेत् ॥
पिता पितामहश्चैव माता चैव पितामही ।
पितृव्यः*स्त्रीसुतौ भ्राता भगिनी चाविवाहिता ॥
एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतम् ।
अन्यैरपि विपन्नैस्तु केचिदूचु*र्न तद्भवेत् ॥

माण्डव्यः—

वाग्दानानन्तरं माता पिता भ्राता विपद्यते ।

पुनः" इत्यभिधानेन च मन्त्रवद्वाङ्निश्चयोत्तरमेव प्रतिकूलदोष इति । घटितनिश्चयोत्तरं प्रतिकूलदोष इति ज्योतिषमतम् । घटितनिश्चयश्च ज्योतिर्विदादेशेन वरपित्रादिकं प्रति फलदानादिरूपः । *स्त्रीसुताविति । एतौ न वध्वाः असम्भवात् । अतः द्वितीयादिविवाहे वरस्य पूर्वोढा स्त्री तस्यामुत्पन्नश्च सुतः । एतत्पौत्रस्योपलक्षणम्, पितृव्यपदं च तत्पुत्रस्य । एवञ्च वरमारभ्य जनकत्रिपुरुषी, जन्यत्रिपुरुषी, कूटस्थमारभ्य सन्तानभेदेन त्रिपुरुषी चात्र बोद्धव्या । *न तद्भवेदिति । तत् तादृशं महाविघ्नकरं न भवेदित्यर्थः। प्रतिकूलं चेदं विवाह एव वैधव्यपदानुरोधात् । अत्र यद्यपि "मृत्युर्भवति कस्यचित् (मनुजस्य(१) कस्यचिदित्यविशेषणाप्युक्तम्, तथापि पितामह्यादीनामिव मातामह्यादीनामपि मरणस्य प्रतिकूलदोषनिमित्तत्वेन क्वचिदप्यकीर्त्त) नादविवाहितभगिन्या इव विवाहितभगिन्या मरणस्य तथात्वानुक्तेश्च अग्रिममेधातिथिवाक्ये "स्वगोत्रि(२)णाम्" इति, चन्द्रिकावाक्ये "गोत्रिणः" इति च कीर्त्तनाद्वध्वा वरस्य वा सगोत्रसपिण्डेषु त्रिपुरुषान्तर्गते(३)मृते प्रतिकूलदोष इत्यत्र तात्पर्यम् । सङ्कटे तु किञ्चित्कालप्रतीक्षा कार्या, "तदा न मङ्गलं कार्यम्" इति तदाशब्दात् । वरवध्वोरित्यत्र पि-

---

(१) कंसान्तर्गतं नास्ति घ० ङ० ।
(२) 'गोत्रीणामिति' ख० ।
(३) 'मृते' नास्ति घ० ङ० ।

विवाहो नैव कर्तव्यः (१)स्ववंशस्थितिमिच्छता ॥

*संकटे तु मेधातिथिः—

वाग्दानानन्तरं यत्र कुलयोः कस्यचिन्मृतिः ।
तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत् ॥

स्मृतिरत्नावल्याम्—

*पितुरब्दमशौचं स्यात्तदर्धं मातुरेव च ।
मासत्रयं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥

'महाविघ्नप्रदम्' इति विघ्नमहत्त्वोक्तेः । तत्र त्रादिचतुष्टयमुपादाय वक्ष्यमाणवत्सराद्यन्यतमकालं प्रतीक्ष्य विनायकशान्तिः कार्या । उभयत्रापि च तयोरेव पश्चाद्विवाहः,

विवाहस्तु ततः पश्चात्तयोरेव विधीयते ।

इति वचनात् । एतच्च मातापित्रोरेकैकमरणे, तद्वाक्ये तयोः पृथगुपादानात् । तयोर्युगन्मरणे तु कालप्रतीक्षाशान्तिभ्यामपि तद्वधूवरयोर्नैव विवाहः

कृते वाङ्निश्चये पश्चात्पितरौ निधनं गतौ ।
तयोस्तत्प्रातिकूलं स्यान्नान्येषां तु कदाचन ॥

इति कृष्णभट्टीयवाक्ये "नान्येषां तु कदाचन" इति कदाचनशब्दात् । अन्येषां सपिण्डानाम् । "एभिरत्र विपन्नैश्च" इत्यत्रापि मातापितरौ विहाय वक्ष्यमाणमासत्रयादिकालप्रतीक्षासहिता विनायकशान्तिरेव । *सङ्कटे इति । वरान्तरासत्त्वादिना तद्वरायैव तत्कन्याया देयत्वे । * पितुरिति । अत्र पूर्वं प्रतिकूलस्यैवोक्तेः अमरणमात्रहेतुकप्रतिकूलत्वे वर्षाद्याशौचावधिव्यवस्थानर्थक्यम् । अत (उ(२)भयत्रापि च तयोरेव पश्चाद्विवाहः) इदमाशौचं तत्तद्वर्षाद्यवधिकं यथा प्रतिकूलवैधव्यादिसूचकं तथाऽगतौ शान्तिकादिप्रयोजकं च । एवमन्यदपि यत्संगतिकं काम्यं पञ्चवर्षाद्युपनयादि

---

(१) 'स्ववंशहितमिच्छता' क० । (२) कंसान्तर्गतं नास्ति घ० ङ० ।

अन्येषां तु सपिण्डानामाशौचं मासमीरितम् ।
*तदन्ते शान्तिकं कृत्वा ततो लग्नं विधीयते ॥

ज्योतिःप्रकाशे—

*प्रतिकूलेऽपि कर्तव्यो विवाहो मासतः परः ।
शान्तिं विधाय गां दत्त्वा वाग्दानादि चरेत्पुनः ॥

शान्तिं विनायकशान्तिम् । तथा च मेधातिथिः—

संकटे समनुप्राप्ते *याज्ञवल्क्येन योगिना ।
शान्तिरुक्ता गणेशस्य कृत्वा तां शुभमाचरेत् ॥इति।

चौलादि च तत्राप्यधिकारप्रतिबन्धकम् । एवञ्च पित्रादिमरणोत्तरं वर्षाद्यन्तमपूर्वाधानादौ नाधिकारः । न हि तत्र विवाहवच्छान्तिरुक्ता, येन तां कृत्वा तत्राधिकारः स्यात् । एवञ्च जन्मतोऽष्टवर्षाद्युपनयनादावपि अनधिकारान्मासिकाद्यनपकर्षस्थलवन्नवमवर्ष एवाधिकार इति । *तदन्ते वर्षान्ते । *प्रतिकूले इत्यादि । प्रतिकूले सति संवत्सरोर्ध्वं शान्तिपूर्वकं विवाहः कार्य इति मुख्यः कल्पः । षण्मासोत्तरं मासोत्तरं वेति त्वनुकल्पाविति । केचित्तु एतत् पितृमरणे एव । मातृमरणे तु षण्मासं मुख्यः पक्षः, तदर्द्धं मासमात्रं वेति अनुकल्पौ, पितृमरणे मातृमरणस्थलीयषण्मासोपादानेनेह तदर्धलाभात् । एवं भार्यामरणे मासत्रयं सार्द्धमासं मासमात्रं वेति त्रयः कल्पाः । भ्रातृमरणे पुत्रमरणे च सार्द्धं मासं मासं वेति द्वौ । पितामह्यादिसपिण्डमरणे तु मासमेव,

प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् ।

इतिवाक्यादिति युक्तमुत्प्रेक्षन्ते । *याज्ञवल्क्येनेति ।

विनायकः कर्मविघ्नसिद्ध्यर्थं विनियोजितः ।
गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा ॥

इत्यादिनोपक्रम्य शान्तिविधानं प्रदर्श्य,

प्रतिकूले न कर्तव्यो गच्छेद्यावदृतुत्रयम् ।
प्रतिकूलेपि कर्तव्यमित्याहुर्बहुविप्लवे ॥
प्रतिकूले सपिण्डस्य मासमेकं विवर्जयेत् ॥

एवं विनायकं पूज्य ग्रहांश्चैव विधानतः ।
कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमाम् ॥

इतिसर्वकर्माङ्गत्वेनोपसंहारात् । तत्कालो यद्यपि—

स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकम् ।

इतिसामान्यतस्तत्र पुण्याह उक्तः, तथापि विष्णुधर्मे—

हस्तपुष्याश्वयुक्सौम्यवैष्णवान्यतमे शुभे ।
नक्षत्रे च मुहूर्त्ते च मैत्रे वा ब्रह्मदैवते ॥

भविष्ये—

शुक्लपक्षे चतुर्थ्यां तु वासरे धिषणस्य च ।
तिष्ये च वीरनक्षत्रे तस्यैव पुरतो नृप ॥

बृहत्पराशरः—

चतुर्थ्यां शुक्लपक्षे तु अयने चोत्तरे तथा ।
पुण्यार्थं सर्वसिद्ध्यर्थं कुर्याच्छान्ति विनायकीम् ॥

वृद्ध्यभावश्छान्दस इति पुण्यार्थं विवाहादिकर्माङ्गतया । देवनक्षत्रं कृत्तिकादिविशाखान्तं किञ्चिद्ग्राह्यं, "यत्पुण्यं नक्षत्रम्" इति श्रुतेः । अत्र सर्वेषामधिकारः,

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैर्वा सिद्धिकामुकैः ।
कर्मनिर्विघ्नसिद्ध्यर्थं संपूज्यश्च गजाननः ॥

इति लैङ्गात्—

यजमानस्तु शूद्रश्चेदद्विजैस्तान्नियोजयेत् ।

इति महार्णवाच्च । कुमार्यादिस्त्रीणामपि—

कुमारी न च भर्त्तारमपत्यं गर्भमङ्गना ।

इति याज्ञवल्क्यात् । अङ्गना (१)चापत्यं न लभते, नापि गर्भिणी, गर्भो न जीवतीति यावत्,

तेनोपहतपुंसां च कर्म स्यान्निष्फलं कृतम् ।
स्त्रीणामपि तथा सर्वं क्रियमाणं तु निष्फलम् ॥

इति बृहत्पराशराच्च । एवं गणेशशान्तिरप्यस्ति भविष्ये—

चतुर्थ्यां वारणं हैमं पलादूर्ध्वं सुशोभनम् ।
कारयित्वाङ्कुशयुतं तिलद्रोणोपरि न्यसेत् ॥
वस्त्रैः पुष्पैः पूजयित्वा नैवेद्यान्तान् पृथक् पृथक् ।
ततस्तु ब्राह्मणे दद्याद्गणेशः प्रीयतामिति ॥
कार्यारम्भेषु सर्वेषु तस्य विघ्नं न जायते ।
वारणाः सप्त जन्मानि भवन्ति मदविह्वलाः । इति ।

'चैत्रे श्रावणे वा कार्या विनायकशान्तिर्विकल्पिता चैव' इति हेमाद्रिः ।

"ग्रहांश्चैव विधानतः" इत्याद्यभिधानादुपनयनविवाहयोर्ग्रहशान्तिरपि कार्या । सा च याज्ञवल्क्योक्ता, गृह्यपरिशिष्टाद्युक्ता वा । तत्र स्थण्डिलं कुण्डं वा कार्यम् । तत्र एकाग्निब्रह्माचार्यपक्ष एकः । तेषां नवसंख्यां कुण्डेषु तत्तद्ग्रहाकारांश्चाह प्रयोगपारिजाते भगवान्—

मनोरमे शुचौ देशे होमशालामलंकृताम् ।
कृत्वा तु संवृतां प्राज्ञो ग्रहस्थानं प्रकल्पयेत् ॥
तन्मध्ये भास्करस्थानं भवेत्पूर्वोत्तरे बुधः ।
पूर्वस्मिन् भार्गवस्थानं सोमो दक्षिणपूर्वके ॥
दक्षिणस्यां कुजस्थानं राहोर्दक्षिणपश्चिमे ।
शनेस्तु पश्चिमे स्थानं केतोरुत्तरपश्चिमे ॥
उत्तरस्यां गुरोः स्थानमेवं च स्थण्डिलं भवेत् ॥

---

(१) 'चापत्यं लभते' ख० ।

स्थण्डिलमग्न्यर्थम् ।

भास्करस्य तु वृत्तं स्याच्चन्द्रस्य चतुरस्रकम् ।
कुजस्य तु त्रिकोणं स्याद्बाणाकारं बुधस्य तु ॥
गुरोर्दीर्घचतुष्कोणं पञ्चकोणं सितस्य तु ।
चापाकारं शने राहोः सूर्पं केतोर्ध्वजाकृतिम् ॥
एकस्थानप्रणीतेऽग्नौ सर्वतः परिभाविते ।
होमं कुर्युर्द्विजाः सर्वे कुण्डे कुण्डे यथोदितम् ॥
नवधा विभजेदग्निं श्रौतकर्मविधानतः ।
ऋत्विजश्च यथायोग्यं कुण्डेषु ब्राह्मणाः पृथक् ॥
अथ स्रुवेण जुहुयात्सूर्यपावकरुद्रकान् ।
ऋत्विजो जुहुयुः सर्वे स्रुवेणैव पृथक् पृथक् ॥
(१)अष्टौ च शकलान् गृह्य समारोपणमग्निषु ।
प्रधानेऽग्नौ विधायेमानित्थं (२)होमं चरेदिति ॥

भास्करस्य तु वृत्तं स्यादित्यादेः स्थाने ऽन्वयः। एवं स्थण्डिलं चेति स्थण्डिलानां कुण्डानां च तत्तदाकारः तत्तद्दिङ्निवेशश्चोक्तः। ब्राह्मणाः पृथगिति नवाचार्या नवब्रह्माणश्चोक्ताः। आचार्यः मध्यकुण्डेऽग्निं संस्थापयेत् । ततोऽष्टावाचार्या (३)अष्टकुण्डेष्वग्निं प्रणयेयुः। ततो नवाचार्या आज्यभागान्तेऽर्कादिसमिद्भिर्गुडौदनादिहविर्भिराज्येन च ग्रहादिमन्त्रैर्हुत्वा व्यस्तसमस्ताभिर्व्याहृतिभिस्तिलान् हुत्वा स्विष्टकृदादिहोमान्ते पूर्णाहुतीर्जुहुयुः । ततोऽष्टाचार्याः प्रधानाग्नौ समिधा स्वस्वाग्निसमारोपणं कुर्युरित्यग्निस्थापनानन्तरमेवाचार्यकुण्डादग्निप्रणयनमुक्तम् । परंतु तत्राचार्यकुण्डे अग्निस्थापनाद्याज्यभागान्तं कृत्वा अन्यकुण्डेष्वग्निप्रणयनं कार्यम्।

---

(१) 'अष्टौ च कलशान्गृह्य समारोहणमग्निषु' घ० ङ०।
(२) 'होमं समाचरेत् इति' घ० ङ०।
(३) 'अष्टसु कुण्डेषु अग्निं' घ० ङ०।

तेनाज्यभागान्तं पूर्वाङ्गं स्विष्टकृदाद्युत्तराङ्गं च तन्त्रेण भवतीति वदन्ति । पीठस्य वृत्ताद्याकारो लघुपीठमालायाम्-

सूर्यस्यार्काङ्गुलं वृत्तमेकाद्रीषुचतुः कृतम् ।
तद्व्यासार्धं तेन सम्यक् जायते नेत्रसुन्दरम् ॥

एक १ अद्रि ७ इषु ५ चतु ४ र्भिः क्रमेण अङ्गुलयवयूकालिक्षाभिर्व्यासार्द्धम् । तद्द्विगुणो व्यासः । ३ । ७ । ३ ।

व्यासस्य वर्गे भनवाग्निनिघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते ।

इति सूत्रेण फलं द्वादशाङ्गुलम् । यथा व्यासवर्गः १८ । ३ । ० । अयं भनवाग्नि ३९२७ निघ्न७०६८६ । पञ्चसहस्र५००० भक्तक्षेत्रफलं १२ जातं द्वादशाङ्गुलमिदं सूर्यस्य वर्त्तुलं पीठम् ।

चान्द्रं सिद्धाङ्गुलं वेदकोणं वेदाद्रिपक्षयुक् ।

वेद ४ अद्रि ७ पक्ष २ क्रमेणाङ्गुलादिभिः इदं कोटिमानं भुजमानं च । तदुभयघाते (१)क्षेत्रफलं २४०० ४ । ६ । सिद्धाङ्गुलं चतुर्विंशत्यङ्गुलम् । इदं चन्द्रस्य चतुरस्रं पीठम् ।

भौमस्याब्धिफलं त्र्यस्रं त्रिखाम्बुधिभिराहतम् ॥

त्रि ३ ख० शून्य अम्बुधय ४ श्चत्वारोङ्गुलाद्याः, तैः आहतं भौमस्य चतुरङ्गुलं फलं त्रिकोणं पीठं त्रिकोणे त्रयोभुजाःसमप्रमाणाः । तत्राधस्तना भूमिः । उपरितनौ भुजौ । तन्मानं (२) ३० । ४ । तत्र सूत्रम्-

(३)आबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः ।
लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति ॥ इति ।

भूम्यर्द्धमाबाधा १ । ४ । २ । २ । ६ । (४)भुजः । ३ । ४ । ४ । अस्य कृतिः समद्विघातः । ९ । ३ । ० । अनयोरन्तरं (५)७ ।

---

(१) 'क्षेत्रफलं २४० ४६ सि' घ० ङ० ।
(२) '३ । ० । ४ ।' ङ । (३) 'स्वबाधा' ख० ।
(४) 'भुजः' ३० । ० । ४ । घ० ङ० । (५) '७ । ० । २' घ० ङ ।

२।०। अस्य मूलं २।५।१ अनेन भूम्यर्द्धं १।४।२। गुणितं ४।०।२।७। स्पष्टं भौमत्र्यस्रक्षेत्रफलम्।

चतुर्यवान्तरं वेदाङ्गुलं स्यात्तु भुजद्वयम्।
ऊर्ध्वाधस्तद्द्वयार्द्धैश्च प्रत्येकं स्याच्चतुर्यवा।
भूमिः षड्यववेदाभ्यां भुजाभ्यां षट्त्रिकोणकम्॥
तद्युक्तं बाणसमयं बुधपीठं प्रचक्षते॥

दीर्घचतुरस्रौ भुजौ चतुरङ्गुलौ चतुर्यवा तत्र कोटिः तत्फलं भुजकोटिघातः फलं २।०।०। त्रिकोणभूमिमानं १।४।०। भुजमानं २।६।०। भूम्यर्द्धमाबाधा ०।६।०। स्वाबाधाभुजकृत्योरिति क्रमेण लम्बः २।५।२।८। भूम्यर्द्धगुणितः त्र्यस्रे क्षेत्रफलं २।०।०।जातं। उभयोरैक्ये ४।०।०। बुधबाणक्षेत्रफलम्।

तर्काङ्गुलं गुरोः पीठं दस्रानलभुजद्वयम्।

दस्रौ द्व्यङ्गुलौ द्वौ भुजौ अनलौ त्र्यङ्गुलौ द्वौ भुजौ कोटिसंज्ञौ, तत्रैकभुजैककोट्योर्घातः फलं षडङ्गुलं गुरुपीठम्।

शुक्रस्य पीठं पञ्चास्रं व्यासार्द्धं कुनगेषुभिः।
व्यासेन वृत्ते पूर्वादिसमाज्याः पञ्चमन्धगाः॥
प्रोञ्छिते बाह्यतो वृत्ते नवाङ्गुलफलं मतम्।

कुर्भूमिः१,नगाः सप्त,इषुः पञ्च,तैः तस्य वृत्तस्य व्यासार्द्धं,तद्द्विगुणो व्यासः। तन्मध्ये पूर्वादिक्रमेण पञ्च समानि चिह्नानि कृत्वा पञ्च ज्याः (१)कार्याः। बाह्यवृत्तप्रोञ्छनेन पञ्चास्रं नवाङ्गुलक्षेत्रफलं भृगुपीठम्। तत्र पञ्च त्रिकोणानि तत्र एकस्य फलं। ज्यामिता भूमिः २।२।३। भूम्यर्द्धमा(२)बाधा १। १।४। व्यासार्द्धमितो भुजः१।७।५। आभ्यां स्वाबाधाभुजकृत्योरित्युक्तरीत्या लम्बः १।४।५। अनेन (३)भूम्यर्द्धं १।१।४। लम्बेन गुणितम्।

---

(१) 'कार्याः' नास्ति ङ०। (२) 'माबाधा १।१।१।४। व्यासा' ङ०।
(३) 'भ्यर्धं १।१।१४।लम्बेन' ङ०।

एकत्रिकोणफलं १ । ६ । ४ । एतत्पञ्च(१)गुणं ९ । ० । ४ । पञ्चास्र (२)शुक्रपीठक्षेत्रफलम् ।

वेदाब्धिवेदाब्धिभूमिर्धनुः पीठं शनेर्भ्रमात् ।
मध्यस्थचतुरस्रस्य मानहीनात् षड्ङ्गुलम् ॥
चतुरस्रे त्वपगते चतुर्दिक्षु चतुर्धनुः ।
एकं धनुः फलं तत्र ग्राह्यं हात्वा धनुस्त्रिकम् ॥

वेद ४ आब्धि ४ वेद ४ अब्धि ४ भू १ एतन्मितं व्यासार्द्धं, तद्द्विगुणो व्यासः । तेन भ्रमात् वृत्तं तस्य व्यासस्य वर्गे इति क्रमेण फलं ८ । ५ । ५ । ० । तत्र वृत्तमध्ये एकं चतुरस्रमस्ति तस्य(३)भुजः ६ । ३ । ५ । कोटिरपि सैव ६ । ३ । ५ । उभयोर्घातात् चतुरस्रफलं ४१ । ५ । ० । तेन फलेनोनं कार्यम् । ततोऽवशिष्टं २४ । ० । ० । अस्य चतुर्थांशः ६ । ० । ० । षडङ्गुल(४)धनुः फलम् । चतुरस्रेऽपगते चतुर्दिक्षु चतुर्धनुरवशेषस्तत्र धनुस्त्रयं त्यक्त्वा एकधनुर्ग्रहात् । शनेर्व्यङ्गुलपीठपक्षे गुरुपीठमालाऽतस्तत्प्रकारो बोध्यः ।

वेदाङ्गुलैर्वेदकोणे पूर्वतो रेखयोरिह ।
तिर्यग्द्व्यग्न्यम्भोधिवृद्धिरधोबाह्वर्धमानतः ॥
वृत्तेर्द्धे राहुपीठं स्याच्छूर्पं सिद्धाङ्गुलं शुभम् ॥

प्रथमत एकं चतुरस्रं तत्र भुजमानं ४ । ० । ० । तदेव कोटिमानं ४ । ० । ० । तत्र पूर्वयो रेखयोः तिर्यग्दक्षिणोत्तरद्वि २ अग्नयः त्रयः, अम्भोधयः ४, दाक्षिणे अर्द्धे १ । १ । ६ । उत्तरे अर्द्धे १ । १ । ६ । अङ्गुलयवयूकानां वृद्धिः । अधो भूमेरर्द्धं कृत्वा वृत्तद्वयं कार्यम् । एवञ्चोपरि भूमिः ६ । ३ । ४ । अधो भूमिः ४ । ० । ० । लम्बः ४ । ० । ० । लम्बेन निघ्नं कुमुखैक्यखण्डमिति रीत्या

---

(१) 'गुणं ९ । ० । ४ । पञ्चास्र' ङ० । (२) 'शुक्रपीठं पीठक्षेत्र' ख० ।
(३) 'भुजः ६ । ६ । ५ । तत्र' ङ० । (४) 'धनुः २। चतुरस्रे' ङ० ।

लम्बेन ४ निघ्नं तत्फलं । तत्र कुम्भुखैक्यखण्डं ८ । १ । ६ । तद्द्विगुणोलं २० । ७ । ० । अधोवृत्तव्यासार्धं १ । ० । ० । व्यासस्य वर्गे भनवाग्निनिघ्ने इति क्रमेण व्यासः २ । ० । ० । उभयैक्ये २४ । ० । २ । १ । राहुपीठशूर्पफलं ३ । २ । १ । फलम् ।

पूर्वापरौ गतौ बाहू कोटिरर्द्धाङ्गुला भवेत् ।
ऊर्ध्वमेकाङ्गुलं हित्वा हित्वा चाधः शराङ्गुलम् ॥
चतुरेकाङ्गुलयवं लग्नास्यं त्र्यस्रमारभ ।
केतोर्ध्वजाभं कुण्डं स्याद्गजाङ्गुलमितं शुभम् ॥

पूर्वापरौ भुजौ अष्टाङ्गुलौ कोटिरर्द्धाङ्गुला । तत्फलं ४ । ० । ० । उपरिभागे एकाङ्गुलम् अधोभागे च पञ्चाङ्गुलं त्यक्त्वा एकं चतुः एक १ अङ्गुलयवं लग्नास्यं त्र्यस्रं कुरु । त्र्यस्रं ४ । २ । ० । तत्र भू २ ।०।० मानं । तदर्धमाबाधा १ । ० । ० । भुजः ४।०।१। स्वाबाधाभुजकृत्योरिति क्रमेण लम्बः ४ । ० । ० । अनेनाबाधायां गुणितायां त्रिभुजफलं ४ । ० । ० । फलद्वयै(१)क्यं ८ । एतत्केतुपीठं ध्वजाकारम् । सर्वत्रापि ग्रहमखे ग्रहपूजार्थम्,एवंक्रमेण पीठानि कार्याणि ।

अथ होमार्थं ग्रहपीठाकारकुण्डानि यथा—

मध्ये वृत्तं पूर्वतः पञ्चकोणमाम्नायास्रं त्र्यस्रशूर्पं धनुश्च ।
केतुर्दीर्घाम्नायकोणं सबाणमाग्नेयीतः कुण्डसंस्था क्रमेण ॥
भानुः शुक्रश्चन्द्रमाश्चापि भौमो राहुर्मन्दः केतवो गीष्पतिश्च ।
सौम्यश्चैषां स्वामिनः स्युः क्रमेण तत्रात्र्यस्रं प्राकृतं कुण्डजातम् ॥

आत्र्यस्रं त्र्यस्रमभिव्याप्य प्राकृतं पञ्चास्रं चतुरस्रं त्र्यस्रं च कुण्डार्काद्युक्तरीत्या कार्यम् ।

---

(१) 'द्वयैक्यम् एत' ङ० ।

यावा भूमिः सप्तविंशाङ्गुलाऽथ
यावा वृत्तार्द्धावृताऽन्या तिथेः स्यात् ।
त्रयोविंशस्तत्र लम्बाङ्गुलश्च
राहोः शूर्पं कुण्डमेतद्विचित्रम् ॥

यत्र एव यावः । पूर्वा भूमिः २७ स(१)प्तविंशाङ्गुली चतुर्यवा, अन्या इतरा पश्चिमा भूमिः तिथेः पञ्चदशात् स्यात् । सा च वृत्तावृत्तार्द्धेनावृता युक्ता । त्रयोविंशत्यङ्गुलश्च लम्ब इत्यर्थः । अथ फलं । पूर्वभूमिः २७ । ४ । पश्चिमभूमिः १८ । तयोरैक्यं ४२ । ४ । तदर्धं २१ । २ । लम्बः २३ । लम्बेन निघ्नं कुमखैक्यखण्डमिति क्रमेण ४ । ८८ । पश्चाद्भूमेर्व्यासः ५९ ।

व्यासस्य वर्गे भनवाग्नि निघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते ।

इति सूत्रेण फलं १७६ । तदर्धं ८८ । तयोरैक्यं ५७६ । अथवा—

सिद्धाऽङ्गुलो भवेल्लम्बः पश्चाद्भूमिर्नखाङ्गुला ।
पूर्वाऽष्टाविंशतिः प्रोक्ता शूर्पे स्यादृजुकोणके ॥

इत्यनेन पश्चाद्वृत्तं नास्तीति ध्वनितम् । चतुर्विंशत्यङ्गुलो लम्बः २४ । नखानि विंशतिः । तथाच कुमुखद्वयं २० । २८ । तयोरैक्यं ४८ तदर्धं २४ अनयोर्घातः तस्य फलं ५७६ ।

संग्राहोऽर्द्धे सार्धरामेण चापेऽन्तर्ज्यार्हः स्याद्वृत्तपादोदिगंकात् ।
सूत्राद्दैर्ध्याद्बाह्यमौर्व्यर्हमेवं वृत्तं दद्याज्ज्यास्पृगेवं परार्द्धम् ॥

चापे यदर्द्धं तत्र सार्द्धत्र्यङ्गुलेन संग्राहः भागः कार्यः । ततः दशाङ्गुलात्सूत्रादन्तर्ज्यार्हः वृत्तपादः कर्त्तव्यः । तथा तत्र एकादशाङ्गुलेन सूत्रेण चापज्यास्पृक् बाह्यज्यार्हं वृत्तं दद्यात् । तथाच ज्यासं(२)ग्राहचिह्नयोरन्तरं २१ । एकत्रिंशत्यङ्गुलं भवति । एवमेव द्वितीयार्द्धं भवति । अन्तर्बहिर्ज्यार्हत्वं तदसत्त्वार्थम् । अत्र फलं संग्राहार्द्धफलं ७३ । ४ । वृत्तपादफलं ७८४ ज्यास्पृक् सूत्रान्त-

---

(१) 'सप्तविंशाङ्गुलि' घ० ङ० । (२) 'संग्राहकचिह्नयो' घ० ङ० ।

श्चतुरस्रफलं तत्र एका कोटिः ११ परा कोटिः ११ कोणांशफलं तत्रागन्तुके चतुरस्रे कोटिः २१ । भु(१)जः २१ अनयोर्घातः ४८ । ४ तत्र तद्वृत्तफलस्य हानिः शेषे १० । ४ । अंशत्रयं ७८ सक्त्या शेषांशो ग्राह्यः २६ । तथाच ७३ । ४ एवं ७८ । ४ एवं ११० एकत्र २८८ एवं परार्द्धस्य २८८ मिलितं ५७६ ।

इषुवेदमितेन दीर्घदोष्णा गजदोष्णा लघुतापि च त्रिषष्टिः ।
जिनलम्बगुणेन वार्द्धषट्त्रिभुविचार्धात्मवदन्तिकेतुकुण्डम् ॥

इषुवेदैः ४५ । गज ८ भुजकोटिघातः ३६० । जिन २४ लम्बं । षट्त्रि ३६ तदर्धं १८ भूमिस्तदर्धं ९ लम्बगुणं २१६ । एकत्र ५७६ फलम् ।

एकेनयुग्मत्रिभिरङ्गुलीभिः परेण धृत्या च मितेन दोष्णा ।
सुदीर्घवेदास्रमुशन्तिकुण्डं निगद्यतेऽथो द्विविधं शराभम् ॥

फाले लम्बो भूश्च सिद्धाङ्गुलैस्त-
लुम्बा यष्टिः पार्श्वयोरङ्गुलीभिः ।
वेदैर्वेदेषुभिश्चात्र भूः स्या-
द्धत्योभयप्यायता षट्त्रिपर्वैः ॥

(२)फाले लम्बः भूश्चतुर्विंशत्यङ्गुला तल्लम्बादुभयतः पार्श्वयोश्चतुर्भिश्चतुर्भिरङ्गुलिभिरुपलक्षिता यष्टिः । अथवा पञ्चभिः, अत्र पक्षे भूरष्टादशाङ्गुला । उभयत्रापि यष्टिः षट्त्रिंशदङ्गुलायता । अथ फलं फाले लम्बः २४ । भूमिः २४ अर्द्धं १२ लंबगुणं २८८ तथा दीर्घो भुजः ह्रस्वो भुजः ८ । अनयोर्घातः २८८ । एकत्र ५७६ । अथवा फाले लम्बः २३ भूः १८ अर्द्धं ९ लम्बगुणं भूम्यर्द्धं २१६ । तथा भुजः ३६ ह्रस्वो भुजः १० अनयोर्घातः ३६० । एकत्र ५७६ ।

यष्टिर्बाणैः सौम्यदिश्यग्र एव त्र्यस्रं तादृक् शूर्पकं पश्चिमास्यम् ।

---

(१) 'भुजः २२' ड० । (२) 'फाले लम्बः' नास्ति ख० ।

बार्हस्पत्यं सौम्यदीर्घं धनुस्तत् पश्चाद्दिगूज्यं शुक्रियं सौम्यकोणम् ॥
सौम्यं सौर्यं प्राकृतं चाज्ञमौलं कण्ठो नाभिःखातको मेखलाश्च।
आदित्यादेर्होमकुण्डान्यवादीत् श्रीकृष्णस्य प्रीतये राङ्गनाथिः ॥
आदित्यादेः पीठमालां निरुच्य पीठान्येवं दिग्गतानि प्रयोगात्।
पीठे पूजां कुण्डमालासु होमं कृत्वा देवं श्रीहरिं भावयाशु ॥

श्रीकामादेस्तु अयुतहोमलक्षहोमकोटिहोमाः ग्रहमखाः। तत्र कोटिहोमः शतमुखदशमुखद्विमुखैकमुखभेदैश्चतुर्धा संवरणेन पृष्टः सनत्कुमार उवाच—

शताननो दशमुखो द्विमुखैकमुखौ तथा।
चतुर्विधो महाराज! कोटिहोमो विधीयते ॥
कृत्वा कुण्डशतं दिव्यं यथोक्तं हस्तसंमितम्।
एकैकस्मिंस्ततः कुण्डे दशविप्रान्निमन्त्रयेत् ॥
सद्यः पक्षे तु विप्राणां सहस्रं परिकीर्तितम्।
अल्पैरहोभिः कार्यः स्याद्वर्षाकालादिकेऽपि वा ॥
तदा दशमुखः कार्यः कोटिहोमो महामते।
विप्राणां द्वे शते तत्र सुविभज्य नियोजयेत् ॥
(अथ (१)कुण्डद्वयं कृत्वा विभज्य च विभावसुम्।
शतं तत्र नियोज्यं स्याद् विप्राणां प्रविभज्य वै ॥
यदा तु स्वेच्छया यज्ञं यजमानः समापयेत्।)
कालेन महता राजन् तदा चैकमुखो भवेत् ॥
न संख्यानियमश्चात्र ब्राह्मणानां नरोत्तम ॥

इत्यादिना भविष्योत्तरे उक्तः। तत्र एकमुखः प्रकृतिः तत्र सकलधर्माम्नायात्। अन्ये विकृतयः। अतस्तेषु एकमुखविहितकुण्डादयः कार्याः। तत्र मण्डपस्त्रिविधः—

"उत्तमं (२)शतहस्तं तु तदर्द्धेन तु मध्यमम्।

---

(१) कंसान्तर्गतं नास्ति ङ०। (२) 'शतमुखं' ङ०।

जघन्यं तु तदर्द्धेन" ।

इत्यादिः । तेषां यथा(१)सम्भवं शतमुखादौ विनियोगः ।

तत्र द्विमुखे—

अष्टहस्तप्रमाणेनायामेन [च] तथैव च ।
मेखला(२) त्रितयं तस्य द्वादशाङ्गुलविस्तृतम् ॥
मध्ये तु मण्डपस्यापि कुण्डं कुर्याद्विचक्षणः ॥

इति कुण्डं मध्यदेशश्च प्राप्तः । तत्र एकं दक्षिणतः अपरमुत्तरत इति कुण्डद्वयं कार्यम् तत्र-

दशलक्षमिते होमे षट्करं सम्प्रचक्षते ।

यद्वा,

कुण्डं पञ्चकरं प्रोक्तं दशलक्षाहुतौ क्रमात् ।

इति पक्षद्वयम् । तयोश्च शतपञ्चाशद्धस्तमण्डपयोः मध्यमनवमांश सुखेन निवेशः । पञ्चविंशतिहस्ते मण्डपे तु मध्यमनवमांशे यद्यप्य ष्टाङ्गुलाष्टहस्ते विनिवेशो न सम्भवति, तथापि पूर्वपश्चिमनवमभागयोः किञ्चिदंशं गृहीत्वा निवेशः कार्यः । एवं दशमुखेऽपि मध्यमनवमभागे कुण्डद्वयं कार्यम्, अत्राशिष्टान्यष्ट कुण्डानि पूर्वादिक्रमे (३)एकैकाष्टनवमांशे कर्याणि । पूर्वदिक्नवमांशे प्राकृती समचतुरस्रा चतुर्हस्ता देवपूजार्था वेदिः कार्या । तत्र शतहस्ततदर्द्धमण्ड पक्षे षट्कराणि पञ्चकराणि वा यावन्ति मध्यनवमभागे भव तावन्ति तत्र कृत्वाऽवशिष्टान्यवशिष्टभागेषु यथासम्भवं कार्याणि पूर्वदिग्गतनवम(४)भागे वेदिश्चेति । शतमुखे तु सद्यःपक्ष एव ।

कृत्वा कुण्डशतं दिव्यं यथोक्तं हस्तसंमितम् ।

इत्याद्युक्तेः । नन्वत्र एकहस्ते कथं लक्षाहुतयः ? न च शी

---

(१) 'सम्भवं' नास्ति ङ० ।
(२) 'द्वितियं' ख० ।
(३) 'एकैकनवमांशे' ङ० ।
(४) 'भागे देहि' ख० ।

दाहिघृतेन कार्या इति वाच्यं, तस्याविधानात् तिलानां प्रकृतत्वेन तद्बाधापत्तेश्च । अत्र केचित्—

द्विहस्तमयुते तच्च लक्षहोमे चतुःकरम् ।
अयुते त्वथ होतव्ये कुण्डं स्याद्धस्तमात्रकम् ॥
द्विगुणं लक्षहोमे तु कोटिहोमे चतुर्गुणम् ॥

इति वाक्याद्द्विहस्तं कार्यम् । हस्तसंमितमित्यत्र द्विवचनान्तो बहुवचनान्तो वा विग्रह इति । अन्येतु व्याससमखातमेकहस्तमेककुण्डषट्पञ्चचतुस्त्र्यङ्गुलाभिः पञ्चभिर्मेखलाभिर्युतं कार्यम् । तच्च तिललक्षहोमोपयोगीत्याहुः । तत्र एकहस्ते पञ्चदशांशः खातः तत्फलं चतुर्विंशत्यधिकसप्ताशीतिः । एकाङ्गुलः कण्ठः । तयोः क्षेत्रफलं चतुर्विंशत्यधिकसप्तशतसहितचतुर्दशसहस्राङ्गुलानि १४७२४ एतद्द्विगुणं २९४४८ एतस्मादधिकक्षेत्रफलं पूर्वोक्ते हस्तकुण्डे इति तदेव युक्तम् । मेखलारहितसमखाते त्र्यङ्गुलसहितकण्ठेऽङ्गुलानि चतुरधिकपञ्चशतीसहितैकोनत्रिंशत्सहस्राणि । अस्मिन् पक्षे आहुतिपरिमाणं स्वल्पं कार्यं "शतं चतुःषष्टिर्वा व्रीहितुल्यानां तदर्द्धेन तिलानाम्" इति गृह्यपरिशिष्टात् । एवञ्च द्वात्रिंशत्तिलानामिति परिमाणमुपेत्य एकहस्तेऽपि द्विहस्तवदेव लक्षहोम इति । एषां च शतकुण्डानां पञ्चविंशतिहस्ते मण्डपे बाधान्न निवेशः । पञ्चाशद्धस्ते निवेशेऽपि न ब्राह्मणानां निवेशः सम्भवति । अतः शतहस्त एव मण्डपः कार्यः । अत्र केचित्—सर्वमण्डपस्य समांशेन शतं भागा कल्प्याः । तत्रैकैकभागे एकैकं कुण्डं कार्यमिति ।

तत्र बहूनां कुण्डानां प्रकृतिप्राप्तमध्यदेशबाधः स्यात्, अतः मध्यमनवमभागे विंशतिः कुण्डानि कार्याणि । यथा पञ्चकुण्डानामेका दक्षिणोत्तरा पङ्क्तिः । एवमन्यास्तिस्रः । तत्र मध्यमनवमांशस्यष्टाङ्गुलाधिकत्रयस्त्रिंशद्धस्तमितत्वाद्दक्षिणोत्तरयोर्द्वयोः सप्ताङ्गुलाधिकसार्द्धचतुर्हस्तात्मकमन्तरं तुल्यं भवति । प्राक्पश्चात्कुण्डमालयो-

रष्टाङ्गुलाधिकसप्तहस्तमन्तरमिति तत्रान्तरे सावकाशतया प्रतिकुकुण्डाभिमुखपाङ्क्तिद्वयेन होतृब्राह्मणोपवेशनं सुखतो भवति । एवमवशिष्टान्यशीतिकुण्डानि, अवशिष्टेष्वष्टनवमांशेषु निवेश्यानि । तत्रापि मध्ये द्वे अष्टसु दिक्ष्वष्टेति रीत्या दशेति ।

अथवा मध्यमे नवमांशेऽष्टाविंशतिकुण्डानि निवेश्यानि । तथा सप्तानां कुण्डानां दक्षिणोत्तरा प्रथमा पङ्क्तिः । एवमेव तिस्रः पङ्क्तयः कार्याः । तत्र द्वयोर्द्वयोर्दक्षिणोत्तरयोः षडङ्गुलाधिकद्विहस्तमन्तरं समम् । अवशिष्टानि द्वासप्ततिकुण्डानि अवशिष्टेष्वष्टसु नवमांशेषु निवेश्यानि । तत्रैकैकनवमांशे नव कुण्डानि । तत्र मध्यमनवमांशस्थानामष्टाविंशतिकुण्डानां बहिः परिधिरूपेण षोडश, तद्बहिः परिधिरूपेण चतुर्विंशतिः, तद्बहिः परिधिरूपेण द्वात्रिंशदिति । न चात्र पक्षे मध्यमनवमांशे दक्षिणोत्तरयोः कुण्डयोः षडङ्गुलाधिकद्विहस्तमेवान्तरालं, तत्र स्वस्वकुण्डाभिमुख्येन ब्राह्मणपङ्क्त्युपवेशने कुण्डद्वयज्वालाक्लेशप्रसङ्ग इति वाच्यं, यदा दक्षिणामुखोपवेश्या यजुर्वेदिनो नोपलभ्यन्ते, यदा वोत्तरदिगभिमुखोपवेश्या अथर्वणा नोपलभ्यन्ते, उभयं वा नोपलभ्यन्ते, तदा एतत्पक्षसौकर्यात् । चतुर्वेद्युपलम्भे तु प्राक्तन एव पक्षः कार्य इति । समित्तिलचर्वाज्यद्रव्येषु आदित्यादिनवग्रहा एव प्रधानदेवताः । व्यस्तसमस्तव्याहृतिभिरयुतादिहोमे तु त एव प्रधानदेवता इति तदुद्देशेनैव त्याग इत्येके । अयुतादिव्याहृतिहोमे त्वग्निवायुसूर्यप्रजापतय इति भट्टाः । इन्द्रादिलोकपालादयस्त्वङ्गदेवताः, इत्यस्तु प्रासङ्गिकम् । अधिकं शान्तिकमलकरादिग्रन्थेभ्यो द्रष्टव्यम् ।

अथ नवग्रहदानानि । तत्र सूर्यस्य —

कौसुम्भवस्त्रं गुडहेमताम्रं माणिक्यगोधूमसुवर्णपद्मम् ।
सवत्सगोदानमिति प्रणीतं दुष्टाय सूर्याय मसूरिकाश्च ॥
आरक्तकं चन्दनमम्बुजं च वदन्ति दानं हि दिवाकराय ॥

अथ चन्द्रस्य—

घृतकलशसितवस्त्रं दधिशङ्खमौक्तिकं सुवर्णं च ।
रजतं च सम्प्रदद्याच्चन्द्रारिष्टोपशमनाय ॥
सद्वंशपात्रस्थिततण्डुलाश्च कर्पूरमुक्ताफलशुभ्रवस्त्रम् ।
युगोपयुक्तं वृषभं च रौप्यं चन्द्राय दद्यात्घृतपूर्णकुम्भम् ॥

अथ भौमस्य—

प्रवालगोधूममसूरिकाश्च वृषश्च ताम्रः करवीरपुष्पम् ।
आरक्तवस्त्रं गुडहेमताम्रं दुष्टाय भौमाय सचन्दनं हि ॥

अथ बुधस्य—

नीलं वस्त्रं मुद्गदानं बुधाय रत्नं पाचीदासिकाहेमसर्पिः ।
कांस्यं दन्तः कुञ्जरश्चाथ मेषो रौप्यं सर्वं पुष्पजात्यादिकं च ॥

अथ गुरोः—

रथः सुवर्णं शुभपीतवस्त्रं सपीतधान्यं लवणं सुपुष्पम् ।
सशर्करं सद्रजनीप्रयुक्तं दुष्टाय शान्त्यै गुरवे प्रणीतम् ॥

अथ भृगोः—

चित्रवस्त्रमपिदानवर्धिते दुष्टगे मुनिगणैः परिणीतम् ।
तण्डुलं घृतसुवर्णरूपकं वज्रकं परिमलो धवला गौः ॥
चित्राम्बरं शुभ्रतरस्तुरङ्गो धनुश्च वज्रं रजतं सुवर्णम् ।
सतण्डुलाज्योत्तमगन्धयुक्तं वदन्ति दानं भृगुनन्दनाय ॥

अथ शनेः—

नीलकं महिषं वस्त्रं कृष्णं लोहं सदक्षिणम् ।
दद्याच्च दक्षिणायुक्तं शनिदोषप्रशान्तये ॥
माषाश्च तैलं विमलेन्द्रनीलः तिला कुलित्था महिषी च लोहम् ।
सदक्षिणं चेदमुशान्ति नूनं दुष्टाय दानं रविनन्दनाय ॥

अथ राहोः—

गोमेदरत्नं च तुरङ्गमश्च सुनीलचैलानि च कम्बलाश्च ।

तिलाश्च तैलं खलु लोहमिश्रं स्वर्भानवे दानमिदं वदन्ति ॥
राहोर्दानं बुधैर्मेषो गोमेदो लोहकम्बलौ ।
सुवर्णं नागरूपं च सतिलं ताम्रभाजनम् ॥

अथ केतोः—

वैदूर्यरत्नं सतिलं सतैलं सकम्बलश्चापि मदो मृगस्य ।
शस्त्रं च केतोः परितोषहेतोरुदीरितं दानमिदं मुनीन्द्रैः ॥
केतोर्वैदूर्यममलं तैलं मृगमदस्तथा ।
ऊर्णां तिलैश्च संयुक्तां दद्यात्क्लेशापनुत्तये ॥

संहिताप्रदीपे—

भानुस्ताम्बूलदानादपहरति नृणां वैकृतं वासरोत्थं
सोमः श्रीखण्डदानादवनितनुभुवो भोजनात्, पुष्पदानात् ।
सौम्यः, शक्रस्य मन्त्री हरिहरनमनाद्, भार्गवः शुभ्रवस्त्रै-
स्तैलस्नानात्प्रभाते दिनकरतनयो ब्रह्मनद्यापरौ च ॥इति ।

अथ नवरत्नमुद्रिकाघट्टनम्—

माणिक्यं तरणेर्मध्ये प्राच्यां वज्रं भृगोर्विधोः ।
आग्नेय्यां मौक्तिकं याम्यां प्रवालं मङ्गलस्य तु ॥
गोमेदं राक्षसे राहोः पश्चिमे नीलकं शनेः ।
वायौ वैडूर्यके केतोरुदीच्यां पुष्पकं गुरोः ॥

हारीतः—

स्पर्शिता स्याद्यदा कन्या वाचा वाप्युदकेन वा ।
अन्तरा प्रातिकूल्यं चेत्पूर्वोढा विधवा भवेत् ॥

एतच्च विवाहानन्तरचतुर्थीकर्ममध्ये बोध्यम् ।

कार्ष्णाजिनिः—

पिता वा यदि वा भ्राता ज्येष्ठो वा म्रियते यदि ।
अतीतेब्देऽपि वाग्दत्तां नोद्वहेद्युवतीं पुमान् ॥

दक्षः—

(१)ज्योतिः सागरे—

*दुर्भिक्षे राष्ट्रभङ्गे च पित्रोर्वा प्राणसंशये ।
प्रौढायामपि कन्यायां नानुकूल्यं प्रतीक्ष्यते ॥

मेधातिथिः—

*पुरुषत्रयपर्यन्तं प्रतिकूलं स्वगोत्रिणाम् ।
प्रवेशान्निर्गमस्तद्वत्तथा मण्डनमुण्डने ॥
*प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् ।
*आचतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत् ॥

अथ रजोदोषे निर्णयः । माधवीये—

प्रारम्भात्प्राग्विवाहस्य माता यदि रजस्वला ।
निवृत्तिस्तस्य कर्तव्या सहत्वश्रुतिचोदनात् ॥

दंपत्योः पितरौ भ्राता सोपनीतः सहोदरः ।
पितृव्यस्तादृशश्चैव पितामहपितामही ॥
एषामन्यतमे नष्टे नोद्वहेत्तां वधूं वरः ॥

दम्पत्योरिति सर्वत्र सम्बध्यते । अत्र विनायकशान्त्या क्वचिद्विवाह इत्युक्तं प्राक् ।

*दुर्भिक्षे इति ।

दीर्घरोगाभिभूतस्य दूरदेशस्थितस्य च ।
उदासीनस्थितस्यापि प्रातिकूल्यं न विद्यते ॥

इतिवाक्यं प्रातिकूल्यं मरणप्रयुक्तदोष इत्येके । प्रातिकूल्ये च पुरुषत्रयावधिदोषकरमित्याह—*पुरुषत्रयेति । यथा सगोत्रसपिण्डयोः पुरुषत्रयपर्यन्तं प्रतिकूलस्य निषेधनिमित्तत्वम्, एवं प्रवेशमण्डनयोर्निर्गममुण्डननिषेधनिमित्तत्वमपि तावत्पर्यन्तमेवेत्यर्थः । *प्रेतकर्माणीति । पूर्ववाक्यात्स्वगोत्रिणामित्यनुवर्त्तते । *आचतुर्थमिति । संख्यान्तरोपादानात्प्रेतकर्मानिवृत्तेर्निमित्तस्या-

---

(१) 'ज्योतिः सारे' क० ख० ।

प्रारम्भात् नान्दीश्राद्धात्, 'नान्दीमुखं विवाहादौ' इत्यादिना तस्यैव प्रारम्भोक्तेः। मेधातिथिः—

चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि ।
भार्या रजस्वला यस्य प्रायस्तस्य न शोभनम् ॥
वधूवरान्यतमयोर्जननी चेद्रजस्वला ।
तस्याः शुद्धेः परं कार्यं माङ्गल्यं मनुरब्रवीत् ॥

वृद्धमनुः—

विवाहव्रतचूडासु माता यदि रजस्वला ।
तदा न मङ्गलं कार्यं शुद्धौ कार्यं शुभेप्सुभिः ॥

गर्गः—

यस्योद्वाहादिमाङ्गल्ये माता यदि रजस्वला ।
तदा न तत्प्रकर्तव्यमायुःक्षयकरं यतः ॥

नान्दीश्राद्धोत्तरं रजोदोषे तु कपर्दिकारिकासु—

सूतिकोदक्ययोः शुद्ध्यै गां दद्याद्धोमपूर्वकम् ।
*प्राप्ते कर्मणि शुद्धिः स्यादितरास्मिन्न शुद्ध्यति ॥
अलाभे सुमुहूर्तस्य रजोदोषे च सङ्गते ।

भ्युदयिकनिषेधस्य नैमित्तिकस्योपादानाच्च तेन स्वगोत्रिणामाचतुर्थं सपिण्डीकरणान्तप्रेतकर्मसमाप्तिं विना आभ्युदयिकं कुर्यादित्यर्थः। तेन परगोत्रिणां (चतुःपुरुष(१)पर्यन्तं न प्रेतकर्मसमाप्त्यपेक्षाप्रसङ्गः। अत्रापि वरवध्वोः पितृचतुर्थपुरुषात्मककूटस्थमारभ्य चतुःपुरुषी) ग्राह्या। द्वादशाहादि सपिण्डीकरणपक्षे तु तदुत्तरानुमासिकान्यपि प्रेतकर्मशब्देन ग्राह्याणि उत्पत्तिवेलायां प्रेतोद्देश्यकानामेव प्रेतशब्दोल्लेखमन्तरेण पुनरावृत्तिविधानात् "ना संवत्सरात्परं प्रेतदेहं परित्यज्य" इत्यग्रिमवाक्याच्च ।

*प्राप्ते इति । नान्दीश्राद्धरूपप्रारम्भवति कर्मणि

---

(१) कंसान्तर्गतं नास्ति । घ० ङ० ।

ग्निं संपूज्य तत्कुर्यात्पाणिग्रहणमङ्गलम् ॥
हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् ।
प्रत्यृचं पायसं हुत्वा अभिषेकं समाचरेत् ॥ इति ।

सूतकादिसंकटे तु कूष्माण्डीभिर्घृतं हुत्वा पयस्विनीं गां च दत्त्वा विवाहादि कुर्यादिति (१)च वक्ष्यते ॥

अथैकक्रियानिर्णयः । ज्योतिर्निबन्धे वृद्धमनुः—

एकमातृजयोरे*क(२)वासरे पुरुषस्त्रियोः ।
न समानक्रियां कुर्यान्मातृभेदे विधीयते ॥

द्धिः । इतरस्मिन् नान्दीश्राद्धरूपप्रारम्भाभावे तु नेत्यर्थः, 'अलाभे सुमुहूर्त्तस्य' इत्युक्त्या प्राप्तेः प्रारम्भात्मकत्वात् । यद्वा, नान्दीश्राद्धप्रारम्भोत्तरमित्यर्थः । प्राप्ते आरब्धे, इतरस्मिन्ननारब्धे । होमश्च परिभाषाप्राप्ताज्यद्रव्येण समस्तव्याहृतिभिरष्टोत्तरशतसं(३)ख्यः। शुद्धिश्चानिष्टविरहः । अ(४)निष्टं चाह बृहस्पतिः—

वैधव्यं च विवाहे स्याज्जडत्वं व्रतबन्धने ।
चूडायां च शिशोर्मृत्युर्विघ्नं यात्राप्रवेशयोः ॥ इति ।

न त्वन्यारम्भयोग्यताः स्पर्शानधिकारात् । केचित्तु विभिन्नवाक्योपात्तयोरारम्भमुहूर्त्तालाभयोर्न परस्परसापेक्षत्वम् । तेनारम्भात्प्रागपि रजोदोषे लग्नान्तराभावे शान्तिं कृत्वा विवाहादि कुर्यादित्याहुः । अन्येतु 'अलाभे सुमुहूर्त्तस्य' इत्यपि प्रारब्धपरमेव कारिकावाक्यैकवाक्यत्वादित्याहुः ।

*एकेति । वत्सरभेदेन करणे तु न दोष इति सूचितम् । अत्र पुरुषस्त्रियोरित्यत्र पुरुषयोः स्त्रियोः पुरुषस्त्रियोश्चेति विवक्षितम् ,

एकः कर्त्ता शुभं कुर्यान्न पुत्र्योः पुत्रयोरपि ।
षण्मासे वाऽष्टमासे वा पूर्णे त्वब्दे शुभावहम् ॥

---

(१) 'च प्रागुक्तं' क० ख० । (२) 'वत्सरे' ख० ।
(३) 'सङ्ख्या' घ० ङ: । (४) 'अरिष्टं' घ० ङ० ।

*एतेन एकस्य पुंसो विवाहद्वयमेकदिने निषिद्धं, मातृभेदाभावात् । नारदः—

पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये ।
*न तयोर्व्रतमुद्वाहान्मण्डनादपि मुण्डनम् ॥

वराहः--

*विवाहस्त्वेकजातानां षण्मासाभ्यन्तरे यदि ।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत् ॥

मदनरत्ने वासिष्ठः--

न पुंविवाहोर्ध्वमृतुत्रयेपि
विवाहकार्यं दुहितुः प्रकुर्यात् ।
न मण्डनाच्चापि हि मुण्डनं च
गोत्रैकतायां यदि नाब्दभेदः ॥
एकोदरभ्रातृवि(१)वाहकृत्यं
स्वसुर्न पाणिग्रहणं विधेयम् ।

इति वचनात् । *एतेनेति । 'द्विशोभनं त्वेकगृहेऽपि नेष्टम्' इत्याद्यग्रिमवाक्येष्वपि मातृभेदे विधीयते इत्ययमपवादः प्रवर्त्तते इति भावः । *न तयोर्व्रतमुद्वाहादिति । तयोः पुत्रपुत्र्योर्मध्ये एकस्योद्वाहानन्तरमन्यस्योपनयनं नेत्यर्थः । तथाच मिहिरः—

पुत्रोपनयनादूर्ध्वं षण्मासाभ्यन्तरे तथा ।
पुत्र्युद्वाहं न कुर्वीत विवाहाद्व्रतबंधनम् ॥ इति ।

*विवाहस्त्वेति । तुशब्द एवकारार्थे अन्ययोगव्यवच्छेदस्तदर्थः । तथाचान्याब्दप्रवेशेऽपि षण्मासमध्ये एकोदरस्य विवाहभिन्नं मङ्गलं नेत्यर्थः । नारदस्तु—

मातृयज्ञक्रियापूर्वं ज्येष्ठं कृत्वा तु मंगलम् ।
ऋतुत्रयं पुनर्यावन्न कुर्याल्लघुमङ्गलम् ॥

---

(१) 'विवाहकृत्यात्स्वसुर्न' क० ।

षण्मासमध्ये मुनयः समूचु-
र्न मुण्डनं मण्डनतोपि कार्यम् ॥

एतदपवादस्तत्रैव—

ऋतुत्रयस्य मध्ये चेदन्याऽब्दस्य प्रवेशनम् ।
तदा ह्येकोदरस्यापि विवाहस्तु प्रशस्यते ॥

सारावल्याम्—

फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने ।
भेदादब्दस्य कुर्वीत नर्तुत्रयविलङ्घनम् ॥

संहिताप्रदीपे—

ऊर्ध्वं विवाहात्तनयस्य नैव
कार्यो विवाहो दुहितुः समार्धम् ।
अप्राप्य कन्यां श्वशुरालयं च
वधूः प्रवेश्या स्वगृहं च नादौ ॥

मदनरत्ने वसिष्ठः—

द्विशोभनं त्वेकगृहेपि नेष्टं
शुभं तु पश्चान्नवभिर्दिनैस्तु ।
आवश्यकं शोभनमुत्सवो वा
द्वारंथवाचार्यविभेदतो वा ॥ ✓

*एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत् ।
भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीत् ॥

ज्योतिर्निबन्धे कात्यायनः—

कुले ऋतुत्रयादर्वाङ् मण्डनान्न तु मुण्डनम् ।
प्रवेशान्निर्गमो नेष्टो न कुर्यान्मङ्गलत्रयम् ॥

इत्याह-*एकोदरेति । 'एकोदरप्रसूतानाम्' इति निर्देशाद्भिन्नोदरप्रसूतानां शोभनत्रयं भवति, भिन्नोदरप्रसूतानामपि नेति शातातप इति विकल्पः ।

कुर्वन्ति मुनयः केचिदन्यस्मिन्वत्सरे लघु ।
लघु वा गुरु वा कार्यं प्राप्तं नैमित्तिकं तु यत् ॥
पुत्रोद्वाहः प्रवेशाख्यः कन्योद्वाहस्तु निर्गमः ।
मुण्डनं चौलमित्युक्तं व्रतोद्वाहौ तु मङ्गलम् ॥
चौलं मुण्डनमेवोक्तं वर्जयेन्मण्डनात्परम् ।
मौञ्जी चो*भयतः कार्या यतो मौञ्जी न मुण्डनम् ॥
*अभिन्नवत्सरेपि स्यात्तदहस्तत्र भेदयेत् ।
अभेदे तु विनाशः स्यान्न कुर्यादेकमण्डपे ॥

संकटे तु कपर्दिकारिकासु वराहमिहिरश्च—

उद्वाह्य*पुत्रीं न पिता विदध्यात्
पुत्र्यन्तरस्योद्वहनं क(१)दाचित् ।
यावच्चतुर्थं दिनमत्र पूर्वं
समाप्य चान्योद्वहनं विदध्यात् ॥

कश्यपः—

*मौञ्जीबन्धस्तथोद्वाहः षण्मासाभ्यन्तरेपि वा ।
पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृत् ॥

*उभयतः चौलात्प्राक् परतश्च । समानक्रियानिषेधमपवदति-*अभिन्नेति । यद्यपि मौञ्जितो मौञ्जी विवाहाद्वा विवाहोऽभ्यनुज्ञातस्तथापि दिनभेदो मण्डपभेदश्चावश्यक इत्यर्थः ।

*पुत्रीमिति । इदं पुत्रस्याप्युपलक्षणं 'यावच्चतुर्थं दिनम्' इति दर्शनादेकपुत्रोद्वाहानन्तरमपरपुत्रोद्वाहश्चतुर्थीकर्मोत्तरमेव । अत एव रामायणादौ श्रीरामविवाहानन्तरमेव लक्ष्मणादीनामुद्वाहो न समकालमिति । *मौञ्जीबन्ध इति । उद्वाह्य पुत्रीमित्येतत्प्रकरणे एतल्लिखनात्,

पुत्रोद्वाहात् परं पुत्री विवाहो न ऋतुत्रये ।

---

(१) 'कदापि' क० ।

ज्योतिर्निबन्धे—

विवाहमारभ्य चतुर्थिमध्ये
*श्राद्धं दिनं *दर्शदिनं यदि स्यात् ।
वैधव्यमाप्नोति तदाशु कन्या
जीवेत्पतिश्चेदनपत्यता स्यात् ॥

तथा—

विवाहमध्ये यदि चेत्क्षयाह-
स्तत्र स्वमुख्याः पितरो न यान्ति ।
*वृत्ते विवाहे परतस्तु कुर्या-
च्छ्राद्धं स्वधाभिर्न तु दूषयेत्तम् ॥

"ये वा भद्रं दूषयन्ति स्वधाभिः" इति श्रुतेश्च । मासिकविषये कालहेमाद्रौ शाट्यायनिः—

न कार्यं त्र्यब्दमुद्वाहान्मङ्गलेनाप्यमंगलम् ॥

इति मयूखे सामान्यतो विवाहानन्तरमुपनयननिषेधाच्च । पुत्रीविवाहोत्तरं मौञ्जीबन्धः एकविवाहानन्तरमपरविवाहश्च, षण्मासाभ्यन्तरे तं न कुर्यादित्यर्थः । 'मौञ्जीबन्धमथोद्वाहम्' इति द्वितीयान्तपाठोऽप्युक्तः । पुत्रीविवाहानन्तरं मौञ्जीबन्धम् एकविवाहोत्तरमपरविवाहं च न कुर्यात् । पुत्रोद्वाहानन्तरं पुत्र्युद्वाहं च न कुर्यात् । एते त्रयो निषेधा अविभक्तपराः न तु विभक्तपरा इत्यर्थः । "कुले ऋतुत्रयाद्" इत्यपि अविभक्तपरमिति केचित् । अत्र 'विवाहस्त्वेकजातानाम्' इति निषेधो मुख्यः । "उद्वाह्य पुत्रीम्" इति निषेधो मध्यमः, "न कुर्यादेकमण्डपे" इति त्वधम इति । *श्राद्धं दिनं क्षयाहः । *दर्शदिनं स्वरूपतः । यद्यपि तत्र श्राद्धस्याकरणाच्छ्राद्धोपलक्षितदिनलाभेन दर्शदिनमित्यनर्थकं तथापि विवाहमारभ्य चतुर्थीमध्ये श्राद्धाधिकारिणां श्राद्धदिनं तदनधिकारिणां दर्शदिनमित्यर्थान्न वैयर्थ्यम् । *वृत्ते विवाहे इति । क्षयाहपरं, दर्श-

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा।
अपकृष्यापि कुर्वीत कर्तुं नान्दीमुखं द्विजः॥

वृद्धिं विनापकर्षे दोषमाह तत्रैवोशनाः—

वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्।
स श्राद्धी नरके घोरे पितृभिः सह मज्जति॥ इति।

मेधातिथिः—

प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम्।
आ(१)चतुर्थं ततः पुंसि पञ्चमे शुभदं भवेत्॥

स्मृत्यन्तरे—

*सपिण्डीकरणादर्वागपकृष्य कृतान्यपि।
पुनरप्यपकृष्यन्ते *वृद्ध्युत्तरनिषेधनात्॥

स्मृतिसारावल्याम्—

भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा।
एकस्मिन्मण्डपे चैव न कुर्यान्मण्डनद्वयम्॥

*सहोदरविषयमेतत्। यमः—

एकोदरप्रसूतानामेकस्मिन्वासरे पुनः।
वि(२)वाहो नैव कुर्वीत मण्डनोपरि मुण्डनम्॥

श्राद्धं तु लुप्यत एव। अनुमासिकानामप्यपकर्षमाह—*सपिण्डीकरणादिति। अत्रानुमासिकापकर्षस्य कालादर्शादिभिः मृततिथावेवाभिधानाच्चौलोपनयनविवाहाधानेष्टापूर्त्तेषु अपकर्षः, तत्कालाभावात्, न तु गर्भाधानाद्यन्नप्राशनान्तेष्विति निपुणतरमुपपादयिष्यामः। *वृद्ध्युत्तरेति। वृद्ध्युत्तरं तु प्रेतकर्माणि लुप्यन्ते। मनः समाधानाय तु रुद्रैकादशिनीपूजादिकमाचरन्ति। *सहोदरेति। तस्यैव "ज्येष्ठो भ्राता यदा तिष्ठेत्" इत्यादौ सोदरस्यैव

---

(१) 'आचतुर्थं' ख०। (२) 'विवाहे' ख०।

गार्ग्यः—

*भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा ।
न कुर्यान्मङ्गलं किंचिदेकस्मिन्मण्डपेऽहनि ॥
एकस्मिन्वासरे प्राप्ते कुर्याद्यमलजातयोः ।
क्षौरं चैव विवाहं च मौञ्जिबन्धनमेव च ॥

ज्योतिर्विवरणे--

एकोदरयोरेकदिनोद्वहने भवेन्नाशः ।
*नद्यन्तर एकदिने केप्याहुः*संकटे च शुभम् ॥

ऊर्ध्वं विवाहाच्छुभदो नरस्य
नारीविवाहो न ऋतुत्रयं स्यात ।
नारीविवाहात्तदहेऽपि शस्तं
नरस्य पाणिग्रहमाहुरार्याः ॥

भिन्नमातृजयोस्तु एकवासरे विवाहमाह मेधातिथिः—

पृथङ्मातृजयोः कार्यो*विवाहस्त्वेकवासरे ।
एकस्मिन्मण्डपे कार्यः पृथग्वेदिकयोस्तथा ॥
*पुष्पपाट्टिकयोः कार्यं दर्शनं न शिरःस्थयोः ।

भ्रातृपदेन व्यवहारात् । *भ्रातृयुगे इति । भ्रातृयुगस्य स्वसृयुगस्य च एकस्मिन्नहनि एकस्मिन्मण्डपे वा मङ्गलं न कुर्यात् । पृथगयं निषेधः, समुच्चये मानाभावात् । यत्तु भ्रातृयुगं स्वसृयुगं च भिन्नमातृकं ग्राह्यमिति, तदसत् । भ्रात्रोर्युगमित्यत्र भ्रात्रोरित्यादि सरूपैकशेषो न स्यात् । समानार्थत्वाभावेन सारूप्याभावात् । *नद्यन्तर इति । नद्यादिव्यवधाने इत्यर्थः । आदिपदाद्देशादिव्यवधानं ग्राह्यम् । *संकटे चेति । विनायकशान्तेः संकटापहारकतया सा कार्या । *विवाहस्तु इति । पृथङ्मातृजयोरपि एकस्योपनयनमपरस्य विवाह इत्येवं जातीयास्तु संस्कारा एकस्मिन्नहनि न भवन्तीत्यर्थः । *पुष्पेति । उभाभ्यां भगिनी-

भगिनीभ्यामुभाभ्यां च यावत्सप्तपदी भवेत् ॥

यमयोस्तु विशेषो भट्टकारिकायाम्—

एकस्मिन्वत्सरे चैकवासरे मण्डपे तथा ।
कर्तव्यं मङ्गलं स्वस्रोर्भ्रात्रोर्यमलजातयोः ॥

ज्योतिर्निबन्धे नारदः—

*प्रत्युद्वाहो नैव कार्यो*नैकस्मै दुहितृद्वयम् ।
न चैकजन्ययोः पुंसोरेकजन्ये तु *कन्यके ॥
*नैवं कदाचिदुद्वाहो नैकदा मुण्डनद्वयम् ।
नैकजन्ये तु कन्ये द्वे पुत्रयोरेकजन्ययोः ॥
✓ न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचन ॥ इति ॥

भ्यां शिरस्थयोः पुष्पपट्टिकयोर्दर्शनं न कार्यमिति सम्बन्धः । एतावता परस्परवराशिरःस्थपुष्पपट्टिकदर्शनं परस्परकन्ययोर्निषिद्धमिति लभ्यते ।

*प्रत्युद्वाह इति । जामातुर्भगिन्याः स्वपुत्रविवाह इत्यर्थः । *नैकस्मै इति (१)देयमिति शेषः । यद्यपि यथाश्रुते दुहितृद्वयमित्युपादानान्मृतायां प्रथमदुहितरि द्वितीयदुहितृदानेऽनुमतिर्लभ्यते । तथापि द्वयस्य दुहितृनिष्ठस्य दानकर्मत्वबाधात् द्वे दुहितरौ नदद्यादित्यर्थो वाच्यः । तत्र यदि साहित्यं समासार्थो विवक्षितः तदा सहिते दुहितरौ न दद्यादित्यर्थः स्यात् । तत्र जीवन्त्यां प्रथमायामसाहित्येन द्वितीयादाने विरोधो न स्यात् । अथ साहित्यमतन्त्रम् । तदा कथं मृतायां दुहितरि द्वितीया दीयेत जीवनस्यानुपादात् । तस्माद्दत्तदुहितृकाय दुहितरं न दद्यादित्यर्थ इति । *कन्यके न देये इत्यर्थः । *नैवमिति सापत्नपरम् । मुण्डनद्वयं सपत्नयोरपि न भवतीत्यर्थः ।

---

(१) 'देये इति' ख० ।

*कन्याया रजोदर्शने तु अपरार्के संवर्तः—

माता चैव पिता चैव ज्येष्ठभ्राता तथैव च ।
त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम् ॥

हारीतः—

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या *वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥

देवलात्रिकश्यपाः–पूर्वार्धं तदेव ।

भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ।
यस्तां समुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ॥
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ।

यत्तु "द्वादशे वृषली भवेत्" इत्युक्तं तद्रजस्वला चेत्, 'रौरवं तु रजस्वलाम्' इत्युक्तेः । तदेव प्रपञ्चयति–*कन्याया इति । *वृषलीति । त्रिधावृषलीदेवलोक्ता—

वन्ध्या च वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥ इति ।

तत्र रजस्वलापरिणये दोषः । रजोदर्शनाभावे तु द्वादशाब्दाया अपि विवाहे न दोषः । यतः 'द्वादशे वृषली भवेत्' इत्यादौ वृषलीपदं रजस्वलार्थकम् । तथाच विवाहात्पूर्वं रजोदर्शनं यथा न भवति तथाकार्यमिति, न तु द्वादशे वर्षे तस्या वृषली संज्ञा, अन्यथा–

त्रिंशद्वर्षोद्वहेत्कन्यां यद्वा द्वादशवार्षिकीम् ।
ऽयष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥

ऽयष्टवर्षश्चतुर्विंशतिवर्षः ।

त्रिंशद्वर्षो दशाब्दां तु भार्यां विन्देत नग्निकाम् ।
एकविंशति वर्षो वा सप्तवर्षामवाप्नुयात् ॥

इति मनुवचनाविरोधात् । तस्याश्चोद्वाहो "यस्तां समुद्वहेत्"

माधवीये बौधायनः—

*त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ॥

विष्णुः—

*ऋतुत्रयमुपास्यैव कन्या कुर्यात्स्वयंवरम् ॥

अत्र वरस्य दोषाभावमाह यमः—

कन्या द्वादश वर्षाणि याऽप्रदत्ता वसेद् गृहे ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम् ॥

इत्यादिना निषिध्यते । यत्तु मनुः—

काममामरणात्तिष्ठेद् गृहे कन्यर्त्तुमत्यपि ।
न त्वेवैनां प्रयच्छेत गुणहीनाय कर्हिचित् ॥ इति ।

तत् सगुणप्रशंसार्थम् ,

दद्याद् गुणवते कन्यां नग्निकां ब्रह्मचारिणे ।
अपि गुणविहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

इति बौधायनेनोपरोधनेन रजस्वलात्वप्रयोजको न भवेदित्युक्तेः । यदि ऋतुदर्शनेऽपि पित्रादिर्न ददाति तदा—*त्रीणिवर्षाणीति ।

ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ।

इति वाक्यशेषात् । *ऋतुत्रयमुपास्यैवेति गुणवद्वरपरम् । इयं च प्रतीक्षा दातृसद्भावे । तदभावे तु—

यदा तु कश्चिन्नैव स्यात्कन्या राजानमा(१)व्रजेत् । इति ।

तदभावे तु "(२)गम्यंत्वभावे" इति वचनात्स्वयं गम्यं गमनार्हं वरः कार्यः कन्ययैव इति । गुणानाह यमः—

कुलंच शीलं च वयश्च रूपं विद्यां च वित्तं च सनाथतां च ।
एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिन्तनीयम् ॥

सनाथता पोषकादियुक्तता । शेषम् उदारत्वबहुभार्यत्वादि

---

(१) 'वरेत्' घ० ङ० । (२) 'गम्यत्वभावे' घ० ङ० ।

*एवञ्चोपनतां पत्नीं नावमन्येत्कदाचन ।
न तु तां*बन्धकीं विद्यान्मनुः स्वायंभुवोऽब्रवीत् ॥

मनुः—

अलंकारं नाददीत पितृदत्तं स्वयंवरे ।
पितृदत्तं मातृदत्तं स्तेयी स्याद्यदि*तं हरेत ॥

वरं प्रत्याह—

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्यादतिक्रामेदृतूनां प्रतिबोधनात् ॥

कात्यायनः—

दूरस्थानामविद्यानां मोक्षमार्गानुसारिणाम् ।
शूद्राणां निर्धनानां च न देया कन्यका बुधैः ॥

अयं च न शाकं भुञ्जीतेतिवद् दृष्टार्थो निषेधः । तत्रापि निर्धनानां निषेधः कलिपुरुषाणामत्यन्तोत्साहहेतुः । किञ्च—

स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत् ।
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ॥
क्षय्यामयाव्यपस्मारि श्वित्रिकुष्ठिकुलानि च ॥

इत्यादि । निष्पुरुषः षण्ढः,

यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलम् ।
पुमान्स्याल्लक्षणैरेतैविपरीतस्तु षण्ढकः ॥

निश्छन्दो वेदाध्ययनहीनः । *एवञ्च स्वयंवरे च । *बन्धकीं सपापां व्यभिचारिणीं च,

त्रीणि वर्षाण्युदीक्षेत कुर्यादृतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥
अदीयमाना भर्त्तारं यदि गच्छेत्स्वयं पतिम् ।
नैनः किञ्चिदवाप्नोति न च पुंसाऽधिगच्छति ॥

इति मानवात । अदीयमाना दात्रपेक्षणात् तदभावाद्वा । पुंसा परेणेति शेषात्, न च व्यभिचारिणीत्यर्थः । *तम् अलङ्कारम् ।

अत्र प्रायश्चित्तमुक्तमाश्वलायनेन—

कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मनः ।
शुचिं च कारयित्वा तामुद्वहेदानृशंस्यधीः ॥
पिता ऋतून्स्वपुत्र्यास्तु गणयेदादितः सुधीः ।
दानावधि गृहे यत्नात्पालयेच्च रजोवतीम् ॥
दद्यात्तदृतुसंख्या गाः शक्तः कन्यापिता यदि ।
दातव्यैकापि निःस्वेन दाने तस्या यथाविधि ॥
दद्याद्वा *ब्राह्मणेष्वन्नमतिनिःस्वः सदक्षिणम् ।
तस्यातीतर्तुसंख्येषु वराय प्रतिपादयेत् ॥
*उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः ।
अदृष्टरजसे दद्यात्कन्यायै रत्नभूषणम् ॥
*तामुद्वहन्वरश्चापि कूष्माण्डैर्जुहुयाद्द्विजः ॥ इति ॥

मदनपारिजाते यज्ञपार्श्वः—

*विवाहे वितते तन्त्रे *होमकाल उपस्थिते ।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः ॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि ।
*युञ्जानामाहुतिं हुत्वा तत*स्तन्त्रं प्रवर्तयेत् ॥

---

*ब्राह्मणेषु अतीत ऋतुसंख्येष्वित्यन्वयः । अयमर्थः—उक्तप्रकाराणामन्यतमाश्रयणेन दाता कन्यादाने योग्यः । *उपोष्येति । दृष्टरजस्कायाः कन्याया उपवासत्रयान्ते गोपयःपानेन अदृष्टरजसे कुमार्यै सरत्नभूषणदानेन च विवाहयोग्यता । *तामुद्वहन्निति । वरस्य कूष्माण्डहोमेन तदुद्वाहयोग्यतेति । होमकाले रजोदर्शनेत्वाह—*विवाहे इति । *होमकाले विवाहहोमकाले । *युञ्जानामाहुतिं हुत्वेति । प्रयोगरत्ने युञ्जानो मन्त्र तैत्तिरीयप्रसिद्धः । *तन्त्रं होमतंत्रम् । यद्वा, भट्टोजी —

विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला ।
त्रिरात्रं दम्पती स्यातां पृथक्शय्याशनासनौ ॥
चतुर्थेऽहनि संस्नातौ तस्मिन्नग्नौ यथाविधि ।
विवाहहोमं कुर्यातामित्यादि स्मृतिसंग्रहे ॥ इति ॥

बौधायनसूत्रे—"अथ यदि कन्योपसाद्यमाना उह्यमाना वा रजस्वला स्यात्तामनुमंत्रयीत ।

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानिन्द्रश्च सूर्यश्च पुमांसं च दधात्वियम् ॥" इति ॥

अ(१)थवा दशरात्रमलंकृत्य प्राशयेत् पञ्चगव्यम् । अथ शुद्धां कृत्वा विवहेदिति क्वचित्पाठः। एवम् अग्रेदिधिषूरपि न परिणेया, तत्परिणये प्रायश्चित्तस्मरणात् । तथाच वसिष्ठः–'अग्रे दिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा तस्मै दत्त्वा पुनर्निर्विशेत्' इति । अथवा प्रायश्चित्तान्तरं–'परिवित्ति–परिवेतृ–पर्याहित–पर्याधातृ–अग्रेदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यम्' इति । अधिकमन्यत्र बोध्यम् । तयोः स्वरूपमाह देवलः—

ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा ।
या, साऽग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता ॥ इति ॥

अत्रापरार्कानुयायिनः–ज्येष्ठायामविरूपायामिति पूरणीयम् । विरूपायां तु शातातपः—

नाग्नयः परिविन्दंति न वेदा न त(२)पांसि च ।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका ॥ इति ॥

ज्येष्ठेऽधिकारिणि श्राद्धमकुर्वत्यपि कनिष्ठः कुर्वन्न परिविद्यते, एवं विरूपायां ज्येष्ठायामनूढायामपि कनिष्ठाविवाहो न दोषायेत्यर्थः । ज्येष्ठा चेत्कुत्सितदीर्घकुत्सितरोगार्ता केनापि नोह्यते तदा रजस्वलाभयात्तत्प्रागेव ज्येष्ठायामनूढायामपि कनिष्ठां ददन् गृह्णंश्च

---

(१) 'अथ द्वादशरात्रमलं' घ० ङ० । (२) 'तपेऽपि च' घ० ङ० ।

बौधायन(१)सूत्रम्—'अथ यदि कन्योपसाद्यमाना चोह्यमाना वा रजस्वला स्यात्तामनुमन्त्रयेत् ।

पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानिन्द्रश्च सूर्यश्च पुमांसं च दधात्वियम् ॥'इति॥

अथ द्वादशरात्रमलंकृत्य प्राशयेत्पञ्चगव्यमथ शुद्धां कृत्वा विवहेत् ॥

अत्र*गान्धर्वाद्यष्टौ विवाहाः, *तद्व्यवस्था चाकरे ज्ञेया । मनुः(२)—

न दोषभागिति भाव इत्याहुः ।

एवं पातित्यानन्तरोत्पन्नकन्याग्रहणे न दोषः,

कन्यां समुद्वहेदेषां सोपवासामकिञ्चनाम् ।

इति याज्ञवल्क्यात् । एषां पतितानां पातित्यानन्तरोत्पन्नां रिक्तां कन्यां स्वयमेवोद्वहेत्, न पतितहस्तादिति विज्ञानेश्वरः। "पतितोत्पन्नः पतितो भवति अन्यत्र स्त्रियाः" इति वसिष्ठेन तस्याः पातित्यनिषेधाच्च ।

*गान्धर्वादीति । तथाच मनुः—

ब्राह्मो दैवस्तथाचार्षः प्राजापत्यस्तथाऽसुरः ।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमो मतः ॥ इति ॥

तल्लक्षणानि सफलान्याहाश्वलायनः—"अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः, तस्यां जातो द्वादशावरान् द्वादश परान् पुनात्युभयतः । ऋत्विजे वितते कर्मणि दद्यादलंकृत्य स दैवो, दशावरान्दश परान् पुनात्युभयतः । सहधर्मं चरतामिति प्राजापत्यः, अष्टावरानष्ट परान् पुनात्युभयतः । गोमिथुनं दत्त्वो·

---

(१) 'सूत्रे' क० ख० ।

(२) इत आरभ्य 'गर्हितः' इत्यन्तो ग्रन्थः क्वचिन्न दृश्यते । टीकायां तु व्याख्यातः परं त्वत्र न तस्यावश्यकतेति भाति । 'तद्व्यवस्था चाकरे ज्ञेया' इत्युक्तेः ।

*षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥

चतुर *आसुरगान्धर्वराक्षसपैशाचान् । *तान् राक्ष-

पयच्छेत स आर्षः, सप्तावरान्सप्तपरान् पुनात्युभयतः। मिथः समयं कृत्वोपयच्छेत स गान्धर्वः । धनेनोपतोष्योपयच्छेत स आसुरः । सुप्तानां प्रमत्तानां वाऽपहरेत्स पैशाचः । हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत्स राक्षसः'' इति । सहधर्ममिति सहचरणस्य सिद्धत्वात्पुनर्विधानं यावज्जीवं तदर्थं, न तु मध्ये आश्रमान्तरस्य परिग्रह इत्यर्थः ।

सहोभौ चरतां धर्ममिति वाचानुभाष्यतु ।
कन्याप्रदानमुद्दिश्य प्राजापत्यो विधिः स्मृतः ॥

इति मनुवचनेऽप्येवमेव । अत्र पुनात्युक्त्यनुक्तिभ्यां गुणदोषौ सूचितौ । तत्राह मनुः—

ब्राह्मादिषु विवाहेषु चतुर्षें वाऽनुपूर्वशः ।
ब्रह्मवर्चस्विनःपुत्रा जायन्ते शिष्टसंमताः ॥
इतरेष्वेव शिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः ॥

नृशंसा हिंस्राः । ब्रह्मद्विषः वेदद्विषः । *तद्व्यवस्थेति । तथाच मनुः—

चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः ।
राक्षसं क्षत्रियस्यैवमासुरं वैश्यशूद्रयोः ॥ इति ।

राक्षसः क्षत्रियस्य मुख्यः । आसुरो वैश्यशूद्रयोर्मुख्यः । अनुकल्पमाह—*षडिति । ब्राह्मणस्यानुपूर्व्या क्रमेण ब्राह्मादिआसुरान्ताः षड् धर्म्याः । क्षत्रियस्य चत्वारो अवरा धर्म्याः । अवरानाह—*आसुरेति । *तानिति । अवरानित्यर्थः । तथा च वैश्यशूद्रयोरासुरगान्धर्वपैशाचास्त्रयो धर्म्या इति फलितम् ।

सवर्ज्यान्वैश्यशूद्रयोः । स एव—*'आसुरं वैश्यशूद्रयोः' । हेमाद्रौ पैठीनसिः—*'राक्षसो वैश्यस्य, पैशाचः शूद्रस्य ।' प्रचेताः—'पैशाचोऽसंस्कृतप्रसूतानां प्रातिलोमजानां च' । मनुः—

राज्ञस्तथासुरो वैश्ये शूद्रे चा*न्त्यस्तु गर्हितः ।

*क्षत्रियादेः संकटे पैशाचमाह माधवीये वत्सः—

मयूखकृतस्तु षडेव विप्रस्य धर्म्या नेतरौ । एवञ्च क्षत्रियादेर्ब्राह्माद्यनुज्ञा भवति । आसुरादयश्चत्वारः क्षत्रियस्य धर्म्या इति सर्वे । वैश्यशूद्रयोः(१) राक्षस वर्जमेत एव एवञ्च राक्षसः क्षत्रियस्यैवेति फलितमित्याहुः ।

प्राजापत्यादि पञ्चविवाहानवधीकृत्याह मनुः—

पञ्चानां च त्रयो धर्म्या द्वावधर्म्यौ स्थिताविह ।
पैशाचश्चासुरश्चैव न कर्त्तव्यौ कथञ्चन ॥
पृथक् पृथग्वामिश्रौ वा विवाहौ पूर्वचोदितौ ॥ इति ।

*आसुरमिति मुख्यः कल्पः । *राक्षस इति अनुकल्पः ।

अन्येतु आसुरं वैश्यशूद्रयोरिति मानवान्मुख्यासुरधर्मेणायं कार्यः । "आसुरो द्रविणादानात्" इति वराद्द्रविणमादाय पित्रादिभिर्यद्दानरहितं कन्यार्पणं क्रियते स आसुरो विवाह इत्यर्थमाहुः ।

(पैशाच(२) इति मुख्यः आसुरो गर्हित इति सम्बन्धः ।)
*अन्त्यः पैशाचः । अत्र कचिद्विकल्पोऽप्यूह्यः । *क्षत्रियादेरिति ।

---

(१) 'राक्षसवर्जमेव तत्' घ० ङ० ।
(२) कंसान्तर्गतं नास्ति घ० ङ० ।

सर्वोपायैरसाध्या स्यात्सुकन्या पुरुषस्य या ।
*चौर्येणापि विवाहेन सा विवाह्या रहः स्थिता ॥

गन्धर्वादिविवाहेष्वप्युदकपूर्वकं दानमाह तत्रैव यमः—

(१)नोदकेन न वा वाचा कन्यायाः पतिरुच्यते ।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ॥

पराशरमाधवीये देवलोऽपि—

गन्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः ।
कर्तव्यश्च त्रिभिर्वर्णैः समर्थेनाग्निसाक्षिकः ॥

((२)त्रैवर्णोक्तेर्गान्धर्वादौ विप्रवर्जमधिकार उक्तः ।)

तत्रैव परिशिष्टे—

*गान्धर्वासुरपैशाचा विवाहो राक्षसश्च यः ।
पूर्वं(३) परिग्रहस्तेषु पश्चाद्धोमो विधीयते ॥

अतो होमादावकृते भार्यात्वाभावाद्वरान्तराय देया । तथाच तत्रैव वसिष्ठबौधायनौ—

*बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ॥ इति ।

विप्रादीनां सर्वेषामित्यन्ये । सङ्कटे उक्तविवाहासम्भवे । *चौर्येणापीति । पैशाचेनापीति तात्पर्यम् । आसुरं निन्दति कश्यपः—

क्रीता द्रव्येण या नारी न सा पत्न्यभिधीयते ।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥ इति ।

एतच्चात्मार्थं धनग्रहणे इत्युपरिष्टात् । *गान्धर्वादीति । गान्धर्वादिविवाहचतुष्टये स्वीकारानन्तरं विवाहहोम इत्यर्थः । *बलादिति । गान्धर्वाद्युपलक्षणम् । नन्वत्र सर्वविवाहेष्वेव संस्काराभावेऽन्यस्मै दानस्य साम्याद्बलादपहारे राक्षसपैशाचयोरिति विशेष्योपादानं व्यर्थमिति चेत् ? मैवम् । मन्त्रैर्यदि न संस्कृता सं-

---

(१) 'नोदके न वाचा वा' क० । (२) कंसान्तर्गतं नास्ति क० ।
(३) 'परिश्रयस्तेषु' ग० ।

अत्र मन्त्रसंस्काराभावेऽन्यस्मै दानस्य सर्वविवाहेषु साम्याद्बलादपहारे राक्षसपैशाचयोर्विशेषवचनं व्यर्थम् । तेन तयोर्यदि न संस्कृता संस्कृता वेत्यावृत्य कन्यानुमत्यभावेऽन्यस्मै देयेति व्याख्येयम् । मदनपारिजाते नारदः—

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम् ।
तेषां च निष्ठा विज्ञेया विद्वद्भिः सप्तमे पदे ॥

स्मृतिचन्द्रिकायामपरार्के चैवम् ।

आशौचे तु याज्ञवल्क्यः—

*दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥

केषामित्यपेक्षिते ब्रह्मपुराणे उक्तम्—

दातुः प्रतिग्रहीतुश्च कन्यादाने च नो भवेत् ।
विवाहयिष्णोः कन्याया लाजहोमादिकर्मणि ॥ इति ।
व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

इति विष्णुवचनाच्च । प्रारम्भस्तेनैवोक्तः—

प्रारम्भो वरणं यज्ञे संकल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रियां ॥ इति ।

स्कृता वेति तन्त्रावृत्त्यादिनार्थोपगमात्कन्यानुमत्यभावेऽन्यस्मै दातव्येति व्याख्यानात् ।

*दाने इति । दाने तथाच क्रतुः—

पूर्वसंकल्पितं द्रव्यं दीयमानं न दुष्यति । इति ।

विवाहे पूर्वसम्भृतसम्भारे । विवाहपदं चौलोपनयनादिसंस्कारोपलक्षणम् । यज्ञे वृषोत्सर्गादौ । यज्ञपदं पूर्वप्रवृत्तप्रतिष्ठारामाद्युत्सवमात्रोपलक्षणम् । संग्रामे "संग्रामे समुपोढे राज

वरणमिति*मधुपर्कपरम् ।

गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः ।
पश्चादशौचे पतिते न भवेदिति निश्चयः ॥

इति ब्राह्मोक्तेः । मधुपर्कात्पूर्वं तु भवत्येवाशौचमिति शुद्धिविवेकः । रामाण्डारभाष्येप्येवम् । नान्दीमुखावधिश्च स्मृत्यन्तरे—

*एकविंशत्यहर्यज्ञे विवाहे दश वासराः ।
त्रिषट्चौलोपनयने नान्दीश्राद्धं विधीयते ॥

आरम्भाभावेऽपि लग्नान्तराभावे गद्यविष्णुः—

*न देवप्रतिष्ठा*विवाहयोः पूर्वसंभृतयोरपि । इति ।

*अत्र प्रायश्चित्तमाह मदनपारिजाते विष्णुः—

अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयात् घृतम् ।
गां दद्यात्पञ्चगव्याशी ततः शुद्ध्यति सूतकी ॥

संग्रहेऽपि—

संकटे समनुप्राप्ते सूतके समुपागते ।
कूष्माण्डीभिर्घृतं हुत्वा गां च दद्यात्पयस्विनीम् ॥
चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् ।
यदैव सूतकप्राप्तिस्तदैवाभ्युदयक्रिया ॥

नं संन्नाहयेत्" इति सन्नहने (१)प्रास्थानिकहोमादौ च । देशविप्लवे देशोपप्लवशमनार्थे शान्तिकर्मणि । आपदि देशपलायनादौ । *मधुपर्कोति । वरणवत्सु कर्मसु तच्छून्येषु तदीयाद्यपदार्थ इत्यग्रे स्पष्टम् । आवश्यके त्वाह-*एकविंशतीति । सूतकादिसम्भावनायां पूर्वमप्येतावति काले नान्दीश्राद्धं कार्यमित्यर्थः । *न देवेति । आशौचं नेत्यर्थः । *विवाहयोरिति, । "यज्ञे सम्भृतसम्भारे विवाहे श्राद्धकर्मणि । सद्यः शौचम्" इतिस्मृत्यन्तराच्च । *अत्रेति । आरम्भाभावेप्य(२)ग्रे कालान्तरा-

---

(१) 'प्रास्थानिक शान्तिहोमादौ' घ० ङ० । (२) 'प्यत्र' घ० ङ० ।

अन्नादिषु विशेषः षट्त्रिंशन्मते—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥

परैरसगोत्रैः ।

भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः ॥

एतदाशौचात्पूर्वमपृथक्कृतान्नाविषयम् । तत्र शेषमन्नं त्याज्यमित्यर्थः । पृथक्कृतेषु तु बृहस्पतिराह—

विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
पूर्वसंकल्पितान्नेषु न दोषः परिकीर्तितः ॥ इति ॥

धर्मार्थं विवाहकरणे फलमुक्तं महाभारते—

ज्ञात्वा स्ववित्तसामर्थ्यमेकं चोद्वाहयेद्द्विजम् ।
तेनाप्याप्नोति तत्स्थानं शिवभक्तो नरो ध्रुवम् ॥

अपरार्के दक्षः—

मातापितृविहीनं तु संस्कारोद्वाहनादिभिः ।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते ॥

मदनरत्ने भविष्ये—

विवाहादिक्रियाकाले तत्क्रियासिद्धिकारणम् ।
यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत् ॥

कन्यागृहे भोजननिषेधोऽपि तत्रैव—

अप्रजायां तु कन्यायां न भुञ्जीत कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचति ॥

अपरार्के आदित्यपुराणे—

विष्णुं जामातरं मन्ये तस्य कोपं न कारयेत् ।
अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे ॥
ब्रह्मदेयां न वै कन्यां दत्त्वाऽश्नीयात्कदाचन ।
अथ भुञ्जीत मोहाच्चेत्पूयाशी नरके वसेत् ॥

तत्रैव कश्यपः—

*अहतं यन्त्रनिर्मुक्तं वासः प्रोक्तं स्वयंभुवा ।
शस्तं तन्माङ्गलिक्येषु तावत्कालं न सर्वदा ॥

यन्त्रनिर्मुक्तं नूतनम् ॥

विवाहमध्ये स्त्रिया सह भोजनेपि*न दोष इत्याह हेमाद्रौ प्रायश्चित्तकाण्डे गालवः—

विवाहकाले यात्रायां पथि चौरसमाकुले ।
असहायो भवेद्विप्रस्तदा कार्यं द्विजन्मभिः ॥
एकयानसमारोह एकपात्रे च भोजनम् ।
विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक् ॥
अन्यथा दोषमाप्नोति पश्चाच्चान्द्रायणं चरेत् ॥

भावे इत्यर्थः । एतच्च जननाशौचे एव, न तु मरणाशौचे एतत्प्रायश्चित्तस्यास्पृश्यत्वावगमेऽसामर्थ्यात् । एवञ्च बहूनां सम्भाराणां सम्पादितानां साधारणशक्तावेव "नदेव" इत्यादि वाक्यमिति बोध्यम् ।

*अहतमिति । तच्च प्रोक्षणेन शुद्धमिति वक्ष्यते । *न दोष इति । अन्यदा तु दोष एव । "ना(१)श्नीयाद्भार्यया सार्द्धम्" इति मनुवचनात् । तत्र सार्द्धम् (२)एकपात्रे इत्यर्थः । (३)एककाले इत्यन्ये । यत्तु—

ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन ।
न तस्य दोषमिच्छन्ति नित्यमेव मनीषिणः ॥

इत्यङ्गिरोवाक्यं तद्विवाहपरम् । एतेन—

ब्राह्मण्या भार्यया सार्द्धं क्वचिद्भुञ्जीत वाऽध्वनि ।
अधोवर्ण्या स्त्रियासार्द्धं भुक्त्वा पतति तत्क्षणात् ॥

---

(१) नाश्नीयाद् भार्यया सार्धं नैनामीक्षेत चाश्नतीम् । क्षुवतीं जृम्भमाणां वा न चासीनां यथासुखम् ॥ इति ।

(२) 'एकरात्रे' घ० ङ० । (३) 'एककाल' घ० ङ० ।

मिताक्षरायामप्येवम् । रत्नमालायाम्—

मूलमैत्रमृगरोहिणीकरैः पौष्णमारुतमघोत्तरान्वितैः ।
भौमसौररविवारवर्जिते*पाणिपीडनविधिर्विधीयते ॥

अत्रानिष्टनक्षत्रादौ दानमुक्तं ज्योतिषे—

विपत्तारे गुडं दद्यान्निधने तिलकाञ्चनम् ।
प्रत्यरे लवणं दद्याच्छागं दद्यात्त्रिजन्मसु ॥

चन्द्रे च शङ्खं (१)लवणं च तारे
तिथौ विरुद्धे त्वथ तन्दुलांश्च ।
धान्यं च दद्यात्करणे च वारे
योगे विरुद्धे कनकं (२)प्रदेयम् ॥

विवाहमण्डपमाह वसिष्ठः--

षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितम् ।
मण्डपं तोरणैर्युक्तं तत्र*वेदीं प्रकल्पयेत् ॥
अष्टहस्तं तु रचयेन्मण्डपं वा त्रिषट्करम् ॥

दैवज्ञमनोहरः--

चित्रा विशाखा शततारकाश्विनी
ज्येष्ठाभरण्यौ शिवभाचतुष्टयम् ।
हित्वा प्रशस्तं फलतैलवेदिका
प्रदानकं कण्डनमण्डपादिकम् ॥

इति व्याख्यातम् । क्वचिद्विवाहेऽध्वनि चेत्यर्थात् । इदमपि न सर्वथा दोषाभावपरं किन्तु दोषाल्पत्वपरमिति माधवः । *पाणिपीडनेति ।

मुख्यो विवाहः पूर्वाह्णे मध्याह्ने चोत्तमोत्तमः ।
निशायां मध्यमः प्रोक्तः अपराह्णे तु गर्हितः ॥

इत्यात्रेयवाक्यं स्मर्त्तव्यम् ।

*वेदीमिति । ग्रन्थान्तरे तु—

---

(१) 'लवणे च' क० । (२) 'प्रदद्यात्' क० ।

हेमाद्रौ व्यासः—

कण्डनदलनयवारकमण्डपमृद्वेदिवर्णकाद्यखिलम् ।
तत्संबन्धिगतागतमृक्षे वैवाहिके कुर्यात् ॥

यवारकं 'चिकसा' इति प्रसिद्धम् ।

वैवाहिके तु दिवसे शुभे (१)वाथ तिथौ शुभे ।
चतुर्थिकं प्रकुर्वीत विधिदृष्टेन कर्मणा ॥

वेदिमाह नारदः—

हस्तोच्छ्रितां चतुर्हस्तैश्चतुरस्रां समन्ततः ।
स्तम्भैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि ॥
समां तथा चतुर्दिक्षु सोपानैरतिशोभिताम् ।
प्रागुदक्प्रवणारम्भां (२)स्तम्भैर्हंसशुकादिभिः ॥
एवंविधामारुरुक्षेन्मिथुनं साग्निवेदिकाम् ॥ इति ।

सप्तर्षिमते—

मङ्गलेषु च सर्वेषु मण्डपो गृहमानतः ।
कार्यः षोडशहस्तो वा द्वि(३)षड्हस्तो दशावधि ॥
स्तम्भैश्चतुर्भिरेवात्र वेदी मध्ये प्रतिष्ठिता ।

हस्तो वध्वाः । सोपानं पश्चिमतः उपरिभागे उक्तपरिमाणाद्भिन्नम् ॥

अथ मृदाहरणम् । ज्योतिर्निबन्धे नारदः—

कर्तव्यं मङ्गलेष्वादौ मङ्गलायाङ्कुरार्पणम् ।
नवमे सप्तमे वापि पञ्चमे दिवसेऽपि वा ॥
तृतीये बीजनक्षत्रे शुभवारे शुभोदये ।
सम्यग्गृहाण्यलंकृत्य वितानध्वजतोरणैः ॥
सह वादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशम् ।
तत्र मृत्सिकतां श्लक्ष्णां गृहीत्वा पुनरागतः ॥

---

(१) 'चाथ' क० । (२) 'स्तम्भ हंसशुकादिभिः' क० ख० ।
(३) 'न्यूनहस्तो दशावधि' क० ख० ।

मृन्मयेष्वथवा वैणवेषु पात्रेषु योजयेत् ।
अनेकबीजसंयुक्तां तोयपुष्पोपशोभिताम् ॥

शौनकः—

आधानं गर्भसंस्कारं जातकर्म च नाम च ।
हित्वान्यत्र विधातव्यं मङ्गलेऽङ्कुरवापनम् ॥

बृहस्पतिः—

आत्यन्तिकेषु कार्येषु कार्यं सद्योऽङ्कुरार्पणम् ॥

तत्रैव वाग्दानं हरिद्रावन्दनं च कार्यम् ।

ज्योतिःप्रकाशे—

*चतुर्थो मण्डपः श्रेष्ठः सप्तमः पञ्चमस्तथा ।
नवमैकादशौ श्रेष्ठौ नेष्टौ षष्ठतृतीयकौ ॥
विवाहभे स्वोदये वा कन्यावरणमाचरेत् ॥

वरस्यापि वरणमाह चण्डेश्वरः—

उपवीतं फलं पुष्पं वासांसि त्रिविधानि च ।
देयं वराय वरणे कन्याभ्रात्रा द्विजेन वा ॥ इति ।

वाग्दानोत्तरं वरमरणेऽपरार्कस्मृतिचन्द्रिकायां वसिष्ठः-

अद्भिर्वाचा च दत्तायां म्रियेतोर्ध्वं वरो यदि ।
*न च मन्त्रोपनीता स्यात् *कुमारी पितुरेव सा ॥

विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विता ।

इत्युक्तम् । विंशतिकोण इत्यर्थः । तत्प्रकारमग्रे वक्ष्यामः ।

*चतुर्थ इति । अष्टहस्तमारभ्य विंशतिहस्तान्ताः सप्त, पञ्चविंशतिहस्तः, पञ्चाशद्धस्तः, शतहस्तः, सहस्रहस्तश्चेत्येकादश मण्डपाः । चतुर्थः चतुर्दशहस्तः । आद्यौ द्वौ अष्टमश्च न विहिता न निषिद्धाः । *न च मन्त्रोपनीता स्यादिति । मन्त्रोपनयनं पाणिग्रहणादिकं विना वाचा दानमिवाद्भिर्दानमपि न भार्यात्वोत्पादकमित्यर्थः ।

नोदकेन न वा वाचा कन्यायाः पतिरिष्यते ।
पाणिग्रहणसंस्कारात्पातित्वं सप्तमे पदे ॥

इति वाक्यान्तराच्च । तथाच सप्तपदीपरिक्रमणात्प्राक् वरमरणे विधवात्वं नास्तीति भावः । किन्तु मनुः--

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

एतद्वचनेन पतिः पूर्व एव, पश्चाद्विवाहितो देवरस्तु तदीयधनान्तरवदस्या अपि भोक्तेति प्रतीयते । *कुमारी इति । सा चान्यस्मै देयेत्यभिप्रायः । तथाच पराशरः--

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ इति ।

वाग्दानानन्तरं पाणिग्रहणात्प्राक् पतौ (१)सम्भावितोत्पत्तिकपातित्वके नष्टे दूरदेशगमनेनापरिज्ञातवृत्तान्ते । शेषं सुगमम् ।

स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते ।
वरणाद्ग्रहणं पाणेः स संस्कारो विलक्षणः ॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात् ॥

इति नारदवाक्याच्च । स्त्रीपुंसयोः संसर्गात्प्राक् त्रयं क्रियते वरणं पाणिग्रहणं सप्तपदीप्रक्रमश्चेति । तत्र वरणं वरस्य सम्प्रदानत्वार्थं प्रार्थनं वाग्दानम् । तत्र तयोर्वरणपाणिग्रहणयोर्मध्ये वरणमनियतं यतस्तद्दोषदर्शनात्परावर्त्तते इत्यर्थः । अत्र वरणमनियतमित्युपादानाद्यदि पाणिग्रहणसप्तपदीक्रमणान्तं क्रियते, तदा दुष्टोढापि न परावर्त्तते इति सिद्धम् । अत एव बलादपहारप्रसङ्गे "पाणिग्रहणिका मन्त्रा" इत्युक्तम् । तथाच तत्रापि पाणिग्रहणादौ जातेन परावृत्तिः । एवं 'त्रिकर्मस्थ' इत्यत्रापि । एवञ्च—

न एतत्तु परे चक्रुर्नापरे जातु साधवः ।
यदन्यस्याभ्यनुज्ञाता नरस्यान्यस्य दीयते ॥
सकृदंशो निपतति सकृत्कन्या प्रदीयते ॥

इति निर्दोषविषयं सदोषजातपरिग्रहणादिविषयं च । दोषदर्श-

---

(१) 'सम्भावितान्तिकपातित्वके' ग० ।

यत्तु नारदः--

उद्वाहितापि सा कन्या न चेत्संप्राप्तमैथुना ।
पुनःसंस्कारमर्हेत यथा कन्या तथैव सा ॥ इति ।

यच्च कात्यायनः--

वरो यद्यन्यजातीयः पतितः क्लीब एव च (१) ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोपि वा ॥
*ऊढापि देया सान्यस्मै सहावरणभूषणा ॥ इति ।

*इदं कलौ निषिद्धम् ।

*देवरेण सुतोत्पत्तिर्दत्ता कन्या न दीयते ।

(२)इत्यादिपुराणे कलौ निषेधात् । *दत्ताशब्द ऊढापरः 'ऊढायाः पुनरुद्वाहम्' इति हेमाद्रावुक्तेः । अत एव सगोत्रासपिण्डादिविवाहेपि--

भोगतस्तां परित्यज्य पालयेज्जननीमिव ।

इत्युक्तम् ।

देशान्तरगमने तु कात्यायनः--

*वरयित्वा तु यः कश्चित्*प्रणश्येत्पुरुषो यदा ।
ऋत्वागमांस्त्रीनतीत्य कन्यान्यं वरयेद्वरम् ॥

नादिति वरणस्य नियामकत्वमपि पूर्ववरस्य दोषेऽसतीति भावः । *ऊढापीति । वस्तुतस्तु ऊढापीत्यपिकाराद्वाग्दत्ताया एवान्यस्मै दानमनेनोच्यते । अन्यथा (३)सगोत्रोढाया अपि विवाहप्रसक्तौ "पालयेज्जनऽनीमिव" इत्यनेन विरोधः स्यादिति । *इदमिति । उद्वाहितादानम् । *देवरेणेति । "अपुत्रां गुर्वनुज्ञातो देवर" इति विषयो वक्ष्यते । तर्हि वाग्दत्तायाः कथं कलौ दानं स्यादित्यत्राह-*दत्ताशब्द इति । *वरयित्वेति कन्याया अधार्यत्वे, त्रिऋतुपदात् । *प्रणश्येत देशान्तरं गच्छेत् अन्यथा प्रतीक्षावैय-

---

(१) 'वा' क० । (२) 'इत्यादित्यपुराणे' क० ख० ।
(३) 'सगोत्राया अपि' घ० ङ० ।

अपरार्के नारदोपि--

*प्रतिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरम् ॥

शुल्कदाने तु मनुवसिष्ठौ--

*कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या*यदि कन्यानुमन्यते ॥

चन्द्रिकायां कात्यायनः--

प्रदाय शुल्कं गच्छेद्यः क(१)न्यायाः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः ॥
*अनेकेभ्यो हि दत्तायामनूढायां तु तत्र वै ।
*पूर्वागतश्च सर्वेषां लभेताद्यवरस्तु ताम् ॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः ।
अथागच्छे*न्नवोढायां दत्तं पूर्ववरो हरेत् ॥

र्थात् । ऋतुः रजोदर्शनम् । *प्रतिगृह्य वाग्दत्तामङ्गीकृत्य शुल्कं दत्वा मरणं देशांतरगमनं वा, तत्राद्ये *कन्यायामिति । *यदीति । कन्याचेद्देवरमनुमन्यते तदा तस्मै देया, यदि तं नानुमन्यते तदाऽन्यस्मै देया इत्यर्थः । यद्यन्यस्मै दत्तायां कन्यायां पूर्ववर आयाति तदाह--*अनेकेभ्यो हीति । एतच्च निर्दोषैर्बहुभिर्वरणे कृते । आद्यवरः प्रथमवृत्तः । *पुरागत इति । पूर्वागत इति वा पाठः । अन्येन पाणिग्रहणात्पूर्वमागत इत्यर्थः । परागत इति पाठेऽप्ययमेवार्थः । *नवोढायाम् । नवेन नूतनेन द्वितीयादिना विवाहितायां स्वदत्तं शुल्कमात्रं लभेत न तु (२)कन्याम् । अनेनैव न्यायेन यदि कांचित् कश्चित्समन्त्रमूढ्वा तां त्यक्त्वा जीवनोपायार्थं देशान्परिभ्रमन्कानिचिद्दिनानि नागतः ततः सा कन्या तत्पित्रादिभिरन्यस्मै विवाहिता तदा सा द्वितीयवोढुर्न भार्या किन्तु पूर्ववोढुरेव, यद्यदूषिता चेत् । वृथाचेष्टायाः फलाज-

---

(१) 'कन्यायां स्त्री' क० । (२) 'कन्यामित्यर्थः' ड० ।

याज्ञवल्क्यः--

*सकृत्प्रदीयते कन्या हरंस्तां चौरदण्डभाक् ।
दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् ॥

पूर्वस्य दोषसत्त्वे इदमिति विज्ञानेश्वरः । सम्बन्धतत्त्वे वसिष्ठः--

कुलशीलविहीनस्य पश्चाद्धि पतितस्य च ।
अपस्मारिविधर्मस्य रोगिणां वेषधारिणाम् ॥
दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च ॥

मनुः-

षण्ढान्धबधिरादीनां विवाहोस्ति यथोचितम् ।
विवाहासम्भवे तेषां कनिष्ठो विवहेत्तदा ॥
पितृव्यपुत्रे सापत्ने परदारसुतेषु च ।
विवाहाधानयज्ञादौ परिवेदो न दूषणम् ॥

नकत्वादिति बोध्यम् । *सकृदिति । पूर्वार्द्धमदोषविषयम्, उत्तरार्थं सदोषविषयम् । एवञ्च "वाग्दत्ता मनोदत्ताऽग्निं परिगता सप्तमं पदं नीता भुक्ता गृहीतगर्भा चेति सप्तपुनर्भुवस्तां गृहीत्वा धर्मं न विन्देत्" इति बौधायनवाक्यमपि पूर्ववरस्यादोषत्वे एवेति भावः । यदि दत्तशुल्कामपि पिता न ददाति सा च ऋतुमती तदा तां शुल्कं च हरेदित्याह मनुः--

पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् ।
स हि स्वाम्याददतिक्रामेदृतूनां प्रतिबोधनात् ॥ इति ।

स पिता ऋतुकार्यापत्योत्पत्तिरोधात् । इदं च कन्यापूजार्थं शुल्कग्रहणे,

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्कुमारीणामानृशंस्यं तु केवलम् ॥

इति मनूक्तेः । आत्मार्थग्रहणे तु--

क्रीता द्रव्येण या नारी न सा पत्न्यभिधीयते ।

*अन्यद्वक्तव्यं विस्तरभीतेर्नोच्यते इति दिक्। अत्र नान्दीश्राद्धे विशेषं तदधिकारिविशेषं चाग्रे

न सा दैवै न सा पित्र्ये दासीं तां मु(१)नयो विदुः ॥
कन्याविक्रयिणो मूर्खा रहः किल्बिषकारिणः।
पतन्ति नरके घोरे दहन्त्यासप्तमं कुलम् ॥

इति यमोक्तेः। *अन्यादिति। वाग्दानोत्तरं कन्यायां दोषोपलम्भे वरस्त्यजेदित्याह मनुः,

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम्। इति।

दोषास्तु—

दीर्घकुत्सितरोगार्त्ता-व्यङ्गा संसृष्टमैथुना।
धृष्टाऽन्याहितभावा च कन्या दुष्टा प्रकीर्त्तिता ॥

इति नारदोक्ताः। अन्यस्मिन्नाहितो भावो यया साऽन्याहितभावा। कन्यादोषमनाख्यातुः पितुर्दण्डमाह याज्ञवल्क्यः—

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ॥ इति।

अदुष्टात्यागे वरस्य दण्डमाह स एव—

अदुष्टां तु त्यजन्दण्ड्यो दूषयंस्तु मृषा शतम्। इति।

दिगर्थस्तु याज्ञवल्क्यः—

पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम्।
वैश्या प्रतोदमादद्याद्वेदने त्वग्रजन्मनः ॥ इति।
वसनस्य दशा ग्राह्या शूद्रस्योत्कृष्टवेदने।

इति च। अग्रजन्मपदात्क्षत्रियेण वैश्याविवाहे प्रतोद एवेति। मनुः—

नाग्निहोत्रादिभिस्तत् स्याद्रक्षातो ब्राह्मणस्य वा।
यत्कन्या विधिवद्दत्वा फलमाप्नोति मानवः ॥

सालङ्कृतकन्यादाने तु संवर्त्तः—

कूकुदश्चाश्वमेधी च प्राणदाता भयेषु च।

---

(१) 'कवयो' ङ।

वक्ष्यामः। इदं चा*द्यविवाहे पिता कुर्याद्द्वितीयादौ वर एव,

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः।
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम्॥

इति स्मृतेः। त्रिकाण्डमण्डनोपि--

पित्रोस्तु जीवतोः कुर्यात्पुनः पाणिग्रहं यदा।
पितुर्नान्दीमुखश्राद्धं नोक्तं तस्य मनीषिभिः॥

रेणुकाकारिका--

(१)उक्तकाले विवाहाङ्गं कुर्यान्नान्दीमुखं पिता।
देशान्तरे विवाहश्चेत्तत्र गत्वा भवेदिदम्॥

लग्नघटीस्थापनमाह नारदः--

षडङ्गुलमितोत्सेधं द्वादशाङ्गुलमायतम्।
कुर्यात्पातालवत्ताम्रपात्रं तद्दशभिः पलैः॥
ताम्रपात्रे जलैः पूर्णे मृत्पात्रे वाथवा शुभे।
मण्डलार्धोदयं वीक्ष्य रवेस्तत्र विनिक्षिपेत्॥

तत्र मन्त्रः--

मुख्यं त्वमसि यन्त्राणां ब्रह्मणा निर्मितं पुरा।
भव भावाय दम्पत्योः कालसाधनकारणम्॥ इति॥

वरस्य मधुपर्कमाह याज्ञवल्क्यः—

समं यान्ति रथैरेते त्रयो वै नात्र संशयः॥ इति।

एवम् 'अलङ्कृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाहः' इत्युक्तेः कन्यादानं विवाहः, दानविवाहपदयोः सामानाधिकरण्यात्। 'चौलकर्मोपनयनगोदानविवाहाः' 'सार्वकालमेके विवाहम्' इत्यत्र तु पाणिग्रहणादि। अन्यथा (२)"एषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयात्" इति विवाहात्प्रागुक्तहोमासङ्गत्यापत्तेः कन्यादानात्प्राग्होमासम्भवादित्यादि।

*आद्यविवाहे इति। विशेषो वक्ष्यते। *स्वगृह्यादे

---

(१) 'उक्ते काले' क० ख०। (२) 'एषां' नास्ति ङ।

प्रतिसंवत्सरं त्वर्च्याः स्नातकाचार्यपार्थिवाः ।
प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनः ॥

अत्र विशेषो गृह्यपरिशिष्टे—

वरस्य या भवेच्छाखा तच्छाखागृह्यचोदितः ।
मधुपर्कः प्रदातव्यो ह्यन्यशाखेपि दातरि ॥

अत्र (१)वरदातृशब्दौ ऋत्विगाद्युपलक्षणम् । तदाहुः—'अर्च्यशाखया मधुपर्कः' इति । 'अर्च्यस्य यच्छाखीयं कर्म तच्छाखया मधुपर्कः' इति याज्ञिकाः । जयन्तस्तु 'वरणवत्सर्वत्र यजमानशाखयैव मधुपर्कः' इत्याह । (२)तत्तु नाद्रियन्ते वृद्धाः । अत्र—

पञ्चाशता भवेद्ब्रह्मा तदर्धेन तु विष्टरः ।

इत्यादिगृह्यपरिशिष्टादेर्विष्टरादिलक्षणं मधुपर्कादिविधिश्च *स्वगृह्यादेर्ज्ञेयः ॥

कन्यादाने प्रपितामहपूर्वकमित्युक्तं स्मृत्यर्थसारे—

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् ।
नाम संकीर्तयेद्विद्वानन्यत्र पितृपूर्वकम् ॥

नान्दीमुखे इति बह्वृचाद्यतिरिक्तविषयम्, गृह्यपरिशिष्टे पित्राद्यानुलोम्याम्नानात् । व्यासः—

भुक्त्वा समुद्वहेत्कन्यां सावित्रीग्रहणं तथा ।
उपोषितः सुतां दद्यादर्चिताय द्विजाय तु ॥

भुक्त्वेति *मधुपर्के वैधभोजनपरम् । गृह्यपरिशिष्टे—

रिति । वरस्य पादप्रक्षालने प्रथमतः सव्यपादो ग्राह्यः 'दक्षिणमग्रे ब्राह्मणाय प्रयच्छेत्सव्यं शूद्राय' इति सूत्रात् । यजमानपत्नी तु वामतः,

सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता ।
विप्रपादक्षालने च अभिषेके च वामतः ॥

इतिवचनात् । इत्यादि गृह्ये द्रष्टव्यः । *मधुपर्के वैधेति ।

---

(१) 'वरदातृशब्दो' ख० । (२) 'यत्तु' ख० ।

कन्यां वरयमाणानामेष धर्मो विधीयते ।
प्रत्यङ्मुखा वरयन्ति प्रतिगृह्णन्ति प्राङ्मुखाः ॥

(१)मदनरत्ने ऋष्यशृङ्गः—

वरगोत्रं स(२)मुच्चार्य प्रपितामहपूर्वकम् ।
नाम संकीर्तयेद्विद्वान्कन्यायाश्चै*वमेव हि ॥
तिष्ठेत्पूर्वमुखो दाता वरः प्रत्यङ्मुखो भवेत् ।
मधुपर्कार्चितायैनां तस्मै दद्यात्सदक्षिणाम् ॥
(३)उदपात्रं ततो गृह्य मन्त्रेणानेन दापयेत् ॥
गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् ॥
गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ।
भूमिं (४)गां चैव दासीं च वासांसि च स्वशक्तितः ॥
महिषीं वाजिनश्चैव दद्यात्स्वर्णमणीनपि ।
ततः स्वगृह्यविधिना होमाद्यं कर्म *कारयेत् ॥
यथाचारं विधेयानि माङ्गल्यकुतुकानि च ॥

एतत्कन्यादानं*त्रिः कार्यमिति शौनकः ।

गृहप्रवेशनीयहोमे विशेषमाहाश्वलायनः—

अर्धरात्रे व्यतीते तु परेद्युः प्रातरेव हि ।

भोजनान्तरकल्पने मानाभावात् । वस्तुतस्तु भुक्त्वापीत्यर्थः । तेन लौकिकभोजनस्याभोजनस्य च लाभः । एतेन प्रतिग्रहान्तरस्य मध्याह्नस्नानात्प्राक्कालीनत्वं नियतमिति सूचितम् । उपोषित इति । निशीथोत्तरं कन्यादाने तु दात्रा भोजनं कार्यं, तस्य परदिनत्वात् । *एवमेवेति । दृष्टान्तात्कन्यायां गोत्रप्रपितामहादिनामकीर्तनं च लभ्यते । *कारयेदिति । तत्र कुशाज्यादिसामग्री कन्यादात्रादेया । गृहप्रवेशनीयहोमश्च स्वगृहे कार्यः । दातृप्रार्थनया तद्गृहे वा । *त्रिःकार्यमिति । कन्यादानमभिधाय

---

(१) 'मदनरत्ने हेमाद्रौ च ऋ' क० । (२) 'समुच्चार्य' ख० ।
(३) 'उपपात्रं' क० । (४) 'गाश्चैव' क० ।

*गृहप्रवेशनीयः स्यादिति यज्ञविदो विदुः ॥ इति । औपासनहोमे विशेषमाह शौनकः—

धर्मप्रजासिद्ध्यर्थं कन्यां प्रतिगृह्णामीति ब्रूयात् । "एवं त्रिः प्रयुज्य 'ऋतस्य हि शुरुधः' इति तिस्रो जपेत्" इति गृह्य(१)परिशिष्टादिति,

त्रिवारमेवं कृत्वा तु कन्यां दद्यात्ततः पिता ।
दाता पठेदिमं मंत्रं कन्या तारयतु स्वयम् ॥

इत्याश्वलायनस्मृतेश्च ।

वरोऽथ प्रतिगृह्णीयात्स्पृशेत्क इति मन्त्रतः ।

इत्यत्राथपदेन त्रिर्दानानन्तरलाभाच्च । कन्याप्रतिग्रहो दक्षिणेंऽसे कार्यः, 'दक्षिणेंऽसे कन्यामभिमृश्य क इदं कस्मा अदात्' इति गृह्यपरिशिष्टात् । होमानन्तरं पाणिग्रहणादि पतित्वप्राप्त्यर्थम्,

पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे ।

इति वचनात् । कांस्यपात्रस्थकन्याञ्जलेरुपरिस्थे वराञ्जलौ दातृहस्ते भार्यया जलधारादानं कार्यम् । तेन कदाचित्कन्याहस्तासन्निधानेऽपि सकृत्कन्यादानं सिध्यत्येव । ये तु कांस्यपात्रस्थवराञ्जलेरुपरि दातृहस्ते इत्यादि मन्यन्ते तेषां कन्याञ्जलेरुपरि कन्याहस्तासत्त्वे द्विःकन्यादानं स्यात् । दात्रा च स्वयं कन्यादानजलं वरहस्ते दत्तं न स्यादिति । विष्णुधर्मे तु—

करे गृहीत्वा कन्यां तु दासदास्यो द्विजोत्तमः ।
करं तु हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रहे ॥

इत्युक्तम् । तत्राधःस्थकन्याहस्तं दाता वरहस्ते पश्चाद् दद्यादित्यर्थः । *गृहेति । संस्कारमयूखे देवस्वामिभाष्ये—"उपशान्तेऽन्यमग्निमाहृत्य नष्टाहरणप्रायश्चित्तं कृत्वा परिचरणं स्यात्" इति । अयमर्थः—गृहप्रवेशनीयहोमारम्भात्पूर्वं द्वादशरात्रमध्येऽग्न्यनुगमने श्रोत्रियागारादग्निमानीयाऽऽयतने स्थाप-

---

(१) 'परिशिष्टादेति' घ० ।

यित्वा परिसमूहनादि कृत्वाऽऽज्यं संस्कृत्य 'अयाश्च' इत्येकामाहुतिं हुत्वा नित्यहोमं कुर्यात् । द्वादशरात्रोत्तरमाज्याहुतयो लाजाहुतयश्चा(१)दावर्त्तनीया इति । नारायणवृत्तौ तु 'यदि विवाहाग्निर्नष्टः स्यान्नष्टाहरणप्रायश्चित्तं कृत्वा परिचरेत्' इत्युक्त्वा 'तच्च शास्त्रान्तरदर्शनात्' इत्युक्तम् । शास्त्रान्तरं च 'उपवासश्चान्यतरस्य भार्यायाः पत्युर्वा अनुगतेऽपि वोत्तरया जुहुयान्नोपवसेत्' इत्यापस्तम्बवचनम् । अन्यतरस्य कालस्यान्होरात्रेर्वा सम्बन्धी भार्यायाः पत्युर्वा उपवासोऽनशनम् । (२)अपिवा अथवा उत्तरया 'अयाश्च' इत्येतयाऽऽज्येन जुहुयात्,नतूपवसेदित्यर्थः। (३)गृहप्रवेशनीयहोमोत्तरं द्वादशरात्रमध्ये अनुगमने उक्तप्रायश्चित्तमेव । तदूर्ध्वं तु विवाहहोमस्य गृहप्रवेशनीयहोमस्य चावृत्तिरिति । 'विवाहाग्निमुपसमाधाय' इति सूत्रे विवाहाग्निग्रहणान्न विवाहहोममात्रेणाग्नेर्गृह्यत्वासिद्धिः, किन्तर्हि विवाहहोमगृहप्रवेशनीयहोमाभ्याम् । तेनाग्निनाशे होमद्वयं कार्यमिति नारायणवृत्तिदर्शनात्, पाणिग्रहणसूत्रे नष्टाहरणप्रायश्चित्तमुक्त्वा "यदि वा वैवाह्ये दायविभागकाले गृह्यते गृहीतो वा नष्टो द्वादशरात्रमतिक्रान्तः तत उक्तया क्रियया पश्चाद्गृहीतो भवति । विवाहाज्याहुतयो गृहप्रवेशनीयाहुतयश्च हृदयाञ्जनं च भवति, न्यायात् । होमद्वयं चात्र समानतन्त्रं स्यात्" इति द्वादशरात्रपदगर्भनारायणवृत्त्युक्तेश्च । अत्र प्रमाणं गृह्यपरिशिष्टम् ।

अथ पुनराधानम् । "अनुगतेऽग्नौ शिष्टागारादग्निमानीयोक्तवदुपसमाधाय परिसमुह्य परिस्तीर्य पर्युक्ष्याज्यमुत्पूय 'अयाश्चाग्ने' इत्येकामाज्याहुतिं हुत्वा यथापूर्वं परिचरेदेवमाद्वादशरात्रादत ऊर्ध्वं विवाहगृहप्रवेशहोमाभ्यामेकतन्त्राभ्यामादध्यात्"इत्यादि । गृह्यकारिका च—

औपासनोऽनुगच्छेच्चेदुपलेपादि पूर्ववत् ।
आहृत्य श्रोत्रियागारात्प्रतिष्ठाप्य हविर्भुजम् ॥

---

(१) 'श्चावर्जनीया' ङ०। (२) 'अपि वा' नास्ति ङ०। (३) 'गृहोपवेशनीय' ख०।

अन्यस्माद्धोमकालात्स्त्री नाश्नीयाद्यदि वा गृही ।
पर्युक्षणादिकं कृत्वा संस्कृत्याज्यं च पूर्ववत् ॥
अयाश्चेत्येतया हुत्वा यथापूर्वं जुहोत्यथ ॥

सर्वप्रायश्चितं च जुहुयादिति केचित् । तथा—

उपलेपादिकं कुर्यादाघारान्तं विवाहवत् ।
विवाहाज्याहुतीर्हुत्वा लाजाहोमो भवेदथ ॥
गृहप्रवेशनीयांश्च हुत्वा स्याद्धृदयाञ्जनम् ।
परिणीत्यादि नास्त्यत्र लाजानावपते स्वयम् ॥
समानतन्त्रकं वेदं होमद्वयमिदं भवेत् ॥ इति ।

अग्नेर्नाशापहारयोरिदमेव प्रायश्चित्तम्, "यदि तूपसाम्येत्" इति सूत्रेऽस्य नाशापहारयोः प्रदर्शनार्थत्वात् । यत्तु प्रयोगपारिजाते—'एवं रक्षितोऽग्निर्गृहप्रवेशनीयहोमादर्वागेव वाऽनुगमनश्चेत्तदा विवाहहोमः पुनः कार्यः । गृहप्रवेशनीयहोमानन्तरमनुगतश्चेत्तर्हि होमद्वयमपि पुनः कार्यमिति वृत्तिकारेणोक्तत्वात्तद्वत्' इति । तत्र विवाहहोमोत्तरं गृहप्रवेशनीयहोमात्पूर्वं द्वादशरात्रमध्येऽप्यग्नेरनुगमने विवाहहोमावृत्तिः कर्त्तव्येति नार्थः, किन्तु यथा दृष्टान्ते द्वादशरात्रोत्तरमेव विवाहहोमः । तद्वद्दार्ष्टान्तिकेऽपि द्वादशरात्रोत्तरमेव सः न तु ततः प्रागित्युक्तम् । दानहीरावल्यां तु—

उद्वाहौपासनात्पूर्वमनले शान्तिमागते ।
पुनर्लाजांतरं हुत्वा कर्मशेषं समापयेत् ॥

इति वचनाद्विवाहोत्तरमौपासनारम्भात्प्रागग्निनाशे विवाहहोमावृत्तिः कार्या ।

अथ तत्प्रयोगः—ममौपासनहोमारम्भा(१)त्पूर्वं नष्टस्य विवाहाग्नेः पुनरुत्पत्तिं करिष्ये इति सङ्कल्प्य विवाहहोमं कृत्वा शक्त्या ब्राह्मणान् भोजयेदिति ।

लाजाहोमप्रकारमाह भगवान्—

वधूः स्वाञ्जालिविच्छेदमकुर्वाणा तु (२)चैव तान् ।

---

(१) 'पूर्वमकृष्टस्य' ङ० । (२) 'चैतान्' ङ० ।

लाजानञ्जलिपार्श्वेन जुहुयादवधानतः ॥ इति ।

कारिकायाम्—

वरः शूर्पगताँल्लाजानवत्तांश्चाभिघारयेत् ।
पठेच्चार्यमणं मन्त्रमथ पत्नी स्थिता सती ॥
कुर्वन्त्यञ्जल्यवच्छेदमङ्गुल्यग्रैर्जुहोति तान् ॥ इति ।

पाणिग्रहणादिसप्तपदीक्रमणादि तु न भवति, वचनाभावात्; कन्यासंस्कारत्वाच्च । अन्यत्रापि शाकलः—

आचतुर्थ्याद्विवाहाग्निरनुगच्छेत्प्रमादतः ।
स्थण्डिले श्रोत्रियागारादाहृत्याग्निं निधाय च ॥
आज्येन जुहुयात्तत्र स्वयमेव विवाहवत् ॥

इत्युक्तम् ।

तत्सर्वमप्रामाणिकमिति मयूखे । एतेन—

चतुर्थिमध्ये त्वनले विनष्टे सन्धानमग्नौ त्वथ लौकिकाग्नौ ।
औपासनात्पूर्वमथापि नष्टे विवाहहोमं विधिवच्च कुर्यात् ॥ इति ।
अर्वाक्त्रिरात्राज्जुहुयादयाश्च आसप्तरात्रात्तु मनस्वतीं च ।
एकादशाहेऽपि भवोच्चतंतुना द्वादशाहे भवदग्निनाशे ॥

इति च प्रत्युक्तम्, अप्रामाणिकत्वात् । शाकलवचनं तु येषां चतूरात्रमहूयमानोऽग्निर्लौकिको भवति तत्परमिति केचित् । एवं "यद्याग्नि अत्र चतुर्थं नश्येत्तदोद्वाहार्यं तस्य 'अपहता' इति भस्माभ्युक्ष्य 'यत्ते योनिः' इति क्षिप्रं भस्म समारोप्य 'आजुह्वान' 'उद्बुध्यस्व' इति द्वाभ्यां समिधमाधाय सम्परिश्रित्य जुहुयात् । आयाश्चाग्ने पञ्चहोता 'ब्राह्मण' एकहोतेति दश स्रुवाहुतीर्महाव्याहृतीः सर्वप्रायश्चित्तानि जुहोति" इति बौधायनोक्तं, तत्सर्वमपि याजुषपरं, बौधायनसूत्रेऽदर्शनादप्रामाणिकं वा । यत्तु औपासनात्पूर्वं यदि विवाहाग्निः शाम्येत्तदा प्रायश्चित्तं विश्वादर्शे—

उद्वाहौपासनात्पूर्वमनले शान्तिमागते ।

स्थालीपाकं ततः कृत्वा औपासनमथाचरेत् ॥
न च नाडीभ्य ऊर्ध्वं चेत्स्थालीपाको भवेन्न वा ।
औपासनं तदा कुर्यात्परेद्युः सायमेव च ॥

इति, तदाश्वलायनान्यपरम् । आश्वलायनानां प्रायश्चित्तार्थं स्थालीपाकाभावात् । वस्तुतस्त्वेतदपि निर्मूलमेव। केचित्तु अत्रोपनयने विवाहे वा त्रिरात्रात्पूर्वं तदग्नावुपशान्ते प्रायश्चितं देशकालौ संकीर्त्य चतुर्थीमध्ये अग्निनाशे प्रायश्चित्ताहुतीर्होष्यामीति सङ्कल्प्य आज्यं संस्कृत्य 'अयाश्च'इत्येकामाहुतिं हुत्वा अग्निर्होता अश्विनाध्वर्यू त्वष्टाग्नीत् मित्र उपवक्ता सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाःश्रातास्त इन्द्रसोमाः वातायेर्हवनश्रुतः स्वाहा, वाचस्पतये ब्रह्मण इदम् । अग्न्यश्वित्वष्टमित्रसोमशुक्रेन्द्रवाह्निभ्य इदमित्यन्ये । अग्नये पञ्चहोत्रमिदमिति विश्वप्रकाशे । यन्म आत्मनो मिन्दाभूत् पुनरग्निश्चक्षुरदात् २ मनो ज्योतिर्जुषतां ३ त्रयस्त्रिंशत्तन्तवो येवितन्विरे ४ भूरग्नये च पृथिव्यै च ५ भुवो वायवे चान्तरिक्षाय च ६ सुवरादित्याय च (१)दिवे च ७ भूर्भुवः सुवश्चन्द्रमसे च ८ सप्त ते अग्ने समिधः ९ प्रजापते न त्वदेतान् १० इति दशाहुतीर्जुहुयादिति वदन्ति तदपि न आश्वलायनानाम्, अन्येतु–

कामान्ते दशहोमः स्यात्साग्निताग्नावथोद्धृते ।
अयाश्च पञ्चहोता च यन्मे मिन्दाहुतीद्वयम् ॥
पुनर्मनस्वतीं चैव महाव्याहृतयस्तथा ।
आविवाहाच्च ब्रह्मोदनाच्चोपनयनेतथा ॥ इति ।

(२)कार्यान्ते 'अवस्यते स्तुवते कृष्णियाय', इतिमन्त्रं पठित्वा 'अयाश्च' इत्यादि दशाहुतीर्जुहुयादिति ।

आचतुर्थाद्विवाहाग्निर्नश्येद्ब्रह्मोदनावधि ।
कार्यान्ते दशभिर्मन्त्रैः प्रत्यृचं जुहुयाद् घृतम् ॥

---

(१) 'दिवे च'नास्ति ङ० । (२) 'कार्यान्ते' नास्ति ङ० ।

*यदि रात्रौ विवाहाग्निरुत्पन्नः स्यात्तथा सति ।
उपक्रम्योत्तरस्याह्नः सायं परिचरेदमुम् ॥

यदि रात्रौ*नवनाडीमध्येऽग्न्युत्पत्तिस्तदा तदैव होमारम्भः, तदुत्तरं चेत्परादिने सायमारम्भ इति सुदर्शनभाष्ये उक्तम् ॥

इति वचनाच्चेति, तदपि नाश्वलायनानामिति दिक् । *यदीति । शौनकः—

यस्मिन्नह्नि विवाहः स्यात्सायमारभ्य तस्य तु ।
परिचर्या विवाहाग्नेर्विदधीत स्वयं द्विजः ॥

"पाणिग्रहणादि गृह्यं परिचरेत्" इति सूत्राच्च विवाहहोमोत्तरं सायं नित्यहोमः कार्यः । पाणिग्रहणादिति कथञ्चन गृहप्रवेशनीयहोमानामावश्यकार्थम् । तेन नित्यहोमः गृहप्रवेशनीयात्प्रागपि भवतीति । स्वयंपदोपादानादनवकाशेऽपूर्वारम्भः पत्न्यादिना न भवति, दम्पत्योर्मध्ये पुंस एव मुख्याधिकारात् । तस्मात्सायंप्रातरपूर्वहोमः स्वयं च वर एवं कुर्यात् । यानि तु—

पत्नी कुमारी पुत्रो वा शिष्यो वाऽपि यथाक्रमम् ।
पूर्वपूर्वस्य चाभावे विदध्यादुत्तरोत्तरः ॥
स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवाससी वा ।
ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विटपतिः ।
एतैरेव हुतं यत्तु तद्धुतं स्वयमेवहि ॥

इत्यादीनि, तानि द्वितीयादिहोमपराणि । नात्र भद्राव्यतीपातादिनिषेधः, तस्य नित्यत्वात् । *न वेति ।

प्रातर्होमे सङ्गवान्तः काले त्वनुदितेऽथ वा ।
सायमस्तमिते होमः कालस्तु नवनाडिकाः ॥

इति वचनात् । इदं तु बोध्यम् । सायं नित्यहोमकालौ द्वावेव यावद्रक्तिमा नापैतीतिमुख्यः, प्रदोषान्तो गौणः । नवनाडिकाशब्देनापि कथञ्चित्प्रदोषान्ताभिधानात् । घटीत्रयस्य संध्यात्वात् ।

अथ देवकोत्थापनम् ।

समे च दिवसे कुर्याद्देवकोत्थापनं बुधः ।
(१)षष्ठं च विषमं नेष्टं मुक्त्वा पञ्चमसप्तमौ ॥

एवं प्रातरपि द्वौ-उदितः समवान्तश्च । तत्रोभयत्रापि कथञ्चिन्मुख्यकालात्यये नित्यहोमस्य नापूर्वप्रारम्भः, गौणकाले तद्‍योगात् । यथा कृष्णाद्वितीयादौ नक्षत्राधानेऽतीतपौर्णमासस्य न प्रारम्भः । मुख्यकाले पौर्णमास्यामनाहिताग्नित्वेनानाधिकारात्तथेहापीति । वस्तुतस्तु पुनराधाने पुनः सन्धाने गौणकाले न होमप्रारम्भः । नच "आधानप्रभृति यजमान एवाग्नयः" इति श्रुतिविरोधः, आधानोत्पन्नानामग्नीनां नाशेऽपि अदृष्टस्य यजमाने सत्त्वात्पुनराधानादिनाश्रमसंपादनमात्रमिति तत्र होमस्याधानपूर्वत्वादिति वाच्यं, तच्छ्रुतेरर्थवादत्वादिति । अधिकमन्यतोऽनुसंधेयम् । यत्तु बौधायनः—

आसायं कर्मणः प्रातराप्रातः सायकर्मणः ।
आहुतिर्नातिपद्येत पार्वणं पार्वणान्तरात् ॥ इति ।

तच्छाखान्तरपरमिति प्रयोगपारिजातः ।

अत्र कुण्डसिद्धिटीका ।

वेदी चतुर्विधा प्रोक्ता चतुरस्रा च पद्मिनी ।
श्रीधरी सर्वतोभद्रा दीक्षासु स्थापनादिषु ॥
चतुरस्रा चतुष्कोणा वेदी सर्वफलप्रदा ।
तडागादिप्रतिष्ठायां पद्मिनी पद्मसन्निभा ॥
राज्ञां स्यात्सर्वतोभद्रा चतुर्भद्राऽभिषेचने ।
विवाहे श्रीधरी वेदी विंशत्यस्रसमन्विता ।
दर्पणोदरसंकाशा निम्नोन्नतविवर्जिता ॥ इति ।

अन्यत्रापि—

कन्याहस्तैः सप्तभिः पञ्चभिर्वा कार्या वेदी श्रीधरी नित्यमेव ।

---

(१) 'षष्ठे च विषमे' क० ।

तत्र सप्तहस्ता त्रिविधा-एकाशीतिकोष्ठा, षष्टिकोष्ठा, एकचत्वारिंशत्कोष्ठा च।

तत्र प्रथमा यथा—संलग्नकोष्ठत्रया प्रथमा पङ्क्तिः, तदधः उभयतोनिःसृतकोष्ठाभ्यां युक्ता संलग्नकोष्ठपञ्चका द्वितीया। तदधः उभयतोनिःसृतकोष्ठा संलग्नकोष्ठसप्तका तृतीया। तदधः उभयतोनिःसृतकोष्ठाभ्यां संलग्नकोष्ठनवका चतुर्थी। तदधः उभयतोनिःसृतकोष्ठाभ्यां संलग्नैकादशकोष्ठका पञ्चमी। तथैव षष्ठी, सप्तमी चेति। तदधोन्तर्गतकोष्ठनवकाऽष्टमी। तदधोन्तर्गतकोष्ठसप्तका नवमी। तदधोन्तर्गतकोष्ठपञ्चका दशमी। तदधोन्तःकोष्ठत्रया एकादशीति एकाशीतिकोष्ठानि। तत्र फलं कोष्ठेषु सर्वेषु भुजः कोटिश्च सम एव। तत्र भुजोऽष्टादशाङ्गुलानि पञ्च यवाः तिस्रो यूकाः १८-५-३, तावती कोटिः १८-५-३ इति। तयोर्घातः ३४८-३-४ कोष्ठै ८१ रेकाशीतिभिर्घातः। तथाच फलं २२४ अष्टाविंशतिसहस्रशतद्वयचतुर्विंशत्यङ्गुलानि।

द्वितीया यथा द्विकोष्ठा प्रथमा पङ्क्तिः तदधः उभयतोनिःसृतकोष्ठाभ्यां चतुः कोष्ठा तदधस्तादृशी षट्कोष्ठा तदधस्तादृशी अष्टकोष्ठा तदधस्तादृशी दशकोष्ठा (१)तदधो दशकोष्ठा तदधः अन्तरष्टकोष्ठा (२)तदधोऽन्तः षट्कोष्ठा तदधोन्तश्चतुःकोष्ठा। तदधान्तो द्विकोष्ठेति। तत्र भुजः एकविंशत्यङ्गुलानि, त्रयो यवाः, षट् यूकाः २१-३-६ कोटिः २१।३।६ भुजः अटिघातः. तत्फलं ४७०।३।६ षष्टि कोष्ठघातः फलं २८२२४ तदेव।

तृतीया यथा-एककोष्ठा, तदधः उभयतो निःसृतकोष्ठाभ्यां त्रिकोष्ठा, तदधस्तादृशी पञ्चकोष्ठा तदधस्तादृशी सप्तकोष्ठा, तदधस्तादृशी नवकोष्ठा, तदधः उभयतोन्तः सप्तकोष्ठा, तदधः प-

---

(१) 'तदधो दशकोष्ठा' नास्ति ख०।

(२) 'तदधः षट् कोष्ठा, तदधश्चतुः कोष्ठा तदधोद्वि' ख०।

निर्णयदीपे गार्ग्यः—

*नान्दीश्राद्धे कृते पश्चा*द्यावन्मातृविसर्जनम् ।
दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च ॥

श्चकोष्ठा, तदधस्त्रिकोष्ठा, तदध एककोष्ठेति एकचत्वारिंशत्कोष्ठेति । तत्र भुजः २६ । १ । ३ । कोटिः २६ । १ । ३ । भुजकोटिघातः ६८८ । १ । ७ । कोष्ठ४१घातः फलं तदेव २८२२४ ।

पञ्चभिर्हस्तैर्यथा—तत्र क्षेत्रफलं १४४०० । भुजः १५ । ४ । कोटिः १५ । ४ । तदुभयघातः फलं २५ । ३ । ३२ । षष्टिभिर्गुणने फलं १४४०० चतुःशताधिकचतुर्दशसहस्रीति दिक् । तद्बहिस्सोपानं कार्यम् ।

अथ विवाहोपनयनयोः स्वस्तिवाचनपीठं यथा—

श्रीमत्स्वस्तिकमादितो भुवि शुभं कुर्यात्सितैस्तण्डुलै-
र्द्वात्रिंशत्परितोऽङ्गुलानि सततं तावच्च कोष्ठैर्युतम् ।
प्राक् पञ्चोत्तरतस्तु पञ्च वितता मध्ये तु रेखाद्वयं
कोणेष्वायतनेषु वाऽप्युभयतास्तिर्यक् तथैकैकिका ॥
एवं यच्चतुरस्रकं विरचयेत्कुक्ष्योः पदाकारवत् ।
प्राच्यां स्याद्गजशुण्डवत्कलशवत्कुर्यात्प्रतीच्यां तथा ॥
मध्ये स्थाप्य च तण्डुलोपरि शुभौ कुम्भौ लसत्पल्लवौ
पूर्णौ रत्नजलैस्ततो ह्युपविशेद्भद्रासने प्राङ्मुखः ॥ इति ।

नान्दीश्राद्धानन्तरं मण्डपोद्वासनावधि केषाञ्चिन्निषेधमाह— *नान्दीश्राद्धे इति । स्वधाकारः पितृयज्ञः । न च नित्यश्राद्धनिषेधेनैव तन्निषेधः सिध्यतीति वाच्यम्,

श्राद्धं च पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा ॥

इति पितृबलिवैकल्पिकपितृयज्ञनिषेधासिद्धेः । तेन तत्सहचरितवैश्वदेवस्यापि निषेधः । नियतमण्डपकमहादानादिव्यावृत्तये— *यावन्मातृविसर्जनमिति । तत्र मातृविसर्जनस्य मण्डपोद्वा-

अपसव्यं स्वधाकारं नित्यश्राद्धं तथैव च ।
ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलङ्घनम् ॥
(१)उपवासं व्रतं चैव श्राद्धभोजनमेव च ।
नैव कुर्युः सपिण्डाश्च मण्डपोद्वासनावधि ॥

बृहस्पतिः—
तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति ॥

योगियाज्ञवल्क्यः—
न स्नायादुत्सवेऽतीते मङ्गलं विनिवर्त्य च ।
अनुव्रज्य सुहृद्बन्धूनर्चयित्वेष्टदेवताम् ॥

ज्योतिषे—
स्नानं सचैलं तिलमिश्रकर्म प्रेतानुयानं*कलशप्रदानम् ।
अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मङ्गलतोऽब्दमेकम् ॥
मासषट्कं विवाहादौ (२)व्रतप्रारम्भणेऽपि च ।
जीर्णभाण्डादि न त्याज्यं गृहसम्मार्जनं तथा ॥
ऊर्ध्वं विवाहात्पुत्रस्य तथा च व्रतबन्धनात् ।
आत्मनो मुण्डनं नैव वर्षं वर्षार्धमेव च ॥
अभ्यङ्गे सूतके चैव विवाहे पुत्रजन्मनि ।
माङ्गल्येषु च सर्वेषु न धार्यं गोपिचन्दनम् ॥

ज्योतिर्निबन्धे—
उद्वाहात्प्रथमे शुचौ यदि वसेद्भर्तुर्गृहे कन्यका

सनावधिकत्वं विशेषणम् । तादृशं च तद्विवाहोपनयनयोरेव नान्यत्र । न चेदं महादानादौ मातृविसर्जनविलम्बं विधातुं समर्थं, तथाविधप्रत्ययाभावात् । विवाहोपनयनयोरेव मातृविसर्जनमण्डपोद्वासनयोः क्रमस्य सिद्धेः । *कलशप्रदानं श्राद्धीयमुदकुम्भा-

---

(१) 'उपवासव्रतं' क० । (२) 'व्रतप्रारम्भणे न' ख० क० ।

हन्यात्तज्जननीं क्षये निजतनुं ज्येष्ठे पतिज्येष्ठकम् ।
पौषे च श्वशुरं पतिं च मलिने चैत्रे स्वपित्रालये
तिष्ठन्ती पितरं निहन्ति न भयं तेषामभावे भवेत् ॥

निबन्धे—

विवाहात्प्रथमे पौषे आषाढे चाधिमासके ।
न सा भर्तुर्गृहे तिष्ठेच्चैत्रे पितृगृहे तथा ॥

हेमाद्रौ स्मृत्यन्तरे—

*विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥
(१)(तथा अर्धं पूर्ववत् ।
सपिण्डा नैव कुर्वीरन्नद्भिः स्नानमृतुत्रये ।
तीर्थे संवत्सरे प्रेते पितृयज्ञे महालये ॥
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सदा ॥)

अथ वधूप्रवेशः । जयतुङ्गे—

मार्गशीर्षे तथा माघे माधवे ज्येष्ठसंज्ञके ।
सुप्रशस्ते भवेद्वेश्मप्रवेशो नवयोषिताम् ॥

नारदः—

आरभ्योद्वाहदिवसात्षष्ठे वाऽप्यष्टमे दिने ।
वधूप्रवेशः संपत्त्यै दशमेऽथ समे दिने ॥

सङ्ग्रहे—

विवाहमारभ्य वधूप्रवेशो

दि । एतद्वचनबलादेवोदकुम्भश्राद्धान्यपकृष्याचरन्ति । *विवाहेति ।

उपरागे पितुःश्राद्धे पातेऽमायां च सङ्क्रमे ।
निषेधेऽपि हि सर्वत्र तिलैस्तर्पणमाचरेत् ॥

इति अपवादवाक्ये पितृपदं मात्रादेः पातपदं च वैधृतेरुपलक्षणम् ।

---

(१) कंसान्तर्गतं नास्ति क० ।

युग्मे तिथौ षोडशवासरान्तात् ।
ऊर्ध्वं ततोऽब्दे युजि पञ्चमान्ता-
दतः परस्तान्नियमो न चास्ति ॥

नारदः-

समे वर्षे समे (१)मासि यदि नारी गृहं व्रजेत् ।
आयुष्यं हरते भर्तुः सा नारी मरणं व्रजेत् ॥

प्रयोगरत्ने तु-

वधूप्रवेशः प्रथमे तृतीये शुभप्रदः पञ्चमकेऽथ वाह्नि ।
द्वितीयके वाथ चतुर्थके वा षष्ठे वियोगामयदुःखदः स्यात् ॥

इत्युक्तं, तत्र मूलं चिन्त्यम् । वृद्धवसिष्ठोऽपि-

षष्ठाष्टमे वा दशमे दिने वा विवाहमारभ्य वधूप्रवेशः ।
पञ्चाङ्गसंशुद्धदिनं विनापि विधावसङ्कोचरगेऽपि कार्यः ॥

लल्लः—

*स्वभवनपुरप्रवेशे देशानां विप्लवे तथोद्वाहे ।
नववध्वा गृहगमने प्रतिशुक्रविचारणा नास्ति ॥

तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्यात्तिलैस्तर्पणमेव च ॥

इत्यपवादान्तरमपि द्रष्टव्यम् । *स्वभवनेति ।

पित्र्ये गृहे चेत्कुचपुष्पसम्भव-
स्तदा न दोषः प्रतिशुक्रसम्भवः ।
यावच्चन्द्रः पूषभात्कृत्तिकाद्ये
तावच्छुक्रोऽन्धो न दुष्टोऽग्रदक्ष ॥ इति ।

शुक्रदोषशान्त्यै कुर्याच्छान्तिं वसिष्ठोक्तां दद्याद्वै सितमश्वं सितातपत्रं सुवर्णं च । शान्तिस्तु भृगुवारे भृगूदये उपोष्य शुद्धरजतनिर्मितां कांस्यपात्रस्थतण्डुलोपरिस्थां शुक्रप्रतिमां सम्पूज्य

---

(१) 'मासे' क० ।

माण्डव्यः–

नित्ययाने गृहे जीर्णे प्राशनान्तेषु सप्तसु ।
वधूप्रवेशे माङ्गल्ये न मौढ्यं गुरुशुक्रयोः ॥

ज्योतिःप्रकाशे–

वामे शुक्रे नवोढायाः सुखं हानिश्च दक्षिणे ।
धनं धान्यं च पृष्ठस्थे सर्वनाशः पुरः स्थिते ॥
नवोढायास्तु वैधव्यं यदुक्तं संमुखे भृगौ ।
तदेव विबुधैर्ज्ञेयं केवलं तु द्विरागमे ॥
पूर्वतोऽभ्युदिते शुक्रे (१)प्रयायाद्दक्षिणापरे ।
पश्चादभ्युदिते चैव यायात्पूर्वोत्तरे दिशौ ॥

व्यवहारतत्त्वे––

पौष्णात्कराच्च श्रवणाच्च युग्मे
हस्तत्रये मूलमघोत्तरासु ।
पुष्ये च मैत्रे च वधूप्रवेशो
रिक्तेतरे व्यर्ककुजे च शस्तः ॥

सेश्वतवस्त्रां विप्राय दद्यात् । 'शुक्रं ते अन्यत्' इत्यृचमष्टोत्तरशतं जपेत् । अथवाश्विनीनक्षत्रे यात्रामुहूर्तं दृष्ट्वा गच्छेत् ।

स्वामिनीनीयमानायाः प्रतिशुक्रो न विद्यते ।
प्रतिशुक्रकृतो दोषो नूतने गमने नृणाम् ॥
राज्ञां विजययात्रायां नान्यदा दोषमावहेत् ।
यात्रोक्ते ऋक्षलग्नादौ राहौ दक्षिणपृष्ठगे ।
विवाहोक्तादिने मासे यायात्पतिनिकेतनम् ॥
राहुः पूर्वादिकाष्ठासु मासैर्मार्गादिभिस्त्रिभिः ।
यात्ययं दक्षिणादृत्या नेष्टः सम्मुखवामतः ॥
कश्यपेषु वसिष्ठेषु भृग्वत्र्यङ्गिरसेषु वा ।
भारद्वाजेषु वत्सेषु प्रतिशुक्रो न विद्यते ॥

---

(१) 'प्रयायाद्दक्षिणे परे' क० ।

गर्गः—

व्यतीपाते च संक्रान्तौ ग्रहणे वैधृतावपि ।
श्राद्धं विना शुभं नैव प्राप्तकालेऽपि मानवः ॥

तथा--
अमासङ्क्रान्तिविष्ट्यादौ प्राप्तकालेऽपि नाचरेत् । इति ।

अथ द्विरागमनम् । ऋक्षोच्चये--

माघफाल्गुनवैशाखे शुक्लपक्षे शुभे दिने ।
गुर्वादित्यविशुद्धौ स्यान्नित्यं पत्नीद्विरागमः ॥

बादरायणः--

नीहारांशुदिनोत्तरादितिगुरुब्रह्मानुराधाश्विनी-
शुक्रे भास्करवायुविष्णुवरुणत्वाष्ट्रे प्रशस्ते तिथौ ।
कुम्भाजालिगते रवौ शुभकरे प्राप्तोदये भार्गवे
(१)जीवज्ञास्फुजितां दिने नववधूवेश्मप्रवेशः शुभः॥

अथ *पुनर्विवाहः । श्रीधरीये--

पुनर्विवाहं वक्ष्यामि दम्पत्योः शुभवृद्धिदम् ।
लग्नेन्दुलग्नयोर्दोषे ग्रहतारादिसम्भवे ॥
अन्येष्वशुभकालेषु (२)दुष्टरोगादिसम्भवे ।

इति गुरुचरणाः । चतुर्थदिवसे हस्तिपूजामाह यज्ञपार्श्वः—

चतुर्थे दिवसे रात्रौ लिखेन्मानःसरोवरम् ।
हिरण्यगर्भं तन्मध्ये गन्धपुष्पाक्षतादिभिः ॥
सम्पूज्याप्सरसश्चैव सोमगन्धर्वपावकान् ।
सम्पूज्य चाश्वहस्त्यादीनारोप्य स्वगृहं प्रति ॥
प्रवेशनादिकं कर्म अन्यथा तु भवेद्भयम् ॥ इति ।

*पुनारिति । विवाहे कृते पश्चाद्गशुद्धिराहित्ये ज्ञाते

---

(१) 'जीवज्ञां' क० ।
(२) 'दुष्टयोगादि' क० ।

विवाहे चापि दम्पत्योराशौचादिसमुद्भवे ॥
तस्य दोषस्य शान्त्यर्थं पुनर्वैवाह्यमिष्यते ॥

याज्ञवल्क्यः—

*सुरापी व्याधिता धूर्ता वन्ध्यार्थघ्न्यप्रियंवदा ।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ॥

मनुः—

वन्ध्याष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा ।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

सङ्ग्रहे तु—

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ।
मृतप्रजां पञ्चदशे सद्यस्त्वप्रियवादिनीम् ॥

(१)याज्ञवल्क्यः—

एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति ।
समर्थस्तोषयित्वार्थैः पूर्वोढामपरां(२)व्रजेत् ॥
*आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो *भरणं स्त्रियाः ॥

मनुः—

अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥ इति ।

तयोरेव वधूवरयोः पुनर्विवाहः कार्य इत्यर्थः । तत्कालः प्रयोगरत्ने ज्योतिषग्रन्थे च ज्ञेयः। द्वितीयविवाहमाह—*सुरापीति । सुरापी शूद्रापि—

पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।

इति स्मरणात् । धूर्ता वञ्चिका, विसंवादिनी वा । अधिवेदना भार्यान्तरपरिग्रहः । *आज्ञेति । अधिवेदनकारणाभावेप्यधिवेत्तारमधिकृत्य । *भरणम् अन्नवस्त्रादिः ।

---

(१) 'याज्ञवल्क्यः' नास्ति क० । (२) 'वहेत् । याज्ञवल्क्यः' क० ।

हेमाद्रौ कात्यायनः--

अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया ।
कारयेत्तद्बहुत्वं चेज्ज्येष्ठया *गर्हिता न चेत् ॥

याज्ञवल्क्यः--

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ।
सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥

द्वितीयविवाहहोमेऽग्निमाह कात्यायनः--

सदारोऽन्यान्पुनर्दारानुद्वोढुं कारणान्तरात् ।
यदीच्छेदग्निमान्कर्तुं क्व होमोऽस्य विधीयते ॥
*स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन ॥

त्रिकाण्डमण्डनोपि--

आद्यायां विद्यमानायां द्वितीयामुद्वहेद्यदि ।
तदा वैवाहिकं कर्म कुर्यादावसथेऽग्निमान् ॥

सुदर्शनभाष्ये तु-'द्वितीयविवाहहो(१)मो लौकिक एव न पूर्वौपासने' इत्युक्तम् । इदं चा*सम्भवे ।

*तत्र चाग्निद्वयसंसर्गः कार्यः । तदा(२)ह शौनकः—

अथाग्न्योर्गृह्ययोर्योगं सपत्नीभेदजातयोः ।
सहाधिकारसिद्ध्यर्थमहं वक्ष्यामि शौनकः ॥

*गर्हिता पातित्यादिमती । *स्वेऽग्नावेवेति । अस्मिन्पक्षे पुनर्गृहप्रवेशनीयहोमो न भवति, तस्य गृह्यत्वसिद्ध्यर्थत्वात्तस्य च सिद्धत्वात् । इदं च तत्राग्निसत्त्वे । *असम्भवे इति । औपासनासम्भवे इत्यर्थः । *तत्र चेति । देशान्तरेऽन्यसन्निधौ वा लौकिके विवाहहोमं गृहप्रवेशहोमं च कुर्यात् । तत्र च कालान्तरेऽग्निद्वयसंसर्गः कार्य इत्यर्थः । अग्निद्वयसंसर्गपर्यन्तं नित्यहोमद्वयं दर्शपूर्णमासस्थालीपाकद्वयं च कार्य-

---

(१) 'होम' नास्ति क० ।
(२) 'तत्राह' क० ।

अरोगामुद्वहेत्कन्यां धर्मलोपभयात्स्वयम् ।
कृते तत्र विवाहे च व्रतान्ते तु परेऽहनि ॥
पृथक्स्थण्डिलयोरग्निं समाधाय यथाविधि ।
(१)तन्त्रं कृत्वाज्यभागान्तमन्वाधानादिकं ततः ॥
जुहुयात्पूर्वपत्न्यग्नौ तयान्वारब्ध आहुतीः ।
अग्निमीळे पुरोहितं सूक्तेन नवर्चेन तु ॥
समिध्येनं समारोप्य अयं ते योनिरित्यृचा ।
प्रत्यवरोहेत्यनया कनिष्ठाग्नौ निधाय तम् ॥
आज्यभागान्ततन्त्रादि कृत्वारभ्य तदादितः ।
समन्वारब्ध एताभ्यां पत्नीभ्यां जुहुयाद् घृतम् ॥
चतुर्गृहीतमेताभिर्ऋग्भिः षड्भिर्यथाक्रमम् ।
अग्नावग्निश्चरतीत्यग्निनाग्निः समिध्यते ॥
अहर्तादमिति तिसृभिः पाहिनो अग्न एकया ।
ततः स्विष्टकृदारभ्य होमशेषं समापयेत् ॥
गोयुगं दक्षिणा देया श्रोत्रियायाहिताग्नये ।
पत्न्योरेका यदि मृता दग्ध्वा तेनैव तां पुनः ॥
आदधीतान्यया सार्धमाधानविधिना गृही ॥ इति ।

बौधायनसूत्रे तु—

“अथ यदि गृहस्थो द्वे भार्ये विन्देत कथं तत्र कुर्यादिति, यस्मिन् काले विन्देतोभावग्नी परिचरेदपराग्निमुपसमाधाय परिस्तीर्याज्यं विलाप्य स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वारब्धायां जुहोति नमस्त ऋषेरादाव्यधायै त्वा स्वधायै त्वा मान इन्द्राभिमतस्त्वदृष्टाऽरिष्टां स एव ब्रह्मन्न वेद सुस्वाहेत्यथाऽयं ते योनिर्ऋत्विते इति समिधि समारोपयेत् । पूर्वाग्निमुपसमाधायाजुह्वान उद्बुध्यस्वाग्न इति समिधमाधाय परिस्तीर्य स्रुचि चतुर्गृहीत्वा द्वयोर्भार्ययोरन्वारब्ध-

---

(१) ‘तत्र’ ख० ग० ।

योर्यजमानोऽभिमृशति यो ब्रह्मा ब्रह्मण इत्येतेन सूक्तेनैकं चतुर्गृहीतं जुहोत्यग्निमुखात्कृत्वा पक्वाज्जुहोति संमितं संकल्पेथामिति पुरोनुवाक्यामनूच्याग्ने पुरीष्ये इति याज्यया जुहोत्यथाज्याहुतीरुपजुहोति पुरीष्यमस्तमित्यन्तादनुवाकस्य स्विष्टकृत्प्रभृति सिद्धमाधेनुवरदानादथाग्रेणाग्निं दर्भस्तम्बे हुतशेषं निदधाति ब्रह्मजज्ञानं पिताविराजामिति (द्वा(१)भ्यां संसर्गविधिः कार्यः)" । द्वितीयादिविवाहे काल उक्तः संग्रहे—

*प्रमदामृतिवासरादितः पुनरुद्वाहविधिर्वरस्य च ।
विषमे परिवत्सरे शुभो युगले चापि मृतिप्रदो भवेत् ॥

तृतीयवि(२)वाहे निषेधो मात्स्ये--

उद्वहेद्रतिसिद्ध्यर्थं तृतीयां न कदाचन ।
मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीम् ॥
नश्यत्येव न सन्देहो गर्गस्य वचनं यथा । इति ।

सङ्ग्रहे—

तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् ।
चतुर्थादिविवाहार्थं तृतीयेऽर्कं समुद्वहेत् ॥

मिति गर्भाधानग्रन्थादौ स्पष्टम् । अग्निद्वयसंसर्गप्रयोगः प्रयोगरत्ने बोध्यः । *प्रमदेति । अन्यत्रासावश्यके उक्तम् ।

पत्नीवियोगे प्रथमे च वत्सरे
नो चेद्द्विवर्षे पुनरुद्वहेत्सः ।
अयुग्ममासे तु शुभप्रदः स्या-
द्वसिष्ठगर्गादिभि(३)रप्यभाणि ॥

अपुत्रा चेन्मृता भार्या तस्या भर्त्तुर्विवाहकम् ।
युग्माब्दे युग्ममासे वा विवाहः शुभदो मतः ॥

---

(१) कंसान्तर्गतं नास्ति क० ।
(२) 'विवाहनिषेधो' क० ।
(३) 'पराशराद्याः' ग० टिप्पण्याम् ।

तद्विधिस्तु—'रविशन्योर्हस्ते वा*वरः संकल्प्य स्वस्तिवाचनं नान्दीश्राद्धं कृत्वाऽऽचार्यं वृत्वा आकृष्णेनेति छायायुतं सूर्यम(१)र्कं संपूज्य गुडौदनं दत्त्वा वस्त्रेण तन्तुभिरावेष्ट्य—

त्रिलोकवासिन्सप्ताश्व छायया सहितो रवे।
तृतीयोद्वाहजं दोषं निवारय सुखं कुरु॥

इति संप्रार्थ्य जलेन त्रिः सिञ्चेत्।

मम प्रीतिकरा येयं मया सृष्टा पुरातनी।
अर्कजा ब्रह्मणा सृष्टा अस्माकं प्रति रक्षतु॥
नमस्ते मङ्गले देवि नमः सवितुरात्मजे।
त्राहि मां कृपया देवि पत्नीत्वं म इहागता॥
अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च।
वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्धनः॥
तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय॥ इति।

तत आचार्यः 'काश्यपगोत्रामादित्यस्य प्रपौत्रीं सवितुः पौत्रीमर्कस्य पुत्रीमर्ककन्याममुकगोत्राय वराय दास्ये' इति वाग्दानं कृत्वा वरस्य मधुपर्कं कृत्वाऽन्तःपटं धृत्वा 'स्वस्तिन' इति सूक्तं जप्त्वा पूर्ववत्कन्यां दत्त्वा 'अर्ककन्यामिमां०' इत्यूहेन कन्यादानमन्त्रमुक्त्वा दक्षिणां दद्यात्। ततो गायत्र्या वेष्टितसूत्रेण बृहत्सामेति मन्त्रेण कङ्कणं बद्ध्वाऽर्कस्य चतुर्दिक्षु कुम्भेषु विष्णुं संपूज्याग्निं प्रतिष्ठाप्याघारान्ते सङ्गोभिरिति बृहस्पतये, यस्मै त्वा

सपुत्रायां तु भार्यायां मृतायां ब्राह्मणस्य तु।
प्रथमे न तु कर्त्तव्यो विवाहोऽशुभदो यतः॥

जीवन्त्यां प्रथमायां स्वस्य द्वितीयादिविवाहे नायं कालनियमः। *वर इत्यादि। अनावश्यकतया वरमधुपर्कादि नोक्तम्।

---

(१) 'सूर्यमर्कं' क०।

कामकामायेत्यृचाऽग्नये व्यस्तसमस्तव्याहृतिभिराज्यं हुत्वाचार्याय गोयुगं दत्वा—

मया कृतमिदं कर्म स्थावरेषु जरायुणा ।
अर्काऽपत्यानि नो देहि तत्सर्वं क्षन्तुमर्हसि ॥

इति नमेत' इति*दिक् ॥

इति निर्णयसिन्धौ विवाहप्रकरणं समाप्तम् ॥

अथाधानम् । रत्नमालायाम्—

रेवति
प्राजापत्ये पूषभे सद्विदैवे
पुष्ये ज्येष्ठास्वैन्दवे कृत्तिकासु ।
अग्न्याधानं ह्युत्तराणां त्रयेऽपि
चित्रादित्ये कीर्तितं गर्गमुख्यैः ॥

आश्वलायनः—“अग्न्याधेयं कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोरेतेषां कस्मिंश्चिद्वसन्ते पर्वणि ब्राह्मण आदधीत ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्यापकृष्टा यस्मिन्कस्मिंश्चिदृतावादधीत सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न न(१)क्षत्रम्”। सोमाधाने ऋत्वाद्यनालोचनमार्तपरम, ‘अथो खलु यदैवैनंश्रद्धापनमेदथादधीत सैवास्यर्द्धिरिति, (सो(२)मेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रं) तदेतदार्तस्यातिवेलं वा श्रद्धायुक्तस्य भवति’ इति बौधायनोक्तेरिति। मदनरत्ने वृद्धगार्ग्यः—

---

*दिगर्थस्तु—

चतुर्थे दिवसेऽतीते पूर्ववत्तां प्रपूज्य च ।
विसृज्य होममग्निं च विधिना मानुषीं पराम् ॥

इत्यादि प्रयोगरत्ने ।

---

(१) ‘कात्यायनसूत्र श्रीकामादीनामपि वर्षासूक्तम्’ इत्याधिकपाठतया निर्दिष्टं गटिप्पण्याम् । (२) कंसान्तर्गतं नास्ति क०

पुष्याग्नेयत्र्युत्तरादित्यपौष्ण-
ज्येष्ठाचित्रार्कद्विदैवेन्दुभेषु ।
कुर्युर्वह्न्याधानमाद्यं वसन्त-
ग्रीष्मोष्मान्तेष्वेव विप्रादिवर्णाः ।

कालादर्शे—

*अग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे ।
उपक्रम्य यथाकालमुपासीरन्द्विजातयः ॥
*सोमं च पशुबन्धं च सर्वाश्च विकृतीरपि ।
सौम्यायने यथाकालं विदध्युर्गृहमेधिनः ॥

अत्र विशेषः पूर्वमुक्तः ।

अग्निहोत्रकाल उक्तश्छन्दोगपरिशिष्टे—

उदितेऽनुदिते चैव समयाध्युषिते तथा ।
सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः ॥

ए(१)तेषां स्वरूपं तत्रैव—

रात्रेस्तु षोडशे भागे ग्र(२)हनक्षत्रभूषिते ।
(का(३)लं त्वनुदितं ज्ञात्वा होमं कुर्याद्विचक्षणः ॥
तथा प्रभातसमये नष्टे नक्षत्रमण्डले ।)
रविर्यावन्न दृश्येत समयाध्युषितं च तत् ॥
रेखामात्रं प्रदृश्येत रश्मिभिश्च समन्वितः ।
उदितं तद्विजानीयात्तत्र होमं प्रकल्पयेत् ॥

आश्वलायनः—*'उपोदये व्युषिते उदिते वा' । सायं

*अग्निहोत्रमिति । एतेऽग्निहोत्रादय उत्तरायणे एव कार्या इति नियमः । एवञ्चाधानेऽप्युत्तरायण एव सिध्यति । *सोमं चेति । पशुर्निरूढपशुभिन्नः, तस्य "पश्विन्या संवत्सरे प्रावृषि"इति कात्यायनेन वर्षासु विधानात् । *उपोदय इति ।

---

(१) 'एषां' क०
(२) 'ग्रहनक्षत्रमण्डले' क०
(३) कंसांतर्गतं नास्ति क०

तु स एव 'अस्तमिते होमः' इति। *गौणकालमाह स एव-*'प्रदोषान्तो होमकालः *सङ्गवान्तः प्रातः' इति। छन्दोगपरिशिष्टे—

प्रातर्होमे त्रयः प्रधानकालाः-उपोदये आदित्योदयसमीपे, व्युषिते उषसि, उदिते आदित्यमण्डले कृत्स्ने उदिते। अत्र उपोदये उदिते' इति नोक्तम्। उदिते आदित्ये सत्युदयसमीपे इत्याभ्यां पदाभ्यामेक एव कालो विहित इति भ्रमः स्यादतो मध्ये व्युषित इत्युक्तम्। तत्र रेखामात्रस्तूदितस्य पूर्वावधिः। उत्तरावधिमाह-कात्यायनः—

हस्तादूर्ध्वं रविर्यावद्गिरिं भित्त्वा न गच्छति।
तावद्धोमविधिः पुण्यो नान्योऽस्त्युदयहोमिनाम्॥ इति।

एवं यावद्रक्तिमा नापैति तावत्सायमिति। तत्रापि मुख्यकालावधिरुक्तो ग्राह्यः। *गौणकालमिति। 'तमतिनीय चतुर्गृहीतमाज्यं जुहुयात्' इति प्रायश्चित्तोक्तेः। *प्रदोषान्त इति। प्रदोषः प्रदोषान्तो यस्येति व्युत्पत्तेः। प्रदोषस्त्रिमुहूर्त्तः,

त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तङ्गते सति।

*सङ्गवान्त इति। सङ्गवः सङ्गवादिरन्ते यस्येति स इति। प्रातरपि त्रिमुहूर्त एव गौणकालः, न तु सङ्गवान्तावधिः,

पश्चादस्तमयात्कालो यो भवेत् त्रिमुहूर्तकः।
स सायं होमकालश्च प्रदोषान्त उदाहृतः॥
यस्तु षड्नाडिकः कालः पश्चादेवोदयाद्रवेः।
स होमकालो विप्राणां सङ्गवान्त इति स्मृतः॥

इति वाक्यात्। स्मृत्यर्थसारे तु—

प्रातर्होमे सङ्गवान्तः कालस्त्वनुदिते तथा।
सायमस्तमिते होमकालस्तु नवनाडिकः॥

इत्युक्तम्। प्रादुष्करणकालमाह कात्यायनः—

सूर्ये तु शैलमप्राप्ते षट्त्रिंशद्भिरिहाङ्गुलैः।
प्रादुष्करणमग्नीनां प्रातर्भासामदर्शने॥

*यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
न च लोहितिमापैति तावत्सायं तु हूयते ॥

औपासनेऽप्ये*वम् ‘तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ’ इत्याश्वलायनोक्तेः ॥

आश्वलायनः—‘पाणिग्रहणाद्धि गृह्यं परिचरेत् स्वयं पत्न्यपि वा पुत्रः कुमार्यन्तेवासी वा दत्तः’ ।

ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः।
एतैरेव हुतं यच्च तद्धुतं स्वयमेव तु ॥ इति ।

एतैश्च यजमानस्य पत्न्या वा तत्सन्निधौ च होतव्यम् । पर्वणि स्वयमेव होमः कार्यो नान्येन । प्रादुष्करणकालातिक्रमे व्याहृतिभिरेकाज्याहुतिः कार्या। अस्तमितावधिमाह-*यावदिति । [*एवमिति।] अग्निहोत्रधर्माणामयमतिदेशो न तु पाकयज्ञस्य, नापि प्राशनादीनाम्, प्रादुष्करणेत्यादिद्वयोरेव नियमात् ।

“हौम्यं च मांसवर्ज्यं कामं तु व्रीहियवतिलैः” इति गृह्यम् ।

पयोदधियवागूश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तथा तैलमापस्तानि दशैव तु ॥

इति हौम्यानि, तत्र मांसं वर्ज्यम् । कामपदं पयोदध्याद्यलाभे व्रीह्यादिप्राप्त्यर्थम् । ‘पयसा नित्यहोमः’ इति सूत्रात् तदलाभे च दध्यादि । पर्वणि च पयो नित्यम्। अत्र परिसमूहनपरिस्तरणपर्युक्षणानि कृत्वा होमद्रव्यस्य तूष्णीमग्निहोत्रवत्संस्कारं कुर्यात्। तत्र दधितण्डुलसोमतैलव्रीहियवतिलादेर्नाधिश्रयणम् ‘अधिश्रयणं स्मृतिसामर्थ्याभ्याम्’ इतिकातीयसूत्रात् । अतस्तदर्थं नाङ्गारपृथक्करणम् । तेन तत्र पर्यग्निकरणं प्रोक्षणं च द्वयमेव । सर्पिःपयोयवाग्वोदनादीनां तु श्रपणमितिविशेषः । सङ्ग्रहे—

द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः ।
अङ्गुल्यग्रैर्न होतव्यं न कृत्वाङ्गुलिभेदनम् ॥

अधिकमन्यतोऽवगन्तव्यम् ।

अथावसथ्याधानम् । पारस्करः-*'आवसथ्याधानं दारकाले, *दायाद्यकाल एकेषाम्' इति । दायाद्यकालो विभागकालः । मदनरत्ने व्यासः—

अग्निर्वैवाहिको येन न गृहीतः प्रमादिना ।
पितर्युपरते तेन ग्रहीतव्यः प्रयत्नतः ॥
योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते ।
अन्नं तस्य न भोक्तव्यं वृथापाको हि स(१) स्मृतः ॥

ज्येष्ठभ्रातरि पितरि वा साग्नौ कनिष्ठस्य पुत्रस्य वाग्न्यभावेऽपि न दोषः । तदाह तत्रैव गार्ग्यः-

पितृपाकोपजीवी वा भ्रातृपाकोपजीविकः ।
ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना ॥

गृहस्थस्याप्यध्ययनमाह सत्यव्रतः—

अनधीत्य द्विजो वेदं स्नात्वोद्वाह्य यथा तथा ।
अधीते ब्रह्मचर्येण साङ्गं वेदं गुरोर्गृहे ॥

इदं चा*धानं ज्येष्ठेऽकृताधाने न कार्यम् ।

*आवसथ्याधानं स्मार्त्तविशेषः । *दायाद्यकाले इति ।

कर्म स्मार्त्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
दायकालाहृते वापि, श्रौतं वैतानिकाग्निषु ॥

इति विनियोगवचने अपिशब्दात्प्रेते वा गृहपतावाहृते इत्युक्तम् । तेन स्मार्त्तकालत्रयम् । एतत्कालत्रयातिक्रमे प्रायश्चित्तं भवति । *आधानम् श्रौताधानम् । *स्मार्त्तेऽपीति । औपासनाग्निग्रहणेऽपीत्यर्थः । *आधानं गार्हपत्याधानम् । एतदेवाग्निहोत्रसंयोगः, अग्निहोत्रं संयुज्यतेऽनेनेतिव्युत्पत्तेः । 'अग्रजे सोदर्य' इत्यत्र पितृपितामहयोरुपलक्षणम् ,

ज्येष्ठो भ्राता यदा तिष्ठेत्पिता वाऽपि पितामहः ।
कनिष्ठपुत्रपौत्राणामाधानं नैव कारयेत् ॥

---

(१) 'संस्मृतः' ख०

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः, परिवित्तिस्तु पूर्वजः ॥

इति मनुशातातपोक्तेः । *स्मार्तेप्येवम् ।

सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसङ्ग्रहम् ।
आवसथ्यं तथा*धानं (१)पतितस्तु तथा भवेत् ॥

इति सौमन्तवात् । अकृताधाने इति शेषः । कनिष्ठादिर्न कुर्यादित्यर्थः; आर्त्विज्यरूपकारणस्य रागप्राप्तत्वात् । एवं सति तदुपादानं तत्कर्त्तुः प्रायश्चित्तलाभार्थम् । पितृमरणे पितामहे जीवति पौत्रस्याधिकारवारणार्थं पितामहपदम् । एवञ्च यत्र ज्येष्ठभ्रातृपितृपितामहानामन्यतमस्य न विवाहहोमः तत्र कनिष्ठपुत्रपौत्राणां न विवाहहोमः । गृहप्रवेशनीयहोमे तु न दोषः, तस्य गृह्यत्वार्थत्वात् । गृह्यं परिचरेदिति परिचर्यायामेव तदुपयोगः । परिवेत्तेतिसंज्ञा पर्याधातृपरिग्रष्ट्रोः समानप्रायश्चित्तार्था,

परिवेत्ता परिवित्तिर्यया च परिविद्यते ।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥

इति दोषस्मरणात् । याजकः विवाहहोमकारकः, आधानकारकः, यज्ञकारकादिश्च,

परीष्टिदोषसम्प्राप्तौ न यष्टव्यं कदाचन ।
दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसङ्ग्रहम् ॥
अग्निहोत्रं विवाहं च प्रयोगे प्रथमे स्थितम् ।
न कुर्याज्जनके ज्येष्ठे सोदरे वाऽप्यकुर्वति ॥

इति त्रिकाण्डमण्डनाभिधानात् । कृतपौर्णमासेष्टेर्भ्रात्रादेः कुताश्चित्प्रतिबन्धेनाकृतदर्शेष्टौ पित्रादौ जीवति पुत्रादेर्न दर्शेष्टिः । एवं कृताधानेऽकृताग्निहोत्रे च तत्र जीवति नाग्निहोत्रमित्युभयोपादानम् । एवमग्निहोत्रं सायंप्रातर्होमात्मकम्, तत्र सायंहोमोत्तरं

---

(१) 'पातितस्त्वन्यथा भवेत्' क० ।

इति तत्रैव गार्ग्योक्तेः। आज्ञायां त्वदोषमाह सुमन्तुः—

ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव चाश्रयेत्।
*अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा॥

वृद्धवसिष्ठः—

अग्रजस्तु यदाऽनग्निरादध्यादनुजः कथम्।
(१)अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि॥

हारीतः—

सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत्।
दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया॥

*अधिकारिणोऽपि भ्रातुरनुज्ञया कुर्यादिति मदनपारिजातः। विवाहस्त्वनुज्ञयापि नेत्यर्थः। सोदरोक्तेरसोदराणां सापत्नदत्तकादीनां *न दोषः। तदाह हेमाद्रौ वासिष्ठः-

---

कुतश्चित्प्रतिबन्धेन प्रातर्होमाकरणे न प्रातर्होमः। अन्यथा एककर्मत्वेऽपि दर्शपूर्णमासेष्ट्योरविशेषानुपपत्तिप्रसङ्गात्। एवञ्च विवाहोत्तरं प्रतिबन्धवशादगृहीतविवाहाग्नौ पौर्णमासस्थालीपाकोत्तरमकृतदर्शस्थालीपाकके विवाहहोमोत्तरमकृतौपासनहोमे सायमौपासनहोमोत्तरमकृतप्रातरौपासनकहोमके च न विवाहहोमदर्शस्थालीपाकौपासनहोमप्रातरौपासनहोमाः,

य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु।

इति वचनात्। गृहप्रवेशनीयहोमादौ तु न ज्येष्ठकरणापेक्षेत्युक्तं 'प्रयोगं प्रथमे स्थितम्' इत्युक्तेः। पुनराधानादौ सर्वत्रापि पित्रादेरकृतपुनराधानादित्वेऽपि पुत्रादेर्न दोषः। आधानपदं विवाहोपलक्षणम्। *अनुज्ञातस्त्वेति। अग्रजादेरधिकारासत्त्वे तदनुज्ञापेक्षावैयर्थ्यमालोच्याह—*अधिकारिणोऽपीति। आधानमिति शेषः। यत्र पित्रादिर्नास्तिकः अतः पुत्रादिनाऽऽधानं कृतं, पश्चादास्तिक्येन प्रायश्चित्तादि च, तत्रापि न दोष इत्येतल्लाभार्थमधिकारिण इत्युक्तम्। भार्यारहितादिर्नास्तिकश्चानधिकारी। *न दोष इति। यद्यविवाहितेन दत्तकेन औरसेन वा कथञ्चिद्दत्त-

---

(१) 'अग्रजानुमतं' ख०।

पितृव्यपुत्रान्सापत्नान्परनारीसुतांस्तथा ।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥

परनारीसुताः दत्तकादयः । देशान्तरे विशेषमाह स एव—'*अष्टौ दश द्वादश वर्षाणि (१)वा ज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः *प्रायश्चित्ती भवति' इति ।

क्लीबादावप्यदोषमाह कात्यायनः—

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्यानिष्ठांश्च पतितशूद्रतुल्यातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवा(२)मन*खञ्जकान् ।
अतिवृद्धान*भार्यांश्च कृषिसक्तान्नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा ।
कुटिलोन्मत्तचोरांश्च परिविन्दन्न दुष्यति ॥

आशार्केऽपि—

उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव वा ।
राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम् ॥

को गृहीतः तदा तस्य तज्जीवनावधि विवाहादौ नाधिकारः, एवं क्रमेण दत्तकत्रयस्थले मध्यमे मृतेऽपि दत्तके पितामहेऽनिविष्टे जीवति पौत्रस्यापीति पित्रुपेक्षा । *अष्टाविति । धर्मार्थमर्थार्थं च द्वादशवर्षप्रतीक्षा । कार्यान्तरार्थं तु अष्ट वा दश वा ।

द्वादशैव तु वर्षाणि न्यायाद्धर्मार्थयोगतः ।
न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनः ॥

इति स्मृतेः । *प्रायश्चित्तीति । इदं तु बोध्यम् । कनिष्ठेन विवाहे आधानादौ वा कृते प्रायश्चित्तानन्तरं ज्येष्ठस्य विवाहे आधानादौ वा न दोष इति । *षण्डकानिति । (३)खञ्ज-

---

(१) 'वा' नास्ति क० ।
(२) 'कुब्जवामनसंज्ञकान्' क० ।
(३) 'खोडकान्' ङ० ।

एवं ज्येष्ठे *छिन्नहस्तादावपि न परिवेत्तृत्वम्। तदाह त्रिकाण्डमण्डनः—

दर्शेष्टिं पौर्णमासेष्टिं सोमेज्यामग्निसंग्रहम्।
अग्निहोत्रं विवाहं च *प्रयोगे प्रथमे स्थितम्॥
न कुर्याज्जनके ज्येष्ठे *सोदरे चाप्यकुर्वति।
*क्षेत्रजादा*वनीजाने विद्यमानेऽपि सोदरे॥
नाधिकारविघातोऽस्ति भिन्नोदर्येऽपि चौरसे।
पङ्ग्वन्धमूकबधिरपतितोन्माददूषणे॥

कानिति वा पाठः। *अभार्यान् नैष्ठिकब्रह्मचारिणः। *छिन्नहस्तादाविति। नन्वत्र कुतो नाधिकार इति चेत्? आधानं हि नैमित्तिकं, तत्र 'आरोहतं दशनं शक्करीरनु' इति मन्त्रे दशाङ्गुलिभिररणिग्रहणमुक्तं तद्बाधप्रसङ्गात्। आदिना चतुरङ्गुलादिग्रहः। षडङ्गुलस्य त्वधिकारः, एकादशान्तर्दशसम्भवन्यायात्। एको हस्तः षडङ्गुलः, अपरस्तु चतुरङ्गुलः, तस्यापि नाधिकारः। यदङ्गुलित्वं, तस्या वस्तुत एकत्वाद्दशत्वापूरणात्। एवमाधानानन्तरं हस्तादिच्छेदेऽग्रिमेष्वधिकारः, नित्यत्वात्। एवं काणविकर्णादेरप्यधिकारः, हिरण्यकेशिना कर्माशक्तिहेतोरेवाङ्गवैकल्यस्य निषेधात्, "याज्यस्य प्रथमैस्त्रिभिः" इति ऊनाङ्गस्याप्यधिकारोक्तेः। *प्रयोगे प्रथमे स्थितमिति। तेन द्वितीयदर्शेष्ट्यादौ द्वितीयविवाहान्ते सर्वत्रापि अकृतपुनराधानादिके पित्रादौ जीवति पुत्रादेर्न दोषः। *सोदरे चेति। चकारात् पितामहग्रहः। *क्षेत्रजादाविति। अत्रौरसत्वस्य नान्वयो बाधात्। *अनीजाने यागमकुर्वति। क्षेत्रजादौ ज्येष्ठेऽनीजाने विद्यमाने जीवति एकमातृकतया सोदरे तत्कनिष्ठभ्रातरि नाधिकारविघातोऽस्तीत्येकोऽन्वयः, तेषां पितृत एवासोदरत्वात्। एवं भिन्नोदर्ये मातृतोऽप्यसोदरे दत्तकादौ ज्येष्ठेऽनीजाने विद्यमाने तत्कनिष्ठभ्रातरि औरसे नाधिकारविघातोऽस्तीति अपरः। तथाच तयोर्दर्शेष्ट्यादिविवाहा

संन्यस्ते छिन्नहस्तादौ यद्वा षण्ढादिदूषणे।
जनके सोदरे ज्येष्ठे कुर्यादेवेतरः क्रियाम्॥ इति,
'आरोहनं दशतं शक्करीर्मम' इत्याधाने मन्त्रवर्णाच्च।

न्तेषु सर्वेष्वपि न दोष इत्यर्थः। यत्तु—

भिन्नोदरे दत्तके च पितृव्यतनयेऽग्रजे।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥

इति प्रयोगपारिजाते गौतमवाक्यम्, तस्य दत्तकेऽग्रजे प्रतिग्रहीतुरौरसस्य न परिवेत्तृत्वमित्यर्थः। तत्रैव ज्येष्ठे सोदरेऽकृतविवाहाधाने तदनुजस्य दत्तकस्य विवाहाधानयोः परिवेत्तृत्वमेव। नन्विदं कथं, दानेन परपुत्रतां प्राप्तौ हि दातुः पुत्रत्वप्रयुक्तकार्यव्यावृत्तौ तत्पुत्राणामपि भ्रातृत्वप्रयुक्तविधिनिषेधयोरविषयत्वादिति चेत्? न,

"सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसङ्ग्रहम्।
आवसथ्यं तथाधानम्" इति निषेधात्॥

नचेदं दत्तकातिरिक्तपरम्, दर्शितत्रिकाण्डमण्डनादिति वाच्यम्, सोदरो हि त्रिविधः—एकमातृपित्रुभयजः, एकमातृमात्रजश्च, एकपितृमात्रजश्चेति। तत्र आद्य औरसः, द्वितीयः क्षेत्रजः, तृतीयो भिन्नोदर्यः। तत्रान्त्ययोः त्रिकाण्डमण्डनेनाधिकाराविघात उक्तः। 'क्षेत्रजादौ' इति 'भिन्नोदर्ये' इति चोक्तः। न तु प्रथमे, 'सोदर्ये तिष्ठति ज्येष्ठे' इति वचने हि समानमुदरं यस्येति सोदरः, स एव सोदर्य इति व्युत्पत्तेरभिन्नोदरोत्पन्नत्वलाभात्। उदरं च मातापित्रोः, मातापित्रुभयमेव वा। एवञ्च तादृशो निषेधस्य विषयः। अन्यादृशो मण्डनकारिकाविषयः। तथाच यथा दत्तककनिष्ठस्य दत्तकविवाहाधाने विना न तत्राधिकारः, एवं दत्तकस्य कनिष्ठस्य सोदरज्येष्ठेऽकृतविवाहाधाने न तत्राधिकार इति भावः। यत्तु महाभारतादावनिविष्टे युधिष्ठिरेऽर्जुनस्य द्रौपदीविवाहविलम्बनम्, तदर्जुनस्यानौरसत्वात्। सजातीयेष्वेव लाघवेन निषेधप्रवृत्तेः।

शाक्करीरङ्गुलीः । तन्त्ररत्नेऽप्युक्तम्–'अङ्गवैकल्यात्पूर्वमाहिताग्नित्वेऽधिक्रियेतैव नित्येषु । आधानं तु न कुर्यात्तस्य नैमित्तिकत्वात्' इति । एवं चतुरङ्गुलेऽपि (१)ज्येष्ठेऽनधिकारात्कनिष्ठस्य न दोषः षडङ्गुलकाणविकर्णादेस्त्वस्त्येवाधिकार इति (२)कनिष्ठस्य दोष एव, एकादशासु दशान्तर्गतेः । 'शरीरकार्श्यं वा विप्रतिषिद्धम्' इति हिरण्यकेशिसूत्रे कर्माशक्तिहेतोरेवाङ्गवैकल्यस्य निषेधात् । अत एव कात्यायनसूत्रे 'याज्यश्च प्रथमैस्त्रिभिर्गुणैः' इति न्यूनाङ्गस्याप्यधिकार उक्तः । अपरार्के उशनाः–

पिता *पितामहो यस्य अग्रजो वाथ कस्यचित् ।
तपोऽग्निहोत्रमन्त्रेषु *न दोषः परिवेदने ॥

*पितामह इति । तपः वानप्रस्थतासंन्यासौ आश्रमसमुच्चयपक्षे, पक्षान्तरे वानप्रस्थतैव । अग्निहोत्रं तदुपकारकमाधानं विवाहाग्निर्विवाहश्च । मन्त्रः वेदाध्ययनम्, तदुपकारकमुपनयनञ्च, एतत्रयानुरोधादनग्निमानिति त्रितयोपलक्षणम् । *न दोष इति । एतदनुज्ञापरम्, अकारणदोषाभावकथनविरोधात्सुमन्तुवाक्यैकवाक्यत्वाच्च । तथाच पित्रादिकेऽनग्निमत्यवानप्रस्थेऽनुपनीते वा जीवति पुत्रादित्रिकस्याधाने वानप्रस्थतायामुपनयने वाऽनुज्ञायां न दोष इत्यर्थः । तत्र वानप्रस्थता कलिवर्ज्यैव । पितृपितामहयोरनुपनयने व्रात्यस्तोमादिना तयोरुपनयनोत्तरं पुत्रादेरुपनयनं तद्योग्यताप्रायश्चित्तं कृत्वा कार्यम् । उपनयने वानुज्ञायाः कथमपि न सम्बन्धः, वाक्यान्तरे विवाहाधानयोरेव तत्सम्बन्धदर्शनात्तदेकवाक्यतयैव प्रकृते तयोरेव तल्लाभात् । यथा–अग्रजेऽनुपनीते कनिष्ठस्य नोपनयनं, तथा ज्येष्ठायां भगिन्यामनूढायां कनिष्ठस्य नोपनयनं कनिष्ठाया अनुद्वाहवत्, अन्यथाऽनौचित्यापत्तेः, विवाहस्यापि मन्त्रसाध्यत्वात् ।

---

(१) 'ज्येष्ठेऽनधिकारात्कनिष्ठस्य न दोषः' नास्ति ख० ग० ।

(२) 'इति कनिष्ठस्य दोष एव' नास्ति ख० ग० ।

पितुराज्ञायामप्यदोषमाह मदनरत्ने सुमन्तुः—

पित्रा यस्य तु नाधानं कथं पुत्रस्तु कारयेत् ।
अग्निहोत्रेऽधिकारोऽस्ति शङ्खस्य वचनं यथा ॥ इति ।

नाधानं नाधानं कृतमित्यर्थः । एतदाज्ञायामेवेति हेमाद्रिः । यत्तु—

*पितुः सत्यप्यनुज्ञाने नादधीत कदाचन । इति,

त*त्सत्यधिकारे ज्ञेयम् ॥

वैवाहिको विधिः स्त्रीणामौपनायनिकः परः ।

इति वाक्याच्चेति । अनुज्ञायामाधाने विशेषमाह पितुरित्यादिना । *पितुरिति ।

ज्येष्ठे श्रद्धाविहीने सत्याधानं तदनुज्ञया ।

इति पूर्वार्द्धम् । *सत्यधिकारे इति । पितुरधिकारे सत्यनुज्ञयाऽपि नाधिकारः, किन्त्वनधिकार एवेत्यर्थः । अत्राहुः—पित्रादि द्वेधा, अधिकारी अनधिकारी चेति । तत्र निषेधोऽविशेषात्सकलविषयः । प्रतिप्रसवस्तु अधिकारिणि पित्रादौ विशेषतो नास्त्येव । अनधिकारिण्यपि कादाचित्कनास्तिकत्वकादाचित्कान्धत्वादिके तत्र पुनःकरणसम्भावनायां पुत्रादेरनधिकार एव, अल्पबाधेनोपपत्तौ बहुबाधस्यान्याय्यत्वात् । जात्यन्धपतितादौ तु पित्रादावनधिकारिण्यपि तदाज्ञयैवाधानादावधिकारः । न्यायवचनसिद्धानधिकारोपजीवनेन तन्मनोनुकूलमात्रार्थतयाऽऽज्ञावाक्यस्यातिलाघवात् । अतिनास्तिकादौ तु पित्रादौ अत्यन्तनास्तिक्यादिना पुनः करणसम्भावनानिवृत्तावप्यग्रजाद्यनुमत्यैवाधिकारः । पितुस्त्वनुमत्यापि न, निषेधबाधकाज्ञावाक्यबाधकतया निषेधप्रतिप्रसवार्थत्वे लाघवात् । अत एव श्रद्धया विशेषेण हीने इत्युक्तम् । अत एव—

दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया ।

इति हारीतमपि एतद्विषयमेव । अथवाऽनुमत्या कनिष्ठे कु-

ताधानादौ पश्चान्नास्तिक्यान्निवृत्ते प्रायश्चित्तादिपूर्वकमाधानादौ प्रवृत्तेऽग्रजे विवाहाग्निहोत्रयोर्विशेषं वक्तुमिदं, पश्चाद्विवाहे दोष एव नत्वाधानादाविति । यदा तु कादाचित्कनास्तिक्येन पित्रादावाधानादिकरणसम्भावना तदाऽनुज्ञायामपि नाधिकारः । अधिकारिणि तु पित्रादौ दूरापास्त एवाधिकार इति । यागादावप्याज्ञायां न दोष इत्याह मण्डनः—

पिता यस्याग्रजो भ्राता न कुर्याद्वा पितामहः ।
तपोऽग्निहोत्रं यज्ञं वाऽऽज्ञया कुर्यात्कठाशयात् ॥ इति ।

क्वचित्त्वाज्ञां विनाऽप्यदोषः सुमन्तुनोक्तः—

व्यसनासक्तचित्तो वा नास्तिको वाऽथवाऽग्रजः ।
कनीयान्धर्मकामस्तु आधानमपि कारयेत् ॥ इति ।

अग्रज इति पित्रादेः, आधानमिति यागादेः, अथवेति जात्यन्धबधिरपङ्गुत्वादेश्चोपलक्षणमिति दिक् ।

ननु बह्वृचादीनां याजुषमाधानमेव न स्यात्,

ऊनो वाऽप्यतिरिक्तो वा यः स्वशाखोदितो विधिः ।
तेन सन्तनुयाद् यज्ञं न कुर्यात्पारतान्त्रिकम् ॥

इति पारतान्त्रिकनिषेधादिति चेत् ? मैवम्, 'अनुक्तमन्यतो ग्राह्यम्' इति वचनात्,

आत्मतन्त्रेषु यन्नोक्तं तत्कुर्यात्पारतान्त्रिकम् ।
विशेषाः खलु सामान्या वेदोक्ता वेदवादिभिः ॥

इति कार्ष्णाजिनिना यतो वेदोक्ता विशेषाः सामान्याः सर्वानुष्ठातृपुरुषसाधारणा इत्यभिधानेन बह्वृचादीनां याजुषाधानादेः छान्दोगौद्गात्रादेराथर्वणशान्त्यादेश्चाधिकारबोधनाच्च,

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि च ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥

इति हेमाद्रौ छन्दोगपरिशिष्टे दृष्टान्तप्रदर्शनाच्च । तत्रापि बौधायनमापस्तम्बं वा ग्राह्यम् ।

यजुषां बहुशाखात्वात्सन्देहे समुपस्थिते ।
कां शाखामवलम्बेरन् तादृशीं बह्वृचादयः ॥
आध्वर्यवं याजमानं ग्राह्यं बौधायनीयकम् ।
अन्यथा पतितो ज्ञेय इति बौधायनोऽब्रवीत् ॥ इति ।
आध्वर्यवं याजमानमाग्नीध्रं यच्च नोदितम् ।
तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥

इति च यज्ञकाण्डाभिधानात् । आग्नीध्रस्य ऋग्वेदमिश्रत्वात्तत्र याजुषभागत्यागशङ्कावारणाय तदुपादानम् ।

श्रौतं स्मार्त्तं च यत्कर्म स्वशाखायां न विद्यते ।
बौधायनोक्तं तद्ग्राह्यं बह्वृचादिभिरादरात् ॥

इति त्रिकाण्डमण्डनाच्च । स्मृतिसङ्ग्रहे—

वैतानिकाग्निकार्यं यत्स्वशाखायां न विद्यते ।
आपस्तम्बोदितं ग्राह्यं बह्वृचादिभिरादरात् ॥
बह्वृचस्सामगश्चापि कुर्यादाध्वर्यवादिकम् ।
आपस्तम्बेन वा प्रोक्तं तथा बौधायनेन वा ॥

यज्ञकाण्डे—

बह्वृचः सामगश्चापि स्वसूत्राभावतस्तथा ।
आपस्तम्बेन वा प्रोक्तमिति शातातपोऽब्रवीत् ॥

तत्र—

शाखिनामपि सर्वेषामभावे स्वप्रयोगिणाम् ।
आपस्तम्बोक्तमार्गेण कर्त्तव्यं पुनरब्रवीत् ॥

इति वचनाद्बौधायनाभावे आपस्तम्बं ग्राह्यम् । अभावे सान्निध्याभावे इत्यर्थात् अनिच्छायामित्यर्थाद्वा समविकल्पः । एतच्चोच्छिन्नपरम्परिकस्य नूतनपरिग्रहे एव

यद्यापस्तम्बशाखीयो भवेन्मातामहस्तदा ।
तत्र बौधायनाभावे तत्सूत्राधानमिष्यते ॥

इति च तादृशपरिग्रह एव । यस्यापस्तम्बीयपरम्पराऽस्ति,

परन्तु यदि तत्प्रयोक्ता न विद्यते, तदोक्तम्—

आपस्तम्बस्य चाभावे बौधायनमथापि वा ।

अन्यत्रापि—

आपस्तम्बादिभिरपि स्वसूत्राभावतस्तथा ।
बौधायनेन कर्त्तव्यमन्यथा पतितो भवेत् ॥ इति ।

एतेन—

पितृशाखां परित्यज्य पारक्यामधिगच्छति ।
स शूद्रवद् बहिष्कार्यः सर्वकर्मसु साधुभिः ॥
पारम्पर्यागतो येषां वेदः सपरिबृंहणः ।
तच्छाखाकर्म कुर्वीरन् तच्छाखाध्ययनं तथा ॥
न जातु परशाखोक्तं शाखारण्डादिकारणम् ।
येषां केषां च मर्त्यानां नान्यदध्वर्युरादिशेत् ॥
तेषां पुत्राश्च नप्तारः पतिताः स्युर्न संशयः ।

इति व्याख्यातम् । एतस्योक्तविषयत्वादनुक्तस्यान्यतो ग्रहे बाधकाभावात् । यस्य बह्वृचादेरापस्तम्बं पूर्वं परिगृहीतं तेन तत्प्रयोक्तृसत्त्वे बौधायनं न कार्यम्,

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यति ॥

इति मानवात् "यजनीयकल्पपरिग्रहे पूर्वपरिग्रहः प्रमाणं, तत्त्यागे दोषः, तदज्ञाने स्वेच्छया परिग्रहः" इति भरद्वाजसूत्रे पूर्वकल्पं परित्यज्य कल्पान्तरपरिग्रहे दोषोक्तेश्च । अस्यार्थः श्रौतसर्वस्वे ब्रह्मविद्यातीर्थकृता दर्शितः—पूर्वयोः पितृपितामहयोः पूर्वेषां त्रयाणां पित्रादीनां परिग्रहः पुत्रादेः परिग्रहे प्रमाणम् । एवं पूर्वस्य भ्रातुः पूर्वयोर्भ्रात्रोः पूर्वेषां वा भ्रातृणामिति कनीयसः पूर्वो वा स्वस्यैव परिग्रहः, प्राथमिकस्वपरिग्रह इति यावदिति । एषां च विग्रहक्रमेणानुक्रान्तानां विरोधे सर्वेषां सम्भूय प्रामाण्यं, विरोधे तु पूर्वं पूर्वं बलीयः । तथाच ज्ञायमानप्रपितामहपरिग्रहमा-

रभ्य ज्येष्ठपरिग्रहान्तानां मध्ये प्रपितामहपरिग्रहोऽवलम्बनीयः। प्रपितामहपरिग्रहोऽपि पूर्वाविरुद्धो ग्राह्यः। एवं क्रमेण स्वपरिग्रहपर्यन्तम्,

कल्पमेकं समाश्रित्य प्रवृत्तेऽपि च कर्मणि।
न मिश्रयेत्प्रयोगांस्तान्कल्पयोरव्यवस्थयोः॥

इति विष्णुस्वामिकारिकादर्शनात्।

स्वेन पित्रादिभिर्वाऽपि कल्पादिः पूर्वमादृतः।
स तु नैव परित्याज्य इति वेदानुशासनम्॥

इति छन्दोगपरिशिष्टात्। स्वेनेति पित्रादिभिरिति च पूर्वविरुद्धपित्रादिपरिग्रहाज्ञानविषयम्। तथाच पूर्वविरुद्धः पित्रादिपरिग्रहस्त्याज्यः। एवं तद्विरुद्धो ज्येष्ठपरिग्रहस्तदुभयाविरुद्धश्च स्वपरिग्रहोऽप्येवम्। तत्त्यागे दोष इति। तयोस्तस्य वा त्यागे त्यागपूर्वकान्यपरिग्रहे दोष इत्यर्थः,

स्वशाखां यः परित्यज्य परशाखां सुवर्त्तते।
आच्छेत्ता तस्य वंशस्य पतते रौरवं महत्॥

इति यज्ञपार्श्ववचनात्,

स्वशाखायाः परित्यागात्तथा शाखान्तरग्रहात्।
यो दोषः कथितस्तद्वत्कल्पान्तरपरिग्रहे॥

इति त्रिकाण्डमण्डनाच्च, शाखारण्डकल्परण्डयोः—

यः स्वशास्त्रं परित्यज्य परशास्त्रेण वर्त्तते।
भ्रूणहत्याकृतो दोषस्तस्य स्यान्नात्र संशयः॥

इति बौधायनेन तृतीयप्रश्ने भ्रूणहत्याप्रायश्चित्तोक्तेश्च। एवमेव यश्छन्दोगादिः कातीयकल्पेन वर्त्तते तस्य तत्त्यागे दोषो बोध्यः,

गुरुणाऽनुष्ठितं तन्त्रं तत्सूत्रेण समाचरेत्।
अन्यथा कर्महानिः स्यात्प्रायश्चित्ती भवेत्तु सः॥

इति यज्ञपार्श्ववचनाच्च। एवं सोमयागादावपि,

आधानं येन सूत्रेण तेनैवेत्यादिकाः क्रियाः।
अन्यथा यत्कृतं कर्म तत्फलं न प्रयच्छति॥

इति यज्ञपार्श्ववचनात् । एतच्च न केवलं बौधायनमात्रविषयं किन्तु यत्राश्वलायनशाङ्खायनादीनां द्राह्यायणकौथुम्यादीनां च मध्ये येन सूत्रेणाऽऽधानं तेनैव सूत्रेण सोमयाग इत्यपि। तेनाश्वलायनाद्यन्यतमानामेकतरसूत्रेणाधानानन्तरमपरसूत्रेण यागे दोषः। आध्वर्यवादि हौत्रादि औद्गात्रादि वाऽऽधानमारभ्य यज्ञान्तमेककल्पमालम्ब्य कार्यम् । यत्र तु तावत्पर्यन्तमेककल्पो नास्ति तत्र यावत्पर्यन्तमेव तत्कार्यं नाधिकमिति । तदज्ञाने स्वेच्छया परिग्रह इति, "वैकल्पिकेष्वात्मतुष्टिः" इति गौतमवचनात् । आद्याज्ञाने पूर्वपूर्वाविरुद्धप्रमाणभूतोत्तरोत्तराज्ञाने च स्वेच्छया बौधायनापस्तम्बकल्पयोरन्यतरो ग्राह्य इत्यर्थः। "ऊनो वाऽप्यतिरिक्तो वा" इति वचनं,

यः स्वशाखां परित्यज्य परशाखां समाश्रयेत् ।
अप्रमाणमृषिं कृत्वा सोऽन्धे तमसि मज्जति ॥

इति वचनं च विरुद्धानुष्ठाननिषेधार्थम्। अथवाऽयं भावः—कस्यांचिच्छाखायां बहुवित्तव्ययायाससाध्यत्वेन निर्णीतं यत्कर्म तदेव चेदन्यस्यां शाखायामल्पवित्तव्ययायाससाध्यत्वेन प्रसिद्धं, तत्र महाकर्मणः फलाधिक्यं मत्वा शाखान्तरदृष्टे तत्कर्मणि कश्चित्प्रवर्तेत, अलसस्तु पुनरल्पकर्मणि, तयोश्च स्वशाखोक्तकर्मपरित्यागः परोक्ताविहितकर्मनिष्पत्तिश्च स्यात् , तद्वारणाय 'ऊनो वा' इति, 'यः स्वशाखाम्' इति च । अत एव बैजवापः—

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥ इति ।

अत एव वसुधारादिकं बह्वृचैर्न क्रियते । तर्हि 'यन्नाम्नातं स्वशाखायाम्' इत्यस्य को विषयः ? यत्र प्रधानादिमात्रं किञ्चिदुक्तं तत्रावश्यकोऽङ्गकलापश्चेदविरुद्धस्तदा ग्राह्य इति । एवम्—

इष्टापूर्त्तादिकं कर्म स्वशाखोक्तं न विद्यते ।
तत्र बौधायनं ग्राह्यं बह्वृचादिभिरादरात् ॥

इत्युक्तेः रुद्रानुष्ठानादि बौधायनोक्तं कार्यं न कात्यायनाद्युक्तमिति।

अथ शूद्रसंस्काराः। यमः--

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः।
न केनचित्समसृजच्छन्दसा तं प्रजापतिः॥

छन्दसा मन्त्रेण। व्यासोऽपि--

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।
नामक्रिया निष्क्रमोऽन्नप्राशनं*वपनक्रिया॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥
त्रेताग्निसङ्ग्रहश्चैव संस्काराः षोडश स्मृताः।

इत्युक्त्वाह--

नवैताः कर्णवेधान्ता मन्त्रवर्जं स्त्रि(१)याः क्रियाः।
विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश॥ इति।

मदनरत्ने-हिरण्यगर्भदाने तु--

गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा।
कुर्युर्हिरण्यगर्भस्य ततस्ते द्विजपुङ्गवाः॥

इत्युक्त्वा-

जातकर्मादिकाः कुर्यात्क्रियाः षोडश चापराः।

इत्यत्र 'स्त्रियाः जातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाविवाहाः षट्, शूद्राणां तु षडेते पञ्चमहायज्ञाश्चेत्येकादश' इत्युक्तम्। रूपनारायणहरिहरभाष्ययोरप्येवम्। शार्ङ्गधरस्तु--

---

*वपनक्रिया। चौलम् 'संस्कारा नाममन्त्रतः' इत्युक्तं, तत्र स्वधास्वाहयोर्निषेधः। दिगर्थस्तु

गार्भैर्होमैर्जातकर्म चूडामौञ्जीनिबन्धनैः।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥

इति मनुवाक्ये द्विजग्रहणाद्धोमो द्विजानामेव न शूद्राणामित्या-

(१) 'क्रियाः स्त्रियाः' क०।

द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव हि ।
पञ्चैव मिश्रजातीनां संस्काराः कुलधर्मतः ॥
वेदव्रतोपनयनमहानाम्नीमहाव्रतम् ।
विना द्वादश शूद्राणां संस्कारा नाममन्त्रतः ॥

इत्याह । अपरार्कस्तु--

'गर्भाधानमृतौ पुंसः' इत्यत्राह-'एतच्चातुर्वर्ण्यपरं न द्विजातिमात्रपरम् । तथा सत्युपनयनं विधाय वाच्यं स्यात्' इति । तेन तन्मतेऽष्टौ भवन्ति । ब्राह्मे तु--

विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ।

इत्युक्तम् । अत्र सदसच्छूद्रगोचरत्वेन देशभेदाद्व्यवस्था । यत्तु मनुः—

न शूद्रे पातकं किंचिन्न च संस्कारमर्हति । इति ।

तदर्थमाह मेधातिथिः-'यत्सामान्यतो निषिद्धं स्तेयानृतादि न तदतिक्रमेऽस्य पापं यथा द्विजानाम् । उपनयनरूपं संस्कारं च नार्हति' इति । ते च तूष्णीं कार्याः,

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ।
वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥

इति व्यासोक्तेः,

अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ।

इति मरीच्युक्तेश्च । इयं परिभाषा सर्वार्था, तेन शूद्रधर्मेषु सर्वत्र विप्रेण मन्त्रः पठनीयः । सोपि पौराण एवेति शूलपाणिः । एवं स्त्रीणामपीति दिक् ।

इति रामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ
तृतीयपरिच्छेदे पूर्वार्धे संस्कारनिर्णयः ॥

अथ क्षुद्रकालाः । तत्र जलाशयस्य वरा(१)हः—

हस्ते चाम्बुपपौष्णकेशवमघामित्रोत्तरारोहिणी-
देवेज्येषु च शुक्रसौम्यशशभृद्वागीशवारांशके ।

---

(१) 'वाराहः' ख० ।

रिक्तां छिद्रतिथिं विहाय वृषभे नक्रे कुलीरे घटे
मीने कूपतडागकर्म मुनयः शंसन्ति शुद्धेऽष्टमे ॥
हस्तो मृ(१)गानुराधापुष्यधनिष्ठोत्तराणि रोहिण्यः ।
शतभिषगित्यारम्भे कूपानां शस्यते भगणः ॥

हेमाद्रौ भविष्ये—

तस्मिन्सलिलसंपूर्णे कार्तिके तु विशेषतः ।
मुनयः केचिदिच्छन्ति व्यतीते चो*त्तरायणे ॥
न कालनियमस्तत्र सलिलं तत्र कारणम् ॥

दीपिकापि—

*मार्तण्डेन्दूडुशुद्धौ मुरजिदशयने माघषट्कस्य शुक्ले
मूलाषाढोत्तराश्विश्रवण *गुरुकरे पौष्णशाक्रा(२)जचान्द्रे।
मैत्रे ब्राह्मे च पूर्णा*मदनरवितिथौ साद्वितीयातृतीये
कार्या तोयप्रतिष्ठा ज्ञगुरुसितदिने कालशुद्धे सुलग्ने ॥

वराहः—

आग्नेये यदि कोणे ग्रामस्य पुर(३)स्य वा भवति कूपः ।
नित्यं स करोति भयं दाहं च स मानसं प्रायः ॥
नैर्ऋत्ये बालभयं वनिताक्षयं च वायव्ये ।
दिक्त्रयमेतत्त्यक्त्वा शेषास्तु शुभावहाः कूपाः ॥

दि। 'एनः पापं शुक्रशोणितोभयसंसर्गादशुचित्वम्' इति मेधातिथिः। 'गोत्रव्याधिसङ्क्रान्तिनिमित्तमेनः, न पतितोत्पन्नत्वादि' इति विज्ञानेश्वरः।

*उत्तरायणे मकरसङ्क्रान्तौ। *मार्त्तण्डेति। सूर्यचन्द्रनक्षत्राणां बले, विष्णोः प्रबोधे। गुरुः पुष्यः, करो हस्तः, पौष्णं रेवती, शाक्रं ज्येष्ठा, आजं श्रवणम्, चान्द्रं मृगः, मैत्रम् अनुराधा, ब्राह्मं रोहिणी, पूर्णा पञ्चमी दशमी पूर्णिमा। *मदने-[illegible]। त्रयोदशीसप्तम्यौ।

) 'मघा' ख०। (२) 'शक्राप्य' ग०। (३) 'गृहस्य' क०।

वास्तुशास्त्रे—

भूतिं पुष्टिं पुत्रहानिं पुरन्ध्रो-
नाशं मृत्युं संपदं शत्रुबाधाम् ।
किञ्चित्सौख्यं शम्भुकोणादि कुर्यात्
कूपो मध्ये गेहमर्थक्षयं च ॥

उत्सर्गवि(१)धिश्चोक्तो बह्वृचपरिशिष्टे-*'अथातो वापीकूपतडागयज्ञं व्याख्यास्यामः पुण्येह्न्युदकसमीपेऽग्निं समाधाय वारुणं चरुं श्रपयित्वाज्यभागान्ते आज्याहुतीर्जुहुयात्-"समुद्रज्येष्ठा" इति प्रत्यृचं; ततो हविषाऽष्टौ-"तत्त्वायामि"इति पञ्च, "त्वं नो अग्ने" इति द्वे, इमं मे वरुण" इति च; स्विष्टकृतं नवमम् । मार्जनान्ते धेनुं तारयेत् । अथ(२)तीर्यमाणामनुमन्त्रयेत—

इदं सलिलं पवित्रं कुरुष्व
शुद्धाः पूता अमृताः सन्तु नित्यम् ।
मां तारयन्ती कुरु तीर्थाभिषेकं
लोकाल्लोकं तरते तीर्यते च ॥ इति ।

पुच्छाग्रान्वारब्ध उत्तीर्य "आपो अस्मान्मातरः शुन्धयन्तु" इति । अथापराजितायां दिश्युत्थापयेत् "सूयवसाद्भगवती"इति । हिङ्कृतं चेद् 'हिं कृण्वती'इति । अलंकृतां विप्राय दद्यादितरां वा शक्त्या दक्षिणाम् । तत उत्सृजेद्देवपितृमनुष्याः प्रीयन्तामिति । ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयीत इति । विस्तरस्तु मात्स्योक्तोऽस्मत्कृतजलाशयोत्सर्गविधौ ज्ञेयः । *कूपादेरुत्सर्गाकरणे दोष उक्तो भविष्ये--

*अथात इति । अयं संक्षेपेण विधिः । विस्तरेण तु मात्स्यादौ पूर्त्तकमलाकरादौ च द्रष्टव्यः । *कूपादेरिति । आदिना वाप्यादिग्रहः ।

---

(१) 'विधि' नास्ति क० ।   (२) 'तार्य' क० ।

सदा जलं पवित्रं स्यादपवित्रमसंस्कृतम् ।
कुशाग्रेणापि राजेन्द्र न स्प्रष्टव्यमसंस्कृतम् ॥

तथा--

वापीकूपतडागादौ यज्जलं स्यादसंस्कृतम् ।
अपेयं तद्भवेत्सर्वं पीत्वा चान्द्रायणं चरेत् ॥

अथ वृक्षारोपणम् । चण्डेश्वरः--

आदित्यचान्द्रपितृतिष्यविशाखपौष्ण-
मूलोत्तरात्रयतुरङ्गमवारुणाश्च ।
एतेषु तारकगणेषु हितं नराणां
वृक्षादिरोपणमिहोपदिशन्ति धीराः ॥

अथ मूर्तिप्रतिष्ठा । वसिष्ठः--

हस्तत्रये मित्रहरित्रये च
पौष्णद्वयादित्यसुरेज्यभेषु ।
तिस्रोत्तराधातृशशाङ्कभेषु
सर्वामरस्थापनमुत्तमं स्यात् ॥

मात्स्ये--

चैत्रे वा फाल्गुने वापि ज्येष्ठे वा माधवे तथा ।
माघे वा सर्वदेवानां प्रतिष्ठा शुभदा भवेत् ॥

नारदस्तु चैत्रं निषेधति-

विचैत्रेष्वेव मासेषु माघादिषु च पञ्चसु ॥ इति ।

तेनात्र विकल्पः(१) । अत्र माघमासो विष्णुप्रतिष्ठाव्यतिरिक्तविषयः;

माघे कर्तुर्विनाशाय फाल्गुने शुभदा भवेत् ।

इति विष्णुधर्मोक्तेरिति हेमाद्रिः । मा(२)त्स्ये--

दृढा धनकरी स्फीता तथा प्रतिपदि स्मृता ।

---

(१) इतोऽग्रे 'कालादर्शेऽपि केचिच्चैत्रं न मन्यन्ते । कारणतन्त्रेऽपि-विना चैत्रं तु माघादौ प्रतिष्ठा मासपञ्चके' इत्यधिकं क० ।

(२) 'विष्णुधर्मोत्तरे' क० ।

द्वितीयायां धनोपेता तृतीयायां धनप्रदा ॥
चतुर्थ्यां नाशमाप्नोति यमस्य स्यात्सुखावहा ।
विनायकस्य देवस्य तथा तत्र हितप्रदा ॥
पञ्चम्यां श्रीयुता कर्तुर्वरदा च तथा भवेत् ।
षष्ठ्यां लक्ष्मीयुता नित्यं सप्तम्यां रोगनाशिनी ॥
अष्टम्यां धान्यबहुला नवम्यां च विनश्यति ।
भद्रकाल्याः कृता तत्र कर्तुर्भवति तुष्टये ॥
धर्मवृद्धिकरी ज्ञेया दशम्यां तु तथा तिथौ ।
एकादश्यां तथा युक्ता द्वादश्यां सर्वकामदा ॥
त्रयोदश्यां तथा ज्ञेया चतुर्दश्यां विनश्यति ।
कृष्णपक्षे पञ्चदश्यां कर्तुः क्षयकरी भवेत् ॥
पञ्चदश्यां तथा शुक्ले सर्वकामकरी भवेत् ।
(१)आषाढे द्वे तथा मूलमुत्तरात्रयमेव च ।
ज्येष्ठाश्रवणरोहिण्यः पूर्वाभाद्रपदा तथा ।
हस्तोऽश्विनी रेवती च पुष्यो मृगशिरस्तथा ॥
अनूराधा तथा स्वाती प्रतिष्ठासु प्रशस्यते ।

श्रीपतिः—

रोहिण्युत्तरपौष्णवैष्णवकरादित्याश्विनीवासवा-
नूराधैन्दवजाविभेषु गदितं विष्णोः प्रतिष्ठापनम् ।
पुष्पश्रुत्यभिजित्सुरेश्वरकयोर्वित्ताधिपस्कन्दयो-
र्मैत्रे तिग्मरुचेः करे निर्ऋतिभे दुर्गादिकानां शुभम् ॥
गणपरिवृढरक्षोयक्षभूतासुराणां
प्रथमफणिसरस्वत्यादिकानां च पौष्णे ।
श्रवसि सुगतनाम्नो वासवे लोकपानां
निगदितमखिलानां स्थापनं च स्थिरेषु ॥
तेजस्विनी क्षेमकृदाग्निदाह-
विधायिनी स्याद्धनदा दृढा च ।

---

(१) इतः पूर्वं-'मात्स्ये' इत्यधिकं क० ।

आनन्दकृत्कल्पविनाशिनी च
सूर्यादिवारेषु भवेत्प्रतिष्ठा ॥

माधवीये वैखानसः—

मातृभैरववाराहनरसिंहत्रिविक्रमाः ।
महिषासुरहन्त्र्यश्च स्थाप्या वै दक्षिणायने ॥

वैशब्दोऽप्यर्थे ।

लिङ्गप्रतिष्ठायां विशेषो हेमाद्रौ लक्षणसमुच्चये—

उत्तराशागते भानौ लिङ्गस्थापनमुत्तमम् ।
दक्षिणे त्वयने पूज्य त्रिवर्षार्धे भयावहम् ॥
स्वगृहे स्थापनं नेष्टं तस्माद्वै *दक्षिणायने ।
स्थापनं तु प्रकर्तव्यं शिशिरादावृतुत्रये ॥
प्रावृषि स्थापितं लिङ्गं भवेद्वरदयो(१)गदम् ।
हेमन्ते ज्ञानदं चैव (२)शिशिरे सर्वभूतिदम् ॥

प्रवर्त्तयेद्देवभूतनृपितृब्रह्मपूर्वकान् ।
यज्ञान् यथोक्तविधिना ज्योतिष्टोमादिकानपि ॥

इत्युक्त्वा कूपादिलक्षणमुक्तं हरिणा—

द्वारहीनो भवेत्कूपो द्वारेणैकेन वापिका ।
नैकद्वारा पुष्करिणी दीर्घाकारा तु दीर्घिका ॥
कुल्याविस्रुततोयश्च तडागः परिकीर्त्तितः ।
एतदारामादिकं वा प्रपादिं वा प्रवर्त्तयेत् ॥
निन्देद्वा किन्तु तान् दृष्ट्वा नमस्कुर्यादलङ्घयन् ॥ इति ।

*दक्षिणायने इति । मुक्तिकामानां दक्षिणायने न दोषः,

श्रेष्ठोत्तरे प्रतिष्ठा स्यादयने मुक्तिमिच्छताम् ।
दक्षिणे तु मुमुक्षूणां मलमासे न सा द्वयोः ॥

इति वचनात् ।

---

(१) 'योगिदम्' क० ।

(२) 'शिशिरे सर्वभूतिदम । लक्ष्मीप्रदं वसन्ते च ग्रीष्मे च जयशान्तिदम् । यतीनां सर्वकाले च' 'ख' 'ग' पुस्तकयोर्नास्ति ।

लक्ष्मीप्रदं वसन्ते च ग्रीष्मे च जयशान्तिदम् ।
यतीनां सर्वकाले च लिङ्गस्यारोपणं मतम् ॥

रत्नावल्याम्—

माघफाल्गुनवैशाखज्येष्ठाषाढेषु पञ्चसु ।
मासेषु शुक्लपक्षेषु लिङ्गस्थापनमुत्तमम् ॥

विष्णोरप्याह तत्रैव वैखानसः—

मार्गशीर्षादिमासौ द्वौ निन्दितौ ब्रह्मणा पुरा ।
मासेषु फाल्गुनः श्रेष्ठश्चैत्रो वैशाख एव च ॥
वृषे वाप्यथवयुग्मासे श्रावणे मासि वा भवेत् ।

बौधायनसूत्रे विष्णुप्रतिष्ठामुपक्रम्य–'द्वादश्यां श्रोणायां वा यानि चान्यानि पुण्यनक्षत्राणि' इति । कृत्तिकादिविशाखान्तेष्वित्यर्थः । सर्वदेवेषु मासविशेषो हेमाद्रौ विष्णुधर्मे—

माघे कर्तुर्विनाशाय फाल्गुने शुभदा भवेत् ।
लोकानन्दकरी चैत्रे वैशाखे वरसंयुता ॥
आज्ञायुता सदा ज्येष्ठे आषाढे धर्मवृद्धिदा ।
श्रावणे धनहीना स्यात्प्रोष्ठपादे विनश्यति ॥
आश्विने नाशमाप्नोति वह्निना कार्तिके तथा ।
सौम्ये सौभाग्यमतुलं पौषे पुष्टिरनुत्तमा ॥
दोषान्विताधिमासे स्यात्कर्तुरात्मन एव च ॥ इति ।

अत्र श्रावणाश्विनयोर्निषेधो मार्गशीर्षविधिश्च विष्णुव्यतिरिक्तविषयः पूर्वोक्तवचनादिति हेमाद्रिः । माघश्रावणभाद्रपदानिषेधः शिवव्यतिरिक्तविषयः, तत्र तस्योक्तेः । देवीस्थापने तत्रैव विशेषो देवीपुराणे—

देव्या माघेऽश्विने मासे उत्तमा सर्वकामदा ।

तथा--

न तिथिर्न च नक्षत्रं नोपवासोऽत्र कारणम् ।
सर्वकालं प्रकर्तव्यं कृष्णपक्षे विशेषतः ॥

अन्यश्चात्र विचारो हेमाद्रौ ज्ञेयः । नारदः—

*हन्त्यर्थहीना कर्तारं मन्त्रहीना तु ऋत्विजम् ।
स्त्रियं लक्षणहीना तु न प्रतिष्ठासमो रिपुः ॥

अत्राधिकारिण उक्ताः कृत्यकल्पतरौ देवीपुराणे--

वर्णाश्रमविभेदेन देवाः स्थाप्यास्तु नान्यथा ।
ब्रह्मा तु ब्राह्मणैः स्थाप्यो गायत्रीसहितः प्रभुः ॥
चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।
भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ॥
मातरः सर्वलोकैस्तु स्थाप्याः पूज्याः सुरोत्तमाः ।
लिङ्गं गृही यतिर्वापि संस्थाप्य तु यजेत्सदा ॥

शिवसर्वस्वे भविष्ये--

यस्तु पूजयते लिङ्गं देवादिं मां जगत्पतिम् ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मत्परायणः ॥
तस्य प्रीतः प्रदास्यामि शुभाँल्लोकाननुत्तमान् ।

तिथितत्त्वे स्कान्दे--

शूद्रः कर्माणि यो नित्यं स्वीयानि कुरुते प्रिये ।
तस्याहमर्चां गृह्णामि चन्द्रखण्डविभूषिते ॥
ब्रह्मचारी गृहस्थो वा वानप्रस्थश्च सुव्रते ।
एवं दिने दिने देवं पूजयेदम्बिकापतिम् ॥
संन्यासी देवदेवेशं प्रणवेनैव पूजयेत् ।
नमोन्तेन शिवेनैव स्त्रीणां पूजा विधीयते ॥

---

*हन्तीति ।

अन्नहीनो दहेद्राष्ट्रं मन्त्रहीनस्तु ऋत्विजम् ।
श्रद्धाविहीनः कर्त्तारं नास्ति यज्ञसमो रिपुः ॥

इत्यादिकमपि द्रष्टव्यम् । श्रद्धा चेह भूयसीदानादिरूपा शास्त्रान्तरवशात् ।

एतच्च पुराणप्रसिद्धजीर्णलिङ्गपूजाविषयम् । यानि तु त्रिस्थलीसेतौ नारदीये--

यः शूद्रेणार्चितं लिङ्गं विष्णुं वा प्रणमेन्नरः ।
न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तायुतैरपि ॥
नमेद्यः शूद्रसंस्पृष्टं लिङ्गं वा हरिमेव वा ।
स सर्वयातनाभोगी यावदाचन्द्रतारकम् ॥
पाखण्डपूजितं लिङ्गं नत्वा पाखण्डतां व्रजेत् ।
आभीरपूजितं लिङ्गं नत्वा नरकमश्नुते ॥
योषिद्भिः पूजितं लिङ्गं विष्णुं वापि नमेत्तु यः ।
स कोटिकुलसंयुक्तमाकल्पं रौरवं वसेत् ॥

इत्यादीनि, तानि नूतनस्थापितलिङ्गादिविषयाणि ।

यदा प्रतिष्ठितं लिङ्गं मन्त्रविद्भिर्यथाविधि ।
तदाप्रभृति शूद्रश्च योषिद्वापि न संस्पृशेत् ॥

इति तत्रैवोक्तेः ।

प्रतिष्ठायां तु शूद्रादीनां नाधिकारः—

स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर ।
स्थापने नाधिकारोस्ति विष्णोर्वा शंकरस्य वा ॥
यः शूद्रसंस्कृतं लिङ्गं विष्णुं वापि नमेन्नरः ।
इहैवानन्तदुःखानि पश्यत्यामुष्मिके किमु ॥
शूद्रो वानुपनीतो वा स्त्रियो वा पतितोपि वा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥

इति बृहन्नारदीयस्कान्दोक्तेरिति त्रिस्थलीसेतौ पितामहचरणाः । चतुर्वर्णैरिति पूर्वोक्तवचनाद्विष्ण्वादिप्रतिष्ठायां शूद्रस्य विकल्प इति युक्तं पश्यामः । तत्रैव गौतमः—

शिवार्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः ।

वाचस्पति(१)धृतम्—

प्राक्पश्चिमोदगास्यस्तु प्रातः सायं निशासु च ।

इति प्रयोगपारिजाते । गृह्यपरिशिष्टे—

प्रतिमाः प्राङ्मुखीरुदङ्मुखो यजताऽन्यत्र प्राङ्मुखः।

एतच्च स्थिरप्रतिमाविषयम् । अन्यत्र (२)चलार्चासु ॥

अथ प्रतिमाः भार्गवार्चनदीपिकायां भविष्ये--

सौवर्णी राजती ताम्री मृन्मयी च तथा भवेत् ।
पाषाणधातुयुक्ता वा रीतिकांस्यमयी तथा ॥
(रीतिः पित्तलम् ।)

शुद्धदारुमयी वापि (३)देवतार्चा प्रशस्यते ।
अङ्गुष्ठपर्वादारभ्य*वितस्तिं यावदेव तु ॥
गृहेषु प्रतिमा कार्या नाधिका शस्यते बुधैः ॥

पञ्चरात्रे तु--

मृ*द्दारुलाक्षागोमेदमधूच्छिष्टमयी न तु ।

इति निषेध उक्तः । भागवते--

---

*वितस्तिमिति । तल्लक्षणं कोशे—

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ।
अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः ॥ इति ।

*दारुः काष्ठम् , लाक्षा प्रसिद्धा, गोमेदः प्रसिद्धः, मधूच्छिष्टं मधूत्ननाख्यं द्रव्यम् । हयशीर्षपञ्चरात्रे—

न कुर्याल्लक्षणोद्धारं रत्नजानां चलात्मनाम् ।
सुप्रभालक्षणं त्वेषां स्वर्णजानामपि द्विज ॥
तस्मान्न लक्षणोद्धारं कुर्यात्पाषाणलिङ्गवत् । इति ।

---

(१) 'धृतौ' क० 'मतम्' ख० ।
(२) 'चलनार्चासु' ख० ।
(३) देवतार्च्या' ख० ।

शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाष्ट(१)विधा स्मृता ॥

काष्ठं मधुकस्यैव,

तत्र काष्ठेषु मधुकमानीय च वसुन्धरे ।
कृत्वा तत्प्रतिमां चैव प्रतिष्ठाविधिनाऽर्चयेत् ॥

इति वाराहोक्तेः । देवीपुराणे--

सप्ताङ्गुलं समारभ्य यावच्च द्वादशाङ्गुलम् ।
गृहेष्वर्चा समाख्याता प्रासादे त्वधिका शुभा ॥

तिथितत्त्वे कालिकापुराणे--

प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्य देवस्य वा हरेः ॥
अन्येषामपि देवानां प्रतिमासु च पार्थिव ।
प्राणप्रतिष्ठा कर्तव्या तस्यां देव(२)त्वसिद्धये ॥
वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शश्वच्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत् ।
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च ।
अस्यै देवत्वमर्चायै (३)मामहेति च कश्चन ॥

हयशीर्षपञ्चरात्रे--

अर्चकस्य तपोयोगादर्चनस्यातिशायनात् ।
आभिरूप्याच्च बिम्बानां देवः सांनिध्यमृच्छति ॥

प्रयोगपारिजाते व्यासः--

प्रतिमापट्टयन्त्राणां नित्यं स्नानं न कारयेत् ।
कारयेत्पर्वदिवसे यदा वा मलधारणम् ॥

---

(१) 'विधा मता' क० ।
(२) 'देवस्य सिद्धये' क०
(३) 'मामहेति न कश्चन' क० ।

लिङ्गे विशेषास्तिथितत्त्वे भविष्ये--

मृद्भस्मगोशकृत्पिष्टताम्रकांस्यमयं तथा ।
कृत्वा लिङ्गं सकृत्पूज्य वसेत्कल्पायुतं दिवि ॥
वार्क्षं वित्तप्रदं लिङ्गं स्फाटिकं सर्वकामदम् ।
कृत्वा पूजय विप्रेन्द्र लप्स्यसे वाञ्छितं फलम् ॥

तत्रैव कालकौमुद्यां स्कान्दे—

अक्षादल्पपरीमाणं न लिङ्गं कुत्रचिन्नरः ।
कुर्वीता*ङ्गुष्ठतो ह्रस्वं न कदाचित्समाचरेत् ॥

अक्षोऽशीतिर्गुञ्जाः । 'गुञ्जाः पञ्चाद्यमाषकः । ते षोडशाक्षः कर्षोऽस्त्री' (अ०को०२-९-८६) इत्यमरकोशात् । प्रयोगपारिजाते क्रियासारे—

नवाष्टसप्ताङ्गुलिकं लिङ्गं श्रे(१)ष्ठमिहोच्यते ।
षट्पञ्चकचतुर्मानं मध्यमं त्रिविधं स्मृतम् ॥
त्रिद्व्येकाङ्गुलिमानं यत्त्रिविधं तत्कनीयसम् ।
एवं नवविधं प्रोक्तं चरलिङ्गं यथाक्रमम् ॥

अथ पञ्चसूत्रीनिर्णयः । गौतमीतन्त्रे—

लिङ्गमस्तकविस्तारो लिङ्गोच्छ्रायस(२)मो मतः ।
परिधिस्तत्त्रिगुणितस्तद्वत्पीठं व्यवस्थितम् ॥
प्रणालिका तथैव स्या*त्पञ्चसूत्रविनिर्णयः ।

---

*अङ्गुष्ठत इति । मन्त्रमहोदधौ--

अङ्गुष्ठादिवितस्त्यन्तं न न्यूनं नाधिकं क्वचित् ॥ इति ।

*पञ्चसूत्रेति ।

पञ्चसूत्रविधानं च कुर्याल्लिङ्गे शुभावहम् ।

इति वचनात्पञ्चसूत्रमावश्यकम् ।

पञ्चसूत्रविधानं च पार्थिवे न विचारयेत् ।
यथाकथञ्चिद्विधिना रमणीयं प्रकल्पयेत् ॥

---

(१) 'दीर्घमिहो' क० । (२) 'समन्वितः' क० ।

अत्रेदं तत्त्वम् । लिङ्गमस्तकविस्तारं लिङ्गोच्चतासमं कृत्वा तत्त्रिगुणसूत्रवेष्टनार्हं लिङ्गस्थौल्यं कृत्वा तत्समं वृत्तं चतुरस्रं वा पीठविस्तारमधश्चोर्ध्वं च कुर्यात् । पीठोच्चता तु लिङ्गोच्चतातो द्विगुणा । पीठमध्ये लिङ्गाद्द्विगुणस्थूलं पीठोच्चतातृतीयांशेन कण्ठं कृत्वा तस्योर्ध्वम् अधश्च समं वप्रद्वयं त्रयं वा कृत्वा लिङ्गविस्तारषष्ठांशेन पीठोपरि बाह्यमेखलां कृत्वा तदन्तःसंलग्नं तत्समं खातं कृत्वा पीठाद्बहिर्लिङ्गसमदीर्घां पीठार्धदीर्घां वा मूले दैर्घ्य(१)समविस्तारां तृतीयांशेन मध्ये खातां पीठवत्समेखलां प्रणालिकां कुर्यादिति । अत्र मूलं सिद्धान्तशेखरे शैवागमे च ज्ञेयम् ।

तिथितत्त्वे ब्राह्मे—

सर्वत्रैव प्रशस्तोऽब्जः शिवसूर्यार्चनं विना ।

तत्रैव वाराहपाद्मयोः—

गृहे लिङ्गद्वयं नार्च्यं शालग्रामद्वयं तथा ।

इति च । सिद्धान्तशेखरे-

लिङ्गं बाणादिकं कुर्यात्सप्तांशं वा त्रिभागकम् ।
पञ्चभागं द्विभागं वा यथायोगं यथास्थिरम् ॥
सप्तभागकृते लिङ्गे चतुरोंऽशान्निवेशयेत् ।
पीठमध्यगते गर्त्ते त्रिभागे चैकभागकम् ॥
पञ्चभागे तु भागांस्त्रीन् द्विभागेऽर्द्धं यथाक्रमम् ।
एवं बाणादिलिङ्गानां प्रवेशः श्रुतिचोदितः ॥
स्थूलं शिरः कृशं मूलमुन्नतं तन्मुखं भवेत् ।
निम्नपृष्ठमिति ख्यातं बाणरोहादिलिङ्गके ॥
अज्ञातमुखपृष्ठानां कन्यास्पृष्टं मुखं शिरः ॥ इति ।

---

(१) 'समविस्तरामग्रे तदर्धविस्तारां' क० ।

*द्वे चक्रे द्वारकायास्तु नार्च्ये सूर्यद्वयं तथा ॥
शक्तित्रयं तथा नार्च्यं गणेशत्रयमेव च ।
द्वौ शङ्खौ नार्चयेच्चैव भग्नां च प्रतिमां तथा ॥
नार्चयेच्च तथा मत्स्यकूर्मादिदशकं तथा ।
गृहेऽग्निदग्धा भग्नाश्च ना(१)र्चाः पूज्या वसुंधरे ॥
एतासां पूजनान्नित्यमुद्वेगं प्राप्नुयाद् गृही ।
शालग्रामाः समाः पूज्याः समेषु द्वितयं नहि ॥
विषमा नैव पू(२)ज्याः स्युर्विषमेष्वेक एव हि ।
शालग्रामशिला भग्ना पूजनीया सचक्रका ॥
*खण्डिता स्फुटिता वापि शालग्रामशिला शुभा ॥

वाराहे—

*दद्याद्भक्ताय यो देवि शालग्रामशिलां नरः ।
सुवर्णसहितां दिव्यां पृथ्वीदानफलं लभेत् ॥

तत्रैव—

यः पुनः पूजयेद्भक्त्या शालग्रामशिलाशतम् ।
तत्फलं नैव शक्तोऽहं वक्तुं वर्षशतैरपि ॥

*द्वे चक्रे द्वारकाया इति । स्वतन्त्रपूजायाम्—'चक्राङ्कमिथुनं पूज्यम्' इत्याग्रिमवाराहात् । *खण्डितेति । 'लग्नं भग्नं न पूजयेत्' इत्यस्य लग्नं लग्नचक्रं भग्नं भग्नचक्रमित्यर्थान्न विरोधः ।

शिलारूपी रमा प्रोक्ता चक्ररूपी जनार्दनः ।

इति विष्णुपुराणेन चक्ररूपेण हरेरुक्तेः चक्रेतरप्रदेशभङ्गेऽपि पूज्यत्वाच्च । स्कान्दे—

शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।
महापूजां तु कृत्वाऽऽदौ पूजयेत्तां ततो बुधः ॥

*दद्यादिति । दानमन्त्रः—

महाकोशनिवासेन चक्राङ्कैरुपशोभितः ।
अस्य देवस्य दानेन मम सन्तु मनोरथाः ॥ इति ।

---

(१) 'नार्च्याः' क० । (२) 'पूज्यास्तु' क० ख० ।

विष्णु(१)पुराणे--

*ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च पृथिवीपते ।
स्वधर्मतत्परो विष्णुमाराधयति नान्यथा ॥

*ब्राह्मणा इति । अधिकारिणः । यद्यप्यत्र पञ्चायतनपूजां वक्ष्यति, तथापि विष्णुपूजैव कार्या,

न विष्ण्वाराधनात् पुण्यं विद्यते कर्म वैदिकम् ।
तस्मादनादिमध्यान्तं नित्यमाराधयेद्धरिम् ॥
कलौ कलिमलध्वंसं सर्वपापहरं हरिम् ।
येऽर्चयन्ति नरा नित्यं तेऽपि वन्द्या यथा हरिः ॥ इति ।

आद्येन पुरुषार्थत्वं अन्त्येन समस्तपापनाशकत्वं च विष्णुपूजाया गम्यते । अथवा हरपूजा कार्या,

अथवा देवमीशानं भगवन्तं सनातनम् ।
आराधयेन्महादेवं भावपूतो महेश्वरम् ॥ इति ।
स्नानं सन्ध्यां ततो होमं गृहस्थोक्तेन वर्त्मना ।
कृत्वा सूर्यं गणपतिं दुर्गामीशं तथा हरिम् ॥
पौरुषेण तु सूक्तेन नित्यमर्चां समारभेत् ।

इति कौर्मात् पञ्चायतनपूजा वा कार्या । तत्र स्नानं शीतोदकेन नद्यादौ मुख्यम्, तदभावे उष्णोदकेन साशिरस्कम्, अशक्तस्य कण्ठस्नानम्,

अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।

इति वचनात् । मन्त्रस्नानादिकं च यथा—

आपोहिष्ठादिभिर्मन्त्रं, मृदालम्भं तु पार्थिवम् ।
आग्नेयं भस्मना स्नानं, वायव्यं गोरजः स्मृतम् ॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
अवगाहो वारुणं स्यान्मानसं विष्णुचिन्तनम् ॥
असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः ।

---

(१) 'देवीपुराणे' ख० ।

स्नानान्येतानि तुल्यानि मानसं श्रेष्ठमुच्यते ॥

तत्र मानसस्नानम्--

चतुर्भुजं महाकायं शङ्खचक्रगदाधरम् ।
मनसा ध्यायते विष्णुं मानसं स्नानमुच्यते ॥

अथवा कापिलं स्नानम्--

आर्द्रेण वाससा चाङ्गमार्जनं कापिलं मतम् ।

सारस्वतं स्नानमन्यत्र द्रष्टव्यम् । गायत्रस्नानं यथा--

गायत्र्या जलमादाय दशकृत्वोऽभिमन्त्र्य च ।
शिरश्चाङ्गानि सर्वाणि प्रोक्षयेत्तेन वारिणा ॥
स्नानं गायत्रकं नाम सर्वपापप्रणाशनम् ॥ इति ।

एवं गुरुपादोदकादिस्नानानि--

अशक्तानां तु मर्त्यानां गुरोः पादोदकं शुभम् ।
विप्रपादाद्विष्णुपादात्तुल्यं स्यात्सम्भृतं जलम् ॥
प्रोक्षणात्स्नानमाप्नोति ध्यानस्नानं विशिष्यते ॥ इति ।

ईदृशैर्गौणस्नानैर्जपादि कार्यं, न देवतार्चनादि,

प्रातः स्नातुमशक्तस्तु रोगाद्यैर्वा भयेन वा ।
पूर्ववस्त्रं परित्यज्य शुचित्वं सम्भवेत्तदा ॥
स च कर्मस्वनर्हः स्याद् भूतकृत्यार्चनादिषु ।
जपेत्सन्ध्यां तथा वेदान्सोऽध्ययीत यथाविधि ॥

इति आचार्यवचनात् । भूतकृत्यं वैश्वदेवः । आदिना ब्रह्मयज्ञतर्पणश्राद्धादिग्रहः ।

स्नात्वा पुण्ड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना ।
देवानभ्यर्च्य गन्धेन जलमध्ये जलेन तु ॥

कात्यायनः--

ऊर्ध्वपुण्ड्रं मृदा कुर्याद्भस्मना तु त्रिपुण्ड्रकम् ।
उभयं चन्दनेनैव अभ्यङ्गोत्सवरात्रिषु ॥

ब्रह्माण्डे--

ललाटे केशवं विद्यान्नारायणमथोदरे ।
माधवं हृदि विन्यस्य गोविन्दं कण्ठकूपके ॥
विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनम् ।
त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनम् ॥
श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः ।
पद्मनाभं पृष्ठदेशे ककुद्दामोदरं स्मरेत् ॥
मूर्ध्नि मूलेन मन्त्रेण शेषं द्वादशनामभिः ।
सङ्कर्षणादिभिः कृष्णे शुक्ले चेत्केशवादिभिः ॥ इति ।

अथ भस्मधारणम्—

अग्निहोत्रादिजं भस्म विरजाहोमजं तथा ।
औपासनसमुत्पन्नं समिदग्निसमुद्भवम् ॥
समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणाम् ।
शूद्राणां श्रोत्रियागारपचनाग्निसमुद्भवम् ॥
अन्येषामपि सर्वेषां धार्यं दावानलोद्भवम् ।
करोति शिवमन्त्रेण यस्त्रिपुण्ड्रं द्विजोत्तमः ॥
त्र्यक्षः शूलधरः सौम्यः शिवलोके महीयते ।
अष्टाक्षरेण मन्त्रेण यः करोति त्रिपुण्ड्रकम् ॥
विष्णोः पदमवाप्नोति नान्यथा श्रुतिचोदितम् ।
श्रौतं भस्म द्विजं मुख्यं स्मार्त्तं गौणं प्रकीर्त्तितम् ॥
औपासनसमुत्पन्नं गृहस्थानां विशेषतः ।
अग्निरित्यादिभिर्मन्त्रैः शुद्धं भस्माभिमन्त्रितम् ॥
शिवमन्त्रेण तद्धार्यं मन्त्रेणाष्टाक्षरेण वा ।
गायत्र्या वाऽथ देवर्षमन्त्रेण प्रणवेन वा ॥

अथ तद्विधिः—

वामहस्ततले भस्म क्षिप्त्वाऽऽच्छाद्यान्यपाणिना ।
अग्निरित्यादिमन्त्रेण स्पृशन्भस्माभिमन्त्र्य च ॥

धार्यं भस्म त्रिसंध्यं तु गृहिणा जलसंयुतम् ।

इत्यादि । कात्यायनः-

श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ।
धृतत्रिपुण्ड्रः पूतात्मा मृत्युञ्जयति मानवः ॥ इति ।

भस्माभिमन्त्रणमन्त्रस्य पिप्पलाद ऋषिः, रुद्रो देवता, गायत्री छन्दः, भस्मशुद्ध्यर्थं जपे विनियोगः । अग्निरिति भस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳ ह वा इदं भस्म मम एतानि चक्षूꣳषि भस्मानीति । विष्णुः-"स्नातः प्रक्षालितपाणिपादः शुचिर्बद्ध(१)शिखी दर्भपाणिराचान्तः प्राङ्मुख उदङ्मुखो वा देवताः पूजयेत्" इति ।

शिवार्चने सदाप्येवं शुचिः कुर्यादुदङ्मुखः । इति ।

अर्घदानादौ द्विराचमनं कार्यम्—

दाने भोजनकाले च सन्ध्ययोरुभयोरपि ।
आचान्तः पुनराचामेज्जपहोमार्चनेषु च ॥

इति व्यासोक्तेः । अगस्त्यसंहितायाम्—

केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ।
द्वाभ्यामोष्ठौ तु संमृज्य द्वाभ्यामुन्मार्जनं तथा ॥
एकेन हस्तं प्रक्षाल्य पादावपि तथैकतः ।
संप्रोक्ष्यैकेन मूर्द्धानं ततः संकर्षणादिभिः ॥
आस्यनासाक्षि कर्णौ च नाभिहृत्कं भुजौ स्पृशेत् ।
एवमाचमनं कृत्वा साक्षान्नारायणो भवेत् ॥ इति ।

शङ्खः—

तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम् ।
अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रे पुनः पुनः ॥
कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं तु तलेन वै ।

तलेन पाणितलेन ।

---

(१) 'शिरो' ख० ।

सर्वाभिस्तु ततः शीर्षं बाहू चाग्रेण संस्पृशेत् ॥

केशवादिभिरपः पीत्वा गोविन्दविष्णु इति करौ प्रक्षाल्य मधुसूदनत्रिविक्रमेति द्वाभ्यामङ्गुष्ठमूलेनोष्ठौ संमृज्य वामनश्रीधरेति द्वाभ्यां मुखमुन्मृज्य हृषीकेशेति वामकरं प्रोक्ष्य पद्मनाभेति पादौ प्रोक्ष्य दामोदरेति मूर्द्धानं प्रोक्ष्य संकर्षणेति संहतमध्यमाङ्गुलित्रयेणास्यं संस्पृश्य वासुदेवप्रद्युम्नेति द्वाभ्यामङ्गुष्ठानामिकाभ्यां चक्षुषी संस्पृश्याधोक्षजनारसिंहेति द्वाभ्यां तथैव श्रोत्रे संस्पृश्याच्युतेति कनिष्ठाङ्गुष्ठाभ्यां नाभिं संस्पृश्य जनार्दनेति पाणितलेन हृदयं संस्पृश्योपेन्द्रेति शिरः संस्पृश्य हरिकृष्णेति द्वाभ्यां दक्षिणवाहुमूले स्पृशेदिति । यद्वा, केशवादित्रिभिरपः पीत्वा गोविन्देति करौ प्रक्षाल्य अङ्गुष्ठप्रदेशिनीभ्यां घ्राणं स्पृशेत्, कराभ्यां विष्णुमधुसूदनेति, त्रिविक्रमवामनौ मुखपार्श्वयोरङ्गुष्ठमूलेन दक्षिणवामतः, श्रीधरेणोष्ठपुटावङ्गुष्ठमूलेन, हृषीकेशेत्यञ्जलिपुटं कृत्वा पद्मनाभेति पादौ स्पृष्ट्वा दामोदरेण मस्तके पञ्चाङ्गुलिना, संकर्षणेति (१)नासाबिलयोः करमुष्टिं कृत्वा दक्षिणवामनासापुटे वासुदेवप्रद्युम्नेति तर्जन्यङ्गुष्ठेन, दक्षिणवामनेत्रयोः अनिरुद्धपुरुषोत्तमावनामिकाङ्गुष्ठेन, दक्षिणवामनेत्रयोः अधोक्षजनारसिंहेति कनिष्ठिकाङ्गुष्ठेन, नाभिमूले अच्युतेति पञ्चाङ्गुलिना, करतलेन जनार्दनेति हृदि, तथैव मस्तके उपेन्द्रेति, पञ्चाङ्गुलिना हरिकृष्णेति दक्षिणवामांसयोः, सर्वत्र मध्ये मध्येऽपः स्पृशेत् इति पौराणाचमनम् ।

अथ स्मार्त्ताचमनं यथा--

कृत्वाऽऽदौ पादशौचं विमलमथ जलं त्रिः पिबेदुन्मृजेद्द्वि-
र्देशिन्यङ्गुष्ठयुग्मं सजलमभिमुखे नासिकारन्ध्रयुग्मम् ।
अङ्गुष्ठानामिकाभ्यां नयनयुगयुतं कर्णयुग्मं कनिष्ठा-
ङ्गुष्ठाभ्यां नाभिदेशे हृदयमथ तलेनाङ्गुलीभिः शिरोऽसौ ॥

अशक्तौ त्रिः पीत्वा हस्तौ प्रक्षाल्य मुखं प्रमृज्य खानि स्पृशेत् ।

---

(१) 'दरेतिपञ्चा' घ० ङ० ।

अत्यशक्तौ त्रिः पीत्वा हस्तौ प्रक्षाल्य श्रोत्रं स्पृशेत् ।

अथ श्रौताचमनम्—

गायत्र्यादित्रिभिः पीत्वा अब्लिङ्गैर्नवभिः स्पृशेत् ।
सप्तव्याहृतिभिः प्राणान् शिरोव्याहृतिभिस्तथा ॥
यद्वौङ्कारेणाचमनं यद्वा व्याहृतिभिर्भवेत् ।
सावित्र्या वापि कर्तव्यं यद्वा कार्यममन्त्रकम् ॥
भोजने जलपाने च शौचे रथ्योपसर्पणे ।
व्यवहारे तथाऽन्यत्र पौराणाचमनं मतम् ॥
स्मार्त्तमाचमनं प्रोक्तं स्नानसन्ध्यादिकर्मसु ।
श्रौतमाचमनं प्रोक्तं ब्रह्मयज्ञेन कुत्राचित् ॥ इति ।

कौर्मे—

देवार्चने जपे होमे संध्ययोः श्राद्धकर्मणि ।
स्नाने दाने व्रते यागे प्राणायामास्त्रयस्त्रयः ॥

(१)(मार्कण्डेयः—

सङ्कल्पं च यथा कुर्यात्स्नानदानव्रतादिकम् ।
अष्टाक्षरेण देवेशं नरसिंहमनामयम् ॥
गन्धपुष्पादिभिर्नित्यमर्चयेदच्युतं नरः ।)
अष्टाक्षरस्य मन्त्रस्य ऋषिर्नारायणः स्मृतः ॥
छन्दश्च देवी गायत्री परमात्मा च देवता ।
गन्धपुष्पादिसकलमनेनैव निवेदयेत् ॥

अथवा—

पञ्चाक्षरेण मन्त्रेण पत्रं पुष्पं फलं तथा ।
यः प्रयच्छति शर्वाय तदनन्तफलं स्मृतम् ॥

अथवा—

प्रणवादिनमोन्तं च चतुर्थ्यन्तं च सत्तम ।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्त्तितः ॥

---

(१) कंसान्तर्गतं नास्ति घ० ङ० ।

शौनकः—

प्रातर्मध्यंदिने सायं विष्णुपूजां समाचरेत् ।

सङ्ग्रहे—

(१)अर्घ्योदकं न्यसेद्वामे गन्धपुष्पादि दक्षिणे ।
अग्रेऽर्घ्यं पार्श्वतो दीपौ फलादीनि यथारुचि ॥

अन्यत्रापि स्ववामाग्रतः कलशः शङ्खघण्टे । 'येभ्यो माता' 'एवापित्रे' इतिमन्त्रद्वयं पूजाप्रारम्भे पठेत् "मनुष्यगन्धात्ते घाप्ये अन्तरदधत येभ्यो माता एवापित्रे" इति ब्राह्मणदर्शनात् । आग्नेये-

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ॥
अग्नौ क्रियावतां देवो दिवि देवो मनीषिणाम् ।
प्रतिमास्वल्पबुद्धीनां योगिनां हृदये रविः ॥
तस्य सर्वगतत्वाच्च हृदये भावितात्मनाम् ।

आवाहनं च—स्वहृत्कमले विष्णवादिकं स्वाभिलषितप्रकारेण ध्यात्वा भ्रूमण्डले विश्रमय्य ब्रह्मरन्ध्रं नीत्वा पुनर्हृदयमवरोप्य प्राणवायुना सहाकृष्य हस्तस्थपुष्पाञ्जलौ निधाय मूर्त्तौ स्थापनम् ।

स्थण्डिले निसमेवं स्यात्प्रतिमायां कृताकृतम् ।
चलायामचलायां तु शालग्रामशिलासु वा ॥
न कर्त्तव्यमिहाऽऽवाहप्रमुखं पूर्वमेव तत् ।
आदावन्ते च मन्त्राभ्यां पुष्पाञ्जलिसमर्पणम् ॥

नारदीये-

आवाहन ऋचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ।
यागे चोन्मुखताप्राप्त्यै अन्ते चोद्वासने ऋचा ॥ इति ।
तद्विष्णोरितिमन्त्रेण सूक्तेन पौरुषेण वा ।
नैवाभ्यां सदृशो मन्त्रो वेदे सूत्रश्च पावनः ॥

ऋग्विधाने—

अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥

---

१ 'अग्न्योदकं' ख० घ० ङ० ।

वक्ष्ये पुरुषसूक्तस्य विधानं ह्यर्चनं प्रति ।
आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ॥
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ।
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ॥
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत् ।
पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत् ॥
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा ।
नवमीं नाभिमध्ये तु दशमीं हृदये तथा ॥
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ।
त्रयोदशीं दक्षिणे तु तथाऽऽस्ये च चतुर्दशीम् ॥
अक्ष्णोः पञ्चदशीं चैव विन्यसेन्मूर्ध्नि षोडशीम् ।
यथा देहे तथा देवे न्यासं कुर्याद्विधानतः ॥
न्यासेन तु भवेत्सोपि स्वयमेव जनार्दनः ।
ब्राह्मणोस्येत्यादिकाभिर्ऋग्भिः पञ्चाङ्गकल्पना ॥
हृदयाय नमः पूर्वं शिरसे वह्निवल्लभा ।
शिखायै वषडित्युक्तं कवचायहुमीरितम् ॥
नेत्रत्रयाय वौषट् स्यादस्त्राय फडिति क्रमात् ।
षडङ्गमन्त्रानित्युक्तान् षडङ्गेषु नियोजयेत् ॥
पञ्चाङ्गनियमो यस्य तत्र नेत्रमतुं त्यजेत् ।
अङ्गहीनस्य मन्त्रस्य नैवाङ्गानि प्रकल्पयेत् ॥
एवं न्यासविधिं कृत्वा पश्चाद्यागं समारभेत् ।
आद्ययावाहयेद्देवमासनं तु द्वितीयया ॥
पाद्यं तृतीयया चैव चतुर्थ्याऽर्घ्यं प्रदापयेत् ।
पञ्चम्याचमनं दद्यात्षष्ठ्या स्नानं समाचरेत् ॥
सप्तम्या तु ततो वासो ह्यष्टम्या चोपवीतकम् ।
नवम्या गन्धमेवं तु दशम्या पुष्पकं तथा ॥
एकादश्या तथा धूपं द्वादश्या दीपमेव च ।

नैवेद्यं च त्रयोदश्या नमस्कारे चतुर्दशी ॥
प्रदक्षिणे पञ्चदशी मार्जने षोडशी तथा ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥
हुत्वा षोडशभिर्मन्त्रैः षोडशान्नस्य चाहुतीः ।
पुनः षोडशभिर्मन्त्रैर्दद्यात्पुष्पाणि षोडश ॥
तच्च सर्वं जपेद् भूयः पौरुषं सूक्तमुत्तमम् ।
षण्मासात्सिद्धिमाप्नोति एवमेव समर्चयन् ॥
स्नानं गन्धं धूपदीपं नैवेद्यं पञ्चधार्चनम् ॥ इति ।

ग्रन्थान्तरे–"नवम्याभरणं स्मृतम् । दशम्या गन्धदानं स्यादेकादश्या च माल्यकम् ॥ द्वादश्या धूपदानं स्यात् त्रयोदश्या च दीपकम् । चतुर्दश्या तु नैवेद्यं पञ्चदश्या नमस्क्रिया । उद्वासनं च षोडश्या उपचारांस्तु षोडश" इति । ग्रन्थान्तरे—

दक्षिणां तु यथाशक्त्या षोडशेन प्रदापयेत् ।
ततः प्रदक्षिणं कृत्वा जपं कुर्यात्समाहितः ॥

शौ(१)नकः–

यथाशक्ति जपित्वा च सूक्तं चास्मै निवेदयेत् । इति ।
अङ्गुष्ठाग्रे तु गोविन्दं तर्जन्यां तु महीधरम् ।
मध्यमायां हृषीकेशमनामिकयां त्रिविक्रमम् ॥
कनिष्ठिक्यां न्यसेद्विष्णुं करमध्ये तु माधवम् ।
एवं न्यासविधिं कृत्वा देहाङ्गन्यासमारभेत् ॥
मस्तके केशवं न्यस्य भाले नारायणं तथा ।
माधवं कर्णयोरक्ष्णोर्विष्णुं चैव तु नासयोः ॥
मुखे मधुसूदनं च कण्ठदेशे त्रिविक्रमम् ।
वामनं विन्यसेद्बाह्वोः श्रीधरं विन्यसेद्धृदि ॥
नाभ्यां विद्याद्धृषीकेशं कट्यां वै पद्मनाभकम् ।
दामोदरं पादयोश्च न्यासं द्वादशधा चरेत् ॥

---

(१) शौनकः' नास्ति ख० ङ० ।

एवं पुरुषसूक्तेन सर्वाङ्गन्यासमाचरेत् ॥ इति ।

स्कान्दे—

पञ्चाष्ट षोडश प्रोक्ताः द्वात्रिंशदुपचारकाः ।
गन्धपुष्पे धूपदीपौ नैवेद्यं पञ्चमं स्मृतम् ॥
प्रदाक्षिणां नमस्कारं ताम्बूलैः सह चाष्टकम् ।
आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ॥
स्नानं वस्त्रोपवीते च गन्धपुष्पे च धूपकम् ।
दीपो नैवेद्यमाख्यातं प्रादक्षिण्यनमस्कृती ॥
विसर्जनमिति प्रोक्ता उपचारास्तु षोडश ।
मधुपर्कस्त्वलङ्कारश्चाक्षताः शुद्धमिश्रिताः ॥
ताम्बूलं दक्षिणा चैव फलं नीराजनं तथा ।
मन्त्रपुष्पाञ्जलिस्तोत्रच्छत्रचामरवाहनम् ॥
नृत्यं गीतं च वाद्यं च पर्यङ्कमिति षोडश ।
आवाहनादिसंमिश्रा द्वात्रिंशदुपचारकाः ॥

प्रपञ्चसारे—

आसनस्वागते चार्घ्यपाद्ये चाचमनीयके ।
मधुपर्काचमस्नानवसनाभरणानि च ॥
सगन्धसुमनोधूपदीपनैवेद्यचन्दनान् ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥
अर्घ्यपाद्याचमनकमधुपर्कासनान्यपि ।
गन्धादयो निवेद्यान्ता उपचारा द(१)श क्रमात् ॥
गन्धादिका निवेद्यान्ता पूजा पञ्चोपचारिकी ।
सपर्या त्रिविधा प्रोक्ता तासामेकां समाचरेत् ॥ इति ।

अष्टादशपक्षे उपवीतानन्तरमाभरणानि, नैवेद्यानन्तरं माल्यानुलेपनं च द्रष्टव्यम् । अन्यत्रापि—

आसनाभ्यञ्जने तद्वदुद्वर्त्तननिरूपणे ।
संमार्जने सर्पिरादिस्नापनावाहने ततः ॥

---

(१) 'दश' नास्ति ङ० ।

पाद्यार्घ्याचमनीयं च स्नानं च मधुपर्ककम् ।
पुनराचमनीयं च वस्त्रयज्ञोपवीतके ॥
अलंकारो गन्धपुष्पे धूपदीपौ तथैव च ।
ताम्बूलानि च नैवेद्यं पुष्पमाला तथैव च ॥
अनुलेपं च शय्या च चामरव्यजने तथा ।
आदर्शनं तथा चैव नमस्कारोऽथ नर्त्तनम् ॥
गीतवाद्यादिदानानि स्तुतिहोमप्रदक्षिणम् ।
दन्तकाष्ठं प्रधूतं च ततो देवविसर्जनम् ॥
उपचारा इमे प्रोक्ताः षट्त्रिंशत्सुरपूजने ।

हेमाद्रौ—

आवाहनासने पाद्यमर्घ्यमाचमनं तथा ।
गन्धपुष्पं तथा धूपं दीपं च मधुपर्ककम् ॥
उपहारं तथाचामं स्नानं चाङ्गविभूषणम् ।
वस्त्रोपवीतमाचाममलंकारविलेपने ॥
गन्धपुष्पं तथा धूपदीपमञ्जनमेव च ।
आदर्शं मङ्गलं सर्वदेयं सर्वात्मना तथा ॥
होमं भोजनमाचाममलंकारास्तथा पुनः ।
गन्धादि च पुनर्दद्यान्मुखवासं प्रदक्षिणम् ॥
स्तुतिदण्डनमस्कारमात्मनो विनिवेदनम् ।
स्तुतिः वैदिकी पौराणिकी स्वकृता वा ॥

भार्गवार्चनदीपिकायां षष्टिरुपचाराः—

पूर्वं प्रबोधनं कुर्याज्जयशब्दांस्तथा पुनः ।
संस्कारं च ततः कुर्यात्ततो नीराजनं परम् ॥
ततो दिव्यासनं दद्यात्ततो वै दन्तधावनम् ।
पादप्रक्षालनं कुर्यात्ततोऽर्घ्यं वै प्रकल्पयेत् ॥
आचामं मधुपर्कं च पुनराचमनीयकम् ।
ततः सुगन्धितैलेन मर्दनं कारयेद्धरेः ॥

ततोऽभ्यङ्गं सुगन्धैस्तु कुर्यात्तैलापसारणम् ।
ततः पुण्योदकैः कुर्यादभिषेकं सुगन्धिभिः ॥
क्षीरेण दध्ना च तथा घृतेन मधुनापिच ।
शर्करया मन्त्रयुक्तैर्गन्धपुष्पोदकैरपि ॥
महाभिषेकमाचाममङ्गवस्त्रं ततोऽर्पयेत् ।
वाससी परिधानार्थमुपवीतं तथाचमम् ॥
गन्धमाभरणं पुष्पं धूपं नीराजनं तथा ।
दृष्ट्युत्तारणनैवेद्ये मुखवासं सुगन्धिभिः ॥
ताम्बूलं शयनं केशसाधनं वस्त्रदानकम् ।
किरीटचन्दने दद्यात्तत आभरणानि च ॥
पुष्पनीराञ्जनादर्शा मण्डपागमनं ततः ।
तत्रासनं पाद्यमर्घ्यमाचामं धूपदीपकौ ॥
नैवेद्यं च सताम्बूलं चन्द्रनीराञ्जनं तथा ।
चामरव्यजनं छत्रं पुरोगीतं मनोहरम् ॥
मृदङ्गादिस्वनं नृत्यं नमस्कारं प्रदक्षिणाम् ।
स्तुतिं कुर्यात्ततो विष्णोश्चरणौ मस्तके न्यसेत् ॥
निर्माल्यधारणं कुर्यान्नैवेद्यांशस्य भोजनम् ।
सेवामुद्दिश्योपविशेन्मञ्चके तूलिकां नयेत् ॥
सुखासनेन शयने नीत्वा तं तत्र शाययेत् ।
अर्चेत्कुसुमताम्बूलैः पादौ संवाहयेत्ततः ॥
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं ततः ॥ इति ।

ऋग्विधाने—

दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
(१) अर्चितं स्याज्जगदिदं त्रैलोक्यं सचराचरम् ॥

पाद्मे—

शालिग्रामशिलायां च नावाहनविसर्जने ।

---

(१) 'अर्जितं' ख० ।

आवाहनमृचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ॥
यागे चोन्मुखताप्राप्त्या अन्ते चोद्वासने ऋचा ।
वस्त्रमभ्युक्षणाच्छुध्येदपरं तु दिने दिने ॥
वस्त्रपदमलङ्काराद्युपलक्षणम् ,
न निर्माल्यं भवेद्वस्त्रं स्वर्णरत्नादिभूषणम् ॥

इति वचनात् । रत्नादिखचितमासनमन्यत्र बोध्यम् ।

पाद्यं श्यामाकदूर्वाब्जविष्णुक्रान्ताजलादिभिः ।
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ॥

अथार्घ्यः—तत्र शिवे—

आपः क्षीरं कुशाग्राणि अक्षता मधुतण्डुलाः ।
सिताश्च सर्षपाश्चैव अर्घोऽष्टाङ्गः प्रकीर्त्तितः ॥

विष्णौ तु—

अर्घं पुष्पाक्षतयवैः कुशाग्रतिलसर्षपैः ।
गन्धदूर्वाजलैः प्रोक्तं पाणौ वा मस्तकेऽपि वा ॥

शुद्धोदकेनाचमनम् । स्नानं वस्त्रं च, उभयत्राप्याचमनम् ।

अथ गन्धः—

गन्धेषु चन्दनं पुण्यं चन्दनादगुरुर्वरः ।
कृष्णागुरुस्ततः श्रेष्ठः कुङ्कुमं तु ततो वरम् ॥

गारुडे—

कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य तु ।
कुङ्कुमस्य त्रयश्चैव शशिनः स्याच्चतुः समम् ॥
कर्पूरचन्दनं दर्पः कुङ्कुमं च समांशकम् ।
सर्वगन्धसमं प्रोक्तं समस्तसुरवल्लभम् ॥

काशीखण्डे—

कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुङ्कुमस्य च(१) ।
चन्दनस्य त्रयो भागाः शशिनस्त्वेक एव तु ॥

---

(१) 'तु' घ० ङ०

यक्षकर्दम इत्येष सर्वदेवमनोहरः ।
कर्पूरमगुरुश्चैव कस्तूरी चन्दनं तथा ॥
कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ।

यत्तु—

दारिद्र्यं पद्मकं कुर्यादस्वास्थ्यं रक्तचन्दनम् ।
उशीरं चित्तविभ्रंशमन्ये कुर्युरुपद्रवम् ॥

इति निषेधः, स केवलपरः;

चन्दनागुरुकर्पूरकुङ्कुमोशीरपद्मकैः ।
अनुलिप्तो हरिर्भक्त्या वरान्भोगान्प्रयच्छति ॥

इति आग्नेये मिलितानां विधानात् । स्कान्दे—

चन्दनागुरुकर्पूरपङ्कं गन्धमिहोच्यते ।
चन्दनागुरुकर्पूरचोरकुङ्कुमरोचना ॥
जटामांसी कपियुता शक्तिगन्धाष्टकं मतम् ।

चोरः कचोरः ।

चन्दनागुरुह्रीबेरकुष्ठकुङ्कुमसेव्यकाः ।
जटामांसी मुरमिति विष्णोर्गन्धाष्टकं मतम् ॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमम् ।
कु(१)सीतं कोष्ठसंयुक्तं शैवगन्धाष्टकं मतम् ॥

शिवार्चनचन्द्रिकायां—

ह्रीबेरं चन्दनं कुष्ठमगुरुं कुङ्कुमं मुरम् ।
सेव्यकं च जटामांसी वैष्णवं तदुदीरितम् ॥

जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनम् ।
तमालागुरुकर्पूरैः शाम्भवं चाष्टगन्धकम् ॥

चन्दनागुरुकर्पूरैः केसरै रोचनान्वितैः ।
सशिल्हकजटामांसीसटीभिः शक्तिसम्भवम् ॥

---

(१) 'कुसीतं कोष्णसंयुक्तं' ख०

स्कान्दे—

यो ददाति हरेर्नित्यं तुलसीकाष्ठचन्दनम् ।
युगानि वसते स्वर्गे ह्यनन्तानि नरोत्तमः ॥
तुलसीदललग्नेन चन्दनेन जनार्दनम् ।
विले(१)पयेत्तु यो नित्यं लभते चिन्तितं फलम् ॥

गणपतिकल्पे—

शङ्खपात्रस्थितं गन्धं मन्त्रैर्दद्यात्कनिष्ठया । इति ।

अथ पुष्पम्—

शुद्धकाञ्चनपुष्पाणि रत्नमुक्ताफलान्यपि ।
सर्वाणि तुलसीपत्रकलां नार्हन्ति षोडशीम् ॥
उत्तमं तुलसीपुष्पं मध्यमं तुलसीदलम् ।
अधमं तुलसीपत्रं काष्ठचूर्णं ततोऽधमम् ॥
तुलसीमञ्जरीमालां विष्णवे यो निवेदयेत् ।
शालग्रामशिला येन पूजिता तुलसीदलैः ॥
स पारिजातमालाभिः पूज्यते सुरसद्मनि ।
श्यामापि तुलसी विष्णोः प्रिया गौरी विशेषतः ॥
तुलस्यौ पङ्कजे जात्यौ केतक्यौ करवीरकौ ।
शस्तानि दश पुष्पाणि तथा रक्तोत्पलानि च ॥
उत्पलानि च नीलानि कह्लारकुसुमानि च ।
मालतीकुन्दमन्दारनन्दावर्त्तादिकान्यपि ॥

पुष्पाध्यायादिग्रन्थान्तरे विस्तरः ।

अथ धूपः—

शङ्करस्याथवा विष्णोर्घृतयुक्तं च गुग्गुलम् ।
दद्याद्भक्त्या नरो यस्तु सर्वपापैः स (२)मुच्यते ॥

हारीतः—

सिहिकाक्षकणं दारुः सिह्लकं सागुरुं सितम् ।
शङ्खं जातीफलं श्रीगः प्रिया धूपा हरेरिमे ॥

---

(१) 'विलेपयति यो' ङ० (२) 'प्रमुच्यते' ङ०

३१३

रुहिका मांसी, कणो गुग्गुलभेदः, दारुः देवदारुः, सिह्लकं तुरुष्कं, सितः कर्पूरः, शङ्खं नखं, श्रीगश्चन्दनम् ।

विना मृगमदं धूपे जीवजातं विवर्जयेत् ।
महिषाख्यं गुग्गुलं च आज्ययुक्तं सशर्करम् ॥
धूपं ददाति राजेन्द्र नरसिंहाय भक्तिमान् ।
कृष्णागुरुसमुत्थेन धूपेन श्रीधरालयम् ॥
धूपयेद्वैष्णवो यस्तु स मुक्तो नरकार्णवात् ।

भविष्ये—

अगुरु चन्दनं मुस्ता सिह्लकं वृषणं तथा ।
समभागं तु कर्त्तव्यं धूपोऽयममृताह्वयः ॥
श्रीखण्डग्रन्थिसहितमगुरुं सिह्लकं तथा ।
मुस्ता तथेन्दुभूतेश शर्करा च दहेत्त्र्यहम् ॥
कृष्णागुरुं सिह्लकं च बालवं वृषणं तथा ।
चन्दनं तगरं मुस्ता प्रबोधः शर्करान्वितः ॥
कर्पूरं चन्दनं कुष्ठमुशीरं सिह्लकं तथा ।
ग्रन्थिकं वृषणं श्रीमं कुङ्कुमं गृञ्जनं तथा ॥
हरीतकी तथोशीरं यक्षधूप उदाहृतः ।
वृषणं सिह्लकं बिल्वं श्रीखण्डमगुरुं तथा ॥
कर्पूरं च तथा मुस्ता शर्करा सत्वचा द्विज ।
इत्येष विजयो धूपः स्वयं देवेन निर्मितः ॥
मधु मुस्ता घृतं गन्धो गुग्गुल्वगुरुशैलजम् ।
सरलं सिद्धासिद्धार्था दशाङ्गो धूप उच्यते ॥

मदनरत्ने—

त्रिभागकुष्ठो द्विगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः ।
हरीतकी सर्जरसश्च मांसी भागैकमेकं त्वथ शैलजस्य ॥
घृतस्य चत्वारि पुरस्य चैकं धूपो दशाङ्गः कथितो मुनीन्द्रैः ।

गन्धो मुस्ता, पुरो गुग्गुलुः ।

चन्द्रिकायां—

धूपस्य व्यजनेनैव धूपेनाङ्गविधूपने ।
नीराञ्जनेषु सर्वेषु विष्णोर्नामानि कीर्त्तयेत् ॥

नारसिंहे—

घृतेन वाथ तैलेन दीपं प्रज्वालयेन्नरः ।

तिलोद्भवं तैलम् । स्मृत्यर्थसारे—

नैवेद्यार्थं पृथक् भाण्डे स्नाता पत्नी पचेत्तथा ।
वैश्वदेवार्थमन्यस्मिन्व्यञ्जनानि पृथक् पृथक् ॥ इति ।
दरिद्रश्चेत्स्वभोज्यं यत्तदीशाय निवेदयेत् ।
अनिवेद्य हरे भुञ्जन्सप्त जन्मानि नारकी ॥

पाद्मे—

हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम् ।
नैवेद्यं देवदेवाय यावकं पायसं तथा ॥
यावद्भक्ष्यं भवेत्पुंसस्तावद्देयं जनार्दने ।
नैवेद्यवस्त्वलाभे तु तोयान्यपि निवेदयेत् ॥

सारे—

(१)मण्डले चतुरस्रे तु पात्रं संस्थाप्य यत्नतः ।
अस्त्रमन्त्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितम् ॥
धेनुमुद्रां प्रदर्श्याथ गन्धपुष्पैः प्रपूज्य च ।
देवे पुष्पाञ्जलिं दत्त्वा मन्त्रमेतमुदीरयेत् ॥
हेमपात्रस्थितं दिव्यं परमान्नं सुसंस्कृतम् ।
पञ्चधा षड्रसोपेतं गृहाणेमं सुसिद्धये ॥ इति ।

वैदिकमन्त्राभावेऽयं बोध्यः ।

प्रक्षिप्य तुलसीं प्रोक्ष्य वामाङ्गुष्ठेन संस्पृशेत् ॥

अत्र ग्रासमुद्रा दक्षिणेन कार्या । अथवा—

ग्रासमुद्रां वामदोष्णा विकचोत्पलसान्निभाम् ।
प्रदर्शयन् दक्षिणेन प्राणादीनां च दर्शयेत् ॥ इति ।

---

(१) 'मण्डपे' ख०

पुनराचमनं दद्यात्करोद्वर्त्तनमेव च ।
गण्डूषिकं जलं दत्त्वा दद्यादाचमनं ततः ॥
विष्वक्सेनोद्धवाक्रूरसनकाद्याः शुकादयः ।
श्रीकृष्णस्य प्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः ॥
बादरायणचण्डीशनन्दिभृङ्गिरिटादयः ।
सदाशिवप्रसादोऽयं सर्वे गृह्णन्तु शाम्भवाः ॥ इति ।
सकर्पूरं च ताम्बूलं दद्यान्नीराजनं तथा ।

चन्द्रिकायां—

लवङ्गजातीकङ्कोलचूर्णं क्रमुकखादिरम् ।
कर्पूरसहितं पत्रं ताम्बूलं च समर्पयेत् ॥

ताम्बूलीपत्राणि च श्वेतानि देयानि,

श्वेतपत्रं च चूर्णं च क्रमुकस्य फलानि च ।
नारिकेलफलोपेतं मातुलिङ्गसमायुतम् ॥
एलाकङ्कोलकर्पूरैर्मुखवासं प्रचक्षते ।

इति वचनात् । अशक्तं प्रति—

महापिप्पलपत्राणि क्रमुकस्य फलानि च ।
शुक्तिक्षारेण संयुक्तं ताम्बूलमिति कीर्त्तितम् ॥

इति वचनात् । संख्यामाह भरद्वाजः—

क्रमुकस्य फलान्यष्टावनुच्छिष्टानि सन्ति च ।
पत्राणि नागवल्ल्याश्च द्विगुणं शुक्तिचूर्णकम् ॥
कर्पूरसहितं यत्तत्ताम्बूलमिति भाषितम् ।

अथवा—

सुपूगं सप्तपत्रं च चूर्णेन च समन्वितम् ।
अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद् बुधः ॥
एकपूगं सुखारोगं द्विपूगं निष्फलं भवेत् ।
अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्यति ॥
अस्यालाभे यथालब्धं पत्रं क्रमुकचूर्णकम् ।
ताम्बूलं भावयेच्छुद्धं यत्तन्नयनवल्लभम् ॥

स्कान्दे—

ताम्बूलं दक्षिणा चैव फलं नीराजनं तथा ।
मन्त्रपुष्पाञ्जलिस्तोत्रच्छत्रचामरवाहनम् ॥
महानीराजनं श्रीमन्मङ्गलेशाय कल्पयेत् ।
कर्पूरेण तु यः कुर्याद्भक्त्या केशवमूर्द्धनि ॥
आरातक मुनिश्रेष्ठ प्रविशेद्विष्णुमव्ययम् ।
उत्थायोत्थाय कर्त्तव्यं प्रणामं दण्डवद् भुवि ॥
न देवं पृष्ठतः कृत्वा प्रणामं क्वचिदाचरेत् ।
वरमुत्थाय कर्त्तव्यं न वृथा भ्रमणं चरेत् ॥

दक्षिणे भागे नमस्कारः कार्यः,

अग्रे पृष्ठे वामभागे समीपे गर्भमन्दिरे ।
जपहोमनमस्कारान्न कुर्वीत कदाचन ॥

इति निषेधात् । (१)शिवे तु पुरतोऽपि—

शंभोः पशुपतेरग्रे दण्डवत्पतितो भुवि ।
पतन्ति पातकाः सर्वे नोत्तिष्ठन्ति कदाचन ॥

इति वचनात् । वाराहे—

वस्त्रप्रावृतदेहस्तु यो नरः प्रणमेत माम् ।
सदा स जायते मूर्खः सप्तजन्मनि भामिनि ॥

अन्तरीयान्यद्वस्त्रमिह धर्त्तव्यं योग्यत्वात् ।

नमस्कारेण चैकेन अष्टाङ्गेन हरिं स्मरेत् ।
सूर्याभिवन्दनं कुर्यादुत्थायोत्थाय दण्डवत् ॥
प्रदक्षिणं न कुर्वीत पुरतः पृष्ठदर्शनात् ॥

नमस्कारानन्तरं प्रादक्षिण्यं ।विनैव नमस्कारान्तरं कार्यमित्यर्थः । "न वृथा भ्रमणं चरेत्" इतिवचनाच्च । अष्टाङ्गो वा कार्यः ।

दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा तथा ।
मनसा वचसा भक्त्या प्रणामोऽष्टाङ्ग ईरितः ॥

---

(१) 'शिवेऽपि' घ० ङ०

ग्रन्थान्तरे—

उरसा शिरसा दृष्ट्या मनसापि धिया तथा ।
पद्भ्यां कराभ्यां वाचा च प्रणामोऽष्टाङ्ग ईरितः ॥
पद्भ्यां कराभ्यां शिरसा पञ्चाङ्गा प्रणतिः स्मृता ।

(१)यद्वा—

शिरो हस्तौ च जानू च चिबुकं बाहुकद्वयम् ।
पञ्चाङ्गस्तु नमस्कारो विद्वद्भिः समुदाहृतः ॥

भविष्ये—

जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं देवेशे सर्वान्कामानवाप्नुयात् ॥

असम्भवे (२)केवलाभ्यां कराभ्यां कार्यः ।

एकहस्तनमस्कारं एका चैव प्रदक्षिणा ॥
अकालदर्शनं चैव हन्ति पुण्यं पुराकृतम् ॥

इति चन्द्रिकाधृतवचनात् । चन्द्रिकायां—

ततः प्रदक्षिणं कुर्याद्वामं जयजयस्वनैः ।
चक्रवद् भ्रामयेदङ्गं पृष्ठतोऽङ्गं न दर्शयेत् ॥

नारदीये—

पदान्तरे पदं न्यस्यन् हस्तौ चलनवर्जितौ ।
स्तुतिर्वाचि हृदि ध्यानं चतुरङ्गप्रदक्षिणम् ॥

स्कान्दे—

प्रदक्षिणं प्रकुर्वीत शतमष्टोत्तरं सदा ।
तिस्रः सर्वेषु देवेषु सूर्ये सप्त प्रकीर्त्तिताः ॥
विष्णौ चत्वारि वा त्रीणि दुर्गाया एकमेव हि ।
प्रदक्षिणात्रयं कुर्याच्छिवस्यायतने नरः ॥
एकां चण्ड्यां रवौ सप्त तिस्रः कुर्याद्विनायके ।

'एका चैव प्रदक्षिणा' इति अपराधान्तर्गतं तु देवीभिन्नपरम् ।

---

(१) 'यद्वा' नास्ति घ० ङ०
(२) 'असम्भवे मुकुलिताभ्यां कराभ्यां' घ० ङ०

परिशिष्टे तु—

एकां विनायके कुर्याद्द्वे सूर्ये त्रीणि शंकरे ।
चत्वारि केशवे कुर्यात्सप्ताश्वत्थे प्रदक्षिणाः ॥ इति ।

पौरुषसूक्तं जपस्तोत्रादि चोक्तम् । पारिजाते—

जानुभ्यां धरणीं गत्वा मूर्ध्ना हरिमथो (१)वदेत् ।

तत्र मन्त्रः—

भगवन्देवदेवेश पुरुषोऽसि सनातन ।
क्षमस्व पुण्डरीकाक्ष भक्तस्य तु विशेषतः ॥
ज्ञानतोऽज्ञानतो वापि कृतं न्यूनाधिकं मया ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जनार्दन ॥

ततः—

मा(४) मकीनं च सकलं हरये तुभ्यमर्पये ।

इति संकल्पात्मकं स्वात्मार्पणम्,

(४)मामकीनं च सकलं हरये सम्यगर्पयेत् ॥

इति वचनात् ।

ॐतत्सदिति संप्रोक्तो मन्त्रः स्वात्मसमर्पणे ।

ततः सजलं शंखं नीराजयेत्,

शङ्खमध्यस्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नमनुष्याणां ब्रह्महत्याऽयुतं दहेत् ॥

इति लिङ्गात् । एतद्वचनादेव शिरआद्यङ्गप्रोक्षणमपि हस्तेन कार्य

हस्तेन प्रोक्षणं कृत्वा हत्याकोटिविनाशनम् ।

इति वचनात् ।

भ्रामयित्वा हरेर्मूर्ध्नि मन्दिरं शंखवारिणा ।
प्रोक्षयेद्वैष्णवो यस्तु नाऽशुभं तद्गृहे वसेत् ॥ इति ।

गृहप्रोक्षणमपि हस्तेनैव, दृष्टन्यायात् । नारदीये-

उदकं चन्दनं चक्रं शंखं च तुलसीदलम् ।

---

(१) 'वहेत्' घ० ङ०

(४) 'मामदीयं' घ० ङ०

घण्टां पुरुषसूक्तं च ताम्रपात्रम(१)थाष्टमम् ॥
शालग्रामशिला चैव नवभिस्तीर्थमुच्यते ।

अथ तीर्थग्रहणं चन्द्रिकायाम्—

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् ।
तदेवाष्टगुणं पापं भूमौ बिन्दुनिपातनात् ॥

तच्च पात्रेणैव कार्यम्,

यः पादसलिलं विष्णोः करेण पिबते यदि ।
स मूढो नरकं याति यावदिन्द्राश्चतुर्दश ॥

इति भविष्ये करस्य निषेधात् ।

शालग्रामशिलातोयं पिबेद्यः सकरेण तु ।
अज्ञानादैन्दवं प्रोक्तं ज्ञानादब्दं समाचरेत् ॥
श्रीविष्णोः पादसलिलं करे कृत्वा मुखे क्षिपेत् ।
अदत्त्वा पिबते यो वै रौरवे नरके वसेत् ॥

इत्यत्र तु मुखे क्षेपणं न तु पानमिति न तद्विरोधः । एवं—

धारयेन्मूर्ध्नि बालिश्याद्ब्रह्महा स निगद्यते ।

इति वचनं तु चन्द्रिकायां विवृतम्—

शालिग्रामशिलातोयमपीत्वा यस्तु मस्तके ।
प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥ इति ।

तत्र मन्त्रः—

देवदेव जगन्नाथ शङ्खचक्रगदाधर ।
देहि विष्णो ममानुज्ञां तव तीर्थनिषेवणे ॥

तत्र वैदिको मन्त्रः-तदस्य प्रियमभि पाथो अस्यां नरो यत्र देवयुवो मदान्ति । उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ अथ पौराणो मन्त्रः—

अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥

---

(१) 'मथाष्टकम्' ख० ।

प्राश्नीयात्प्रोक्षयेद्देहं पुत्रमित्रपरिग्रहम् ।
कृत्वा पादोदकं शङ्खे वैष्णवानां महात्मनाम् ॥
तुलसीमिश्रितं दद्यात् पिबेन्मूर्ध्नाऽभिवन्दयेत् ।
आयसे च तथा कांस्ये काष्ठेऽलाबुमये तथा ॥
उद्धृत्य पादसलिलमघतुल्यं विनिर्दिशेत् ।
विष्णोः पादोदकं पीत्वा पश्चादशुचिशङ्कया ॥
आचमेद्यो ह्यपो मोहाद्ब्रह्महा स निगद्यते ।
विष्णुपादोदकात्पूर्वं विप्रपादोदकं पिबेत् ॥
विरुद्धमाचरेन्मोहाद्ब्रह्महा स निगद्यते ।

तत्र मन्त्रः—
पृथिव्यां यानि तीर्थानि तानि तिष्ठन्ति सागरे ।
ससागराणि तीर्थानि पदे विप्रस्य दक्षिणे ॥ इति ।
पादोदकं च निर्माल्यं नैवेद्यं च विशेषतः ।

तत्र मन्त्रः—
नैवेद्यं शिरसा नत्वा श्लोकमेतमुदीरयेत् ।
यस्योच्छिष्टं हि वाञ्छन्ति ब्रह्माद्या ऋषयोऽमलाः ॥
सिद्धाद्याश्च हरेस्तस्य वयमुच्छिष्टभोजिनः ।

चन्द्रिकायाम्—
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर ॥
इमं मन्त्रं समुच्चार्य प्रणमेद्दण्डवद् भुवि ।
अपराधसहस्रं तु क्षमते सर्वगो हरिः ॥

विष्णुधर्मे—
धूपं चारार्त्तिकं पश्येत्कराभ्यां तत्प्रपद्य च ।

एतच्च आत्माग्रं शङ्खं सपुष्पमभ्यर्च्य घण्टां चाभ्यर्च्य धूपारार्त्तिकार्चनं कार्यम् । वचनान्यन्यत्र बोध्यानि । वाराहे—
धूपार्त्ति च तथा दीपं कराभ्यां यैर्नमस्कृतम् ।
सप्तजन्मार्जितं पापं तत्क्षणादेव नश्यति ॥

पदार्थादर्शे—

एकाहपूजाविहतौ कुर्याद् द्विगुणमर्चनम् ।
त्रिरात्रे तु महापूजां संप्रोक्षणमतः परम् ॥
संप्रोक्षणं तु देवस्य देवमुद्वास्य पूर्ववत् ।
पञ्च पञ्च क्रमेणैव स्नापयित्वा मृदम्भसा ॥
गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च ।
प्रोक्षयेत्प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम् ॥
ततो मूलेन मूर्धादिपीठान्तं संस्पृशेदपि ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासं च विन्यसेत् ॥
प्राणप्रतिष्ठामन्त्रेण प्रतिष्ठापनमाचरेत् ।
पूजां च महतीं कुर्यात् स्वतन्त्रोक्तां यथाविधि ॥
पूजाहीनादिषु प्रायः सम्प्रोक्षणविधिः स्मृतः ॥

शालग्रामादौ न प्राणप्रतिष्ठा किन्तु महापूजैवेति स्मर्त्तव्यम् ।

विष्णुरहस्ये—

इति विष्णवर्चनं ये तु प्रकुर्वन्ति नरा भुवि ।
ते यान्ति शाश्वतं विष्णोरनन्तं परमं पदम् ॥

विष्णुः—

देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् ।
स वै देवलको नाम हव्यकव्ये विगर्हितः ॥

अथ द्वात्रिंशत्पूजापराधा वाराहे—

भुक्त्वा तु परकीयान्नं तत्परस्तन्निवर्त्तकः ।
प्रथमश्चापराधोऽयं सर्वविघ्नाय वै भवेत् ॥
अभुक्त्वा दन्तकाष्ठं तु यस्तु मामुपसर्पति ।
अपराधो द्वितीयोऽयं धर्मविघ्नाय कल्प्यते ॥
कृत्वा मैथुनसंयोगं यस्तु मां स्पृशते नरः ।
तृतीयमपराधं तं कल्पयामि वसुन्धरे ॥
स्पृष्ट्वा रजस्वलां नारीमस्माकं यः प्रपद्यते ।
चतुर्थमपराधं तं कल्पयामि वसुन्धरे ॥

स्पृष्ट्वा तु मृतकं चैव असत्कारकृतं तु वै ।
पञ्चमं चापराधं तु न क्षमामि वसुन्धरे ॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते हि माम् ।
षष्ठं तमपराधं वै न क्षमामि वसुंधरे ॥
ममार्चनस्य काले तु पुरीषं यस्य गच्छति ।
सप्तमं चापराधं तु न क्षमामि वसुंधरे ॥
ममैवार्चनकाले तु यस्त्वसत्यं प्रभाषते ।
नवमं चापराधं तं न क्षमामि वसुन्धरे ॥
अविधानेन यां स्पृश्य मामेव प्रतिपद्यते ।
दशमश्चापराधोऽयं मम चाप्रियकारकः ॥
सक्रोधो यः स्पृशेद्गात्रं चित्तं कृत्वा चलाचलम् ।
एकादशं चापराधं न क्षमामि वसुन्धरे ॥
अकर्मण्यानि पुण्यानि यस्तु मामुपकल्पयेत् ।
द्वादशं चापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति ।
त्रयोदशं चापराधं न क्षमामि वसुन्धरे ॥
अन्धकारे च मां देवि यः स्पृशेत्तु कदाचन ।
चतुर्दशं चापराधं न क्षमामि वसुन्धरे ॥
यस्तु कृष्णेन वस्त्रेण मम कर्माणि कारयेत् ।
पञ्चदशं चापराधं न क्षमामि वसुंधरे ॥
अधौतेन च वस्त्रेण यस्तु मामुपसर्पति ।
षोडशं चापराधं तं न क्षमामि वसुंधरे ॥
स्वयमन्नं च यो दद्यादज्ञाताय च माधवम् ।
सप्तदशापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु मात्स्यानि मांसानि भक्षयित्वोपसर्पति ।
अष्टादशापराधं तं न क्षमामि वसुन्धरे ॥
जालपादं भक्षयित्वा यस्तु मां प्रतिपद्यते ।
एकोनविंशापराधं न क्षमामि वसुन्धरे ॥

दीपं स्पृष्ट्वा तु यो देवि मम कर्माणि कारयेत् ।
विंशतिं चापराधं तं न क्षमामि वसुन्धरे ॥
श्मशानं यस्तु वै गत्वा मामेव प्रतिपद्यते ।
एकत्रिंशापराधं तं न क्षमामि वसुंधरे ।
पिण्याकं भक्षयित्वा तु यो मामेवाभिगच्छति ।
द्वाविंशं चापराधं तं न क्षमामि वसुन्धरे ॥
यस्तु वाराहमांसानि भक्षयित्वोपसर्पति ।
अपराधं त्रयोविंशं न क्षमामि वसुन्धरे ॥
सुरां पीत्वा च यो मर्त्यः कदाचिदुपसर्पति ।
अपराधं चतुर्विंशं न क्षमामि वसुंधरे ॥
कुसुम्भशाकं भक्षयित्वा यस्तु मामुपसर्पति ।
अपराधं पञ्चत्रिंशं न क्षमामि वसुन्धरे ॥
परप्रावरणेनैव यस्तु मामुपसर्पति ।
षड्विंशापराधं तं न क्षमामि वसुन्धरे ॥
अजीर्णेन समाविष्टो यस्तु मामुपसर्पति ।
त्रिंशकं चापराधं तं न क्षमामि वसुन्धरे ॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति ।
एकत्रिंशं चापराधं न क्षमामि वसुंधरे ॥
विना तूर्यादिघोषेण द्वारस्योद्घाटनं मम ।
महापराधं जानीयाद् द्वात्रिंशं तं मम प्रिये ॥

एषु प्रत्येकं प्रायश्चित्तं तत्रैव ।

संवत्सरस्य मध्ये च तीर्थे सूकरके मम ॥
कृतोपवासस्तु नरो गङ्गायां शुद्धिमाप्नुयात् ।
मथुरायां तथा चैव सापराधः शुचिर्भवेत् ॥

स्कान्दे—

जागरेद् द्वादशीरात्रौ पठेद्यस्तुलसीस्तवम् ।
द्वात्रिंशदपराधांश्च क्षमते तस्य केशवः ॥

पुराणोक्तस्तुलसीस्तवो व्रतरत्नादौ बोध्यः । प्रकारान्तरेण कृष्णभट्टीये—

तिर्यक्पुण्ड्रधरो भूत्वा यः कुर्याद्देवतार्चनम् ।
याचितैः पत्रपुष्पाद्यैर्यः करोति ममार्चनम् ॥
अप्रक्षालितपादो यः प्रविशेन्मम मन्दिरम् ।
मम दृष्टेरभिमुखं ताम्बूलं चर्वयेच्च यः ॥
कौसुम्भशाकं मर्त्यो वा भक्षयेन्मम सेवकः ।
उरुवूकपलाशस्थैः पुष्पैः कुर्यान्ममार्चनम् ॥
ममार्चामासुरे काले यः करोति विमूढधीः ।
अवैष्णवस्य पक्वान्नं यो मर्त्यो विनिवेदयेत् ॥
अवैष्णवेषु पश्यत्सु मत्पूजां विदधाति यः ।
दिनान्तरितपक्वान्नं यो मह्यं विनिवेदयेत् ॥
नीलीरञ्जितवस्त्रं च यो मह्यं विनिवेदयेत् ।
नवप्रक्षालितं वस्त्रं जीर्णं वा विनिवेदयेत् ॥
अमौनी घर्मलिप्ताङ्गो मत्पूजां विदधाति यः ।
वातमूत्रनिरोधेन मत्पूजां विदधाति यः ॥
नखोदकेन स्नपनं कुरुते यश्च मानवः ।
कृत्वा वातमनाचम्य तथा प्रावृत्य कम्बलम् ॥
पीठासनोपविष्टो वा पूजयेद्वा निरासनः ।
मृन्मयं धूपदहनं दीपं यः कुरुतेऽर्चने ॥
मत्पूजको(१)न कुरुते तन्तुपूजां च दामिनीम् ।
मत्पूजकः शिवद्वेषी शिवभक्तश्च मां द्विषेत् ॥
भूताष्टम्योर्न कुरुते नक्तं न हरिवासरम् ।
परस्य परिधानं च परिधायार्चयीत च ॥
अपूजयित्वा विघ्नेशमसम्भाष्य कपालिकम् ।
क्रुद्धो यत्कर्म कुरुते त्रिकालार्चनविघ्नकृत् ॥
अन्धकारे स्पृशेन्मां यः सम्भाष्य च रजस्वलाम् ।

---

(१) 'कोतत्कुरुते' ख०

वामहस्ते च मां कृत्वा स्नापयेद्यदि मूढधीः ॥
महापराधाञ्जानीहि द्वात्रिंशन्न क्षमामि तान् ।

अन्ये चागस्तिनोक्ताः—

यानैर्वा पादुकैर्वापि गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम् ।
एकहस्तप्रणामश्च तत्पुरस्तात्प्रदक्षिणम् ॥
पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम् ।
शमवातक्षणं(?) चैव मिथ्याभाषणमेव च ॥
उच्चैर्भाषितजल्पौ वा रोदनादिग्रहः ग्रहः ।
अग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणम् ॥
कम्बलावरणं चैव परानिन्दा परस्तुतिः ।
अश्लीलभाषणं चैव अधोवायुविमोक्षणम् ॥
शक्तौ गौणोपचारस्तु अनिवेदितभक्षणम् ।
तत्तत्कालोद्भवानां च फलादीनामनर्पणम् ॥
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनादिकम् ।
पृष्ठीकृत्यासनं चैव परेषामभिवादनम् ॥
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ।
अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः ॥

अथापराधशतं गारुडे—

नारद उवाच—

कस्य कस्यापराधस्य किं फलं का गतिश्च भो ।
प्रत्येकमपराधस्य प्रायश्चित्तिश्च का भवेत् ॥
अशक्तश्च जडो वापि कथं शुद्धो वदस्व मे ।

ब्रह्मोवाच—

स्नानहीनस्तु यो मर्त्यः कृत्वा वै देवतार्चनम् ।
रौरवं नरकं याति यावदाभूतसंप्लवम् ॥

तस्यापचितिमन्विच्छन् जपेदष्टाक्षरं मनुम् ।
अयुतं सर्वपापघ्नं ततः शुद्धो भवेन्नरः ॥
निःशङ्कं देवतागारं प्रवेशं च करोति यः ।
असिपत्रवने घोरे पतत्याब्रह्मणो दिनम् ॥
पञ्चरात्रोपवासेन पञ्चगव्येन शुद्धयति ।
अप्रक्षालितपादश्च प्रविशेद्देवतालयम् ॥
विष्ठाकृमिर्भवेत्पापी सप्त(१)जन्मसु मानवः ।
देवस्यानम्रशिरसा गच्छेदभिमुखं नरः ॥
कुम्भीपाके महाघोरे पतत्याचन्द्रतारकम् ।
गोमयालिप्तदेशे तु हरेः पूजां करोति यः ॥
सुतप्तवालुके घोरे नरके पतति ध्रुवम् ।
त्रिरावृत्य स पापात्मा गीतां शुद्धयति निश्चयः ॥
धूपहीनां च यः कुर्यात्पूजां विष्णोर्महात्मनः ।
तुषाग्नौ नाम नरके यावदिन्द्राश्चतुर्दश ॥
दशाङ्गं गुग्गुलं दत्त्वा स पापी शुद्ध्यति ध्रुवम् ।
घण्टानादविहीनां च देवतार्चां करोति यः ॥
कोलाहले महाघोरे नरके पतति ध्रुवम् ।
वेदपारायणं कृत्वा स पुमान् शुद्धिमाप्नुयात् ॥
मुखफूत्कृत्य वह्नौ तु धूपधूमं करोति यः ।
महातमसि नरके पतत्यालोक(२)संक्षयम् ॥
दीपमालां हरेः कृत्वा स च शुद्धिमवाप्नुयात् ।
स्तोत्रपाठं विना तूष्णीं यो निर्माल्यं विसर्जयेत् ॥
निरुच्छ्वासे च नरके यावदिन्द्रपदं पतेत् ।
सहस्रनामपठनाच्छुद्धिं याति यतव्रतः ॥
अग्रोदकं त्रिवारं न वस्त्रेण शोधयेद्यदि ।
कालभक्षे महाघोरे पतत्येव नराधमः ॥

---

(१) 'शतजन्मस्तु' ख०
(२) 'संक्षये' ख०

ग्रीष्मे पानीयदानेन स पूतो जायते नरः ।
स्वच्छायाग्रोदकाद्यस्तु कुर्याद्देवाभिषेचनम् ॥
तप्तपङ्कह्रदं नाम नरकं याति मानवः ।
स सुवर्णाभिषेकेण हरेः शुद्धिमवाप्नुयात् ॥
अनाच्छाद्योदकुम्भस्य मुखे अग्रोदकाहृतम् ।
करोति मौढ्यात्पच्येत कालसूत्रादिषु द्विजः ॥
पवमानाभिषेकेण पवित्रो जायते नरः ।
अभक्ष्यभक्षणं यस्तु कुर्याद्वेदविगर्हितम् ॥
भयानके महाघोरे वासमाप्नोति मानवः ।
एकादश्युपवासे च तुलसीभक्षणाच्छुचिः ॥
अभक्ष्याणि च शाकानि तथैवान्नानि नारद ।
यो यो निवेदयेद्विष्णौ महारौरवमेति सः ॥
पराकं च व्रतं कृत्वा शुद्धिं प्राप्नोति मानवः ।
कक्षश्मश्रुनखस्पृष्टहस्ताद्देवाङ्गस्पर्शने ॥
अष्टभौमे महाघोरे वसत्याश्रुवमण्डलम् ।
अस्यवामस्य सूक्तस्य जपाच्छुद्धिमवाप्नुयात् ॥
अन्यावाशिष्टवस्त्रस्य देवतायाः समर्पणात् ।
सुघोरं नाम नरकं प्रयात्यामनुकल्पकम् ॥
हीनवस्त्रार्चनां यस्तु करोति परमात्मनः ।
अतिघोरं च नरकं प्रयात्याभूतसंप्लवम् ॥
शीतार्त्ते वस्त्रदानेन पूतो भवति मानवः ।
योऽर्चां तु कुरुते विष्णोर्नीलवस्त्रेण मानवः ॥
कालरात्रिं महाघोरं नरकं याति दारुणम् ।
रात्रिसूक्ताच्चरुं हुत्वा शुद्धो भवति मानवः ॥
अधौतवस्त्रं यो विष्णोः समर्पयति मानवः ।
शूकरं नाम नरकं प्रयात्यालस्यदूषितः ॥
अतोदेवाश्चरुं हुत्वा पायसं शुद्धिमाप्नुयात् ।
निषिद्धान्नेन नैवेद्यं यः करोति नराधमः ॥

मलभोजं महाघोरं नरकं याति दारुणम् ।
नखश्मश्रुविना यस्तु दरिद्रो भुवि जायते ॥
द्वादश्यां भोजयित्वा तु ब्राह्मणान् शुद्धिमाप्नुयात् ।
अष्टाक्षरोपदेशस्तु यस्य कस्य गुरोर्न हि ॥
तादृशः पूजयित्वा तु विष्णुं वेदैकनायकम् ।
करालं नरकं याति यत्र दुःखानि भूरिशः ॥
सच्छास्त्रश्रवणादेव शुद्धिमाप्नोति निश्चितम् ।
शूद्राहृतैश्च कुसुमैर्विष्णोः पूजां करोति यः ॥
कीटदं नाम नरकं नानादुःखालयं व्रजेत् ।
पवित्रं तेत्यृचा हुत्वा स्नात्वा नद्यां शुचिर्भवेत् ॥
शूद्राहृतं न दुष्टं स्यात्सिद्धस्थाने महोत्सवे ।
शूद्राहृतं न दुष्टं तु शूद्रस्य हरिपूजने ॥
धौतपुष्पैः सपर्यां तु यः कुर्याच्छार्ङ्गधन्वनः ।
स चण्डनरकं याति पश्चाद्वैश्यो भवेन्नरः ॥
दधिक्राव्णऋचा विष्णुं दध्ना कृत्वा शुचिर्भवेत् ।
अन्यावशिष्टपर्युष्टम्लानपुष्पैर्हरिं यजेत् ॥
पद्मापद्मावतीभीमनरकान् याति दारुणान् ।
अतोदेवा-इदंविष्णुः-पौरुषं क्रमशो हुनेत् ॥
आज्यं पयः पायसं च क्रमाच्छुद्धो भवेन्नरः ।
छिन्नभिन्नातिरक्तानां पुष्पाणां तु समर्पणात् ॥
बहुसूचीमहासूचीसंज्ञान् याति च मानवः ।
पञ्चामृताभिषेकेण महानदजलाप्लुतः ॥
पयसा स्नापनाद्विष्णोः पश्चाच्छुद्धो भवेन्नरः ।
स्वाङ्गभूगलितानां च निवृत्तानां समर्पणात् ॥
अतिवातं महावातं चक्रवातं प्रयाति सः ।
अन्नधेनोः स्वर्णधेनोर्मधुधेनोश्च दानतः ॥
शुद्धं सुखमवाप्नोति परत्र च परां गतिम् ।
वस्त्रपुटादर्कपुटादेरण्डादिपुटात्तथा ॥

आहृतैः पुष्पपत्राद्यैः पूजां विष्णोः करोति यः ।
अतितापं महातापमतिशीतं प्रयाति सः ॥
निर्गन्धपुष्पैः पूजां [तु] मुकुन्दस्य करोति यः ।
तथा पूयवहं नाम नरकं व्रजति ध्रुवम् ॥
वासहीनो भवेद् भूमौ पन्नपुष्पार्पणाच्छुचिः ।
तुलसीरहितैः पुष्पैर्योऽर्चयेदच्युतं हरिम् ॥
तामसं नरकं याति पुनरुत्थानवर्जितम् ।
कार्त्तिक्यां तुलसीपत्रैः संपूज्य च शुचिर्भवेत् ॥
लोकवार्त्तां वदन्विष्णोर्निर्माल्यं यस्तु लङ्घयेत् ।
चण्डकोलाहलं नाम नरकं याति दारुणम् ॥
पारायणात् पावमान्याः शुद्धतामेति मानवः ।
अप्रक्षाल्य च पुष्पाणि विष्णोः पूजां करोति यः ॥
कृमिभक्षमहाघोरं नरकं चाधिगच्छति ।
मन्दधीर्जायते भूमौ गोग्रासाच्छुध्यते नरः ॥
प्रक्षाल्य तुलसीं विष्णोः सपर्यां च करोति यः ।
सर्वसौख्यहरं नाम नरकं प्राप्य दुःखितः ॥
आवाहनादिषण्मुद्रां विना ह्यर्चां करोति यः ।
देहयोगवियोगाख्ये नरके वासमाप्नुयात् ॥
पुष्पाञ्जलिं मन्त्ररत्नाद्दत्वा शुद्धिमवाप्नुयात् ।
अग्निज्वालं प्रयासाशु तथैवैरण्डदीपतः ॥
पिष्टामलकदीपस्य प्रदानाच्छुद्धिमाप्नुयात् ।
पञ्चसंस्कारहीनस्तु नरकं याति दारुणम् ॥
गङ्गावगाहनाद्वापि भारतस्य च कीर्त्तनात् ।
स नरः शुद्धिमाप्नोति नान्यथा शुद्धितामियात् ॥
शून्यदीपे विलुप्ते तु पूजां कर्त्तुं यदीच्छति ।
तैलयन्त्रं महाघोरं गत्वा तत्र निपीड्यते ॥
शङ्कराद्यैः समत्वेन विष्णोरर्चां करोति यः ।
स चान्धतमसो नाम्नो नरकानधिगच्छति ॥

सेनान्यैः पितृभिश्चैव समकालं हरिं व्रजेत् ।
दुःखोत्कटं नाम नरकं याति ब्रह्मार्पणं नरः ॥
श्रुत्वा भागवतं शास्त्रं शुद्धिमान् जायते नरः ।
पद्माक्षतुलसीमालाहीनकण्ठो वसेन्नरः ॥
शाल्मलीनरकं याति बलिबद्धो भवेन्नरः ।
कार्त्तिक्यां पद्ममालाभिः सुसंपूज्य शुचिर्भवेत् ॥
उत्तरीयपरित्यागाच्छायाहीने(१) पतत्स्वयम् ।
निराश्रयो भवेद् भूमौ दोग्ध्रीर्दत्त्वा शुचिर्भवेत् ॥
अपवित्रकरो यस्तु विष्णोरर्चां करोति यः ।
नरके पूयशोणाख्ये भुक्त्वा दुःखान्यनेकशः ॥
व्याधो भूत्वा सुपापीयान्नरकाने(२)कविंशतिः ।
अकृच्छः पृष्ठकृच्छो वा देवतार्चां करोति यः ॥
रेतसो भाजनं याति उपजग्धी भवेन्नरः ।
अश्वत्थसेवनाच्छुद्धस्तुलसीचन्दनादपि ॥
पाषण्डिनां च संसर्गं यः करोति दुराग्रहात् ।
सप्तशीलालयं नाम नरकं याति दारुणम् ॥
बहुमूत्रो भवेद् भूमौ सत्संगत्या विशुद्धयति ।
अनभ्यस्य च सच्छास्त्रं यो दुःशास्त्रं समभ्यसेत् ॥
अङ्गारराशिभवनं नरकं याति दारुणम् ।
स भूप्रदक्षिणां कृत्वा शुद्धिमाप्नोति निश्चितम् ॥
नरस्तुतीनां श्रवणं यः करोति नराधमः ।
नदीं वैतरणीं याति पूज्यस्तुत्या विशुद्धयति ॥
यः करोति विमूढात्मा नरस्तुत्या तु जीवनम् ।
मुसलोलूखलं नाम नरकं चाधिगच्छति ॥
नित्यं स पश्चिमे यामे विष्णुस्तुत्या विशुध्यति ।
पूज्यस्तुतिपरित्यागं यः कुर्यान्मनुजाधमः ॥

---

(१) 'हीनेष्वतत्पयम्' ख०
(२) 'नेव विन्दति' ख०

पूतिमांसादनं नाम नरकं सोऽधिगच्छति ।
मुखरोगी च भवति भारतश्रवणाच्छुचिः ॥
विष्णोर्निन्दां गुरोर्निन्दां श्रुत्वैव मनुजाधमः ।
नरकं चान्ध(१)तामिस्रं भुक्त्वा युगशतत्रयम् ॥
कपिलागोसहस्रं च दत्त्वा शुद्धिमवाप्नुयात् ।
अथवा विष्णुमाहात्म्यं श्रुत्वा शुद्धिमवाप्नुयात् ॥
सत्पुंसनिन्दाश्रवणं सच्छास्त्रस्यापि नारद ।
यः करोति विमूढात्मा महारौरवमेति सः ॥
स च्छिन्नोष्ठो भवेद् भूमौ भूमिदानेन शुध्यति ।
देवार्चासमये बालान् लालयन्मनुजाधमः ॥
इक्षुयन्त्रे महाघोरे पीड्यते यमकिङ्करैः ।
श्रुत्वा च शास्त्रसंदर्भं बालिशो नाभिपूज्यते ॥
देवालये पताकानां दानाच्छुद्ध्यति मानवः ।
व्यासङ्गाद्देवतार्चायां कृतायां मनुजेन वै ॥
आस्फालयन्ति तं याम्या क्षुरपाय शिलातले ।
पुस्तकस्य प्रदानेन तस्मात्पापात्प्रमुच्यते ॥
नखादिमलिनानां च देवागारे विसर्जने ।
विष्ठाकूपे पतत्याशु तत्रैव मलभोजनः ॥
चक्रकारो भवेद् भूमौ गन्धदानेन शुद्ध्यति ।
आज्याभिघारहीनस्य नैवेद्यस्य समर्पणे ॥
स तु हालाहलं नाम नरकं याति दारुणम् ।
स चापि शुद्धिमाप्नोति शतब्राह्मणभोजनात् ॥
आलस्याद्देवपूजायां तूष्णीं क्रीडति वा विभो ।
यः करोति विमूढात्मा चक्रे भेदान्निपीड्यते ॥
मलं बध्वा देवपूजां यश्चाचरति मूढधीः ।
तैलकूपं पातयन्ति तं पापं यमकिङ्कराः ॥

---

(१) 'तामिस्रं पतेद् युग' ख०

अजीर्णान्नो नरो यस्तु देवपूजां समाचरेत् ।
स पापात्मा ध्रुवं याति नरकं चण्डभीषणम् ॥
देवस्य पूजासमये विदित्वा गमनं सताम् ।
प्रत्युत्थानं न कुर्यात्तु अन्धकूपे पतत्ययम् ॥
महतां सेवनादेव स पूतो मुनिसत्तम ।
नित्यकर्मपरित्यागी सर्वानेतान् व्रजत्ययम् ॥
षष्ठकालव्रतं कृत्वा स शुद्धां याति वै गतिम् ।
शयानो मनुजः क्वापि यः शृणोति हरेः कथाम् ॥
नानादुःखग्रहं नाम नरकं याति दारुणम् ।
पश्चाद्व्यालो भवेद् भूमौ गृहदानाद्विशुद्ध्यति ॥
शृण्वन् पौराणिकीं गाथां कृत्वा ताम्बूलचर्वणम् ।
स याति नरकं घोरं वह्निभोजनसंज्ञकम् ॥
गुरोः समानरूढः सन् पुराणं यः शृणोति च ।
तप्तशूलासनं नाम नरकं याति दारुणम् ॥
गुरोः पर्यङ्कदानेन शुद्धिमाप्नोत्यसंशयम् ।
अश्रद्धया नरः श्रुत्वा पुराणं पापनाशनम् ॥
संमोहनं महाघोरं नरकं याति दुःखदम् ।
गत्वाऽपस्माररोगाढ्यः पुनरेवाभिजायते ॥
दिनापनयनं लोकवार्त्तया गृहचिन्तया ।
कुर्वन्निरयमाप्नोति तप्तशोणह्रदं नरः ॥
नमस्कारात्परं विष्णोः कृत्वा धूलिविधूननम् ।
तप्तधूलिनदं नाम नरकं चाधिगच्छति ॥
आरूढवृषभाशुद्धो युगबद्धवृषद्वयः ।
ताभ्यां वृषाभ्यां नियमात्किंचिद् दूरं व्रजेद् ध्रुवम् ॥
तेन शुद्धिमवाप्नोति नरकाद्वा कथञ्चन ।
आर्द्रवस्त्रधरो यस्तु कुर्वन्वै देवतार्चनम् ॥
अङ्गारवृष्टिपतनं नरकं प्रतिपद्यते ।
यतीनां वस्त्रदानेन मृदा स्नानेन शुद्ध्यति ॥

एकादशीदिने मासे यो भुङ्क्ते हरिवासरे ।
कृमिराशिं व्रजत्याशु यावदाभूतसंप्लवम् ॥
शुद्धिमाप्नोत्ययं स्नानाद्गोमत्यां कृष्णसंनिधौ ।
दीक्षितो देवपूजायां पूर्वं मैथुनमाचरेत् ॥
आयसाः कण्टकास्तीक्ष्णा नरके कूटशाल्मलौ ।
पुंसूक्तमपठित्वा तु देवपूजां करोति यः ॥
वदनान्तरविन्यस्तसुप्रतप्तमयोगडी ।
आदावन्ते च साहस्रनामपाठविवर्जनात् ॥
तैलपूर्णकटाहेषु सन्तप्तेषु तु मानवः ।
निक्षिप्तोऽप्यात्मनो जिह्वां यमाज्ञाकारिभिर्भटैः ॥
अहुत्वा वाप्यदत्त्वा वा भोजनं कुरुते नरः ।
महोक्षमूत्रपूर्णायां वाप्यां वै क्षिप्यते नरः ॥
बृहदारण्यकं जप्त्वा चतुर्भिर्मुच्यते नरः ।
पुण्यकालोक्तातिशयसपर्यां यस्तु मुञ्चति ॥
क्षारोदं नाम नरकं नरो याति सुदारुणम् ।
तत्र शस्त्रैर्विशीर्णाङ्गो नमस्कारैर्विशुद्ध्यति ॥
अनिवेदितमन्त्रं यः शंखचक्रगदाभृतः ।
(भुनक्तीति शेषः ।)
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥
चान्द्रायणत्रयं कृत्वा शुद्धिमाप्नोति मानवः ।
अन्यदेवार्पितं चान्नं यो भुङ्क्ते ज्ञानदुर्बलः ॥
(धू(१)म्रपाने महाघोरे आकल्पान्तमधो(२)मुखम् ।
विष्णुस्थानविहीने तु ग्रामवासी नराधमः ॥)
जन्तुपङ्के महाघोरे क्षिप्तः क्रन्दति विस्तरम् ।
स पङ्गुर्जायते भूमौ गङ्गासागरसंगमे ॥

---

(१) धनुश्चिन्हान्तर्गतं नास्ति घ० ङ० ।
(२) इतोऽग्रे 'चान्द्रायणत्रयं' पाठोऽधिकः ख०

स्नातः शुद्धिमवाप्नोति कथायाः श्रवणेन च ।
सत्संगमविहीने च ग्रामेवासी नराधमः ॥
शस्त्रावर्षे पतेद्धोरे शुद्धः स्यात्तीर्थसेवया ।
सुतेषु नामधेयानि विष्णोरन्यस्य नामतः ॥
आह्वानं कुरुते यस्तु तैलकुम्भे पतेद् ध्रुवम् ।
सकामः पूजितो येन देवदेवो जनार्दनः ॥
निवृत्तिमार्गे सरतः शुद्धिमेति न चान्यथा ।
देवोपकरणैर्यस्तु गृहयात्रां निवर्त्तयेत् ॥
महापेषे महाघोरे मुसलैः पीड्यते भृशम् ।
पक्षियोनिमवाप्नोति देवालंकरणाच्छुचिः ॥
शयानो मिथुनीभोगाद्देवागारे नराधमः ।
शरतल्पे महाघोरे प्राजापत्येन शुध्यति ॥
विना शङ्खं महाविष्णोराभिषेकं करोति यः ।
निरन्नं नरकं गत्वा स्वमांसं खादते नरः ॥
शङ्खेन पयसा देवं स्नाप्य शुद्धिमवाप्नुयात् ।
विष्णोरभिमुखं पादप्रसारं कुरुते नरः ॥
तं पापं पार्ष्णिदेशे तु छिद्रं कुर्वन्ति सत्वरम् ।
सेतुं गत्वा समुद्रस्य गङ्गासागरसंगमे ॥
स्नात्वा शुद्धिमवाप्नोति नान्यथा तु कथञ्चन ।
अवृन्दावनगेहे च निवसन्मानुषाधमः ॥
सर्वानेतान्महाक्रूरान्नरकाने(१)कविंशतिः ।
व्रतभ्रष्टो महापापं महारौरवमेति सः ॥
व्याघ्रयोनिमवाप्नोति बन्दिमोक्षाच्च शुध्यति ।
तुलामकरमेषे तु प्रातःस्नानविवर्जनात् ॥
पैशाचीं योनिमाप्नोति यावदाभूतसंप्लवम् ।
श्रुत्वा सच्छास्त्रमाहात्म्यं शुद्धिमाप्नोति मानवः ॥

---

(१) 'नेव विन्दति' ख० ।

अविभक्तानां पृथग्देवपूजामाह प्रयोगपारिजाते आश्वलायनः—

पृथगग्न्येकपाकानां ब्रह्मयज्ञो द्विजातिनाम् ।
अग्निहोत्रं सुरार्चा च संध्या नित्यं भवेत्पृथक् ॥

तत्रैव विष्णुधर्मे—

*शालग्रामशिलां वापि चक्राङ्कितशिलां तथा ।
ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् ॥

इदं स्पर्शसहितपूजाविषयम् ।

शूद्रो वाऽनुपनीतो वा स्त्रियो वा पतितोऽपि वा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ॥
ब्राह्मण्यपि हरं विष्णुं न स्पृशेच्छ्रेय इच्छती ।
सनाथा मृतनाथा वा तस्या नास्तीह निष्कृतिः ॥
स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर ।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य च ॥

इति स्कान्दात् । स्पर्शरहिता तु तयोर्भवत्येव,

शालग्रामं न स्पृशेत्तु हीनवर्णो वसुंधरे ।

पूजान्ते देवदेवस्य मुखवस्त्रार्पणं न हि ।
डाकिनीं योनिमासाद्य तिष्ठत्याभूतसंप्लवम् ॥
देवस्य दर्पणं दत्त्वा सद्यः पूतो भवेन्नरः ।
ब्रह्मपारंपरं स्तोत्रं पूजान्ते न पठेद्यदि ॥
न गृह्णाति स्वयं तस्य पूजां चैव तु वार्षिकीम् ।
इत्येतत्कथितं सर्वमपराधफलं मुने ॥
प्रायश्चित्तं मया तेषां विस्तरेण च वर्णितम् ॥ इति ।

*शालग्राममिति । शालग्रामो न विक्रेतव्यः । तथाच स्कान्दे—

शालग्रामशिलायास्तु मूल्यं यः कुरुते नरः ।
विक्रेता चानुमन्ता च यः परीक्षानुमोदकः ॥

स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मतः ॥
मोहाद्यः संस्पृशेच्छूद्रो योषिद्वापि कदाचन ।
स्वपते नरके घोरे यावदाभूतसंप्लवम् ॥
यदि भक्तिर्भवेत्तस्य स्त्रीणां वापि वसुंधरे ।
दूरादेवास्पृशन्पूजां कारयेत्सुसमाहितः ॥

इति वाराहोक्तेः । (१)शालग्रामशिलामात्रे निर्बन्धो न प्रतिमादौ,

सर्ववर्णैस्तु संपूज्याः प्रतिमाः सर्वदेवताः ।
लिङ्गान्यपि तु पूज्यानि मणिभिः(२)कल्पितानि च ॥

इति तत्रैवोक्तेः ।

चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ।
वैश्यैर्द्वावेव संपूज्यौ तथैकः शूद्रजातिभिः ॥

इति स्कान्दात् । अन्ये तु दीक्षितविषयत्वेन व्यवस्थामाहुः । विष्णुधर्मे—

तयोरसंभवेऽर्चा वै सा चेह नवधा स्मृता ।
रत्नजा हेमजा चैव राजती ताम्रजा तथा ॥

सर्वे ते नरकं यान्ति यावदाभूतसंप्लवम् ॥ इति ।

स्त्रीशूद्रयोः स्पर्शपूजावत् साक्षात्शालग्रामपूजा निषिद्धा ।

ब्राह्मणक्षत्रवैश्याश्च त्रयाणां मुनिसत्तम ।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने ॥
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्त्तव्यं ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥

इति पद्मात् । पाद्मे—

द्वारकाशैलसंभूतं यस्तोयं पिबते कलौ ।
पापानि तस्य नश्यन्ति शतजन्मार्जितान्यपि ॥

---

(१) 'शालग्राममात्रनिषेधो न' क०
(२) 'कल्पितास्तथा' क०

रैतिक्यर्चा तथा लौही शैलजा द्रुमजा तथा ।
अधमाधमा च विज्ञेया मृन्मयी प्रतिमा च या ॥

एषां फलानि तत्रैव ज्ञेयानि ।

(ना(१)र्च्या गृहेऽश्मजा मूर्तिश्चतुरङ्गुलतोऽधिका ।
न वितस्त्यधिका धातुसंभवा श्रेय इच्छता ॥
एवंलक्षणसंपन्ना पारंपर्यक्रमागता ।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्समा ॥)

तत्रैव पाद्मे शालग्रामं प्रक्रम्य—

तत्राप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत् ।
यथा यथा शिला सूक्ष्मा तथा स्यात्तु महत्फलम् ॥

तथा—

यवमात्रं तु गर्तः स्याद्यवार्धं लिङ्गमुच्यते ।
शिवनाभिरिति ख्यातस्त्रिषु लोकेषु दुर्लभः ॥

धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तं हि पापानां क(१)लौ पादोदकं हरेः ॥ इति ।

शिलैव शैलं, स्वार्थेऽण् । द्वारकाशिलापूजायाः पृथक्करणस्थले एतत्, शालग्रामसहपूजने तस्यार्थतः सिद्धत्वात् । कौर्मे—

यो मोहादथ बालिश्यादकृत्वा देवतार्चनम् ।
भुङ्क्ते स याति नरकान् सूकरेष्वेव जायते ॥

यत्तु—

दानाध्ययनदेवार्चाजपहोमव्रतादिकम् ।
न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात् ॥ इति ।

तन्नित्यवर्जं,

श्राद्धाह्नि तु समभ्यर्च्य नृवराहं जनार्दनम् ।

इति विष्णुधर्मात् ।

पूजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत् ।

---

(१) 'कंसान्तर्गतं नास्ति' क० (२) 'कुलपादोदकं' घ० ङ०

तत्रैव—

शालग्राममयी मुद्रा संस्थिता यत्र कुत्रचित् ।
वाराणस्या यवाधिक्यं समन्ताद्योजनत्रयम् ॥
यो मृतस्तत्समीपे तु मृतो वा नीयतेऽन्तिकम् ।
स वै मोक्षमवाप्नोति सत्यं सत्यं न चान्यथा ॥

तत्रैव--

चक्राङ्कमिथुनं पूज्यं नैकं चक्राङ्कमर्चयेत् ।
चक्राङ्कमिथुनात्सार्धं शालग्रामं प्रपूजयेत् ॥

तत्रैव वाराहे—

म्लेच्छदेशे शुचौ वापि चक्राङ्को यत्र तिष्ठति ।
यो(१)जनानां तथा त्रीणि मम क्षेत्रं वसुंधरे ॥

तत्रैव शालग्रामं प्रक्रम्य--

क्रयक्रीता परिज्ञेया मध्यमा याचिताऽधमा ॥

प्रयोगपारिजाते वाराहे--

एवंलक्षणसंपन्ना पारंपर्यक्रमागता ।
उत्तमा सा तु विज्ञेया गुरुदत्तापि तत्समा ॥

अथ पार्थिवपूजा नन्दिपुराणे--

आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी ।
वरमिष्टं लभेल्लिङ्गं पार्थिवं यः समर्चयेत् ॥
तस्मात्तु पार्थिवं लिङ्गं ज्ञेयं सर्वार्थसाधकम् ॥

तत्रैव--

*गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ।

इति लैङ्गात् । श्राद्धाह्नि विष्णुशिवेतरपूजा न कार्येति केचित् । पूजा च भूतशुद्ध्यादिप्राणप्रतिष्ठादिकं कृत्वैव कार्या । तद्विस्तरोऽन्यत्र बोध्यः ।

*गोभू इति । मृदाहरणादिसप्तसु मन्त्रा अनुपदं बोध्याः ।

---

(१) 'योजनानि' क०

ज्ञेयो नमः शिवायेति मन्त्रः सर्वार्थसाधकः ॥
सर्वमन्त्राधिकश्चायमोङ्काराद्यः षडक्षरः ।

भविष्ये—

पूर्तयोऽष्टौ शिवस्यैताः पूर्वादिक्रमयोगतः ।
आग्नेय्यन्ताः प्रपूज्यास्तु वेद्यां लिङ्गे शिवं यजेत् ॥

अत्र-*'न प्राचीमग्रतः शंभोः' इति रुद्रयामले निषेधात् नान्तरालं प्राची, किन्तु *प्रसिद्धैव । तिथितत्त्वे देवीपुराणे—

*मृदाहरणसंघट्ट प्रतिष्ठाह्वानमेव च ।
स्नपनं पूजनं चैव विसर्जनमतः परम् ॥
हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।
शिवः पशुपतिश्चैव महादेव इति क्रमः ॥

अन्योपचारेषु च पञ्चाक्षरः षडक्षरो वा मन्त्र इत्यर्थः, नाममन्त्रो वा बोध्यः । *न प्राचीमिति ।

देवाग्रे स्वस्य वाप्यग्रे प्राची प्रोक्ता गुरुक्रमैः ।

इत्यपि द्रष्टव्यम् । तथाच प्राचीमग्रतः कृत्वा संमुखीकृत्य शम्भोः पूजां न कुर्यात् । *प्रसिद्धैवेति । प्राच्यैशान्यादिक्रमेण वामावर्त्तेन, 'आग्नेय्यन्ता' इत्युक्तेः । केचित्तु उदीचीमग्रतः कृत्वा उदीच्यभिमुखीभूयेति । तस्मादन्तरालमेव प्राचीमाहुः । तन्न बहुसंमतम् । *मृदिति । 'ॐहराय नमः' इति मृदमाहृत्य संशोध्य तस्यां शुचि जलं प्रक्षिप्य 'ॐमहेश्वराय नमः' इति संघट्टनं कृत्वा तेन पिण्डेन लिङ्गं कुर्यात् । तच्चाशीतिरक्तिकारूपाद्रक्षादधिकपरिमाणमङ्गुष्ठादधिकोच्चं च । ततः 'ॐशूलपाणये नमः शिवेह सुप्रतिष्ठितो भव' इति प्रतिष्ठाप्य

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतारं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं

स्कान्दे—

शुष्काण्यपि च पत्राणि श्रीवृक्षस्य निवेदयेत् ।

तत्रैव भविष्ये—

धत्तूरकैश्च यो लिङ्गं सकृत्पूजयते नरः ।
स गोलक्षफलं प्राप्य शिवलोके महीयते ॥

योगिनीतन्त्रे—

शिवागारे झल्लकं च सूर्यागारे च शङ्खकम् ।
दुर्गागारे वंशवाद्यं म(२)धूरीं न च वादयेत् ॥

श्राद्धहेमाद्रौ स्कान्दे—

स्पृष्ट्वा रुद्रस्य निर्माल्यं सवा(३)सा आप्लुतः शुचिः ।

प्रयोगपारिजाते क्रियासारे—

मध्यमानामिकामध्ये पुष्पं संगृह्य पूजयेत् ।
अङ्गुष्ठतर्जन्यग्राभ्यां निर्माल्यमपनोदयेत् ॥

विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

इति ध्यात्वा 'पिनाकधृते नमः शिवेहागच्छ' इत्यावाह्य प(१)ञ्चाक्षरेण पाद्यार्घ्याचमनीयानि दत्त्वा 'ॐपशुपतये नमः' इति शुद्धोदकेन संस्नाप्य आचमनीयवस्त्राचमनीययज्ञोपवीतगन्धपुष्पधूपदीपनैवेद्याचमनीयफलताम्बूलदक्षिणानीराजनप्रदक्षिणानमस्कारान् 'ॐनमः शिवाय' इति मन्त्रेण कुर्यात् । ततोऽष्टमूर्त्तिपूजां कुर्यात् । सा चेत्थम्—'ॐशि(२)वाय क्षितिमूर्त्तये नमः' यथास्थितप्राच्याम्, 'ॐभवाय जलमूर्त्तये नमः' इत्यैशान्यां, 'ॐरुद्रायाग्निमूर्त्तये नमः' इत्युत्तरस्यां, 'ॐउग्राय वायुमूर्त्तये नमः' इति वायव्यां, 'ॐभीमायाकाशमूर्त्तये नमः' इति प्राच्यां, 'ॐपशुपतये यजमानमूर्त्तये नमः' इति नैर्ऋत्यां, 'ॐमहादेवाय सोममूर्त्तये नमः' इति दक्षिणस्यां,

---

(१) 'मधुरीं' क० (२) 'वाससा' ख० ग०

(३) 'नमः शिवाय' इत्यनेनेत्यर्थः ।

(४) 'ॐशर्वाय क्षितिपतये' घ०ङ० ।

अपनीतं च निर्माल्यं चण्डेशाय निवेदयेत् ।
अशून्यमस्तकं लिङ्गं सदा कुर्वीत पूजकः ॥

शूलपाणौ लैङ्गे—

वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ।
न चैवापूज्य भुञ्जीत शिवलिङ्गे महेश्वरम् ॥
सूतके मृतके चैव न त्याज्यं शिवपूजनम् ॥

तिथितत्त्वे लैङ्गे—

विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया ।
पूजितोपि महादेवो न स्यात्तस्य फलप्रदः ॥
तस्मान्मृदापि कर्तव्यं ललाटे वै त्रिपुण्ड्रकम् ॥

रुद्राक्षधारणे विशेषः शिवरहस्ये—

एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति ।
अवध्यत्वं प्रतिस्रोतो वह्निस्तम्भं करोति च ॥
द्विवक्त्रो हरगौरी स्याद्गोवधाद्यघनाशकृत् ।
त्रिवक्त्रो ह्यग्निजन्माऽथ पापराशिं प्रणाशयेत् ॥

‘ॐईशानाय सूर्यमूर्त्तये नमः’ इत्याग्नेय्याम् । ततः स्तोत्रादिना स्तुत्वा त्रिः पुष्पाञ्जलिं समर्प्य नत्वा क्षमस्वेति संप्रार्थ्य ‘ॐमहादेवाय नमः’ इति विसर्जयेदिति । शिवपूजायां विशेषः—

आपः क्षीरं कुशाग्राणि दध्यक्षतमधुतण्डुलाः ।
सिताश्च सर्षपाश्चैव अर्घ्योऽष्टाङ्गः प्रकीर्त्तितः ॥
जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः ।
तमालागुरुकर्पूरैः शांभवं चाष्टगन्धकम् ॥
तुलसीबिल्वनिर्गुण्डीजम्बूराम्रवणं तथा ।
पञ्चबिल्वमिति प्रोक्तमर्चयेदिन्दुशेखरम् ॥
गुग्गुलं घृतसंयुक्तं शिवे धूपं निवेदयेत् ।
दधित्थं घृतसंयुक्तं दहेद्बिल्वमथापि वा ॥

चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति ।
पञ्चवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत् ॥
षड्वक्त्रस्तु गुहो ज्ञेयो भ्रूणहत्यादि नाशयेत् ।
सप्तवक्त्रस्त्वनन्तः स्यात्स्वर्णस्तेयादिपापहृत् ॥
विनायकोऽष्टवक्त्रः स्यात्सर्वानृतविनाशकृत् ।
भैरवो नववक्त्रस्तु शिवसायुज्यकारकः ॥
दशवक्त्रः स्मृतो विष्णुर्भूतप्रेतभयापहः ।
एकादशमुखो रुद्रो नानायज्ञफलप्रदः ॥
द्वादशास्यस्तथादित्यः सर्वरोगनिबर्हणः ।
त्रयोदशमुखः कामः सर्वकामफलप्रदः ॥
चतुर्दशास्यः श्रीकण्ठो वंशोद्धारकरः परः ॥ इति ।

दीपादिकं प्रागुक्तं प्रतिष्ठायामिति । प्रतिष्ठा च स्मृत्यन्तरे—

प्रक्षाल्य गन्धतोयेन पञ्चगव्येन चोपरि ।
शिवाम्भसापि प्रक्षाल्य श्रीरुद्रेणाभिषेचयेत् ॥
रुद्राक्षाणां प्रतिष्ठेयमेवं वैदिकसंमता ।
अथवा वैदिकमते प्रतिष्ठा नैव विद्यते ॥

नारदीये—

शिवप्रदक्षिणे मर्त्यः सोमसूत्रं न लङ्घयेत् ।

प्रदक्षिणाप्रकारस्तु—

वृषं चण्डवृषं चैव सोमसूत्रं पुनर्वृषम् ।
चण्डं च सोमसूत्रं च पुनश्चण्डं पुनर्वृषम् ॥

सोमसूत्रप्रमाणं यथा—

प्रासादविस्तारसमानसूत्रं सोमस्य सूत्रं दिशि सोमसूत्रम् ।
सूत्राद्बहिर्लङ्घनतो न दोषः स्याद्दोष आभ्यन्तरलङ्घनेन ॥

लिङ्गावधिकं यावत् प्रासादभित्ति सोमस्य दिशि उत्तरस्यां दिशि सूत्रं सोमस्य सूत्रं सन्न लङ्घयेत् । तदग्रे तल्लङ्घने न दो इत्यर्थः ।

तथा—

विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान्घोरान्यावदिन्द्राश्चतुर्दश ॥
पञ्चामृतं पञ्चगव्यं स्नानकाले प्रयोजयेत् ।
रुद्राक्षस्य प्रतिष्ठायां मन्त्रं पञ्चाक्षरं तथा ॥
त्र्यम्बकादिकमन्त्रं च तथा तत्र प्रयोजयेत् ॥

यद्वा 'ॐ अघोर ॐ ह्रैं अघोरतर ॐ ह्रौं ह्रां नमस्ते रुद्ररूपाय ह्रैं स्वाहा' अनेनाभिमन्त्र्य धारयेत् । तथा—

अष्टोत्तरशतं कार्या चतुःपञ्चाशदेव वा ।
सप्तविंशतिमाना वा ततो हीनाधमाः स्मृताः ॥

प्रजापतिः—

मोक्षार्थी पञ्चविंशत्या धनार्थी त्रिंशता जपेत् ।
पुष्ट्यर्थी पञ्चविंशत्या पञ्चदश्याभिचारिके ॥
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यत्करोति नरः पुण्यं सर्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजेभ्यश्च रुद्राक्षं भुवि सन्मुखम् ।
तस्य प्रीतो भवेद्रुद्रः स्व(१)पदं च प्रयच्छति ॥ इति ।

पदार्थादर्शे बोपदेवः—

रुद्राक्षान्कण्ठदेशे दशनपरिमितान्मस्तके विंशती द्वे
षट् षट् कर्णप्रदेशे करयुगलकृते द्वादश द्वादशैव ।
बाह्वोरिन्दोः कलाभिर्नयनयुगकृते एकमेकं शिखायां
वक्षस्यष्टाधिकं यः कलयति शतकं स स्वयं नीलकण्ठः ॥

हेमाद्रौ शिवधर्मे—

स्नानं पलशतं ज्ञेयमभ्यङ्गः पञ्चविंशतिः ।
पलानां द्वे सहस्रे तु महास्नानं प्रकीर्तितम् ॥
पञ्चविंशत्पलं लिङ्गे अभ्यङ्गं कारयेदथ ।

---

(१) 'स्वपदे' ग०

शिवस्य सर्पिषा स्नानं प्रोक्तं पलशतेन च ॥
तावता मधुना चैव दध्ना चैव ततः पुनः ।
तावतैव च क्षीरेण गव्येनैव भवेत्ततः ॥
भूयः सार्धसहस्रेण पलानामैक्षवेण च ।
रसेन कारयेत्स्नानं भक्त्या चोष्णाम्बुना ततः ॥

विष्ण्वादौ तु स्कान्दे--

क्षीराद्दशगुणं दध्ना घृतेनैव दशोत्तरम् ।
घृताद्दशगुणं क्षौद्रं क्षौद्राच्चैक्षवजं तथा ॥

ब्राह्मे--

देवानां प्रतिमा यत्र घृताभ्यङ्गक्षमा भवेत् ।
पलानि तत्र देयानि श्रद्धया पञ्चविंशतिः ॥

इदं क्रोडीकृताभिप्रायेण । तत्रैव संग्रहे—

विष्वक्सेनाय दातव्यं नैवेद्यस्य शतांशकम् ।
पादोदकं प्रसादं च लिङ्गे चण्डेश्वराय तु ॥

पञ्चायतनसंनिवेशमाह बोपदेवः पदार्थादर्शश्च—

शंभौ मध्यगते हरीनहरभूदेव्यो हरौ शंकरे-
भास्येनागसुता रवौ हरगणेशाजाऽम्बिकाः स्थापिताः ।
देव्यां विष्णुहरेभवक्त्ररवयो लम्बोदरेऽजेश्वरे-
नाम्बाः शंकरभागतोऽतिसुखदा व्यस्तास्तु हानिप्रदाः ॥

शंकरभागतः ईशानकोणादारभ्य प्रदक्षिणमित्यर्थः । *अत्र दिक्स्वरूपमुक्तं प्रयोगपारिजाते मन्त्रशास्त्रे—

देवस्य मुखमारभ्य दिशं प्राचीं प्रकल्पयेत् ।
तदादि परिवाराणामङ्गाद्यावरणस्थितिः ॥

---

*अत्रेति । पञ्चायतनसन्निवेशे इत्यर्थः ।

यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदन्ति ।

इत्युक्ता प्राची न ग्राह्येत्यभिप्रायः । अत्र वदन्ति-इयं प्राची तान्त्रिकपूजायामेव न वैदिकपूजायां, तस्यां तु प्रसिद्धैव आवरण-

तत्र क्रमः पाद्मे—

*रविर्विनायकश्चण्डी ईशो विष्णुस्तु पञ्चमः ।
अनुक्रमेण पूज्यन्ते व्युत्क्रमे तु महद्भयम् ॥

द्यभावात् । पञ्चायतनसंनिवेशोऽपि प्रसिद्धैव प्राची नतु पूज्यपूजकमध्यरूपेति । *रविरिति पौराणः प्रकारः । तान्त्रिकस्तु पञ्चानां मध्ये मुख्यस्यावाहनादिनमस्कारान्तं पूजाकाण्डं समाप्य अन्यस्येत्येवं कण्डानुसमयः ।

मुख्ये पुष्पाञ्जलिं दत्त्वा गणेशाद्यर्चनं भवेत् ।
गणेश एव मुख्यश्चेत्तत्र सूर्यक्रमाद्भवेत् ॥

इति क्रमाभिधानात् । मुख्ये प्रधानदेवतायां पुष्पाञ्जल्यन्तपूजाकाण्डं समाप्य पदार्थानुसमयेन गणेशादीनर्चयेदित्यर्थः । शारदातिलकटीकायां पुष्पाञ्जल्यन्तरमादौ विधीयते इत्युक्तम् । अत्र पक्षान्तरे मुख्यत्वोक्त्या देवतान्तरस्याङ्गत्वं लभ्यते । एवञ्चाङ्गप्रधानपूजयोरेककालीनत्वं सिद्ध्यति । तथाच सर्वेषामावाहनं ततः स्थापनमिति पदार्थानुसमय एव । ततः मुख्ये मध्ये पुष्पाञ्जल्यन्तां पूजां कृत्वाऽङ्गदेवतापूजा कार्येति । एतत्पक्षद्वयमपि तान्त्रिकपूजायामेव तत्रैवोक्तत्वात् । वैदिकपूजायां स्थापनक्रम एव ।

गणार्कौ (तु)समभ्यर्च्य शैवो विष्णुं प्रपूजयेत् ।
अर्चयेच्च शिवं पश्चाच्छिवमादौ तु वैष्णवः ।
ततो विष्णुं ततो दुर्गामेवं स्यादर्चनाक्रिया ॥

अत्र गणेशार्कयोः क्रमे न तात्पर्यं, किन्तु तावपूजयित्वा प्रधानं न पूज्यमित्यत्र । आदौ न सर्वादौ किन्तु विष्णवादौ । पौराणोऽयं क्रमः । आगमोक्तस्तु योगिनीतन्त्रे—

गणेशसूर्यविष्णवीशदुर्गा आवाह्य पूजयेत् । इति ।

अत एव विष्णुशिवगणेशसूर्यदुर्गाभ्यो नम इत्यादि श्लिष्टमन्त्र एव विष्णुपञ्चायतने वाजपेययाजिभिरुक्तः । सूर्यातिरिक्तपञ्चायतनपूजापि आदौ सूर्यपूजां कृत्वैव कार्या,

तथा—

पूज्यपूजकयोर्मध्ये प्राची प्रोक्ता विचक्षणैः ॥

अथ केशवादिमूर्तयः । बोपदेवः—

केविंगोवादापुहृपेप्रजाच्युकृमभमात्रिना ।
वाऽधोनृहसानिश्रीपा शाच्चगे वि गपे चपे ॥

अत्र केविगवित्याद्यैः केशवविष्ण्वादिचतुर्विंशतिमूर्तयोऽभिधीयन्ते । शात् शङ्खात् चगे चक्रगदे ज्ञेये इत्यर्थः । शिष्टे भुजे पद्मं त्वर्थतः सिद्धम् । अत्र दक्षि(१)णोर्ध्वकरक्रमेण ज्ञेयम्, 'दक्षि(१)णोर्ध्वकरक्रमात्' इति हेमाद्रौ वचनात् तेन हेमाद्रिणा संवादः । विशब्देन विपरीतं गचे इत्यर्थः । अत्रापि (२)शादित्यनुवृत्तिः । शङ्खाद्गदाचक्रे इत्यर्थः । गपे इत्यत्रापि शादनुवर्तते । शङ्खाद्गदापद्मे इत्यर्थः । विपरीते पद्मगदे इत्यत्रापि शङ्खाज्ज्ञेये । चपे चक्रपद्मे । शङ्खाच्चक्रपद्मे इत्यर्थः । वि इति अत्रापि, पद्मचक्रे इत्यर्थः । तेन(३)चगे इत्यष्टौ मूर्तयः । गपे इत्यष्टौ मूर्तयः । चपे इत्यत्र च । अत्र *मूलं हेमाद्रौ ज्ञेयम् ।

प्रातःसन्ध्यावसाने तु नित्यं सूर्यं समर्चयेत् ।

इति वचनात्,

अपूज्य प्रथमं सूर्यमपरान् यः प्रपूजयेत् ।
न तद्भूतकृतं पाद्यं संप्रतीक्षन्ति देवताः ॥

इति ब्राह्माच्च ।

*मूलमिति ।

शंखचक्रगदाब्जतः केशवः सूर्यसप्रभः ।
(इतः युक्तः)

---

(१) 'दक्षिणाधः क' ख० (२) 'अत्रापि शब्दादनु' ख०
(३) 'तेन च गदे' ख०

कज्जकम्बुचक्रगदायुतो विष्णू रविप्रभः ॥
गदाब्जशंखचक्रैतो गोविन्दो भास्करद्युतिः ।
वामनोऽरिगदापद्मशंखैतो रविसुप्रभः ॥
दामोदरः शंखगदाचक्रपद्मार्कसप्रभः ।
पद्मशंखगदाचक्रो सूर्याभः पुरुषोत्तमः ॥
सारिपद्मः शंखगदो हृषीकेशोऽर्कसप्रभः ।
उद्यदर्कनिभोपेन्द्रो गदाचक्राब्जशंखयुक् ॥
प्रद्युम्नो रविभः शंखगदाब्जारिधरो विभोः ।
जनार्दनश्चक्रशंखगदाब्जैतो रविप्रभः ॥
सूर्याभोऽच्युतनामाब्जचक्रशंखगदायुधः ।
उद्यदर्कनिभः कृष्णो गदापद्मारिशंखभृत् ॥
सशंखाब्जगदाचक्रः सूर्याभो मधुसूदनः ।
माधवश्चक्रशंखाब्जगदैतो रविसुप्रभः ॥
त्रिविक्रमो गदाचक्रशंखपद्मो रविप्रभः ।
नारायणः साब्जगदाचक्रशंखो रविप्रभः ॥
शंखचक्रे पद्मगदे वासुदेवो रविद्युतिः ।
रविप्रभो गदाशंखचक्राब्जैतो ह्यधोक्षजः ॥
नृसिंहः सूर्यभः पद्मगदाशंखादिसंयुतः ।
सारिपद्मगदाशंखो हरिः प्रद्योद्रविप्रभः ॥
शंखाब्जारिगदासूर्यप्रभः संकर्षणो विभुः ।
अनिरुद्धो गदाशंखपद्मचक्री रविप्रभः ॥
श्रीधरोऽरिगदाशंखपद्मैतोऽर्कसमद्युतिः ।
पद्मनाभः साब्जचक्रगदाशंखोऽजसन्निभः ॥ इति ।

श्रीक्रमेणापि यथा खिकेदानचीमाढगनात्रिधिंमत्रिढंजीवजश्रीर्द्धहाथिंपणादासद्यार्खींट्टृधीमानिर्टीतिंपुंटादौनृदंथाच्युचिंजोपर्टींहानिझठाक्ठ ॥ अस्यार्थः शंखचक्रगदापद्मानि भवतो धार्याणि । तेषां क्रमेण अआइईसंज्ञाः । एवं शंखस्य कखगघेति चत्वारो वर्णाः संज्ञाः।

अथ बौधायनसूत्रं त्रैविक्रमीं चानुसृत्य लिङ्गार्चाप्रतिष्ठोच्यते—'यजमानः पूर्वोक्तकाले पूर्वेद्युः दशद्वादशषोडशान्यतरहस्तं मण्डपं कृत्वाऽऽग्नेये हस्तमात्रं चतुरस्रं कुण्डं स्थण्डिलं वा पूर्वतो हस्तमात्रां वेदीं नैर्ऋते वा(१)स्तुमण्डपं मध्ये वेदीं तदुपरि सर्वतोभद्रं कृत्वा प्राणानायम्यास्यां मूर्तौ लिङ्गे(२) वा देवस्य सान्निध्यसिद्ध्यर्थं दीर्घायुर्लक्ष्मीसर्वकामसमृद्ध्यक्षय्यसुखकामोऽमुकमूर्तिप्रतिष्ठां करिष्ये इति सङ्कल्प्य गणेशपूजनपुण्याहवाचनमातृकापूजननान्दीश्राद्धानि कृत्वाचार्यं चतुर ऋत्विजश्च वृत्वा वस्त्राद्यैः पूजयेत्। अथाचार्यो यदत्र संस्थितमिति सर्षपान् विकीर्यापोहिष्ठेति कुशोदकेन भूमिं प्रोक्ष्य देवा आयान्तु, यातुधाना अपयान्तु, विष्णो देवयजनं रक्षस्वेति भूमौ प्रादेशं कृत्वाऽस्मत्कृततुलापद्धतिमार्गेण मण्डपप्रतिष्ठां कृत्वाऽकृत्वा वा पूर्वरात्रौ हिरण्योपधानं देवं पञ्चगव्यहिरण्ययवदूर्वाश्वत्थपलाशपर्णान्युदकुम्भे प्रक्षिप्य ताभिरद्भिरापोहिष्ठेति तिसृभिर्हिरण्यवर्णा इति चतसृभिः पवमानःसुवर्जन इ-

चक्रस्य चछजझेति। गदायाः टठडढेति। पद्मस्य तथदधेति। एवञ्च खिके इत्यादौ प्रथमैः कचटतैः प्रथमः शंखः, द्वितीयैः खछठथैः द्वितीयं चक्रं, तृतीयैः गजडदैः तृतीया गदा, चतुर्थैः घझढधैश्चतुर्थं पद्ममिति च ऊर्ध्वं दक्षिणकरक्रमेण विन्यासात्केशवादिमूर्त्तयः। अथार्थः—खिके खं शंखः संज्ञात्वात्, खश्चक्रं द्वितीयत्वात्, ईर्गदा संज्ञात्वात्, शिष्टं पद्ममर्थलभ्यम्, केशवः। दानः दः पद्मं संज्ञात्वात्, दः गदा तृतीयत्वात्, आ चक्रं संज्ञात्वात्, शिष्टः शंखः, नारायणः एवं क्रमेण चीमा इत्यादेरर्थः कार्यः।

---

(१) 'मण्डलमध्ये' ख० 'मण्डलं मध्ये' क०

(२) 'लिङ्गेवा' नास्ति ख०

त्यनुवाकेनाभिषिच्य व्याहृतिभिरिदंविष्णुरिति फलयवदूर्वाः समर्प्य(१)नमस्ते रुद्रमन्यव इति रुद्रे ततो रक्षोहणमिति हस्ते कङ्कणं बद्धा वाससाच्छाद्य अवतेहेड उदुत्तममिति जलेऽधिवासयेत्'। इदं बौधायनोक्तम्।

ततश्चललिङ्गे अर्चायां वा अत्राग्निं प्रतिष्ठाप्य गोक्षीरे नीवारचरुं कृत्वा विष्णुश्चेत् कृसरमपि श्रपयित्वाऽऽज्यभागान्ते पलाशोदुम्बराश्वत्थशम्यपामार्गसमिद्भिः आज्येन चरुणा तिलैर्वा प्रत्येकमष्टाविंशतिमष्टौ वाऽऽहुतीर्लोकपालमूर्तिपातिभ्यो हुत्वा स्थाप्य देवमन्त्रेण पूर्वोक्तसमित्तिलनैवारचर्वाज्यैरष्टसहस्रमष्टशतमष्टाविंशतिं वा हुत्वा 'अग्निर्यजुर्भिः' इत्यनुवाकेन दशाहुतीर्जुहुयात्। प्रतिद्रव्यहोमान्ते देवं पादनाभिशिरस्सु स्पृशेत्। आज्यहोमे चोत्तरतः सजलकुम्भे संपातान्नयेत्। तेषां मन्त्राः–इन्द्रायेन्दो इतीन्द्रस्य, स्योनेति पृथिवीमूर्तेः, अघोरेभ्य इति तत्पतेः, शर्वस्य अग्न आयाहीत्यग्नेः, अग्निं दूतमित्याग्निमूर्तेः, न(१)मः शर्वाय च पशुपतये चेति पशुपतेः, यमाय सोमामिति यमस्य, असि हि वीरिति यजमानमूर्तेः, स्तुहि श्रुतं तत्पतेः उग्रस्य, असुन्वन्तं निर्ऋतेः, आकृष्णेन सूर्यमूर्तेः, यो रुद्रो अग्नौ इति तत्पते रुद्रस्य, इमं मे वरुणस्य, शंनो देवी जलमूर्तेः, नमो भवायेति भवस्य, आनो नियुद्भिरिति वायोः, वात आ वातु वायुमूर्तेः, तमीशानं तत्पतेरीशानस्य, आप्यायस्वेति कुबेरस्य, वयंसोमेति सोममूर्तेः, तत्पुरुषाय महादेवस्य, अभित्वा ईशानस्य, आदित्प्रत्नस्येत्याकाशस्य, नम उग्राय चेति तत्पतेर्भीमस्य। ततो देवस्य पादौ स्पृशेत्। एवं द्वितीये

---

(१) 'नमस्ते रुद्रमन्यव इति रुद्रे ततो' नास्ति ख० ग०

(१) 'नमः शिवाय' क०।

हुत्वा नाभिं, तृतीये मध्यं, चतुर्थे उरः, पञ्चमे शिरः स्पृष्ट्वा प्रतिपर्यायं संपातजलेन देवमभिषिञ्चेत। ततः स्विष्टकृदादिहोमशेषं समाप्यार्चां शोधयेत्। स्थिरलिङ्गार्चादौ तु नेदानीमग्निस्थापनहोमादि कार्यम्।

ततो देवं नत्वा—

स्वागतं देवदेवेश विश्वरूप नमोऽस्तु ते।
शुद्धेऽपि त्वदधिष्ठाने शुद्धिं कुर्मः सहस्व ताम्॥

इति संप्रार्थ्य 'उत्तिष्ठ ब्रह्मणस्पते' इति सर्त्विगुत्थाप्य पूर्वमकृतेऽग्न्युत्तारणे अधुना वा कार्यम् 'अग्निःसप्तिम्' इति सूक्तमग्निपदहीनं पठित्वा तत्सहितं पुनः पठेत्। एवमष्टसहस्रमष्टशतमष्टाविंशति वा पठन् जलं पातयेत्। ततोऽर्चां द्वादशवारं मृदा जलेन च प्रक्षाल्य मन्त्रवत्पञ्चगव्यं कृत्वा 'पयः पृथिव्याम्' 'आवोराजानम्' इति च संस्नाप्य 'आप्यायस्व' 'दधिक्राव्णः' 'तेजोसि' 'मधुवाता' 'आयं गौः' इति पञ्चामृतैः संस्नाप्य लिङ्गं चेत् 'नमस्ते रुद्र मन्यवे' इत्यष्टाभिः संस्नाप्य घृतेनाभ्यज्योद्वर्तनेनोद्वर्त्योष्णोदकेन प्रक्षाल्य गन्धं दत्त्वा संपातोदकेनाभिषिच्य सपल्लवैश्चतुर्भिः कुम्भैः 'आपोहिष्ठा' इति त्रिभिः 'आकलशेषु' इति च प्रत्येकं, 'समुद्रज्येष्ठा' इति चतुर्भिः 'आकलशेषु' इति च मिलितैः संस्नाप्यौदुम्बरादिपीठेऽर्चामुपवेश्य परितोऽष्टादिक्षु सजलकुम्भान्संस्थाप्य तेषु गन्धपुष्पदूर्वाः क्षिप्त्वा आद्ये सप्तमृदः, द्वितीये पुष्करपर्णशमीविकङ्कताश्मन्तकत्वचः पल्लवाश्च, तृतीयादिषु सप्तधान्यं पञ्चरत्नफलपुष्पाणि कुशदूर्वागोरोचनसम्पातोदकगन्धफलसर्वौषधीः क्षिप्त्वा क्रमेण 'आपोहिष्ठा' इति तिसृभिः 'हिरण्यवर्णाः' इति चतसृभिः पवमानानुवाकेन चाभिषिच्यैककुम्भे

शमीपलाशवटखदिरबिल्वाश्वत्थविकङ्कतपनसाम्रशिरीषोदुम्बराणां पल्लवान् कषायांश्च क्षिप्त्वा 'अश्वत्थेवः' इत्यभिषिच्य पञ्चरत्नोदकेन 'हिरण्यवर्णाः' इति संस्नाप्य वाससी दत्त्वा उपवीतादि दीपान्तं कृत्वा 'हिरण्यगर्भः' 'य आत्मदा' 'यः प्राणतः' 'यस्येमे' 'येन द्यौः' 'यं क्रन्दसी' 'आपो ह यत्' 'यश्चिदापो' इत्यष्टौ पिष्टदीपान् दत्त्वा सुवर्णशलाकया तैजसपात्रस्थं मधु घृतं च गृहीत्वा 'चित्रं देवानां' 'तेजोसि' इति मन्त्राभ्यां

ॐ नमोभगवते तुभ्यं शि(१)वाय हरये नमः ।
हिरण्यरेतसे विष्णो विश्वरूपाय ते नमः ॥

इति च दक्षिणसव्ये देवनेत्रे मन्त्रावृत्त्या लिखेत् । 'अञ्जन्ति त्वा' इत्यञ्जनेन मधुना वाऽङ्क्त्वा 'देवस्य त्वा सवितुः प्र(२)सवे० इन्द्रस्येन्द्रियेणानज्मि' इति मध्वाज्यशर्कराभिरङ्क्त्वा तेनैवाञ्जनेन पुनरञ्जयेत् । स्थिरलिङ्गे तु स्वर्णसूच्या गन्धेन । 'ॐ नमो भगवते रुद्राय हिरण्यरेतसे पराय परमात्मने विश्वरूपायोमाप्रियाय नमः' इत्यञ्जनादिनाऽञ्जयेत् । ततः आदर्शभक्ष्यादि दर्शयेत् । ततः कर्ता आचार्याय गामृत्विग्भ्यश्च दक्षिणां दद्यात् । अथाचार्यः प्रत्यृचमादौ प्रणवं वदन् पुरुषसूक्तेन स्तुत्वा वंशपात्रे पंचवर्णौदनेन देवस्य नीराजनं कारयित्वा रुद्राय चतुष्पथादौ दद्यात् । मन्त्रस्तु–'ॐ नमो रुद्राय सर्वभूताधिपतये दीप्तशूलधरायोमादयिताय विश्वाधिपतये रुद्राय वै नमो नमः शिवमगर्हितं कर्मास्तु स्वाहा' इति । अश्वत्थपर्णौ भूतेभ्यो नम इति । केचिदेतद्रात्रौ स्थिरप्रतिष्ठायामिच्छन्ति ।

अथाचार्यः सर्वतोभद्रे देवानावाहयेत् । मध्ये ब्र-

---

(१) 'हराय हरये' क०

(२) 'प्रसवे० इन्द्रस्येन्द्रियेणानज्मि' नास्ति क०

ह्माणम्, पूर्वादिदिक्षु इन्द्रादिलोकपालान्, ईशानेन्द्राद्यन्तरालेषु वसून् रुद्रान् आदित्यान् अश्विनौ विश्वान्देवान् पितॄन् स्कन्दवृषौ, ब्रह्मेशानाद्यन्तरालेषु दक्षं विष्णुं दुर्गां स्वधाकारं मृत्युरोगान् समुद्रान् सरितः मरुतः गणाधिपं चेति। मध्ये एव पृथिवीं मेरुं संस्थाप्य देवं चावाह्य प्रागादि वज्रं शक्तिं दण्डं खड्गं पाशम् अङ्कुशं गदां शूलं, तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठम् अत्रिम् अरुन्धतीं च, तद्बाह्ये नवग्रहान्, तद्बाह्ये ऐन्द्रीं कौमारीं ब्राह्मीं वाराहीं चामुण्डां वैष्णवीं माहेश्वरीं वैनायकीमित्येताः नामभिरावाह्य सम्पूज्य अर्चायां देवं तन्मन्त्रेणावाह्य मण्डलमध्येऽर्चां 'सुप्रतिष्ठो भव' इति निवेश्य संपूज्य वह्नौ मण्डलदेवतानां नामभिस्तिलाज्येन दशदशाहुतीर्हुत्वा पुष्पाञ्जलिं समर्प्य 'नमो महत्०' इति देवं नत्वा मण्डलादुत्तरतः स्वास्तिके मञ्चकं तदुपरि शय्यां कृत्वा 'उत्तिष्ठ' इति देवमुत्थाप्य मङ्गलघोषैः शय्यायां देवमारोप्य पुरुषसूक्तोत्तरनारायणाभ्यां स्तुत्वा देवे न्यासं कुर्यात्। तद्यथा—पुरुषात्मने नमः, प्राणात्मने०, प्रकृतितत्त्वाय०. बुद्धितत्त्वाय०, अहंकारतत्त्वाय०, मनस्तत्त्वाय० इति सर्वाङ्गे। प्रकृतितत्त्वाय०, बुद्धितत्त्वाय० हृदि। शब्दतत्त्वाय० शिरसि। स्पर्शतत्त्वाय० त्वचि। रूपतत्त्वाय० हृदि। एवं हृद्येव रसगन्धश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थपृथिव्यप्तेजोवाय्वाकाशसत्त्वरजस्तमोदेहतत्त्वानि विन्यसेत्। ततः पुरुषसूक्तस्याद्यमृग्द्वयं करयोः, तदुत्तरं जान्वोः, तदुत्तरं कट्योः, 'तं यज्ञम्' इति तिस्रः नाभिहृत्कण्ठेषु, 'तस्मादश्वा' इति द्वयं बाह्वोः, 'ब्राह्मणोस्य' इति द्वयं नासयोः, 'नाभ्या' इति द्वयमक्ष्णोः, अन्त्यां शिरसि। केचित्तत्त्वन्यासमन्य

था आहुः। पुरुषप्रकृतिमहदहंकारतत्त्वानि, शब्दस्पर्शरूपरसगन्धतन्मात्राणि, आकाशवायुतेजोऽप्पृथिवीश्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति। केचिदेतानि स्थिरलिङ्गादावेवेच्छन्ति। ततः 'सुखशायी भव' इति शय्यायां देवं स्वापयित्वा मण्डलशय्ययोरन्तराले न गन्तव्यमिति प्रैषं दत्त्वा स्विष्टकृदादिहोमशेषं समाप्य मण्डलदेवताभ्यो नामभिः पायसेन चरुणा वा बलीन्दद्यात्, नीवारचरुशेषेण दिग्बलिम्। नेदं स्थिरप्रतिष्ठायाम्। स्थिरलिङ्गार्चादौ त्वयं विशेषः-'अग्निस्थापनहोमवर्ज्यं सर्वं पूर्ववत्कृत्वा इदानीमग्निस्थापनं कृत्वा पूर्वोक्तहोमं कुर्यात्। नात्र नैवारश्चरुः। विष्णुश्चेत्पूर्वोक्तहोमं कृत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं हुत्वा 'इदं विष्णुः' इति पादौ स्पृष्ट्वा पुनस्ता एव हुत्वा 'विष्णोर्नुकम्' इति नाभि (१)स्पृष्ट्वा पुनस्ता एव हुत्वा 'अतो देवा' इति शिरः स्पृष्ट्वा पुनस्ता एव हुत्वा पुरुषसूक्तेन सर्वाङ्गं स्पृशेत्। स्थिरलिङ्गं चेदग्निस्थापनादि पूर्वोक्तसमिदाज्यतिलाहुतीर्हुत्वा 'या त इषुः' इत्यनुवाकान्तेन 'द्रापे' 'सहस्राणि' इत्यनुवाकाभ्यां च प्रत्यृचमाज्यं हुत्वा 'सर्वो वै रुद्रः' इति मूलं स्पृशेत्। पुनस्ता एव हुत्वा 'कद्रुद्राय' इति मध्यम्, पुनस्ता एव हुत्वा 'नमो हिरण्यबाहवे' इत्यग्रम्, पुनस्ता एव हुत्वा सर्वरुद्रेण सर्वाङ्गं स्पृशेत्। ततो 'धामन्त' इति पूर्णाहुतिं जुहुयान्न वा। एवमधिवासनं कृत्वा परेद्युः सद्यो वा पीठिकां स्नापयित्वा 'महीमूषु' इत्यावाह्य 'अदितिर्द्यौः' इति स्तुत्वा 'ह्रीं नमः' इति संपूज्य तेनैव पूर्णाहुतिं हुत्वा 'उत्तिष्ठ ब्रह्मणस्पते' इति देवमुत्थाप्य पुष्पा-

---

(१) 'स्पृशेत्' क०।

ञ्जलिं दत्त्वा पुरुषसूक्तेन स्तुत्वा 'उदुत्यम्' इत्युत्थाप्य 'कनिक्रदत्' इति सूक्तेन विष्णुं 'सद्योजातम्' इति पञ्चानुवाकैर्लिङ्गं गृहं प्रवेश्य पीठिकायाम् इन्द्रादिनामभिरष्टरत्नानि क्षिप्त्वा सप्तधान्य(१)रूप्यवृषमनःशिलाः क्षिप्त्वा पायसेन संलिप्य प्रणवेनाङ्गन्यासं कृत्वा सुवर्णशलाकामन्तरितां कृत्वा सुलग्ने 'ॐ प्रतितिष्ठ परमेश्वर' इत्युक्त्वा 'अतो देवा' इति विष्णु रुद्रेण च लिङ्गं स्थापयेत् । ततः प्राणप्रतिष्ठा ।

चलार्चादौ त्वधिवासनान्ते परेद्युः 'उत्तिष्ठ ब्रह्मणस्पते' इति देवमुत्थाप्य पुरुषसूक्तोत्तरनारायणाभ्यां स्तुत्वा घृते व्रीहिचरुं कृत्वा तद्देवतामन्त्रेण दशाहुतीर्हुत्वा नामभिर्जुहुयात् । अग्नये स्वाहा, सोमाय स्वाहा, धन्वन्तरये स्वाहा, कुह्वै स्वाहा, अनुमत्यै स्वाहा, प्रजापतये स्वाहा, परमेष्ठिने स्वाहा, ब्रह्मणे स्वाहा, अग्नये स्वाहा, सोमाय स्वाहा, अग्नयेऽन्नादाय स्वाहा, अग्नयेऽन्नपतये स्वाहा, प्रजापतये स्वाहा, विश्वेभ्यो देवेभ्यः स्वाहा, सर्वेभ्यो देवेभ्यः स्वाहा, भूर्भुवःस्वः स्वाहा, अग्नये स्विष्टकृते इति । ततः 'सप्त ते अग्ने' 'पुनस्त्वा' इत्याभ्यां पूर्णाहुतिः । तत आचार्यो 'या ओषधीः' इति पुष्पफलसर्वौषधीः समर्प्य संपातोदकं (२)ताम्रपात्रे आदाय देवमन्त्रेण शतवारमभिमन्त्र्य तेनैवाभिषिञ्चेत् । ततः 'उत्तिष्ठ' इति देवमुत्थाप्य 'विश्वतश्चक्षुः' इत्युपस्थाय देवं ध्यात्वा जपेत् । ब्रह्मणे नमः । एवं विष्णवे० रुद्राय० इन्द्रादीन् अष्टौ वसुभ्यो रुद्रेभ्य आदित्येभ्योऽश्विभ्यां मरुद्भ्यः कुबेराय गङ्गादिमहानदीभ्योऽग्नीषोमाभ्यामिन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वन्तरये

---

(१) 'वृष' नास्ति क० । (२) 'ताम्रपात्रे' नास्ति क० ।

सर्वेशाय विश्वेभ्योदेवेभ्यो ब्रह्मणे नम इति । ततः संपातोदकेन यजमानमभिषिच्य देवं ध्यात्वा 'ॐप्रतितिष्ठ परमेश्वर' इति पुष्पाञ्जलिं निवेद्य सच्चिदानन्दं ब्रह्मैव भक्तानुग्रहाय गृहीतविग्रहं करचरणाद्यवयविनं शङ्खचक्राद्यायुधवन्तं निजवाहनाद्युपेतं निजहृत्कमलेऽवस्थितं सर्वलोकसाक्षिणमणीयांसं 'परमेष्ठ्यासि परमां श्रियं गमय' इति मन्त्रेण पुष्पाञ्जलावागतं विभाव्याऽर्चायां विन्यस्य प्राणप्रतिष्ठां कुर्यात् ।

यथा-अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः, ऋग्यजुःसामानि छन्दांसि, क्रियामयवपुःप्राणाख्या देवता, आं बीजम्, क्रों शक्तिः, प्राणप्रतिष्ठायां विनियोगः । तत ऋष्यादीन् क्रमेण शिरोमुखहृदयगुह्यपादेषु विन्यस्य ॐ कं खं गं घं ङं अं पृथिव्यप्तेजोवाय्वाकाशात्मने आं हृदयाय नमः । ॐ चं छं जं झं ञं इं शब्दस्पर्शरूपरसगन्धात्मने ईं शिरसे स्वाहा । ॐ टं ठं डं ढं णं उं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने ऊं शिखायै वषट् । ॐ तं थं दं धं नं एं वाक्पाणिपादपायूपस्थात्मने ऐं कवचाय हुम् । ॐ पं फं बं भं मं ओं वचनादानविहरणोत्सर्गानन्दात्मने औं नेत्रत्रयाय वौषट् । ॐ यं रं लं वं शं षं सं हं ळं क्षं अं मनोबुद्ध्यहंकारचित्तात्मने अः अस्त्राय फट् । एवम् आत्मनि देवे च कृत्वा देवं स्पृष्ट्वा जपेत्-ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य प्राणा इह प्राणाः । ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य जीव इह स्थितः । ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य सर्वेन्द्रियाणि । ॐ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं सः देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य स्वस्तये सुखेन सुचिरं तिष्ठन्तु स्वाहेति । ततोऽर्चाहृद्यङ्गुष्ठं द-

त्वा जपेत्—

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च।
अस्यै देवत्वमर्चायै मामहेति च कश्चन॥ इति।

ततः प्रणवेन संरुध्य सजीवं ध्यात्वा 'ध्रुवा द्यौः' इति तृचं जप्त्वा कर्णे गायत्रीं देवमन्त्रं च जप्त्वा पुरुषसूक्तेनोपस्थाय पादनाभिशिरःसु स्पृष्ट्वा 'इहैवैधि' इति त्रिर्जपेत्। ततः कर्ता—

स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः।
प्राकृतं त्वमदृष्ट्वा मां बालवत्परिपालय॥
धर्मार्थकामसिद्ध्यर्थं स्थिरो भव शुभाय नः।
सांनिध्यं तु सदा देव स्वार्चायां परिकल्पय॥
यावच्चन्द्रावनीसूर्यास्तिष्ठन्त्यप्रतिघातिनः।
तावत्त्वयाऽत्र देवेश स्थेयं भक्तानुकम्पया॥
भगवन् देवदेवेश त्वं पिता सर्वदाहिनाम्।
येन रूपेण भगवंस्त्वया व्याप्तं चराचरम्॥
तेन रूपेण देवेश स्वार्चायां सन्निधो भव।

इति नमेत्। एतदन्तं सर्वदेवानां समानम्। देवमन्त्रश्च मूलमन्त्रो वैदिको वा ग्राह्यः।

अथाचार्यः कर्ता वा लिङ्गमर्चां वा ॐ भूः पुरुषमावाहयामि, ॐ भुवः पुरुषमावाहयामि, ॐ सुवः पुरुषमावाहयामि, ॐ भूर्भुवःसुवः पुरुषमावाहयामीत्यावाह्य प्रणवेनासनं दत्त्वा तेनैव दूर्वाश्यामाकविष्णुक्रान्तापद्ममिश्रं पाद्यम्, 'इमा आपः शिवतमाः (१)पूताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पाद्यास्ता जुषतां प्रतिगृह्यतां प्रतिगृह्णातु भगवान् महाविष्णुर्विष्णवे नमः' इति पाद्यम्, 'भगवान् महादेवो रुद्राय नमः'

---

(१) 'पूताः' नास्ति क०।

इति लिङ्गे, (१)एवं देवतान्तरेषूह्यम् । 'इमा आपः आचमनीयास्ता जुषताम्' (२)इति एलालवङ्गकङ्कोलकर्पूरमिश्रमाचमनीयम्, आपः क्षीरकुशाग्रैश्चाक्षतैर्यवतण्डुलैः यवैः सिद्धार्थकैश्चैव अर्घ्या इत्यर्घ्यम् । ततो वेदमन्त्रैः संस्नाप्य 'इदं विष्णुः' इति विष्णौ 'नमो अस्तु नीलग्रीवाय' इति लिङ्गे प्रतिसरं विस्रस्य (३)वस्त्रं यज्ञोपवीतं च दत्त्वा—

इमे गन्धाः शुभा दिव्याः सर्वगन्धैरलंकृताः ।
पूता ब्रह्मपवित्रेण पूताः सूर्यस्य रश्मिभिः ॥

इति गन्धम्,

'इमे माल्याः शुभा दिव्याः सर्वमाल्यैरलंकृताः ।
पूता०'इत्यादिमाल्यम्, 'इमे पुष्पाः शुभा०'इत्यादि पुष्पम्,

वनस्पतिरसोद्भूतो (४)गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः(५) सर्वदेवानां धूपोयं प्रतिगृह्यताम् ॥

प्रतिगृह्णात्वित्यादि धूपम्,

ज्योतिः शुक्रं च तेजश्च देवानां सततं प्रियः ।
(६)प्रज्योतिः सर्वभूतानां दीपोयं प्रतिगृह्यताम् ॥

इति दीपं दत्त्वा विष्णौ संकर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युतजनार्दनोपेन्द्रहरिश्रीकृष्णेतिद्वादशनामभिः केशवादिद्वादशनामभिर्वा पुष्पाणि समर्प्य तैरेव तर्पणं कृत्वा (७)पायसगुडौदनांचित्रौद-

---

(१) 'एवं देवतान्तरेषूह्यम्' नास्तिः क० ख० ।

(२) 'इत्याचमनीयम्, अर्घ्या' ग० ।

(३) 'वस्त्रं यज्ञोपवीतं च दत्त्वा' नास्ति ख० ।

(४) 'गन्धाढ्यो धूप उत्तमः' ग० ख० ।

(५) 'आघ्राणः' क० ।

(६) 'प्रभाकरः' क० ।

(७), 'पायसघृतप्लुतपूर्णशरावगुडौदनहरिद्रौदनचित्रौदनानि क०' ।

नानि 'पवित्रं ते विततम्' इति (१)निवेद्य संकर्षणादिपूर्वोक्तनामभिर्द्वादश कृसराहुतीर्हुत्वा तेनैव शार्ङ्गिणे० श्रियै० सरस्वत्यै० विष्णवे० इति हुत्वा 'विष्णोर्नुकं वीर्याणि' 'तदस्य प्रियमभिपाथो' 'प्रतद्विष्णुस्तवते वीर्येण' 'परोमात्रया तन्वा वृधानः' 'विचक्रमे पृथिवीमेष एतां' 'त्रिर्देवः पृथिवीमेष एताम्' (२)इति जुहुयात्। पुनः द्वादशनामभिर्जुहुयात्।

लिङ्गे तु दीपान्तं कृत्वा भवाय देवाय० शर्वाय० ईशानाय० पशुपतये० रुद्राय० उग्राय० भीमाय० महते देवाय नमः इति पुष्पाणि दत्त्वा तैरेव तर्पणं कृत्वा 'पवित्रं ते' इति पायसं गुडौदनं च निवेद्य पूर्वोक्तनामभिः कृसरं हुत्वा 'भवस्य देवस्य पत्न्यै स्वाहा' इत्याद्यष्टाभिर्गुडौदनं हुत्वा 'भवस्य देवस्य सुताय स्वाहा' इत्याद्यैर्हारिद्रौदनं हुत्वा 'त्र्यम्बकं यजामहे०' 'मानोमहान्तमुत मानो०' 'मानस्तोके तनये०' 'आरात्ते गोघ्नमुत पूरुषघ्ने०' 'विकिरिदविलोहित०' 'सहस्राणि सहस्रशो' इति (३)द्वादश, एतैर्हुत्वा 'शिवाय शंकराय सहमानाय शितिकण्ठाय कपर्दिने ताम्राय अरुणाय अपगुरमाणाय हिरण्यबाहवे सस्पिंजराय बभ्लुशाय हिरण्याय' इति च जुहुयात्। ततः स्विष्टकृदादिहोमशेषं समाप्य पूर्वोक्तसर्वहविर्भिर्विष्णवे लिङ्गाय वा बलिं द

---

(१) 'निवेद्य कृसरमाज्यमिश्रं जुहुयात्—वासुदेवाय स्वाहा, संकर्षणाय स्वाहा, प्रद्युम्नाय स्वाहा, अनिरुद्धाय०शान्त्यै० श्रियै० सरस्वत्यै० पुष्ट्यै० विष्णवे०' क०।

(२) 'इति द्वादशनामभिश्चामुष्मै स्वाहेति जुहुयात्' क० ख०।

(३) सहस्राणीत्यनुवाकस्य दशर्चत्वेनात्र दशभिरित्येवापेक्षितमिति भाति। अत्र द्वादशपदं सर्वत्र दृश्यते। तत्र सदसत्सद्भिर्विचारणीयम्।

द्यात् । मन्त्रस्तु—

त्वामेकमाद्यं पुरुषं पुरातनं
नारायणं विश्वसृजं यजामहे ।
त्वमेव यज्ञो विहितो विधेय-
स्त्वमात्मनात्मन् प्रतिगृह्णीष्व हव्यम् ॥ इति ।

लिङ्गे तु नारायणपदे रुद्रं शिवमिति वदेत् । ततोऽश्वत्थपर्णे 'भूर्भुवःस्वरोम्' इति हुतशेषं निधा(१)य प्रदक्षिणीकृत्य विश्वभुजे आत्मने परमात्मने नमः इति न(२)त्वा आचार्याय शतं तदर्धं तदर्धं द्वादश तिस्र एकां वा गां दत्त्वा ऋत्विग्भ्योऽपि दक्षिणां दत्त्वा शतं द्वादश वा ब्राह्मणान् भोजयेदिति संक्षेपः । प्रासादमात्रे नूतने तु मात्स्योक्तजलाशयप्रतिष्ठाविधिमेव कुर्यात् । गोरुत्तारणपात्रीप्रक्षेपादि तु न भवति द्वारलोपात् । वारुणहोमस्थाने वास्तुहोमः । अन्यत्तद्वदेव ।

इति भट्टकमलाकरकृतौ लिङ्गार्चाप्रतिष्ठाविधिः ॥

अथ पुनःप्रतिष्ठा । तामधिकृत्य हयशीर्षपञ्चरात्रे—

चाण्डालमद्यसंस्पर्शदूषिता वह्निनाऽथवा ।
अपुण्यजनसंस्पृष्टा विप्रक्षतजदूषिता ॥

संस्कार्येति शेषः । पदार्थादर्शे ब्राह्मे—

खण्डिते स्फुटिते दग्धे भ्रष्टे मानविवर्जिते ।
यागहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥

यागः पूजा । पशुर्गर्दभादिः । पञ्चरात्रे—

खण्डिता स्फुटिता दग्धा यस्मादर्चा भयावहा ।
तस्मात्समुद्धरेत्तां तु पूर्वोक्तविधिना नरः ॥

---

(१) 'निधायाग्निना सह प्रद' क० ।
(२) 'नत्वाऽङ्गुलीयकुण्डलद्वयवस्त्रयुग्मेनाचार्यं पूजयित्वाऽऽचार्याय' क० ।

*अर्चाभङ्गादावुपवासः कार्यः,

न राज्ञो विप्लवेऽश्नीयात्सुरार्चाविप्लवे तथा ।

इति विष्णुधर्मोक्तेः । सिद्धान्तशेखरे—

चौरचण्डालपतितश्वोदक्यास्पर्शने सति ।
श(१)वाद्युपहतौ चैव प्रतिष्ठां पुनराचरेत् ॥

पञ्चरात्रे—

अङ्गादङ्गादिसंधाने प्रतिष्ठां पुनराचरेत् ।
जला(२)धिवासरहितां नेत्रोन्मीलनवर्जिताम् ॥

शुद्धिविवेके विष्णुः—'द्रव्यवत्कृतशौचानां देवतार्चानां भूयः प्रतिष्ठापनेन शुद्धिः' इति । अर्चाः प्रतिमाः । तद्द्रव्यस्य ताम्रादेरुक्तशौचं कृत्वा पुनःप्रतिष्ठां कुर्यादित्यर्थः । स्मृत्यर्थसारेऽप्येवम् ।

तद्विधिर्बौधायनसूत्रे—'पूर्वप्रतिष्ठितस्याबुद्धिपूर्वमेकरात्रं द्विरात्रमेकमासं द्विमासं वाऽर्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने पूर्वोक्तकाले पुण्याहं वाचयित्वा युग्मान्ब्राह्मणान्भोजयित्वा निशायां जलाधिवासं कृत्वा श्वोभूते कलशपूर्णेन पञ्चगव्येन तत्तन्मन्त्रैः स्नापयित्वाऽन्यं कलशं शुद्धोदकेनापूर्य तस्मिन्नवरत्नानि प्रक्षिप्य तं कलशं तत्तद्गायत्र्याष्टसहस्रमष्टशतमष्टाविंशतिवारं वाऽभिमन्त्र्य तेनोदकेन देवं स्नापयेत्ततः शुद्धोदकेन स्नापये-

*अर्चाभङ्गादाविति ।

अग्निदग्धे तु दम्भोलिपतने देवमन्दिरे ।
पुनःप्रतिष्ठा कर्त्तव्या आर्त्ते च निस्वनेऽपि वा ॥
संप्रोक्षणविधानेन कुर्यादेवमतन्द्रितः ।
स्थानसंचलने वापि शवसूतकिसंस्पृशे ॥

---

(१) 'शवाद्युपहते' ग० ।

(२) 'जलाधिवासविहितनेत्रो' ख० ग० ।

दष्टसहस्रमष्टशतमष्टाविंशति वा पुरुषसूक्तेन मूलमन्त्रेण च । ततः पुष्पाणि दत्त्वा यथासंभवमर्चयित्वा गुडौदनं निवेदयेत्' इति । बुद्धिपूर्वं तु विच्छेदे पूर्वोक्तां प्रतिष्ठां पुनः कुर्यात् पूर्वोक्तविष्णुवचनात् । इदं मलमासशुक्रास्तादावपि कार्यमिति मदनरत्ने हेमाद्रौ च । देवार्चाप्रासादभेदने तु शूलपाणौ काश्यपः–'वापीकूपारामसेतुसभातडागवप्रदेवतायतनभेदने प्रायश्चित्तं चतस्र आज्याहुतीर्जुहुयात्–'इदं विष्णुः' 'मानस्तोके' 'विष्णोः कर्माणि' 'पादोऽस्य' इति, यां देवतामुत्सादयति तस्यै देवतायै ब्राह्मणान्भोजयेत्' इति । शङ्खलिखितौ–'प्रतिमारामकूपसंक्रमध्वजसेतुनिपातभङ्गेषु तत्समुत्थानं प्रतिसंस्कारोऽष्टशतं च निपातितानाम्' इति । समुत्थानं प्रतिक्रिया । प्रतिसंस्कारः पुनः प्रतिष्ठा । अष्टशतं पणा दण्डश्चेत्यर्थः ।

अथ जीर्णोद्धारः । स च लिङ्गादौ दग्धे भग्ने चलिते वा कार्यः । अयं चानादिसिद्धप्रतिष्ठितलिङ्गादौ भङ्गादिदुष्टेऽपि न कार्यः, तत्र तु महाभिषेकं कुर्यादिति त्रिविक्रमः । कर्ताऽमुकदेवस्य जीर्णोद्धारं करिष्ये(१)इत्यु-

चण्डालपुल्कसोदक्यापातिताद्यभिमर्शने ।
विण्मूत्रस्पर्शने वापि खरोष्ट्राभिप्रवेशने ॥
सन्ततार्चनलोपेऽपि अङ्गारस्पर्शनेऽपि वा ।
एवमाद्येषु जातेषु तदा संप्रोक्षयेद् गुरुः ॥
संप्रोक्षणविधाने तु न कालनियमस्तथा ।
पुण्याहं वाचयित्वा च ब्राह्मणैरुपचारयेत् ॥

इत्याद्यन्यत्र विस्तरः ।

---

(१) 'करिष्ये इति संकल्प्य पुण्याहं' क० ।

क्त्वा पुण्याहं वाचयित्वा ना(१)न्दीश्राद्धान्तं कृत्वा आचार्यमृत्विजश्च वृत्वा पीठे(२)मण्डलदेवता आवाह्य लिङ्गे ॐ व्यापकेश्वर हृदयाय नमः, ॐ व्यापकेश्वर शिरसे स्वाहा, इत्येवं षडङ्गं कृत्वा देवतान्तरे मूलमन्त्रेण षडङ्गं कृत्वा(३)अर्चयेत् । अघोरमन्त्रम् अष्टोत्तरशतं जप्त्वाऽग्निं प्रतिष्ठाप्याघोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्त्वा जीर्णदेवं प्रणवेन संपूज्य सा(४)ज्यतिलैर्ब्रह्मादिमण्डलदेवतानां होमं पूर्वोक्तं कृत्वा देवं प्रार्थयेत्—

जीर्णभग्नमि(५)दं देव सर्वदोषावहं नृणाम् ।
अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन्कथिता त्वया ॥
जीर्णोद्धारविधानं च नृपराष्ट्रहितावहम् ।
तदधस्तिष्ठतां देव प्रहरामि तवाज्ञया ॥ इति ।

ततः क्षीराज्यमधुदूर्वाभिः समिद्भिश्चाष्टोत्तरसहस्रम् अष्टोत्तरशतं वा देवमन्त्रेण हुत्वाऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत्—

'लिङ्गरूपं समागत्य येनेदं समधिष्ठितम् ।
यायास्त्वं संमितं स्थानं संत्यज्यैव शिवाज्ञया ॥
अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता ।
शिवेन सह संतिष्ठ'

इति मन्त्रितजलेनाभिषिच्य विसर्जयेत् । ततोऽस्त्रमन्त्रितेन खनित्रेण खात्वा लिङ्गमादाय नद्यादौ वामदेवेन लिङ्गं, प्रणवेन मूर्तिं क्षिपेत् । दारुजं तु मधुनाऽभ्यज्या-

---

(१) 'नान्दीश्राद्धान्तं कृत्वा' नास्ति क० ।
(२) 'पीठे मण्डलदेवता आवाह्य' नास्ति क० ।
(३) 'अर्चयेत् । अघोरमन्त्रमष्टोत्तरशतं जप्त्वा' नास्ति ख० ।
(४) 'साज्यतिलैः' नास्ति ख० ।　(५) 'मिदं चैव' ख० ।

घोरेण दहेत् । हेमरत्नादिमयं तु दग्धं चलितं वा पुनस्तत्रैव स्थापयेत् । ततः शान्त्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत्—

भगवन्भूतभव्येश लोकनाथ जगत्पते ।
जीर्णलिङ्गसमुद्धारः कृतस्तवाज्ञया मया ॥
अग्निना दारुजं दग्धं क्षिप्तं शैलादिकं जले ।
प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम् ॥
ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि ।
तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥

ततो यजमानः प्रार्थयेत्--

गोविप्रशिल्पिभूतानामाचार्यस्य च यज्वनः ।
शान्तिर्भवतु देवेश अच्छिद्रं जायतामिदम् ॥

मूर्तौ तु विशेषः--

त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ ।
वासं कुरु सुरश्रेष्ठ तावत्त्वं चाल्पके गृहे ॥
वसन्क्लेशं सहित्वेह मूर्तिं वै तव पूर्ववत् ॥
यावत्कारयते भक्तः कुरु तस्य च वाञ्छितम् ॥ इति ।

ततो नवां मूर्तिं लिङ्गं वा कृत्वोक्तविधिना स्थापयेत् । मूलं त्वग्निपुराणे स्पष्टम् ।

इति जीर्णोद्धारः ॥

अथ तुलसीग्रहणम् । देवयाज्ञिककृतं स्मृतिसारे—

वैधृतौ च व्यतीपाते भौमभार्गवभानुषु ।
पर्वद्वये च संक्रान्तौ द्वादश्यां सूतकद्वये ॥
तुलसीं ये विचिन्वन्ति ते छिन्दन्ति हरेः शिरः ॥

विष्णुधर्मोत्तरे—

रविवारं विना दूर्वां तुलसीं द्वादशीं विना ।
जीवितस्याविनाशाय प्रविचिन्वीत धर्मवित् ॥

तथा--

संक्रान्तावर्कपक्षान्ते द्वादश्यां निशि सन्ध्ययोः।
यैश्छिन्नं तुलसीपत्रं तैश्छिन्नं हरिमस्तकम्॥

पाद्मे—

द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्तिके।
लुनाति स नरो गच्छेन्निरयानतिगर्हितान्॥

रुद्रयामले—

द्वादश्यां च दिवा स्वापस्तुलस्यवचयस्तथा।
विष्णोश्चैव दिवा स्नानं वर्जनीयं सदा बुधैः॥

विष्णुधर्मे—

न च्छिन्द्यात्तुलसीं विप्रो द्वादश्यां वैष्णवः क्वचित्।
देवार्थे तुलसीच्छेदो होमार्थे समिधां तथा॥
इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च॥

ग्रहणमन्त्रस्तु पाद्मे—

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये।
केशवार्थं विचिन्वामि वरदा भव शोभने॥ इति।

पारिजाते दक्षः—

समित्पुष्पकुशादीनां द्वितीयः प्रहरो मतः।

अथ पुष्पादेः पर्युषितत्वम्। भार्गवार्चने भविष्ये—

प्रहरं तिष्ठते जाती करवीरमहर्निशम्।
तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च॥
न पर्युषितदोषोऽस्ति मालाकारगृहेऽपि च॥

बृहन्नारदीये--

वर्ज्यं पर्युषितं पुष्पं वर्ज्यं पर्युषितं जलम्।
न वर्ज्यं तुलसीपत्रं न वर्ज्यं जाह्नवीजलम्॥

तत्रैव पाद्मे--

तुलसी पर्युषिता नैव बिल्वं तु त्रिदिनावधि।
पद्मं पञ्चदिनात्त्याज्यं शेषं पर्युषितं विदुः॥

स्कान्दे—

पालाशं दिनमेकं तु पङ्कजं च दिनत्रयम् ।
पञ्चाहं बिल्वपत्रं च दशाहं तुलसीदलम् ॥

पदार्थादर्शे बोपदेवस्त्वन्यथाह—

बिल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्गदूर्वा-
मन्दाम्भोजाहिदर्भामुनितिलत(१)सरब्रह्मकह्लारमल्लयः।
चम्पाश्वारातिकुम्भीदमनमरुबका बिल्वतोऽहानि शस्ता-
३० ३ १ ६ ११ ४ ९ ८ १ १ २
स्त्रिंशत्त्र्येकार्यरीशोदधिनिधिवसुभूभूयमा भूय एवम् ॥

अस्यार्थः—शता शतावरी । मन्दः मन्दारः । अहिर्नागकेशरः । मुनिरगस्त्यः । अश्वारातिः करवीरः । कुम्भी पाटलेति कैदेवनिघण्टुः । अरयः षट् । ईशा एकादश । उदधयश्चत्वारः । निधयो नव । वसवोऽष्टौ । भूः एकः । यमौ द्वौ । बिल्वमारभ्याऽहिपर्यन्तं गणयित्वा दर्भमारभ्य पुनस्त्रिंशदादि गणयेदित्यर्थः । एतद्दिनोत्तरं पर्युषितानीत्यर्थः । टोडरानन्दे स्कान्दे दमनमुपक्रम्य—

तस्य माला भगवतः परमप्रीतिकारिणी ।
शुष्का पर्युषिता वापि न दुष्टा भवति क्वचित् ॥

तिथितत्त्वे मात्स्ये—

बिल्वपत्रं च माध्यं च तमालामलकीदले ।
कह्लारं तुलसी चैव पद्मं च मुनिपुष्पकम् ॥
एतत्पर्युषितं न स्यात्कुशाश्च कलिकास्तथा ॥

स्मृतिसारावल्याम्—

जलजानां च सर्वेषां पत्राणामहतस्य च ।
कुशपुष्पस्य रजतसुवर्णकृतयोरपि ॥
न पर्युषितदोषोऽस्ति तीर्थतोयस्य चैव हि ।
मुकुलैर्नार्चयेद्देवं (२)पङ्कजैर्जलजैर्विना ॥

---

(१) 'तमर' ख० (२) 'चम्पकैर्ज' क०

अथ शिवनिर्माल्यनिर्णयः । सिद्धान्तशेखरे—

*धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् ।
विहाय शेषं निर्माल्यं चण्डेशाय निवेदयेत् ॥
अन्यदन्नादि पानीयं ताम्बूलं गन्धपुष्पकम् ।
दद्याच्चण्डाय निर्माल्यं शिवभुक्तं तु सर्वशः ॥
आचार्यशिवचण्डानामाज्ञाभङ्गे तु लक्षकम् ।
धनस्य भक्षणे तेषां पादोनं लक्षमीरितम् ॥
निर्माल्ये भक्षिते लक्षपादतः शुद्धिरीरिता ।
दानं च भक्षणसमं तदर्धं तदुपेक्षणे ॥
अकामाद्भक्षणे यद्वा निर्माल्यस्य जपेत्सुधीः ।
ब्रह्मपञ्चक(१)साहस्रं धर्मेण सहितं ततः ॥
कामतो भक्षणे दीक्षा प्रायश्चित्तं न चान्यतः ।
निर्माल्यलङ्घनेऽघोरं प्रजपेदयुतं ततः ॥
स्पर्शश्च लङ्घनसमो विक्रयो भक्षणेन च ॥

स्मृत्यर्थसारेपि—'शैवसौरनिर्माल्ये नैवेद्यभक्षणे चान्द्रम्, अभ्यासे द्विगुणम्, मत्याभ्यासे (२)प्रतपनम्, अन्यनिर्माल्येऽप्यनापद्येवम्' इति । इदं च ज्योतिर्लिं-

*धरेति ।

निर्माल्यं यो हि भक्त्या च शिरसा धारयिष्यति ।
अशुचिर्भिन्नमर्यादो नरः पापसमन्वितः ॥
नरके पच्यते घोरे तिर्यग्योनौ च संभवेत् ॥

इतिनिर्माल्यधारणनिषेधात् । यत्तु—

ब्रह्महाऽपि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत् ।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥

इति स्कान्दं, तत्तु अशुचिना न ग्राह्यं, किन्तु स्नानादिना शुचिनेति स्मार्त्ताः । अपनीतं तन्न ग्राह्यमिति श्रीदत्तः । शिवदी-

---

(१) 'साहस्रमर्घेण सहितं' क० (२) 'पतनम्' क० ख०

ङ्गाद्यतिरिक्तविषयम् । तथाच पुरुषार्थप्रबोधे भविष्ये—

ज्योतिर्लिङ्गं विना लिङ्गं यः पूजयति सत्तमः ।
तस्य नैवेद्यनिर्माल्यभक्षणात्तप्तकृच्छ्रकम् ॥
शालग्रामोद्भवे लिङ्गे*बाणलिङ्गे स्वयंभुवि ।
रसलिङ्गे तथार्षे च (१)सुरसिद्धप्रतिष्ठिते ॥
हृदये चन्द्रकान्ते च स्वर्णरौप्यादिनिर्मिते ॥
शिवदीक्षावता भक्तेनेदं भक्ष्यमितीर्यते ॥

तथा—

बाणलिङ्गे स्वयंभूते चन्द्रकान्ते हृदि स्थिते ।
चान्द्रायणसमं ज्ञेयं शंभोर्नैवेद्यभक्षणम् ॥
लिङ्गे स्वयंभुवे बाणे रत्नजे रसनिर्मिते ।
सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत् ॥
यत्र चण्डाधिकारोऽस्ति तद्भोक्तव्यं न मानवैः ।
चण्डाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः ॥

त्रैविक्रम्याम्—

बाणलिङ्गे च लौहे च सिद्धलिङ्गे स्वयंभुवि ।
प्रतिमासु च सर्वासु न चण्डोऽधिकृतो भवेत् ॥

क्षाहीनैर्न ग्राह्यमित्येके । ज्योतिर्लिङ्गाद्यतिरिक्तस्य न ग्राह्यमिति शिष्टाः । *बाणलिङ्गे इति । बाणलिङ्गलक्षणं यथा—

पक्वजम्बूफलाकारं कुक्कुटाण्डसमाकृतिम् ।
भुक्तिमुक्तिप्रदं चैव बाणलिङ्गमुदाहृतम् ॥
सदा सन्निहितस्तत्र शिवः सर्वार्थसाधकः ।
कृतप्रतिष्ठं तल्लिङ्गं बाणाख्येनासुरेण च ॥
चिपिटे पूजिते तस्मिन् गृहभङ्गो भवेद् ध्रुवम् ।
एकपार्श्वक्षते धेनुपुत्रदारधनक्षयः ॥

---

(१) 'सुप्रसिद्ध' ख०

अत्र--

ब्रह्महापि शुचिर्भूत्वा निर्माल्यं यस्तु धारयेत्।
तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते ॥

इति स्कान्दादशुचिना न ग्राह्यं शिवनिर्माल्यं, किन्तु स्नात्वेति स्मार्ताः। अनुपनीतेन न ग्राह्यमिति श्रीदत्तः। शिवदीक्षाहीनैर्न ग्राह्यमिति शैवाः। तिथितत्त्वे हेमाद्रौ परिशिष्टे—

*अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्।
शालग्रामशिलासङ्गात्सर्वं याति पवित्रताम् ॥

शिरसि स्फुटिते बाणे व्याधिर्मरणमेव च।
अर्च्यं स्यात्कापिलं लिङ्गं मुनीनां मोक्षकाङ्क्षिणाम् ॥
तीक्ष्णाग्रं वक्रशीर्षं च त्र्यस्रं लिङ्गं च वर्जयेत्।
पूजितव्यं गृहस्थेन वर्णेन भ्रमरोपमम् ॥

*अग्राह्यमिति। स्वयं नोपभुञ्ज्यादित्यर्थः,
दत्त्वा नैवेद्यवस्त्रादि नाददीत कदाचन।
त्यक्तं यच्छिवमुद्दिश्य तद्दानेन न तत्फलम् ॥
इति भविष्याच्च।

अथ व्रतोपयुक्तकृच्छ्रादीनि। तत्र प्राजापत्यमाह याज्ञवल्क्यः-

एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः ॥
यथाकथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते ॥

दिवैव मध्याह्नकाले सकृद्भोजनम् एकभक्तं, सूर्यास्तमयानन्तरमेव सकृद्भोजनं नक्तं, दिवा रात्रौ वा भृत्यादिभ्योऽप्ययाचितस्य भोजनमयाचितम्। दिवैवेति केचित्। अहोरात्रमभोजनमुपवासः। अयं पादकृच्छ्रः। अत्र ग्राससंख्यायां पराशरः—

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः।
चतुर्विंशतिरायाच्याः परं निरशनं स्मृतम् ॥

अथवा आपस्तम्बः—

सायं द्वात्रिंशतिर्ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥
कुक्कुटाण्डप्रमाणो वा यथा वाऽऽस्यं विशेत्सुखम् ।

शक्त्या विकल्पः । आपस्तम्बस्तु व्यवस्थया पादकृच्छ्रमाह—

त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् ।
सायं त्र्यहं तथा पादः प्रातः पादस्तथा त्र्यहम् ॥
प्रातः पादं चरेच्छूद्रः, सायं वैश्यस्य दापयेत् ।
अयाचितं तु राजन्ये, त्रिरात्रं ब्राह्मणे स्मृतम् ॥ इति ।

प्रातःपाद एकभक्तव्रयं, सायंपादो नक्तत्रयम्, अयाचितमयाचितत्रयं, त्रिरात्रमुपवासत्रयम् । अयाचितत्रयानन्तरमुपवासत्रयमर्द्धकृच्छ्रः । नक्तत्रयं विना पादव्रयं पादोनकृच्छ्रः,

सायंप्रातर्विनाऽर्द्धं स्यात् पादोनं नक्तवर्जितम् ।

इति आपस्तम्बोक्तेः । अथवा

सायं प्रातस्तथैकं स्व दिनद्वयमयाचितम् ।
दिनद्वयं च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते ॥

इत्यापस्तम्बेनैवोक्तोऽर्द्धकृच्छ्रः ।

प्रकृतमनुसरामः । अयं पादकृच्छ्रो यथाकथञ्चित्त्रिगुणः प्राजापत्यः । यथाकथञ्चिदित्युक्तेः एकभक्तादीनामानुलोम्येन स्वस्थानवृद्ध्या एकः । स च—

त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विजः ॥

इति मनूक्तेः । तेषां प्रातिलोम्येन स्वस्थानवृद्ध्या द्वितीयः, स च "प्रातिलोम्यं चरेयुः" इति वसिष्ठोक्तेः,

उपवासत्रयं कृत्वा कुर्याच्चायाचितत्रयम् ।
नक्तव्रयादे(१)कभक्तत्रयं स्यात्प्रातिलोम्यकम् ॥

---

(१) 'देकभक्तव्रतं' घ० ङ० ।

इति वचनात् । दण्डकलितवदावृत्त्या तृतीयः । स च—

त्र्यहं प्रातरहर्नक्तमहरेकमयाचितम् ।
अहः पराकं तत्रैकमेवं चतुरहौ परौ ॥

इति वसिष्ठोक्तः । पराक उपवासः । अयमेव शिशुकृच्छ्रः,

अनुग्रहार्थं विप्राणां मनुधर्मभृतां वरः ।
बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुदाहरत् ॥

इति तेनैवोक्तेः । प्रोक्तपक्षत्रयेऽन्यतमपक्षं ज(१)पहोमवर्जं कुर्यादिति चतुर्थः,

तस्माच्छूद्रं समासाद्य सदा धर्मपथे स्थितम् ।
प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितम् ॥

इत्यङ्गिरोवचनात् ।

अशक्तौ एकां धेनुं दद्यात् । तदभावे निष्कं दद्यात्,

गवामभावे निष्कं स्यात्तदर्द्धं पादमेव वा ।

इत्युक्तेः । देशकालोचितं गोमूल्यं दद्यात्,

प्राजापत्यक्रियाऽशक्तौ धेनुं दद्याद्द्विजोत्तमः ।
धेनोरभावे दातव्यं तुल्यं मूल्यं न संशयः ॥

इत्युक्तेः । यद्यपि "धेनुः स्यान्नवसूतिका" (अ०को० २-९-७१) इत्युक्तं, तथापि धेनुदानाशक्तौ गोमात्रं दद्यात् बहुस्मृतिषु गोपदस्याप्युपादानात । विप्रभोजनं वा कार्यम् । तत्संख्यानियमो महार्णवे चतुर्विंशतिमते—

कृच्छ्रे पञ्चातिकृच्छ्रे त्रिगुणमहरहास्त्रिंशदेवं तृतीये
चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ।
कृच्छ्रे सन्तापनाख्ये भवति षडधिका विंशतिः, सैव हीना
द्वाभ्यां चान्द्रायणे स्यात्तपासि कृशबलो भोजयेद्विप्रमुख्यान् ॥

इति । अस्यार्थः—अहरह इत्यस्य प्रत्येकं सम्बन्धात् कृच्छ्रे अहरहः पञ्च ब्राह्मणान् भोजयेत् । ते(२) च षष्टिर्भवन्ति । अतिकृच्छ्रे

---

(१) 'तपहोम' घ० ङ० । (२) 'तन्' घ० ङ० ।

प्रत्यहं पञ्चदश, द्वादशादिने मिलित्वा ह्य(१)शीतिशतं विप्रा भवन्ति । कृच्छ्रातिकृच्छ्रे प्रत्यहं त्रिंशत्, मिलित्वा षष्ट्युत्तरं त्रिशतम् । असमृद्ध(२)धान्ये तु त्रिगुणिता द्वादशेति मिलिताः षट्त्रिंशत् । तप्तकृच्छ्रे प्रत्यहं चत्वारिंशत् त्र्यहसाध्येऽशीतिः, चतुरहसाध्ये षष्ट्यधिकं शतम्, द्वादशाहसाध्ये अशीत्यधिकं शतचतुष्टयम् । पराके प्रत्यहं षष्टिः, विंशत्यधिकं सप्तशतम् । सान्तपने प्रत्यहं षट्त्रिंशतिः । चान्द्रायणे प्रत्यहं चतुर्विंशतिः, तत्र मासो यदि त्रिंशद्दिनः तदा ७२० विंशत्यधिकसप्तशतं विप्रा भवन्ति । अधिकन्यूनादिनके तु सं(३)कलनमूह्यम् । स्वल्पधान्यस्तु कृच्छ्रे द्वादशैव ब्राह्मणान् भोजयेत् "विप्रा द्वादश वा भोज्याः" इति चतुर्विंशतिमतात् । अतिकृच्छ्रमाह मनुः—

एकैकग्रासमश्नीयात् त्र्यहानि त्रीणि पूर्ववत् ।
त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः ॥

त्रीणि त्र्यहानि नव दिनानि पूर्ववत् एकभक्तादिकाले तान्नियमवान् इत्यर्थः । अशक्तौ धेनुत्रयं देयं,

पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा ।

इति चतुर्विंशतिमतात् । तदशक्तौ निष्कगोमूल्यादि प्राग्वत् । एवमग्रेऽपि । अथवा याज्ञवल्क्यः—

अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजनः ।

अयमेव पूर्वोक्तप्राजापत्यधर्मक एव । परन्तु एकभक्तादिदिनेषु प्रसृतिपूरणमात्रमन्नं भुञ्जीत न तु द्वाविंशत्यादिग्रासानिति । अत्र येषु दिनेषु भोजनं तेषु पाणिपूरमा(४)त्रमन्नं विधेयम् । एवञ्चोपवासदिने न पाणिपूरान्नभोजनप्राप्तिः । अशक्तौ धेनुद्वयं देयं,

प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतम् ।

इति षट्त्रिंशन्मतात् । एवमग्रेऽपि । अनयोश्चातिकृच्छ्रयोः पापा-

---

(१) 'साशीति' घ० ङ० । (२) 'धान्यस्य' घ० ङ० ।
(३) 'संख्यासंक' घ० ङ० । (४) 'मात्र' नास्ति घ० ङ० ।

पेक्षः शक्त्यपेक्षो वा विकल्पः(१)। अतिकृच्छ्रपादादिव्यवस्था च प्राजापत्यवत्। कृच्छ्रातिकृच्छ्रमाह गौतमः—अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्र इति। द्वादशरात्रमुदकेनैव वर्त्तनं न त्वन्नेनेत्यर्थः। अशक्तौ तिस्रो धेनवो देयाः, प्राजापत्यत्रयस्थाने कृच्छ्रातिकृच्छ्रविधानात्। तदभावे निष्कत्रयं सार्द्धनिष्कः पादोननिष्को वा देयः। अथवा यमः—

एकैकं पिण्डमश्नीयात्त्र्यहं कल्ये त्र्यहं निशि।
अयाचितं त्र्यहं पिण्डं वायुभक्षस्त्र्यहं परम्॥
अतिकृच्छ्रं चरेदेतत्पवित्रं पापनाशनम्।
चतुर्विंशतिरात्रं तु नियतात्मा जितेन्द्रियः॥
कृच्छ्रातिकृच्छ्रं कुर्वीत एकस्थाने द्विजोत्तमः।

कल्ये प्रातः एकभक्तकाले इति यावत्। एकस्थाने पूर्वोक्तद्वादशाहसाध्यातिकृ(२)च्छ्रद्वयेनैकः कृच्छ्रातिकृच्छ्र इत्यर्थः। अथवा याज्ञवल्क्यः—

कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्।

पयेन चतुर्विंशत्यहःसाध्ये कृच्छ्रातिकृच्छ्रे भोजनदिनेष्वेकैकग्रासमात्रविधानात् दुग्धभक्षणेऽपि पत्रपुटकादिभिर्ग्रासपरिमाणं कृत्वैव एकग्रासपर्याप्तं दुग्धमश्नीयात्। अशक्तौ तु—"सायं तु (३)द्वादश ग्रासाः" इति ग्राससंख्यया भोजनदिनेषु तावद्दुग्धं पीत्वा प्राजापत्यः कार्यः। तप्तकृच्छ्रमाह याज्ञवल्क्यः—

तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत्।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः॥

अयं चतुरहसाध्यः। तप्तक्षीरघृताम्बुभिः समस्तैः एकैकादिने वृत्तिः, तत एकोपवास इत्यर्थे तु द्व्यहसाध्यः। अथवा मनुः—

---

(१) 'सान्तपने प्रत्यहं षड्विंशतिः' अधिकं ख०।
(२) 'कृच्छ्रत्रये' घ० ङ०।
(३) 'द्वादशग्रासी' घ० ङ०।

तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रति त्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः ॥

जलादिपरिमाणमाह पराशरः—

अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पि(स्त्रि(१)रात्रं चोष्णमारुतम् ॥

अपां त्रिपलं त्रिरात्रं पिबेदित्यादि प्रतिवाक्यं त्रिरात्रमित्यस्य सम्बन्धः । त्रिरात्रमुष्णोदकस्य बाष्पं पिबेदित्यर्थः । अथ पराशरः—

षट्पलं तु पिबेदम्भः त्रिपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पि)स्तप्तकृच्छ्रं विधीयते ॥

जलादिकं चेहोष्णमेव । अशक्तौ त्र्यहसाध्ये निष्कार्द्धं चतुरहःसाध्ये एका धेनुः,द्वादशाहसाध्ये तिस्रो गावः,

पराकतप्तातिकृच्छ्रे तिस्रस्तिस्रस्तु गास्तथा ।

इत्युक्तेः । सान्तपनमाह याज्ञवल्क्यः—

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरन् ॥

मिलितगोमूत्रादिषट्कमेव पीत्वा परेऽह्न्युपवसेत् । अयं दिनद्वयसाध्यः । अयमेव ब्रह्मकूर्चः । तत्र पराशरोक्तो विधिः कार्यः ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
निर्दिष्टं पञ्चगव्यं तु पवित्रं कायशोधनम् ॥
गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् ।
सप्तपत्रास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ॥
एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि ।
इरावती इदंविष्णुर्मानस्तोके च शंवती ॥

---

(१) कंसान्तर्गतं नास्ति ख० ।

एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः ।
प्रणवेन समालोड्य प्रणवेनाभिमन्त्र्य च ॥
प्रणवेन समुद्धृत्य पिबेत्तत्प्रणवेन तु ।
यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ॥
प्राशनात्पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् ।
मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत् ॥
स्वर्णपात्रेण ताम्रेण ब्रह्मतीर्थेन वा पुनः ॥ इति ।

पूर्वेद्युरुपोष्य परेद्युरुक्तरीत्या ब्रह्मकूर्च इति विज्ञानेश्वरः । अथवा जाबालः--

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनम् ॥

इदं सप्ताहसाध्यम् । यतिसान्तपनमाह (शङ्खः(१)—

एतदेव त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतम् ।

एतत् पञ्चगव्यं दिने आहारान्तरं विना पिबेदित्यर्थः । महासान्तपनमाह) याज्ञवल्क्यः--

पृथक्सान्तपनद्रव्यैः षडहः सोपवासकः ।
सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः ॥

गोमूत्रगोमयक्षीराणि दधिघृतकुशोदकानि सान्तपनद्रव्याणि एकैकदिने आहारान्तरं विना एकैकं पिबेत्सप्तमदिने उपवासः। अथवा यमः--

त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् ।
त्र्यहं दधि त्र्यहं सर्पिः त्र्यहं क्षीरं ततः शुचिः ॥
महासान्तपनं ह्येतत्सर्वपापप्रणाशनम् ॥

अयं पञ्चदशाहसाध्यः । जाबालः—

षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् ।
त्र्यहं चोपवसेदन्त्यं महासान्तपनं विदुः ॥

---

(१) कंसान्तर्गतं नास्ति ख० ।

षण्णां पूर्वोक्तगोमूत्रादीनाम् । अयमेकविंशतिरात्रसाध्यः । अशक्तौ सप्ताहसाध्यसान्तपनस्य सार्द्धप्राजापत्यस्थाने विहितत्वादेका धेनुर्निष्कार्द्धं च देयम् ।

पराकतप्तातिकृच्छ्रस्थाने कृच्छ्रत्रयं न्यसेत् ।
सान्तपनस्य चाध्यर्द्धमशक्तौ व्रतमाचरेत् ॥

इति षट्त्रिंशन्मतात् । दिनद्वयसाध्ये सान्तपने निष्कार्द्धं, दिनत्रयसाध्ये यतिसांतपने तु एकां धेनुं दद्यात् । एकविंशतिदिनसाध्ये महासांतपने तिस्रो धेनवोऽर्धनिष्कं च देयं, पञ्चदशदिनसाध्ये तु धेनुद्वयं निष्कार्द्धं च देयं, सप्ताहसाध्ये तु एका धेनुः निष्कार्द्धश्च देयः षडुपवासतुल्यप्राजापत्ये धेनोरुक्तत्वात् सान्तपनस्य चाध्यर्द्धमित्यस्य सप्ताहसाध्यपरत्वाच्च । पराकमाह याज्ञवल्क्यः—

द्वादशाहोपवासेन पराकः परिकीर्त्तितः ।

अशक्तौ कृच्छ्रत्रयं

पराकतप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं न्यसेत् ॥

तिस्रो धेनव इति यावत् । यावकव्रतमाह शंखः—

गोपुरीषाद्यवान्नं च मासं नित्यं समाहितः ।
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये ॥

गोर्भक्षणार्थं यवान्दत्त्वा तदनन्तरं गोमयमध्यनिःसृतैस्तैर्यवैः पक्वैः एकभक्तनक्तानि कुर्वन् मासं नयेत् । गोमूत्रपक्वैस्तु तैर्गोमूत्रयावकं भवति,

आतृप्तेश्चारयित्वा गां गोधूमान् यवमिश्रितान् ।
गोपयोज्यांश्च संगृह्य पचेद्गोमूत्रयावकम् ॥

इति योगियाज्ञवल्क्यात् । अशक्तौ यावकव्रते पञ्च धेनवः षडुपवासात्मकप्राजापत्यषट्स्थानत्वात् । प्रत्यहं यावकभोजनेऽपि तस्यात्यन्तक्लेशसाधनत्वेनोपवासतुल्यत्वात् । गोमूत्रयावकव्रते तु क्लेशाधिक्यात् षड् धेनवः । मासमेकग्रासमात्रदुग्धेन व-

र्त्तनं पयोव्रतम् । (१)तस्मिन् व्रते येन द्रव्येण शरीरवर्त्तनं तद्व्रतस्य तेन व्यपदेशात् । अत एव मार्कण्डेयः—

पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ।
मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु ॥ इति ।

पयोव्रतेऽशक्तस्य पञ्च धेनवः पयःपाने क्लेशाभावेऽपि पयसा एकग्रासमात्रपर्याप्ततयोपवासतुल्यत्वात् । चान्द्रायणमाह याज्ञवल्क्यः—

तिथिवृद्ध्या चरेत् पिण्डान् शुक्ले शिखण्डसंमितान् ।
एकैकं ह्रासयेत्कृष्णे पिण्डं चान्द्रायणं चरन् ॥
इन्दुक्षये न भुञ्जीत एष चान्द्रायणे विधिः ।

शिखी मयूरः । तिथिवृद्ध्या (२)शुक्ले शुक्लपक्षे तिथिवृद्ध्या प्रतिपदादितिथिक्रमेणैकैकं पिण्डं प्रतिपदि एकं द्वितीयायां द्वाविति क्रमेण पूर्णिमायां पञ्चदश चरेत् भक्षयेत् । तदा कृष्णे एकैकं तिथिवृद्ध्या प्रतिपदि चतुर्दश द्वितीयायां त्रयोदशेत्येवं क्रमेण एकैकं चतुर्दशीपर्यन्तं ह्रासयेत् । इन्दुक्षये अमावास्यायां न भुञ्जीत । एतद्यवमध्यं नाम चान्द्रायणम् । अथ पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वा एकैकत्यागेन प्रतिपत्प्रभृति चतुर्दशीपर्यन्तं ग्रासमश्नीयात् । अमावास्यायामुपोष्य एकैकवृद्ध्या पूर्णिमायां पञ्चदशग्रासान् भक्षयेत् । एतत्पिपीलिकामध्यं नाम चान्द्रायणम् । ह्रासवृद्धिभ्यां चन्द्रस्य अयनं चरणमिव चरणं यत्र कर्मणीति व्युत्पत्तेः । (३)एतच्च चान्द्रमाससाध्यम् । तत्र ह्रासवृद्धी निश्चित्य पिण्डेषु ते कल्पनीये । तत्र चन्द्रोदयकालीना तिथिर्ग्राह्या । तत्र ग्रासा मयूराण्डप्रमाणाः । ग्रासग्रहणकालश्चन्द्रोदयः । वैधत्वाच्च निशीथेऽपि तद्भक्षणम् । चन्द्रोदयानन्तरं प्रायः द्विषष्टिघटीव्यवधाने चन्द्रोदय इति । दिवापि तं परीक्ष्यैव ग्रासानां भक्षणम् । प्राणाग्निहोत्राधिकारिणामत्रैव तत्करणम् । तथाहि, यदा पञ्च पिण्डा-

---

(१) 'यस्मिन्' ख० । (२) 'शुक्ले' नास्ति घ० ङ० ।
(३) 'एतच्च चान्द्रायणसाध्यम्' घ० ङ० ।

स्तदा प्राणायेति प्रथमम्, अपानायेति द्वितीयं, व्यानायेति तृतीयम्, उदानायेति चतुर्थं, समानायेति पञ्चमम्। यदा चत्वारस्तदा द्वाभ्यां प्रथमम्। यदा त्रयस्तदा द्वाभ्यां पूर्वौ। यदा द्वौ तदा त्रिभिः प्रथमं द्वाभ्यामुत्तरम्। एकं तु सर्वैः। इतिकर्त्तव्यताविस्तरो महार्णवादौ द्रष्टव्यः। अशक्तावष्टौ गावो देयाः,

अष्टौ चान्द्रायणे देयाः प्रत्याम्नायविधौ सदा ।

इति चतुर्विंशतिमतात्। यवमध्यपिपीलिकामध्यचान्द्रायणयोर्गौतमाद्युक्तप्रकारवतोरष्टौ गावः, स्वल्पप्रकारयुक्तयोस्तयोस्तु त्रयः।

प्राजापत्ये तु गामेकामातिकृच्छ्रद्वयं स्मृतम् ।
चान्द्रायणे पराके च तिस्रस्ता दक्षिणास्तथा ॥

इति पराशरोक्तेः। समृद्धस्य पञ्च "पञ्च वापि प्रकीर्तिताः" इति पाठान्तरात्। अथवा याज्ञवल्क्यः—

यथाकथञ्चित्पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपभुञ्जीत चान्द्रायणमथापरम् ॥

प्रत्यहमष्टौ ग्रासान् भक्षयेत्। तत्रापि दिन एवाष्टौ, अथवा नक्तं चतुरो दिने चतुरः, अथवा एकस्मिन्दिने चतुरः अपरस्मिन्द्वादश, अथवा एकरात्रमुपोष्यापरस्मिन् षोडश, अथवा दिनद्वयमुपोष्य तृतीयदिने चतुर्विंशतिः, इत्यादि शक्त्या प्रकाराणां मध्ये यथाकथञ्चित् पिण्डान् चत्वारिंशदधिकशतद्वयं भक्षयेत्, 'तिस्रोऽशीतीः समाहितः' इति वचनाच्च। उपक्रमस्तु शुक्लकृष्णान्यतरप्रतिपदोरेव। मासश्च सावनः, अन्यथा चान्द्रमासे ह्रासादिवशेन तथा भक्षणासम्भवाच्च। एवञ्च नैरन्तर्येणानेकैतच्चान्द्रायणानुष्ठाने कदाचिद्द्वितीयचान्द्रायणादि द्वितीयादौ भवति। अयं चापरो विशेषः-पूर्वचान्द्रायणे तिथिनियतग्रासनियमवशात् (१)पूर्वप्रक्रान्तमेकादश्याद्युपवासादि प्रतिनिधिद्वारा कार्यम्, अत्र तु स्वयमेव कार्यं, तिथिनियमेन (२)ग्रासनियमाभावात्। अस्यैव च यतिचान्द्रायणादिसंज्ञा।

---

(१) 'पूर्वप्रकारान्त' ख०। (२) 'ग्रासनियमा' घ० ङ०।

*पञ्चायतनपूजायां तन्त्रेण च निवेदितमित्यर्थः। शिवपुराणे—

ये वीरभद्र(१)शापिताः शिवभक्तिपराङ्मुखाः।
शंभोरन्यत्र देवेषु ये भक्ता ये न दीक्षिताः॥
तेषामनर्हमीशस्य तत्प्रसादचतुष्टयम्।

अष्टावष्टौ समश्नीयात् पिण्डान् मध्यंदिने स्थिते।
नियतात्मा हविष्यस्य यतिचान्द्रायणं चरन्॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः।
चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरन्॥

इति मनूक्तेः।

त्रींस्त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः।
हविष्यान्नस्य वै मासमृषिचाद्रायणं स्मृतम्॥

इति यमोक्तमृषिचान्द्रायणम्। यतिचान्द्रायणाद्यशक्तौ तिस्रो गावो देयाः पूर्वोक्तवचनात्।

अथ मासोपवासव्रतम्। तच्च प्राक् कार्त्तिके प्रपञ्चितम्। तदशक्तौ अष्टौ गावः, तदशक्तौ पञ्च, षडुपवासतुल्यप्राजापत्यप्रत्याम्नायगोपञ्चकेन मासनिर्वाहात्। एवं सोमायनादिप्रत्याम्नायाः स्वयमूह्याः। अत्र प्राजापत्यादेरितिकर्त्तव्यताऽन्यतोऽवगन्तव्या। तत्र स्वातन्त्र्येण कुरुक्षेत्रप्रतिग्रहादिपापनिवृत्त्यर्थं क्रियमाणे वपनमावश्यकं न तु व्रतभङ्गनिवृत्त्यर्थं,

दिनत्रयं न भुञ्जीत मुण्डनं शिरसोऽथवा।

इति विकल्पन्यायात्।

प्रकृतमनुसरामः। *पञ्चायतनेति। अत एव 'विष्णुशिवसूर्यगणेशदुर्गाभ्यो नमः' इति श्लिष्टमन्त्र एवोक्तः। शिवनामपूजायामिति केचित्।

---

(१) 'शमिताः' ख०

काशीखण्डे—

जलस्य धारणं मूर्ध्नि विश्वेशस्नानजन्मनः।
एष जालन्धरो बन्धः सम(१)स्तसुरवल्लभः॥

तथा—

स्नापयित्वा विधानेन यो लिङ्गस्नपनोदकम्।
त्रिः पिबेत्त्रिविधं पापं तस्येहाशु विनश्यति॥
लिङ्गस्नपनवार्भिर्यः कुर्यान्मूर्ध्न्यभिषेचनम्।
गङ्गास्नानफलं तस्य जायतेऽत्र विपाप्मनः॥

इदं पूर्ववाक्यवशाद्विश्वेश्वरविषयमिति केचित्। काशीस्थपुराणप्रसिद्धसर्वलिङ्गविषयं, काशीखण्डे रत्नेश्वराख्याने तथैव दर्शनादित्यन्ये।

अथ कृषिः। राजमार्तण्डः—

ऋक्षेषूत्तरपौष्णवैष्णवमघामूलानुराधाश्विनी-
प्राजापत्यकरद्विदैवतगुरुप्रालेयपादेषु च।
निर्दोषैर्वृषभैर्हलैश्च सुमनोमालाभिरभ्यर्चितै-
र्दत्त्वा क्षेत्रपतेर्बलिं हलधरः क्षेत्रं ततः कर्षयेत्॥
प्राजेशश्रवणोत्तरादितिमघामार्तण्डतिष्याश्विनी
पौष्णानुष्णमरीचयः शतभिषक् स्वाती विशाखा तथा।
जीवार्केन्दुसितेन्दुनन्दनदिने लग्ने च सौम्योदये
सस्यानां वपने तथैव लवने शस्तास्तथा रोपणे॥

चण्डेश्वरः—

हस्तचित्रादितिस्वातीरेवत्यां श्रवणत्रये।
स्थिरलग्ने गुरोर्वारे बीजं धार्यं ज्ञशुक्रयोः॥
'ॐ धनदाय सर्वलोकहिताय देहि मे धान्यं स्वाहा'।
लेखयित्वा इमं मन्त्रं धान्यागारे निधापयेत्॥
सस्यवृद्धिं परां कुर्यात्पूजितं प्रतिपूजयेत्।
दक्षिणादिङ्मुखगमनं गमनमभिनवासु नारीषु॥

---

(१) 'समस्तसुखवल्लभः' ख०

व्ययमपि सस्यधनानां न बुधा बुधवासरे कुर्युः ।
शनिवारे च नो कार्यो धनधान्यव्ययो बुधैः ।

अथ वस्त्रम् । श्रीपतिः—

रोहिणीषु करपञ्चकेऽश्विभे त्र्युत्तरासु च पुनर्वसुद्वये ।
रेवतीषु वसुदैवते च भे नव्यवस्त्रपरिधानमिष्यते ॥

जीर्णं रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचे बुधदिने तु भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसंगमाय
मन्दे मलाय च नवाम्बरधारणं स्यात् ॥

रोहिणीगुरुपुनर्वसूत्तरे
या बिभर्ति नववस्त्रभूषणे ।
सा न योषिदवलम्बते पतिं
स्नानमाचरति वारुऽणेपि या ॥

अथालंकारवलयादि । दैवज्ञवल्लभः—

नासत्यपूषवसुभिः करपञ्चकेन
मार्तण्डभौमगुरुदानवमन्त्रिवारे ।
मुक्तासुवर्णमणिविद्रुमशङ्खदन्त-
रक्ताम्बराणि विधृतानि भवन्ति सिद्ध्यै ॥

ज्योतिर्निबन्धे—

हस्तानुराधमृगपूषधनिष्ठयुक्त-
चित्रोत्तरासु च पुनर्वसुरोहिणीषु ।
लग्ने स्थिरे रविसुतेन्दुजजीववारे
हेमादिधारणविधिः कथितो नराणाम् ॥

तत्रैव श्रीपतिः—

पौष्णाश्विनीवसुकरादिषु पञ्चकेषु
कौसुम्भहेममणिविद्रुमकाचशङ्खाः ।
नार्या धृताः सुतसुखार्थकरा भवन्ति
ब्राह्मोत्तरादितिगुरुष्वसुखाय भर्तुः ॥

तत्रैव—

शङ्खादिवररत्नानि पुष्यादित्युत्तरासु च ।
रोहिण्यां नैव गृह्णीत भर्तुर्जीवितकाङ्क्षिणी ॥

अथ सूचीकर्म—

वासवादितिभत्वाष्ट्रमैत्रचन्द्राश्विनीषु च ।
सूचीकर्म तनुत्राणमेभिर्ऋक्षैः प्रशस्यते ॥

अथ शय्या—

हस्तादितिब्रह्मगुरूत्तराणि
पौष्णाश्विमूलेन्दुभचित्रभानि ।
वारेषु जीवेन्दुसितेन्दुजानां
श(१)य्यासनारम्भणमुत्तमं स्यात् ॥

अथ शस्त्रधारणम्—

पुष्ये चादितिचित्रपद्मतनये शक्रोत्तरा रेवती-
स्वातीवाजिविशाखमित्रसहिते भानौ गुरौ भार्गवे ।
कुम्भे कीटगृहे वृषे मृगपतौ चेन्दौ शुभैर्वीक्षिते
सन्नाहः शरखड्गकुन्तछुरिका धार्या नृपाणां हिताः ॥

अथ स्वामिसेवा । चण्डेश्वरः—

रोहिण्युत्तरपौष्णेषु वसुवारुणयोरपि ।
सेवेत स्वामिनं भृत्यः शुभवारोदये तथा ॥

ज्योतिर्निबन्धे—

दासीदासादिभृत्यानां कुर्यात्संग्रहणं(२)बुधे ।
स्थिरलग्ने शुभैर्दृष्टे मन्दवारे विशेषतः ॥

अथ गजाश्वदोलाः । स एव—

पौष्णप्रजेशादितिभद्वयानि
हस्तादिषट्कश्रवणोत्तराणि ।
दोलादिमातङ्गतुरङ्गमाणा-
मारोहणेऽभीष्टफलप्रदानि ॥

---

(१) 'शय्यासमारम्भण' क० ख० ।   (२) 'बुधैः' ग० ।

अथ नृत्यम्—

हस्तः पुष्यो वासवं रोहिणी च
ज्येष्ठा पौष्णं वारुणं चोत्तराश्च ।
पूर्वाचार्यैः कीर्तितश्चक्रवर्ती
नृत्यारम्भे शोभनोऽयं भवर्गः ॥

अथ राजदर्शनम् । श्रीपतिः--

मृगाश्विपुष्यश्रवणश्रविष्ठाहस्तध्रुवत्वाष्ट्रभपूषभानि ।
मैत्रेण युक्तानि नरेश्वराणां विलोकने भानि शुभप्रदानि ॥

अथ क्रयविक्रयौ—

भाद्रद्वयत्रिदशमन्त्रिदिवाकरेषु
मूलानिलोत्तरतुरङ्गमरेवतीषु ।
सारङ्गपाणिरजनीकरमैत्रभेषु
लाभः सदैव भवति क्रयविक्रयाभ्याम् ॥

वस्त्रे तु--

चित्रा शतभिषा स्वाती रेवती चाश्विनी शुभा ।
श्रवणश्च तथा प्रोक्ता वस्त्राणां क्रयणे शुभाः ॥

अथ सेतुः--

स्वातीयुक्ते मन्दवारे वृषलग्ने शुभे दिने ।
सेतूनां बन्धनं कार्यं ध्रुवभे चार्कजीवयोः ॥

अथ पशुकृत्यम् । श्रीपतिः—

चित्रोत्तरावैष्णवरोहिणीषु
चतुर्दशीदर्शदिनाष्टमीषु ।
स्थानप्रवेशं गमनं विदध्यात्
पुमान् पशूनां न कदाचिदेव ॥

चण्डेश्वरः—

हस्तमूलविशाखासु रेवत्यां श्रवणे तथा ।
मैत्रे च वारुणे श्रेष्ठं पशुक्रयणमुच्यते ॥

पूर्वात्रयामृतमयूखहुताशनेषु
इन्द्राग्निवाजिवसुवारुणशंकरेषु ।

एतेषु गोमहिषदन्तितुरङ्गमादि-
नाना(१)प्रकारपशुजातिगतिः प्रशस्ता ॥

अथ गजदन्तच्छेदः । ज्योतिर्निबन्धे—

त्वाष्ट्रे वैष्णव अश्विन्यामादित्ये वसुदैवते ।
दन्तिनां शुभदं कर्म पुष्ये हस्ते च क(२)र्तनम् ॥

अथ निक्षेपः—

भरणी त्रीणि पूर्वाणि आर्द्राश्लेषा मघा तथा ।
चित्रा ज्येष्ठा विशाखा च मूलं मृगपुनर्वसू ॥
एभिर्दत्तं प्रयुक्तं च यद्यन्निक्षिप्यते धनम् ।
पृष्ठतो धावमानस्य ध(३)निनो नोपपद्यते ॥

अथ ऋणमोक्षः । श्रीधरः—

वागीशमन्ददिवसांशकलग्नयुक्ते
रिक्तासु मन्ददिवसे कुलिकोदये च ।
मैत्रद्वितीयपदमैत्रमुहूर्तयुक्ते
राश्युद्गमे च ऋणमोक्षमुशन्ति सन्तः ॥

अथ राजमुद्रा—

मृदुध्रुवक्षिप्रचरेषु भेषु योगे प्रशस्ते शनिचन्द्रवर्जम् ।
वारे तिथौ पूर्णजयाह्वये च मुद्राप्रतिष्ठा शुभदा हि राज्ञाम् ॥

अथ नौः । चण्डेश्वरः—

पौष्णाश्विनीतुरगवारुणमित्रचित्रा-
शीतोष्णरश्मिवसवोऽनलवन्त्यमूनि ।
वारे च जीवभृगुनन्दनके प्रशस्ते
नौकादिसंघटनवाहनमेषु कुर्यात ॥

अथ भोगः—

गुरुभरविभानुराधाविधातृपौष्णाश्विरोहिणिषु स्यात् ।
स्वात्युत्तरासु कुर्याच्छयनासनभोगभोगादि ॥

---

(१) 'नानाकुमारपशु' ख०   (२) 'कीर्तितं' क०
(३) 'निर्धनो' ख० ग०

अथ श्मश्रुकर्म । श्रीपतिः—

पुष्ये पौष्णे चाश्विनीष्वैन्दवे च
शाक्रे हस्ताद्ये त्रिकेऽप्यदित्याम् ।
क्षौरं कार्यं वैष्णवादित्रये च
मुक्त्वा भौमादित्यपातङ्गिवारान् ॥
न स्नातभुक्तोत्कटभूषिताना-
मभ्यक्तयात्रासमरोत्सुकानाम् ।
क्षौरं विदध्यान्निशि संध्ययोर्वा
जिजीविषूणां नवमे न चाह्नि ॥

त्रिस्थलीसेतौ वृद्धगार्ग्यः—

रव्यारसौरवारेषु रात्रौ पाते व्रताहनि ।
श्राद्धाहःप्रतिपद्रिक्ताभद्राः क्षौरेषु वर्जयेत् ॥

गार्ग्यः—

षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमी तथा ।
आसु सन्निहितं पापं त्रिषु तैले भगे क्षुरे ॥

राजमार्तण्डः—

देवकार्ये पितुः श्राद्धे रवेरंशपरिक्षये ।
क्षौरकर्म न कुर्वीत जन्ममासे च जन्मभे ॥

बृहस्पतिः—

राजकार्ये नियुक्तानां नराणां भूपजीविनाम् ।
श्मश्रुलोमनखच्छेदे नास्ति कालविशोधनम् ॥

तथा—

*क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके ॥

केचित्तूत्तरार्धमन्यथा पठन्ति ।

---

*क्षौरं नैमित्तिकमिति । अत्र 'निषेधे सत्यपि'इत्युपादानात् प्रायश्चित्ततीर्थयो रात्रावपि क्षौरम् । मृतिनिमित्तं तु दिन एव

मुण्डनस्य निषेधेऽपि कर्तनं तु विधीयते । इति ।

नारदः—

नृपविप्राज्ञया यज्ञे मरणे बन्धमोक्षणे ।
उद्वाहेऽखिलवारर्क्षे तिथिषु क्षौरमिष्टदम् ॥

भारते—

प्राङ्मुखः श्मश्रुकर्माणि कारयीत समाहितः ।
उदङ्मुखोऽथवा भूत्वा तथायुर्विन्दते महत् ॥

अपरार्के—

उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ।
केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेत् ॥
*दक्षिणं कर्णमारभ्य धर्मार्थे पापसंक्षये ।
शिखाद्ये नवसंस्कारे शिखाद्यन्तं शिरो वपेत् ॥

यतीनां तु विशेषो निगमे—

कक्षोपस्थशिखावर्जमृतुसन्धिषु वापयेत् । इति ।

अन्येऽपि विधिप्रतिषेधाः प्रागुक्ताः ।

अथेन्धनसंग्रहः—

ब्रह्मानिलार्कमघमूलत्रिपूर्वरौद्र-
पौष्णानुराधगुरुविष्णुविशाखयुक्ते ।

‘श्वस्तनी वपनक्रिया’इत्युक्तेः । *दक्षिणं कर्णमिति । तीर्थश्राद्धे वक्ष्यामः । निषिद्धदिने क्षौरे कृते पुनस्तद्दोषशान्त्यर्थं विहितकाले कार्यमित्याह गर्गः—

निषिद्धेषु च कालेषु क्षौर(१)कार्यं यदा भवेत् ।
तद्दोषशान्तये क्षिप्रं कुर्यात्तच्च शुभे दिने ॥ इति ।
आनर्त्तोऽहिच्छत्रः पाटलिपुत्रोदि(२)तिर्दिनः श्रीशः ।
क्षौरे स्मरणादेषां दोषा नश्यन्ति निःशेषाः ॥ इति ।

---

(१) ‘क्षौरकर्म यदा’ घ० ङ० ।
(२) ‘दिनिर्दितिः श्रीशः’ घ० ङ० ।

वारे कुजार्कभृगुनन्दनसोमजानां
श्रेष्ठन्नवनस्य करणं भवति प्रशस्तम् ।

अथ नवान्नम् । श्रीपतिः—

रेवतीश्रुतिपुनर्वसुहस्तब्राह्मतः पृथगपि द्वितये च ।
त्र्युत्तरेषु गदितं पृथुकानां प्राशनं नवनवान्नविधानम् ॥

अथ नवभोजनपात्रम् । ज्योतिर्निबन्धे—

भोज्यपात्रं सुधासिन्धौ घटयेद्वा समाहरेत् ॥
तत्रान्नप्राशनप्रोक्ते काले भोजनमाचरेत् ॥

अथ नवपर्णफलादिभक्षणम् । चण्डेश्वरः—

मूलाश्विमैत्रकरतिष्यहरीन्द्रभेषु
पौष्णोत्तरैन्दवपुनर्वसुवासवेषु ।
वारेषु भूमितनयार्कजवारवर्ज्ये
ताम्बूलनूतनफलाद्यशनं हिताय ॥

अथ होमे आहुतिपातः । ज्योतिषे—

*तरणिविद्भृगुभास्करिचन्द्रमाः
कुजसुरेज्यविधुंतुदकेतवः ।
रविभतो दिनभं गणयेत्क्रमात्
प्रतिखगं त्रितयं त्रितयं न्यसेत् ॥
दिनकरार्कितमःकुजकेतवो
हुतभुजे न शुभास्त्वितरे शुभाः ।

*तरणीति । एवं वह्निवासोऽपि बोध्यः ।

सैका तिथिर्वारयुता कृताप्ता
शेषे गुणेभ्रे भुवि व(१)ह्निवासः ।
सौख्याय होमे शशियुग्मशेषे
प्राणार्थनाशो दिवि भूतले च ॥ इति ।

---

(१) 'वह्निप्रः' घ० ङ० ।

दहनचक्रमिदं प्रविलोकयतां
हवनकर्मणि सर्वसमृद्धये ॥

अत्र शान्तिरुक्ता विष्णुधर्मे—

क्रूरग्रहमुखे चैव संजाते हवने शुभे ।
शान्तिं विधाय गां दद्याद्ब्राह्मणाय कुटुम्बिने ॥
आयसीं प्रतिमां कृत्वा निक्षिपेत्तामधोमुखीम् ।
गोमूत्रमधुगन्धाद्यैरर्चितां प्रतिमां ततः ॥
स्वस्थां निधाय संपूज्य तत्र होमो विधीयते ॥

अत्रापवादः क्रि(१)यासारे—

नित्ये नैमित्तिके दुर्गाहोमादौ न विचारयेत् ।

अथ ज्वरादौ फलम् । श्रीपतिः—

स्वात्याश्लेषारौद्रपूर्वासु शाक्रे
रोगोत्पत्तिर्जायते यस्य पुंसः ।
तद्भैषज्यव्यापृतो निष्प्रयत्नः
स्याद्दुग्धाब्धेर्लब्धज(२)न्मापि वैद्यः ॥
व्याध्युत्पत्तिर्यस्य पौष्णे स(३)मैत्रे
प्राणत्राणं जायते तस्य कृच्छ्रात् ।
वैश्वे सौम्ये रोगमुक्तिस्तु मासा-
द्विंशत्या स्याद्वासराणां मघासु ॥
पञ्चाद्धस्ते वासवे सद्विदैवे
मूलाश्विन्योराग्निधिष्ण्ये नवाहात् ।
याम्ये त्वाष्ट्रे वैष्णवे वारुणे च
नैरुज्यं स्यान्नूनमेकादशाहात् ॥
आहिर्बुध्न्ये तिष्यसंज्ञे यमाख्ये
प्राजापत्यादित्ययोः सप्तरात्रात् ।
रोगान्मुक्तिर्जायते मानवानां
निःसंदिग्धं जल्पितं गर्गमुख्यैः ॥

---

(१) 'क्रियासागरे' ख० (२) 'जन्मादिवैद्यः' क० (३) 'समित्रे' क०

ज्योतिषे—

एकाहो निधनं दशाहमनलाद्बाणा त्रियत्पर्वताः
सप्ताङ्का विलयश्च मासयुगुलं मासो मृतिः पक्षकः ।
द्वौ मासावथ विंशतिर्दश निशाः पक्षान्तपक्षा नखा
मासौ पक्षदशान्तपञ्चककुभः पीडादिनान्यश्विभात् ॥

दैवज्ञः—

उरगवरुणरौद्रा वासवेन्द्रात्रिपूर्वा
यमदहनविशाखाः पापवारेण युक्ताः ।
तिथिषु नवमिषष्ठी द्वादशी वा चतुर्थी
भवति मरणयोगो रोगिणां कालहेतुः ॥

अत्र (१)शान्तिः—कुम्भे हैमीं नक्षत्रदेवताप्रतिमां सम्पूज्य द्वादशदलेषु संकर्षणादिद्वादशमूर्तीर्द्वादशादित्यान् वा सम्पूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्या तद्देवतायै अष्टोत्तरशतं हुत्वा दध्योदनं बलिं दत्त्वाऽऽचार्याय गां प्रतिमां च दत्त्वा विप्रान् भोजयेदिति संक्षेपः । विशेषस्तु व्रतहेमाद्रौ पदार्थादर्शे च ज्ञेयः ।

अथ भेषजम् । चण्डेश्वरः—

मूलानुराधमृगतिष्यपुनर्वसौ च
पौष्णाश्विनीश्रवणशुक्रकरत्रये च ।
वारेषु वा(२)क्पतिदिनेषु सितेन्दुशस्ते
भैषज्यभक्षणममीषु हितं नराणाम् ॥

अथारोग्यस्नानम् । श्रीपतिः—

इन्दोर्वारे भार्गवे च ध्रुवेषु
सार्पादित्यस्वातियुक्तेषु भेषु ।
पि(३)त्र्ये चान्ते वापि कुर्यात्कदाचि-

---

(१) 'शान्तिः' नास्ति क०
(२) 'वाक्पतिसितेन्दुदिने प्रशस्तं भैष' क०
(३) 'पैत्र्ये' क०

न्नैव स्नानं रोगनिर्मुक्तजन्तुः ॥
चरे विलग्ने रविभौमवारे
रिक्ते तिथौ स्याद्बहुले च पक्षे ।
धिष्ण्ये चरे रोगनिपीडितानां
स्नानं नराणां निरुजत्वकारि ॥

अथ दन्तधावनम् । पृथ्वीचन्द्रोदये विष्णुः—

प्रतिपद्दर्शषष्ठीषु चतुर्दश्यष्टमीषु च ।
नवम्यां भानुवारे च दन्तकाष्ठं विवर्जयेत् ॥

नारदः—

चतुर्दश्यष्टमीपौर्णमासीसंक्रमणेषु च ।
नन्दासु च नवम्यां च दन्तकाष्ठं विवर्जयेत् ॥
श्राद्धे यज्ञे च नियमे तथा प्रोषितभर्तृका ।
व्यतीपाते च संक्रान्त्यां नन्दाभूताष्टपर्वसु ॥
तैलं क्षौरं रतिं मांसं दन्तकाष्ठं च वर्जयेत् ॥

वसिष्ठः—

शन्यर्कशुक्रवारेषु कुजाहे व्रतवासरे ।
जन्माहे श्राद्धदिवसे दन्तकाष्ठं विवर्जयेत् ॥

हेमाद्रौ स्कान्दे—

अभ्यङ्गे जलधिस्नाने दन्तधावनमैथुने ।
जाते च निधने चैव तत्कालव्यापिनी तिथिः ॥

संवर्तः—

रवौ विवाह आशौचे वर्जयेद्दन्तधावनम् ॥

व्यासः—

*अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।

---

*अलाभे दन्तकाष्ठानामिति ।
तृणपर्णैः सदा कुर्यादमामेकादशीं विना ।
इति वाक्यसारोक्तवचनाद् 'अपां द्वादश'इत्यादि एकाद-

अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥

अथामलकस्नानम् । व्यासः—

श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः ।
सप्तमीं नवमीं चैव पर्वकालं विवर्जयेत् ॥
चन्द्रसूर्योपरागे च स्नानमामलकैस्त्यजेत् ॥

क्रतुः—

षष्ठी च सप्तमी चैव नवमी च त्रयोदशी ।
संक्रान्तौ रविवारे च स्नानमामलकैस्त्यजेत् ॥

यत्तु—

नवमी दशमी चैव तृतीया च त्रयोदशी ।
प्रतिपद्द्वादशी कृष्णा स्नानं तासु विवर्जयेत् ॥

यच्च—

दर्शे स्नानं न कुर्वीत मातापित्रोः सुजीवतोः ।
पुत्रः कुर्वन्निराचष्टे पित्रोरुन्नतिजीविते ॥

इति कण्वयमाद्यैः स्नानमात्रं निषिद्धं, तद्भोगार्थस्नानपरं न नित्यनैमित्तिकपरमिति हेमाद्रिः ॥

अथ तैलस्नाननिषेधः । कात्यायनः—

पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ ।
तैलेनाभ्यज्यमानस्तु चतुर्भिः परिहीयते ॥

गर्गः—

पञ्चदश्यां चतुर्दश्यामष्टम्यां र(१)विसंक्रमे ।
द्वादश्यां सप्तमीषष्ठयोस्तैलस्पर्शं विवर्जयेत ॥
न च कुर्यात्तृतीयायां त्रयोदश्यां तिथौ तथा ।
शाश्वतीं गतिमन्विच्छन् दशम्यामपि पण्डितः ॥

शीविषयमिति केचित् । तन्न, “पत्रैर्वा शोधयेन्मुखम्”इति वचनान्तरात् ।

---

(१) ‘रविवासरे’ क० ।

तत्रैवायुर्वेदे—

षष्ठ्यां दिनक्षयेऽष्टम्यामेकादश्यां च पर्वसु ।
द्वादश्यां च चतुर्दश्यां पञ्चम्यां प्रतिपत्तिथौ ॥
व्रते श्राद्धदिने जन्मत्रितये श्रवणार्द्रयोः ।
ज्येष्ठोत्तराफाल्गुनीषु व्यतीपाते च वैधृतौ ॥
विष्टियोगे च संक्रान्तौ मन्वादिषु युगादिषु ।
नाभ्यङ्गं तत्र बालानां वृद्धानां तु न दोषकृत ॥ इति ।

व्यवहारतत्त्वे—

संक्रान्तिभद्राव्यतिपातवैधृति-
षष्ठ्यष्टमीपर्वसु नार्कभूसुते ।
स्नाने द्वितीया दशमी च गर्हिताः
ष(१)ष्ठ्याद्यमाद्या रदधावनेऽधमाः ॥

अस्यापवादमाह तत्रैव प्रचेताः—

सार्षपं गन्धतैलं च यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥

आयुर्वेदे—

निषिद्धतिथिवारर्क्षग्रहणेष्वपि रात्रिषु ।
किञ्चिद्गोघृतयुक्तं वा विप्रपादरजोन्वितम् ॥
भानौ दूर्वान्वितं भौमे भूयुक्तं पुष्पयुग्गुरौ ।
सर्वेषां सर्वदा तैलमभ्यङ्गेषु न दुष्यति ॥

मङ्गलेष्वप्यदोषः,

माङ्गल्यं विद्यते स्नानं वृद्धिपर्वोत्सवेषु च ।
स्नेह(२)पात्रसमायुक्तं मध्याह्नात् प्राक्तदिष्यते ॥

इति मदनपारिजाते कात्यायनोक्तेः । हेमाद्रौ बृहन्मनुः—

तैलाभ्यङ्गो नार्कवारे न भौमे
नो संक्रान्तौ वैधृतौ विष्टिषष्ठ्योः ।
पर्वस्वष्टम्यां च नेष्टः स इष्टः
प्रोक्तान्मुक्त्वा वासरे सूर्यसूनोः ॥

---

(१) 'षष्ठ्यादिमाद्या' क० ख० । (२) 'स्नेहमात्र' ख० ।

तिलस्नाननिषेधस्तु षट्त्रिंशन्मते—

तथा सप्तम्यमावास्यासंक्रान्तिग्रहजन्मसु ।
धनपुत्रकलत्रार्थी तिलपिष्टं न संस्पृशेत् ॥

अथ गृहारम्भः । ज्योतिर्निबन्धे बादरायणः—

वैशाखे फाल्गुने पौषे श्रावणे मार्गशीर्षके ।
सूत्रारम्भः शिलान्यासः स्तम्भारम्भः प्रशस्यते ॥

नारदः—

सौम्यफाल्गुनवैशाखमाघश्रावणकार्तिकाः ।
मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः ॥

अत्र वृषसिंहवृश्चिकाः वैशाखश्रावणकार्तिकाः सौरा ज्ञेया इति कालादर्शः । तत्रैव कारणतन्त्रे—

स्थिरमासे स्थिरे राशौ स्थिरेंऽशे नववेश्मनाम् ।
कुर्वीत स्थापनं शङ्कोः स्तम्भस्थापनमेव वा ॥

कार्तिकनिषेधस्तुलापरः,

कुम्भे(१)मासेपि सर्वेषां मन्दिराणामुपक्रमम् ।
महर्षयः प्रशंसन्ति धान्यागारं विहाय च ॥

निषेधो धान्यगृहपरः ।

पाकभोजनशालादौ मार्गशीर्षश्च फाल्गुनः ।
रथ्यागेहमठादौ च सहस्यः शुचिरेव तु ॥

पौषाषाढनिषेधस्तु प्रधानगृहपरः,

न प्रधानगृहारम्भं कुर्यात्पौषे शुचावपि ।

इति तत्रैवोक्तेः । ज्योतिस्तत्त्वे—

पूर्वापरास्यं तु नभोऽन्त्यपौषे
याम्योत्तरास्यं सहसि द्वितीये ।
कार्यं गृहं जीवबुधर्क्षगार्के
नीचास्तगौ जीवसितौ च हित्वा ॥

---

(१) 'माघेऽपि' ख० ।

रत्नमालायाम्—

कर्कनक्रहरिकुम्भगतेऽर्के
पूर्वपश्चिममुखानि गृहाणि ।
तौलिमेषवृषवृश्चिकयाते
दक्षिणोत्तरमुखानि वदन्ति ॥

दैवज्ञवल्लभः—

शोकं(१)धान्यं पञ्चतां निःपशुत्वं
स्वापं नैःस्वं संगरं भृत्यनाशम् ।
स्वं श्रीप्राप्तिं वह्निभीतिं च लक्ष्मीं
कुर्युश्चैत्राद्या गृहारम्भकाले ॥

गर्गः—

त्र्युत्तरामृगरोहिण्यां पुष्ये मैत्रे करत्रये ।
धनिष्ठाद्वितये पौष्णे गृहारम्भः प्रशस्यते ॥
रोहिण्यां श्रवणत्रयेऽदितियुगे हस्तत्रये मूलके
रेवत्युत्तरफल्गुनीषुरगभे मैत्रोत्तराषाढयोः ।
शस्तं वास्तु कुजार्कवर्जितदिने गोकुम्भसिंहे मुखे
कन्यायां मिथुने नभःशुचिसहोराधोर्जके फाल्गुने ॥

कालादर्शे सनत्कुमारः—

आदित्यभौमवर्जं तु सर्वे वाराःशुभप्रदाः ।

वास्तुशास्त्रे—

मार्गशीर्षे तथा पौषे वैशाखे श्रावणे तथा ।
फाल्गुने च कृतं वेश्म सर्वसंपत्प्रदं भवेत् ॥
कार्तिके माघमासे च चैत्रे ज्येष्ठे तथाश्विने ।
मास्याषाढे भाद्रपदे न कुर्यात्सर्वथा गृहम् ॥
द्वितीया च तृतीया च पञ्चमी सप्तमी तथा ।
त्रयोदशी च दशमी पूर्णा चैकादशी तथा ॥
वेश्मारम्भे शुभाय स्युर्विशेषाच्छुक्लपक्षगाः ॥

---

(१) 'रत्नं धान्यं' इति कालादर्शे पाठः ।

व्यवहारसारे—

शिलान्यासः प्रकर्तव्यो गृहाणां श्रवणे मृगे।
पौष्णे हस्ते च रोहिण्यां पुष्याश्विन्युत्तरात्रये॥

वास्तुप्रदीपे—

अधोमुखैर्भैर्विदधीत खातं शिलास्तथैवोर्ध्वमुखैश्च पट्टम्।
तिर्यङ्मुखैर्द्वारकपाटयानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च॥

लल्लः—

स्नानं च पाकं शयनं च भोज्यं गजालयं वाजिगृहं धनस्य।
देवस्य पूर्वादिदिशि क्रमेण मध्ये सभा भूपनिवेशनाय॥

शिल्पशास्त्रे—

कन्यासिंहे तुलायां भुजगपतिमुखं शम्भुकोणेऽग्निखातं
वायव्ये स्यात्तदास्यं त्वलिधनमकरे ईशखातं वदन्ति।
कुम्भे मीने च मेषे निर्ऋतिदिशि मुखं खातवायव्यकोणे
चाग्नेः कोणे मुखं वै वृषमिथुनगते कर्कटे रक्षखातम्॥

तत्त्वचिन्तामणौ—

यत्र दैर्घ्यं गृहादीनां द्वात्रिंशद्धस्ततोऽधिकम्।
न तत्र चिन्तयेद्धीमान् गुणानायव्ययादिकान्॥

राजमार्तण्डः—

आयव्ययौ मासशुद्धिं तृणागारे न चिन्तयेत्।
शिलान्यासादि नो कुर्यात्तथागारे पुरातने॥

व्यवहारतत्त्वे—

निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने।
तृणकाष्ठगृहारम्भे मासदोषो न विद्यते॥

चण्डेश्वरः—

पूर्णादि त्वष्टमीं यावत्पूर्वास्यं वर्जयेद् गृहम्।
उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशीम्॥
अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत्।
नवम्यादौ तथा याम्यं यावत्कृष्णचतुर्दशीम्॥

ध्रुवं दृ(१)ष्ट्वाथवा स्मृत्वा कर्तव्यं वास्तुरोपणम् ।
सायाह्नवर्ज्यदिवसे रात्रौ त्यक्त्वा महानिशाम् ॥

वराहः—

दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमाम् ।
शेषाः प्रदक्षिणेन स्तम्भाश्चैवं समुत्थाप्याः ॥

कालादर्शे वास्तुशास्त्रे—

खाते चैव शिलान्यासे(२)वृषचक्रं प्रशस्यते ।

तच्चोक्तं शान्तिरत्ने—

चतुर्हस्तप्रमाणं तु खात्वा गर्तं समन्ततः ।
कुम्भोदकैः सेचयेयुः शान्तिपाठपुरःसरम् ॥
तत ईशानदिग्भागे साक्षतं रत्नपञ्चकम् ।
साज्यं कुम्भं स्थिरं मुक्त्वा वास्तुपूजनपूर्वकम् ॥
कुम्भोपरि शिलान्यासः कर्तव्यस्तदनन्तरम् ॥

अथ गृहप्रवेशः । बृहस्पतिः—

नन्दायां दक्षिणद्वारं भद्रायां पश्चिमेन तु ।
जयायामुत्तरद्वारं पूर्णायां पूर्वतो विशेत् ॥

वसिष्ठः—

कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं
विप्रान्पूज्यानग्रतः पूर्णकुम्भम् ।
हर्म्यं रम्यं तोरणस्राग्वितानैः
स्त्रीभिः स्रग्वी गीतवाद्यैर्विशेच ॥

व्यवहारतत्त्वे—

सौम्यायने श्रावणमार्गपौषे
जन्मर्क्षलग्नोपचयोदयेंऽशे ।

---

(१) 'दृष्ट्वा तथा स्मृत्वा' क० ।

(२) वृषचक्रं धर्माब्धौ-नेष्टानि सप्त सूर्यर्क्षादिष्टान्येकादशाष्टमात् । दश शिष्टानि नेष्टानि चक्रे स्युर्वृषवास्तुनि ॥ यद्वा तुर्यात्पञ्चदशात्त्रयोविंशतिसंख्यकात् । वेदाब्धिपञ्च नेष्टानि गृहारंभप्रवेशयोः' इति वास्तुचक्रम् ।

वामं गतेऽर्के गृहवास्तुपूजां
कृत्वा विशेद्वेश्म भकूटशुद्धम् ॥

वास्तुशास्त्रे—

लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् ।
एकमेकं न्यसेत्कोणे सू(१)र्यं वामं विचिन्तयेत् ॥

वसिष्ठः—

चन्द्रजार्यसितवासरेषु च
श्रीकरं सुतमहार्थलाभदम् ।
सूर्यसूनुदिवसे स्थिरप्रदं
किन्तु चौरभयमत्र निर्दिशेत ॥

रत्नकोशे—

पुष्ये धनिष्ठामृगवारुणेषु
स्वायंभुवर्क्षे त्रिषु चोत्तरासु ।
अक्षीणचन्द्रे शुभदो नृपस्य
तिथावरिक्ते च गृहप्रवेशः ॥

नारदः—

प्रवेशो मध्यमो ज्ञेयः सौम्यकार्तिकमासयोः ।
माघफाल्गुनवैशाखज्येष्ठमासेषु शोभनः ॥
अकपाटमनाच्छन्नमदत्तबलिभोजनम् ।
गृहं न प्रविशेद्धीमानापदामाकरो हि त(२)त् ॥

ज्येष्ठः क्षुद्रगृहपरः । **वृद्धगार्ग्यः**—

भानोश्च भौमस्य विहाय वारौ
शूलादियोगानशुभान्नवापि ।
रिक्ता तिथिश्चापि मृदुध्रुवर्क्षे
सौम्यायने च प्रविशेद्गृहाणि ॥

रत्नमालायाम्—

त्वाष्ट्रमित्रशशिपू(३)षदैवतान्यामनन्ति मुनयो मृदून्यथ

---

(१) 'सूर्यं वामे विचारयेत्' ख०। (२) 'यत्' क०। (३) 'पुष्यदेवता' क०।

मैत्रगे हरति भूषणाम्बराङ्गीतमङ्गलविधानमेषु च ॥

रोहिण्युत्तरात्रयं च ध्रुवाणि । प्रवेशश्च वास्तुपूजां कृत्वा कार्यः—

जीर्णोद्धारे तथोद्याने तथा गृहनिवेशने ।
नवप्रासादभवने प्रासादपरिवर्त्तने ॥
द्वाराभिवर्त्तने तद्वत्प्रासादेषु गृहेषु च ।
वास्तू(१)पशमनं कुर्यात्पूर्वमेव विचक्षणः ॥

इति मात्स्योक्तेः । तत्रैव—

कृत्वाग्रतो द्विजवरानथ पूर्णकुम्भं
दध्यक्षताम्रदलपुष्पफलोपशोभम् ।
दत्त्वा हिरण्यवसनानि तथा द्विजेभ्यो
माङ्गल्यशान्तिनिलयं स्वगृहं विशेच ॥
गृह्योक्तहोमविधिना बलिकर्म कुर्यात्
प्रासादवास्तुशमने च विधिर्य उक्तः ।
संतर्पयेद्द्विजवरानथ भक्ष्यभोज्यैः
शुक्लाम्बरः स्वभवनं प्रविशेत्सुरूपम् ॥

अथ कलिवर्ज्यानि बृहन्नारदीये—

*समुद्रयातुः स्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपयमस्तथा ॥

यस्तु कार्त्तयुगो धर्मो न कर्त्तव्यः कलौ युगे ।
पापप्रयुक्ताश्च सदा कलौ नार्यो नरास्तथा ॥

इत्यादित्यपुराणवचनेन यद्यपि कृतयुगसंबन्धि धर्मसामान्यं निषिद्धं तथापि सर्वस्य तस्य निषेद्धुमशक्यत्वाद्विशेषानाह-*समुद्रेति । यद्यपि समुद्रयानं न विहितं तथापि बौधायनेन "समुद्रयानं ब्राह्मस्य न्यासापहरणम्"इत्यादिना तत्कर्त्तुः प्रायश्चित्तं विहितं, तदपि कलौ कर्त्तव्यमेवेति तत्करणानन्तरं तद्व्यवहारो निषिद्ध्यते,

---

(१) 'वास्तुप्रसवनं' क० ।

देवराच्च सुतोत्पत्तिर्मधुपर्के *पशोर्वधः ।
*मांसदानं तथा*श्राद्धे*वानप्रस्थाश्रमस्तथा ॥
दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ।
*दीर्घकालं ब्रह्मचर्यं*नरमेधाश्वमेधकौ ॥

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।

इत्यग्निमवचनाच्च । एतच्च प्रायश्चित्तं रागप्राप्ते समुद्रयान एव । शंखोद्धारादितीर्थे यात्राविधिनान्तरीयकं समुद्रयानमतो दोषाभावान्न प्रायश्चित्तमित्यन्यत्र विस्तरः । अत्र क्रत्वर्थमात्रनिषेधेऽपि न क्षतिः पुरुषार्थनिषेधान्तरसत्त्वात् । *पशोरिति ।

महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् ।

इति अजादिसंग्रहार्थं पशुपदम् । *मांसदानमिति श्राद्धसम्बन्धि(१)क्रत्वर्थपुरुषार्थत्वं निषिध्यते, यथा वेदिबर्हिर्धर्माणां प्रधानसम्बन्धिमात्रांशे विधिः, न तु तादर्थ्यांशेऽपि, मानाभावात्, तद्वत् ।(२)एतेन—

शौचं च पात्रशुद्धिश्च श्रद्धा च परमा यदि ।
अनन्ततृप्तिकृच्छ्राद्धमेतत्खलु न चामिषम् ।

इति पुरुषार्थमामिषदानं निषिध्यते, न तु क्रत्वर्थं विधिस्पृष्टे निषेधानवकाशादित्यपहसितम् । *श्राद्धे इति उपलक्षणार्थं, तेनो(३)पयाचितकादावपि निषेधः । *वानप्रस्थेति ।

सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम् ॥
वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥(या० स्मृ० ३-४

इति विहितः । वानप्रस्थो बुभूषुरिति शेषः । *दीर्घकालमिति । "अष्टचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यम्" इति श्रुतिविहितम्,

यदि चात्यन्तिको वासो रोचेत स्वगुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥

---

(१) 'क्रत्वर्थं पुरुषार्थं च' ख० । (२) 'एतेन' नास्ति घ० ङ० ।
(३) 'तेनोपयाचितकारादिनिषेधः' घ० ङ० ।

*महाप्रस्थानगमनं *गोमेधश्च तथा मखः ।
इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः ॥

कमण्डलुः 'सोदकं च*कमण्डलुम्' इत्युक्तः, मृन्म-

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत् ॥
एतेष्वविद्यमानेषु स्थानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः ॥

इति विहितं नैष्ठिकं च । स्थानमङ्गुष्ठाग्रादिना नियतमूर्ध्वावस्थानम्, आसनं नियमोपवेशनं, विहारो भ्रमणम्, एतैस्तपोविशेषो लक्ष्यते । नव्यास्तु दीर्घकालमिति कालापवादमात्रम् । अन्यथा दीर्घं ब्रह्मचर्यमित्येव ब्रूयात् । तेन श्रौतमेव निषिध्यते न नैष्ठिकम् । तेन द्राविडानां नैष्ठिकाचारोऽपि संगच्छते इत्याहुः । *नरमेधेति । "ब्रह्मणे ब्राह्मणमालभते" इति "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति विहितौ । *महाप्रस्थानेति ।

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकमहायात्रां कुर्वन् वा न प्रदुष्यति ॥

इति विहितमाशरीरपातमुत्तरादिग्गमनम् । *गोमेधश्चेति । "मैत्रावरुणीं गां वशामनुबन्ध्यामालभेत" इति विहितो यागभेदः । चकारात् राजसूयग्रहः,

न कलौ क्रियते अश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात् पुत्रसन्ततिः ॥
गर्हितं सप्तकं ह्येतद्राजसूयः कमण्डलुः ।

इति हेमाद्रौ गारुडाद्धा । राजसूयश्च "राजा राजसूयेन यजेत" इति विहितः । *कमण्डलुमित्युक्त इति । इदमुपलक्षणम्,

दाक्षायणी ब्रह्मसूत्री वेणुमान् स कमण्डलुः ।

इत्युक्तस्योपलक्षणम् । तथाच स्नातकस्य इत्युक्तः "अथ

यो वा। दत्ता ऊढा,

*ऊढायाः पुनरुद्वाहं*ज्येष्ठांशं*गोवधं तथा।
कलौ पञ्च न कुर्वीत *भ्रातृजायां कमण्डलुम्॥

इति हेमाद्रौ वचनात्। ऊढायाः—

पुरा पुरुषसंयोगान्मृते देयेति केचन।

इत्या*दिभिर्विवाह्यतोक्ता। हेमाद्रौ ब्राह्मे—

गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा।
नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः॥

गोत्राद्गोत्रजायाः पितृष्वसुः, मातृसपिण्डान्मातुलात्तत्कन्याया विवाहः कलौ न कार्यः। *तेन यानि तद्विधायकानि, तानि *युगान्तरविषयाणि। तथा च

कमण्डलुचर्यामुपदिशन्ति” इति बौधायनोक्तेतिकर्त्तव्यताकः काष्ठमयो मृन्मयो वेत्यर्थः। तेन मृन्मयो वेति वाकारः सङ्गच्छते। न च कमण्डलुधारणं वानप्रस्थाश्रमे इति मतं सम्यक्, तस्य पृथगुपादानात्।

ननु दत्तापदं कुतो न वाग्दत्तापरमित्यत आह-*ऊढाया इति। *ज्येष्ठांशामिति।

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्। (म० स्मृ.९-११२)

इति विहितम्। *गोवधमिति। मधुपर्के इति शेषः। *भ्रातृजायामिति। जायामिति शेषः। पञ्चेति न परिसंख्या, वाक्यान्तरदर्शनात्। एतद्वाक्योपात्तत्वोपाधिना च पञ्चत्वम्। *आदिभिरिति। आदिना

ऋतावदृष्टे कन्यैव पुनर्देयेति केचन।

इत्यादिपरिग्रहः। ननु पैतृष्वसेयीमातुलकन्ययोर्विवाहे “तस्तां जहुः” इत्यादिश्रुतिः प्रमाणं, श्रुतेः स्मृत्यपेक्षया प्राबल्यादित्य आह-*तेनेति। *युगान्तरेति। न चैतद्युग एव अर्जुनादीन कथं मातुलकन्यापरिणय इति वाच्यं “विहितान्यपि कर्माणि

व्यासः—

तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥

इति कलौ तन्निन्दामाह । मातृतस्तृतीयां मातुलकन्यामित्यर्थः । उक्तं चैतत्प्राक् । *मद्यं 'स्त्रीभ्यश्च सुरामाचामम्' इत्यादिना *विहितमपि वर्ज्यम् ।

इति अग्रिमवाक्यात् । *मद्यमिति । सुरापैष्टीनां चायं निषेधो न विषयीकरोति, सुरामद्ययोर्भेदात् ,

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥

इति मनुना द्विजातिसामान्ये तन्निषेधाच्च । न च माध्वीकादिकं,

माधूकमैक्षवं सैरं तालं खार्जूरपानसम् ।
मधूत्थं चैव माध्वीकं मैरेयं नारिकेरजम् ॥
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्य तु ॥

इति विष्णुना सामान्यत एव तन्निषेधात् , "नित्यं मद्यं ब्राह्मणो वर्जयेत्" इति निषेधान्तराच्च; किन्तु

कामादपि हि राजन्यो वैश्यो वापि कथञ्चन ।
मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते ॥

इति बृहद्याज्ञवल्क्येन राजन्यवैश्ययोरभ्यनुज्ञातं मद्यं निषिध्यते । एवं त्रैवर्णिकादिपुरस्कारेण वामागमादौ विहितं विनायकशान्त्यादौ च क्षत्रियादेरुक्तं मद्यं निषिध्यते । नन्वेतावता निषेधस्य प्राप्तिपूर्वकत्वोपपत्तौ कथं "स्त्रीभ्यश्च सुरामाचामम्" इति सङ्गच्छते, मद्ये सुरालक्षणायां मानाभावात् ? शृणु, मद्यमपीह सुराशब्देन ग्रहीतुं शक्यते, गौडी-पैष्टी-फालीभेदेन तस्यास्त्रिविधत्वात् । *विहितमिति । आश्वलायनगृह्ये "अपरेद्युरन्वष्टक्यम्" इत्यत्र विहितमित्यर्थः ।

हेमाद्रौ आदित्यपुराणे—

*विधवायाः प्रजोत्पत्तौ देवरस्य नियोजनम् ।

ओदनाग्रद्रवं प्राहुराचामं हि मनीषिणः ।

*विधवाया इति । अत्र—

विहितान्यपि क(१)र्माणि धर्मलोपभयाद् बुधैः ।
समापने निवृत्तानि साध्वभावात्कलौ युगे ॥

इति प्रकृतम् । समापने जन्मेजयाश्वमेधसमाप्तौ निवृत्तानि निवर्त्तितानि । तेन द्रोणादीनां वधे कथं पाण्डवादीनां कलिमध्ये दोषो नास्तीति न शङ्क्यम् । इदं च "देवराच्च सुतोत्पत्तिः" इति च वाग्दानानन्तरं मृते पत्यौ देवरपरं,

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥

अनेन विधानेन घृताभ्यङ्गादिनियमवन्नियोजनविधानेन ।

यथाविध्यभिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् ।
मिथो भजेताप्रसवात्सकृत्सकृदृतावृतौ ॥

इति मनुना,

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥

इति याज्ञवल्क्येन च तदनुज्ञानात्, न तु विवाहानन्तरं विधवायां,

नान्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः ।

इति मनुना वि(२)वाहानन्तरं विधवानियोजननिषेधात् । न चैवं भारते कथं सत्यवत्यां कनिष्ठभ्रातृभार्यायां विधवायां व्यासो नियुक्त इति वाच्यम्, तत्र 'धनेनोपतोष्य कश्चन ब्राह्मणो नियोज्यः' इति भीष्मानुज्ञया सत्यवत्याः तथा(३)करणेन निषेधगतान्य-

---

(१) 'कार्याणि' ख० ।
(२) 'विवाहानन्तरं विधवानियोजन' नास्ति घ० ङ० ।
(३) 'तथा' नास्ति ख० ।

*बालायाः क्षतयोन्यास्तु वरेणान्येन संस्कृतिः ॥

पदस्य ब्राह्मणेतरान्यपरत्वात् । अन्यथा ब्रह्मक्षात्रियदेवक्षात्रियभेदो न स्यात् । महाप्रभावतया दोषकल्पनाविरहेणान्यपदस्य यथाश्रुतार्थत्वाद्वा । देवराच्चकारादनुज्ञातसपिण्डसगोत्रयोरपि ग्रहः । *बालाया इति 'दत्ताक्षताया:' इत्येतत्समानार्थम् । वस्तुतस्तु ननु इदं वाक्यद्वयं कथं सङ्गच्छते, "नान्यस्मिन् विधवा नारी" इति मनुना सर्वदा तन्निषेधात् ।

मन्वर्थविपरीता तु स्मृतिः सापि विनश्यति ।

इति अङ्गिरोवाक्यात्, नापि देवरनियोजनं तदर्थः "देवराच्च सुतोत्पत्तिः" इत्यनेन पौनरुक्त्यापत्तेः, नापि वाग्दत्ताविषयकं तदानीं क्षतयोनित्वशङ्काया अभावात्; इति चेत् ? न,

दत्तामपि हरेत्पूर्वाच्छ्रेयाँश्चेद्वर आव्रजेत् ।

इति सप्तपद्युपक्रमणात्प्राग् यदन्यस्मै दानमुक्तं तद्विषयकत्वात् । ननु पराशरेण "कलावनुष्ठेयान्धर्मान् वक्ष्यामि" इति प्रतिज्ञाय

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ॥
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति वचनाद् वाग्दत्तायाः कलौ पत्यन्तरमस्तीति (१)कथं दत्तापहारः कलिवर्ज्य इति चेत् ? (२)कलौ दत्तापहारो न कार्यः, वाग्दानानन्तरतन्मरणे पराशरवचनात्तस्याः वरान्तरेण विवाहः कार्यः,

कन्यायां शुल्कदत्तायां म्रियेत यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते ॥

इत्युक्तवाक्ये कन्याया अनुमतौ पुरुषान्तराय दानलाभात् । इयांस्तु विशेषः—कन्यानुमतावपि देवराय सा न विवाह्या नियोगसाम्यात्, 'देवराच्च सुतोत्पत्तिः' इति सामान्यतो निषेधात् । एवं

---

(१) 'कथं वाग्दत्ता ख० ।
(२) 'कलौ दत्तापहारो न कार्यः' नास्ति ख० ।

*कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः ।
*आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥

सगोत्रसपिण्डयोरपि न विवाहेति । *कन्यानामिति ।

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥

इति याज्ञवल्क्येन विहितः । अत्र-

असवर्णासु कन्यासु विवाहश्च द्विजातिभिः ॥

इति स्मृत्यन्तरं 'द्विजानामसवर्णासु' इति प्रागुक्तं चैकार्थं बोध्यम्। *आततायीति ।

गुरुं वा बालवृद्धं वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥

इति विहितं सन्मुखमकूटशस्त्रेण मारणम् । एतेन "नाततायिवधे दोषोऽन्यत्र गोब्राह्मणेभ्यः" इति सौमन्तवं व्याख्यातं, तस्य कलिपरत्वात् । एवं सति यत् श्रीरामेण रावणं हत्वा दश जारूप्या(?)श्वमेधाः कृता इति रामायणं तत् आततायिवधे युगान्तरे सपरिहारो दोष इत्येतदर्थम् । वस्तुतस्तु "गुरुं वा बालवृद्धं वा ब्राह्मणं वा" इत्यादिवाशब्दस्वारस्यात्कैमुत्यन्यायेन ब्राह्मणभिन्न आततायी वध्य इत्यत्रैव तात्पर्यम् । इदमपि स्ववधोद्यताततायिविषयम्,

उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् ।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत् ॥

इति गालववचनात् ।

स्वाध्यायिनां कुले जातं न हन्यादाततायिनम् ।
तं हत्वा भ्रूणहा स स्यादहत्वाऽभ्रूणहा भवेत् ॥

इति बृहस्पतिवचनम्

आततायिनमुत्कृष्टं व्रतस्वाध्यायसंयुतम् ।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत् ॥

द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः ।
*सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
*महाप्रस्थानगमनं *गोसंज्ञप्तिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ॥
*अग्निहोत्रहव(१)न्याश्च लेहो लीढापरिग्रहः ।
वृत्तस्वाध्यायसा(२)पेक्षमघसंकोचनं तथा ॥
*प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ।
संसर्गदोषस्तेयान्यमहापातकनिष्कृतिः ॥

इति च स्ववधानुद्यताततायिपरमिति । एवञ्च स्ववधोद्यतब्राह्मणभिन्नाततायिवधः कलौ न कार्य इत्याशयेन द्विजानामिति पदम् । *सत्रेति । आसनोपायचोदिते "सप्तदशावराश्चतुर्दशपरमाः सत्रमासीरन्" इति विहिता सत्रदीक्षा, सत्राधिकार इति यावत् । *महाप्रस्थानम् आशरीरपातमुत्तरदिग्गमनम् ।

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकमहायात्रां कुर्वन्न वा न प्रदुष्यति ॥

इति विहिता महायात्रा । *गोसंज्ञप्तिरिति । गोसवनिषेधार्थम् । *अग्निहोत्रेति । अग्निहोत्रं हूयते यया वैकङ्कतस्रुचा सोऽग्निहोत्रहवणी तस्या अग्निहोत्रहोमानन्तरं हुत्वाऽवशिष्टप्राशनार्थं जिह्वया लेहः कथञ्चिल्लीढायाः पुनर्ग्रहोऽग्निहोत्रसाधनत्वम् । *प्रायश्चित्तेति । कामकृते महापापादौ ।

न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ।

इत्यादिना विहितस्य विधानमुपदेशः ।

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मनुवाक्यं त्वेतद्युगपरम् । अत्र मरणान्तिकं विदधातुः जातिवधप्रायश्चित्तं सूच्यते । तच्च मतिपूर्वनिर्देश एव अन्यापदेशेन

---

(१) 'हवण्याश्च' क० । (२) 'साक्षेपमघ' क० ।

*संसर्गदोषः 'तत्संसर्गी च पञ्चमः' इत्युक्तः। स्तेयं च तदन्यानि महापातकानि ब्रह्महत्यासुरापगुरुतल्पानि त्रीणि, तेषां कामकृतानां मरणान्तिकं प्रायश्चित्तं विप्राणां कलौ नेत्यर्थः। मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्द द्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति तत् 'चतुर्थे नास्ति निष्कृतिः' इति निषिद्धम्। न चा*त्महत्याविधिना तद्बाधः, तेन ह्यात्महत्यानिमित्त-

पृष्टं प्रति निर्देशे तदनन्तरं पृच्छकेन तथाचरणे तु न दोष इत्येतदर्थं मतिपूर्वमित्युक्तम्। अत्र पाठान्तरं—संसर्गदोषस्तत्संसर्गी च पञ्चमः इत्युक्तः। स्तेयं च तदन्यानि महापातकानि ब्रह्महननसुरापानगुरुतल्पगमनानि त्रीणि महापापानि, तेषां कामकृतानां विप्राणां प्रायश्चित्तं मरणान्तिकं कलौ नेत्यर्थः। मरणान्तिके हि जातिवधनिमित्तं द्वादशाब्दं द्विगुणं ब्रह्मवधनिमित्तं च द्विगुणं भवति। तत् 'चतुर्थे नास्ति निष्कृतिः' इति निषिद्धम्। न चात्महत्याविधिना तद्बाधः। तेन हि आत्महत्यानिमित्तस्यैव बाधो न जातिवधनिमित्तस्य। संसर्गिणस्तु कामतोऽपि व्रतस्यैवोक्तेर्न मरणान्तिकं, नापि स्तेये, तत्र राज्ञो वधकर्तृत्वात्। तेन तयोर्मरणान्तिकाभावात्तयोरेव निष्कृतिर्नान्येषां त्रयाणाम्। युगान्तरे (१)तु कलौ निषेधबलादेव प्रवृत्तिः। एतद्विप्रपरं न क्षत्रियादेः। तदुक्तं 'विप्राणां मरणान्तिकम्' इति। विशेषस्तत्र स्मत्कृते प्रायश्चित्तरत्ने द्रष्टव्यः।

अथैतद्व्याख्यायते—ननु 'प्रायश्चित्तविधानं च' इत्यनेन 'संसर्गदोषस्तेयान्य' इत्यस्य पौनरुक्त्यम्, इतरत्र मरणान्तिकाभावादित्यत्रैकदेशिमतमाह—*संसर्गेति। विधानं करणं क्रियमाणं प्रायश्चित्तमिति यावत्। तच्च महापापनिष्कृतिरित्येकं वाक्यम्।

*आत्महत्याविधिना—

---

(१) 'तु' नास्ति घ० ङ०।

स्यैव बाधो न जातिवधनिमित्त(१)स्य भिन्नविषयत्वात् । *संसर्गिणस्तु कामतोपि*व्रतस्यैवोक्तेर्न मरणान्तिकम् । नापि स्तेये त(२)त्र *राज्ञो वधकर्तृत्वात् । तेन तयोर्मरणान्तिकाभावात् तयोरेव निष्कृतिर्नान्येषां त्रयाणाम् । *युगान्तरे तु कलौ निषेधब(३)लात्प्रवृत्तिः । एतद्विप्रपरं *न क्षत्रियादेः । तदुक्तम् 'विप्राणां मरणान्तिकम्' इति । *विशेषोऽस्मत्कृते प्रायश्चित्तरत्ने ज्ञेयः ।

यः कामतो नरः कुर्यान्महापापं कथञ्चन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

इत्यात्महननाविधिना । संसर्गदोषस्तेययोः पर्युदासबीजमाह—*संसर्गिणस्त्विति । *व्रतस्यैवेति ।

यो येन पतितेनैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ॥

इति मनूक्तेः । *राज्ञ इति ।

ब्राह्मणस्वर्णहारी तु राज्ञे मुसलमर्पयेत् ।
स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽथवा शुचिः ॥

इति पाक्षिकमुक्त्यभिधानात् आत्महननाकरणाच्च । ननु

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मनुनापि मरणान्तिकं निषिद्धमिति युगान्तरेऽपि न दुष्करमेवेत्यत्राह—*युगान्तरे त्विति । एकमूलकल्पनालाघवेन मानवस्यापि कलिपरत्वादिति भावः । *न क्षत्रियादेरिति । तथाच क्षत्रियादेर्मरणान्तिकं प्रायश्चित्तं क(४)लौ भवतीति भावः । ननु एतन्मते प्रायश्चित्तविधानं चेत्यस्य वैयर्थ्यं दुर्वारमित्यत्राह—*विशेषश्चेति । संसर्गदोषश्चेति वाक्यं पृथगेवेत्यभिप्रायः । त-

---

(१) 'निमित्तस्याभिन्न' ख० । (२) 'तेन' क० ।
(३) 'बलादेव' क० । (४) 'कलौ' नास्ति घ०ङ० ।

*वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ।
*दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥
सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।
अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियः ॥
परोद्देशात्मसंत्याग उद्दिष्टस्यापि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय संकल्पश्च सधर्मकः ॥

स्याग्रे स्पष्टम् । वस्तुतस्तु

विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ।

इत्यत्र विधिपदवशात्प्रथममहापापानन्तरं प्रायश्चित्तं कृत्वा यदि द्वितीयं पापं क्रियते तदा तद्द्विगुणं प्रायश्चित्तं कार्यं, तदुत्तरं महापापे तु तत्त्रिगुणमिति, "प्रतिनिमित्तं नैमित्तिकावृत्तिः" इति न्यायोज्जीवनेनाभिधाय चतुर्थे महापापे प्रायश्चित्तनिषेधः, नतु प्रकृते अकृतप्रायश्चित्तस्य कथञ्चिच्चातुर्विध्ये तत्प्रवृत्तिरिति। अत्र 'चतुर्थे नास्ति निष्कृतिः' इत्येव विधायकम् । अतो न वाक्यभेद इत्येके । एतच्च व्रत एव प्रवर्त्तते न मरणान्तिके, बाधात् । एवञ्च तत्र द्वैगु(१)ण्यादिविध्यन्तरमावश्यकमिति परे । *वरेति । वरस्य प्राजापत्यः । अतिथेः "आग्नावैष्णव" इति पशुयागविधिः ।

वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥

इत्यादिपित्र्यपशुविधिः । अत्र श्राद्धे पशुयागाभावेन तद्धर्मानतिदेशादुपाकरणाप्राप्तेः पशूपाकरणशब्देन तत्प्रकृतिकं पितृभ्यो मांसपरिवेषणं ल(२)क्ष्यते । एवञ्च "मधुपर्के पशोर्वधः" "मांसदानं तथा श्राद्धे" इति च गतार्थम्, एकमूलकल्पनालाघवात् । एवञ्च 'यस्तु प्राणिवधं कृत्वा' इत्यादि बृहत्पाराशरमपि कलिपरमेव । *दत्तेति ।

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः ।

---

(१) 'त्रैगुण्यादि' घ० ङ०   (२) 'लक्ष्यते' नास्ति घ० ङ०

अस्थिसंचयनादूर्ध्वमङ्गस्पर्शनमेव च ।
*शामित्रं चैव विप्राणां*सोमविक्रयणं तथा ॥
षड्भक्तानशने चान्नहरणं हीनकर्मणः ॥

माधवीये पृथ्वीचन्द्रोदये च—

*शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् ।
भोज्यान्नता गृहस्थस्य*तीर्थसेवातिदूरतः ॥
*शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता ।
आपद्वृत्तिर्द्विजाग्र्याणाम*श्वस्तनिकता तथा ॥
*प्र(१)जार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ।

इत्यादिद्वादशविधः पुत्रो विहितः तत्रौरसदत्तकव्यावर्त्तनाय दत्तौरसेतरेषामिति । *शामित्रमिति । 'आलभेत'इति विधिप्राप्तं यज्ञे पशुमारणम् । *सोमेति । "गवा क्रीणाति"इति विधिवशसिद्धं सोमविक्रयणम् । *शूद्रेष्विति ।

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

इति विहितम् । न(२)चेदं स्नातकप्रकरणत्वात्तेषामेवेति वाच्यम् "उत्तरेषां चैतदविरोधि"इति गौतमेन गृहस्थादीनामपि तदतिदेशात् । अतश्च गृहस्थपदं नाहिताग्निपरं मानाभावात् । दासादिपदं च नापितकुम्भकारयोरुपलक्षणम्, अन्यथाऽनौचित्यापत्तेः । *तीर्थसेवेति । तीर्थयात्रेति पाठान्तरम् । 'दूरतस्तीर्थमासेव्यम्'इत्युक्तं तीर्थसेवनम् । *शिष्यस्येति ।

गुरुवत्प्रतिपूज्याश्च सवर्णा गुरुयोषितः ।

इत्युक्ता पादस्पर्शादिका । *अश्वस्तनिकतेति ।

त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ।

इति विहिता । *प्रजार्थं त्विति । क्वचिच्छाखायां जातक-

---

(१)'प्रजार्थैं' ग० (२) 'नचैवं' ग०

*ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥
*बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः ।
यतेश्च सर्ववर्णेषु भिक्षाचर्याविधानतः ॥
नचोदके दशाहं च दक्षिणा गुरुचोदिता ।
ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च ॥
*भृग्वग्निपतनैश्चैव वृद्धादिम(१)रणं तथा ।
*गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ॥
पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् ।
यतेः सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः ॥
एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ।
निवर्तितानि विद्वद्भिर्व्यवस्थापूर्वकं बुधैः ॥

र्होमे प्रजाजीवनार्थमरणिपरिग्रहो विहितः । *ब्राह्मणानामिति । प्रवासित्वं वृथा सदा प्रवासशीलत्वम्, एवञ्च

प्रवसेत्कार्यवान् विप्रो न वृथैव चिरं वसेत् ।

इति कलिपरमेव । *बलात्कारेति ।

बलात्प्रमथ्य भुक्ता चेदह्यमानेन चेतसा ।
प्राजापत्येन शुद्धिः स्यात्तत्तस्याः पावनं स्मृतम् ॥

इति संवर्त्ताद्युक्तप्राजापत्यादिना संग्रहः । यद्वा, म्लेच्छादिभिर्भुक्ताया अभुक्ताया अप्यतिचि(२)रकालं भुक्ततदीयान्नादिना केवलतत्तादात्म्यापन्नायाश्च संग्रहः । परन्तु एतादृशविषये तासां तादृशपुंसां च प्रायश्चित्तं कार्यं न तु सं(३)ग्रह इति संग्रहपदोपादानम् । *भृग्वग्नीति ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥

इति विहितः । णिजर्थाविवक्षया हन्यादित्यर्थः । *गवित्ति । गोतृप्त्यधिके जले 'शुचि गोतृप्तिकृत्तोयम्' इति विहितम् ।

---

(१)'मरणे' ख० (२)'चिरतरकालं' घ०ङ० (३)'संग्रह इति' नास्ति घ०ङ

*सुराग्रहस्य तत्कर्तुः संग्रहो*व्य(१)वहारकः ॥

नच मद्यं चेति सामान्येन निषिद्धस्या*ऽनेनोपसंहार इति वाच्यम्*निषे(२)धस्य निवृत्तिमात्रफ(३)लत्वेन विशेषा(४)नपेक्षत्वात्, *'न हिंस्यात्' इत्यस्य 'न ब्राह्मणं हन्यात्' इत्यनेनोपसंहारे हिंसान्तरस्यादोषत्वापत्तेश्च । निरूपितं चैतद्धेमाद्रिणा*ऽन्यत्रेत्युपरम्यते । *सुराग्रह-

सौत्रामण्यामिति व्याचष्टे-*सुरेति । सुराग्रह इति कर्तृव्युत्पत्त्या याज्यो याजकश्चाविशेषाद्ग्राह्यः । *व्यवहार इति । अनेन कृतप्रायश्चित्तस्यापीति लभ्यते । न च युगान्तरेऽकृतप्रायश्चित्तस्य व्यवहारः स्थित इति वाच्यं, तर्ह्येतद्वाक्यवैयर्थ्यात्, लौकिकसुराग्र(५)हणतुल्यत्वात् । *अनेनेति । मद्यं सुरा, कथञ्चित् सुराशब्दस्य तदर्थकतायाः प्रागुक्तत्वात् । तत्सौत्रामण्यां वर्ज्यमित्यर्थः । *निषेधस्येति ।

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।

इति यौक्तिकम् । एवञ्च निषेधे तदप्रवृत्तिरिति भावः । साधकाभावमुक्त्वा बाधकमप्याह-*न हिंस्यादिति । *अन्यत्रेति । "एकादश्यां न भुञ्जीत"इति सामान्यतो निषेधस्य "बोधिन्यादावुपवसेत्" इत्यनेनोपसंहारे अन्यशुक्लैकादश्यां भोजनप्रसङ्गवारणार्थविधीनामेवोपसंहारो न तु निषेधानामित्यादिकमुक्तमित्यर्थः । वस्तुतस्तु सुरेह पैष्टीति शङ्का तुच्छैव ।

तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ।

इत्येतत्परतया वा यो(६)ज्या "मा हिंस्यात्"इति निषेधस्याग्नीषोमीयादिविधिनेव 'सुरा वै' इति निषेधस्य सौत्रामणीसुराग्रहविधिना बाध इति तत्र प्रसक्तः सुराग्रहः कलौ निषिध्यते इत्य-

---

(१)'व्यवहारः' क० (२)'निषिद्धस्य' ख० (३)'फलत्वे' ख०

(४)'विशेषानपेक्षणात्' क० (५) 'ग्रहणस्य' घ० ङ०

(६) 'योज्या । निरूपितं चेति । न हिंस्यात्' ग०

स्योद्देश्यस्य सौत्रामणिविशे(१)षणा*विवक्षया*वाजपेयेऽपि निषेधः । *सौत्रामण्यां तु 'पयोग्रहा वा स्युः' इत्यापस्तम्बोक्ते*वैकल्पिकपयोग्रहैरप्यधिकारः। वाजपेये तु तत्प्राप्तौ*मानाभावात् सोमसुरयोः सहत्यागेनांशे सुराद्रव्यत्वात्*तत्प्रख्यतया यागनामत्वेन तां विना संज्ञायोगात् कलौ नाधिकार इति युक्तं प्रतीमः। *त्रिकाण्डमण्डनादिलिखनं तु*निर्मूलम*नाकरं च । *वृत्तेति

र्थः। नन्वेवं "राजा राजसूयेन" इत्यादावुद्देश्यविशेषणराजत्वादेरधिकारिसंकोचकत्वमिव तादृशस्य सौत्रामणीत्वादेः कर्मसंकोचकतया वाजपेयादौ सुरासंधानापत्तिरित्यत्राह-*सुराग्रहस्येति। *अविवक्षयेति । समुच्चयार्थकापिशब्देन कर्मान्तरसमुच्चयेनार्थतस्तद्विवक्षणासंभवादिति भावः। "ग्रहं संमार्ष्टि" इत्यादौ ग्रहत्वं विवक्षितं न त्वेकत्वमितिवत् सुरात्वं विवक्षितं न(२) त्वेकत्वसौत्रामणीसम्बन्ध इत्यपि बोध्यम् । *वाजपेयेऽपीति । एतेन वामागमादौ विनायकशान्त्यादौ च स्मार्त्ते सुतरां निषेधः सूचितः। 'स्त्रीऽपश्च सुरामाचामम्' इत्यादेरुपलक्षणमेतत् । नन्वेवं क्रमेण सौत्रामण्यामनधिकारे तदङ्गकानां चयनादीनामप्यनधिकारापत्तिरित्यत्राह-*सौत्रामण्यामिति । *वैकल्पिकेति । एतेन सौत्रामण्यां येषां सुराग्रहाः पयोग्रहाश्च उभये तेषां न तस्यामधिकार इति सूचितम्। *मानाभावादिति। सौत्रामणीवाजपेययोः प्रकृतिविकृतिभावासत्त्वात् वाजपेयप्रकरणे पयोग्रहानभिधानाच्चेति भावः। *तत्प्रख्येति । "तत्प्रख्यं चान्यशास्त्रम्" इति जैमिनिसूत्रम्। कर्मनामधेयस्य कस्यचिद्योगरूढत्वमस्तीति तदर्थः। प्रकृते च वाजोऽन्नं सुरारूपं हुत्वा पेयं यत्रेति व्युत्पत्त्या तत्र सुरापाननियमप्रतीतेरित्यर्थः। ननु त्रिकाण्डमण्डनेन पयोग्रहग्रहणेन वाजपेयेऽधिकार उक्त इत्यत आह-*त्रिकाण्डेति । *निर्मूलमिति

---

(१)'विशेषणविवक्षया' ख० (२) 'न तु सौत्राम' घ० ङ०

*एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः ।

इति उक्तः । अघस्याशौचस्य संकोचः

*न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ।

इत्युक्तस्य प्रायश्चित्तस्य विधानम् *उपदेशः । *'कलौ कर्तैव लिप्यते' इति व्यासोक्तेः पतितसंसर्गे दोषसत्त्वेऽपि पातित्यं नेत्यर्थः, *अन्यथा 'संसर्गः शोधितैरपि'

कल्पकारैस्तदनभिधानात् । *अनाकरमिति । कल्पसूत्रभाष्यादावपि पयोग्रहमाप्त्यनभिधानात् । *वृत्तेति । वृत्तमग्निहोत्राद्यनुष्ठानं, स्वाध्यायो वेदाध्ययनम् । *एकाहादिति ।

पृथग्वेदाग्नियुक्तस्य त्र्यहमाशौचमिष्यते ।

इत्यादेरुपलक्षणमेतत् ।

दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्वाणः कलौ भवति किल्बिषी ॥ इति(१) ।

प्रायश्चित्तविधानं चेति व्याचष्टे—*न तस्येति । कामकृते महापापादौ । उपदेश इति । स्वयमेव धर्मशास्त्राज्ज्ञात्वाऽन्यापदेशेन वा पृष्ट्वा तदनुष्ठानं तु न वार्यते,

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

इति मानवे मतिपूर्वपदोपादानात् । संसर्गदोष इति व्याचष्टे-*कलाविति । अत्र दोषपदं यथाश्रुतमलग्नकम् ,

आसनाच्छयनाद्यानात्संभाषासहभोजनात् ।
संक्रामन्ति हि पापानि तैलबिन्दुरिवाम्भसि ॥

इति पराशरोक्तेर्निर्विषयतापत्तेः ।

अतः संवत्सरेण पतति पतितेन सहाचरन् ।

इति प्रतिपादितं पातित्यं दोषः, तच्च कर्मानधिकारोऽसंव्यवहार्यता चेति, तन्नेत्यर्थः । स्वयं बाधकमाह—*अन्यथेति । दोषपदस्य दोषसामान्यार्थकत्वे

---

(१) 'इति वा स्यात्' घ० ङ० ।

सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि ।

इति शोधितसंसर्गे दोषः, इह तु पतितसंसर्गे दोषाभाव इति विरोधापत्तेरित्यर्थः, 'कलौ कर्त्तैव' इति व्यासेन तस्य कर्त्तर्येव परिसंख्यानात्, 'कलौ पतति कर्मणा' इति पराशरोक्तेश्च । नव्यास्तु

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्त्तारं तु कलौ युगे ॥

इतिपराशरवचनेन संलापादिनवविधसंसर्गाभावेऽपि विहितोपदेशादित्यागः ।

कृते संभाष्य पतति त्रेतायां स्पर्शनेन तु ।
द्वापरे त्वन्नमादाय कलौ कर्त्तैव लिप्यते ॥

इति संभाषणादिजन्यपातित्यं वा दोषः, तस्यैव निषेधः न तु पतितेन सह संवत्सरं यावन्नवविधसंसर्गप्राप्तपातित्यं पूर्वोक्तवचनद्वयबाधमात्रेण चरितार्थस्य वाक्यस्य नवविधसं(१)सर्गप्रतिपादकवाक्यबाधकत्वायोगात्, 'कलौ पतति कर्मणा' इति पराशरवचनस्वारस्येन पतितसंसर्गरूपकर्मजन्यपातित्यस्य दुर्निवारत्वाच्च, पतितसंसर्गभिन्नेन ब्रह्महननादिकर्मणा पततीति व्याख्यानस्य निर्बीजत्वाच्च । किञ्च ब्रह्महननसुरापानगुरुतल्पगमनादिमहापापसंसर्गप्रायश्चित्तं कलौ न भवतीत्यर्थः । पराशरस्मृतावेव—

चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।
समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् ॥
मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम् ।
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥
अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् ।
सुरापानं सकृत्कृत्वा अग्निवर्णां सुरां पिबेत् ॥
स पावयेदथात्मानमिह लोके परत्र च ॥ इति ।

---

(१)'संसर्गप्राप्तिबाधकवाक्य' ग० ।

ब्रह्महमद्यपसुरापनिष्कृतीनाम् 'आसनाच्छयनाद्यानात्' इति संसर्गमभिधाय

चान्द्रायणं यावकं च तुलापुरुष एव च ।
गवां चैवानुगमनं सर्वपापगणाशनम् ॥

इति महापातकसंसर्गादिनिष्कृतेश्चोक्तत्वात् । न च पराशरोक्तस्य कलिनिषेधेन बाधः,

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥

इति पराशरेणैव विरोधे स्वस्मृतिप्राबल्योक्तेश्च । तस्मात्पतितसंसर्गे प्रायश्चित्ताचरणं कार्यमेवेति । अन्ये तु 'त्यजेद्देशं कृतयुगे' इत्याद्युक्तदेशादित्यागस्य 'कृते संभाष्य पतति' इति संभाषणादिजन्यपातित्यस्य वा न निषेधः, कलौ युगान्तरोक्ताप्राप्तेर्निषेधासंभवात् । तस्मात् 'कलौ पतति कर्मणा' इति कलौ कर्मणा ब्रह्महननादिना पतति न तु संसर्गेणेति व्याख्येयम् । इदानीन्तनानां संसर्गनिमित्तकप्रायश्चित्ताचरणं च पापक्षयार्थमेवेति ग्रन्थं समर्थयन्ते । अत्र केचिदुपन्यसन्ति—पापस्य अव्यवहार्यत्वं नरकोत्पादकत्वं "द्विजातिकर्मभ्यो हानिः पतनम्" इति गौतमात् ।

अधोऽधः पतनात्पुंसां पातकं परिकीर्त्तितम् ।
नरकाग्निषु घोरेषु पतनात्पापमुच्यते ॥

इति भविष्यात् । तत्र नरकोत्पादकत्वसत्त्वेऽप्यव्यवहार्यत्वं नास्तीति कथमुच्यते ? (१)न च प्रायश्चित्तेन नरकोत्पादकत्वेऽपि व्यवहारनिरोधिकाया नाशवदेतदिति वाच्यं, वैषम्यात् । तथाहि, अकामकृतस्य महापापादेः प्रायश्चित्तेन नाशः कामकृते तु व्यवहार्यतामात्रं

प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं भवेत् ।
कामतो व्यवहार्यस्तु वचनादिह जायते ॥

---

(१) 'तत्र प्रा' घ० ङ० ।

इति विरोधापत्तेः। *स्तेयभिन्ने महापापे *रहस्यकृते

इति शास्त्रात्,

विहितं यदकामानां कामात्तद्द्विगुणं भवेत्।

इति वचनान्यथानुपपत्तेश्च, इह तु

पतितेन सहोषित्वा जानन्संवत्सरं द्विजः।
मिश्रितस्तेन सोऽब्दान्ते स्वयं च पतितो भवेत्॥

इति देवलोक्तेः संसर्गिणोऽप्यब्दान्ते पातित्येन प्रायश्चित्तं विना व्यवहाराङ्गीकारासंभवात् ब्रह्महननादिना शक्तिद्वयवत्पापं जायते संसर्गेण त्वेकशक्तिमत्पापमित्यत्र नियामकाभावाच्च। महापापे मरणान्तस्य प्रायश्चित्तत्वे व्यवहारानुपयोगित्वान्नरकानिवर्तकमात्रं परिशेषात्तु व्रतात्मकं व्यवहारोपयोगि, प्रकृते तु व्यवहारस्य प्रागेव सिद्धत्वात्तद्भङ्ग इत्यादिदूषणगणापत्तेः। "कामतोऽव्यवहार्यस्तु" इत्यत्राकारप्रश्लेषेणाव्यवहार्यत्ववादिनां शंकराचार्याणां सं(१)सर्गपातित्ये व्यवहाराभावस्येष्टत्वात्। तस्मात्संसर्गदोष इत्यस्य ब्रह्महननादौ प्रायश्चित्ते कृतेऽपि व्यवहाराभावः। संसर्गे तु कलौ प्रायश्चित्ते कृते स(२)ति स नास्तीत्येवार्थ इति। संसर्गदोष इत्यत्र संसर्गपदं संसर्गिसंसर्गपरं 'कर्त्तारं तु कलौ युगे' इति कर्तृत्यागविधिना तत्संसर्गे दोषप्रसयात्। 'कलौ कर्त्तैव लिप्यते' इति तु साक्षात्संसर्गिणः पातित्याभावव्यञ्जकमिति तु भट्टदिनकरः। 'स्तेयान्य' इति व्याचष्टे-*स्तेयभिन्ने इति। नन्वत्र स्तेयान्यमहापापेन प्रायश्चित्तं न कार्यमित्यसंगतं पराशरेणैव प्रत्येकं महापापे प्रायश्चित्ताम्नानात्।

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः॥

इति पराशरस्मृतेः कलौ बलीयस्त्वादित्यत्राह-*रहस्येति। 'तस्मात्प्रकाशयेत्पापम्' इति पराशरोक्तेः कलौ प्रकाशप्रायश्चि-

---

(१) 'संसर्ग' नास्ति घ० ङ०। (२) 'सति' नास्ति घ० ङ०।

प्रायश्चित्तं नेत्यर्थः । *सवर्णान्या असवर्णा क्षत्रियादिस्तया दुष्टैः । *अयोनौ शिष्यादौ ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।

इत्युक्तस्त्यागः । *परोद्देशेन ब्राह्मणाद्यर्थमात्मन-

त्तमेव कार्यमिति भावः । यत्तु 'कलौ पाराशरा' इति वाक्ये नस्तेयान्येत्यस्य सर्वथा बाधे विषयान्तराभावादप्रामाण्यमतः स्तेयान्यमहापातकनिष्कृतिर्नोपदेश्या । उपदेशेऽपि संसर्गो न कार्य इति वा तात्पर्यम् । 'औदुम्बरी सर्वा वेष्टनीया' इति स्मृतेः 'अष्टकाः कर्त्तव्याः' इतिवन्मूलभूतश्रुतेरनुमानद्वारा प्रामाण्यं प्राप्य "औदुम्बरीं स्पृष्टोद्गायेत्" इति प्रत्यक्षश्रुत्या बाधाद्वित्र्यङ्गुलादिपरिहारेण सर्वा वेष्टनीयेति कल्पनावदिति; तन्न, प्रायश्चित्तविधानं चेति तदुपदेशस्य निषिद्धत्वात्, ब्राह्मणभोजनविधिसार्थक्याय संसर्गस्येष्टत्वाच्च । स्तेयपर्युदासश्च तत्र रहस्यप्रायश्चित्ताभ्यनुज्ञानार्थः । केचित्तु अकामकृतेषु स्तेयान्यमहापापे नरकक्षयार्थं निष्कृतिर्न कार्या व्यवहार्यत्वार्थं तु कार्या मरणान्तिकप्रायपाठादित्याहुः । सवर्णान्येति व्याचष्टे—*सवर्णान्येति । दुष्टिः मैथुनादिः । शोधितैः कृतप्रायश्चित्तैः । न च ब्राह्मणादेः क्षत्रियाद्युद्वाहनिषेधेनैव तत्संपर्को निषिद्ध इति वार्त्तमेतदिति वाच्यम् एतद्वाक्यस्य ही(१)नवर्णासंपर्कविषयकत्वात् । तादृशसंपर्ककृतप्रायश्चित्तानां संसर्गस्य पूर्वयुगेऽनुज्ञातस्य कलौ निषेध इति ग्रन्थस्तु अनुद्वाहेऽपि व्यभिचारादिप्रायश्चित्तानन्तरं संसर्गो नेत्येतत्पर इत्याहुः । अयोनाविति व्याचष्टे—*अयोनाविति । गुरुस्त्रियाः ब्राह्मणस्त्रियाः संग्र(२)हे गर्भधारणे परित्यागो गृहान्तरावस्थानम् ।

पतिघ्नी च विशेषेण जुङ्गितोपगता च या ।

इति उत्तरार्द्धम् । जुङ्गिता हीनयोनिः । युगान्तरे त्वयोनौ संग्रहे परित्याग इवेति भावः । परोद्देशेति व्याचष्टे—*परोद्देशे-

---

(१) 'हीनवर्णस्योत्तमवर्णा' घ० ङ० ।(२) 'संसर्गे गर्भधारणे' घ० ङ० ।

स्त्यागः । *यद्वा परोद्देशात्मत्यागो गोदानं 'मनसा पात्रमुद्दिश्य' इत्युक्तम् । *उद्दिष्टस्य त्यक्तस्य वर्जनं *'प्रतिग्रहसमर्थोऽपि' इत्युक्तम् । *चेतनग्रहणेन प्रतिमापूजा ।

*स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः ।

इत्युक्तः स्पर्शः । *षडिति ।

नेति ।

गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान् परित्यजेत् ।

इति विहितः । *यद्वेत्यादि । इदं च न सम्यक् बहुग्रन्थविरोधात् । उद्दिष्टस्यापीति व्याचष्टे—*उद्दिष्टस्येति । *प्रतीति ।

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ।

इत्यर्थः । प्रतिग्रहसामान्यनिषेधः कलौ वर्ज्य इत्यर्थः । केचित्तु 'उच्छिष्टस्यापवर्जनम्' इति पाठः, 'स्वाम्युच्छिष्टमुच्छिष्टोपहतं च' इति वसिष्ठाद्युक्तं, तन्निमित्तकप्रायश्चित्तं नेत्यर्थ इत्याहुः । अन्ये तु अपवर्जनं दानम्

विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ।
प्रादेशनं निर्वपणमपवर्जनमंहतिः ॥ (अ० को०)

इति त्रिकाण्डीस्मरणात् । "उदगुच्छिष्टं ब्राह्मणाय प्रयच्छेत्" इति मधुपर्कविहितं तन्नेत्यर्थ इत्याहुः । परे तु उच्छिष्टस्यापि वर्जनमिति पाठः । उच्छिष्टस्य ताम्बूलचर्वणाद्युच्छिष्टस्य पथि वर्जनमित्याहुः । प्रतिमेति व्याचष्टे—*चेतनेति । यावज्जीवं मया इयमेव प्रतिमा पूजनीयेत्येवमुद्देश्याद्युल्लेखपूर्वकसंकल्पोपलक्षणमेतत् । अस्थीति व्याचष्टे—*स्वाशौचेति । षड्भक्तेति व्याचष्टे—*षडिति । षण्णां भक्तानामनशनम् उपवासत्रयं,

तथैव(१)सप्तमे काले भक्तानि षडनश्नता ।
अश्वस्तनविधानेन हर्तव्यं हीनकर्मणः ॥ (११-१६)

---

(१) 'सप्तमे भक्ते' इति मनुस्मृतौ ।

उपोषितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत् ।
इत्युक्तम*न्नचौर्यम् । *आपदि*क्षात्रादिवृत्तिः ।
*'मुखेनैव धमेदग्निम्' इत्युक्तं धमनम् ।
*'दशाहेनैव शुध्येत भूमिष्ठं च नवोदकम् ।
इत्युक्तो दशाहः । *'गुरवे तु वरं दत्त्वा' इत्युक्ता
दक्षिणा । *शूद्रेषु दासगोपालेति ।
कन्दूपक्वं स्नेहपक्वं यच्च दुग्धेन पाचितम् ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥
इत्यपरार्के सुमन्तूक्ता*शूद्रस्य पाकक्रिया ।
*पितापुत्रविवादे तु साक्षिणां त्रिपणो दमः ।

इति मानवमपि संगृहीतमित्याह-*अन्नचौर्यमिति । आपदीति व्याचष्टे-*आपदीति । *क्षात्रादीति ।

क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विजः ॥

इति विहितम् । *मुखेनैवेति ।

मुखेनैव धमेदग्निं मुखाद्ध्येषो ह्यजायत ।
नाग्निं मुखेनेति तु यल्लौकिके योजयेत्तु तत् ॥

इतीत्यर्थः । नवोदके इति व्याचष्टे-*दशाहेनैवेति । शुध्येतेतिपाठः । कलौ नवोदके दशाहं त्याज्यत्वं नेत्यर्थः ।

काले नवोदकं शुद्ध्येन्न पिबेच्च त्र्यहं तु तत् ।
अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशम् ॥

इति दशाहप्रतिषेधस्यापवादः त्रिरात्रप्रतिषेधप्राप्त्यर्थः । अन्यथा काले त्र्यहप्रतिषेधः अकाले तु न किञ्चिदित्यनौचित्यापत्तेः । दक्षिणेति व्याचष्टे-*गुरवे त्विति । लाभे मूलानां दक्षिणां ददातीति विहिता दक्षिणापीह द्रष्टव्या । ब्राह्मणादिष्विति व्याचष्टे-*शूद्रेष्विति । पचनादीत्यादिना भोजनग्रह इत्याशयेनेदम् । *शूद्रस्येति । अत्रोभयत्राप्यर्थतः पाकक्रिया लभ्यते शूद्रकर्तृकपाकं विना तद्भोजनाभावात् । "आर्याधिष्ठिताः शूद्राः संस्कर्त्तारः स्युः"

इत्युक्तः । सायंगृहत्वं *'विधूमे सन्नमुसले' इत्युक्तम् । *पृथ्वीचन्द्रेण तु—

अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ।
अनिकेता ह्यनाहारा यत्र सायंगृहास्तु ते ॥

इति विष्णुपुराणोक्तो निषिद्धः । *तेनाज्ञातशीलपान्थादेः श्राद्धादौ विनियोगो न कार्यः कलावित्यर्थ उक्तः । एतानि वर्ज्यानीत्यर्थः ।

इत्यापस्तम्बोक्तमपि हि ब्राह्मणगृहे शूद्रस्य पक्तृत्वे द्रष्टव्यम् । पितेति व्याचष्टे-*पितेति । यतेरिति व्याचष्टे-*यतेरिति । *विधूमे इति ।

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
कालेऽपराह्णभूयिष्ठे नित्यं भिक्षां यतिश्चरेत् ॥

इत्यर्थः । गृहपदस्य भिक्षार्थं गृहगमनपरत्वादिति भावः । यत्र सूर्यास्तो जातस्तत्रावस्थानं सायंगृहत्वमिति मतमाह-*पृथ्वीति । सायंगृहा इति तत्र मध्यम् । यद्यपि "अष्टौ मासान्निहारः स्यात्"इत्यस्यैकवाक्यतया अनिकेता इति यतिपरमेव, तथाप्यनाहारा इत्यनेनाहारसामान्याभावबोधनासंभवादज्ञातेत्युक्तम् । अत एवोक्तो निषेध इत्यसमस्ताभिधानम् । यतिपदं चाविवक्षितार्थकं, विप्रा इति सामान्यतोऽभिधानात् । शीलपदेन कुलमप्युपलक्षणीयं, तेन गृहस्थादेरपि संग्रहः । वस्तुतस्तु उक्तानिषेध इति पाठः । उक्तस्य निषेध इत्यर्थः । अनिकेतत्वे सत्यनाहारस्य यतिष्वेव सत्त्वात् यतेरित्यपि विवक्षितम् । तत्र च यत्र सूर्यास्तो जातस्तत्रैव यतेरवस्थानं तद्वर्ज्यमित्यर्थः । *तेनेति । अत्र—

अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु । इति,

'यच्छ्राद्धं मधुना हीनं' 'मधुप्रधानं शूद्रस्य' इत्यादेर्विषयं वक्ष्यति ।

निगमः—

अग्निहोत्रं गवालम्भं सं(१)न्यासं*पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

अग्निहोत्रं तदर्थमाधानम् । एतच्च सर्वाधानपरम्,

अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योस्तु पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयु(२)गाश्रिता ॥

इति लौगाक्षिवचनादिति स्मृतिचन्द्रिकायाम् । एतेन—

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥
संन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ।

इति व्यासवचनं व्याख्यातम् । सर्वाधानेपि विशेषमाह

---

*पलपैतृकं पैतृकं मांसम् । ननु पूर्वयुगाश्रितेत्यत्र पूर्वयुगेत्यस्य पूर्वयुगानि कृतादीनि, युगस्य कलेः पूर्वो भाग इति वार्थः ? नाद्यः, एतेनेत्यादिविरोधात्, 'चत्वार्यब्दसहस्राणि' इति कलौ त्रेतापरिग्रहविधानात् । नान्त्यः, प्रकृ(१)तोपष्टम्भकतापत्तेः । अत्रोच्यते—आद्य एवार्थो ग्रन्थकृत्संमतो नापरः, एकदेशिसमासे लक्षणाप्रसङ्गात् । एवञ्च सामान्यतो निषिद्धमपि सर्वाधानं व्यासवाक्येन पुनः प्रतिप्रसूयते इति । यावद्वर्णेति चार्द्धाधानपरं न्यायप्राप्तानुवादः । वेदोच्छेदे व(२)र्णसंकरे वाऽधिकाराभावादेव तन्निवृत्तेः प्राप्तत्वात् । सर्वाधानेऽपि तु विशेषमित्यस्यावधिविशेषपरिच्छिन्ने सर्वाधानेऽर्धाधानावधिमित्यर्थः । *त्रिदण्ड इति । वैयासकी संख्या त्वेकदण्डपरा । गारुडे—

कलौ न क्रियते अश्वमेधो वाप्यथ गोसवः ।
नरमेधोऽक्षता नारी देवरात्पुत्रसंततिः ॥
गर्हितं सप्तकं ह्येतद्राजसूयकमण्डलू ।

---

(१) 'ज्येष्ठांशं गोवधस्तथा' क० । (२) 'युगाश्रया' ख० ।

(१) 'प्रकृतानुपलम्भकतापत्तेः' घ० ङ० । (२) 'वर्णसंस्कारे बाधि' ख० ।

देवलः—

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥ इति ।

अत्र पूर्वयुगाश्रितेति लौगाक्षिवाक्ये पूर्वयुगानि कृतादीनीत्येकोऽर्थः । अन्ये तु युगस्य पूर्वं कलेः पूर्वभागः । स 'चत्वार्यब्दसहस्राणि' इति पूर्वोक्तवाक्याच्चतुश्चत्वारिंशच्छतवर्षावच्छिन्नः । तस्मिन्भागे सर्वाधानं कार्यम् । तदुत्तरं तु यावद्वर्णविभागोऽस्तीति वाक्यात् वर्णविभागपर्यन्तमर्धाधानमित्याहुः । संन्यास*स्त्रिदण्डः ॥

इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ कलिवर्ज्यानि समाप्तानि । तृतीयपरिच्छेदपूर्वभागः समाप्तः ।

* * *

आदित्यपुराणे—

समयाः शकुनाः प्रश्नाः सामुद्रिकमुपश्रुतिः ।
उपयाचितमादेशा न भवन्ति कलौ क्वचित् ॥
तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत् ।

इति कलिवर्ज्यग्रन्थः ।

अथ संक्षेपतः कलिधर्माः । पराशरः—

कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥

स्मृत्यन्तरोक्ता विरुद्धा धर्मा युगान्तरपरा इत्यर्थः । ब्रह्माण्डे—

त्रेतायां पाक्षिको धर्मो द्वापरे मासिकः स्मृतः ।
यथाशक्ति परः प्राज्ञस्तदह्ना प्राप्नुयात्कलौ ॥

वैष्णवे—

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन यत् ।
द्वापरे तत्तु मासेन अहोरात्रेण तत्कलौ ॥

काशीखण्डे—

कलौ विश्वेश्वरो देवः कलौ वाराणसी पुरी ।
कलौ भागीरथी गङ्गा कलौ दानं विशिष्यते ॥

आग्नेये—

नास्ति श्रेयस्करं नृणां विष्णोराराधनात्परम् ।
कुर्वीताराधनं राजन्वासुदेवे कलौ युगे ॥

नारदीये—

शिवपूजापरा ये तु शिवनामपरायणाः ।
त एव शिवकल्पाश्च घोरे कलियुगे द्विजाः ॥
अतीवभाग्यास्ते विप्राः सकृद्ये के शिवार्चकाः ।
घोरे कलियुगे प्राप्ते सर्वधर्मबहिष्कृते ॥

मात्स्ये—

ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनम् ।
अविमुक्तं न मुञ्चन्ति कृतार्थास्ते नरा भुवि ॥
गीता गङ्गा तथा भिक्षुः कपिलाऽश्वत्थसेवनम् ।
वासरः पद्मनाभस्य सप्तकं न कलौ युगे ॥

पद्मनाभस्य वासर एकादशी । अविमुक्तेन सहैतत्सप्तकं कलौ न दुर्लभमिति यावत् ।

कृते सर्वत्र तीर्थानि त्रेतायां पुष्करं स्मृतम् ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गैव केवलम् ॥

पराशरः—

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमित्याहुर्दानमेव कलौ युगे ॥

भागवते—

कलेर्दोषनिधे राजन्नस्ति ह्येको महान गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥

विष्णुधर्मे—

चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥

स्कान्दे—

तन्नास्ति कर्म यल्लोके वाग्जं मानसमेव वा ।
यत्तु न क्षीयते पापं कलौ गोविन्दकीर्त्तनात् ॥

विष्णुपुराणे—

ध्यायन् कृते, यजन् यज्ञैस्त्रेतायां, द्वापरेऽर्चयन् ।
यदाप्नोति, तदाप्नोति कलौ संकीर्त्य केशवम् ॥
अवशेनापि यन्नाम्नि कीर्त्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

स्कान्दे—

यत्र विष्णोः कथा नित्या यत्र तिष्ठन्ति वैष्णवाः ।
कलिबाह्या नरास्ते वै येऽर्चयन्ति सदा हरिम् ॥

भारते—

कलौ पित्रादिदोषघ्ना विषयाकृष्टमानसाः ।
कृत्वापि सकलं पापं गोविन्दं संस्मरन् शुचिः ॥

स्कान्दे—

कलौ कृष्णस्य ये नित्यं क्रियायोग वदन्ति ये ।
तैर्नरैर्देवदेवेश पवित्रा धरिणी कृता ॥
ये वै निन्दन्ति कृष्णस्य क्रियायोगं कलौ नराः ।
कल्पकोटिसहस्राणि ते वसन्ति यमालये ॥

इत्याद्यन्यत्र विस्तरः ।

नमो नारायणायेति कीर्त्तयन्ति च ये नराः ।
निष्कामा वा सकामा वा न कलिर्बाधते हि तान् ॥

प्रह्लाद उवाच—

स गङ्गा स गया सेतुः स काशी स च पुष्करम् ।
जिह्वाग्रे वर्त्तते यस्य हरिरित्यक्षरद्वयम् ॥
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ऽप्यथर्वणः ।
अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
तानि शाक्षानि येनोक्तं हरिरित्यक्षरद्वयम् ॥
वाराणस्यां कुरुक्षेत्रे नैमिषारण्य एव च ।
इष्टं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
अश्वमेधैर्महायज्ञैर्नरमेधैस्तथैव च ।
इष्टं स्यात् तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
गवां कोटिप्रदानेन हेमकन्यासहस्रकम् ।
दत्तं स्यात्तेन येनोक्तं हरिरित्यक्षरद्वयम् ॥
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ।
सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ॥
प्रह्लादेन कृतं स्तोत्रं दुःखसागरशोषणम् ।
यः पठेत्स नरो याति तद्विष्णोः परमं पदम् ॥

भारते—

सर्वावस्थां गतो वापि युक्तो वा सर्वपातकैः ।
यस्त्वोंनमः शिवायेति मुच्यते तु कलौ नरः ॥

भविष्ये—

शिव शङ्कर रुद्रेश नीलकण्ठ त्रिलोचन ।
इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः ॥
ध्यानं परं कृतयुगे त्रेतायां यजनं तथा ।
द्वापरे लिङ्गपूजा च कलौ शंकरकीर्त्तनम् ॥

लैङ्गे—

प्रसङ्गेनापि शाठ्येन दम्भेनापि हि लोभतः ।
ये सेवन्ते महादेवं न ते पश्यन्ति भास्करिम् ॥

शिवभक्तिं प्रकुर्वाणो ये द्विषन्ति जनार्दनम् ।
तेषां निरयपातस्तु तावत्काल उदाहृतः ॥

काशीखण्डे—
न सिध्यति कलौ योगो न सिध्यति कलौ तपः ।
न्यायार्जितधनोत्सर्गः सद्यः सिध्येत्कलौ सदा ॥
न व्रतं न तपो नेज्या न जपो न सुरार्चनम् ।
दानमेव कलौ मुक्त्यै काश्यां दानं विशिष्यते ॥
कलिस्तान्नैव बाधेत कालस्तांश्च जिघांसति ।
एनांसि तान्न बाधन्ते ये च काशीं समाश्रिताः ॥

सौरे—
तीर्थानामुत्तमं तीर्थं क्षेत्राणां क्षेत्रमुत्तमम् ।
वाराणसी तु नगरी प्रिया देवस्य शूलिनः ॥
यत्र विश्वेश्वरो देवः सर्वेषामेव देहिनाम् ।
ददाति तारकं ज्ञानं संसारो मोचकं परम् ॥

अथ गङ्गा । कौर्मे—
कृते तु सर्वतीर्थानि त्रेतायां पुष्करं परम् ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गा विशिष्यते ॥
पुष्करं तु कृते सेव्यं त्रेतायां नैमिषं तथा ।
द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत् ॥

कामिके—
विना गङ्गां धर्ममर्थी कथं स्याच्च कलौ गतिः ।
शिरसः कर्त्तनं तस्य प्राणत्यागोऽपि वा वरः ॥
समर्थस्तु कलौ काले गङ्गां यो नाभिगच्छति ॥

भविष्ये—
कलौ कलुषचित्तानां पापद्रव्यरतात्मनाम् ।
विधिहीनक्रियाणां च गतिर्गङ्गां विना न हि ॥
अनाश्रित्य तु गङ्गां हि मुक्तिमिच्छति यः कलौ ।
सूर्यं द्रष्टुमिहोद्युक्तो जात्यन्धसदृशस्तु सः ॥

भविष्ये--

मनोवाक्कायदुष्टानां पतितानां कलौ युगे ।
सैवेह शरणं गङ्गा पतितत्रायणोद्यता ॥
संसारार्णवमग्नानां भूतानां शरणार्थिनाम् ।
नान्यः शरणदः कश्चिदुपायो दृश्यते क्वचित् ॥
विना गङ्गां धर्ममयीं शरण्यां सर्वदेहिनाम् ।
महापातकसंहर्त्रीं सर्वसर्वार्थसाधिकाम् ॥

नारदीये--

कलौ यत् परमं ब्रह्म प्राप्तये सत्वरं नृणाम् ।
गङ्गाभजनमेवाहुर्महापुण्यं महर्षयः ॥
घटध्वं हे बुधा गङ्गां मत्वा विश्वमशाश्वतम् ।
घोरे कलियुगे प्राप्ते मुक्तिर्वो वाञ्छिता यदि ॥
गुणानामेकदेशोऽयं गङ्गायाः कीर्त्तितो मया ।
समस्तानीह को वक्तुं शक्तो वर्षशतैरपि ॥

महाभारते--

न गङ्गासदृशं तीर्थं न देवः केशवात्परः ।
ब्राह्मणेभ्यः परं नास्ति एवमाह पितामहः ॥

दानधर्मे—

ते देशास्ते जनपदास्ते शैलास्तेऽपि चाश्रमाः ।
येषां भागीरथी पुण्या मध्ये याति सरिद्वरा ॥

ब्रह्माण्डे—

शतयोजनसंस्थास्तु गङ्गां भक्त्या स्मरन्ति ये ।
गङ्गा गङ्गेति यो ब्रूयान्मुच्यते सर्वपातकैः ॥

तथा—

यत्र तत्र स्थितो वापि मरणे समुपस्थिते ।
भक्त्या गङ्गां स्मरन् याति नरो विष्णुपुरं परम् ॥

ब्राह्मे—

ज्ञानतोऽज्ञानतो वापि कामतोऽकामतोपि वा ।
गङ्गायां तु मृतो मर्त्यो मोक्षं स्वर्गं च विन्दति ॥
क्षितौ तारयते मर्त्यान्नागां(१)स्तारयतेऽप्यधः ।
ऊर्ध्वं तारयते देवांस्तेन सा त्रिपथा स्मृता ॥ इति ।

इति पूर्वार्धः ।

---

(१) 'स्तारयतीह्यधः' घ० ।

॥ श्रीः ॥

सटीके निर्णयसिन्धौ

तृतीयपरिच्छेदोत्तरार्धे

श्राद्धप्रकरणम् ।

नानानिबन्धवैमत्यभ्रान्तचित्तोद्दिधीर्षया ।
कमलाकरसंज्ञेन क्रियते श्राद्धनिर्णयः ॥

तत्स्वरूपमाह पृथ्वीचन्द्रोदये मरीचिः—

प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः ।
श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम् ॥

*ब्राह्मणस्वीकारान्तश्चतुर्थ्यन्तपदोपनीतपित्राद्युद्देश्यकस्त्यागः श्राद्धमित्यर्थः । तत्र यद्यपि होमपिण्डभो-

श्राद्धलक्षणं परिष्कुरुते—*ब्राह्मणेति । एतच्च तर्पणवारणाय, तत्र विप्रस्वीकाराभावात् । न तु यागाभावात्, 'इन्द्र ऊर्ध्वो अध्वर' इतिवद् द्रव्यदेवतासंयोगेन त्यागस्य तत्रापि कल्पनीयत्वात् । 'न मम' इत्यभिलापस्तु नास्ति, आचाराभावात् । यत्रैव यागाग्निहोत्रादौ तदाचारस्तत्रैव तन्मूलतया श्रुतिः कल्प्यते, न सर्वत्र । अत एव भूतबल्यादावपि न तदभिलापः । मानसस्तु यागः सर्वत्रैवाविशिष्टः । न च तर्पणे देवतैव नास्ति, "देवतास्तर्पयति" इत्याश्वलायनादिभिर्देवतापदेनैव तदुक्तेः । अ(१)ङ्गपदं च विप्रस्वीकारस्य श्राद्धस्वरूपघटकतावारणार्थम्, "पितरो देवता ब्रा(२)ह्मणास्त्वाहवनीयार्थे" इत्यादिनाऽऽपस्तम्बादिभिराहवनीयाधिकरण-

---

(१) 'अन्तपदं' मूले । (२) 'ब्राह्मणस्तु' ङ० ।

जनानि प्रधानमिति हेमाद्रिः,—

होमश्च पिण्डदानं च तथा ब्राह्मणभोजनम्।
श्राद्धशब्दाभिधेयं स्या*देकस्मिन्नौपचारिकम् ॥

इति श्रीधरश्च, तथापि*क्वचिद्विशेषं वक्ष्यामः। *निमित्तभेदे भोजनस्य पिण्डानां वा निषेधो न प्राधान्यं विरुणद्धि *असोमयाजिनो दधिपयोयागवत्। यच्च शूलपाणिः—

नित्यश्राद्धमदैवं स्यादर्घ्यपिण्डविवर्जितम्।

इति हारीतीये नित्यश्राद्धमघादौ पिण्डनिषेधोऽस्ति।

कहोमवत्यक्तद्रव्यप्रतिपत्तित्वव्यञ्जनात्। 'ब्राह्मणस्वीकारान्त' इति त्वशुद्धं, पिण्डदानस्यात(१)थात्वे प्राधान्यापत्तेः। इष्टापत्तौ 'पिण्डानां निषेधो न प्राधान्यम्' इति ग्रन्थासङ्गतेः उपनी(२)तत्वं च देवतात्वव्यञ्जकमात्रं न तु लक्षणघटकं, व्यर्थत्वात्। मृतोद्देश्य(३)कत्वं विवक्षितम्। जीवच्छ्राद्धे दे(४)वताश्राद्धे च श्राद्धपदं गौणं कुण्डपाय्यग्निहोत्रपदवत्। श्राद्धत्वस्य व्यासज्यवृत्तित्वमुपेत्याह—*एकस्मिन्निति। *क्वचिदिति। पिण्डदानविप्रभोजनयोः प्राधान्यम्, फलसम्बन्धात्। न त्वग्नौकरणस्य 'सोमाय पितृमते' इति(५) मन्त्रगतपितृपदस्याग्निष्वात्तादिपरत्वात्तेषामे(६)वोद्देश्यतावच्छेदकत्वेऽप्यनुद्देश्यत्वात्, फलासम्बन्धाच्च। तयोश्च क्वचिद्द्वयोः क्वचिदेकतरस्यानुष्ठानमित्यत्र तु ऋषिवचांस्येव मानम्। एवं कुतः श्रा(७)द्धस्य व्यासज्यवृत्तित्वमव्यासज्यवृत्तित्वे बाधकाभावात्। ननु भोजनादेरपि प्राधान्यमनुपपन्नं तथात्वे तन्निषेधानुपपत्तेरित्यत आह—*निमित्तेति। *असोमेति 'नासोमयाजी सन्नयेत्' इति प्रधानस्यापि नित्यस्य वैधसान्नाप्य

---

(१) 'तथात्वेनाप्राधा' घ० ङ०। (२) 'नीतत्वान्तं च' ख० घ०

(३) 'मृतोद्देश्यत्वम्' घ०। (४) 'देवश्राद्धे च' घ०।

(५ 'इति मन्त्रस्थगत' ङ०। (६)'मेव मृतानामेव वोद्देश्य' घ०

(७) 'श्राद्धत्वस्य' घ०।

नच प्राप्तिं विना सः । नचातिदेशं विना प्राप्तिः । नचाङ्गत्वेन विनातिदेशः प्रधानस्यानतिदेशात् । *सप्तमे उपकारकत्वेनातिदेशोक्तेः । तेन भोजनं प्रधानम्, पिण्डोऽङ्गम् । पिण्डदानमात्रविधिस्त्वङ्गभूतात्कर्मान्तरमेव, *प्रकरणान्तरन्यायादिति, तन्न;

जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि ।
न पक्वं भोजयेद्विप्रान्सच्छूद्रोपि कदाचन ॥

इत्याद्यैर्जातश्राद्धशूद्रश्राद्धादौ भोजनस्य निषेधेना-

सोमयागाभावनिमित्तको यथा निषेधस्तथा विप्रालाभादिनिमित्तको भोजनस्य भर(१)ण्यादिनिमित्तकश्च पिण्डदानादेर्निषेध इत्यर्थः । *सप्तमे इति । यः पदार्थो यादृशोपकारद्वारा यदङ्गत्वेनावधारितः, तस्य पदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैवान्याङ्गताबोधकं प्रमाणमतिदेशः । यथा "प्रकृतिवद्विकृतिः कर्त्तव्या"इत्यादि । तच्च प्रयाजादिपदार्थानां यादृशोपकारद्वाराऽऽग्नेयाद्यङ्गत्वावधारणं, तेषामाग्नेयादिसम्बन्धित्वेन तादृशोपकारद्वारैव सौर्याद्यङ्गत्वबोधकम् । *प्रकरणान्तरेति । कौण्डपायिनामयने "उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति"इत्यादौ । अत्र जुहोतिना दूरस्थस्यापि कर्मणः उपस्थित्या तदनुवादेन मासादिरूपगुणविधिः । (उपा(२)देयवदनुपादेयस्यापि तादृशकर्मानुवादेन विधाने बाधकाभावादिति प्राप्ते सर्वस्य प्रवर्तकस्य विधेः) धात्वर्थनि(३)ष्ठत्वेन कृतिविषयत्वरूपमुपादेयत्वं प्रमाणत्वाच्चाज्ञातज्ञाप्यत्वरूपं विधेयत्वं च प्रमेयम् । एवं च मासस्यानुपादेयत्वाद्धात्वर्थ एवोपादेयत्वं तत्सामानाधिकरण्याच्च विधेयत्वमिति विहितस्य विधानायोगाद्भेदः, प्रकृतेऽपि पुनर्विधानाद्भेद इत्यर्थः ।

---

(१) 'भरण्यादिपिण्डनिमित्तकश्च' ख० ।
(२) धनुश्चिह्नान्तर्गतं नास्ति ख० ।
(३) 'नित्यत्वेन' ख० ।

ङ्गत्वापत्तेः;*'न तौ पशौ करोति' इतिवदुपजीव्यविरोधेन विकल्पापत्तेश्च । *तेन श्राद्धशब्दाभिधेयत्वेनोभयप्राप्तौ निषेधः पर्युदासो वा *'दीक्षितो न ददाति न जुहोति' 'नासोमयाजी सन्न(१)येत्' इतिवदिति तत्त्वम् ।

धर्मप्रदीपेऽपि—

*यजुषां पिण्डदानं तु बह्वृचानां द्विजार्चनम् ।
श्राद्धशब्दाभिधेयं स्यादुभयं सामवेदिनाम् ॥

त(२)च्च 'पितॄन् यजेत, पितृभ्यो दद्यात्' इत्युभयप्रयोगदर्शनाद्यागदानोभयात्मकम् । 'पितरो देवता' इति

नैते पक्वनिषेधाः किन्त्वामादिविध्यर्थवादा इत्युक्तावप्याह—*न ताविति । तौ आज्यभागौ शास्त्रीयौ, प्राप्तिमुपजीव्य निषेधे तस्या अत्यन्तबाधासम्भवाद्विकल्पः । *तेन पिण्डदानादेरनङ्गत्वेन । नह्यातिदेशिक्यैव प्राप्तिर्निषेधस्य पर्युदासस्य वोपजीव्या किन्त्वन्यादृश्यपीत्यत्र दृष्टान्तमाह--*दीक्षित इति । नित्यानां क्रत्वर्थानां च दानानां दानपदार्थत्वेन नित्यानामग्निहोत्रहोमादीनां काम्यानां चतुर्होतृहोमादीनां च होमपदार्थत्वेन प्राप्तौ दीक्षितस्य निषेधः । न चायं निषेधः दानहोमादिपदार्थगोचर इति कथमत्यन्तबाधो विकल्पविरहश्चेति वाच्यम्, दानहोमादिविधयः पुरुषार्थाः, निषेधस्तु प्रकरणात् क्रत्वव्यभिचारिदीक्षितसम्बन्धाच्च क्रत्वर्थः इति भिन्नविषयतया ईदृशविषये पुरुषार्थानामेव दीक्षितातिरिक्तपरताकरणात् ।

*यजुषामिति । पिण्डदानमात्रप्राधान्यवादिनां निषिद्धपर्युदस्तपिण्डदानके, विप्रभोजनमात्रप्राधान्यवादिनां तु निषिद्धपर्युदस्तविप्रभोजनके, प्रधानासत्त्वादङ्गमात्रमनुष्ठेयं स्यादत उभयप्रा-

---

(१) 'सन्नयेत् इति तत्त्वम्' क० ।
(२) धर्मप्रदीपस्थवचनं च ।

पित्रुद्देश्यकत्वाद्यागत्वं, *विप्रापेक्षया च दानत्वमित्यविरुद्धम् । एतेन नायं यागः । (देव(१)तोद्देशेन त्यागो यागः) यागोद्देश्या च देवतेत्यात्माश्रयादिति गौडमतमपास्तम् । वैधशब्दविशेषोद्देश्यत्वस्य तस्य इदमिति*स्वत्वारोपप्रतियोगित्वस्य वा देवतात्वात् । तत्रैव सुमन्तुः—

*श्राद्धात्परतरं नान्यच्छ्रेयस्करमुदाहृतम् ।

आदित्यपुराणे—

न सन्ति पितरश्चेति कृत्वा मनसि यो नरः ।
श्राद्धं न कुरुते तत्र तस्य रक्तं पिबन्ति ते ॥

तद्भेदानाह विश्वामित्रः—

नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सपिण्डनम् ।
पार्वणं चेति विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्टमम् ॥
कर्माङ्गं नवमं प्रोक्तं दैविकं दशमं स्मृतम् ।
यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम् ॥ इति ।

म्यसिद्धिस्तद्वादिनां प्रोक्तानिष्टाप्रसक्तेरित्यर्थः । *विप्रेति ।

देशे काले च पात्रे च श्रद्धया विधिना च यत् ।
पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम् ॥

इति वचनात् । विप्राणां पितॄणां च स्वत्वसत्त्वासत्त्वयोरपि कर्मण एकत्वात् । *स्वत्वेति । स्वत्वप्रतियोगित्वेनेच्छाविषयत्वमर्थः । तादृशेच्छायां स्वत्वारोपो बीजं, स्वीकाराभावेन स्वामित्वबाधात् ।

श्राद्धं त्रिविधम्—काम्यं नित्यं नैमित्तिकं च । कामनोपाधौ चोदितं काम्यम् । जीवनोपाधौ चोदितं नित्यम् अहरहरमावास्यादौ । अनियतनिमित्तकं उपरागादौ । तत्र श्राद्धस्य काम्यत्वं नित्यत्वं नैमित्तिकत्वं च क्रमेणाह—*श्राद्धादिति ।

---

(१) कंसान्तर्गतं नास्ति क० ।

एषां लक्षणानि भविष्ये—

अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितम् ।
वैश्वदेवविहीनं तदशक्तावु*दकेन तु ॥
एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।
तदप्यदैवं कर्तव्यमयुग्मान्भोजयेद्द्विजान् ॥
*कामाय विहितं काम्यमभिप्रेतार्थसिद्धये ।
वृद्धौ यत्क्रियते श्राद्धं वृद्धिश्राद्धं तदुच्यते ॥
गन्धोदकतिलैर्मि(१)श्रं कुर्यात्पात्रचतुष्टयम् ।
अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥
ये समाना इति द्वाभ्यामेतज्ज्ञेयं सपिण्डनम् ।
*नित्येन तुल्यं *शेषं स्यादे*कोद्दिष्टं *स्त्रिया अपि ॥

*एतदुभयमेव स्त्रियाः । तेन स्त्रीकर्तृकं स्त्रीसंप्रदानकं चेत्युभयनियम इति कल्पतरुः ।

---

*उदकं नित्यतर्पणम् ।

*कामायेति । नक्षत्रादौ । *नित्येनेति । *शेषम् अङ्गजातम् । सपिण्डीकरणस्योभयरूपत्वादेकोद्दिष्टांशे पार्वणांशे च क्रमेणा(२)नावश्यकर्त्तव्यत्वेनैकोद्दिष्टेन पार्वणेन च तुल्यं स्यादित्यर्थः । *एकोद्दिष्टं सपिण्डीकरणम् । *स्त्रियाः मातुः । मतमाह—*एतदिति । स्त्रिया अपीति स्त्रीशब्दः षष्ठ्यन्तः चतुर्थ्यन्तश्चेत्याशयः । एकोद्दिष्टं सपिण्डनं तदन्यैकोद्दिष्टान्यतरत् । अत्र स्त्रीकर्तृकं स्त्रीसंप्रदानकं वा एकोद्दिष्टमेवेति न नियमः, कर्तृसंप्रदान(३)योरन्यश्राद्धनिवृत्तिप्रसङ्गात् । नाप्येकोद्दिष्टं स्त्री(४)कर्तृकमेव स्त्रीसंप्रदानकमेव वेति, एकोद्दिष्टस्य पुरुषकर्तृसंप्रदानकत्वनि-

---

(१) 'युक्तम्' क० च० ।
(२) 'क्रमेण नित्येनावश्य' घ० ङ० ।
(३) 'संप्रदानयोः स्त्रियोरन्यश्राद्ध' घ० ङ० ।
(४) 'स्त्रीकर्तृकपदं स्त्रीसम्प्रदान' ङ० ।

*अमावास्यां यत्क्रियते तत्पार्वणमिति स्मृतम् ।
क्रियते वा पर्वणि यत्तत्पार्वणमिति स्थितिः ॥

*अत्र प(१)र्व—

चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र रविसंक्रमणं तथा ॥

इति विष्णुपुराणोक्तं संक्रान्त्यादि ।

गोष्ठ्यां यत्क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते ।
बहूनां विदुषां संपत्सुखार्थं पितृतृप्तये ॥
क्रियते शुद्धये यत्तु ब्राह्मणानां तु भोजनम् ।
शुद्ध्यर्थमिति तत्प्रोक्तं वैनतेय मनीषिभिः ॥
*निषेककाले सोमे च सीमन्तोन्नयने तथा ।
ज्ञेयं पुंसवने चैव श्राद्धं कर्माङ्गमेव च ॥
*देवानुद्दिश्य यच्छ्राद्धं तत्तु दैविकमुच्यते ।

तृप्तिप्रसङ्गात् । एतेन स्त्रीकर्तृसंप्रदानकमेकोद्दिष्टमेवेत्याद्यपास्तमित्यरुचिः ।

*अमेति । अमायां पर्वशब्दः शक्तः । वाशब्दसङ्गतयेऽन्यत्र गौणीमाह—*अत्रेति । पार्वणशब्दो योगरूढः । तत्र योगो दर्शितः—

त्रीनुद्दिश्य च यत्ताद्धि पार्वणं मुनयो विदुः ।

इति कण्ववचनात्त्रिपुरुषोद्देश्यकत्वे रूढिः । आब्दिकादौ पार्वणपदं गौणं, कौण्डपाय्यग्निहोत्रपदवत् ।

*निषेकेति श्रौतस्मार्तकर्मोपलक्षणम् ।

इष्टापूर्तादिके श्राद्धे वृद्धिश्राद्धवदाचरेत् ।

इत्याादिवचोनिचयश्चाग्रे विस्तृतः ।

*देवानिति । (२)तच्च द्वादश्याम्,

---

(१) 'पर्वम्' क० ।

(२) 'एतच्च द्वादश्याम्' घ० ।

*गच्छन्देशान्तरं यस्तु श्राद्धं कुर्यात्तु सर्पिषा ॥
यात्रार्थमिति तत्प्रोक्तं*प्रवेशे च न संशयः ।
*शरीरोपचये श्राद्धमर्थोपचय एव च ॥
पुष्ट्यर्थमेतद्विज्ञेयमौपचायिकमुच्यते ॥

*गोष्ठ्यां श्राद्धकर्तृसमुदाये संभूय सामग्रीसंपादनेन (श्रा(१)द्धमित्यर्थः)। *युगपत्तीर्थादिप्राप्तौ विदुषां श्रा-

देवानुद्दिश्य क्रियते यत्तद्दैविकमुच्यते ।
तन्नित्यश्राद्धवत्कुर्याद् द्वादश्यादिषु यत्नतः ॥

इति विश्वामित्रोक्तेरिति माधवः । श्राद्धसागरे च—

उत्पातादिनिमित्तेषु नित्यश्राद्धं तु दैविकम् ।
देवाँस्तूद्दिश्य विश्वादीन्प्रदद्याद्विप्रभोजनम् ॥

इति नैमित्तिकं दर्शितम् । *गच्छन्निति । तीर्थयात्रारम्भे इदम् । *प्रवेशे यात्रानन्तरगृहप्रवेशे । *शरीरेति । शरीरोपचयार्थभेषजादेरर्थोपचयार्थकृष्यादेश्च प्रयोगात् पूर्त्तमिति श्राद्धसागरकृतः । शरीराद्युपचयहेतुशान्त्यादावित्यन्ये । *गोष्ठ्यामिति । बहूनां विदुषां गोष्ठ्याम् इति योजना । *युगपदिति । तीर्थश्राद्धादेर्युगपत्कर्तव्यतया प्राप्तौ भिन्नपाकाशक्तौ विदुषामित्याद्यन्वयः । पृथक् पाकासम्भवे सम्पदा सम्भूय सामग्रीसंपादनेन यत्सुखं तदर्थम् । एवञ्च——

गोष्ठ्यां यत् क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते ।
पार्वणेन विधानेन तदप्युक्तं खगाधिप ॥

इति भविष्ये पार्वणपदमेकोद्दिष्टस्याप्युपलक्षणम्, तैर्थादिपार्वणैकोद्दिष्टरूपत्वात् । अत्रास्मच्छब्देन सम्बन्धोल्लेखपूर्वकं स्वपित्रादिगणमुल्लिख्य अमुकशर्मणोऽमुकगोत्रस्येत्याद्यन्यपित्रादिगणमुल्लिखेत् । तत्क्रमेणैव श्राद्धप्रयोगं च समापयेत्, श्राद्धस्य गोष्ठ्यां वार्त्तायां क्रियमाणायां तज्जनितोत्साहेन क्रियमाणं श्रा-

---

(१) कंसान्तर्गतं नास्ति क०।

द्धसंपदा सुखार्थं भिन्नपाकाशक्तौ बहुपितृकश्राद्धमेकः कुर्यादिति कल्पतरुः शङ्खधरश्च । *शुद्धिश्राद्धं प्रायश्चित्ताङ्गमिति मैथिलाः । अत्र पार्वणैकोद्दिष्टवृद्धिसपिण्डीकरणात्मकं चतुर्विधमेव मुख्यम् ! तस्यैवायं प्रपञ्चः ।

द्धम् (१)तच्चोक्तवाक्यात् सपत्नीकपितृपार्वणमेव सपत्नीकमातामहपार्वणसहितम्, 'पितरो यत्र पूज्यन्ते' इति वचनादिति रघुनाथादयः । *शुद्धीति । मदनमहार्णवे—

तेषामनुज्ञया सर्वप्रायश्चित्तमुपक्रमे
विधाय वैष्णवं श्राद्धं साङ्कल्पं निजकाम्यया ।
धेनुं दद्याद् द्विजेभ्योऽथ दक्षिणां च स्वशक्तितः ॥ इति ।

तेषां ब्राह्मणानाम् । सर्वप्रायश्चित्तमित्ययमपि सर्वप्रायश्चित्तविधिः । उपक्रमे प्रायश्चित्तोपक्रमे । विष्णुमुद्दिश्य साङ्कल्पमपिण्डकं श्राद्धं, पूजापूर्वकं चतुरादियुग्मान् ब्राह्मणान् भोजयेत्, आमादिकं वा दद्यात् । सभ्यानां च धेनूर्ब्रह्मदण्डत्वेन दक्षिणा च श्राद्धाङ्गत्वेनेति तदर्थः । इदं तु बोध्यम्, दार्शं प्रकृत्य मन्वादिषु धर्मपाठात्तस्य प्रकृतित्वम्, अन्येषां विकृतित्वम् । 'अथातः पार्वणश्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे वा' इत्याश्वलायनसूत्रानुसारिणां चत्वारि श्राद्धानि प्रकृत्य धर्माम्नानाच्चतुर्णामपि समानविधानतैव । यच्च कातीयापस्तम्बसत्याषाढसूत्रेषु कृष्णपक्षश्राद्धं प्रकृत्य धर्माम्नानं तदष्टकादीन् (२)प्रति प्रकृतित्वार्थं "तस्य मासि श्राद्धेन कल्पो व्याख्यातः" इति आपस्तम्बादिसूत्रात् । न्यायेन सर्वश्राद्धप्रकृतित्वे प्राप्ते एतत्सूत्रस्य परिसङ्ख्यार्थत्वात् । एतत्सूत्रपरिसंख्यातेषु वार्षिकादिश्राद्धेषु तेषामपि दर्शश्राद्धमेव प्रकृतिः । दर्शश्राद्धस्य सर्वश्राद्धप्रकृतित्वे च वार्षिकादौ कण्वोक्तपार्वणनाम्ना—

---

(१) 'गोष्ठीश्राद्धं तच्चोक्तवाक्यात्' घ० ।
(२) 'प्रतिकृतित्वार्थं ख० ।

अथ श्राद्धदेशाः। मनुः—

*शुचिदेशं विविक्तं तु गोमयेनो(१)पलेपयेत्।
*दक्षिणाप्रवणं चैव*प्रयत्नेनोपपादयेत्॥

पृथ्वीचन्द्रोदये विष्णुधर्मे—

दक्षिणाप्रवणे देशे*तीर्थादौ च गृहेपि वा।
*भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः॥

तत्रैव प्रभासखण्डे—

तीर्थादष्टगुणं पुण्यं स्वगृहे ददतः शुभे।

भारते—

तस्य देशाः कुरुक्षेत्रं गया गङ्गा सरस्वती।

सपिण्डीकरणात्पूर्वमेकोद्दिष्टं सुतः पितुः।
ऊर्ध्वं पार्वणवत्कुर्यात् प्रत्यब्दमितरेण तु॥

इति लौगाक्षिवाक्याद्वा दर्शविध्यन्तातिदेशः, न तु श्राद्धपदात्। अमाश्राद्धे तदितरश्राद्धे च तच्छब्दस्योक्तोपाधिना मुख्यत्वात्।

*शुचीति। सर्वकर्माङ्गतया प्राप्तानुवादः। *दक्षिणाप्रवणं दक्षिणतो निम्नम्। *प्रयत्नेनेति। स्वतो दक्षिणाप्रवणत्वासत्त्वे खननादिना तत्संपादनार्थम्। *तीर्थम् ऋषिदेवतादिसेवितं जलं पुण्याश्रमादि च, तीर्थमित्यनुवृत्तौ(२)“ऋषिजुष्टजलं क्षितौ” (अ० को०३-३-८६) इति कोशात्। आदिना (३)देवालयादि। प्रयत्नतो भूसंस्कारादीत्यन्वयः। भूसंस्कारो मार्ज(४)

---

(१) गोमयेनोपलिप्यं च क० च०।

(२) यद्यप्यत्र सर्वेषु पुस्तकेषु ‘क्षितौ’ इत्येव पाठ उपलभ्यते तथापि अमरकोशे ‘गुरौ’ इत्युपलम्भात् लोके गुरौ तीर्थशब्दस्य प्रयोगोपलब्धेश्च ‘गुरौ’ इति पाठः सुन्दर इति प्रतिभाति।

(३) ‘देवालयादि। एतेन काश्याद्यन्तस्तीर्थे आहत्य वचनानुपलम्भेपि श्राद्धस्य कर्तव्यतासिद्धिः’ घ०।

(४) ‘मार्जनोपलेपादि’ घ०।

प्रभासं पुष्करं चेति तेषु श्राद्धं महाफलम् ॥

स्कान्दे—

तुलसीकाननच्छाया यत्र यत्र भवेद्द्विज ।
तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे(१) ॥

नाद्धि । तथाच याज्ञवल्क्यः—

भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा ।
सेकादुल्लेखनाल्लेपाद् गृहं मार्जनलेपनात् ॥ इति ।

मार्जनं मार्जन्या पांसुतृणादेः प्रोत्सारणम् । दाहः तृणादिना । कालः यावता कालेन लेपादिक्षयस्तावान् । गोक्रमणं गोपादपरिघट्टनम् । सेकः क्षीरगोमूत्रगोमयवारिभिः प्रवर्षणं च । उल्लेखनं तक्षणं खननं वा । अत एव यमः—

खननात्पूरणाद्दाहादद्भिर्घर्षणलेपनात् ।
गोभिराक्रमणात्कालाद्भूमिः शुध्यति सप्तधा ॥ इति ।

लेपः गोमयादिना । एतैर्व्यस्तैः (२)समस्तैर्वा अमेध्या दुष्टा मलिना च भूः शुध्यति । अमेध्यादिभूमिं चाह देवलः—

यत्र प्रसूयते नारी म्रियते दह्यतेऽपि वा ।
चाण्डालाध्युषितं यत्र यत्र विष्ठादिसङ्गतिः ॥
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्त्तिता ।
श्वशूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत् ॥
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ॥ इति ।

शुद्धिविभागमाह देवलः—

पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति ।
दुष्टान्विता त्रिधा द्वेधा शुध्यते मलिनैकधा ॥

यत्र मनुष्यदाहश्चण्डालादिवासो वा तत्र दाहादिपञ्चभिः(३)शुद्धिः । यत्र मानुषादिप्रसवः, तन्मृतिः, विष्ठादिसङ्गतिर्वा; तत्र

---

(१) 'तृप्तये द्विज' क० । (२) 'समस्तै' नास्ति ख० । (३) 'शुध्यति' ङ० ।

माधवीये श्राद्धोपक्रमे व्यासः—

महोदधौ प्रयागे च काश्यां च कुरुजाङ्गले ।

शङ्खः—

गङ्गायमुनयोस्तीरे पयोष्ण्यमरकण्टके ।
नर्मदा बाहुदातीरे भृगु(१)लिङ्गे हिमालये ॥
गङ्गाद्वारे प्रयागे च नैमिषे पुष्करे तथा ।
सन्निहत्यां गयायां च दत्तमक्षय्यतां व्रजेत् ॥
अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः ।
गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः ॥

दाहवर्जितैस्तैरेव शुद्धिः । श्वशूकरखरैरुषितायास्तु गोक्रमणादिभिः त्रिभिः । उष्ट्रग्रामकुक्कुटादिभिरुषितायास्तु गोक्रमणं विना द्वाभ्याम् । अङ्गारादियुक्तायास्तु उल्लेखनमात्रेणेत्यर्थः । मार्जनानुलेपने तु सर्वत्र । एतच्च गृहस्य तत्र पृथगुपादानं प्रतिदिवसं प्राप्त्यर्थम् । सशवगृहशुद्धिं वक्ष्यति-'गृहशुद्धिं प्रवक्ष्यामि' इत्यादिना।

प्रसङ्गाद्द्रव्यशुद्धिरुच्यते । याज्ञवल्क्यः--

सौवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनाम् ।
शाकरज्जुमूलफलवासोविदलचर्मणाम् ॥
पात्राणां चमसानां च वारिणा शुद्धिरिष्यते ।

अब्जं मुक्ताफलशुक्तिशङ्खादि । ऊर्ध्वपात्रं यज्ञियोलूखलादि । ग्रहचमसवासांसि प्रसिद्धानि । आश्मं दृषदादि । शाकं वास्तुकादि । रज्जु बल्वजादिनिर्मिता । मूलम् आर्द्रकादि । फलम् आम्रादि । विदलं वैणवादि तद्विकारं छत्रादि च । चर्म अजादेः, तद्विकारं वरत्रादि च । पात्राणि प्रोक्षण्यादीनि । एषां लेपरहितानामुच्छिष्टस्पर्शमात्रे वारिणा क्षालनाच्छुद्धिः । तथा चादित्यपुराणे--

---

(१) 'भृगुतुङ्गे' क० ।

सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानि च ।
कांस्यायस्ताम्ररैतानि त्रपुसीसमयानि च ॥
निर्लेपानि च शुध्यन्ति केवलेन जलेन तु ॥

मनुः—

निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति ।
अब्जमश्ममयं चैव राजतं चानुपस्कृतम् ॥

अनुपस्कृतम् अखातपूरितम् उत्कीर्णरेखाद्यनुपेतं च । सलेपानां तु मनुः—

तैजसानां मणीनां च सर्वस्याश्ममयस्य च ।
(१)भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः ॥

मृद्भस्मनोरेककार्यत्वाद्विकल्पः, अपां समुच्चयः । हारीतः—"अद्भिः काञ्चनराजताब्जशुक्तीनां तद्गुणा(२)वर्जनस्नेहवैवर्ण्योपहतानां यवगोधूमकुलमाषमसूरमुद्गभस्मगोमयचूर्णैर्धावनम्, अम्ललवणाभ्यां ताम्राणां, भस्मना कांस्यानां, शणासितलेन सिकताघर्षणैः कार्ष्णायसानाम्, शिलाघर्षणमार्जनैर्मणिमयानाम्" इति । तद्गुणा गन्धादयस्तेषामवर्जनं सम्बन्धः, उच्छिष्टस्नेहादिना जातं वैवर्ण्यं च, तेनोपहतानाम् । काकादिमुखोपघाते तु शङ्खः-'कृष्णशकुनिमुखावमृष्टं पात्रं निर्लिखेत् श्वापदमुखावमृष्टं न प्रयुञ्जीत'। निर्लेखः तक्षणम् । श्वापदो मार्जारभिन्नः,

मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः ।

इति स्मृतेः । योगीश्वरः-'चरुस्रुवसस्नेहपात्राण्युष्णेन वारिणा' । चरुः चरुस्थालः । स्रुक्स्रुवौ प्रसिद्धौ । सस्नेहपात्राणि प्राशित्रहरणादीनि । इदमपि निर्लेप एव, उक्तमानत्वात् । स एव—

स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसाम् ।

स्फ्यः काष्ठखड्गः । अनः शकटम् । शेषं प्रसिद्धम् । उष्णेन वारिणेति वर्तते । कांस्यपात्रे उच्छिष्टलेपे चापस्तम्बः—

---

(१) 'अश्मना' ख० । (२) 'वर्तन' ङ० ।

गन्धाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च ।
शुध्यन्ति दशभिः क्षारैः श्वकाकोपहतानि च ॥

दशभिः आवर्त्तितैः । आदित्यपुराणे—

शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः ।

क्षारादिभिर्दशकृत्वो मार्जनं बोध्यम् । शङ्खः—

ब्रह्मक्षत्रविशां चैव सकृत्सम्मार्जनाच्छुचिः ।
चतुर्थेन तु यद्भुक्तं चतुर्भिस्तत्र मार्जनम् ॥
अग्नौ प्रक्षिप्य गृह्णीयाद्धस्तौ प्रक्षाल्य यत्नतः ।
गोशृङ्गेण तु संस्पृष्टं तत्पात्रं शुचितामियात् ॥

कांस्यपात्रे त्वङ्गिराः—

गण्डूषं पादशौचं च यः कुर्यात्कांस्यभाजने ।
षण्मासं भुवि निक्षिप्य पुनराकारमादिशेत् ॥

पुनराकारः पुनःकरणम् । भूनिक्षेपः पृथक्शोधकः । तेन दोषानुसारेण सप्ताहादि भुवि खात्वोद्धृत्य भस्मादिना मार्जनाच्छुद्धिरिति लभ्यते । स्मृत्यन्तरे--

लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन च ।
दहनात्खननाद्वाऽपि शैलानामम्भसापि वा ॥
काष्ठानां तक्षणाच्छुद्धिर्मृद्गोमयजलैरपि ॥

यदि तैर्न शुध्येत तदा तावन्मात्रच्छेदनं दाहो वा । सर्वत्रापि छिन्नदग्धयोः शुध्यभिधानं दुर्लभोत्तमाविषयम् । दरिद्रस्यानुत्तमेष्वपि मृद्भाण्डानाममलोपहतौ याज्ञवल्क्यः–'पुनःपाकान्महीमयम्' इति । सलेपप्रकरणे योगीश्वरः—

तक्षणं दारुशृङ्गास्थ्नां गोवालैः फलसम्भुवाम् ।
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ॥

शृङ्गाणि मेषमहिषादेः । अस्थीनि करिवराहादेः । अस्थिपदेन दन्तानामपि ग्रहः । उच्छिष्टस्नेहादिलिप्तानां मृद्भस्मोदकादिनाऽनपगतलेपानाम्—

यावन्नापैत्यमेध्याक्तो गन्धो लेपश्च तत्कृतः ।
तावन्मृद्वारि वा देयं सर्वासु द्रव्यशुद्धिषु ॥

इति सामान्यशुद्ध्युक्तेः । तक्षणं तावन्मात्रस्यापनयनम् । फलसम्भुवां बिल्वनारिकेलादिफलोद्भूतानां पात्राणां गोवालैरुद्घर्षणे शुद्धिः । यज्ञकर्मणि प्रयुज्यमानानां यज्ञपात्राणां स्रुक्स्रुवादीनां दक्षिणेन हस्तेन दर्भैः दशापवित्रेण वा यथाशास्त्रं मार्ज(१)नम् । श्रौतमुदाहरणमन्येषामपि सौवर्णादिपात्राणां स्मार्त्ते लौकिके च कर्मणि कृतशौचानामेवाङ्गत्वमिति दर्शयितुम् । संहतपात्रे तु हारीतः—

संहतानां तु पात्राणां यद्येकमुपहन्यते ।
तस्यैव शोधनं प्रोक्तं सामान्यद्रव्यशुद्धिकृत् ॥

मृद्भाण्डे त्वाह मनुः—

मद्यैर्मूत्रपुरीषैश्च ष्ठीवनैः पूयशोणितैः ।
संस्पृष्टं नैव शुध्येत पुनःपाकान्महीमयम् ॥

एतैः संस्पृष्टं महीमयं पुनःपाकान्नैव शुध्येत, तस्य त्यागः कार्य इत्यर्थः । धान्यादेश्चण्डालादिस्पर्शे तु पराशरः—

चण्डालाद्यैस्तु संस्पृष्टं धान्यं वस्त्रमथापि वा ।
प्रक्षालनेन शुध्येत परित्यागान्महीमयम् ॥

याज्ञवल्क्यः—

प्रोक्षणं संहतानां च बहूनां धान्यवाससाम् ।

संहतानां राशीकृतानां धान्यानां वाससां च । वासःपदमुक्तशुद्धीनामुपलक्षणम् । अयमर्थः—धान्यानि वस्त्रादीनि वा बहूनि राशीकृतानि तत्र चण्डालादिभिः स्पृष्टानि अल्पानि, बहून्यस्पृष्टानि, तत्र स्पृष्टानामुक्तैव शुद्धिः, अस्पृष्टानां तु प्रोक्षणमिति । बहु(२)त्वं स्पृष्टापेक्षया ।

---

(१) 'मार्जनम् । इदं श्रौतमुदाहरणमपि' ङ० ।
(२)बहुत्वं वाऽत्रादि धान्यादि' ङ१ ।

वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ।
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति ॥

इति स्मृतेः । शेषम् असमुद्धृतं प्रोक्षणाच्छुध्यतीति भावः । यत्र तु स्पृष्टानां बहुत्वमस्पृष्टानामल्पत्वं तत्राह मनुः--

अद्भिस्तु प्रोक्षणं प्रोक्तं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥ इति ।

स्पृष्टानां समत्वे तु प्रोक्षणम्, बहूनां प्रोक्षणविधानेनाल्पेषु क्षालने सिद्धे पुनरल्पानां क्षालनोक्तेः समेषु क्षालननिवृत्त्यर्थत्वात् । इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु क्षालनमेव पाक्षिकस्यापि दोषस्य परिहर्त्तव्यत्वात् । अनेकपुरुषोद्धार्याणां तु धान्यवासःप्रभृतीनां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेव । अल्पधान्ये बौधायनः—

व्रीहयः प्रोक्षणादद्भिः शाकमूलफलानि च ।
तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन वा ॥

बहुधान्ये तु काश्यपः—'प्रोक्षणपर्यग्निकरणावगाहनैः व्रीहियवगोधूमानां, विमर्शनप्रोक्षणैश्च फलीकृतानां, निर्घर्षदलनप्रोक्षणैः शमीधान्यानाम्' इति । अनेकपुरुषोद्धार्याणां व्रीह्यादीनां प्रोक्षणादिभिस्त्रिभिः । पर्यग्निकरणं परितोऽग्न्यभिमर्शः, अवगाहः क्षालनम् । अत्र यथायथमल्पत्वमहत्त्वाभ्यां व्यवस्था। विमर्शनं पाणिभ्यां निर्मलकरणम् अल्पदोषे, महति तु प्रोक्षणम् । (१)(शमीधान्यानि मुद्गादीनि । एकपुरुषोद्धार्याणां निर्घर्षः, अल्पानां दलनम्, अनेकपुरुषोद्धार्याणां प्रोक्षणम्)। 'तण्डुलांस्तु परित्यजेत्' इति तु अत्यन्ताल्पपरिमाणपरम् । आदित्यपुराणे—

गृहदाहे समुत्पन्ने दग्धे च पशुमानुषे ।
अभोज्यस्तद्गतो व्रीहिर्धातुद्रव्यस्य सङ्ग्रहः ॥
मृन्मयेनावबद्धानामधोमुत्रि च तिष्ठताम् ।
यवमाषतिलादीनामदोषं मनुरब्रवीत् ॥

---

(१) कंसान्तर्गतं नास्ति ख० ।

ततः संक्रममाणेऽग्नौ स्थाने स्थाने (१)च दह्यते ।
न च प्राणिवधो यत्र केवलं गृहदीपनम् ॥
तत्र द्रव्याणि सर्वाणि गृह्णीयादविचारयन् ॥

याज्ञवल्क्यः—

त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः ।
भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु ॥

त्रपुप्रभृ(२)तीनि प्रसिद्धानि तेषामुपघातानुरोधेन क्षारोदकेन अम्लोदकेन वारिणा च सम(३)स्तैर्वा । ताम्रपदेन रीतिकाहृत्तस्नेहयोर्ग्रहः, एकयोनित्वात् । एतच्च ताम्रादीनामम्लोदकादिभिः उच्छिष्टलेपाद्यपगमसम्भवे । अनेनैव शुद्धिरिति न नियमः,

मलं संयोगजं यस्य येन येनोपहन्यते ।
तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत् ॥

इत्यविशेषोक्तेः । एवञ्च ताम्रादेरुच्छिष्टादिलेपस्यान्येनापगमसम्भवेऽम्लाद्यनुपादानेऽपि न दोषः,

ताम्रायःकांस्यरैप्याणां त्रपुणः सीसकस्य च ।
शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः ॥

इति सामान्यतोऽप्यभिधानात् ।

भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ।

इत्यादिकमपि शुद्धेः(४) परां काष्ठां वक्तुमेव, न त्वन्यनिषेधार्थम् । उपघातातिशये तु अम्लोदकादेरावृत्तिः । 'गवाघ्रातानि' इत्युपक्रम्य 'दशभिः क्षारैः' इत्युक्तेः । 'द्रवस्य द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहत(५)स्य अमेध्यसंस्पृष्टद्रवस्य च प्लावः प्लावनं सजातीयद्रव्येण भाण्डपूरणं तन्निस्सरणं यावत्कार्यम्'

---

(१)'स्थले' ख० घ० । (२)'प्रभृतीनि सर्वाणि प्रसिद्धानि' ङ० ।
(३)'समस्तैर्व्यस्तैर्वा' ङ० । (४) 'शुद्धेः प्रकारान्तरं वक्तु' ख०
(५) । 'हतस्य च' ङ० ।

इति मिताक्षरा । वस्त्रान्तरिते पात्रे प्रक्षेपः प्लावनमिति मयूखः।
ततोऽल्पस्य त्यागः । देशकालापेक्षयाऽपि बह्वल्पम् ।

देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥

इति बौधायनोक्तेः । सौवर्णराजतादीनां सर्वेषामेवामेध्योप
हतानां शुद्धिमाह याज्ञवल्क्यः—

अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गन्धादिकर्षणात् ।

अमेध्याः मलाः । ते च द्वादश,

वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ॥

तथा—

मानुषास्थिशवं विष्ठा रेतो (१)मुत्रार्त्तवं वसा ।
स्वेदाश्रुदूषिकाश्लेष्म मद्यं चामेध्यमुच्यते ॥ इति ।

गन्धापकर्षणान्ता शुद्धिः । आदिना लेपग्रहः, 'लेपगन्धाप
कर्षणैः शौचममेध्यलिप्तस्य' इति गौतमोक्तेः । (स(२)र्वाशुद्धि
प्रथमतो मृत्तोयैरेव लेपगन्धयोरपकर्षणम्, अशक्तौ अन्येन, "तद
द्भिः पूर्वं मृदा च" इति गौतमोक्तेः)। वसादिग्रहणं च सर्वेषाममे
ध्यत्वसूचकं न तु समानोपघातार्थम् 'मद्यैर्मूत्रपुरीषैश्च' इति मनु
नोपघातविशेषाभिधानात् । अमेध्यत्वं चैतेषां देहाच्च्युतानामेव
स्वस्थानस्थानाम्, 'देहाच्चैव मलाश्च्युताः' इति विशेषोक्तेः । पुरु
स्य नाभेरूर्ध्वं करातिरिक्तानामङ्गानामन्यामेध्यस्पर्शे स्नानम्,

मानुषास्थिवसां विष्ठामार्त्तवं मूत्ररेतसी ।
मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेत् ॥
तान्येव स्वानि संस्पृश्य प्रक्षाल्याचम्य शुध्यति ॥

इति देवलोक्तेः ।

उर्ध्वं नाभेः करौ मुक्त्वा यदङ्गमुपहन्यते ।
तत्र स्नानमधस्ताच्च प्रक्षाल्याचम्य शुध्यति ॥

---

(१) 'मूत्रार्तवे' ङ० । (२) कंसान्तर्गतं नास्ति ख० ।

इति देवलोक्तेः । मूत्राद्युपघाते बौधायनः—

'तैज(१)सानां मूत्रपुरीषशुक्रासृक्कुणपमद्यैरत्यन्तोपहतानामावर्त्तनम्, अल्पसंसर्गे परिलेखनम्, स्पर्शमात्रे त्रिःसप्तकृत्वो भस्मना मार्जनम् । अतैजसानामेवम्भूतानामुत्सर्गः । स्मृत्यन्तरे—

भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ।
सुरामूत्रपुरीषैस्तु शुध्यते तापलेखनैः ॥
ताम्रमम्लेन शुध्येत न चेदामिषलेपनम् ।
आमिषेण तु यल्लिप्तं पुनर्दाहेन शुध्यति ॥

शङ्खः—

सूतिकोच्छिष्टभाण्डस्य सुरामद्यहतस्य च ।
त्रिःसप्तमार्जनाच्छुद्धिर्न तु ताम्रस्य (२)तापनम् ॥ इति ।

सूतिकोच्छिष्टाद्युपहतानां सप्ताभिर्यवगोधूमादिचूर्णैः प्रत्येकं त्रिर्मार्जनाच्छुद्धिरित्यर्थः । प्रतिमार्जनमुदकं बोध्यम् । बौधायनः—'कांस्यभिन्नतैजसानामल्पो(३)पघाते मार्जनं तापनं च' । कांस्ये तु न तापनं कार्यं, किन्तु क्षालनं मार्जनं चेत्यर्थः । अधिकोपहतानां तु स्मृत्यन्तरे—

सूतिकासत्रविण्मूत्ररजस्वलाहतानि च
प्रक्षेप्तव्यानि तान्यग्नौ यथावत्संदहेदपि ॥ इति ।

तैजसानां मूत्राद्युपघाते पुनःकरणं गोमूत्रे वा सप्तरात्रं परित्रासनम् । कांस्यभिन्नतैजसानां लेपानिर्हरणाशक्तौ पुनः करणं, पुनःकरणाशक्तौ गोमूत्रवासः । लेपानां केषाञ्चिल्लेपापकर्षकमाह याज्ञवल्क्यः—

सोषैरुदकगोमूत्रैः शुद्ध्यत्याविककौशिकम् ।
सश्रीफलैरंशुप(४)ट्टमरिष्टैः कुतपं तथा ॥ (२-१८६)

ऊषः क्षारमृत्तिका, आविकम् ऊर्णामयं, कौशिकं

---

(१) 'तैजसाम्' ङ० । (२) 'भाजनम्' ख० ।
(३) 'अन्योपघाते' ख० ।
(४) 'पट्टसारिष्टैः कुभणम्' ङ० ।

कोशभवं तसरीपट्टादि, अंशुपट्टं वल्कलतन्तुकृतं, कुत(१)पः पार्वतच्छागरोमकृतः कम्बलः, अरिष्टः फेनिलः। उदकगोमूत्रैरिति वर्त्तते। उदकपदं पश्चादप्युदकप्राप्त्यर्थम्। बहुवचनमिदम(२)धिकोच्छिष्टलेपादियोगे। (३)अल्पोपघाते तु देवलः—

> और्णकौशेयकुतपपट्टक्षौमदुकूलजाः।
> अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः॥ इति।
> तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः।
> धान्यकल्कैस्तु फलजै रसैः क्षारानुगैरपि॥ इति।

क्षौमवदेव शाणस्य, समानयोनित्वात्। और्णेति तूलिकादिप्राप्त्यर्थम्,

> तूलिका(४)मुपधानं च पुष्परक्ताम्बराणि च।
> शोषयित्वा नयेत्किञ्चित्करैः सम्मार्जयेन्मुहुः॥
> पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि।
> तान्येवातिमलिनानि यथावत् परिशोधयेत्॥

इति देवलोक्तेः। पुष्परक्तानि कुङ्कुमकुसुम्भादिरक्तानि। पुष्पग्रहणं हरिद्रादिरक्तस्य क्षालनासहस्य प्राप्त्यर्थं न माञ्जिष्ठादेः, तस्य क्षालनसहत्वात्। अत एव शङ्खः—'रागद्रव्याणि प्रोक्षितानि शुचीनि' इति। अल्पशौचा इति, क्षालनासहत्वात्। सर्वत्र द्रव्याविनाशेनैव शुद्धेरिष्टत्वात्। स्मृत्यन्तरे—'अहतानां प्रोक्षणम्' इति। यन्त्रानिर्मुक्तनूतनवाससां प्रोक्षणाच्छुद्धिरित्यर्थः। याज्ञवल्क्यः—

> सगौरसर्षपैः क्षौमं पुनःपाकान्महीमयम्।

क्षुमा अतसी तत्सूत्रनिर्मितं क्षौमं गौरसर्षपसहितैरुदकगोमूत्रैः, उच्छिष्टस्नेहालिप्तं मृन्मयं पुनःपाकेन शुध्यति।

प्रचेताः—'चैलानामुच्छेदनं(५)गन्धलेपानपगमने तन्मात्रच्छे

---

(१) 'कुभणः' ङ०। (२) 'इदमधिकोपघाते' ङ०।
(३) 'योगे संघाते' ख०। (४) 'तूलिकाद्युपधानं' ङ०।
(५) 'गन्धलेपानपनयने' ङ०।

दनं कर्त्तनं वाससामभ्युक्षणात्' इति। शयनासनगतानां वस्त्राणां तु संहतवच्छौचमाह देवलः—

शयनासनयानादिदेहबन्धानि यानि च।
वस्त्राण्येतानि सर्वाणि संहतानि प्रचक्षते॥ इति।

प्रोक्षणमिति भावः। मनुः—

चैलवच्चर्मणां शुद्धिर्विदलानां तथैव च।
शाकमूलफलानां तु धान्यवच्छुद्धिरिष्यते॥

स्मृत्यन्तरे—'वरित्रचर्मचापरवल्कलानां चैलवच्छुद्धिः'। सिद्धान्ते तु मनुः—

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम्।
केशकीटैर्दूषितं च मृत्प्रक्षेपेण शुद्ध्यति॥

गवाघ्रातं गोनिःश्वासोपहतम्, अवधूतम् उपरिवसनादिना पक्षिभिर्भक्षित्वा उत्क्षिप्य त्यक्तं च। याज्ञवल्क्यः—

गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते।
सलिलं भस्म मृद्वाऽपि प्रक्षेप्तव्यं विशुद्धये॥

अन्नम् अदनीयमात्रम्। केशपदं लोमोपलक्षणम्। कीटाः पि(१)पीलिकादयः। 'सहपाके तु नित्यमभोज्यं केशकीटावपन्नम्' इति गौतमं द्रष्टव्यम्। वसिष्ठः—

देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च।
काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विवर्जयेत्॥
तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति॥

देवद्रोणी देवयात्रा। प्रकृतेषु अवश्यंभाविपर्वोत्सवेषु। विशेषमाह पराशरः—

पक्वं द्रोणाधिकं त्वन्नं श्वकाकाद्युपघातितम्।
ग्रासमुद्धृत्य तन्मात्रं यत्तु लालाकृतं भवेत्॥
हेमोदकेन वाऽभ्युक्षेत् राजतेनाम्बुनाऽथवा।

---

(१) [illegible]

अग्निज्वालोपसंस्पर्शात्सुवर्णमधुसर्पिषा ॥
विप्राणां ब्रह्मघोषेण पूतं भोज्यं च तद्भवेत् ॥

द्रोणः पञ्चाशदधिकपलशतद्वयम् । अल्पान्ने तु जमदग्निः—

अन्नमैकाहिकं पक्वं श्वकाकाद्युपघातितम् ।
केशकीटावपन्नं च तदप्येवं विशुध्यति ॥
क्रीतस्यापि विधिर्दृष्ट एवमेव मनीषिभिः ।

संस्कारे तु वसिष्ठः—

द्रवाणां प्लावनेनैव घनानां प्रोक्षणेन च ।
छागेन मुखसंस्पृष्टमन्नं तच्छुचितामियात् ॥

घनाः पर्पटवटकादयः । द्रवाणां गोरसानाम् ,

श्रपणं घृततैलादेः प्लावनं गोरसस्य च ।
भाण्डानि क्षालयेदद्भिः शाकमूलफलानि च ॥

इति शङ्खोक्तेः । चकाराद् घृततैलयोरपि प्लावनम् । कीटाद्युपहतस्य तूत्पवनम् । तच्च वस्त्रान्तरितपात्रे प्रक्षेपः, अन्यथा तदपगमासम्भवात् । तथा च मनुः—

द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम् । इति ।

शूद्रभाण्डास्थितस्य तु मधूदकादेः पात्रान्तर(१)नयनाच्छुद्धिः, "मधूदके पयस्तद्विकाराश्च पात्रात्पात्रान्तरे नयनाच्छुद्धाः" इति बौधायनोक्तेः । पात्रात् शूद्रपात्रात् । तथा—

आधारदोषे तु नयेत्पात्रात्पात्रान्तरद्रवम् ।

मधुघृतादेर्वर्णापसदहस्तात्प्राप्तस्य पात्रान्तरानयनं पुनः पचनं (२) च कार्यम्, "अभ्यवहार्याणामनेनाभिघारितानां पुनःपचनमेवं स्नेहानां स्नेहवद्रसानाम्" इति शङ्खोक्तेः । तथा—

घृतं च पायसं क्षीरं तथैवेक्षुरसो गुडः ।
शूद्रभाण्डास्थितं तक्रं तथा मधु न दुष्यति ॥

---

(१) 'पात्रान्तरानयनात्' ङ० ।

(२) 'तत्र' ङ० ।

पायसं पयोजन्यं दधि । यमोऽपि—

छागमांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः ।
म्लेच्छभाण्डस्थितास्तस्मान्निष्क्रान्ताः शुचयः स्मृताः ॥

बौधायनः—

देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् ।
उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत् ॥

विष्णुः—

मृत्पर्णतृणकाष्ठानां श्वभिश्चाण्डालवायसैः ।
स्पर्शने विहितं शौचं सोमसूर्यांशुमारुतैः ॥

तथा—प्रोक्षणेन पुस्तकम् । योगीश्वरः—

रश्मिरग्नी रजश्छाया गौरश्वो वसुधाऽनिलः ।
विप्रुषो मक्षिका स्पर्शे, वत्सः प्रस्रवणे शुचिः ॥

रश्मिः सूर्यादेः । अग्न्यादयो नव प्रसिद्धाः । चाण्डालादिस्पर्शे चाशुचिः । रजः अजाद्यसम्बन्धि । तत्र —

श्वकाकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणाम् ।
अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्च हीयते ॥

इति दोषस्मरणात् । प्रस्रवणम् ऊधोगतक्षीराकर्षणम् । वत्सपदं बालस्यापि ग्रहार्थम् ,

बालैरनुपरिक्रान्तं नित्यं मेध्यमिति स्थितिः ।

इति स्मृतेः । तथा—

शुचिरग्नी रजो वायुरापो दधि घृतं पयः ।
सर्वाण्येतानि मेध्यानि स्पर्शे छाया च नित्यशः ।

छाया तु चण्डालादेरन्या,

चण्डालपतितच्छायास्पर्शे दुष्टा तनुर्भवेत् ।

इति ब्राह्मात् । रजोऽपि रासभादेरन्यत् ,

रेणवः शुचयः सर्वे वायुना ये समीरिताः ।
अन्यत्र शूकराजाविश्वरासभविमार्जनात् ॥

‘विमार्जनी’ इति पाठे पञ्चमी (१)त्यागश्छान्दसः।

देवलः—

अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः।
स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन॥
दधिसर्पिःपयःक्षौद्रभाण्डे दोषो न विद्यते।
मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः॥

मार्जारः कर्मकालादन्यत्र शुचिः, तत्र स्पर्शे तु स्नानमिति।

याज्ञवल्क्यः—

दाकूशस्तमम्बुनिर्णीतमज्ञातं च सदा शुचिः।

कृतेऽपि शौचे यदि मनसोऽपरितोषात्संदेहस्तदेदं शुद्धमस्त्विति विप्रवचनेन शुचिः। यत्र च शुद्धिर्न विहिता तस्य क्षालनं, क्षालनासहस्य प्रोक्षणम्। अज्ञातं यत्काकादिनोपहतं तदपि शुचि।

संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तम।
अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः॥

इति प्रायश्चित्तं तु भक्षणविषयं न त्वन्योपयो(२)गविषयम्।

कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा।

कारवः रजकसूपकाराद्याः तत्साध्ये कर्मणि वस्त्रधावने सूतकादावपि तद्धस्तः शुचिः। तथा च स्मृत्यन्तरे—

कारवः शिल्पिनो वैद्या दासीदासास्तथैव च।
राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्त्तिताः॥ इति।

पण्यं विक्रेयं यवव्रीह्यादि। अनेकक्रेतृजनस्पृष्टमपि वणिजां सूतकादावपि च नाशुद्धम्। भैक्ष्यं ब्रह्मचर्यादि(३)गतम्। अनाचान्तस्पृष्टादिदत्तमशुचिरथ्याक्रमणादिनापि दुष्टं न तु चण्डालादिस्पृष्टम्। सम्भोगकाले योषिन्मुखं शुचि, ‘स्त्रियश्च रतिसंसर्गे

---

(१) ‘पाठः’ ख० ।
(२) ‘भोग’ ङ ।
(३) ‘गतं’ नास्ति ङ० ।

इति स्मृतेः । तथा—

नित्यमास्यं शुचिः स्त्रीणां शकुनेः फलपातने ।
प्रस्रावे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः ॥
नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्मृतम् ॥

याज्ञवल्क्यः—

अजाश्वं मुखतो मेध्यं न गोर्न नरजा मलाः ।
पन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैः ॥

अजाश्वयोर्मुखं मेध्यम् । न गोर्मुखं मेध्यम् । नरजा नरदेहजाता मला वसादयो न मेध्याः । पन्थानो राजमार्गाः चाण्डालादिस्पृष्टा अपि रात्रौ सोमांशुमारुताभ्यां दिवा च सूर्यांशुमारुताभ्यां (१)शुद्धाः ।

मुखजा विप्रुषो मेध्यास्तथाऽऽचमनबिन्दवः ।
श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥
च्युतेऽप्यास्राववद्विद्यान्निगिरन्नेव तच्छुचिः ।

मुखजाः श्लेश्मबिन्दवः मेध्याः नोच्छिष्टाः । अङ्गे निपतिता न चेत्, "न मुख्या विप्रुष उच्छिष्टं कुर्वन्ति, नचेदङ्गे प(२)तन्ति" इति गौतमोक्तेः । एवमाचमनबिन्दवः पादे गता अपि नोच्छिष्टाः । श्मश्रु चास्ये मुखे गतं प्रविष्टं नोच्छिष्टम् । दन्तसक्तमन्नादि स्वयमेव च्युतं त्यक्त्वा शुचिः, अच्युतं दन्तसमं 'दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्शनात्प्राक् च्युतेः' इति गौतमोक्तेः । निगिरन्नेवेत्येवकारेण—

चर्वणे त्वाचमेन्नित्यं मुक्त्वा ताम्बूलचर्वणम् ।
ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च ॥

इति आचमननिषेधः । ताम्बूलपदं फलादेरुपलक्षणम्,

ताम्बूले च फले चैव भुक्तस्नेहावशिष्टके ॥
दन्तलग्नस्य संस्पर्शे नोच्छिष्टो भवति द्विजः ॥

---

(१) 'शुद्धिः' ख० । (२) 'निपतन्ति' ङ०

इति शातातपात् । देवलः—

आत्मशय्याऽऽसनं वस्त्रं जायाऽपत्यं कमण्डलुः ।
शुचीन्यात्मन एतानि परेषामशुचिर्भवेत् ।
पादौ शुची ब्राह्मणस्य अजाश्वानां मुखं शुचिः ॥
गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम् ।

तथा--

उपस्पृश्याशुचिस्पृष्टं तृतीयं चापि मानवः ।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुद्ध्यति ॥

प्रथमोऽशुचिस्तत्स्पृष्टो द्वितीयः, तत्स्पृष्टस्तृतीयः, तत्स्पर्शे आचमनमात्रं न चतुर्थादौ, मानाभावात् ।

शातातपः—

'शिशोरभ्युक्षणं प्रोक्तम्' इत्याद्युक्तमनुपतीतधर्मे याज्ञवल्क्यः-

स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥

वसिष्ठः--

“रुदित्वा वान्तः पुनराचामेत्” ।

मनुः--

सुप्त्वा क्षुत्वा च भुक्त्वा च ष्ठीवित्वोक्त्वाऽनृतं वचः ।
पीत्वाऽऽपोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् ॥ इति ।

एतच्च अल्पानृतोक्तौ । भोजने त्वादावपि द्विराचमनम्, 'भोक्ष्यमाणस्तु प्रयतो द्विराचामेत्' इत्यापस्तम्बात् । स्नानपानयोरादौ सकृत् । अध्ययने त्वादावन्ते च द्विराचमनम् ।

योगी--

रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः ।
मारुतेनैव शुध्यन्ति पक्वेष्टकाचितानि च ॥

रथ्यादिगतगोमयशर्करादिलाभार्थं बहुवचनम् । पक्वेष्टकादिभिश्चितानि गृहाणि च । एवकारेण प्रोक्षणनिवृत्तिः । तृणकाष्ठ-

*एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

आदित्यपुराणे—

पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः ।
महानद्याः पश्चिमेन यावद् गृध्रेश्वरो गिरिः ॥
उत्तरे ब्रह्मयूपस्य यावद्दाक्षिणमानसम् ।
एतद् गयाशिरो नाम त्रिषु लोकेषु विश्रुतम् ॥ इति ।

शूलपाणौ बृहस्पतिः—

गङ्गायां धर्मपृष्ठे च सरसि ब्रह्मणस्तथा ।
गयाशीर्षेऽक्षयवटे पितॄणां दत्तमक्षयम् ॥

———

र्णादिमयानां तु अन्त्यादिस्पर्शे प्रोक्षणमिति दिक् । आदिनाऽशुचिद्रव्यापसारणम् ।

जघान दानवौ विष्णुः पूर्वं तु मधुकैटभौ ।
वृत्रं महेन्द्रश्च ततः पृथिवी मेदसा वृता ॥
तस्माच्छ्राद्धे पञ्चगव्यैर्लेप्या शोध्या तथोल्मुकैः ।
गौरमृत्तिकया कीर्णा प्रकीर्णा तिलसर्षपैः ॥

इति ब्रह्माण्डे । उल्मुकैरिति समन्ततः उल्मुकनिधानमप्युक्तम्, वराहकृतश्राद्धमधिकृत्य ब्राह्मे—

दंष्ट्रयोद्धृत्य च महीमभ्युक्ष्य सलिलेन च ।
धर्मोद्भवेनोपलिप्य कुशैरुल्लिख्य तां पुनः ॥
परिणीयोल्मुकेनैनां पर्युक्ष्य च पुनः पुनः ॥

इति परकृतिसरूपार्थवादात् । ध(१)र्मोद्भवं गोमयम् । *तीर्थादिति(२) । तीर्थमपेक्ष्य तैर्थ्यश्राद्धं गृहे अधिकफ(३)लदमित्यर्थः । विष्णुधर्मे तीर्थमात्रस्य श्राद्धनिमित्तत्वोक्तावपि कुरुक्षेत्राद्युपादानं तत्र तस्यावश्यकत्वार्थम् । *एष्टव्या इति । गयाश्राद्ध-

---

(१) 'धर्मोद्भवं गोमयं' नास्ति घ० (२) अस्य मूलं १३२८ पृष्ठे द्रष्टव्यम् ।
(३) 'अधिकफलम्' ख०

धर्मारण्यं धर्मपृष्ठं धेनुकारण्यमेव च ।
दृष्ट्वैतानि पितॄंश्चार्च्य वंशान्विंशतिमुद्धरेत् ॥

त्रिस्थलीसेतौ वायवीये—

*शमीपत्रप्रमाणेन पिण्डं दद्याद् *गयाशिरे ।
उद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतम् ॥

सप्तगोत्राणि तु—

पिता माता च भार्या च भगिनी दुहिता तथा ।
पितृमातृष्वसा चैव सप्त गोत्राणि वै विदुः ॥ इति ।

एषां गोत्राणामेकोत्तरशतं कुलं पुरुषा इत्यर्थः । ते चोक्तास्तत्रैव—

तत्त्वानि विंशति *नृपा द्वादशैकादश दश ।
अष्टाविति च गोत्राणां कुलमेकोत्तरं शतम् ॥

तत्त्वानि चतुर्विंशतिः । ते च द्वादश पूर्वा द्वादश पराः । एवमग्रेऽपि । प्रयोगपारिजाते पाद्मे—

शालग्राममयी मुद्रा संस्थिता यत्र कुत्रचित् ।
वाराणस्या यवाधिक्यं समन्ताद्योजनत्रयम् ॥

तथा—

यत्किंचित्पैतृकं कुर्यात्सपिण्डं वा *तदन्तिके ।
विष्णुलोकं स गच्छेत्तु लभते शाश्वतं पदम् ॥

तत्रैव वाराहे—

म्लेच्छ(१)देशे शुचौ वापि चक्राङ्को यत्र तिष्ठति ।
योजनानां तथा त्रीणि मम क्षेत्रं वसुंधरे ॥

ध्यात्यावश्यकत्वार्थम् । गयाशिरआदीनां चाधिकतरत्वम् । *शमीपत्रेति कैमुत्यन्यायेन । *गयाशिरे इति । शिरशब्दोऽदन्तः । *नृपाः षोडश । *तदन्तिके शालग्रामशिलान्तिके ।

---

(१) 'म्लेच्छदेशे' इत्येष श्लोको नास्ति ख० छ०

चक्राङ्क(१)स्य तु सान्निध्ये यत्कर्म क्रियते नरैः ।
स्नानं दानं तपः श्राद्धं सर्वमक्षयतां व्रजेत् ॥

अथ निषिद्धदेशाः । पृथ्वीचन्द्रोदये स्कान्दे—

त्रिशङ्कोर्वर्जयेद्देशं सर्वं द्वादशयोजनम् ।
*उत्तरेण महानद्या दक्षिणेन तु कीकटात् ॥
देशस्त्रैशङ्कवो नाम श्राद्ध(२)कर्मणि वर्जितः ।

वायवीये—

प्रणष्टाश्रमधर्माश्च देशा वर्ज्याः प्रयत्नतः ।

यमः—

रूक्षं कृमिहतं *क्लिन्नं *संकीर्णानिष्टगन्धिकम् ।
देशं त्वनिष्टशब्दं च वर्जयेच्छ्राद्धकर्मणि ॥

तत्रैव शङ्खः—

*गोगजा(३)श्वादिजुष्टेषु *कृत्रिमायां तथा भुवि ।
न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु ॥

यमः—

परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः ।
तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते ॥

ब्राह्मभारतयोरपि—

परकीयगृहे यस्तु स्वान्पितॄंस्तर्पयेद्यदि ।

---

*उत्तरेणेति । महानद्याः फल्ग्वा उत्तरेण दक्षिणेन च द्वादशयोजनं कीकटो नाम त्रैशङ्कवो देशः ।

कीकटेषु गया पुण्या नदी चैव पुनःपुना ।

इत्यादिस्त्वपवादः । *क्लिन्नम् आर्द्रम् सपङ्कमिति यावत् । *संकीर्णं बहुभिर्व्याप्तम् । *गवित्यादि दृष्टान्तः । भूमित उच्चत्वादिना सादृश्यम् । तत्रोपविश्य सङ्कल्पादेर्वा निषेधः । *कृत्रि-

---

(१) 'चक्राङ्कस्य' क०
(२) 'श्राद्धकर्मविवर्जितः' क० छ०
(३) 'गोगजाश्वादिपृष्ठेषु' क० छ०

तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलात् ॥
*अग्रभागं ततस्तेभ्यो दद्यान्मूल्यं च जी(१)वितम् ।

*श्राद्धार्हाणामग्रभागं श्राद्धं, *तदनर्हाणां शूद्राणां तु मूल्यमिति केचित् । *षोडशीपिण्डेऽबान्धवानामपि पिण्डोक्तेः, 'येऽबान्धवा बान्धवा वा' इत्यादिनर्पणबाधापत्तेश्च नामगोत्रपूर्वं श्राद्धनिषेधो नान्यत्रेति गौडाः । विप्रासुतस्य शूद्रापुत्रश्राद्धनिषेधो *नान्यत्र । अग्रदानं चान्नत्यागात्पूर्वं कार्यमिति मैथिलाः । तन्न, अग्रभागस्य श्राद्धपरत्वे मानाभावात् । अन्नदाने च *निषेधाभावात्(?) । *त्यागात्पूर्वं करणेऽनङ्गेन व्यवधानापत्तेः । अङ्गत्वे च मानाभावात् । *इदं च स्वाम्यनुज्ञाऽभावे । तदुक्तं तत्रैव ब्राह्मे-

स्वनुलिप्तेषु गेहेषु स्वेष्वनुज्ञापितेषु च ।

मायाम् वेदिकाअट्टालिकादौ । *अग्रभागमिति । स्वसत्तां विना श्राद्धस्य दुष्करत्वात्तत्संपत्तये जीवनरूपं प्रथमतो मूल्यं दद्यादित्यर्थः । मतान्युत्थापयति-*श्राद्धार्हाणामिति । चकारस्य व्यवस्थितविकल्पार्थत्वादित्याशयः । *तदनर्हाणामिति ।

न ब्राह्मणेन कर्त्तव्यं शूद्रस्याप्यौर्ध्वदैहिकम् ।

इति निषेधात् शूद्राणां श्राद्धनिषेधं परिष्करोति-*षोडशीति । *नान्यत्रेति ।

शूद्रेण वा ब्राह्मणस्य विना पारशवात् क्वचित् ।

इत्युत्तरार्द्धे पारशवे कर्तृत्वस्य प्रतिप्रसूतत्वान्न तद्विरोधः । *निषेधादिति ।

श्राद्धं दित्सुर्न कस्मैचित्प्रदद्यात्प्रथमं नरः ।

इत्यादिनिषेधादित्यर्थः । दूषणान्तरमाह-*त्यागादिति । *इदमिति आपाततः । अन्यदेशीयानां नित्यस्य तद्देशीयानां नित्यादे

---

(१) 'जीवनम्' क० ।

श्राद्धमेतेषु दातव्यं वर्ज्यमेतेषु नोच्यते ॥
किरातेषु कलिङ्गेषु कौ(१)ङ्कणेषु खसेष्वपि ।
सिन्धोरुत्तर(२)कूलेषु नर्मदायाश्च दक्षिणे ॥
पूर्वेण करतोयाया न देयं श्राद्धमुच्यते ।

इदं काम्यविषयम् । अन्यथा तत्रत्यानां सर्वश्राद्धाकरणापत्तेः । नर्मदादक्षिणेऽपवादः स्कान्दे-

सह्यस्य चोद्भवो यत्र यत्र गोदावरी नदी ।
पृथिव्यामपि कृत्स्नायां स प्रदेशोऽतिपावनः ॥

परकीयत्वापवाद आदित्यपुराणे-

अटवी पर्वताः पुण्या नदी तीराणि यानि च ।
सर्वाण्यस्वामिकान्याहुर्नहि तेषु परिग्रहः ॥
वनानि गिरयो नद्यस्तीर्थान्यायतनानि च ।
देवखाताश्च गर्ताश्च न स्वाम्यं तेषु विद्यते ॥

स्मृतिसारे-

*नैकवासा न च द्वीपे नान्तरिक्षे कदाचन ।
श्रुतिस्मृत्युदितं कर्म न कुर्यादशुचिः क्वचित् ॥

रित्र काम्यस्यापि निषेद्धुमशक्यत्वात् । किन्तु भ्रमप्राप्तस्य तीर्थश्राद्धस्यान्यदेशीयानां काम्यस्य चायं निषेधः । (त्रै(३)शङ्कवादिदेशनिषेधोऽप्येवम् ।) *नैकवासा इति । पारिभाषिकमप्येकवासो वर्ज्यम्,

सव्यादंसात्परिभ्रष्टमम्बरं यस्तु धारयेत् ।
एकवस्त्रं तु तं विद्याद्दैवे पित्र्ये च वर्जयेत् ॥

इति देवलोक्तेः । नैत्यकानां सकलनिषेधानामिदमुपलक्षणम् । म्लेच्छदेशलक्षणं व्रतहेमाद्रौ विष्णुः—

चातुर्वर्ण्यव्यवस्थानं यत्र देशे न विद्यते ।
स म्लेच्छदेशो विज्ञेय आर्यदेशस्ततः परः ॥ इति ।

---

(१) 'कोङ्कणेषु' क० (२) 'भागेषु' क० (३) कंसान्तर्गतं नास्ति ङ०

दिवोदासीये-

म्लेच्छदेशे तथा रात्रौ संध्यायां विप्रवर्जिते ।
न श्राद्धमाचरेद्विद्वान्न चा*काशे कथंचन ॥

अथ श्राद्धकालाः । ते च संक्रान्तियुगादिमहालयादयः प्रायेण पूर्वपरिच्छेदद्वये उक्ता एव । क्वचित्तूच्यन्ते । पृथ्वीचन्द्रोदये वृद्धपराशरः—

श्राद्धं वृद्धाव*चन्द्रे स्वच्छायाग्रहणसंक्रमे ।
*नवोदके नवान्ने च *नवच्छन्ने तथा गृहे ॥
नवैक्षवेषु चेहन्ते पितरो हि मघास्वपि ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ॥

इति शातातपपाठः । नवोदके नवकूपवाप्यादाविति केचित् । वर्षोपक्रमे आर्द्राप्रवेशे इति गौडाः । नवान्नश्राद्धे विशेषो ज्योतिषे-

ज्येष्ठ*शेषा(१)र्धगे सूर्ये मृगनेत्रा निशात्मके ।
नवान्नै*र्भोजन(२)श्राद्धं जन्मचन्द्रतिथौ न च ।
आश्लेषाकृत्तिकाज्येष्ठामूला(३)जपदगेषु च ।
गुरुभौमदिने रिक्ते तिथौ*नाद्यान्नवौदनम् ॥

*आकाशोऽट्टालिकादिरनावृतः ।

परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथा ।

इति याज्ञवल्क्यवाक्येपि परिश्रितः परित आच्छादितः ।

*अचन्द्रः दर्शः । *नवोदके तीर्थोदके इत्यप्याहुः । *नवच्छ नवसंपादिते इत्यप्याहुः । *शेषार्द्धः उत्तरार्द्धः । *भोजनश्रा सङ्कल्पश्राद्धम् । तथा च ज्येष्ठोत्तरार्द्धं विहाय नवान्नश्राद्धं सांक कुर्यादित्यर्थः । *नाद्यादिति । नवौदनश्राद्धशेषभोजननिषेध

---

(१) 'ज्येष्ठशेषागत' क० ख०

(२) 'भोजयेच्छ्राद्धम्' क०

(३) 'मूलाजपदकेषु च । भृगुभौमदिने' क०

तत्रैव-

वृश्चिके शुक्लपक्षे तु नवान्नं शस्यते बुधैः ।

अतः कृष्णपक्षे नेति गौडाः । मैथिलास्तु

अकृताग्रयणं चैव धान्यजातं नरोत्तम ।

इति वाराहोक्तेः प्रतिधान्यं श्राद्धमाहुः । तन्न, जातपदस्य श्राद्धयोग्यसमूहपरत्वात् । हेमाद्रौ जातूकर्ण्यः-

ग्रहो(१)परागे च सुते च जाते
पित्र्ये गयायामयनद्वये च ।
नित्यं च शङ्खे च तथैव पद्मे
दत्तं भवेन्निष्कसहस्रतुल्यम् ॥
शङ्खं प्राहुरमावास्यां क्षीणचन्द्रां द्विजोत्तमाः ।
अष्ट(२)कासु भवेत्पद्मं तत्र दत्तं तथाऽक्षयम् ॥

तत्रैव शङ्खः—

यदा विष्टिर्व्यतीपातो भानुवारस्तथैव च
पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् ॥

याज्ञवल्क्यः—

*अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः ॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ।
श्राद्धं प्रति रुचिश्चैव श्राद्धकालाः प्रकीर्तिताः ॥

च्छ्राद्धनिषे(३)धार्थः । *अमावास्येत्यादि । अष्टकाशब्दः कर्मनामधेयमपि तदधिकरणकालपरः, पूर्वोत्तरतिथ्योरुपलक्षणं च । एवञ्चामावास्याष्टकाकृष्णपक्षव्यतीपातगजच्छायानां मुख्यकालत्वं वृद्धिसंक्रान्तिद्रव्यादिसंपद्ग्रहणरुचीनां' निमित्तभूतानां तदुपलक्षणत्वेन । नन्वस्यां स्मृतौ न कालानालिङ्गितश्राद्धविधिः येन तद्विहितं

---

(१) 'एष श्लोको नास्ति क० छ०

(२) 'अष्टकात्तु' क०

(३) 'निषेधार्थम्' क० ख०

*कृष्णपक्षः सर्वोऽपि *'शाकेनाप्यपरपक्षं नातिक्रमेत् मासिमासि वाऽशनम्' इति(१)श्रुतेः *'ऊर्ध्वं वा चतुर्थ्या यदहः संपद्यते क्षते चतुर्दशीम्'इति कात्यायनोक्तेः, 'मासिमासि कार्यमपरपक्षस्यापराह्णः श्रेयान्'इत्यापस्तम्बोक्तेश्च वीप्सया (२)सर्वे कृष्णपक्षेषु नित्यम् । तेनोपसंहारान्महालयपरत्वं परास्तम् । *अत्र प्रत्यहं,

---

श्राद्धमनूद्यानेन कालसंबन्धो विधातुं शक्यते, स्वतन्त्रेष्ट्यादिविधिसत्त्वेन 'य इष्ट्या' इत्यादिवत् । अन्यथा 'सायं प्रातश्च जुहोति' इतिवत् सकृत्प्रयोगासंभवन्निवेशानेककालसमुच्चयवशादभ्यासमात्रा(३)पत्तिः । न च स्मृत्यन्तरगतांस्तत्तच्छ्राद्धविधीनपेक्ष्य तथा कार्यम्, तत्तत्कालविशिष्टानामेव तेषां तत्र विधानात् । विध्यनुवादयोरसत्त्वे च इतिकर्त्तव्यतानाकाङ्क्षणेनोत्तरत्र तद्विधानानुपपत्तिश्चेति चेत्? न, एते श्राद्धकाला इतिकालविशिष्टकर्मविधिः, एषु कालेषु श्राद्धं कुर्यादित्यर्थात् । विध्येकत्वेऽपि संख्यान्यायेन एककर्मासंभवन्निवेशनानाकालवशात्कालभेदेन श्राद्धभेदः, 'यद्दाग्नेयः'इत्यत्राग्नेयभेदवत् । वस्तुतस्त्वत्र वाक्यतन्त्रतामा(४)त्रम् , पर्यवसानतस्तु विधिभेदः निमित्तानामेकविध्यनुप्रवेशासम्भवात्तदंशे विधिभेदस्यावश्यकत्वात्तन्मिश्रतया कालानां तदौचित्यात् । तद्भेदे च विहितस्य विधानायोगात् प्रतिविधि श्राद्धानां भेद एव ।

अष्टकामावास्ये निर्णीते, वृद्धिश्राद्धनिमित्तानि निर्णेष्यन्ते, अत आह-*कृष्णपक्ष इति । *शाकेनापीति । वीप्सातः कृष्णपक्षस्य सर्वमासीयत्वं, तच्छ्राद्धस्य नित्यत्वं 'शाकेनापि' इत्युक्तेः । *ऊर्ध्वं वेति । अपरपक्षे श्राद्धं कुर्वीतेति प्रकृतं, ततश्च प्रतिपत्प्रभृति सर्वतिथिलाभः, ऊर्ध्वं वेतिपञ्चमीप्रभृति, यदहरिति वाकारोऽनुवर्त्तते । इत्थं च पक्षत्रयमाह—*अत्रेति ।

---

(१) 'इति स्मृतेः' छ०
(२) 'सर्वकृष्णपक्षेषु' क०
(३) 'मात्रापत्तेः' ङ०
(४) 'मात्र' ख०

दशम्यादिपक्षोऽप्यन्यत्र । एषां पक्षाणां शक्ताशक्तभेदेन व्यवस्था । एतच्च हेमाद्र्यनुसारेण । विवेचनकारास्तु कृष्णपक्षश्राद्धं सकृदेव न तु प्रतितिथि आवर्त्तते, 'वसन्तनिमित्तकज्योतिष्टोमवत्सकृत्कृते कृतः शास्त्रार्थः' इति न्यायात्,

आश्वयुक्शुक्लपक्षे तु श्राद्धं कार्यं दिने दिने ।

इतिवत् वीप्साया अश्रवणाच्च । "अथ सर्वेष्वेवापरपक्षस्याहःसु क्रियमाणे पितॄन् प्रीणाति कर्त्तुस्तु कालाभिनियमात्फलनियमः' इत्यापस्तम्बं सर्वतिथिषु श्राद्धं विदध्यात् । मैवम्, कृष्णपक्षे कस्यांचित्तिथौ श्राद्धे कृते पितृतृप्तिरविशिष्टा । यदि तु स्त्र्यपत्यादिफलार्थी तदा प्रतिपद्येव द्वितीयायामेवेति कालनियमाच्छ्राद्धमिति हरदत्तेन व्याख्यानात् । युक्तं चैतत्, कृष्णपक्षनिमित्तकश्राद्धाश्रिततत्तत्तिथिरूपगुणानां फलसम्बन्धविधाने कामनयाऽप्येकस्मिन्कृष्णपक्ष एकतिथावेव श्राद्धे गुणफलानुरोधेनाश्रयाना(१)वृत्तेः । ऊर्ध्वं(२)वेत्यादि तु सकृत्करणस्यैव द्योतकं, 'यदहः संपद्यते तदहर्ब्राह्मणानामन्त्र्य' इतिवचनान्तरैकवाक्यतया(३)कर्कादिव्याख्यानात् । 'यदहरुप(४)पद्यते' इति गोभिलीयं तु द्रव्यब्राह्मणसंपत्तिरित्येकवाक्यतया व्याख्यातमन्यैः । तथा च सामान्यतः सर्वकृष्णपक्षे चतुर्दशीभिन्नायां यस्यां कस्यांचित्तिथौ सकृच्छ्राद्धम्, तृप्तिविशेषकामनायां पञ्चम्यादिकस्याञ्चित्, ततोऽपि विशेषकामनायां दशम्यादिकस्याञ्चित्, ततो विशेषकामनायाममावास्यायां सकृदेव श्राद्धं कर्त्तव्यमिति पर्यवसन्नम् । महालये तु पञ्च पक्षा इति प्राहुः । मतद्वयेऽपि चतुर्दशी वर्ज्यैव,

नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने ।
नैव नन्दादि वर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ॥

इति कार्ष्णाजिनिना भाद्रापरपक्षे चतुर्दशीवर्जननिषेधा-

---

(१) 'अनावृते' ङ० (२) 'च' ङ० (३) 'कर्मादि' ङ० (४) 'उपपद्येत' ङ०

पञ्चम्यादि, यदहःसंपत्तिर्वा इति त्रयः पक्षाः। यदैकदिने श्राद्धं तदा दार्शं*पृथगेव, याज्ञवल्क्येनामावस्यायादन्यत्र तद्वर्जनावगमात्;

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः॥

इति मनुना दशम्यादिपक्षे चतुर्दश्या वर्जनोक्त्या प्रतिपदादिपञ्चम्यादिपक्षयोरपि तल्लाभाच्च। कृष्णपक्षे सामा(१)न्यवर्ज्यान्तरमपि नारदसंहितायाम्---

न नन्दासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु।
रेवत्यां च मघायां च कुर्यादापरपक्षिकम्॥

नन्दाः प्रतिपत्षष्ठ्येकादश्यः। त्रिजन्मनि आद्यदशमैकोनविंशनक्षत्राणि। गार्ग्योऽपि--

नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मसु।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्॥

वृद्धगार्ग्योऽपि--

प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा।
यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति॥ इति।

ए(२)वम्--

भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥

इति पिण्डदानपदं श्राद्धोपलक्षणम्, एकमूलकल्पनालाघवात्। एतद्धेमाद्रिमते सकृत्करणपक्षे, विवेचनकृन्मते सर्वपक्षेषु द्रष्टव्यम्। *पृथगेवेति। हेमाद्रिमते विवेचनकृन्मते च कृष्णपक्षश्राद्धाद्भिन्नमेवेत्यर्थः, प्रकारविकल्पस्य दूषणीयत्वात्। दर्शे कृष्णपक्षश्राद्धकरणे चाविरुद्धाङ्गत्वे दार्शेन सिद्धिः, न तु विरु(३)द्धा-

---

(१) 'सामान्ये' ङ। (२) 'एवंच' ङ। (३) 'विरुद्धाङ्गत्वे' ङ।

* पृथङ्निर्देशात् । एतेन 'कृष्णपक्षे यदहःसंपद्यते अमावास्यायां तु विशेषेण' इति निगमोक्तेर्गुणोऽपरपक्षश्राद्धस्यामावास्येति शूलपाणि(१)मत*मपास्तम् । *'अशक्तौ दर्शेनापि मासिश्राद्धसिद्धिः' इति नारायणवृत्तिः । *निरग्निकानां कस्मिंश्चिद्दिने । आहिताग्नेस्तु दर्श एव,

ङ्गकत्वे इति तु द्रष्टव्यम् । *पृथगिति । न चायनविषुवतोरिव प्राशस्त्यद्योतनार्थं तस्या पृथङ्निर्देशः, कृष्णपक्षादवयुत्यानुवादवशेन द्योतने अमावास्यान्वितश्राद्धकालांशेऽनुवा(२)दत्वम् , इतरभागे च विधित्वमिति वैरूप्यापत्तेः । न च पुनर्विधानादेव प्राशस्त्यं द्योत्यताम्, अप्रवृत्तप्रवर्त्तनात्मकविधानस्य पुनस्त्वासम्भवात् । अयनविषुवतोस्तु श्राद्धस्य विधानमेव सूर्यसंक्रमपदस्य गोबलीवर्दन्यायेन(३) (तदितरत्वात्तयोस्तदविधानात् । एवंविधवाचोभङ्ग्या सामान्यविधेः स्वविषयेतरविषयत्वरूपक्लेशवशादेवायन)विषुवतोः श्राद्धस्य सङ्क्रान्तर श्राद्धापेक्षयाऽऽवश्यकत्वसिद्धिः। न चामावास्याशब्दसमभिव्याहारात् कृष्णपक्षपदं तदन्यतिथिकूटपरमस्त्विति वाच्यम्, हेमाद्रिमते यदहःसम्पत्तिपक्षे विवेचनकृन्मते च कृष्णप(४)क्षपदेन सर्वासु तिथिषु श्राद्धविधानस्य निराकृतत्वात् । *अपास्तमिति । यद्यपि निगमवचने पृथग्विधानात्फलविशेषार्थिनः कृष्णपक्षश्राद्धेऽमावास्यारूपगुणविधिर्युक्त एव तथापि योगीश्वरवचने स न युज्यते; बहुवचनावगतपरस्परानपेक्षतन्त्रान्वयविघातवैरूप्यापत्तेरिति भावः । *अशक्ताविति । कृष्णपक्षश्राद्धाद्दार्शस्य भिन्नत्वादेवेदशङ्केतिग्रन्थसङ्गतिरित्यर्थः ! एतच्चाविरुद्धाङ्गकत्वे, विरुद्धा(५)ङ्गकत्वे त्वावृत्तिरिति तु बोध्यम् । *निरग्निकानामिति । कृष्णपक्षश्राद्धं प्रकृतम् । *न

---

(१) 'मतमप्य' ख० । (२) 'अनुवादकत्वम्' ख० ।
(३) 'धनुश्चिन्हान्तर्गतो ग्रन्थो नास्ति' ख० । (४) 'पक्ष' नास्ति ङ ।
(५) 'विरुद्धाङ्गकत्वे' नास्ति ख० ।

*न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः ।

इति मनूक्तेः । *सर्वकृष्णपक्षाशक्तौ मात्स्ये—

*अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ।
कन्याकुम्भवृषस्थेऽर्के कृष्णपक्षे च सर्वदा ॥

कर्कोपि-'आहिताग्नेः संवत्सरे त्रिःश्राद्धनियमः' इति । देवलः-

*अनेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् ।
द्विश्चतुर्वा यथा श्राद्धं मासेमासे दिनेदिने ॥

कृष्णपक्षेष्वपि महालयस्य श्रेष्ठत्वम् । तच्चोक्तं प्राक् । व्यतीपाते विशेषमाह हेमाद्रौ शङ्खः—

फलं (१)लक्षं समुत्पत्तौ भ्रमणे कोटिरुच्यते ।

दर्शेनेति । व्याख्यातम् । *सर्वकृष्णपक्षाशक्ताविति । सर्वामावास्याऽशक्तावित्यर्थः । *अनेनेति । पादत्रयेण दर्शश्राद्धस्य त्रिरात्राद्यनुकल्पं विधाय चतुर्थपादेन कृष्णपक्षश्राद्धस्य सर्वदा कर्त्तव्यत्वाभिधानात् । ऋतुसंवत्सराभिप्रायेण मासचतुष्टयात्मका ऋतवः । हेमन्तप्रयुक्तं कुम्भस्थार्केऽमावास्यायाम्, ग्रीष्मप्रयुक्तं वृषार्के तस्याम्, वर्षाप्रयुक्तं कन्यार्के तस्यामिति ।

अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्वपेत् ।
हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञियमन्वहम् ॥

इत्यमावास्याश्राद्धमुपक्रम्य मनूक्तेश्च, मात्स्यपादत्रयस्य कृष्णपक्षपरत्वाभावप्रतीतेश्च । ततश्चामावास्याश्राद्धकृष्णपक्षश्राद्धयोर्द्वयोरपि नैमित्तिकत्वेऽपि कृष्णपक्षश्राद्धाकरणहेतुकप्रत्यवायपरिहारस्यामावास्याया अपि तत्कालत्वेन तत्र श्राद्धानुष्ठानेन सिद्धिः । अमावास्याश्राद्धाकरणहेतुकप्रत्यवायपरिहारस्य च त्रिःश्राद्धकरणेनापि सिद्धिः । त्रिः करणं च चतुः करणाशक्तौ । त्रिः करणाशक्तौ तु द्विः करणम् । तदशक्तौ सकृत्करणमित्याह—*अनेनेति ।

---

(१) 'लक्षममुत्पत्तौ' क० ख० छ० ।

पतने शतकोट्यस्तु पाते वै दत्तमक्षयम् ॥

ज्योतिःशास्त्रे—

द्वाविंशतिस्तथोत्पत्तौ श्रमणे चैकविंशतिः ।
पतने दश नाड्यस्तु पतिते सप्त नाडिकाः ॥

अ(१)न्त्यौ च द्वौ व्यतीपातौ प्रागुक्तौ । हेमाद्रौ मार्कण्डेयः—

*यदा च श्रोत्रियोऽभ्येति गृहं वेद(२)विदग्निचित् ।
तेनैकेनापि कर्तव्यं श्राद्धं च विषु(३)वच्छुभे ॥

पार्वणश्राद्धमभिधायैतद्वचनोक्त्या अमावास्याश्राद्धानुकल्पत्वम् । एवं संवत्सरप्रक्रमात्तस्य 'मासे मासे' इत्यत्र 'दिने दिने' इत्यत्र वाऽन्वयः । 'मासे मासे' इत्यनेन मासानुमासिकमित्युक्तेरमावास्याश्राद्धं वा, 'मासि मासि चैवम्' इत्युक्तेरपरपक्षश्राद्धं वा गृह्यते । 'दिने दिने' इत्यनेन त्वहरहः श्राद्धम्; 'मासे मासे' 'दिने दिने' इति वीप्साश्रुत्या प्रत्यहमपरपक्षश्राद्धमिति व्याख्यानस्य भ्रममूलकत्वात् । विवेचनमते तस्य सकृत्त्वात् । हेमाद्रिमतेऽपि 'अनेन' इति सर्वनाम्नः प्रक्रान्तपरामर्शित्वं न तु प्रक्रम्यमाणपरामर्शित्वमिति । एवं साग्निकस्य पार्वणासम्भवे पिण्डपितृयज्ञपिण्डदानमात्रेणैव तत्सिद्धिः । निरग्निकस्य तु ब्राह्मणभोजनमात्रमुक्तं निगमे—"आहिताग्नेः पित्रर्चनपिण्डैरेव, निरग्नेः पू(४)र्णमन्नदानम्" इत्यादि ।

द्रव्यं पायसादि ।

ब्राह्मणमाह—*यदा चेति । इ(५)दं वक्ष्यमाणब्राह्मणोपलक्षणम् । सम्पत्ती इति द्विवचनान्तपाठ इति केचित् । 'द्रव्यब्राह्मणयोः सम्पत्तिर्यत्र काले' इति एकवचनान्तः पाठ इति माधवादयः । द्रव्यमित्यसमस्तमिति मिताक्षरा ।

---

(१) 'अन्यौ' क० । (२) 'वेदविदग्निवित्' ख० ।
(३) 'विधिवच्छुभम्' क० ।
(४) 'पूर्वम्' ख० । (५) 'इदं च' ङ० ।

इदं चापिण्डं कार्यमिति हेमाद्रिः। एतज्जीवत्पितृकोपि कुर्यात्,

उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे।
तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः॥

इति मैत्रायणीयपरिशिष्टोक्तेः।

तिथिविशेषे फलविशेषो याज्ञवल्क्येनोक्तः—

*कन्यां *कन्यावेदिनश्च पशून्वै सत्सुतानपि।
*द्यूतं कृषिं च वाणिज्यं द्विशफैकशफांस्तथा॥
ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरौप्ये स *कुप्यके।
ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा॥
प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम्।

एताः कृष्णपक्षस्था एव। महालये तु फलभूमेति पृथ्वी(१)चन्द्रोदयः। पौर्णमास्यां हेमाद्रौ पितामहः-

(ग(२)जच्छायाभोजने प्रायश्चित्तं मुक्तावल्यां ब्राह्मे-

सूतके मृतके चैव ग्रस्तयोश्चन्द्रसूर्ययोः॥
छायायां कुञ्जरस्याथ भुक्त्वा च नरकं व्रजेत्॥
भुक्त्वा प्रमादाद्विप्रस्तु सम्यक् चान्द्रायणं चरेत्॥ इति।)

श्राद्धकाल इति न परिसंख्या, श्राद्धानुवादेन कालान्तरस्यापि विधानात्।

*कन्यामिति। *कन्यावेदिनः जामातरः। *द्यूतं तत्र विजयः। *कुप्यं ताम्रादि। अत्र च कृष्णपक्षश्राद्धं नाश्रयः, तदनुपक्रमात्। अतोऽनेन प्रतिपदादिश्राद्धानि तत्तत्फलार्थितया तत्तत्तिथिषु विशिष्टविधिरूपेण विधीयन्ते। तानि च परस्परं कृष्णपक्षनिमित्ताच्छ्राद्धाद्भिद्यन्ते इति एकस्मिन्नपि कृष्णपक्षे यावत्कामं तेषामनुष्ठानम्। समानप्रकारकत्वे च येनकेनापि प्रसङ्गान्नित्यस्य सिद्धिः

---

(१) 'पृथ्वीचन्द्रः' क०। (२) कंसान्तर्गतं नास्ति घ०।

अमावास्याव्यतीपातपौर्णमास्यष्टकासु च ।
विद्वान्श्राद्धमकुर्वाणो नरकं प्रतिपद्यते ॥

एतन्माघ्यादिपरम्,

व्रीहिपाके च कर्तव्यं यवपाके च पार्थिव ।
पौर्णमासी तथा माघी श्रावणी च नृपोत्तम ॥
प्रौष्ठपद्यामतीतायां तथा कृ(१)ष्ण(२)त्रयोदशी ।
एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥

इति विष्णुधर्मोक्तेः । विष्णुः—'माघी प्रौष्ठपद्यूर्ध्वं कृष्णा त्रयोदशी' इति । अत्र माघी पौर्णमासीति कल्पतरुः । 'श्रावण्यूर्ध्वमपि मघायोगसम्भवात्त्रयोदशीविशेषणम्' इति गौडाः । नक्षत्रेष्वपि याज्ञवल्क्यः—

स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा ।
पुत्राञ्श्रैष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभम् ॥
*प्रवृत्तचक्रतां चापि वाणिज्यप्रभृतीनपि ।
अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥
धनं वेदान्भिषक्सिद्धिं कुप्यं गामप्यजाविकम् ।
अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ॥
कृत्तिकादिभरण्यन्तं स कामान्प्राप्नुयादिमान् ।

फलान्तराण्यपि महाभारतकौर्मादिज्ञेयानि । माधवीये मरीचिः—

कृत्तिकादिषु ऋक्षेषु श्राद्धे यत्फलमीरितम् ।
विष्कम्भादिषु योगेषु तदेव फलमिष्यते ॥

बृहस्पतिः—

आरोग्यं चैव सौभाग्यं शत्रूणां च प(३)राजितम् ।
सर्वान्कामान्प्रियां विद्यां धनमायुर्यथाक्रमम् ॥

---

(१) 'कृष्ण।' क० । (२) 'चतुर्दशी' ख० ।
(३) 'पराजयम्' क० ख० छ० ।

सूर्यादिदिवसेऽप्येतच्छ्राद्धकृल्लभते फलम् ।
बवादिकरणेऽप्येतच्छ्राद्धकृल्लभते फलम् ।

अन्यानि च षण्णवतिश्राद्धादीनि प्रागुक्तानि । मार्कण्डेयपुराणे—

श्राद्धार्हद्रव्यसंपत्तौ तथा दुःस्वप्नदर्शने ।
जन्मर्क्षे ग्रहपीडासु श्राद्धं कुर्वीत चेच्छया ।

अथ श्राद्धाधिकारिणः । चन्द्रिकायां सुमन्तुः—

*मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः ।
पैतृमेधिकसंस्कारं मन्त्रपूर्वक*मादृ(१)तः ॥

तत्रैव हेमाद्रौ शङ्खः—

पितुः पुत्रेण कर्तव्या पिण्डदानोदकक्रिया ।
पुत्राभावे तु पत्नी स्यात्तदभावे तु सोदरः ॥

अत्र यद्यपि पुत्रपदं क्षेत्रजादिद्वादशविधपुत्रपरम् । ते च द्वादश पुत्रा याज्ञवल्क्येनोक्ताः—

औरसो*धर्मपत्नीज* स्तत्समः पुत्रिकासुतः ।

---

*प्रवृत्तचक्रता । आज्ञाया अप्रतिघातः । *मातुरिति । यद्यपि पितृमेधः सपिण्डनान्तः तथापि प्रत्याब्दिकादेरप्यत्र प्रवेश अग्रिमवृद्धमन्वादिवचनात् । *आदित इति । पुत्रतदन्यसम वाये पुत्रस्यैवाधिकारार्थम् । 'आदृतः' इति पाठे श्राद्धबीजभूत श्रद्धा बोध्या । 'औरसः' इत्येकत्वं कर्तृत्वेना(२)धिकारे, फल स्वाम्यरूपस्य तस्य अविभक्तानां स्वत एव विभक्तानां च स्वां (३)शप्रदानादिना वक्तव्यत्वात् । पतितादेस्तु नाधिकारः, स्मृत न्तरे निषेधात् ।

*धर्मपत्नी धर्म्यविवाहोढा सवर्णैव,

---

(१) 'आदित.' इति पाठोऽपि दृश्यते ।
(२) 'नाधिकारे' नास्ति घ० ङ० । (३) 'स्वस्यांश' ङ० ।

संस्कृतायां सवर्णायां स्वयमुत्पादयेत्सुतम्।
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम्॥

इति मनूक्तेः। वाजपेयिनस्तु, सवर्णापदं द्विजानां द्विजाजातस्यौरसाभिप्रायम्,

पुत्राः कुर्वन्ति विप्राय क्षत्रविट्शूद्रयोनयः॥

इति ब्राह्मे क्षत्रियावैश्यापुत्रयोः क्रियाकर्तृत्वोक्तेः। शूद्रापुत्रस्य द्वादशविधपुत्राभावेऽधिकारः, यत्र क्वचनोत्पादितस्य विष्णुनाऽधिकारोक्तेः। तथाच धर्मपत्नी द्विजानां द्विजैव। शूद्राणां तु मुख्यपत्न्यभावे तुल्या परिणीतैवेत्याहुः। (औ(१)रसबहुत्वे जेष्ठनाशे कनिष्ठः। तदसन्निधौ तु स एकादशाहान्तौर्ध्वदेहिकेऽधिकारी, मासिकसपिण्डनयोस्तु जेष्ठ एवेत्यग्रे स्फुटम्।)

*तत्सम इति। तत्र पुत्रिकैव सुत इत्येकः, तथाच मनुः--

अकृता वा कृता वाऽपि यं विन्देत्सदृशात्सुतम्।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्॥ इति।

अकृता पुत्रिकात्वेन। पुत्रिकायाः सुत इत्यपरः, स च

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम्।
अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति॥

इति वसिष्ठोक्तेः। अयं च संविदसत्त्वे मातामहस्यैव पुत्रः। तत्सत्त्वे बीजिनोपि,

कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः।
उभयोर(२)थ सम्बद्धः स कुर्यादुभयोरपि॥

इति यमोक्तेः। संवित्तु वसिष्ठेनोक्ता--

अपुत्रोहं प्रदास्यामि तुभ्यं कन्यां भवानपि।
पुत्रार्थी चेदिहोत्पन्नः स नौ पुत्रो भवेदिति॥

---

(१) धनुश्चिन्हान्तर्गतं नास्ति घ०।
(२) 'अपि' ङ०।

*क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥
*गृ(१)हे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः ।
*कानीनः कन्यकाजातो मातामहसुतः स्मृतः ॥

---

*क्षेत्रज इति । वाग्दत्तविधवायाम्

'यस्या म्रियेत कन्यायाः' 'अपुत्रां गुर्वनुज्ञातः' इति वचनाद्देवरादिजः,

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य च ।
स्वधर्मेण नियुक्तायां स ज्ञेयः क्षेत्रजः सुतः ॥

इति मनुना पुत्रोत्पादनासमर्थस्य जीवतोऽपि पत्युः क्षेत्रे तन्नियोगेन सवर्णाज्जातोऽपि क्षेत्रज उक्तः । अयं च क्षेत्रिणः,

अनेन विधिना जातः क्षेत्रजोऽस्य भवेत्सुतः ।

इत्युक्तेः । बीजिनोऽपि पुत्रेच्छा चेत् ,

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

इति याज्ञवल्क्योक्तेः । *गृहे इति । सवर्णजत्वनिश्चयेऽपि पुरुषविशेषजत्वेनानिश्चितः भर्तृगृहे सवर्णादुत्पन्न इत्यर्थः । अयं च क्षेत्रिण एव,

उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥

इति मनूक्तेः । *कानीन इति । सवर्णादपरिणीताया त्पन्नः । स च—

अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः ।
पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम् ॥

इति मातामहस्य सुत उक्तः । मनुना च—

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥

---

(१) 'गृहम' क० ।

*अक्षतायां क्षतायां वा जातः पौनर्भवस्तथा ।
*दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥
*क्रीतश्च ताभ्यां विक्रीतः *कृत्रिमः स्यात्स्वयंकृतः ।

इति परिणेतुः । एवञ्च तयोर्मध्ये यस्यापुत्रता तस्यैव । उभयोरपि तथात्वे उभयोरपीति । *अक्षतायामिति । पत्या भुक्तायामभुक्तायां वा जीवता तेन त्यक्तायां, विधवायां वा सवर्णाज्जातः,

या तु पत्या परित्यक्ता विधवा स्वेच्छयाऽथ वा ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥

इति विष्णूक्तेः । स च बीजिन एव, परित्यागेन मरणेन वा क्षेत्रे भर्त्तुः स्वत्वाभावात, स्वेच्छापदाच्च । *दद्यादिति । मातापितृभ्यामन्यतराभावेऽन्यतरेण वाऽत्यन्तदुर्गत्या भरणासामर्थ्येन विधिपूर्वकं दत्तः प्रतिग्रहीतृसवर्णः प्रतिग्रहीतुरेव । प्रपञ्चितं चेदं प्राक् प्रपञ्चयिष्ये च । अत्र होमान्यः ग्रहणापादनप्रतिग्रहीतृगोचरः सर्वोऽपि नियमः क्रीतकृत्रिमापविद्धस्वयंदत्तेष्वपि यथासम्भवमावश्यकः, अदृष्टार्थत्वात् 'तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः' इति वासिष्ठे क्रयत्यागयोरुपादानात् । स्वयंदत्ते तु होमोऽपि, प्रतिग्रहसत्त्वात् । *क्रीत इति ।

क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि च ॥

इति मनूक्तमसादृश्यं तु गुणैरेव,

सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ॥

इत्युपसंहारात् । कानीनगूढोत्पन्नसहोढजपौनर्भवानां कुण्डगोलकत्वेऽपि साजात्यं जनकद्वारा । *कृत्रिम इति । मातापितृहीनः प्रौढः धनादिप्रलोभनेन स्वयं पुत्रार्थिना पुत्रीकृतः,

सदृशं यं प्रकुर्वीत गुणदोषविचक्षणम् ।

*दत्ता(१)त्मा तु स्वयं दत्तो *(२)गर्भे विन्नः सहोढजः ॥
*उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः ।
*पिण्डदोंशहरश्चैषां पूर्वाभावे परः परः ॥ इति ।

तथापि—

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ।

इति हेमाद्रावा(३)दित्यपुराणे कलावितरेषां पुत्रत्वनिषेधादौरसदत्तकपरमेव ।

पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥

इति मनूक्तेः । प्रकुर्वीतेत्युपादानान्मातृपितृहीनतादिलाभः । *दत्तात्मेति । मातापितृभ्यां हीनस्त्यक्तो वा तवाहं पुत्रोस्मीति स्वमात्मानं दत्तवान् पूर्ववद् गृहीतः,

मातापितृभ्यां हीनो वा त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्तु स्वयंदत्तस्तु स स्मृतः ॥

इति मनूक्तेः । *गर्भ इति । सवर्णात्सम्भूतो गर्भिण्यां परिणीतायां गर्भस्थितया स्वीकृतः पश्चादुत्पन्नो वोढुः पुत्रः,

या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती ।
वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥

इति मनूक्तेः । *उत्सृष्ट इति । मातापितृभ्यां तदन्यतरेण वा दोषाभावेऽपि भरणासामर्थ्येन, मूलजातत्वादिना वा त्यक्तो ज्ञातपित्रादिः सवर्णः पुत्रत्वेन गृहीतः,

मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं प्रतिगृह्णीयादपविद्धस्तु स स्मृतः ॥

इति मनूक्तेः । *पिण्डद इति । अभावोऽसन्निधानं नाशश्च । तत्र पिण्डदाने आद्यः, अंशहरणे द्वितीयः ।

---

(१) 'दत्तान्मातुः' ग० । (२) 'गर्भे वित्तः' क० । (३) 'आदिपुराणे'

यद्यपि—

पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ।

इति याज्ञवल्क्योक्तेरौरसाभावे दत्तकप्राप्तिः, तथाप्यौरसाभावे पौत्रः तदभावे प्रपौत्रः तदभावे दत्तकादयः इति ज्ञेयम्,

पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ॥

इति जीमूतवाहनधृतवसिष्ठहारीतशङ्खलिखितोक्तेः,

लोकानन्त्यं दिवः प्राप्तिं पुत्रपौत्रप्रपौत्रकैः ।

इति याज्ञवल्क्योक्तेश्च ।

*पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव च ।
पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ॥
भगिनी भागिनेयश्च सपिण्डः सोदकस्तथा ।
असंनिधाने पूर्वेषामुत्तरे पिण्डदाः स्मृताः ॥

इति स्मृतिसंग्रहे प्रपौत्रानन्तरं पुत्रिकापुत्रोक्तेस्तत्समत्वाच्च*दत्तकस्य । यद्यपि बृहस्पतिना—

यद्यपि—

औरसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च ।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥
पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा ।
स्वयं चोपगतः पुत्रा द्वादशैते प्रकीर्तिताः ॥

इति नारदीयः पाठक्रमः, तथाऽपि परिगणनमात्रेण कल्प्यक्रममपेक्ष्य 'एषां पूर्वाभावे परः परः' इति प्रत्यक्षतो विहितक्रम एव ग्राह्यः ।

---

*पुत्र इति । एकवचनमौरसाभिप्रायम् *दत्तकस्येति ।

पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ।
रिक्थे च पिण्डदाने च स(१)मौ तौ परिकीर्तितौ॥

इति पौत्रसाम्यमुक्तम्। याज्ञवल्क्येन च—

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।

इति*औरससाम्यम्, तथापि 'लोके राजसमो मन्त्री' इत्यादौ किंचिन्न्यूनं समशब्दप्रयोगात्, गौणमुख्ययोः साम्यायोगाच्च*स्तुत्यर्थं तत् न तु समविकल्प इति भ्रमितव्यम्,

*पुत्रः पौत्रः प्रपौत्रो वा भ्राता वा भ्रातृसंततिः।
(सपि(२)ण्डसंततिर्वापि क्रियार्हा नृप जायते॥
तेषामभावे सर्वेषां समानोदकसन्ततिः।)
मातृपक्षसपिण्डेन संबन्धो यो जलेन वा॥

अत औरसानन्तरं न दत्तक इति भावः। *औरससाम्यमिति। तथा च पुत्रिकासुतेऽपि "दत्तौरसेतरेषाम्'इति कालनिषेधो न प्रवर्त्तते इत्याशयः। *स्तुत्यर्थमिति।

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः।
सवर्णा असवर्णाश्च ग्रासाच्छादनभाजनाः॥

इति कात्यायनेन क्षेत्रजक्रीतकृत्रिमस्वयंदत्तापविद्धेषु सावर्ण्येन, कानीनगूढोत्पन्नसहोढपौनर्भवेष्वसावर्ण्येन च निमित्तेन व्यवस्थाकरणात्सावर्ण्यनिमित्तकचतुर्थांशहारित्ववारणाय साम्योपादानम्;

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तस्य विभागः स्याज्ज्येष्ठता नास्ति हि स्त्रियाः॥

इति मनूक्तेरिति च द्रष्टव्यम्। एवञ्च पुत्रिकासुतेऽपि प्रोक्तकलिनिषेधः प्रवर्त्तत एवेति भावः। *पुत्र इति। 'गौणमुख्य

---

(१) 'समानौ' ख०। (२) धनुश्चिह्नान्तर्गतं नास्ति ख०

कुलद्वयेऽपि चोच्छिन्ने स्त्रीभिः कार्या क्रिया नृप।
*तत्संघातगतैर्वापि तद्रिक्थात्कारयेन्नृपः॥

इति विष्णुपुराणाच्चेति। प्रपौत्रानन्तरं दत्तकादय इति पृथ्वीचन्द्रमदनरत्नकालादर्शादयः। मदनपारिजातेऽप्येवम्।

*बोपदेवरुद्रधरादयस्तु—

*पुत्रेषु विद्यमानेषु नान्यो वै कारयेत्स्वधाम्।

इति सुमन्तूक्तौ—

पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति।
पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम्॥
नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः॥

इति छन्दोगपरिशिष्टे च पुत्रशब्दस्य द्वादशविधसुतपरत्वात्, *'पूर्वाभावे परः परः' इत्यस्यानन्यपरत्वाच्च, दत्तकाद्यभावे पौत्रादीना(१)मधिकार इत्याहुः, तद्गौणमुख्ययोः साम्यायोगाद्दत्तके सति पौत्रस्यांशहरत्वस्याप्यभावापत्तेः पुत्रपदस्यौरसमात्रपरत्वाच्चिन्त्यम्। अत एव निषेधादुपनीतपौत्रसत्त्वेऽप्यनुपनीतपुत्रस्यैवाधिकारः औरसश्चानुपनीतोपि कुर्यात्' इत्याह। पृथ्वीचन्द्रोदये

योर्मुख्ये कार्यसंप्रत्ययः' इति न्यायेन मुख्यपरम्, बद्धक्रमप्रपौत्रान्ते च दत्तक इति भावः। *तत्सङ्घातगतैः एकसार्थान्तर्गतैः।

सिद्धान्तमाह-*बोपदेवेत्यादिना। *पुत्रेष्विति। पुत्रपदं च नौरसमात्राभिप्रायकम्, तद्वाक्यवैयर्थ्यप्रसङ्गात्। (त(२)था च गौणमुख्यन्यायो नेह प्रवर्तते इति भावः।) ननु गौणमुख्ययोरसमत्वात्पौत्रानन्तर्यं दुर्वारमित्यत आह-*पूर्वाभावे इति। प्रोक्तस्मृतिसंग्रहवचने प्रोक्तविष्णुपुराणवचने च पुत्रपदं पुत्रत्वेन गौण-

---

(१) 'नामप्य' ग०। (२) धनुश्चिन्हान्तर्गतं नास्ति ख० ङ०

सुमन्तुः--

श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः ।
*व्रतस्थो वाऽव्रतस्थो वा एक एव भवेद्यदि ॥

वृद्धमनुः--

कुर्यादनुपनीतोपि श्राद्धमेको हि यः सुतः ।
*पितृयज्ञाहुतिं पाणौ जुहुयाद्ब्राह्मणस्य सः ॥

*एको मुख्य औरस इत्यर्थः ।

मनुः--

नह्यस्मिन्युज्यते कर्म किंचिदामौञ्जिबन्धनात् ।
नाभिव्याहारयेद्ब्रह्म स्वधानिनयादृते ॥

ब्रह्म वेदः । सुमन्तुरपि —

नाभिव्याहारयेद्ब्रह्म यावन्मौञ्जी नि(१)बध्यते ।
मन्त्राननुपनीतोपि पठेदेवैक औरसः ॥

सङ्ग्राहकम्, पुत्रग्रहणेन तेषामग्रहणे दत्तकादेः पुत्रत्वोक्तेर्निष्प्रयोजनकत्वप्रसङ्गात् । एकवचनं च जात्यभिप्रायकम्, स्मृतिसङ्ग्रहवचने पुत्रिकापुत्रपदं दौहित्रपरमिति न तद्विरोधः । न चैवं दत्तके सति पौत्रस्यांशहर्तृत्वमपि न स्यात्, सावर्ण्यनिबन्धनचतुर्थांशहारित्वस्यानुज्ञानात् । न च 'पुत्राभावे तु पत्नी स्यात्' इति वचनात् पत्न्येवाधिकारिणी स्यात् । तस्या योगीश्वरोक्तक्रमबद्धद्वादशविधपुत्रोत्तरं प्राप्त्यौरसपुत्रपत्न्योः क्रमे बाधिते 'सकृत्प्रवृत्तायाः किमवगुण्ठनेन' इति न्यायात् 'पुत्रः पौत्रः प्रपौत्रो वा' इति बद्धक्रमयोः पौत्रप्रपौत्रयोर्गौणमुख्यपुत्रोत्तरं पत्न्याश्च प्राङ्निवेशः । *व्रतस्थ इति दृष्टान्तः । *पितृयज्ञाहुतिमिति । प्रत्याब्दिकादिष्ववश्यकर्त्तव्येष्वनुपनीतस्याधिकारसूचकम् । नन्वेक एवेत्यस्याद्वितीय एवेति नार्थः, सद्वितीयस्य श्राद्धानाधिकारप्रसङ्गात् ।

---

(१) 'न बध्यते' क० ।

अयं मन्त्रपाठ*स्त्रिवर्षकृतचूडस्यैव,

अ(१)नुपेतोऽपि कुर्वीत मन्त्रवत् पैतृ(२)मेधिकम् ।
यद्यसौ कृतचूडः स्याद्यदि स्याच्च त्रिवत्सरः ॥

इति सुमन्तूक्तेः । यत्तु व्याघ्रः—

कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च ।
स्वधाकारं प्रयुञ्जीत वेदोच्चारं न कारयेत् ॥ इति;

यच्च स्मृतिसङ्ग्रहे—

कृतचूडोऽनुपेतश्च पित्रोः श्राद्धं समाचरेत् ।
उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसौ ॥ इति;

तत्प्रथमवर्षचूडाविषयमिति माधवमदनरत्नपृथ्वीचन्द्राः । *त्रि(३)वर्षोर्ध्वं मन्त्रवत्त्वस्य विकल्प इति चन्द्रिका बोपदेवश्च । दत्तकादिपरो निषेध इति वयम् ।

मदनरत्ने स्कान्दे—

*यज्ञेषु मन्त्रवत्कर्म पत्नी कुर्याद्यथा नृप ।
तथौर्ध्वदैहिकं कर्म कुर्यात्सा धर्मसंस्कृता ॥

एवकारवैयर्थ्याच्च; इत्यत आह-*एको मुख्य इति । *त्रिवर्षेति प्रथमादिवर्षस्य, कृतचूडेति अकृतचूडत्रिवर्षस्य व्यावृत्तिः । न च-'यदि च स्यात्त्रिवत्सरः' इति पृथगुक्तेर्वर्षत्रयात् पूर्वमपि कृतचूडस्य मन्त्रवदाधिकारः स्यात्, विधेयकर्तृविशेषणद्वयस्यापि विवक्षितत्वात् । *त्रिवर्षोर्ध्वमिति । (४)व्यवस्थानादरादस्वरसः ।

*यज्ञेष्विति । त्रिवर्षकृतचूडस्यापि पत्नीवत्कृत्स्ने समन्त्रौर्ध्व-

---

(१) 'अनुपनीतः' ख० । (२) 'पितृमेधिकम्' ख० ।
(३) 'त्रिवर्षोर्ध्वं' नास्ति क० ।
(४) श्रुतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ ।
स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् पृथक् ॥
इति वचनादिति भावः ।

अशक्तौ तु कात्यायनः—

असंस्कृतेन पत्न्या च ह्यग्निदानं *समन्त्रकम् ।
कर्तव्यामितरत्सर्वं कारयेदन्यमेव हि ॥

पुत्रश्च न जन्मतोऽधिकारी किंतु वर्षोत्तरमित्याह कालादर्शः—

चौलादाद्याब्दिकादर्वाक् न कुर्यात्पैतृमेधिकम् ।

मदनरत्ने सुमन्तुरपि—

*पुत्रश्चोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात् ।
पितरं*नाब्दिकाच्चौलात्पैतृमेधेन कर्मणा ॥

एतच्चौरसस्यैव । दत्तकादीनां तूपनीतानामेवाधिकार इति कालादर्शः । पृथ्वीचन्द्रोदयेऽपि स्कान्दे—

पित्रोरनुपनीतोऽपि विदध्यादौरसः सुतः ।
और्ध्वदेहिकमन्ये तु संस्कृताः श्राद्धकारिणः ॥ इति ।

अन्यत्रापि दर्शमहालयादावनुपनीतस्याधिकारोऽस्मा-

देहिकेऽधिकारः । तदुभयस्य वा शक्तौ समन्त्रकाग्निदानमात्रस्य वक्तव्यत्वादित्येकं मतम्, 'पत्न्या एव शक्तौ सर्वं समन्त्रमौर्ध्वदेहिकम् । अशक्तायास्तस्याः प्रथमवर्षकृतचूडस्यापि चाग्निदानमात्रं समन्त्रम्, अन्यत्त्वमन्त्रं कारयेत्' इत्यस्य मन्त्रपाठमात्रपरत्वेनौर्ध्वदेहिके तस्याधिकारात् । *समन्त्रकम् इत्यन्त एकश्छेदः । सर्वमित्यन्तोऽपरः । एवञ्च 'कारयेत्' इत्यस्य मन्त्रपाठपरतेत्यप मतम् । यत्तु ताभ्यामग्निदानमात्रं कर्त्तव्यं अन्यत्सर्वमन्येनेत्यप इति, तन्न युक्तम्; 'यज्ञेषु' इति वचनेन पत्न्याः,

कुर्यादनुपनीतोऽपि श्राद्धमेको हि यः सुतः ।

इत्यनेनानुपनीतस्य चाधिकारात् । *पुत्रश्चेति । ऋणमोचनस्य हेतुत्वम्, 'अध्ययनतो वसति' इतिवत् । *नाब्दिकादिति । आ आब्दिकादिति च्छेदः । प्रथमवर्षीयचौलाद्विनेति तदर्थः

भिः पूर्वमुक्तः । *प्रपौत्राभावे दत्तकादय एकादश पुत्राः तदभावे भर्तुः पत्नी, तस्याश्च सः,

*अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं *कृत्स्नमंशं लभेत च ॥

---

*प्रपौत्राभावे इति । प्रथममते । *अपुत्रेति । वस्तुतस्तु——

अपुत्रे संस्थिते कर्त्ता नास्ति चेच्छ्राद्धकर्मणि ।
तत्र पत्न्यपि कुर्वीत सापिण्ड्यं पार्वणं तथा ॥

इति मनुना कर्त्ता नास्ति चेदित्युक्तेः और्ध्वदेहिके दर्शश्राद्धे च पौत्रप्रपौत्रयोरसत्त्वे पत्न्या अधिकारः । प्रथममते तु अपुत्रत्वम् औरसपुत्रराहित्यं, कर्तृराहित्यं गौणपुत्रान्तरराहित्यम्, द्वितीयमते अपुत्रत्वं मुख्यगौणपुत्रराहित्यम्, कर्तृराहित्यं च प्रपौत्रान्तरराहित्यं ब्राह्मणवसिष्ठन्यायादिति बोध्यम् । *कृत्स्नमिति । योगीश्वरेण द्वादशविधपुत्राभावे——

पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुता गोत्रजा बन्धुशिष्यसब्रह्मचारिणः ॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः ।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः ॥

इति धनहारिक्रम उक्तः । अत्र विज्ञानेश्वरः विभक्तासंसृष्टिनि अपुत्रे मृते तद्धनं सर्वं परिणीता संयता स्त्री गृह्णीयात्, 'शयनं भर्त्तुः' इत्यादिवचनात् । अविभक्ते संसृष्टे वा तादृशे मृते भ्रातैव;

भ्रातृणामप्रजाः प्रेयात् काश्चिच्चेत्प्रव्रजेत वा ।
विभजेरन् धनं तस्य शेषास्ते स्त्रीधनं विना ॥
भरणं चास्य कुर्वीरन् स्त्रीणामाजीवनक्षयात् ।
रक्षन्ति भर्त्तुःशय्यां चेदाच्छिन्द्युरितरासु च ॥

इति नारदस्मरणात् । संसृष्टश्च पित्रादिभिरेव,

विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः ।

पितृव्येणाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥

इति बृहस्पतिवचनात् । पारिजातादौ तु विभक्तस्य पुत्रपौत्ररहितस्य सवर्णा असवर्णा वा पत्न्यः यथांशं विभज्य धनं (१)गृह्णीयुरित्युक्तम् । तदभावे दुहिता(२)तत्राप्यूढानूढासमवायेऽनूढा, 'स्त्रीधनं दुहितॄणामप्र(३)त्तानामप्रतिष्ठितानां च' इति स्त्रीधनविषयकगौतमवचनस्य पितृधनेऽपि तुल्यत्वात् । ऊढास्वपि दरिद्रा, तदभावे तु सम्पन्ना । तदभावे दौहित्रः चकारात्,

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः ।

इति वचनाच्च । तदभावे पितरौ "पिता मात्रा" (पा० सू० १-२-७०) इत्येकशेषेण (४)क्रमाप्रत्ययेऽपि अभ्यर्हितत्वेन मातुःपूर्वनिपातात् असवर्णासुतेषु पितुः साधारण्यादसाधारण्याच्च प्रथमं माता, ततः पिता, तदभावे भ्रातरः । तत्रापि प्रथमं सोदराः, एकमातृकत्वेन सन्निकर्षात् ;

अनन्तरः सपिण्डाद्यस्तस्य तस्य धनं हरेत् ॥

इति स्मृत्या सन्निकर्षविशेषस्य नियामकत्वोक्तेश्च । ततो भिन्नोदरः, तदभावे क्रमेण तयोः पुत्राः । यत्र तु अपुत्रे भ्रातरि मृते तद्धनविभागात् प्रागेव कश्चिद्भ्राता मृतः तदा तत्पुत्राणां पितृतो भागकल्पनेति न्यायेन पितृभाग एव । भ्रातृपुत्राभावे गोत्रजाः । ते त्रिविधाः, सपिण्डाः सोदका गोत्रजाश्च,

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते ।
समानोदकभावस्तु निवर्त्तेताचतुर्दशात् ॥
जन्मनाम्नोरविज्ञाने तत्परं गोत्रमुच्यते ।

इत्युक्तेः । सपिण्डेष्वपि प्रथमं पितामही ततः पितामहस्ततः

---

(१) 'गृह्णीयादित्युक्तम्' ङ० ।

(२) 'तत्राप्यूढा स्त्रीधनं' ङ० 'ऊढानूढास्त्रीधनं' ख० ।

(३) 'प्रमत्ताना' ख० 'प्रजाताना' ङ० ।

(४) 'क्रमप्रत्ययेऽपि' घ० ।

इति वृद्धमनूक्तेः,

भार्यापिण्डं पतिर्दद्या*भर्त्रे भार्या तथैव च ।
श्वश्र्वादेश्च स्नुषा चैव तदभावे सपिण्डकाः ॥ इति,

पितृव्यस्ततस्तत्पुत्रः ततः प्रपितामही ततः प्रपितामहः ततः प्रपितामहपुत्रः ततस्तत्पुत्र इति क्रमः । ततः प्रत्यासत्तिविशेषेण सोदकाः । ततो गोत्रजाः । ततो बन्धवः क्रमेणात्मपितृमातृसम्बन्धिनः । एतच्च बन्धुत्रयं ग्रन्थ एवाशौचे व्यक्तीभविष्यति । अत्र यद्यपि बान्धवाभावे शिष्य एवोक्तः तथापि तदभावे आचार्यस्तदभावे शिष्यो द्रष्टव्यः, 'पुत्राभावे प्रत्यासन्नः सपिण्डस्तदभावे आचार्यस्तदभावेऽन्तेवासी' इत्युक्तेः । तदभावे तु सब्रह्मचारी, तदभावे श्रोत्रियः "श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्" इति गौतमोक्तेः । तदभावे ब्राह्मणमात्रम्,

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः ।
त्रैविद्याः शुचयो दान्तास्तथा धर्मो न हीयते ॥

इति मानवात् । ब्राह्मणस्वं राजा जात्वपि न गृह्णीयात्,

ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन ।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा ॥

इति नारदेन,

नाहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः ।

इति मनुना च निषेधात् । क्षत्रियादिधनं तु सब्रह्मचारिपर्यन्ताभावे राजैव हरेत्,

इतरेषु तु सर्वेषु सर्वाभावे हरेन्नृपः ।

इति मनूक्तेरिति । अथैवमविभक्तभ्रातृकस्य धनहारिणी पत्नी न प्राप्नोति प्रत्युत तस्य सोदर एव धनहारित्वात्स्यादित्यत आह*—भर्त्रे इति, पुत्राभावे इति च । एतद्वचनानुरोधेन 'कृत्स्नमंशं लभेत च' इत्यस्यैकयोगनिर्देशेऽपि भिन्नविषयत्वं

पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः ।

इति च हेमाद्रौ शङ्खोक्तेः । पृ(१)थ्वीचन्द्रोदयस्तु—

कानीन*गूढसहजपुनर्भूतनयाश्च ये ।
पत्न्यभावेऽधिकुर्युस्ते अप्रशस्ताः स्मृता हि ते ॥

इति स्मृतिसङ्ग्रहात् पत्न्यभावे कानीनादय इत्याह । पत्युरपि सपत्नीपुत्रे सति नाधिकारः, 'पितृपत्न्यः सर्वा मातरः' इति सुमन्तूक्तेः,

स्वीक्रियते, 'यश्चार्थहरः स पिण्डदायी' इत्यस्योत्सर्गत्वात् । अत एव दुहित्रादिसत्त्वे पुत्रादीनां मातृधनग्रहणेऽनाधिकारेऽपि तदौर्ध्वदेहिके पुत्रेषु विद्यमानेष्वित्यादिनाऽधिकारप्रतिपादनं सङ्गच्छते। उत्सर्गस्तु सर्वसम्बन्ध्यसत्त्वे प्रवर्त्तनीयः । तथाचाविभक्तसोदरसत्त्वेऽपि धनहारित्वेऽपि च पत्न्या एवाधिकार इत्यर्थः । अत्र च 'पुत्राभावे तु पत्नी स्यात्' इति शांखोक्तेः, 'अपुत्रस्य तु या पुत्री' इत्यादि जाबालोक्तेश्च, व्यवस्थापकापेक्षायां 'कृत्स्नमंशं लभेत च' इत्युक्तम् । 'पत्नी दुहितरश्च' इत्यादिना प्रथमं पत्न्यास्ततो दुहितुर्धनहर्तृत्वोक्तेरिति तु न्यायः । * गूढसहजौ गूढजसहोढजौ।

अप्रशस्तास्तु कानीनगूढोत्पन्नसहोढजाः ।
पौनर्भवश्च नैवैते रिक्थपिण्डांशभागिनः ॥

इति वैष्णवनिषेधश्च पत्नीसत्त्वे इति भावः । अत्रेदमस्वरसबीजम् । विष्णुस्मृतौ—औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढोत्पन्नसहोढदत्तकक्रीतस्वयमुपगतापविद्धयत्रक्वचनोत्पादितान् क्रमेणाभिधाय एतेषां पूर्वपूर्वः श्रेयानिति क्रमविधानेऽपि यथा धनग्रहणे विज्ञानेश्वरप्रभृतिभिर्याज्ञवल्क्योक्तक्रम एव गृह्यते, न तु विष्णुस्मृत्युक्तः, तथा पिण्डदानेऽपि तत्क्रम एव ग्राह्यो न त्वन्

---

(१) 'पृथ्वीचन्द्रस्तु' क० ।

*विदध्यादौरसः पुत्रो जनन्या और्ध्वदैहिकम् ।
तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा स्मृताः ॥
तेषामभावे तु पतिस्तदभावे सपिंडकाः ॥

इति मदनरत्ने कात्यायनोक्तेश्च,

बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

इति बृहस्पतिवचनाच्च । अपरार्केप्येवम् । तेन(१) य-

इति । *विदध्यादिति । न च स्त्र्युद्देश्यकश्राद्धे औरसानन्तरं पौत्रिकेयो न्याय्यः, तस्यौरससाम्योक्तेः । तदभावे सपत्नीपुत्र इति वाच्यम्, पौत्रिकेयस्य कलिवर्ज्यत्वात्त्यागः । एवं क्षेत्रजादिर्यद्यपि कालादर्शादिमते पौत्रप्रपौत्रयोरनन्तरः, मतान्तरे तु तत्पूर्वः, गौणपुत्रत्वात्, तथाऽपि कलिवर्ज्यत्वाद्धेयः ।

बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवती मनुः ॥

इति मानवम्,

बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः ।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः ॥

इति बृहस्पतिवचनं च औरसापेक्षया प्राबल्याभावेऽप्यन्यापेक्षयाऽस्य प्राबल्यं च द्रष्टव्यम् । न च यथा —

भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥

इति मानवं न भ्रातृपुत्रस्य पुत्रत्वातिदेशेन पत्न्यपेक्षया प्राबल्यार्थम्; श्राद्धादौ रिक्थग्रहणे च भ्रात्रनन्तरं तदधिकारात्, किन्तु तस्य पुत्रीकरणसम्भवेऽन्येषां तन्निषेधार्थम्, तथाऽत्रापि भविष्यतीति वाच्यम्, तत्र वचनान्तराविरोधेन यथाश्रुतार्थत्यागे-

---

(१) 'यत्' नास्ति क० ।

च्छुद्धिविवेक उक्तं—‘सत्यपि सपत्नीपुत्रे पत्युरेवाधिकारः’ इति, तन्निरस्तम् । *यच्च तत्रैव कात्यायनः—

न भार्यायाः पतिर्दद्यादपुत्राया अपि क्वचित् ।

यच्च विष्णुपुराणम्—

कुलद्वयेपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप ।

इति, यच्च मार्कण्डयपुराणम्—

सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममन्त्रकम् ।

इति, *तदासुरादिविवाहोढाविषयम् ,

ऽप्यत्र निर्बीजे तत्त्यागायोगात् । अत एव वचनं तु भ्रातृपुत्राद्यभाववविषयमिति सङ्गच्छते । यथा चैतत्तथा वक्ष्यामः । पत्यभावे दुहितृदौहित्रौ, विशेषवचनात् । अत एव—

न कदाचित्सगोत्राय श्राद्धं कार्यमगोत्रजैः

इति निषेधस्तु न प्रवर्तते । अनयैव रीत्या पुरुषश्राद्धेऽपि पत्न्यभावे तयोरधिकारे न व्याघातः । तदभावे पत्युर्भ्राता, तदभावे तत्पुत्रः, तदभावे स्नुषा, तदभावे पितृभ्रातृतत्पुत्रादयो वक्ष्यमाणाः । अनूढायास्तु पिता,

दत्तानां चाप्यदत्तानां कन्यानां कुरुते पिता ।

इति वचनात् । तदभावे भ्रात्रादिः । *यच्चेति । अत्र द्वावुपन्यासौ । ‘न भार्यायाः’ इत्याद्यः ‘कुलद्वयेऽपि च’ इत्यादिर्द्वितीयः । तत्र प्रथमतो द्वितीयं निरस्यति । *तदासुरादिविवाहोढेति । (१)अयं भावः—स्त्रीपदद्वयं न पत्नीपरम्, अमन्त्रकमित्यनेन विरोधात् । पत्न्याः समन्त्रककर्माम्नानात् । पुत्राभावे पत्नीविधानेन सर्वा(२)विध्यभावे विधानासम्भवाच्च । किन्तु तदन्योढापरम् । एवञ्च ‘कुलद्वयेऽपि चोत्सन्ने’ इति मातुलाद्यभावे वाऽस्या निवेशो-

---

(१) ‘अयं भावः’ नास्ति ख०

(२) ‘विध्यभावेऽपि विधानेन’ ङ०

*धर्म्यैर्विवाहैरूढा या सा पत्नी परिकीर्तिता।
*क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते॥
न सा दैवे न सा(१)पित्र्ये दासीं तां मुनयो विदुः॥

इति माधवीये शातातपोक्तेः। यत्तु शुद्धिरत्नाकरः शूलपाणिश्च—

अपुत्रस्य च या पुत्री सापि पिण्डप्रदा भवेत्।
तस्य पिण्डान्दशैकं वा एकाहेनैव निक्षिपेत्॥

इति जाबालोक्तेः,

भर्तुर्धनहरा पत्नी तां विना दुहिता स्मृता।
अङ्गादङ्गात्संभवति पुत्रवद् दुहिता नृणाम्॥

इति बृहस्पतिना दुहितुर्धनहारित्वोक्तेश्च *पुत्राभावे कन्या, तदभावे सपत्नीपुत्र इत्याहतुः। तत् *पूर्वविरोधात्,

युक्त इति। एतेन 'मन्त्रवत्क्रियाकर्त्री पत्नी, तदभावेऽमन्त्रकक्रियाकर्त्र्य एताः' इत्यपाकृतम्। पत्नी च ब्राह्मादिविवाहोढेत्याह-*धर्म्यैरिति। ननु पुमधिकारिकयज्ञयोगवत्स्त्रीत्वं पत्नीत्वं, तच्च क्रीतायामप्यविशिष्टम् अतस्तस्याः श्राद्धाद्यर्थपाकादौ श्रौतस्मार्तसहभावे चार्हतेति शङ्कायामाह-*क्रयक्रीता त्विति। 'कन्यामुपयच्छेत' इति विधिसत्त्वेऽपि क्रय एव यज्ञसंयोगादिविघटक इति न तस्या भुजिष्यायाः पत्नीत्वमित्यर्थः। वस्तुतस्तु 'धर्म्यैर्विवाहैरूढा या सा पत्नी' इति वाक्ये यत्तच्छब्दाभ्यां जननानिबन्धनापितृस्वत्वनाशजनकधर्म्यविवाहस्यैव पतिस्वत्वोत्पादकत्वं लभ्यते। तथाच क्रयप्रयुक्तस्वत्वस्य नाशकाभावात्तद्वति स्वत्वान्तरानुत्पत्तेः क्रीतायां न विवाहाधीनस्वत्वसम्भव इत्यर्थः। *पुत्राभावे इति। स्त्रीश्राद्धं प्रकृतम्। *पूर्वेति 'विदध्यादौरसः पुत्रः' इत्यादिवचनेत्यर्थः। अर्थ-

---

(१) 'वा' ख०।

*मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः ।

इति दुहितुर्मातृधनग्राहित्वेन पुत्रस्य तच्छ्राद्धानधिकारापत्तेश्चोपेक्ष्यम् । *वचनं तु *भ्रातृपुत्राद्यभा(१)वविषयम् । पत्न्यभावे *अविभक्तस्य सोदरः, *पूर्वोक्तशङ्खवचनात् । *विभक्तस्य तु दुहिता, *धनहारि

ग्रहणे पिण्डदानव्याप्तिमपि निराकरोति-*मातुरिति । मातृकृतऋणशोधनावशिष्टं धनं दुहितरो गृह्णीयुः, ताभ्यः ऋतेऽन्वयः पुत्रादिर्गृह्णीयादित्यर्थः । अत्र न भार्यायाः (२)पतिरित्यादिपूर्वोपन्यासे आसुरादिविवाहोढापरमिति परिहारोऽसङ्गतः, तस्यामपि मृतायां पत्युरेवाधिकारादित्याशङ्क्य तत्समाधत्ते-*वचनं त्विति-'भार्यापिण्डं पतिर्दद्यात्' इत्यादिवचनं त्वित्यर्थः । *भ्रातृपुत्रेति । पुत्रीकृतेत्यादिः । तथाच पुत्रीकृतभ्रातृपुत्रसत्त्वे 'न भार्यायाः' इति निषेधः, कालादर्शमते दत्तकाभावे मतान्तरे च अपौत्रान्ताभावे पत्युरधिकारादिति । अन्यथा 'वचनम्' इत्यस्य यत्तुकारकृतान्तर्गतवचनपरत्वासम्भवेनासङ्गतेः । यद्वा पुत्रीकृतेति नाध्याहार्यम् । वचनं पुत्रीपिण्डदानवचनम् । भ्रातृपुत्राद्यभावे भ्रातृपुत्रादिनृ(३)पत्यन्ताभावे इत्यर्थः । प्रथमोपन्याससमाधानं तु शुद्धिविवेकखण्डनेनैव लब्धमिति तन्नोक्तम् । अत्र 'पत्न्यभावे तु सोदरः' इति शङ्खेन सोदरस्याधिकारः, 'अपुत्रस्य च या पुत्री' इति वचनात् पुत्र्याः 'कुर्वन्मातामहस्यापि' इति वचनाच्च दौहित्रस्य इत्यत्र व्यवस्थां दर्शयति-*अविभक्तस्येति । विभक्तसंसृष्टेऽपि बोध्यः । *पूर्वोक्तेति । 'भ्रातुर्भ्राता' इत्यग्रिमवचनाद्धनहारित्वाच्चेत्यपि बोध्यम् । *विभक्तस्येति । विभक्तासंसृष्टस्येत्यर्थः । पत्न्यभावे इति वर्तते । *धनहारित्वादिति । 'पश्

---

(१) 'भाव' नास्ति क० । (२) 'न पति' ख० घ० ।

(३) 'न पत्यन्ताभावे' ङ० ।

स्यात्; पूर्वोक्त(१)जाबालवचनाच्च । तत्राप्यूढानूढासमवाये *ऊढैव,

दुहिता पुत्रवत्कुर्यान्मातापित्रोस्तु संस्कृता ।
आशौचमुदकं पिण्डमेकोद्दिष्टं सदा तयोः ॥

इति भरद्वाजोक्तेः । तदभावे दौहित्रः, *धनहारित्वात्,

*मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकम् ।
कुर्वन्मातामहस्यापि व्रती न भ्रश्यते व्रतात् ॥

इति चन्द्रिकायां वृद्धमनूक्तेः;

यथा व्रतस्थोऽपि सुतः पितुः कुर्यात्क्रियां नृप ।
उदकाद्यां महाबाहो दौहित्रोऽपि तथार्हति ॥

र्थहरः स पिण्डदायी' इति उ(२)त्सर्गस्य विरोधे व्यवस्थापनमपि प्रयोजनम् । एतेन मातुर्धनहारित्वेन दुहितैव स्यान्न पुत्र इति चिन्त्यमेतदित्यपाकृतम् । *ऊढैवेति । यद्यपि—

भर्तुर्धनहरा पत्नी तां विना दुहिता स्मृता ।

इति सामान्यत उक्तावप्यूढानूढासमवाये धनहर्तृत्वमनूढाया एवोक्तम्, तथापि अनूढायाः सर्वथा नाधिकारः, संस्कृतेत्युक्तेः । एवं भगिनीतत्सुतादीनां स्त्रीहारिधनहारिणोरपि संस्कारं विना नाधिकारः 'औरसभिन्नस्यान्ये तु संस्कृताः श्राद्धकारिणः' इति वाक्येनाधिकारिविशेषणसंस्कारलाभात् । *धनेति । 'अकृता' इति वचने 'दद्यात् पिण्डं हरेद्धनम्'इत्युक्तेः,

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः ।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः ॥

इति विष्णुना पौत्रेण सह निर्देशाच्च । धनहारिणोऽपि दौहित्रस्यैवाधिकार इत्याह-*मातेति । तत्र भ्रंशापवादेन सुतसादृश्येन धनहारिणोऽपि दौहित्रस्यैव मातामहश्राद्धाधिकार इत्यर्थः । तत्र

---

(१) 'जाबालिवचना' क० । (२) 'उत्सृजस्य विरोधेन' ङ० ।

इत्यपरार्के भविष्योक्तेश्च । *एतद्धनहारिण आवश्यकं नान्यस्येत्याह तत्रैव स्कन्दः—

श्राद्धं मातामहानां तु *अवश्यं धनहारिणा ।
दौहित्रेणा*र्थनिष्कृत्यै कर्तव्यं पूर्वमुत्तरम् ॥ इति ।

तेन 'दौहित्रोऽत्र पुत्रीकृतः' इति देवयाज्ञिकोक्तिः परास्ता । अत्र पत्नीदौहित्रसमवायें*शहरत्वात्पत्न्येव कुर्यात् ।

*दौहित्रभ्रातृपुत्रसत्त्वे विभक्तस्य दौहित्रः, अविभागे भ्रातृपुत्रः । भ्रातृतत्पुत्रसत्त्वे कनिष्ठश्चेत् भ्रातैव ।

विशेषं दर्शयति—*एतदिति । *अवश्यमिति । रिक्थग्राहिणां दौहित्रसोदरभ्रातृतत्सुतानामभावेऽरिक्थग्राही दौहित्रः, रिक्थग्राहाभावे उत्कृष्टदौहित्रस्य बद्धक्रमसोदरादिमध्ये निवेशासम्भवात् । एतेनारिक्थग्राहिदौहित्रस्य सर्वथाऽऽनावश्यकत्वं न शङ्क्यम् । यद्वा दौहित्रयोर्मध्ये यो धनहारी तस्यैवाधिकार इत्यर्थः । एवं भ्रात्रोरपि, धनहारीत्येतेनैकवाक्यात् । न चान्धादेर्ज्येष्ठस्याधनहारित्वे धनहारिणः कनिष्ठस्यैवाधिकारः स्यात्, एवं सति कनिष्ठसंसृष्टित्वेन धनहर्तुर्ज्येष्ठस्यैव चेति वाच्यम्, भ्रातृत्वधनहारित्वोभयसत्त्वेनेष्टत्वात् । अन्यथेदृशविषये दौहित्रेऽपि वैपरीत्यापत्तेः । रघुनाथस्तु विभक्तस्य दौहित्राभावे भ्राता, तदभावे क्रमेण तत्सुतासोदरभ्रातृतत्सुताः, तदभावे पितेत्याह । अत्र रिक्थग्राहिदौहित्रस्याप्रदर्शनान्न्यूनतैव । *अर्थनिष्कृत्यै इति । धनग्रहणस्योपकारव्याप्तत्वात् । *अंशेति । 'पत्नी दुहितरश्चैव' इति चशब्दसमुच्चितदौहित्रात् पत्न्या एव धनग्रहणाधिकारोक्तेः । *दौहित्रेति । वाक्यद्वये अंशहरत्वादिति वर्तते । अंशहारिदौहित्राभावो विशेषणाभावाद्विशेष्याभावाद्वोभयथाऽपि । विभक्तोऽपि सोदर एव, उक्तवाक्ये दौहित्रानन्तरं भ्रातुर्धनग्रहणाधिकारोक्तेः । तत्रापि सोदरः कनिष्ठबहुत्वे प्रथमं मृतानन्तरः ततस्तदनन्तरः, सान्निकर्षात् । कनि-

*ज्येष्ठश्चेत्तत्पुत्रः कुर्यादिति दाक्षिणात्यग्रन्थाः । हारलतादौ तु—

भ्रातुर्भ्राता स्वयं चक्रे तद्भार्या चेन्न विद्यते ।
तस्य भ्रातृसुतश्चक्रे यस्य नास्ति सहोदरः ॥

इति ब्राह्मोक्तेः,

पत्नी कुर्यात्सुताभावे पत्न्यभावे सहोदरः ।

इति कौर्माच्च *ज्येष्ठभ्रातैव कुर्यान्न तत्पुत्रः । यत्तु 'नानुजस्य तथाग्रजः' इति, तत्क*निष्ठभ्रातृसत्त्वविषयम् । यच्च मनुः—

*सर्वेषामेकजातानामेकश्चेत्पुत्रवान्भवेत् ।
सर्वांस्तांस्तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥ इति,

त*त्सोदराभावविषयमित्युक्तम् । एतेन *पुत्रत्वातिदेशोऽयम् । अतस्तस्मिन्सति एकादश पुत्राः प्रतिनिधयो

ष्ठाभावे त्वाह--*ज्येष्ठश्चेदिति । ज्येष्ठस्यावसरो वक्ष्यते । *ज्येष्ठभ्रातैवेति । ज्येष्ठबहुत्वे मृतानन्तरक्रमेण । *कनिष्ठेति । भ्रातृत्वाविशेषेणाधिकारप्राप्ते कनिष्ठसत्त्वे ज्येष्ठस्य तन्निषेध इत्यर्थः । एवमेव 'न योषिद्भ्यः पतिर्दद्यात्' 'न पुत्रस्य पिता दद्यात्' इत्यादीनामपि वचनान्तराविरोधाया(१)धिकार्यन्तरविषयत्वमूह्यम् । *सर्वेषामिति । न चायं पुत्रत्वातिदेश इति अस्मिन् सति नैकादशपुत्राः प्रतिनिधय इति वाच्यम्, प्रथममते योगीश्वरोक्तक्रमस्यानापत्त्या पौत्रप्रपौत्राभ्यां विच्छेदेऽपि धर्मपुत्रपदवत्त्वेन सदृशेनानेन तद्विच्छेदानौचित्यात् ; द्वितीयमते सर्वथा मध्ये प्रवेशाभावाच्च । परन्तु पुत्रीकरणपरस्यास्यस्य 'भ्राता वा भ्रातृसन्ततिः' इत्यनेनैकवाक्यताऽपि सम्भवतीत्याशयेनाह—*सोदराभावेति । *पुत्र इति । पुत्रपदस्यौरसपरत्वे मध्यस्थाः पुत्राःपौत्रप्रपौत्रेण पुत्राः, गौणसा-

---

(१) 'अधिकार्यान्तराविषय' ङ० ।

न कार्याः, स एव पिण्डदो*शहरश्च, इति वाचस्पतिमनुटीकाकल्पतरुरत्नाकरादयः परास्ताः, द्वादशविधपुत्राभावे 'पत्नीदुहितरः' इति याज्ञवल्क्योक्तेश्च । तस्माद्(१)त्तपुत्रप्रशंसेयमिति विज्ञानेश्वरः, अविभक्तविषयं वा । मदनरत्ने स्मृतिसंग्रहे—

पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ ।
धनहार्यथ दौहित्रस्त*तो भ्राता च तत्सुतः ॥
भ्रातुः सहोदरो भ्राता कुर्याद्दाहादि तत्सुतः ।
ततस्त्वसोदरो भ्राता तदभावे च तत्सुतः ॥ इति ।

भ्रातृपुत्राभावे क्रमेण पितृमातृस्नुषास्वसृतत्पुत्रादयः, धनहारित्वात् । भगिनीतत्सुतयोर्विशेषमाह मदनरत्ने

'पौत्रप्रपौत्रौ पत्नी च' इति चशब्दाद् दुहिता । विभधारणपरत्वे क्तभ्रातृपरं चेदम् । परे तु 'न कदाचित्सगोत्राय' इति निषेधेन दुहितृदौहित्रयोरधिकारं निरस्य विभक्तभ्रातुरेवाधिकारमाहुः । ततो भ्राता चेति । कनिष्ठो दौहित्रः, तद्भ्राता चेति पाठान्तरात् । तत्सुतो दौहित्रसुतः । केचित्तु भ्रातृपदं मृतभ्रातृपरं न दौहित्रभ्रातृपरम्, 'भ्रातुः सहोदरो भ्राता' इति तृतीयपादे स्पष्टोक्तेरिति । सत(२)त्र, तत्सुतशब्देन दौहित्रभ्रातृसुतग्रहणापत्त्या भ्रातृपुत्रादौ सत्यत्यन्तविप्रकृष्टस्य क्रियापत्तेः । कनिष्ठभ्रातृतत्सुतौ (३)चांशग्राहिणौ द्रष्टव्यौ, अनंशहारिणोस्तयोरन्ते निवेशात् । केचित्तु उभावपि दौहित्रसुतौ न स्मरन्ति । तदपेशलम्, पुत्रपौत्रप्रपौत्राणामिव दुहितृदौहित्रतत्सुतानां सन्निधानसाम्यात्, भिन्नगोत्रत्वनिबन्धनासन्निधानाच्च; मातृसपिण्डसोदकयोः स्वसपिण्डसोदकोत्तर-

---

(१) 'दत्तकपुत्रप्रशंसेयम' क० ।

(२) 'तत्र तृतीयपादनैयर्थ्यापातात् । तस्माद्भ्रातृपदमधनहारिदौहित्रपरमित्याहुः । यत्तु भ्रातृशब्देनासोदरदौहित्रभ्रातृव्याख्यानं तत्र, सुतशब्देन' ङ० । (३) 'चांशहारिणौ' ङ० ।

कात्यायनः—

अनुजा अग्रजा वापि *भ्रातुः कुर्वीत(१)संस्क्रियाम्।
ततः स्वसोदरात्तद्वत्क्र*मेण तनयस्तयोः॥

अपरार्के कार्ष्णाजिनिः—

पुत्रः शिष्योऽथवा पत्नी पिता भ्राता स्नुषा गुरुः।
स्त्रीहारी धनहारी च कुर्यात्पिण्डोदकक्रियाम्॥

त्ववत्स्वकीयोत्तरत्वस्यौचित्याच्च। किञ्च स्वस्रीयसुतलेखनाद्दौहित्रसुतोऽभिप्रेतः, अन्यथाऽनौचित्यापत्तेः। सोदरासोदरासमवाये त्वाह-*भ्रातुरिति। असोदर(२)भ्रात्र्यामपि ज्येष्ठकनिष्ठसमवाये कनिष्ठः, कनिष्ठबहुत्वे ज्येष्ठबहुत्वे च सोदरवत्। भ्रातृतत्पुत्रसमवाये यथामतम्, सोदरभ्रातृतत्पुत्रवत्। रघुनाथस्तु द्वितीयश्लोकमनादृत्य भ्रातृशब्देन सोदरासोदरौ व्यवस्थाप्य तदभावे तत्सुतशब्देन क्रमेण सोदरासोदरभ्रा(३)तृपुत्रौ प्राह। युक्तं चैतत्, एवमेव भगिनीतत्सुतव्यवस्थापकाग्रिमवचनसंवादात्।

पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा।
भगिनी भागिनेयश्च सपिण्डः सोदकस्तथा॥
असन्निधाने पूर्वेषामुत्तरे पिण्डदाः स्मृताः॥

इति स्मृतिसङ्ग्रहमालोच्याह-*क्रमेणेति। अत्र भ्रातृपुत्रोत्तरं पितुः पाठेऽपि तदुत्तरमरिक्थग्राहिदौहित्रस्य निवेशितत्वात्तदभावे तत्पुत्राद्युक्तेश्च तदुभयाभावे ज्येष्ठभ्राता, तदभावे पिता द्रष्टव्यः। अन्यथा 'पुत्राभावे तु पत्नी स्यात्' इत्यादेः पौत्रादिसद्भावेऽपि प्रवृत्त्यापत्तेः। तत्पुत्रादय इत्यादिना सपिण्डादयः। सपिण्डाः पितृव्यतत्पुत्रादयः, तदभावे सोदकाः, तदभावे मातृसपिण्डाः मातामहमातुलतत्पुत्रादयः, तदभावे तत्सोदकाः। एते चत्वारः

---

(१) 'सत्क्रियाम्' क० (२) 'भ्रातर्यपि' घ० 'भ्रातर्यमपि' ङ०
(३) 'भातृपुत्रेत्याह युक्तं' ख०

मार्कण्डेयपुराणे—

*पु(१)त्रो भ्राता च तत्पुत्रः पत्नी माता तथा पिता ।
वित्ताभावेऽपि शिष्यश्च कुर्वीरन्नौर्ध्वदेहिकम् ॥

प्रत्यासत्तिक्रमेण प्राप्ताः । स्मृतिसंग्रहे-सपिण्डसोदकशब्दयोरात्ममातृसम्बन्धिद्वयपरत्वात्,

पुत्रपौत्रप्रपौत्रा वा भ्राता वा भ्रातृसन्ततिः ।
सपिण्डसन्ततिर्वापि क्रियार्हा नृप जायते ॥
एषामभावे सर्वेषां समानोदकसन्ततिः ।
मातृपक्षस्य पिण्डेन सम्बन्धो योजनेन वा ॥

इति विष्णुपुराणात्(च) । तदभावे बन्धुत्रयम्, सगोत्रानन्तरं शिष्यादिभ्यः प्राक् तेषां धनग्रहणोक्तेः । तत्रापि प्रत्यासत्तेः प्रथमं स्वबन्धवः, ततः पितृबन्धवः, ततो मातृबन्धवः, तदभावे आसुरादिविवाहोढा स्त्री सवर्णा, तदभावे ऊढाऽसवर्णा, तदभावेऽवरुद्धापि शूद्राव्यतिरिक्ता,

कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप ।

इति विष्णुपुराणात् । कुलद्वयेति बान्धवान्तरपरम्, तेषामपि तत्सम्बन्धात् । तदभावे गुरोः शिष्यः, तदभावे यजमानस्य ऋत्विक्, तदभावे शिष्यस्याचार्यः सब्रह्मचारी वा मातृसपिण्डोत्तरत्वप्रापकगौतमोक्तेः । शिष्यानन्तरं सब्रह्मचारिणो धनहारित्वोक्तेः । तदभावे सखा, ततस्तदभावे जामातेति केचित् । वस्तुतस्तु सम्बन्धविशेषात्पूर्वं जामाता ततः सखा द्रष्टव्यः । तदभावे क्रमेण स्त्रीहारिधनहारिणौ । अथशब्दाद्यभावेऽपि कार्ष्णाजिनिवाक्ये पाठक्रमात् । अत्र रिक्थग्रहेधिकाराभावे यो धनहारी तस्य धनहारीत्यनेनाधिकारो बोध्यते न तु पुत्रादीनां मध्ये एको धनहारी नापरस्तदा धनहार्येव कुर्यान्नान्य इत्याह-*पुत्रो भ्राता चेति । पुत्रो द्वादशविधः । भ्राता सोदरोऽसोदरश्च । चकारादौ-

---

(१) 'पित्रोर्भ्राता च' क०

तेन धनहारी एतद्भिन्न इति कालादर्शः । अत्र पाठक्रमो न विवक्षितः पूर्ववाक्येष्वथततःशब्दादिभिः श्रौतक्रमोक्तेः 'अथ जिह्वाया अथ वक्षसः' इतिवत् ।

पृथ्वीचन्द्रोदये वृद्धमनुः–

स्नुषास्वस्रीयतत्पुत्रज्ञातिसम्बन्धिबान्धवाः ।
पुत्राभावे तु कुर्वीरन्सापिण्डान्तं यथाविधि ॥

मार्कण्डेयपुराणे—

पुत्राद्युत्सन्नबन्धोश्च सखापि श्वशुरस्य च ।
जामाता स्नेहवत्कुर्यादाखिलं पैतृमेधिकम् ॥

चन्द्रिकायां वृद्धशातातपः—

मातुलो भागिनेयश्च स्वस्रीयो मातुलस्य च ।
श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ॥
एतेषां चैव भार्याणां स्वसुर्मातुः पितुस्तथा ।
श्राद्धमेषां तु कर्तव्यमिति वेदविदो विदुः ॥

शुद्धिविवेके पृथ्वीचन्द्रोदये च ब्राह्मे-

दत्तानां वाग्दत्तानां कन्यानां कुरुते पिता ।
चतुर्थेहनि तास्तेषां कुर्वीरन्सुसमाहिताः ॥

दत्ता वाग्दत्ताः ।

मातामहानां दौहित्राः कुर्वन्त्यहनि चापरे ।
तेऽपि तेषां प्रकुर्वन्ति द्वितीयेऽहनि सर्वदा ॥
जामातुः श्वशुराश्चक्रुस्तेषां तेपि च संयताः ।
मित्राणां तदपत्यानां श्रोत्रियाणां गुरोस्तथा ॥
भागिनेयसुतानां च सर्वेषां त्वपरेऽहनि ।

हित्रादयः स्नुषा च । एते धनाभावे ऽपि उत्तराक्रियान्तं कुर्वीरन्नेवेत्यर्थः ।

धनहार्यभावे क्रमेण राज्ञः पुरोहितो मन्त्री भृत्यश्चेत्याह–

*राज्ञोऽसति सपिण्डे तु निरपत्ये पुरोहितः ॥
मन्त्री वा तदशौचं तु पुरा चीर्त्वा करोति सः ॥

अत्र द्वितीयाहादौ श्राद्धविधान(१)मस्थिसंचयपरम्।

कालादर्शे—

*दाहादिमन्त्रदः पित्रोर्विदध्यादौरसः सुतः ।
तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः ॥
दौहित्रो धनहारी च भ्राता तत्पुत्र एव च ।
पिता माता स्नुषा चैव स्वसा तत्पुत्र एव च ॥
सपिण्डः सोदको मातुः सपिण्डश्च सहोदकः ।
स्त्री च शिष्यर्त्विगाचार्या जामाता च सखापि च ॥
उत्सन्नबन्धो रिक्थेन कारयेदवनीपतिः ॥

---

*राज्ञोऽसतीति—

प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः ।
ज्ञातिबन्धुसुहृच्छिष्यैर्ऋत्विक्भृत्यपुरोहितैः ॥

इति बृहस्पत्युक्तेश्च । दर्शितवचनेषु क्रमाप्रत्ययात्तदेतत्सर्वमनुक्रामति—*दाहादीति । प्रथममतेनेदम् । पुत्रिकासुत इति गौणपुत्रार्थकम् । दौहित्रात्प्राक् पत्नी बोध्या । धनहारिदौहित्रप्रभृतिसख्यन्तमध्ये अनुक्ता अपि प्रागुक्ता निवेश्याः । ततः स्त्रीधनहारिणौ । अन्ये तु सख्यभावे तत्संघातान्तर्गताः प्रत्यासत्तिविशेषक्रमेण, 'तत्सङ्घातगतैश्चैव' इति वचनात् । ततो धनहारीत्याहुः । धनहारी च ब्राह्मणस्य धनग्राही कश्चिद्ब्राह्मणः । न तु राजा, राज्ञो ब्राह्मणधनग्रहणानधिकारात् । राज्ञा वा धनहारिणेति धनहारित्वाविशेषणात् । धनहारीचेन्न करोति तदा राज्ञा कारणीयः,

---

(१) 'अस्थिसञ्चयनपरम्' क०

गौतमः—'पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्यौ'। यत्तु चन्द्रिकायां वृद्धशातातपः—

प्रीत्या श्राद्धं प्रकर्तव्यं सर्वेषां वर्णलिङ्गिनाम् ।

इति, तत्सवर्णविषयम्;

ब्राह्मणस्त्वन्यवर्णानां न कुर्यात्कर्म किंचन ।
कामाल्लोभाद्भयान्मोहात्कृत्वा तज्जातितां व्रजेत् ॥

इति ब्राह्मोक्तेः,

न ब्राह्मणेन कर्तव्यं शूद्रस्याप्यौर्ध्वदेहिकम् ।
शूद्रेण वा ब्राह्मणस्य *विना पारशवात्क्वचित् ॥

इति पारस्करोक्तेश्च । पारशवः ऊढशूद्रापुत्रः ।

अत्रेदं तत्त्वम् । सर्वत्र पुत्रादेः पूर्वस्याभावे पत्न्यादेरधिकार उक्तः । तत्राभावोऽसन्निधिर्नाशश्चोच्यते । अत एव पूर्वत्र 'असंनिधानं पूर्वेषाम्' इत्युक्तम् । तत्रासंनिधौ पत्न्यादेः सर्वाधिकारे प्राप्ते—

प्रोषितावसिते पुत्रः कालादपि चिरादपि ।
एकादशाद्याः क्रमशो ज्येष्ठस्य विधिवत्क्रियाः ॥

सर्वाभावे च नृपतिः कारयेत्तस्य रिक्थतः ।
तज्जातीयैर्नरैः सम्यग्दाहाद्याः सकलाः क्रियाः ॥
सर्वेषामेव वर्णानां बान्धवो नृपतिर्यतः ॥

इति मार्कण्डेयपुराणात् । तज्जातीयैरिति विजातीयव्यावृत्तिः । ब्राह्मणभिन्नानां राजा धनं गृहीत्वा तद्धनेनान्येन कारयेत् । मुमूर्षुणा संनिहिताधिकार्यभावे धर्मपुत्रः कार्य इत्यग्रे व्यक्तम् । धनाहर्तृत्वे एषः, धनग्रहणे धनहारिप्रवेशात् । *विना पारशवादिति । नन्वेवं पारशवस्याधिकारप्रसवः स्यात् । तस्य च—

यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।

'ज्येष्ठेनैव तु यत्कृतम्' इत्याद्यैर्देशान्तरे *अपवादात्पुत्रनाश (१)एव पत्न्यादेः सपिण्डनादावधिकारः। असंनिधौ तु तत्पूर्वमेव नोर्ध्वम् । *अतोऽनधिकारिणा भ्रात्रादिना कृतमप्यकृतमेवेति पुनरावर्तनीयम्। *मासिकापकर्षाद्या·

स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः ॥

इत्युक्त्वा

क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥

इति मनूक्तेः, 'यत्र क्वचनोत्पादितस्तु द्वादशः' इति विष्णूक्तेश्च द्वादशविधपुत्राभावे निवेश इति चेन्मैवम् , पारशवस्य-

यद्यपि स्यात्तु सत्पुत्रो यद्यपुत्रोऽपि वा भवेत् ।
नाधिकं दशमाद्दद्याच्छूद्रापुत्राय धर्मतः ॥

इति मनुना पुत्रान्तरासत्त्वेऽपि कृत्स्नदायनिषेधात् । अन्यादेरधिकारव्यावर्तनाय 'यश्चार्थहरः स पिण्डदायी' इति विष्ण्वादिभिर्ऋक्थग्रहणस्य श्राद्धाधिकारप्रयोजकत्वोक्तेः योगीश्वरेणानुक्तेश्च, श्राद्धेऽनधिकारात्। प्रतिप्रसवश्च वपनस्नानादिपरः (१)न तु तृणकाष्ठाद्यानयनपरः, मृतोपकारिकर्ममात्रस्यैव निषिद्धत्वात् । *अपवादादिति । 'पुत्राभावे तु पत्नी स्यात्' इत्यादेः,

पितुः पुत्रेण कर्त्तव्याः पिण्डदानोदकक्रियाः ।

इत्यादेश्च सामान्यशास्त्रस्य सपिण्डनविषये बाधं विनाऽगतेरिति भावः । *अत इति । अधिकारभ्रमेण करणस्थले वास्तवोऽधिकारी यथाविध्येवावर्तयेत् । नतु प्रेतशब्दमपि त्यजेदित्यर्थः।
*मासिकेति,

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ।
श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डनम् ॥

---

(१)'एव' नास्ति क०

वर्तनीयः । *एकादशाहमासिकानि नावर्तन्ते,

तज्ज्यायसापि कर्तव्यं सपिण्डीकरणं पुनः ।

इतिवदावृत्तिविधानाभावादिति केचित् । तन्न,–अस्य निर्मूलत्वात् । अतस्तदपि *कनिष्ठकृतमावर्तते । *वृद्धिश्रौतपिण्डपितृयज्ञार्थं तु कृतं नावर्तते,

नासपिण्ड्याऽग्निमान्पुत्रः पितृयज्ञं समाचरेत् ।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् ॥

इति, 'वृद्ध्युत्तरनिषेधनात्' इति 'भ्राता वा भ्रातृपुत्रो वा' इत्यादिहारीतादिवचोभ्यः कनिष्ठादेरप्यधिकारात् । *यथात्र(१)ज्येष्ठकर्तृत्वबाधस्तथा(२)पुत्रकर्तृत्वस्यापि बाधः । सपिण्डने तु बहु वक्तव्यं तन्निर्णये वक्ष्यामः ।

* * *

इति समानकर्तृत्वान्वयव्यतिरेकस्मरणात् मासिकापकर्षावृत्तिकथनादपि सपिण्डनावृत्तौ प्रेतशब्दत्यागो नास्तीति लभ्यते। अन्यथा मासिकावृत्तौ प्रेतशब्दोऽस्ति सपिण्डनावृत्तौ तु स नास्तीति वैषम्यात् । एकादशाद्या इति वचनं महैकोद्दिष्टपरमिति न तदावृत्तिः । मतान्तरमाह–*एकादशाहेति । *कनिष्ठकृतमिति । सप्रेतशब्दमर्घ्यपिण्डादिकमिति शेषः । पतितादिकृतस्याप्यावृत्तिर्बोध्या । *वृद्धीति । कनिष्ठेन काम्यसपिण्डने कृते नावृत्तिरिति च वक्ष्यति । 'तज्ज्यायसापि' इत्यस्य समूलत्ववादिनस्तु अनाहिताग्निकनिष्ठकृतं समासिकसपिण्डनं पतितादिकृतवत् सप्रेतशब्दमावर्तनीयम् , अनधिकारिकृतत्वात् । तत्कृतं काम्यमाहिताग्निकनिष्ठेन श्रौतपिण्डपितृयज्ञार्थं कृतमपि सपिण्डनं तज्ज्यायसापीति वचनात् ज्येष्ठेन प्रेतशब्दहीनं सर्वमावर्तनीयम् । वृद्धौ तु नावर्तनीयमिति प्राहुः । भ्राता वेति वचनमधिकृत्याह–*यथेति ।

---

(१) 'ज्येष्ठकर्तृकत्वबाधः' क० ।
(२) 'पुत्रकर्तृकत्वस्यापि' क० ।

अधिकारविशेषेण क्रियाऽप्यन्यथोक्ता विष्णुपुराणे-

पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः ।
त्रिप्रकाराः क्रियाः ह्येतास्तासां भेदाञ्शृणुष्व मे ॥
*आदाहाद्दादशाहाच्च मध्ये याः स्युः क्रिया नृप
ताः पूर्वा मध्यमाः*मासि मास्येकोद्दिष्टसंज्ञिताः ॥
प्रेते पितृत्वमापन्ने सापिण्डीकरणादनु ।
क्रियन्ते याः क्रियाः पुत्रैः प्रोच्यन्ते ता नृपोत्तराः ॥
पितृमातृसपिण्डैश्च समानसलिलैस्तथा ।
तत्संघातगतैश्चैव राज्ञा वा धनहारिणा ॥

*आदाहादिति । आङ्द्वयमभिव्याप्तौ । दाहादिदशाहान्ताः क्रियाः पूर्वाः । *मासि मासीति । आदशाहादिति वर्तते । मर्यादायामाङ् । सपिण्डनसङ्ग्रहोऽर्थलभ्यः । मासि मासीत्यस्याविवक्षया वा । एकोद्दिष्टपदंनैव तत्सङ्ग्रहः, उत्तरासु तस्यावधित्वात् । तथाचैकादशाहादिसपिण्डनान्ता मध्यमा । सांवत्सरिकाद्या उत्तराः । तत्र पूर्वा मध्यमाश्च नृपत्यन्तानाम् । तत्र पूर्वासु नियमादुत्तरा न कार्याः। मध्यमासुत्वनियमो विधीयते । अन्ये तु एकोद्दिष्टपदेन सपिण्डनं न विवक्षितम् । तेन तत्पूर्वाक्रियाया राजकर्तृकतया पुत्रमात्रकर्तृकत्वबाधः । सपिण्डने तु तत्कर्तृकत्वानियम इति । तन्न, अपुत्र कैकादशाहान्तान्तकर्तुः सपिण्डनाप्राप्तिप्रसङ्गात् । पुत्रादिभ्रातृ सन्तत्यन्तानां दौहित्रतनयानां चोत्तराः पूर्वा मध्यमाश्च समुच्चीयन्ते चकारात् । एवकारश्च सपिण्डादिनृपान्तानिवृत्त्यर्थः । न तु ज्येष्ठसत्त्वे पुत्रसत्त्वे वा इतरेषां कर्तृत्वाय, तन्नाशे एव तेषामपि कारात् । न त्वसन्निधाने, वायुपुराणे प्रोषितग्रहणात् इ कारात् । न त्वसन्निधाने, वायुपुराणे प्रोषितग्रहणात् इ स्मर्तव्यम् । राजभिन्नानां तदीयधनाभावेऽपि स्वद्रव्येण पूर्व क्रियाधिकारः । राज्ञस्तु तदीयद्रव्यसत्त्वे एव, 'राज्ञा वा धना

पूर्वा मध्याश्च कर्तव्याः पुत्राद्यैरेव चोत्तराः ।
दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा ॥
*मृताहनि तु कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः ॥

रिणा'इति विशेषणात् । राज्ञश्च प्रयोजककर्तृत्व(मे(१)व । अन्यथा राजजातीये मृते साक्षात् त्रिजातीये च प्रयोजककर्तृत्व) मिति वैरूप्यं स्यात्, तज्जातीयैर्नरैरिति सजातीयानामेव साक्षात्कर्तृत्वात् । ननु पुत्राद्यैरित्याद्यशब्देन पौत्रप्रपौत्रयोर्दौहित्रैर्वेति दौहित्रस्याप्यधिकारनियमात्पत्न्यादेरुत्तरक्रियानधिकारः स्यात् इति चेत् । न, 'पुत्राभावे तु पत्नी स्यात्' इत्यादिवाक्यैस्तस्या अधिकारात् । न चैवमपि पुत्राद्यभावे दौहित्रसत्त्वे पत्न्या अनधिकारः स्यादितिवाच्यम्, 'पुत्राभावे तु पत्नीस्यात्' इत्यस्य 'दौहित्रैर्वा नरश्रेष्ठ' इत्यनेन बाधेऽपि—

अपुत्रा पुत्रवत्पत्नी पुत्रकार्यं समाचरेत् ।

इतिवचनात्सत्यपि दौहित्रे पत्न्यधिकारिणी । नच पुत्राभावे त्वित्यनेन गतार्थं, तस्य नाशासन्निध्योः प्रवृत्तत्वात् । अपुत्रेत्यस्यासान्निध्येऽप्रवृत्तेः, पुत्रवत्पदस्वारस्याच्च दौहित्राद्यपवादः । मात्रादीनां पूर्वमध्यमावत्सर्वोत्तराक्रियाप्राप्तावाह—*मृताहनीति । परिसंख्या । प्रतिसंवत्सरं मृताहन्येव पृथक् श्राद्धम् । अन्यत्र पत्याद्यंशभागित्वम्,

न योषिद्भ्यः पृथक् दद्यादवसानदिनादृते ।
स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ॥

इति परिशिष्टात् । इदं वृद्धयन्वष्टक्यादेरुपलक्षणम्, तत्रापि स्त्रीणां पृथक् श्राद्धविधानात् । *दौहित्रेति । धनाहारिदौहित्रतत्सुतयोर्दौहित्रस्योत्तराक्रियाधिकारः न तत्सुतस्येति(२)(विशेषः । धनग्रहणे तु नृपान्तानां सर्वेषां मध्यमोत्तरा अप्यावश्यका

---

(१) धनुश्चिन्हान्तर्गतं नास्ति ङ० (२) धनुश्चिन्तार्गतं नास्ति ङ०

*दौहित्रतत्पुत्रयोर्धनहारिणोरिदम्। *एवमन्यस्य धनहर्तुः, 'यश्चार्थहरः स पिण्डदायी' इत्यापस्तम्बोक्तेः,

प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः।
वर्णानां यद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरेत् ॥

इति पृथ्वीचन्द्रोदये व्याघ्रपादोक्तेः। मदनरत्ने स्कान्देऽपि-

मलमेतन्मनुष्याणां द्रविणं यत्प्रकीर्तितम्।

इत्युक्त्वा

ऋषिभिस्तस्य निर्दिष्टा निष्कृतिः पावनी परा।
आदेहपतनात्तस्य कुर्यात्पिण्डोदकक्रियाम् ॥

इत्युक्तम्। क्रियानिबन्धे कात्यायनः—

न च माता न च पिता कुर्यात्पुत्रस्य पैतृकम्।
नाग्रजश्च तथा भ्राता भ्रातॄणां तु कनीयसाम् ॥

पृथ्वीचन्द्रोदये बौधायनः—

पित्रा श्राद्धं न कर्तव्यं पुत्राणां तु कथंचन।
भ्रात्रा चैव न कर्त्तव्यं भ्रातॄणां च कनीयसाम् ॥
यदि *स्नेहेन कुर्यातां सपिण्डीकरणं विना।
गयायां तु विशेषेण ज्यायानपि समाचरेत् ॥

*अन्याभावे पित्रादिरपि कुर्यात्,

उत्सन्नबान्धवं प्रेतं पिता भ्राताऽथवाऽग्रजः।
जननी चापि संस्कुर्यान्महदेनोऽन्यथा भवेत् ॥

इति सुमन्तूक्तेः। ब्रह्मचारिणां तु शुद्धिविवेके पृथ्वी-

इत्याह-*एवमिति । अमित्यभिप्राय अत एवाह-अन्याभा
इति उत्तरा इति विशेषोपादानात् तासां पूर्वा मध्यमाश्च पृथक् भव-
न्ति । *स्नेहेनेति । तयोः स्नेह एवाधिकारबीजमित्यभिप्रायः । अत
एवाह-*अन्याभावे इति । अधनहारिभ्रातृसुतान्ताभावे इत्यर्थः ।

चन्द्रोदये च ब्राह्मे—

असमाप्तव्रतस्यापि कर्तव्यं ब्रह्मचारिणः ।
श्राद्धं तु*मातापितृभिर्न तु तेषां करोति सः ॥

श्राद्धं मासिकाऽब्दिकादि *सर्वं कार्यमित्यर्थः । नत्विति निषेधो*ऽन्यसत्त्वे । यत्तु छन्दोगपरिशिष्टे—

न त्यजेत्सूतके कर्म ब्रह्मचारी स्वयं क्वचित् ।
न दीक्षणात्परं यज्ञे न कृच्छ्रादि तपश्चरन् ॥
पितर्यपि मृते नैषां दोषो भवति कर्हिचित् ।
*आशौचं कर्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणाम् ॥

यच्च याज्ञवल्क्यः—

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ॥

इति । तदप्यन्यसत्त्वे, अन्याभावे तु ब्रह्मचारिणाऽपि कार्यं, पूर्वोक्तवृद्धमनुवचनात्,

आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती ।
(१)संकटान्नं च नाश्नीयान्न च तैः सह संवसेत् ॥

इति तेनैवोक्तेः; 'ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मातापित्रोः' इति वसिष्ठोक्तेः । अत्राशौचमेकाहं वक्ष्यामः । प्रागुपनयनान्मृतस्य तु पञ्चवर्षोत्तरं सपिण्डीकरणवर्ज्यं षोडशश्राद्धादि सर्वं कार्यमित्युक्तं देवजानीये, 'असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृतानां

---

(२)*मातापितृभिरिति। अधिकारमात्रं न तु क्रमोऽपि।*सर्वमिति। वित्ताभावेऽप्यधिकारप्रतिप्रसवेनोत्तरान्तक्रियालाभ इत्यर्थः। *अन्यसत्त्वे इति । तेनानुपनीतकनिष्ठसत्त्वे ज्येष्ठस्यापि ब्रह्मचारिणः, समावृत्तज्येष्ठसत्त्वे ब्रह्मचारिकनिष्ठस्य वा नाधिकार इत्यर्थः । *आशौचमिति । ब्रह्मचारिदशायां मृतानामित्यादि ।

---

(१) सूतकान्नमित्यर्थः । (२) 'मातापितृभ्यामिति' घ० ङ०

कुशेषु' इति प्रचेतोवचनाच्च। एतच्चाग्रे वक्ष्यामः।

अविभक्तानां विशेषमाह पृथ्वीचन्द्रोदये मरीचिः—

बहवः स्युर्यदा पुत्राः पितु*रेकत्रवासिनः।
सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम्॥
*द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥

*ज्येष्ठस्य कर्तृत्वेऽपि *सर्वे फलभागिन इत्यर्थः। तेन ये ब्रह्मचर्यपरान्नवर्जनादयः फलसंस्कारास्ते सर्वेषां भवन्तीति सिद्धम्। संसृष्टिनामप्येवम्, तुल्यत्वात्।

विभक्तानां विशेषमाहोशनाः—

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश।
एकेनैव तु(१)कार्याणि संविभक्तधनेष्वपि॥

लघुहारीतः—

सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश।
पृथङ्नैव सुताः कुर्युः *पृथग्द्रव्या अपि क्वचित्॥
ऊर्ध्वं सपिण्डीकरणात्सर्वे कुर्युः पृथक् पृथक्॥

मदनरत्ने—

विभक्तास्तु पृथक्कुर्युः प्रतिसंवत्सरादिकम्।
एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम्॥

*एकत्रवासिनः अविभक्ताः। सर्वानुमत्या ज्येष्ठ एव साक्षात्कर्तेत्यर्थः। विभक्तानां त्वाह—*द्रव्येणेति। अविभक्तानां स्वस्वांशदानसम्पादितसाधारण्येन द्रव्येणानुमतिद्वारा ज्येष्ठ एव साक्षात्कर्तेत्यर्थः। एवं च कर्तृत्वाधिकारयोर्भेदः, न त्वैक्यमित्याह—*ज्येष्ठस्येति। *सर्वे इति। अनुमतिकरणेनेति शेषः। *पृथग्द्रव्याः विभक्ताः। अपिशब्दवशादविभक्तानामितरश्राद्धवत्सपिण्डीकरणान्तान्यपि अपृथगेव। विभक्तानां त्वितरवत्तेष्वपि भेदानुष्ठाने प्राप्ते

---

(१) 'कार्याणि सविभक्तधने' ग०।

एतेनाब्दिकादिष्वविभक्तानामनियम इति वदन् शूलपाणिः परास्तः ।

*दत्तकस्तु जनकस्य पुत्राद्यभावे दद्यान्न तत्सत्त्वे,

*गोत्ररिक्थे जनयितुर्न भजेद्दात्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥

इति मनूक्तेः । इदं जनकस्य पुत्रसत्त्वविषयम् । तच्च प्रवरमञ्जर्यां कात्यायनलौगाक्षिभ्यां स्पष्टमुक्तम् । अथ ये दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण* (१)नार्षेया पृथक् द्रव्या अपि सुताः सपिण्डीकरणान्तानि पृथक् नैव कुर्युः । इतराण्येव पृथक् कुर्युरित्यर्थः,

अर्वाक् संवत्सरात् ज्येष्ठः श्राद्धं कुर्यात्समेत्य च ।
ऊर्ध्वं सपिण्डीकरणात्सर्वे कुर्युः पृथक् पृथक् ॥

इति व्यासवचनात् । सपिण्डीकरणेति तत्कालोपलक्षणम् । तेन द्वादशाहादौ सपिण्डीकरणेऽप्यनुमासिकान्तानां न पार्थक्यम् । नाक्षत्रसपिण्डनस्यैकत्वेऽपि प्रथमाब्दिकादि भिन्नमेव ।

*दत्तकास्त्विति । दत्तकः सर्वोऽपि द्व्यामुष्यायण एव । (२)केवलदत्तकानुपगमादिति मतेनेदम् । (३) (यद्वा केवलदत्तकोऽस्त्येव । परन्तु दत्तकास्त्वित्यस्य द्व्यामुष्यायणदत्तकास्त्वित्यर्थः । तेनायं ग्रन्थः द्व्यामुष्यायणदत्तकपरः) । *गोत्रेति । दात्रिमः सुतः जनकस्य (३)(गोत्रं रिक्थं च न भजेत् । यतः) पुत्रं दातुः पितुः स्वधा और्ध्वदेहिकमपैति । यतो गोत्ररिक्थानुगः पिण्डः श्राद्धमित्यर्थः । अयं च प्रतिग्रहीतृमात्रगोत्रः । *अनार्षेयाः । ऋषिः प्रवरः । जनकप्रवरगोत्रही-

---

(१) "आर्षेयाः' इत्यपि पाठः ।
(२) 'केवले तत्र मानाभावादिति' ख०
(३) धनुश्चिन्हान्तर्गतं नास्ति ख०

जातास्ते द्व्यामुष्यायणा भवन्ति। यथा '(१)शौङ्गशैशिराणां यानि चान्यान्येवं समुत्पन्नानि कुलानि भवन्ति' इत्यादिना द्वयोः पित्रोः प्रवरानुक्त्वोक्तम्—'अथ यद्ये*षां स्वासु भार्यास्वपत्यं न स्यादकथं हरेयुः पिण्डं चैभ्यस्त्रिपुरुषं दद्युर्यद्युभयोर्न स्यादुभाभ्यामेव दद्युरेकस्मिञ्छ्राद्धे पृथगुद्दिश्यैकपिण्डे द्वावनुकीर्तयेत्परिग्रहीतारं चोत्पादयितारं चातृतीयात्पुरुषात्' इति। हेमाद्रौ कार्ष्णाजिनिः—

*यावन्तः पितृवर्ग्याः स्युस्तावद्भिर्दत्तकादयः।
प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह॥
द्वाभ्यां(२)सहाथ तत्पुत्राः पौत्रास्त्वेकेन तत्समम्।
च(३)तुर्थपुरुषे छन्दस्तस्मादेषा त्रिपूरुषी॥
साधारणेषु कालेषु विशेषो नास्ति वर्णिनाम्।

ना इति यावत्। 'आर्षेयाः' इति पाठो युक्तः। *एषामिति। द्व्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रान्तरासत्त्वे तस्मै पिण्डं दद्यात् रिक्थं च हरेत्, न तत्सत्त्वे। यदा तूभयोरप्यौरसपुत्रसत्त्वं तदा कस्मा अपि पिण्डं न दद्यात्। प्रतिग्रहीत्रौरसांशस्य चतुर्थं भागं हरेत्,

उत्पन्ने त्वौरसे पुत्रे चतुर्थांशहराः सुताः।
सवर्णा, असवर्णाश्च ग्रासाच्छादनभाजनाः॥

इति कात्यायनोक्तेः। सवर्णाः क्षेत्रजदत्तकाद्याः इति विज्ञानेश्वरः। यदा तूभयोः पुत्राभावः तदा एकस्मिञ्छ्राद्धे इत्यादिप्रकारेणोभयोरप्येकमेव श्राद्धं कुर्यादित्यर्थः। सपिण्डीकरणमाह—

*यावन्त इति। यदा तूभयोः पुत्राभावः तदा जनकस्य कुले।

---

(१) 'शौङ्गशैशिरीयाणाम् यानि चान्यान्येवं' क०
(२) 'द्वाभ्यां सहायतः पुत्राः' क० (३)'चतुर्थपुरुषे छेदः' क०

((१)मृताहे त्वेकमुद्दिश्य कुर्युः श्राद्धं यथाविधि ॥) इति ।

अस्यार्थमाह हेमाद्रिः—दत्तकादयः जनकपालकयोः कुले प्रेतानां *स्वस्ववर्गीयैः सपिण्डनं कुर्युः। दत्तकानां पुत्रास्तु पितुर्दत्तकस्य पितृभ्यां जनकपालकाभ्यां स्वपितामहाभ्यां सपिण्डनं कुर्युः । तेषां पौत्राः स्वपितरं दत्तकेन पितामहेन *तज्जनकेन च सपिण्डयेयुः। चतुर्थोऽपि *तत्कुलस्थ एव। तेषां प्रपौत्रस्तु द(२)त्तकस्य प्रपितामहस्य पालककुलस्थं चतुर्थं*योजयेन्न वा। छन्द इच्छा । *दर्शमहालयादौ तु द्वयोः पित्रोः पितामहयोः प्रपितामहयो-

एतावता जनकसम्बन्धिपितृव्यादीनां लाभः। एवं पालकस्य कुले इत्यादावपि पालकसम्बन्धिपितृव्यादिलाभः। *स्वस्ववर्गीयैः जनकवर्गीयैः पालकवर्गीयैश्च क्रमेणान्वयः। *तज्जनकेन । प्रपितामहेनैवेति न नियमः, पालककुलस्थयोजनाया आवश्यकत्वात् । अन्यथा पाकलकुलस्थं चतुर्थमिसस्यासङ्गतेः।*तत्कुलस्थः जनककुलस्थः। एवकारोऽप्यर्थः । तथाच—द्वाभ्यां सहेति त्रिभिः पौत्रास्त्वेकेन दत्तकेन शेषं तत्समम् । द्वाभ्यां सहेति द्वाभ्यां त्रिभिरित्यर्थः । *योजयेदिति।जनकपालकयोरेकः पिण्डः योजनपक्षेऽन्यथा जनकस्यैव पिण्ड इत्यर्थः। यथा दत्तकादिसर्वपितृवर्गसम्बन्धिनः सपिण्डनं कार्यम् , तथाऽमावास्यादौ साधारणे काले सर्ववर्गसम्बन्धनिमित्तकं श्राद्धमाह—साधारणेष्विति । तदर्थमाह—*दर्शेति । वाकारः संपातायातः । *नत्रेति,

द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिण्डोदके पृथक् ।
षण्णां देयास्तु षट् पिण्डा एवं कुर्वन्न मुह्यति ॥

---

(१) धनुश्चिह्नान्तर्गतं नास्ति क०
(२) 'दत्तकस्य पितामहस्य' ङ०

र्वा श्राद्धं देयम्। *तत्र *द्वयोः पित्राद्योः पृथक्पिण्डदानं द्वयोरुद्देशेनैको वेति। अत्र केचित् आवयोरयमिति परिभाष्य यो दत्तस्तस्येदं द्वयोः पित्रोः श्राद्धम्। यस्त्वपरिभाष्य दत्तः स ग्रहीतुरेव सपालकायैव दद्यादित्याहुः। अत्र *मूलं त एव प्रष्टव्याः।

वस्तुतस्तु जनकस्य पुत्र*पत्न्याद्यभावे दत्तको द्वयोर्दद्यादन्यथा पालकायैव, *प्रागुक्तकात्यायनवचनात्। मानवीयमप्येतद्विषयमेव। *गोत्रं तु श्राद्धे पालकस्यैव विवाहादौ तूभयोरित्यादि मत्कृतप्रवरदर्पणे ज्ञेयम्। यस्तु मूल्यक्रीतायां परभार्यायां दास्यां चोत्पन्नः स बीजिन

इति देवलवचनात्। *द्वयोरिति, 'यदि द्विपिता स्यादेकस्मिन्पिण्डे द्वावुपलक्षयेत्' इत्यापस्तम्बोक्तेः। स्वयमप्युक्तं 'उभाभ्यामेव दद्युः' इत्यादि। एतदापस्तम्बादिपरमित्यन्ये। पिण्डभेदपक्षे द्व्यामुष्यायणपुत्रस्यामावास्यादौ पित्रे एकः, इतरयोर्द्वौ द्वाविति पञ्च। तत्पौत्रस्य प्रपितामह एव द्वौ, इतरौ द्वाविति चत्वारः। मृताहे इत्यस्यायमर्थः—एकमेवोद्दिश्य प्रतिसांवत्सरमेकोद्दिष्टमेवेति मृताहे एकोद्दिष्टाचारिपरम्। *मूलं त एवेति। आवयोरयमिति संविदः क्वाप्यनुक्तेः। तां विनाऽपि गृहीतस्य द्व्यामुष्यायणत्वमेव। तेन चामावास्यादौ जनकप्रतिग्रहीत्रोरुद्देशेन श्राद्धद्वयमेकं वा कार्यम्। तत्पुत्रेण तु दत्तकस्य तज्जनकप्रतिग्रहीतृभ्यां द्वाभ्यामपि सह सपिण्डनपार्वणश्राद्धादि। एवं तत्पुत्रादिभिरपीति। *पत्न्यादीति। आदिना सखिनृपतिभिन्नरिक्थग्राह्यग्राहिसकलपरिग्रहः। *प्रागुक्तेति। तत्रापत्यपदमधिकार्युपलक्षकम्, पौत्रादिसत्त्वे रिक्थग्रहणासम्भवात्। यद्यपि आहत्य जनकौर्ध्वदेहिकं न स्मर्यते तथाऽपि रिक्थादानमेव तदधिकारलम्भकम्। एवं च मनोर्गोत्रपरित्यागोक्तिविरोधमुद्धरति—*गोत्रं त्विति। वस्तुतस्तु दत्तको द्विविधः केवलो द्व्या-

एव दद्यात् । मूल्यं विना स्वयमुपनतायां तु क्षेत्रिण एव । तदुक्तं पृथ्वीचन्द्रोदये कौर्मे—

अनियोगात्सुतो यस्तु शुल्कतो जायते त्विह ।
प्रदद्याद्बीजिने पिण्डं क्षेत्रिणे तु ततोऽन्यथा ॥ इति ।

क्षेत्रजादेर्विशेषस्तु कलौ तदभावान्नोच्यत इति दिक् ।

मुष्यायणश्च । । न चाद्ये प्रमाणाभावः पुत्रं प्रतिग्रहीष्यामित्यादिपुत्रप्रतिग्रहविधौ भाव्याकाङ्क्षायां जन्यपुंस्त्वरूपपुत्रत्वस्य भाव्यत्वासम्भवाच्छ्राद्धादिपितृकार्यप्रयोजकं प्रतिग्राह्यगतादृष्टं भाव्यमङ्गीकार्यम् । अतः प्रतिग्रहीतृकुले पितृपुत्रादिसम्बन्धविशेषप्रयुक्तानि कार्याणि प्रवर्तन्ते । तत्र ‘गोत्ररिक्थे’ इति मनूक्तेः । केवलोऽपि दत्तको लभ्यते,

द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाहः शौङ्गशैशिरयोर्यथा ॥

इति प्रवराध्याये द्व्यामुष्यायणस्य जनकगोत्रानिवृत्त्युक्तेः तन्निवृत्तिबोधकमानत्वेन केवलदत्तकस्वीकारं विना विरोधप्रसङ्गात् । वस्तुतस्तु “जातपुत्रः कृष्णकेशोऽग्नीनादधीत इत्यादौ वयोवस्थाविशेष इव, “अर्द्धमन्तर्वेदि मिनोति, अर्द्धं बहिर्वेदि” इत्यत्र देशविशेष इवात्र गोत्ररिक्थपिण्डस्वधापदैः जनकादिसम्बन्धप्रयुक्तं कार्यमात्रं लक्ष्यते । तन्निवृत्त्युक्त्या च तद्धेतुजनकादिसम्बन्धमात्रानिवृत्तिः । तत एव च सोदरपितृव्यादिसम्बन्धनिवृत्तिरपि । द्व्यामुष्यायणे तु तदभाव इति सिद्धत्येव केवलो दत्तकः । किञ्च केवलदत्तकानुपगमे “ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृतः पञ्चमात्” इति गौतमीयो विवाहे बीजिकुले सप्तपुरुषं पञ्चपुरुषं च यावद्विवाहनिषेधो व्यर्थ एव स्यात् । द्व्यामुष्यायणे सापिण्ड्यसत्त्वात् केवले तत्र

गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ।

*जारजानां विशेषमाहापरार्के नारदः—

जायन्ते त्वनियुक्तायामेकेन बहुभिस्तथा ।
अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः ॥
दद्युस्ते बीजिने पिण्डं माता चेच्छुल्कतो हृता ।
अशुल्कोपहृतायां तु पिण्डदा वोढुरेव ते ॥

धर्मार्थं श्राद्धकरणे फलमाह चन्द्रिकायां शातातपः-

प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिङ्गिनाम् ।
एवं कुर्वन्नरः सम्यङ् महतीं श्रियमाप्नुयात् ॥

गयायामपि तत्रैव ब्रह्मवैवर्ते—

आत्मजो वाऽथवान्योऽपि गयाशीर्षे यदा तदा ।
यन्नाम्ना पातयेत्पिण्डं तन्नयेद्ब्रह्म शाश्वतम् ॥

इति सापिण्ड्यनिवृत्तेरुक्तेः। पिण्डः सापिण्ड्यं, स्वधौर्ध्वदेहिकमिति। अत एव शूरेण कुन्तिभोजाय दत्रिमत्वेन दत्तायाः कुन्त्याः सुतेऽर्जुने शूरपुत्रदुहित्र्याः सु(१)भद्रायाः सापिण्ड्यनिवृत्तिरुक्ता भट्टसोमेश्वरेण। अत एवायं प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादि कुर्यात् । तत्पुत्रश्च पितुः सपिण्डनपार्वणश्राद्धादि प्रतिग्रहीत्रैव सह। एवं तत्पुत्रोऽपीति। एवं चावयोरयमिति संविदपि द्व्यामुष्यायण (ए(२)व, तस्यास्तज्ज्ञानार्थत्वेन दृष्टार्थत्वात् । अथेत्यादि कात्यायनवाक्यं च तत्परमेव, द्व्यामुष्यायणपदोपादानात्। एवमत्र द्व्यामुष्यायण) पदवति प्रागुक्तवाक्यान्तरेऽपि। कार्ष्णाजिनिवाक्यं च द्व्यामुष्याणपरम्। एवं द्व्यामुष्यायणो जनकस्य प्रतिग्रहीतुर्वा पुत्रान्तरासत्त्वे तस्मै पिण्डं दद्याद्रिक्थं च गृह्णीयात्, न तत्सत्त्वे। उभयोरौरससत्त्वे तु न कस्यापि। प्रतिग्रहीत्रौरसांशचतुर्थभागं हरेत्, "उत्पन्ने त्वौरसे पुत्रे" इति वचनात्। यदा तूभयोरपि न पुत्रस्तदा एकस्मिन् श्राद्धे इति

---

(१) 'सुभद्रायाः सपिण्डनपार्वणश्राद्धादि प्रतिग्रहीत्र्य' ङ०
(२) धनुश्चिन्हान्तर्गतं नास्ति ङ०

एतच्च यदा फलभूमार्थिना द्विस्त्रिर्वा क्रियते तदा प्रेतशिलाश्राद्धवर्ज्यं कुर्यात्, तस्य प्रेतत्वविमोक्षार्थत्वात् तस्य च जातत्वादिति केचित्। वस्तुतस्तु संन्यासिश्राद्धवदत्रापि सर्वं कार्यम्, साङ्गेऽधिकारादिति युक्तं प्रतीमः। संन्यस्तपित्रादिस्तु पितुः पित्रादिभ्यः सर्वश्राद्धेषु दद्यादित्युक्तं प्राक्; वक्ष्यते च जीवत्पितृकश्राद्धे।

अत्र स्त्रीशूद्राणां श्राद्धं मन्त्रवर्ज्यं तूष्णीं भवति,

*स्त्रीणाममन्त्रकं श्राद्धं तथा शूद्रासुतस्य च।
प्राग्द्विजाश्च* व्रतादेशा*त्ते च कुर्यु*स्तथैव तत्॥

इति हेमाद्रौ मरीचिवचनात्;

अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते॥

इति ब्राह्मोक्तेश्च। गृह्यते सम्बध्यते। अस्य (१)श्राद्धप्रकरणे पाठेऽपि परिभाषात्वान्न प्रकरणेन सङ्कोचो युक्तः। तेन शूद्रस्य स्नानदानादावपि विप्रेण मन्त्रपाठः कार्यः। 'अमन्त्रस्य' इति विशेषणात्स्त्रिया अपीति शूलपाणिः। यत्तु तन्नोक्तं *मन्त्रजन्यनियमादृष्टसिद्धिस्तु नमस्कारेण; 'अनुमतोऽस्य नमस्कारो मन्त्रः' इति गौतमोक्तेरिति।

प्रकारेणोभयोरप्येकमेव श्राद्धं कुर्यात् इति। स्वत्वसंपादकमूल्यदानादानाभ्यां विशेषमभिधाय यभनानुकुल्यसंपादकधनदानादानाभ्यां विशेषमाह—*जारजानामिति। *स्त्रीणामिति। स्त्रीणां सुतस्य इति सम्प्रदाने षष्ठ्यौ, तेचेत्युक्तेः। *व्रतादेशात् उपनयनात्। *ते स्त्रीशूद्राः। *तथैव अमन्त्रकमेवेत्यर्थः। *मन्त्रजन्येति। तिलावपनादेरमन्त्रत्वेऽपीत्यादि। दृष्टं मन्त्रार्थस्मरणम्। मन्त्रार्थश्च न तिलादिः।

---

(१) 'श्राद्धप्रकरणपाठेऽपि' क०।

तन्न, दृष्टद्वारैव (१)हि तत्प्राप्तेर्न स्वातन्त्र्येण । अन्यथा नखविपूतेऽप्यवघातजन्यादृष्टार्थं सोपि क्रियेतेति यत्किञ्चिदेतत् । *तेन 'पितॄणां नामगोत्रतः' इत्यादौ यत्र द्विजानामपि नाममन्त्र उक्तस्तत्र प्रतिप्रसवमात्रार्थं युक्तं न तिलावपनादावपि । अत्र केचित्-वैदिकमन्त्रो विप्रस्य, पौराणस्तु शूद्रैः पठनीयः,

न हि वेदेष्वधिकारः कश्चिच्छूद्रस्य विद्यते ।
पुराणेष्वधिकारो मे दर्शितो ब्राह्मणैरिह ॥

इति तत्रैव पाद्मोक्तेरित्याहुः । गौडा अप्येवम् । तन्न,

नाध्येतव्यमिदं शास्त्रं वृषलस्य तु सन्निधौ ।

इति कौर्मे *पुराणनिषेधेन *वेदस्य दूरापास्तत्वात्;

अध्येतव्यं ब्राह्मणेन वैश्येन क्षत्रियेण च ।
श्रोतव्यमेव शूद्रेण नाध्येतव्यं कदाचन ॥
श्रौतं स्मार्तं च वै धर्मं प्रोक्तमस्मिन्नृपोत्तम ।

गौतमीयस्य निर्विषयत्वापत्तिं वारयति । *तेनेति । मन्त्रसामान्यनिषेधो हि नाममन्त्रादिकमपि विषयीकुर्यादिति । तत्र 'पितॄणां नामगोत्रतः' इति प्रतिप्रसूतं, तत्रेदमुपतिष्ठते इत्यर्थः । अधिकमग्रे । द्विजानामपीति सम्पातायातम् । *पुराणेति । पुराणश्रवणेत्यर्थः । वेदस्येति । वेदश्रवणस्येत्यर्थः,

कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।
वेदाक्षरविचारेण शूद्रश्चाण्डलतां व्रजेत् ॥

इति पराशरोक्तेः । विचारः श्रवणाध्ययनादिः, तथा च व्याससूत्रं "श्रवणाध्ययनप्रतिषेधात्स्मृतेश्च" इति । अत्र शङ्कराचार्याः-"अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रपूरणम् । पद्युवा एतच्छ्मशानं यच्छूद्र इति भवति चोदाहरणे । जिह्वाच्छेदो

---

(१) 'हि' नास्ति । क० ।

तस्माच्छूद्रैर्वि*ना विप्रं न श्रोतव्यं कदाचन ॥
इति तत्रैव पुराणाधिकारे भविष्योक्तेश्च । एतेन

धारणे शरीरभेदः' इति । वेदार्थज्ञानमपि निषिद्धं पाद्मे—

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ।
न चाऽस्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥

इति वेदार्थज्ञानौपयिकानामपि योगसाङ्ख्यपूर्वोत्तरमीमांसाव्याकरणाद्यङ्गान्वीक्षिकीस्मृतिपुराणादेरध्ययनादि निषिद्धम्। विशिष्यनिषेधास्तु ग्रन्थगौरवभयान्न लिख्यन्ते ।

निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् ॥

इति सामान्यतो मनूक्तो निषेधः । *विना विप्रमिति । श्रवणं तु पुराणमात्रस्य ब्राह्मणं पुरस्कृत्यैव,

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ।

इति महाभारतात् । अतएव पौराणानामपि गीताचण्डीपाठविष्णुसहस्रनामादिस्तोत्राणां पठने न शूद्रस्याधिकारः । यत्तु आनुशासनिके विष्णुसहस्रनामसु–

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छू(१)द्रस्तु स्वमवाप्नुयात् ॥ इति ।

तत्र 'शूद्रः श्रवणेन' इति शङ्कराचार्यैर्व्याख्यातम् । यत्तु–"श्रावयेच्चतुरो वर्णान्" इतिवचनाद्द्विजानामपि श्रवणमेव स्यादत उक्तम्–अध्येतव्यमिति । एतेन द्विजानामध्ययनविधिवशादधीतैर्मन्त्रैरेवार्थं स्मरेत् इति नियमलाभ इति वेदाध्ययनं ज्ञानद्वारा कर्मार्थत्वाद् दृष्टार्थं, पारायणादावदृष्टार्थम् । श्रवणं त्वदृष्टार्थ(२) (मेव । शूद्राणां तु 'श्रावयेत्' इति स्मरणात् श्रुतैर्मन्त्रैरेवार्थं स्मरेदिति नियमलाभः, इति तुलादिमहादानादावपि मन्त्रश्रवणमेव ज्ञानद्वारा कर्मा-

---

(१) 'शूद्रस्तु सुखमाप्नुयात्' ङ०। (२) धनुश्चिह्नान्तर्गतं नास्ति । ङ ।

'नाध्येतव्यम्' इति निषेधो *मन्त्रेतरपुराणपर इति श्रीदत्तादिमत*मपास्तम् । तेन पौराणमन्त्राणामेव विप्रेण पाठो न वैदिकानामिति सिद्धम् । *द्विजास्त्रियस्तु सङ्कल्पमात्रं स्वयं कृत्वा वैदिकमन्त्रयुक्तं सर्वं ब्राह्मणद्वारा कारयेयुरिति प्रयोगपारिजातः । *अत एव 'स्त्रीणाम्' इत्यकृतविवाहस्त्रीपरमिति हेमाद्रिराह । 'अनुपनीतस्तु वैदिकमन्त्रयुक्तं सर्वं स्वयमेव कुर्यात्' इत्युक्तं प्राक् । यत्तु 'प्राग्द्विजाश्च व्रतादेशात्' इति तदशक्तविषयमचूडविषयं वा इति दिक् ।

शूद्रस्य तु सदाऽऽमश्राद्धमेव,
सदा चैव तु शूद्राणामामश्राद्धं विधीयते ।

र्थत्वाद् दृष्टार्थं फलार्थत्वाददृष्टार्थं च । अध्ययनं तु तस्य कर्मार्थमपि नास्त्येवेत्युक्तं भवति । धर्ममिति क्लीबम् । *मन्त्रेतरेति । "पौराणेतिकर्तव्यताम्नाने पठेत्" इत्याम्नातम् । तत्र शूद्रद्विजयोर्णर्यर्थान्तर्भावाभावाभ्यां निसानिसमंयोगविरोधान्निषेधो मन्त्रान्यपर इत्याशयः । *अपास्तमिति । पुराणानां तत्तच्छाखापरिग्रहवत्स्वप्रवृत्तेरिति भावः । अत एव तत्रेति मन्त्रपर्युदासादसंस्कृतेनेत्यादिना कारणाभिधानाच्च यज्ञेष्विति समन्त्रत्वकथनस्य विप्रेण मन्त्रपाठेऽप्युपपत्तेः । द्विजस्त्रीणां वैदिकमन्त्रश्रवणमात्रं प्रयोगपारिजातकारोऽपि वदतीत्याह—*द्विजास्त्रियस्त्विति । वस्तुतस्तु द्विजस्त्रीणां कारणे मन्त्रपठनाप्रसक्तेस्तेचेसाद्यमन्त्रकत्वं व्यर्थम् । अतः करणपक्षोऽपि वाच्यः । तत्रापि वेदश्रवणेऽधिकारात्समन्त्रत्वकथनं पाठबाधनेनैवार्थवत् । कारणपक्षस्त्वशक्तापरः । ननु स्त्रीणामिति सम्प्रदाने कथं षष्ठी ? ऊढोद्देश्यकश्राद्धे 'मातुः पितुः' इति वचनेन मन्त्रोक्तेरित्यत आह—*अत एवेति । ऊढाश्राद्धस्य समन्त्रत्वादेवेत्यर्थः ।

इति सुमन्तूक्तेः; पृथ्वीचन्द्रोदये मात्स्येऽपि—

एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धं च सर्वदा ।
नमस्कारेण मन्त्रेण कुर्यादामान्नवत्सदा ॥

तत्रैव वृद्धपराशरः—

आमान्नेन तु शूद्रस्य तूष्णीं तु द्विजपूजनम् ।
कृत्वा श्राद्धं तु निर्वाप्य सजातीनाशयेदथ ॥

स एव—

आमं शूद्रस्य पक्वान्नं पक्वमु*च्छिष्टमुच्यते ।

हेमाद्रौ भविष्ये—

धर्मोत्सवस्तु धर्मज्ञा यदि शूद्राः प्रकुर्वते ।
अग्नौकरणमन्त्रश्च *नमस्कारो विधीयते ॥
आवाहनादि कर्तव्यं यथा शूद्रेण तच्छृणु ।
देवानां देवनाम्ना तु पितॄणां नामगोत्रतः ॥
पिण्डादीन्निर्वपेद्वीर नामतो गोत्रतस्तथा ॥

शूद्राणां गोत्राभावेऽपि काश्यपं गोत्रं ज्ञेयम्, 'तस्मादाहुः सर्वाः प्रजाः काश्यप्यः' इति श्रुतेः; 'गोत्रनाशे तु काश्यपः' इति व्याघ्रपादोक्तेश्चेति हेमाद्रिः । एवमन्यत्र गोत्राज्ञाने । एवं तर्पणादिषु च ज्ञेयम् ।

तत्रैव भविष्ये—

*शूद्रस्तु गृहपाकेन न पिण्डान्निर्वपेत्तथा ।

---

*उच्छिष्टमिति । शूद्रस्वामिकहोमादौ पक्ववर्जनार्थम् । *नमस्कार इति । सोमाय पितृमते नमः, अग्नये कव्यवाहनाय नम इत्यर्थः ।

*शूद्रस्त्विति । धर्मोत्सव इति प्रकरणपाठादिदं धार्मिकशूद्रपरम् । इदानींतनशूद्राणां चाधार्मिकत्वात्सक्तुपिण्ड एवेति । यत्तु–'गृहपाकपायसयोर्विधानात् पक्वमुच्छिष्टमिति निषेधः पिण्डदाने न प्रवर्तते'

सक्तु मूलं फलं तस्य पायसं वा भवेत्स्मृतम् ॥

गौतमः-*'अनुमतोऽस्य नमस्कारो मन्त्रः' इति। *'देवताभ्यः पितृभ्यश्च' इत्ययं नमस्कारमन्त्र इति केचित्। विज्ञानेश्वरोऽप्येवमाह । हेमाद्रिस्तु—

शूद्रोऽप्यमन्त्रवत्कुर्यादनेन विधिना बुधः ।

इति मात्स्ये मन्त्रनिषेधान्नाममन्त्रेणेत्याह । पृथ्वीचन्द्रोदये स्कान्दे—

राजकार्ये नियुक्तस्य बन्धनिग्रहवर्तिनः ।
व्यसनेषु च सर्वेषु श्राद्धं विप्रेण* कारयेत् ॥

यत्तु भारते राजधर्मेषु—

यवनाः किराता गान्धाराश्चीनाः शबरबर्बराः ।
शकास्तुषाराः कङ्काश्च पह्लवाश्चान्ध्रमद्रकाः ।

इत्युक्त्वा—

इति शूद्रधर्मप्रकरणे स्वयं लिखितं, तत्र निर्भरो न कार्यः। *अनुमतोऽस्येति । मन्त्रस्थाने हि नमस्कारादेशः । स च नमःशब्दः 'पितॄणां ना(१)मगोत्रतः' इति चोक्तं, केवलनामादेः प्रयोगासम्भवात् 'पिताऽमुकगोत्रामुकदासावनेजनं नमः' इत्यादि प्रयोगः, 'दासान्तं शूद्रजन्मनः' इत्युक्तेः । यत्तु-

नमस्कारेण मन्त्रेण पञ्चयज्ञान्न दापयेत् ।

इति याज्ञवल्क्यवचनं तत्र गृहैकत्ववद्वाक्यभेदापत्तिभयेन पञ्चत्वमविवक्षितम् । एवञ्च शूद्रकर्तृकेष्टापूर्तेष्वपि नमस्कार एव मन्त्रः, कर्माङ्गता च तस्यैव; अनुष्ठेयाप्रकाशकत्वेऽपि वचनात्; 'यो नमसा स्वध्वरः, इति श्रुतेश्च। *देवताभ्य इति। देवेभ्यो नमः, पितृभ्यो नम इत्येतन्मते प्रयोगः कारयेदिति। परन्तु 'ब्राह्मणो हीनवर्णस्य' इति निषेधाच्छूद्रस्य ब्राह्मणो न प्रतिनिधिरित्युक्तं स्मर्तव्यम्।

---

(१) 'नामगोत्रवत् इति' ङ० ।

ब्रह्मक्षत्रप्रसूताश्च वैश्याः शूद्राश्च मानवाः ।
कथं धर्मांश्चरिष्यन्ति सर्वे विषयवासिनः ॥

इति चोक्त्वा—

वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ।
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ॥
दानानि च यथाकालं द्विजेभ्यो विसृजेत्सदा ॥

तथा—

दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता ।
पाकयज्ञा महार्हाश्च कर्तव्याः सर्वदस्युभिः ॥

इति म्लेच्छादीनां श्राद्धविधानं, तदपि सजातीयभोजनद्रव्यदानादिपरं न तु श्राद्धपरमिति ॥

इति श्रीनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ श्राद्धाधिकारिनिर्णयः ॥

अथ पितरः । हेमाद्रौ मात्स्यदेवलौ—

नामगोत्रं पितॄणां तु प्रापकं हव्यकव्ययोः ।
अग्निष्वात्तादयस्तेषामाधिपत्ये व्यवस्थिताः ॥
नाममन्त्रास्त(१)द्दादेशा भवान्तरगतानपि ।
प्राणिनः प्रीणयन्त्येव तदाहारत्वमागतान् ॥
देवो यदि पिता जातः शुभकर्मानुयोगतः ।
तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति ॥
गान्धर्वे भोगरूपेण पशुत्वे च तृणं भवेत् ।
श्राद्धान्नं वायुरूपेण नागत्वेऽप्युपतिष्ठति ॥
पानं भवति यक्षत्वे राक्षसत्वे तथाऽऽमिषम् ।
दनुजत्वे तथा मद्यं प्रेतत्वे रुधिरोदकम् ॥
मनुष्यत्वेऽन्नपानादि (२)नानाभोगकरं भवेत् ॥

अत्र पित्रादिशब्दैर्जनकादीनामेव देवतात्वमुच्यते

---

(१) 'तद्वादेशान्भवान्तर' क० (२) 'नामाभोगकर' ग०

न वस्वादीनाम्, 'असावेतत्ते इति यजमानस्य पित्रे' इति शतपथश्रुतेः; 'यस्य पिता प्रेतः स्यात्स पित्रे पिण्डं निधाय' इति विष्ण्वादिस्मृतेश्च । यत्तु मनुदेवलौ—

वसवः पितरो ज्ञेया रुद्रा ज्ञेयाः पितामहाः ।
प्रपितामहास्तथाऽऽदित्याः श्रुतिरेषा सनातनी ॥

यच्च याज्ञवल्क्यः—

वसुरुद्रादितिसुताः पितरः श्रा(१)द्धदेवताः ।

तदभेदध्यानार्थम् । यानि तु हेमाद्रौ नन्दिपुराणे—

विष्णुः पिताऽस्य जगतो दिव्यो यज्ञः स एव च ।
ब्रह्मा पितामहो ज्ञेयो ह्यहं च प्रपितामहः ॥ इति,

यच्च भविष्ये—

अनिरुद्धः स्वयं ज्ञेयः प्रद्युम्नश्च पिता स्मृतः ।
संकर्षणस्तज्जनको वासुदेवस्तु तत्पिता ॥

स्वयं कर्ता । यत्तु तत्रैव—

प्रथमो वरुणो ज्ञेयः प्राजापत्यस्तथाऽपरः ।
तृतीयोऽग्निः स्मृतः पिण्डा ह्येष पिण्डविधिः स्मृतः ॥

यच्च मनुः—

सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः ।
वैश्यानामाज्यपा नाम शूद्राणां तु सुकालिनः ॥

यच्चादित्यपुराणे—

मासाश्च पितरो ज्ञेया ऋतवश्च पितामहाः ।
संवत्सरः प्रजानां च(२)सुष्ठ्वेकः प्रपितामहः ॥

यच्च नन्दिपुराणे—

अग्निष्वात्ता ब्राह्मणानां पितरः परिकीर्तिताः ।
राज्ञां बर्हिषदो नाम विशां का(३)व्याः प्रकीर्तिताः ॥

---

(१) 'श्राद्धदेवताः । इति तदभे' क० ।

(२) 'सुष्ठूकः प्रपितामहः' क०। (३) 'विशां कव्याः प्रकीर्तिताः' क०।

सुकालिनस्तु शूद्राणां व्यामा म्लेच्छान्त्यजातिषु॥

अत्रावाहनादिषु पित्रादयः समुच्चयेन विकल्पेन वा यथाचारं तत्तद्देवतारूपेण वाच्या इति हेमाद्र्यादयः। हेमाद्रौ ब्राह्मे—

पार्वणं कुरुते यस्तु केवलं पितृहेतुकम्।
मातामहं न कुरुते पितृहा स प्रजायते॥

धौम्यः—

पितरो यत्र पूज्यन्ते तत्र मातामहा ध्रुवम्।
अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्॥

अस्यापवादमाह कात्यायनः—

कर्षूसमन्वितं मुक्त्वा तथाऽऽद्यं श्राद्धषोडशम्।
प्रत्याब्दिकं तु शेषेषु पिण्डाः स्युः षडिति स्थितिः॥

कर्षूसमन्वितं सपिण्डीकरणम्। दर्शादौ सपत्नीकानामेव देवतात्वम्,

स्वेन भर्त्रा समं श्राद्धं माता भुङ्क्ते सुधासमम्।
पितामही च स्वेनैव तथैव प्रपितामही॥

इति तत्रैवोक्तेः; चन्द्रिकायां चतुर्विंशतिमते—

क्षयाहे वर्जयित्वैकं स्त्रीणां नास्ति पृथक् क्रिया।
केचिदिच्छन्ति नारीणां पृथक् श्राद्धं महर्षयः॥
अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि।
अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह॥

इति कात्यायनोक्तेश्च। अस्य निर्मूलतां वदन्तो गौडास्त्वज्ञा एव। अत्र *'भागः' इत्यध्याहारः, अन्यथा *'सपतिकायै मात्रे' इति प्रयोगापत्तेः। 'अत्र मातृशब्दो जनन्यामेव मुख्यः। तेन सपत्नमातृभ्यो न दद्यात्।

---

*भाग इति। अंशभागित्वादप्राधान्यलाभः। *सपतिकायै इति।

एवं पितामह्यादिशब्दैः पितृजनन्यादय एवोच्यन्ते इति तत्सपत्नीभ्यो न देयम्' इति हेमाद्रिः । *'कारुण्येन तु महालयादौ देयम्' इति स एव ।

अथ विश्वेदेवाः । हेमाद्रौ शङ्खबृहस्पती—

इष्टिश्राद्धे क्रतुदक्षौ सत्यौ नान्दीमुखे वसू ।
नैमित्तिके कामकालौ काम्ये च धुरिलोचनौ ॥
पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ ॥

तत्रैव—

उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः ।
अयमुच्चारणीयस्तैः श्लोकः श्रद्धासमन्वितैः ॥
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥ इति।

*'इष्टिश्राद्धं श्राद्धं (१)प्रति रुचिरित्युक्तम्' इति कल्पतरुः । *आधानादिकर्माङ्गमित्यन्ये । नैमित्तिकमेकोद्दिष्टम्,

एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।

पतिना सहेति तृतीयानिर्देशेन मातुः (२)(प्राधान्यलाभादिति भावः । *कारुण्येन त्विति । केचिदिच्छन्तीति चतुर्विंशतिमतात् ।) *इष्टिश्राद्धमिति । इच्छार्थेष्धातोः क्तिना इष्टिः । हेमाद्र्यादिमतमाह—*आधानादीति। आदिना सोमयागनिषेकादिसंस्कारत्रयपरिग्रहः, तदङ्गम्——

निषेककाले सोमे च सीमन्तोन्नयने तथा ।
ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत् कृतम् ॥

इति पारस्करेण वृद्धीतिकर्तव्यतातिदेशेन कर्माङ्गशब्देन परिभाषितं, तदन्यकर्माङ्गं तु नान्दीमुखापरनामकवृद्धिश्राद्धशब्देन

---

(१) 'प्रति प्रातिरुचिः' क० (२) धनुश्चिह्नान्तर्गतं नास्ति । उ० ।

इति (१)भविष्योक्तेः । एतद्यद्यपि 'एकोद्दिष्टं देवहीनम्' इति तत्र विश्वेदेवनिषेधस्तथापि नवश्राद्धे *द्वादशमासिके च कामकालौ ज्ञेयौ,

*नवश्राद्धं दशाहानि नवमिश्रं तु षडृतून् ।
अतः परं पुराणं वै त्रिविधं श्राद्धमुच्यते ॥
य(२)स्मिन्नेव पुराणे वा विश्वेदेवा न लेभिरे ।
आसुरं तद्भवेच्छ्राद्धं वृषलं मन्त्रवर्जितम् ॥

इति बह्वृचपरिशिष्टात् । एतच्च बह्वृचानामेव, तेषामेवोक्तेः । अन्येषां तु 'नात्र विश्वेदेवाः' इति कात्यायनोक्तेस्तन्निषेध एवेति पृथ्वीचन्द्रोदयः । अन्ये तु *नैमित्तिकं सपिण्डीकरणमाहुः । भविष्ये यद्यप्येकोद्दिष्टं तच्छब्देनोक्तं, तथापि—

तदप्यदैवं कर्तव्यमयुग्मान्भोजयेद्द्विजान् ।
पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् ।

इति वृद्धवसिष्ठेनेति तयोर्भेदः । वस्तुतस्तु इष्टिश्राद्धं न कर्माङ्गश्राद्धं मानाभावात्, किन्तु आधानाङ्गमात्रं तस्यैव पावमानेष्टीनां समप्राधान्यपक्षे कथञ्चिदिष्टिजन्माहवनीयादिप्रयोज्यत्वेनेष्टिश्राद्धत्वात् । यद्वा—

यस्य जाताः प्रमीयेरन् पुत्रा नैव भवन्ति वा ।
ऋतुकाले दिने षष्ठे दम्पती समलङ्कृतौ ॥
कृत्वाऽऽभ्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकम् ॥

इत्यादिना प्रयोगपारिजातादौ विहितपुत्रकामेष्ट्यङ्गश्राद्धमेव ग्राह्यम् । आधानाङ्गश्राद्धे तु नान्दीमुखवत् सत्यवसुविश्वेदेवौ । *द्वादशमासिके इति । षोडशश्राद्धानि द्रष्टव्यानि । *नवेति नवमिश्रस्यापि ग्रहः । *नैमित्तिकं सांवत्सरिकमित्यन्ये । पितृ-

---

(१) 'भविष्योक्तेः । यद्यपि' क० (२) 'अस्मिन्नेव पुराणे वा' क०

इति तत्रैव विश्वेदेवनिषेधात्। यद्यपि सपिण्डीकरणेंऽशत एकोद्दिष्टत्वं तथापि—

स(१)पिण्डीकरणश्राद्धं देवपूर्वं नियोजयेत्।

इति वचनात्तत्परत्वम्। हेमाद्रावादित्यपुराणे—

विश्वेदेवौ क्रतुर्दक्षः *सर्वास्विष्टिषु कीर्तितौ।
*नित्ये नान्दीमुखे श्राद्धे वसुस(२)त्यौ च, पैतृके ॥
*नवान्नलम्भने देवौ कामकालौ सदैव हि।
अपि *कन्यागते सूर्ये काम्ये च धुरिलोचनौ ॥
पुरूरवार्द्रवौ चैव विश्वेदेवौ तु पार्वणे।

क्वचिद्विश्वेदेवापवादमाह हेमाद्रौ शातातपः—

नित्यं श्राद्धमदैवं स्यादेकोद्दिष्टं तथैव च।
मातुः श्राद्धं च युग्मैः स्याददैवं प्राङ्मुखैः पृथक् ॥
योजयेद्देवपूर्वाणि श्राद्धान्यन्यानि यत्नतः ॥

नान्दीश्राद्धे भिन्नप्रयोगपक्षे मातुः श्रा(३)द्धमदैवमिति हेमाद्रिः।

अथ विप्राः। ते चोत्तममध्यमाधमभेदेन त्रिविधाः।

पक्षे चतुर्दश्यामेकोद्दिष्टमित्यन्ये। *सर्वास्विति बहुत्वमाधानपरम्, पुनराधानेऽपि श्राद्धसत्त्वात्। काम्येऽपि श्राद्धपरं वा। *नित्येति। आवश्यकेत्यर्थः। *नवान्नेति। एतदेव पूर्वं नैमित्तिकपदेनोक्तमित्येके। नवान्नभोजनात्प्राक् पितृभक्त्या क्रियमाणमित्यन्ये। व्रीहिपाकयवपाकयोः कर्तव्यमितीतरे। नवान्नशब्दस्य नैमित्तिकमात्रोपलक्षणतया राहूपरागादेरपि ग्रह इति तु हेमाद्रिः। *कन्येति। कन्यास्थरविनिमित्तके महालयश्राद्धे प्रौष्ठपदीश्राद्धे च।

---

(१) 'सपिण्डीकरणं श्राद्धं' क०।
(२) 'सत्ये च' क०।
(३) 'श्राद्धमदैवतम्' क०।

तत्राद्याः । अत्र मदीयाः श्लोकाः—

*त्रि(१)नाचिकेतस्त्रिमधुश्च बह्वृचो-
ऽप्याथर्वणो याजुषसामगौ च ।

*त्रिनाचिकेतेति । ज्येष्ठसाम सामविशेषस्तद्व्रताचरणेन योऽधीते स ज्येष्ठसामा । सभ्यावसथ्याभ्यां सह त्रेता यस्यास्ति सपञ्चाग्निः । पञ्चाग्नि (वि(२)द्याध्यायी च । सामगः सामवेदाध्यायी । आपस्तम्बः—

त्रिनाचिकेतः पञ्चाग्नि) स्त्रिसुपर्णः षडङ्गवित् ।
ब्रह्मदेयानुसन्तान श्छन्दोगो ज्येष्ठसामगः ।
वेदार्थवित प्रवक्ता च ब्रह्मचारी सहस्रदः ॥
शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः ।

ब्रह्मदेयानुसन्तानो ब्राह्मविवाहोढाजः, गवां सुवर्णस्य वा सहस्रदः ।

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः ॥

सर्वेषु वेदादिष्वस्खलिताध्ययनक्षमा अग्र्याः । याज्ञवल्क्यः—

अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा ।
वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः ॥
कर्मनिष्ठास्तपोनिष्ठाः पञ्चाग्निब्रह्मचारिणः ।
पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसम्पदे ॥

श्रोत्रियः श्रुताध्ययनसम्पन्नः । ब्रह्मविद् ब्रह्मज्ञानवान् , युवत्वं च सर्वविशेषणम् । ब्राह्मणाः, न क्षत्रियादयः । श्राद्धस्याक्षयफलसम्पादका इत्यर्थः । मनुः—

यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् ।
शाखान्तगमथाध्वर्युं छन्दोगं वा समाप्तिगम् ॥

---

(१) 'त्रिणाचिकेत' ग० ।

(२) धनुश्चिह्नान्तर्गतं नास्ति ङ० ।

षडङ्गविच्च त्रिसुपर्णवेत्ता-
ऽप्यथर्वशीर्षोऽध्ययने रतश्च ॥
शाता(१)यु*र्वेदार्थविदौ प्रवक्ता
स्याद्ब्रह्मचारी च तथा*ग्निचिच्च ।

तस्मात्सर्वप्रयत्नेन श्राद्धकाले त्वथर्वणम् ।
भोजयेद् द्रव्यकल्पेषु पितॄणां च तदक्षयम् ॥

माधवीये मनुः—

वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः ।
स्वधर्मनिरताः शान्ताः क्रियावन्तस्तपस्विनः ॥
तेभ्यो हव्यं च कव्यं च प्रसन्नेभ्यः प्रदीयते ॥

मनुः—

य भाष्ये वेदत्रैविद्ये ये च व्याकरणे रताः ।
अधीयानाः पुराणं च धर्मशास्त्राण्यथापि वा ॥
चतुर्दशानां विद्यानामेकस्यापि च पारगाः ।
श्राद्धकल्पं पठेयुर्ये ते सर्वे पङ्क्तिपावनाः ॥

*वेदार्थेति,

स्थाणुर्भारहरो विप्रः पठनार्थं न वेत्ति यः ।
स कथं पात्रतामेति कथमर्हति केतनम् ॥
अतो विद्वत्तमायैव हव्यकव्यानि दापयेत् ।
अधीतमात्रवेदं तु तदभावे नियोजयेत् ॥

इति कौर्मम्। अनधीतवेदो वेदार्थवेत्ता निषिद्ध एव। *अग्निचिदिति ।

यदा च श्रोत्रियोऽभ्येति गृहं वेदविदग्निचित् ।

इत्यादि । आपस्तम्बः—

ये सोमपा विरजसो धर्मज्ञाः शान्तबुद्धयः ।
व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥

---

(१) 'शातायुर्वेदार्थविदौ' ग० ।

सीदद्वृत्तिः सत्यवाक्*पूरुषैः स्वै-
र्मातापित्रोः पञ्चभिः ख्यातवंशः ॥
पत्नीयुक्तो ज्येष्ठसामा पुराण-
वेत्ता पुत्री चेतिहासेष्वभिज्ञः ।
योगी *भिक्षुः *सामगो ब्रह्मवेत्ता

चान्द्रायणव्रतचरः सत्यवादी पुराणवित् ।
अथर्वशिरसोऽध्येता ब्राह्मणाः पङ्क्तिपावनाः ॥
शिशुरप्यग्निहोत्री च न्यायविच्च षडङ्गवित् ।
मन्त्रब्राह्मणविच्चैव यश्च स्याद्धर्मपाठकः ॥
निष्णातः सर्वविद्यासु शान्तो विगतकल्मषः ।
गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः ॥
विमुक्तः सर्वदा धीरो ब्रह्मभूतो द्विजोत्तमः ।
अनमित्रो न वा मित्रो मैत्र आत्मविदेव च ।

*पूरुषैरिति—

पुरुषत्रयविख्यातैः सर्वं श्राद्धं प्रकल्पयेत् ।

इति छागलोक्तेः ।

दूरादेव परीक्षेत ब्राह्मणान् वेदपारगान् ।
इष्टान् वा यदि वाऽनिष्टांस्तत्कालेनैव मानयेत् ॥

इति याम्ये । दूरादिति प्रपितामहादन्यभोजनीयब्राह्मणपर्यन्तमिति माधवः । शङ्खः—

ब्रह्मदेयानुसन्तानो ब्रह्मदेयाप्रदायकः ।
ब्रह्मदेयापतिश्चैव ब्राह्मणाः (१)पङ्क्तिपावनाः ॥

*भिक्षुः । हरेर्हरस्य वा ध्यानशीलः । कौर्मे—

पत्नीपुत्रसमायुक्तान् श्राद्धकर्मणि भोजयेत् ।

*सामगः सामस्वरविधिज्ञः । यद्वा—

---

(१) 'पङ्क्तिपावनाः । नित्यं योगपरो विद्वान् समलोष्ठाश्मकाञ्चनः । ध्यानशीलो यतिर्विद्वान् ब्राह्मणाः पङ्क्तिपावनाः ॥ समेति' घ० ङ०

पञ्चाग्निश्च*श्रोत्रियस्तत्सुतो वा ॥
शंभुध्यायी श्रीशपादाब्जसेवी
पान्थश्चैते तूत्तमाः संप्रदिष्टाः ।
भिक्षुर्योगी*पान्थ एते त्वलभ्या
भाग्याल्लब्धाश्चेत्तदा भोजनीयाः ॥
श्राद्धे विप्रेषूपविष्टेषु पश्चा-
त्संप्राप्ताश्चेद्विप्रपङ्क्तौ तु भोज्याः ॥

यद्येकं भोजयेच्छ्राद्धे छन्दोगं तत्र भोजयेत् ।
ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते ॥

इति विशेषविध्यर्थमिदम् । *श्रोत्रिय इति । श्राद्धसागरादौ पितुः श्रोत्रियत्वेन पुत्रस्य श्रेष्ठ्यम् ,

अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः ॥
(अ(१)श्रोत्रियोऽपि पुत्रः स्यात्पिता स्याद्वेदपारगः ॥
ज्यायांसमनयोर्विद्याद्यस्य स्याच्छ्रोत्रियः पिता ।)
मन्त्रसंपूजनार्थं तु सत्कारमितरोऽर्हति ॥

इति मनूक्तेः । ज्यायांसं श्राद्धार्हेषु श्रेष्ठमितरोऽश्रोत्रियसुतः श्रोत्रियः । पूर्वाभावे सत्कारे श्राद्धयोग्यत्वम् । यमः—

नक्षत्रतिथिपुण्यादीन् मुहूर्तान्मङ्गलानि च ।
न निर्दिशन्ति ये विप्रास्तैर्भुक्तं ह्यक्षयं भवेत् ॥

*पान्थः अतिथिः,

न परीक्षेत चरितं न विद्यां न कुलं तथा ।
न शीलं न च देशश्चातिथेरागमनस्य च ॥
सुरूपं वा कुरूपं वा कुचैलं वा सुवाससम् ।
विद्यावन्तमविद्यं वा सगुणं वाऽथ निर्गुणम् ॥
मन्येत विष्णुमेवैनं साक्षान्नारायणं हरिम् ।

---

(१) धनुश्चिह्नान्तर्गतं नास्ति ङ०

अत्र मूलं हेमाद्रौ ज्ञेयम् । तत्रैव नारदः—

*यो वै यतीननादृत्य भोजयेदितरान् द्विजान् ।
विजानन्वसतो ग्रामे कव्यं तद्याति राक्षसान् ॥

दीपकलिकायां दक्षः—

विना मांसेन मधुना विना दक्षिणयाऽऽशिषा ।
परिपूर्णं भवेच्छ्राद्धं यतिषु श्राद्धभोजिषु ॥

एतच्च(१) *ज्ञानिविषयम् । त्रिणाचिकेतस्त्रिसुपर्णौ यजुर्वेदैकदेशौ तद्व्रतेन तदध्यायिनौ, 'यस्य सप्त पूर्वे सोमपाः स त्रिसुपर्णः' इति बोपदेवः । सत्रिमधुर्ऋग्वेदैकदेशस्तदध्यायी । केचिन्नाचिकेतं चयनं त्रिः कृतवा-

---

अतिथिं समनुप्राप्तं विचिकित्सेन्न कर्हिचित् ॥
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पाञ्चदक्षिणः ॥
न वक्तव्यं सदा विप्रे क्षुधिते नास्ति किञ्चन ।
तस्मै सत्कृत्य यो दद्यादपूतो(२) यज्ञ उच्यते ॥

इति नृसिंहपुराणात् । छागलेयः—

आतिथ्यरहिते श्राद्धे भुञ्जते ये बुधा द्विजाः ।
वृथाकृतेन पाकेन काकयोनिं व्रजन्ति ते ॥

ब्रह्माण्डे—

शिखिभ्यो धातुरक्तेभ्यो त्रिदण्डिभ्यश्च भोजयेत् ।

शिखिनो ब्रह्मचारिणः । धातुरक्तवस्त्रधारिणो वानप्रस्थाः । त्रिदण्डिनः कायवाङ्मनोदण्डोपेता यतयः । एषामुत्तरोत्तरं श्रैष्ठ्यं द्रष्टव्यम् । अत एवाह—*यो वै इति । ब्रह्माण्डेऽपि—

अलाभे सति भिक्षूणां भोजयेद् ध्यानिनः शुभान् ।

---

(१) 'ज्ञानविषयम् । त्रिनाचिकेतः' क०

(२) 'पूजो' घ०

नित्यर्थमाहुस्तद्धेमाद्रिविरुद्धम् । हेमाद्रौ गौतमः-*'युवभ्यो दानं प्रथमं पितृवयस' इत्येके । मात्स्ये मनुः—

यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम् ।
साम्नस्वरविधिज्ञश्च *पाङ्क्तिपावनपावनाः ॥

कौर्मे—

असमानप्रवरको ह्यसगोत्रस्तथैव च ।
असम्बन्धी च विज्ञेयो ब्राह्मणः श्राद्धसिद्धये ॥

असम्भवेऽपि तेषां वै नैष्ठिकान् ब्रह्मचारिणः ॥
तदलाभेऽप्युदासीनं गृहस्थमपि भोजयेत् ॥

यतयस्त्रिदण्डिन इति केचित् । ध्यानिनो वानप्रस्थाः । उदासीनोऽसम्बन्धी । *ज्ञानीति । याज्ञवल्क्येन ब्रह्मविदुक्तेः ।

एवम्—-

गृहस्थानां सहस्राच्च वानप्रस्थशतादपि ।
ब्रह्मचारिसहस्राच्च योगी त्वेको विशिष्यते ॥
नास्तिको वा विधर्मो वा सङ्कीर्णस्तस्करोऽपि वा ।
अत्यन्तं तारयेन्नूनं योगीत्याह प्रजापतिः ॥

योगिनं मां मा जानन्त्विति भीत्या कृत्रिमं नास्तिक्यादिकं द्रष्टव्यम् ।

योगिनं समतिक्रम्य (१)(भोजयन्ति परं नरम् ।
दाता भोक्ता च नरकं गच्छतः सह बान्धवैः ॥

इति ब्रह्मवैवर्ते योगिश्रैष्ठ्यम् । *युवभ्य इति ।)युवा मध्यमवयस्कः । *पङ्क्तीति ।

(२)अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः ।
तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान् ॥

---

(१)धनुश्चिह्नान्तर्गतं नास्ति क । (२) 'अपाङ्क्तोपहता पङ्क्तिः' क ।

गारुडे—

श्राद्धेषु विनियोज्यास्ते ब्राह्मणा ब्रह्मवित्तमाः ।
ये *योनिगोत्रमन्त्रान्तेवासिसम्बन्धवर्जिताः ॥

मनुः—

*न मित्रं भोजयेच्छ्राद्धे धनैः कार्योऽस्य संग्रहः ।
नारिं न मित्रं (१)यो विद्यात्तं तु श्राद्धे निमन्त्रयेत् ॥

द्वयो*र्भ्रात्रोः श्राद्धे भोजनं निषिद्धम्,

पितृपुत्रौ भ्रातरौ द्वौ निरग्निं गुर्विणीपतिम् ।
सगोत्रप्रवरं चैव श्राद्धेषु परिवर्जयेत् ॥

इति श्राद्धदीपकलिकायां जातूकर्ण्योक्तेः ।

अथ मध्यमाः । हेमाद्रौ कौर्मिगार्ग्यौ—

नैकगोत्रे हविर्दद्याद्यथा कन्या तथा हविः ।
*अभावे ह्यन्यगोत्राणामेकगोत्रांस्तु भोजयेत् ॥

अत्र केचित्स्वशाखीयान्मुख्यानाहुः पठन्ति च—

निमन्त्रयीत पूर्वेद्युः स्वशाखीयान्द्विजोत्तमान् ॥
स्वशाखीयद्विजाभावे द्विजानन्यान्निमन्त्रयेत् ॥

*योनिसम्बन्धा मातुलादयः । गोत्रसम्बन्धाः सपिण्डादयः । मन्त्रसम्बन्धाः वेदाध्यापकाः । अन्तेवासिसम्बन्धा शिल्पशास्त्राद्युपाध्यायाः । *न मित्रमिति ।

कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम् ।
(अभिरूपं विद्वांसम् ।)
द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥

इति त्वनुकल्पार्थमिति माधवः । काममित्यनुज्ञाभानमात्रम् । अरिभोजने दोषाधिक्यार्थमिति वस्तुगतिः । *भ्रात्रोरिति । पितृपुत्रावपि द्रष्टव्यौ । *अभावे हीति । असमप्रवराभावे समा-

---

(१) 'नारिं' न मित्रं यं विद्यात् क०

इति । इदं तु निर्मूलत्वा*द्धेमाद्रिणा दूषितत्वाच्चोपेक्ष्यम् । मनुरपि—

यत्नेन भोजयेच्छ्राद्धे ब्राह्मणं वेदपारगम् ।
शाखान्तगमथाध्वर्युं छन्दोगं वा समाप्तिगम् ॥
एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्चितः ।
पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी ॥

*अत्र मामकः श्लोकः—

मातामहो मातुलभागिनेय-
दौहित्रजामातृगुरुस्वशिष्याः ।
ऋत्विक् च याज्यश्वशुरौ स्वबन्धु-
श्याला गुणाढ्यास्त्व(१)नुकल्पभूनाः ॥

'बन्धवो मातृष्वसृपितृष्वसृमातुलपुत्राः' इति बोपदेवः । अत्र मूलं हेमाद्रौ ज्ञेयम् । सगुणस्त्व(२)स्तीयाद्यतिक्रमे दोष एव,

सप्त पूर्वान्सप्त परान्पुरुषानात्मना सह ।
अतिक्रम्य द्विजानेतान्नरके पातयेत्खग ॥

नप्तवरानपि । इत्युत्तरार्धं *हेमाद्रिणेति । नानाशाखीयानां याज्ञवल्क्यादिभिरुक्तत्वात् । स्वशाखीयानेव प्रति कन्या देयेत्यत्रापि मानाभावात् सम्बन्धिनोऽनुक्रामति-* अत्रेत्यादिना । *अत्रेति मूलं च मनुः—

मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् ।
दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यांश्च भोजयेत् ॥

---

(१) 'अनूकूलयभूनाः' क०

(२) तथा च मार्कण्डेयपुराणेऽपि दौहित्र ऋत्विक् जामाता स्वस्रीयः श्वशुरस्तथा । पञ्चाग्निकर्मनिष्ठाश्च तपोनिष्ठः स्वमातुलः ॥ मातापित्रश्चैव शिष्यसम्बन्धिबान्धवाः । एते द्विजोत्तमाःश्राद्धे समस्ताः केतनक्षमाः ॥

*सम्बन्धिनस्तथा सर्वान्दौहित्रं विट्पतिं तथा ।
भागिनेयं विशेषेण तथा बन्धुं खगाधिप ॥

इति मदनरत्ने भविष्योक्तेः । अत एव याज्ञवल्क्यः—

*ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे ।

इति गुणव्यतिक्रमे दशपणं द(१)ण्डमाह । *आसन्नमात्रपरमिदम् । *मूर्खे तु न दोषः,

विट्पतिर्जामाता । गारुडे—

उदासीनेष्वलब्धेषु भोज्याः सम्बन्धिनोऽपि हि ।
मातुलश्यालयाज्यर्त्विक्शिष्याचार्यादयोऽपि च ॥

व्यासः—

अग्न्याधेयं पाकयज्ञमग्निष्टोमादिकं तथा ।
यः करोति वृतो नूनमृत्विजं तं प्रचक्षते ॥

एतेन याज्यो व्याख्यातः । *सम्बन्धिनस्तथेति माता(२)महाद्यतिक्रमणे दोषसमुच्चयार्थम् । एवमुदासीनाश्चेद्धीनगुणाः तदा मध्यगुणा हीनगुणा वा सम्बन्धिनो नातिक्रमणीयाः,

सम्बन्धिनस्तथा सर्वान् दौहित्रं विट्पतिं तथा ।
भागिनेयं विशेषेण तथा बन्धुगणानपि ॥
नातिक्रमेन्नरस्त्वेतान्मूर्खानाह वरानने ॥

इति प्रभासखण्डात् । *ब्राह्मणप्रातिवेश्येति कर्मधारयः । स्वगृहसमीपरथ्यः प्रातिवेश्यः । *आसन्नमात्रेति । मात्रपदं कृत्स्नार्थम् । तेन मुख्यानुकल्पयोर्ग्रहः । *मूर्खे त्विति । यत्तु—

सन्निकृष्टं द्विजं यस्तु शुक्लजातिप्रियंवदम् ।
मूर्खं वा पण्डितं वाऽपि व्रतहीनमथापि वा ।

---

(१) 'दण्डपणमाह' क०
(२) 'मातामयहायाति' ङ ।

ब्राह्मणातिक्रमो नास्ति (१)मूर्खे चैव विवर्जित ।
ज्वलन्तमग्निमुत्सृज्य नहि भस्मनि हूयते ॥

इति कात्यायनोक्तेः । विप्रस्यापि दोषः,

अविद्वान्प्रतिगृह्णानो भस्मीभवति दारुवत् ।

इति मनूक्तेः । अपरार्के अत्रिः—

षड्भ्यस्तु पुरुषेभ्योऽर्वागश्राद्धेयास्तु गोत्रिणः ।
षड्भ्यस्तु परतो भोज्याः श्राद्धे स्युर्गोत्रजा अपि ॥

एतच्च ब्राह्मणालाभे, अपिशब्दात् । असम्भवे हेमाद्रौ गौतमः—'शिष्यांश्चैके सगोत्रांश्च भोजयेदूर्ध्वं त्रिभ्यो गुणवतः'। आपस्तम्बः—'ब्राह्मणान्भोजयेद्योनिगोत्रमन्त्रान्तेवास्यसम्बन्धिनः । गुणहान्यां तु परेषां समुदितः सोदर्योऽपि भोजयितव्यः । एतेनान्तेवासिनो व्याख्याता' इति । अत्र विशेषमाहात्रिः—

पिता पितामहो भ्राता पुत्रो वाऽथ सपिण्डकः ।
न परस्परमर्घ्याः स्युर्न श्राद्धे ऋत्विजस्तथा ॥
नातिक्रामेन्नरो धीमान् दारिद्र्याभिहतं तथा ॥

इति मूर्खातिक्रमनिषेधः, तत्रोक्तं महाभारते —

यदि स्यादधिको विप्रो दूरे वृत्तादिभिर्युतः ।
तस्मै यत्नेन दातव्यमतिक्रम्यापि सन्निधौ ॥

भविष्येऽपि—

यस्य त्वेकगृहे मूर्खो दूरस्थश्च गुणान्वितः ।
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ॥

अन्यथा तु भविष्ये—

गायत्रीमात्रसारोऽपि ब्राह्मणः पूजितः स्वतः ।
गृहासन्नो विशेषेण न भवेत्पतितः स चेत् ॥ इति ।

---

(१) 'मूर्खे वेदविवर्जिते' क०

ऋत्विक्पुत्रादयोऽप्येते सकुल्या ब्राह्मणाः स्मृताः ।
*वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः ॥
सगोत्रा न नियोक्तव्याः स्त्रियश्चैव विशेषतः ॥ इति ।

अथ वर्ज्याः । अत्र मामकाः श्लोकाः—

वर्ज्यान् प्रवक्ष्ये त्वथ रोगिवैरि-
हीनाधिकाङ्गान्कितवान्कृतघ्नान् ।
नक्षत्रशास्त्रेण च जीवमाना-
न्भैषज्यवृत्त्याऽपि च राजभृत्यान् ॥
सङ्गीतकायस्थकुसीदवृत्त्या
वेदक्रयेणापि कवित्ववृत्त्या ।
देवार्चनेनापि च जीवमाना-
न्स्वाध्यायदाराग्निसुतोज्झकाणान् ॥
दुर्वालखल्वाटकुनख्यधर्मि-

सन्ध्योपासनमात्रगुणः परेषां समुदितः श्रेष्ठसमुदायमध्यस्थः । *वैश्वदेवे इति ।

पितृव्यगुरुदौहित्रऋत्विक्स्वस्रीयमातुलान् ।
पूजयेद्धव्यकव्येन वृद्धानतिथिबान्धवान् ॥

इति विष्णुपुराणवचने ऋत्विक्पितृव्यसोदर्यसपिण्डा वैश्वदेवस्थाने योज्याः, नतु पित्रादिस्थाने इत्यभिधाय तत्र प्रमाणत्वेनैतद्वचनमुदाहृतं माधवेन । शिष्यस्यापि वैश्वदेवस्थाने (१)एव निवेशः । एतेनान्तेवासिनो व्याख्याता इत्यनेन शिष्ये सोदर्यविहितार्थातिदेशात् । ननु—

आनृशंस्यं परो धर्मोऽयाचते यत्प्रदीयते ।
अयाचतः सीदमानान् सर्वोपायैर्निमन्त्रयेत् ॥

इति वासिष्ठम् । आनृशंस्यमुत्कृष्टो धर्मः, तद्दशानयाचन-

---

(१) 'एवाभिनिवेशः' घ०

नटांश्च पौनर्भवकृष्णदन्तान् ।
अगारदाही गरदः समुद्र-
यायी च (१)कुण्डाश्यथ कूटकारी ॥
बालांश्च योऽध्यापयते स्वपुत्रा-
दवाप्तविद्यस्त्वथ कुण्डगोलौ ।
अग्रेदिधिष्वाः पतिरस्त्रकर्ता
सोमक्रयी तैलिक(२)केकराक्षौ ॥

शीलान् अतएव सीदमानान् निर्गुणानपि सगुणानुकल्पाभावे सर्वोपायैर्यथा ते निमन्त्रणमनाकुर्वन्ति तादृशैरुपायैर्निमन्त्रयेदिति हि तदर्थः। तथा च माधवाचार्यैरनुकल्पानुकल्पेषु गणितः सीदद्वृत्तिः कुतो ग्रन्थकृता मुख्येषु गणित इति चेत् ? न, उत्कृष्टानामपि अयाचितत्वगुणेन सीदद्वृत्तित्वसम्भवात् । अन्येषां तु मध्यमत्वस्य माधवोक्तानुकल्पानुकल्पत्वस्य च ग्रन्थकृदनुमतत्वात् । अत्र मध्यमेष्वपि कुलीनत्वं श्रुतशीलवृत्तत्वञ्चावश्यकम् । "तस्मात् कुलीनाः श्रुतशीलवन्तः वृत्तस्थाः सत्यवादिनो ऽव्यङ्गाः पाङ्क्तेयाः" इति हारीतेन तस्मात्पदोक्तेः । कुलगुणादिकं च हारीतेनैवोक्तम् "स्थितिरविच्छिन्नवेदवेदिताऽयोनिसङ्करत्वमार्षेयत्वञ्चेति । कुलगुणाश्च वेदोङ्गानिधर्मोऽध्यात्मवित्त्वं विज्ञानं स्मृतिश्चेति षड्विधं श्रुतम्। ब्रह्मण्यता देवभक्तिः पितृभक्तता सौम्यता परानुपतप्तता अनसूयता अनुद्धतता अपारुष्यं मित्रता प्रियवादित्वं कृतज्ञता शरण्यता प्रशान्तिश्चेति त्रयोदशविधं शीलम् । क्षमा दमो दया दानमहिंसा गुरुपूजनं शीलं स्नानं जपो होमस्तपः स्वाध्यायः सत्यवचनं सन्तोषो दृढव्रतत्वमुपव्रतत्वमिति षोडशगुणं वृत्तम् इति । अस्या-

---

(१) परदारेषु जायन्ते द्वौ सुतौ कुण्डगोलकौ । अमृते जारजः कुण्डो मृते भर्तरि गोलकः ॥ यस्तयोरन्नमश्नाति स कुण्डाशी प्रकीर्तितः।

(२) केकरोऽध्यर्धदृष्टिः ।

युद्धाचार्यैः पक्षिणां पोषकश्च
स्रोतोभेत्ता वृक्षसंरोपकश्च ॥
मेषाणां वा माहिषाणां च पुष्ट्या
स्वीयस्त्रीषु प्रहितैर्यश्च जारैः ।
जीवत्यध्येतुश्च दत्तानुयोगाद्
द्रव्यप्राप्त्यै वेदमुद्धाटयन्तः ॥

र्थः श्राद्धसागरे—स्थितिरविच्छिन्नसम्प्रदानता। अविच्छिन्नवेदवेदिता। वेदिपदं हविरासादनदेशवाच्यपि हविःसाध्ययागे लाक्षणिकम्। अयोनिसङ्करत्वमसापिण्डाद्यूढाजत्वादि। आर्षेयत्वं प्रवरऋषिज्ञातृत्वम्। वेदः ऋग्वेदादि। अङ्गानि शिक्षादीनि षट्। धर्मो धर्मशास्त्रम्। अध्यात्मवित्त्वमुत्तरमीमांसाज्ञातृत्वम्। विज्ञानं वैशेषिकादिशास्त्रज्ञानम्। स्मृतिर्वेदशास्त्राद्यविस्मरणम्। ब्रह्मण्यता ब्राह्मणेषु प्रीतिः। देवभक्तिः मातापितृभक्तिः। सौम्यता प्रियदर्शनता। परानुपतप्तता अन्यसन्तापाकरणम्। अनसूयता गुणेषु दोषानारोपित्वम्। अनुद्धतता अपूज्यानादरः। अपारुष्यं वागादिपारुष्यहीनत्वम्। मित्रताऽविचार्यप्रियकारित्वम्। प्रियवादित्वम् अनिषिद्धसुखजनकशब्दोच्चारयितृत्वम्। कृतज्ञता परकृतोपकारस्य पुनः पुनः स्मरणम्। शरण्यता सति सम्भवे रक्षितृत्वम्। प्रशान्तिर्मनोनिग्रहः। क्षमा अनीर्ष्या। दमो बाह्येन्द्रियनिग्रहः। दया परदुःखप्रहाणेच्छा। दानमभयदक्षिणादि। अहिंसा मनसाऽपि न शरीरवियोगजनकव्यापाराचिन्तनम्। गुरुपूजनं गौरवितप्रीतिहेतुभूता क्रिया। शीलं सत्स्वभावः। स्नानजपहोमाः नित्यनैमित्तिकाः। तपः कृच्छ्रचान्द्रायणादि, नतु नैमित्तिकम्। स्वाध्यायो वेदाध्ययनम्। सत्यवचनं विवाहादिव्यवहारातिरिक्तं ऋतं वाक्यम्। सन्तोषो यत्किञ्चिल्लाभेऽपि। दृढव्रतत्वम् आश्रमोचितानामेकादश्युपवासादीनामत्यावश्यकानां गुरुतरेऽपि हेतावविच्छेदः। उपव्रतत्वं दशम्पाद्या-

ग्रामयाजिपशु*केशविक्रयी-
*स्तेनशिल्पिपितृवादकारकान् ।
अर्थकामरतशूद्रयाजक-
श्मश्रुहीनजटिमुण्डनिर्घृणान् ॥
यस्य चैव गृहिणी रजस्वला
*स्वार्थपाकरतशापदायकान् ।
क्लीबकुष्ठयतिविलोहितेक्षणा-
न्कुब्जवामनमृषाभिशापिनः ॥
पुत्रहीनमथ कूटसाक्षिणं
प्रातिहाविकमयाज्ययाजकम् ।
*स्वात्मदातृपरिवेत्तृयाजक-
*स्तेनहिंस्रकमुखान्विवर्जयेत् ॥

अत्र*मूलं हेमाद्रौ पृथ्वीचन्द्रोदये च ज्ञेयम् । भारते

वेकभक्तादीति । अयं च सर्वोऽपि—

न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र व्रतमिमें चोभे तद्धि पात्रं प्रकीर्तितम् ॥

इति पात्रलक्षणप्रपञ्चः(१) । *केशविक्रयी कम्बलादिविक्रयी । *स्तेनः ब्राह्मणान्यस्वर्णचोरः । *स्वार्थपाकरतः पञ्चमहायज्ञशून्यः । *स्वात्मदाता दत्तात्मा स्वयंदत्तः । *स्तेनः ब्राह्मणकुपहर्ता । *मूलमिति । याज्ञवल्क्यः—

रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा ।
अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ॥

---

(१) इतोऽग्रे घपुस्तके टिप्पण्यां "अत्र सम्भवति मुख्यकल्पेऽनुकल्पो न ग्राह्यः, प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते । न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ इति मनुवचनात्" इत्येतावान् ग्रन्थस्त्रुटिरूपेणोपलभ्यते ।

दानधर्मेषु श्राद्धवर्ज्यविप्राधिकारे—

कितवो भ्रूणहा यक्ष्मी पशुपालो निरा(१)कृतिः ।
ग्राम्यप्रेष्यो वार्धुषिको गायकः सर्वविक्रयी ॥
सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ।
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ॥
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ।
पर्वका(२)रश्च सूची च मित्रध्रुक् पारदारिकः ॥

भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः ।
मित्रध्रुक् पिशुनः सोमविक्रयी परिविन्दकः ॥
मातापितृपरित्यागी कुण्डाशी वृषलात्मजः ।
परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निन्दिताः ॥

(याज्ञ० स्मृ० आचा० श्लो० २३-२५)

रोगी रोगाश्च—'उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगंदरो महोदरोऽश्मरी चेत्यष्टौ पापरोगाः' इति देवलोक्ताः। हीनं न्यूनमतिरिक्तमधिकं वाऽङ्गं यस्यासौ हीनातिरिक्ताङ्गः। काणः एकेनाप्यक्ष्णा यो न पश्यति सः, एतेन बधिरमूकादयोऽप्युपलक्ष्यन्ते। पूनर्भूः द्विरूढा तत्र जातः पौनर्भवः। अवकीर्णी क्षतव्रतः। कुनखी दुष्टनखः। श्यावदन्तकः स्वाभाविककृष्णदन्तः। वेतनं गृहीत्वा योऽध्यापयति स भृतकाध्यापकः। असता वा सता वा दोषेण कन्यां दूषयति स कन्यादूषी। अभिशस्तकः महापातकाभिशस्तः। परिविन्दकः परिवेत्ता। तद्याजकमुपलक्षणमिदम्,

---

(१) 'अधीत्य विस्मृते वेदे भवेद्विप्रो निराकृतिः।' इति देवलः।
(२) 'पर्वकारश्च सूचश्च' क०

अव्रतानामुपा(१)ध्यायः काण्डपृष्ठस्तथैव च ।
श्वभिश्च यः परिक्रामेद्यः शुना दष्ट एव च ॥

परिवेत्ता(२)परिवित्तिर्यया च परिविद्यते ।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥

इति स्मरणात् । कुण्डस्यान्नमश्नातीति कुण्डाशी, कुण्डशब्दो गोलकस्याप्युपलक्षकः । विहितकर्मत्यागी वृषलः तत्सुतो वृषलात्मजः । परपूर्वापतिः पुनर्भूपतिः । अदत्तादायी स्तेनः । कर्मदुष्टाः शास्त्रविरुद्धाचारयुक्ताः एते श्राद्धे निन्दिता वर्ज्या इत्यर्थः । मनुः—

(३)स्तेनाश्च पतिताः क्लीबा ये च नास्तिकवृत्तयः ।
तान् हव्यकव्ययोर्विप्राननर्हान् मनुरब्रवीत् ॥
जटिलञ्चानधीयानं (४)दुर्वालं कितवं तथा ।
याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥
चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्ते वर्ज्याः स्युर्हव्यकव्ययोः ॥
प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः ।
प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥
यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः ।
ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥
कुशीलवोऽवकीर्णी च वृषलीपतिरेव च ।
पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥
भृतकाध्यापकश्चैव भृतकाध्यापितस्तथा ।

---

(१) अक्षरपाठकः ।

(२) परिवेत्ता परिवेत्तिर्यशा' ङ०

(३) 'ये स्तेनपतितक्लीबा' ञ०

(४) 'दुर्बलम्' ञ०

(१)शूद्रशिष्यः शूद्रगुरुर्वाग्दुष्टः कुण्डगोलकौ ॥
अकारण(२)परित्यागी मातापित्रोर्गुरोस्तथा ।
ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
समुद्रयायी बन्दी च तैलिकः कूटकारकः ॥
पित्रा विवदमानश्च कितवो मद्यपस्तथा ।
पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥
धनुःशराणां कर्ता च यश्चाग्रेदिधिषूपतिः ।
मित्रध्रुक् द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥
भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा ।
उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥
हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ।
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥
स्रोतसां भेदकश्चैव तेषाञ्चावरणे रतः ।
गृहसंवेशको दूतो वृक्षारोपक एव च ॥
श्वक्रीडी श्येनजीवी च कन्यादूषक एव च ।
हिंस्रो (३)वृषलपुत्रश्च गणानाञ्चैव याजकः ॥
आचारहीनः क्लीबश्च (४)यश्च याचनकस्तथा ।
कृषिजीवी (५)शीलजीवी सद्भिर्निन्दित एव च ॥
औरभ्रिको माहिषिकः परपूर्वापतिस्तथा ।
(६)प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः ॥

---

(१) 'शूद्रशिष्यो गुरुश्चैव' अ०
(२) 'परित्यक्ता' अ०
(३) 'वृषलवृत्तिश्च' अ०
(४) 'नित्यं याच' अ०
(५) 'श्लीपदी च' अ०
(६) 'प्रेतनिर्हारकश्चैव' अ०

एतान् विगर्हिताचारानपांक्तेया(१)न्द्विजाधमान्।
द्विजातिप्रवरो विद्वानु(२)भयत्रापि वर्जयेत् ॥ (मनुस्मृ० अ० ३ श्लो० १५०-१६७)।

स्तेनोऽब्राह्मणस्वर्णान्यद्रव्यापहर्ता, ब्राह्मणस्वर्णहारिणः पतितशब्देनोक्तेः। नास्तिकेभ्यो वृत्तिर्जीविका येषां ते नास्तिकवृत्तयः। अनधीयानो जटिलो ब्रह्मचारीत्येकम्, अधीयानस्य तस्य तत्र प्राप्तत्वात्। न च तस्याश्रोत्रियत्वेन कथं प्राप्तिः?

व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्।

इतिवाक्ये दौहित्रत्वाविवक्षाभ्रमेण अध्ययनरहितब्रह्मचारिणोऽपि प्राप्तेः। दुर्वालः कपिलकेशः खल्वाटो वा,

खल्वाटकश्च दुर्वालः कपिलः खण्ड एव च ॥

इतिसङ्ग्रहात्। कितवो द्यूतासक्तः। पूगयाजकः ग्रामयाजकः। श्राद्ध इत्युपादानाद् दुर्वालादयः पित्र्य एव वर्ज्या न दैवे। अन्यथा प्रकरणेनोभयत्र निषेधाद्विशेषोपादानं व्यर्थं स्यात्। अत एव गौतमः—“हविष्वेव दुर्वालादीनां श्राद्धे एवैके” इति। हविष्षु वैश्वदेवेऽपि दुर्वालादयो वर्ज्याः। एके पुनः श्राद्ध एवेति तदर्थः। चिकित्सका जीवनार्थमदृष्टार्थं वा भैषज्यकारिणः। देवलकस्तु—

देवार्चनपरो नित्यं वित्तार्थी वत्सरत्रयम्।
स वै देवलको नाम हव्यकव्येषु गर्हितः ॥

इति देवलोक्तेः। आपद्यपि मांसविक्रीय, अनापदि विपणजीवित्वेन निषेधे सिद्धे मांसविक्रयिणः पुनरुपादानवैयर्थ्यात्। अनापदि वाणिज्येन जीविनो विपणजीविनः। आपदि—

क्षात्रेण कर्मणा जीवेद्विशां वाऽपि यथेच्छया।

---

(६) ‘नराधमान्’ घ० ङ०
(७) ‘उभयत्र विवर्जयेत्’ ञ०

इत्यनुज्ञानात् । विहितत्यागकारणं विना श्रौतस्मार्ताग्निपरित्यागी त्यक्ताग्निः । एतच्च स्वाध्यायत्यागादेरुपलक्षणम्,

स्वाध्यायाग्निसुतत्यागस्तडागारामविक्रयः ।

इत्युपपातकगणनात् । अल्पवृद्ध्या धनं स्वीकृत्याधिकवृद्ध्या धनप्रयोजको वार्धुषिः,

समर्घं धनमुद्धृत्य महर्घं यः प्रयच्छति ।
स वै वार्धुषिको नाम ब्रह्मचारिषु गर्हितः ॥

इतिस्मृतेः । यक्ष्मी क्षयरोगी । अनापदि पशुपालः । अविवाहिते अनुपनीते वा ज्येष्ठे अनाहिताग्नौ वा ज्येष्ठादौ कनीयान् तदादिर्वा कृतदारः अनुपनीतः । अहिताग्निः दर्शपूर्णमासयाजी वा आवसथ्यमाधाता वा परिवेत्ता । ज्येष्ठादिस्तु परिवित्तिः प्राग्दर्शितः । निराकृतिस्तु--

अधीत्य विस्मृते वेदे भवेद् विप्रो निराकृतिः ।

इति देवलोक्तः । नानाजातीया अनियतवृत्तयो गणास्तेषां मध्यवर्ती गणाभ्यन्तरः । कुशीलवो गायकादिः । रजस्वलायाः कन्यायाः पतिः वृषलीपतिः,

वन्ध्या तु वृषली ज्ञेया वृषली च मृतप्रजा ।
अपरा वृषली ज्ञेया या कुमारी रजस्वला ॥
यस्त्वेनामुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥

इति देवलोक्तेः । यस्य गृहे जारः सर्वदा संवसेत् सोऽपि वर्ज्यः,

परदाराभिगो मोहात्पुरुषो जार उच्यते ॥
स एवोपपतिर्ज्ञेयः सर्वदा संवसेद् गृहे ॥

इति स्मृतेः । वाग्दुष्टो (१)दुष्टवाङ् निष्ठुरवाक् । पतितैर्महापा-

---

(१) 'दुष्टवाक्' नास्ति घ०

ताकिसंसर्गिभिः सह ब्राम्हैर्यौनैश्च सम्बन्धैः (१)(विद्यायोनिसंबंधैः) संयोगं गतः, साक्षात् सम्बन्धे तु “यौन स्रौवमुख्यैस्तु सम्बन्धैः सद्य एव” इति वचनेन पतितत्वात् । [केकरोऽध्यर्धदृष्टिः(?)]। अग्रे दिधिषूस्तु—

ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा ।
सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता ॥

इति देवलोक्ता । पुत्राचार्यः पुत्रोऽक्षरपाठको यस्य सः। भ्रामरी वृत्त्यर्थमेव भ्रमरवदर्थार्जकः। गृहसंवेशको वर्द्धकिवृत्त्या जीवमानः। उरभ्राः अवयः ते वृत्त्यर्थं पालनीया यस्य स औरभ्रिकः। महिष्यः पाल्या यस्य स माहिषकः। अथवा—

महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी ।
तस्यां यो जायते गर्भः स वै माहिषकः स्मृतः ॥

इति देवलोक्तः।एतानुभयत्र दैवे पित्र्ये च वर्जयेत् इत्यर्थः। यमः-

ब्रह्मघ्नाश्च सुरापाश्च स्तेना गोघ्नाश्चिकित्सकाः ।
राष्ट्रकामास्तथोन्मत्ताः पशुविक्रयिणस्तथा ॥
वृषलीफेनपीताश्च श्रेणियाजकयाजकाः ।
कालोपजीविनश्चैव ब्रह्मविक्रयिणस्तथा ॥
दण्डपूजाश्च ये विप्राः ग्रामकृत्यपराश्च ये ॥

द्न्दशूका इति पाठान्तरम् ।

कुण्डाशिनो देवलकाः परदाराभिमर्शकाः ।
श्यावदन्ताः कुनखिनः शिल्पिनः कुष्ठिनश्च ये ॥

शिल्पिनः शिल्पविद्यामात्राध्येतारः ।

अगारदाहिनश्चैव हस्त्यश्वपदका द्विजाः ।
कन्यानां दूषकाश्चैव ब्राह्मणानां च दूषकाः ॥

---

(१) धनुश्चिह्नान्तर्गतं नास्ति घ०

परिवित्तिस्तथा स्तेनो दुश्चर्मा गुरुतल्पगः ।
सूचकाः प्रेष्यकाश्चैव किराताश्च कुशीलवाः ।
अजाविका माहिषिका सर्वविक्रयिणश्च ये ॥
धनुःकर्ता द्यूतवृत्तिः मित्रध्रुक् शस्त्रविक्रयी ।
पाण्डुरोगी गण्डमाली यक्ष्मी च भ्रामरी तथा ॥
पिशुनः कूटसाक्षी च दीर्घरोगी वृथाश्रमी ।
राज्ञः प्रेष्यकरो यश्च ग्रामस्य नगरस्य वा ॥
समुद्रयायी वान्ताशी केशविक्रयिणश्च ये ।
गोविक्रयी च दुर्बालः पूगानां चैव याजकः ॥
मद्यपश्च कदर्यश्च सह पित्रा विवादकृत् ।
दाम्भिको वर्द्धकीभर्ता त्यक्तात्मा दारदूषकः ॥
सद्भिश्च निन्दिताचारः स्वकर्मपरिवर्जकः ।
परिवित्तिः परिवेत्ता भृत्याचार्यो निराकृतिः ॥
शूद्राचार्यः सुताचार्यः शूद्रशिष्यस्तु नास्तिकः ।
इष्वस्त्रो दारकाचार्यो मानकृत्तैलिकस्तथा ॥
चोरा वार्धुषिका दुष्टाः परस्थानां च दूषकाः ।
चतुराश्रमबाह्याश्च सर्वे ते पङ्क्तिदूषकाः ॥
इत्येतैर्लक्षणैर्युक्तांस्तान् द्विजानाभियोजयेत् ॥

कदर्यस्तु—

आत्मानं धर्मकृत्यं च पुत्रं दारांश्च पीडयेत् ।
लोभाद्यः पितरौ भृत्यान् स कदर्य इति स्मृतः ॥

इति देवलोक्तः । भविष्ये—

वेदाक्षराणि यावन्ति नियुञ्ज्यादर्थकारणात् ।
तावती भ्रूणहत्या वै वेदविक्रय्यवाप्नुयात् ॥

बृहस्पतिः—

अधीष्यते ह्यहं दास्ये इत्युक्तो यस्तु दुर्मतिः ।

*कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ॥
ईदृशा ब्राह्मणा ज्ञेया अपाङ्क्त्या युधिष्ठिर ॥

तथा—

ऋणकर्ता च यो राजन्यश्च वार्धुषिको नरः ।

काण्डपृष्ठः स्वशाखां त्यक्त्वा परशाखयोपनीतस्तदध्यायी च । क्षत्रियवैश्यवृत्तौ नारदस्तु—

तस्यामेव तु यो वृत्तौ ब्राह्मणो वसते रसात् ।
काण्डपृष्ठश्च्युतो मार्गात्सोऽपाङ्क्तेयः प्रकीर्तितः ॥

इत्याह । हारीतः—

शूद्रापुत्राः स्वयंदत्ता ये चैते क्रीतकाः सुताः ।
पठेच्छास्त्राणि वेदं वा स प्रेत्य श्वाऽभिजायते ॥

विष्णुः—

न वार्यपि प्रयच्छेत बिडालव्रतिकद्विजे ।

*गायक इति वादननर्तनादेरुपलक्षणम् । *पर्वकारः वेषान्तरधारी ।

पर्व क्लीबं महे ग्रन्थे प्रस्तावे लक्षणान्तरे ।

इति मेदिनीति भारतटीका । *अव्रतानां शूद्राणाम् । *उपाध्यायः अक्षरपाठकः । *काण्डपृष्ठः स्वशाखां त्यक्त्वा परशाखयोपनीतः ((१)तदध्यायी च ।

तस्यामेव तु यो वृत्तौ ब्राह्मणो वसते रसात् ।
काण्डपृष्ठश्च्युतो मार्गात् सोऽपाङ्क्तेयः)प्रकीर्तितः ॥

इति नारदेन तु क्षत्रियवैश्यवृत्त्याजीवी उक्तः ।

शूद्राः पुत्राः स्वयं दत्ता ये चैते क्रीतकाः सुताः ।
ते सर्वे मनुना प्रोक्ताः काण्डपृष्ठा न संशयः ॥

इति च हारीतः । 'वेश्यापतिः काण्डपृष्ठः' इति भारतटीका । *कुशीलवः कुशी फालः तेन कर्षणं लक्ष्यते, लवः छेदनं तदु-

---

(१) कंसान्तर्गतं नास्ति घ०

ते सर्वे मनुना प्रोक्ताः काण्डपृष्ठा न संशयः ॥

अन्येऽपि हेमाद्रौ मात्स्ये—

त्रिशङ्कून्बर्बरानन्ध्रांश्चीनद्रविड(१)कौङ्कणान् ।
कर्णाटकांस्तथाऽऽभीरा(२)न्कालिङ्गांश्च विवर्जयेत् ॥

तत्रैव सौरपुराणे—

अङ्गवङ्गकालिङ्गांश्च सौराष्ट्रान् गुर्जरांस्तथा ।
आभीरान्कौङ्कणांश्चैव द्राविडान्दाक्षिणायनान् ॥
आवन्त्यान्मागधांश्चैव ब्राह्मणांस्तु विवर्जयेत् ॥

चन्द्रिकायां यमः—

काणाः कुब्जाश्च षण्ढाश्च कृतघ्ना गुरुतल्पगाः ।
मानकूटास्तुलाकूटाः *शिल्पिनो ग्रामयाजकाः ॥
राजभृत्यान्धबधिरमूकखल्वाटपङ्गवः ।
वणिजो मधुहर्तारो गरदा वनदाहकाः ॥
समयानां च भेत्तारः प्रदाने ये निवारकाः ।
*प्रव्रज्योपनिवृत्ताश्च वृथा प्रव्रजिताश्च ये ॥
यश्च प्रव्रजिताज्जातः *प्रव्रज्यावसितश्च यः ।
अवकीर्णी च *वीरघ्नो गुरुघ्नः पितृदूषकः ॥

(३)श्राद्धकाशिकायां कात्यायनः—

द्विर्नग्नः *कीलदुश्चर्मा शुक्लोऽतिकपिलस्तथा ।
छिन्नौष्ठश्छिन्नलिङ्गश्च नैव केतनमर्हति ॥

*द्विर्नग्नः पित्रोर्वंशो त्रिपुरुषं विच्छिन्नवेदाग्निः । हेमाद्रौ भयोपजीवीति भारतटीका । *शिल्पिनः शिल्पोपजीविनः । *प्रव्रज्योपनिवृत्तः प्रव्रज्यां विहाय पूर्वाश्रमं गतः । *प्रव्रज्यावसितः । प्रव्रज्यात्यागी । *वीरघ्नः त्रेतात्यागी । *कीलो नपुंसकभेदः । काल इति वा पाठः । *द्विर्नग्न इति । एतेन-

---

(१) 'कोङ्कणान्' क० (२) कलिङ्गांश्च' क० (३) 'श्राद्धकारिकायां' क०

मरीचिः—

अविद्धकर्णः कृष्णश्च लम्बकर्णस्तथैव च।
वर्जनीयाः प्रयत्नेन ब्राह्मणाः श्राद्धकर्मणि॥

ब्राह्मे—

मूकश्च पूतिनासश्च छिन्नाङ्गश्चाधिकाङ्गुलिः।
*गलरोगी च *(१)गड्डुमान्स्फुटिताङ्गश्च सज्वरः॥
षण्ढ*तूवर*मन्दांश्च श्राद्धेष्वेतान्विवर्जयेत्॥

लम्बकर्णं चाह तत्रैव गोभिलः—

हनुमूलादधः कर्णौ लम्बौ तु परिकीर्तितौ।
द्व्यङ्गुलौ त्र्यङ्गुलौ शस्ताविति शातातपोऽब्रवीत्॥

चन्द्रिकायां यमः—

*द्व्यङ्गुलातीतकर्णस्य भुञ्जते पितरो न तु।

षण्ढश्चात्र चन्द्रिकोक्तः सप्तविधो ग्राह्यः। यथा—

षण्ढको वातजः षण्ढः पण्डः क्लीबो नपुंसकः।
कीलकश्चेति सप्तैव क्लीबभेदाः प्रकीर्तिताः॥

पराशरमाधवीये तु चतुर्दशविधा उक्ताः। तेषां

काणाः कुण्ठाश्च मण्ठाश्च मूकान्धबधिरा जडाः।
कुनखाः कुष्ठिनश्चैव द्विर्नग्ना वृद्धमेहनाः॥

विद्धशिश्नाः।

अतिदीर्घा अतिह्रस्वा अतिस्थूला भृशं कृशाः।
निर्लोमानोऽतिलोमानो गौराः कृष्णा अतीव ये॥
एतान् विवर्जयेत्प्राज्ञः श्राद्धेषु श्रोत्रियानपि॥

इति स्कान्दे। द्विर्नग्ना दुश्चर्माण इति व्याख्यानमनादेयम्, दुश्चर्मणां पृथगुक्तेः। *गलरोगी गण्डमाली। *गड्डुमान् कुब्जः। *तूवरः यौवनेऽप्यजातश्मश्रुः। *मण्डो वक्रजङ्घः, मन्द इति

---

(१) 'गण्डूमान्' क०

स्वरूपाणि *तत्रैव ज्ञेयानि ।

चन्द्रिकायां शातातपः—

अग्निष्टोमादिभिर्यज्ञैर्ये यजन्त्यल्पदक्षिणैः ।
तेषामन्नं न भोक्तव्यमपाङ्क्तास्ते प्रकीर्तिताः ॥

एतच्च शक्तौ सत्याम् । अपरार्के भारते—

अव्रती कितवः स्तेनः प्राणिविक्रयकोऽपि वा ।
पश्चाच्चेत्पीतवान्सोमं सोऽपि केतनमर्हति ॥

(१)श्राद्धदीपकलिकायां यमः—

अपत्नीकश्च वर्ज्यः स्यात्सपत्नीकोऽप्यनग्निकः ।

तत्रैवाश्वलायनः—

प्रतिमाविक्रयं यो वै करोति पतितस्तु सः ।
जीवनार्थं परास्थीनि धृत्वा तीर्थं प्रयाति यः ॥
मातापित्रोर्विना सोपि पतितः परिकीर्तितः ॥

पाठे जडः । *व्यङ्गुलेति । ऽयङ्गुलोपलक्षणम् । *तत्रैवेति । नारदः—

यस्याप्सु प्लवते वीर्यं ह्रादि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु षण्ढकः ॥
चतुर्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥
निसर्गषण्ढो ब्रध्नश्च पक्षषण्ढस्तथैव च ।
अभिशापाद् गुरो रोगाद्देवक्रोधात्तथैव च ॥
ईर्ष्याषण्ढश्च सेव्यश्च वातरेता मुखेभगः ।
आक्षिप्तो मोघबीजश्च शालीनोऽन्यापतिस्तथा ॥ इति ।

निसर्गषण्ढः स्वभावतो लिङ्गवृषणहीनः । ब्रध्नः छिन्नमुष्कः । पञ्चदशादिनानि स्त्रियमासेव्य सकृद्भोगक्षमः पक्षषण्ढः ।

---

(१) 'श्राद्धदीपिकायां' क०

तत्रैव जातूकर्ण्यः—

यत्र मातुलजोद्वाही यत्र वा वृषलीपतिः ।
श्राद्धं न गच्छेत्तद्विप्राः कृतं यच्च निरामिषम् ॥
पितृपुत्रौ भ्रातरौ द्वौ निरग्निं गुर्विणीपतिम् ।
सगोत्रप्रवरं चैव श्राद्धेषु परिवर्जयेत् ॥

बृहन्नारदीये—

शङ्खं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिः कार्यः सर्वस्माद्विजकर्मणः ॥
शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥

तेन ये *तप्तमुद्रादिविधयस्ते *शूद्रविषया इति । पृथ्वीचन्द्रोदये—

शिवकेशवयोरङ्कान् शूलचक्रादिकान्द्विजः ।

गुर्वभिशापषण्ढादयस्त्रयः स्पष्टाः । यस्येर्ष्यया पुंस्त्वमुत्पद्यते स ईर्ष्याषण्ढः । स्त्र्युपचारविशेषेण पुंस्त्वशक्तिर्यस्य स सेव्यषण्ढः । वातोपहतरेतस्को वातरेताः । यस्य मुख एव पुंस्त्वशक्तिः न योनौ स मुखेभगः । रेतोनिरोधात्षण्ढीभूत आक्षिप्तषण्ढः । मोघबीजी गर्भाधानासमर्थबीजी । अत्र प्रगल्भतया क्षोभाद्वा नष्टपुंस्त्वः शालीनः । भार्याभिन्नास्त्वेव पुरुषभावो यस्य सोऽन्यापतिः इति ।

*तप्तमुद्राविधयः—

यो न धारयते चक्रं शंखं वाऽपि कदाचन ।
तस्य सन्दर्शने सूर्यं पश्येत पतिमान्नरः ॥
इत्यादयः ।

*शूद्रेति ।

शृणु राम महाबाहो लिङ्गचक्रादिधारणम् ।

न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः ॥

इत्याश्वलायनोक्तेश्च । नृत्यं (१)चोदरार्थं निषिद्धमिति श्रीधरस्वामी । *अन्येऽपि निषेधा निबन्धेषु ज्ञे-

शूद्रधर्मरतानां हि तेषां नास्ति पुनर्भवः ॥
विप्रस्य नैतद् गृह्यत्वात्प्रायश्चित्तमुदीरितम् ॥

इति हेमाद्रौ पाद्मोक्तेः । शूद्रधर्मरताः कुण्डगोलकाः,

शूद्राणां हि सधर्माणः (२)सर्वे तद्धर्मजाः स्मृताः ॥

इति मनुना तेषां शूद्रधर्मातिदेशात् । यद्वा भ्रष्टद्विजानामागमदीक्षाधिकारिणामेव तत्राधिकारः । नच पौराणो धर्मो वेदमूलम् इति कथं तत्र शिष्टानां नाधिकारः ?

अङ्गेषु नाङ्कयेद्विप्रो देवतायुधलाञ्छनैः ।
अङ्कयेद्यदि वा मोहात्पतत्येव न संशयः ॥

इति शातातपोक्तेः । पुराणेष्वपि तान्त्रिकं दृश्यते । तथाच पराशरपुराणे दशमाध्याये—

वेदमूलतया नित्यं प्रवृत्ता अपि सत्तम ।
क्वचित्कदाचित् स्मर्तारस्तन्त्रार्थं तं ब्रुवन्ति च ॥
क्वचित्तन्त्रानुरोधेन धर्मं पौराणिका अपि ।
वदन्ति तादृशो धर्मो ग्राह्यस्तन्त्रावलम्बना ॥
पुराणे धर्मशास्त्रे च योऽर्थः श्रुत्या विरुध्यते ।
स तन्त्रार्थस्तु विज्ञेयः समासेन मनीषिभिः ॥ इति ।

स्कान्देऽपि—

तन्त्रावलम्बनेनैव पुराणानीह कानिचित् ।
साक्षादेव विरुद्धार्थं प्रवदन्ति क्वचित् क्वचित् ॥
अधिकारविभेदेन नैव वेद परं प्रति ॥

अधिकारविभेदो भ्रष्ट इति यावत् । *अन्येपीति ।

---

(१) 'चोदरार्थं' क० (२) 'सर्वेऽपध्वंसजाः स्मृताः' ङ०, घ०

या इति दिक्।

अत्र विप्राणां ग्राह्यत्वोक्त्यैव तद्वर्ज्यानां निषेधे सिद्धे पुनर्वर्ज्यपरिगणनं निषिद्धवर्ज्यनिर्गुणप्राप्त्यर्थमिति विज्ञानेश्वरः। कुष्ठिकाणादेरपवादो हेमाद्रौ वसिष्ठः—

अपि चेन्मन्त्रविद्युक्तः *शारीरैः पङ्क्तिदूषणैः।

विष्णुस्मृतौ—

"गणिकापति—अगम्यागामि—पर्याहित—पर्याधातृ—अविक्रेयविक्रेतृ—क(१)लपनमन्त्रकारक—आरूढपतित—पतितप्रयोगिविलासितालवादक—शावक—शारीरिक—अलीकगृहस्थ—विविधरागबद्ध—वृथाकाषायधारि—वृथामुण्ड—वृथाजटिल—दन्तुर—आश्रमबाह्य—वृथालिङ्गधारि—अयाज्ययाजक—अविद्धकर्णा निन्द्याः" इति। स्मृत्यन्तरे भारतादौ चैवमेव निषिद्धा ब्राह्मणा मृग्याः। कृतप्रायश्चित्ता अपि ब्रह्महादयो वर्ज्याः, अतथाभूतानामप्रसक्तेः। वर्ज्यानां च विद्यादिसत्त्वेऽपि वर्ज्यत्वम्,

श्राद्धार्हगुणयोगेऽपि नैते जातु कथञ्चन।
निमन्त्रणीयाः श्राद्धेषु सम्यक् फलमभीप्सता॥

इति ब्रह्माण्डात्। *शारीरैरिति।

अनाश्रमी तु यो विप्रो जटी मुण्डी वृथा च यः।
वृथा काषायधारी यः श्राद्धे तं दूरतस्त्यजेत्॥
चिकित्सका देवलका वृथा नियमधारिणः।
सोमविक्रायिणश्चैव राजन्नार्हन्ति केतनम्॥
होतारो वृषलानां ये वृषलाध्यापकास्तथा।
तथा वृषलशिष्याश्च श्राद्धे नार्हन्ति केतनम्॥
अनग्नयश्च ये विप्रा मृतनिर्यातकाश्च ये।
स्तेनाश्च पतिताश्चैव राजन्नार्हन्ति केतनम्॥

---

(१) 'कथनमन्त्र' घ०

अदृष्यं तं *यमः प्राह पङ्क्तिपावन एव सः ॥

क्वचिद्विप्राणां जातिमात्रेण ग्राह्यत्वमुक्तम् । चन्द्रिकायामाग्नेये—

यदि पुत्रो गयां गच्छेत्कदाचित्कालपर्ययात् ।
तानेव भोजयेद्विप्रान्(१)ब्रह्मणा ये प्रकल्पिताः ॥
ब्रह्मणा कृतसंस्थाना विप्रा ब्रह्मसमाः (२)स्मृताः ॥
अमानुषा गयाविप्रा ब्रह्मणा ये प्रकल्पिताः ।
तेषु तुष्टेषु संतुष्टाः पितृभिः सह देवताः ॥

तत्रैव—

न विचार्यं कुलं शीलं विद्या च तप एव च ।
पूजितैस्तैस्तु सन्तुष्टा देवाः सपितृगुह्यकाः ॥

गयायां निर्गुणा अपि ते एव भोज्या इति हेमाद्रौ । अक्षय्यवटश्राद्ध एव तन्नियमो नान्यत्रेति त्रिस्थलीसेतौ पितामहचरणाः । पृथ्वीचन्द्रोदयेऽपि पाद्मे—

तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन ।
अन्नार्थिनमनुप्राप्तं भोज्यं तं मनुरब्रवीत् ॥

स्कान्देऽपि—

ब्राह्मणान्न परीक्षेत तीर्थे क्षेत्रनिवासिनः ।

मनुः—

न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् ।
पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः ॥

असम्भवपरमेतदिति मेधातिथिः । हेमाद्रौ व्यासः—

गायत्रीसारमात्रोऽपि वरं विप्रः सुयन्त्रितः ।
नायन्त्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥

इति कालिकापुराणादावशारीरदोषाणां दिक् । *यमः क-

---

(१) 'ब्राह्मणा' क० । (२) 'स्मृताः तत्रैव' क०

काणाः कूटाश्च कुब्जाश्च दरिद्रा व्याधितास्तथा ।
सर्वे श्राद्धे नियोक्तव्या *मिश्रिता वेदपारगैः ॥

अथ विप्रनिमन्त्रणम् । चन्द्रिकायां वाराहे—

वस्त्रशौचादि कर्तव्यं श्वः कर्तास्मीति जानता ।
स्थानोपलेपनं कृत्वा *ततो विप्रान्निमन्त्रयेत् ।
दन्तकाष्ठं च विसृजेद्ब्रह्मचारी शुचिर्भवेत् ॥

तत्रैव प्रचेताः—

*दक्षिणं चरणं विप्रः सव्यं वै क्षत्रियस्तथा ।
पादावादाय वैश्यो द्वौ शूद्रः प्रणतिपूर्वकम् ॥

बृहस्पतिः—

उपवीती ततो भूत्वा देवार्थं तु द्विजोत्तमान् ।
अपसव्येन पित्र्येऽथ स्वयं शिष्योऽथवा सुतः ॥

र्मविपाकाभिज्ञः, योग्यत्वेन दोषाणां क्षीणप्रायतालाभात् । *मिश्रिता इति । मिश्रणं च दैविक एव,

काणादीन् भोजयेद्दैवे श्राद्धे दाने तु वर्जयेत् ।

इति सौमन्तवात् । एवञ्च अदूष्यतावाक्यमपि दैविक एव ।

*ततो विप्रानिति । निमन्त्रणं च पूर्वेद्यू रात्रौ, तदसम्भवे परेद्युः,

निरामिषं सकृद् भुक्त्वा भुक्तसर्वजने गृहे ।
निमन्त्रयीत पूर्वेद्युरुपगम्य द्विजोत्तमान् ॥

इति जातूकर्ण्योक्तेः,

पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते ।
निमन्त्रयीत त्र्यवरान् सम्यक् विप्रान् यथोदितान् ॥

इति मनूक्तेः,

पूर्वेह्नि रात्रौ विप्राग्र्यान् कृतसायन्तनाशनान् ।
गत्वा निमन्त्रयेद्देवपित्रुद्देशसमन्वितः ॥

इति ब्रह्माण्डात् । *दक्षिणमिति । दक्षिणचरणस्पर्शो जातु-

प्रचेताः—

सवर्णं प्रेषयेदाप्तं द्विजानां तु निमन्त्रणे ।

पृथ्वीचन्द्रोदये स्कान्दे—

राजकार्ये नियुक्तस्य बन्धनिग्रहवर्तिनः ।
व्यसनेषु च सर्वेषु श्राद्धं विप्रेण कारयेत् ॥

चन्द्रिकायां यमः—

*अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम् ।
तथैव वृषलस्यान्नं ब्राह्मणेन निमन्त्रितम् ।

तत्रैव पैठीनसिः-*'सप्त पञ्च द्वौ वा श्रोत्रियान्निमन्त्रयेत्' । आश्वलायनसूत्रेऽपि—'एकैकमेकैकस्य द्वौ द्वौ त्रींस्त्रीन्वा *वृद्धौ फलभूयस्त्वम्' । *द्वाविति वृद्धिश्राद्धे । 'गौतमः-नवावरान् भोजयेदयुजो वा *यथोत्साहम्' । याज्ञवल्क्यः—

द्वौ दैवे *प्राक् त्रयः पित्र्ये *उदगेकैकमेव वा ।
*मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम् ॥

देशे कार्यः,

दक्षिणं जानुमालभ्य त्वं मयाऽत्र निमन्त्रितः ।

इति मात्स्यात् । मयूखे चरणौ गृहीत्वा प्रसादनमुक्तम् । तदुत्तरं निमन्त्रणं कार्यमिति शिष्टाः । *अभोज्यमिति ।

अभोज्यं ब्राह्मणस्यान्नं क्षत्रियाद्यैर्निमन्त्रितम् ।
तथैव क्षत्रियादीनां वृषलेन निमन्त्रितम् ॥

इति स्मृतिः । पार्वणश्राद्धे ब्राह्मणसंख्यामाह-*सप्तेति । *वृद्धाविति । सर्वथा ब्राह्मणवृद्धौ फलाधिक्यं, महाल्पकर्मणोः साम्यायोगात् । अन्यथा महाकर्मविध्यानर्थक्यप्रसङ्गात् । ननु द्वाविति कथं ? पित्र्ये अयुजो विधानादित्याशङ्क्याह-*द्वाविति । पित्र्ये ब्राह्मणयुग्ममित्यर्थः । *यथोत्साहं यथाविभवम् । *प्राक्

दीपकलिकायां पराशरः—

संपत्तावथ पात्राणामेकैकस्य त्रयस्त्रयः ।
पित्रादेर्ब्राह्मणाः प्रोक्ताश्चत्वारो वैश्वदेविके ॥

वृद्धयाज्ञवल्क्यः—

*दर्शैकं पञ्च वा विप्रान् पार्वणे विनियोजयेत् ॥

*अत्र वैश्वदेवे द्वौ चतुरो वोपवेश्य पित्रादीनामेकैकस्य स्थाने एकं त्रीन् पञ्च सप्त नव वोपवेशयेदिति नि-

प्राङ्मुखौ । *उदक् उदङ्मुखाः । *मातामहानामप्येवमिति । संख्यादिङ्नियमयोरतिदेशः । द्वयोरपि श्राद्धयोर्वैश्वदेविकस्य तन्त्रावृत्त्योर्विधानादावृत्तौ प्रयोगाविधिभेदः, तन्त्रे च तदैक्यम् । *दर्शैकम् । एकादश वैश्वदेवे द्वौ, पित्र्ये प्रत्येकं त्रयः । एतद्वाक्यद्वयार्थं दर्शयन्नेव (१)पञ्च वेत्यस्यार्थमाह *अत्रेति । यत्तु—

चत्वारश्चेद्द्विजाः श्राद्धे दैवे चैको भवेत्तदा ।
त्रयः पित्र्ये भवन्त्येव वदन्त्येवं हि सङ्कटे ॥
अथवाऽपि त्रयो वा स्युरेकः स्यात्पितृषु त्रिषु ।
द्वौ दैवे चैव तु स्यातां विप्रावेके वदन्ति हि ॥

इति, तन्निर्मूलम् । समुलत्वे चाद्यं (२)महालयादिश्राद्धपरं, तत्र पितृवर्गमातामहवर्गैकोद्दिष्टवर्गसत्त्वात् । द्वितीयं तु विष्णुब्राह्मणपरम्, श्राद्धरक्षितृगयाधरब्राह्मणभोजनस्य केषाञ्चिदनुमतत्वात् । वस्तुतस्तु दैवे द्वौ पित्र्ये त्रय इति पञ्च ब्राह्मणाः । अथवा दैवे चत्वारः पित्र्ये त्रय इति सप्त,

अयुजो भोजयेच्छ्राद्धे न समा दैविके स्मृताः ।

इति अङ्गिरोवचनात् । न चात्र दैवे द्वौ पित्र्ये पञ्चेति विभागः, त्रिषु पञ्चानामयुग्मसंख्यया विभागासम्भवात्, 'नवावराः' इति सप्तानां विधानात् । नचायं बहुव्रीहिः,

---

(१) 'पञ्चधेत्य' घ० ङ० (२) 'महालयतीर्थश्राद्धादिपरम्' ङ०

क्षुण्णार्थः । मनुः—

*द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा ।
भोजयेत्सुसमृद्धोपि न प्रसज्जेत विस्तरे ॥
सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदः ।
पञ्चैतान्विस्तरो हन्ति तस्मान्नेहेत विस्तरम् ॥

पृथ्वीचन्द्रोदये शातातपः—

द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखावुपवेशयेत् ।
पित्र्ये तूदङ्मुखांस्त्रींश्च बह्वृचाध्वर्युसामगान् ॥

*अत्यशक्तौ हेमाद्रौ देवलः—

एकेनापि हि विप्रेण षट्पिण्डं श्राद्धमाचरेत् ।
षडर्घ्यान् दापयेत्तत्र *षड्भ्यो दद्यात्तथा हविः ॥
सामर्थ्येऽपि नत्र्भ्योऽर्वाग् भोजयीत द्विजोत्तमान् ।
नोर्ध्वं कर्तव्यमित्याहुः केचित्तद्दोषदर्शिनः ॥

इति ब्रह्माण्डात् । अत एव प्रोक्तोऽपि विप्रविस्तारो मनुना वर्जित इत्याह—*द्वाविति । नानाशाखीयविप्रसत्त्वे शाखाभेदेन विभागः । *अत्यशक्ताविति । अनेकब्राह्मणभोजनपर्याप्तान्नासत्त्वे इत्यर्थः । अनेकब्राह्मणालाभस्याप्युपलक्षणम्,

अन्नाभावे द्विजाभावे तीर्थे चापि महालये ।
एकस्मिन्दीयते चान्नमर्घ्यान् पिण्डान् पृथक् पृथक् ॥

इति स्मृतेः । *षड्भ्यो दद्यादिति । षड्भ्योऽन्नदानप्रकारमाह बृहस्पतिः—

यद्येकं भोजयेच्छ्राद्धे स्वल्पत्वात्प्रकृतस्य तु ।
स्तोकं स्तोकं समुद्धृत्य तेभ्योऽन्नं विनिवेदयेत् ॥

अस्यार्थः—एकब्राह्मणतृप्तिसमर्थनानाजातीयान्नसमुदायादेकपात्रेऽनेकपात्रे वा नानाजातीयमन्नमुद्धृत्य षडन्नसमुदायान् परिविष्य एकस्मै पित्रादये एकैकसमुदायं निवेदयेत् । अथवा एकस्मा-

गोभिलः—

*यद्येकं भोजयेच्छ्राद्धे छन्दोगं तत्र भोजयेत् ।
ऋचो यजूंषि सामानि त्रितयं तत्र विद्यते ॥

अत्र वैश्वदेवे विशेषमाह तत्रैव वसिष्ठः—

यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् ।
*अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥
देवतायतने कृत्वा ततः श्राद्धं समाचरेत् ।

दन्नसमुदायात्स्तोकं स्तोकमुद्धृत्य बुद्ध्यैव पृथक्कृत्य निवेदयेदिति । अङ्गप्रधानजातं च षडुद्देश्यकं,

षडप्यावाहयेत्तत्र षड्भ्यो दद्यात्तथासनम् ।

इत्युत्तरार्द्धात् । एकविप्रश्च षड्दैवत्यार्थं सर्वगुणसम्पन्नः,

अपि वा भोजयेदेकं ब्राह्मणं वेदपारगम् ।
श्रुतशीलादिसम्पन्नमलक्षणविवर्जितम् ॥

इति कौर्मात्,

भोजयेदथवाऽप्येकं ब्राह्मणं पङ्क्तिपावनम् ।

इति अग्रिमवचनाच्च । *यद्येकमिति । यदि द्वौ ब्राह्मणौ तदा पितृवर्गे मातामहवर्गे च एकैकं नियुञ्ज्यात्, दैवे तु पात्रं कल्प्यम् । 'अङ्गगुणविरोधे च तादर्थ्यात्' इति न्यायेन पैतृकस्य प्राधान्याद्वैश्वदेविकस्याङ्गत्वान्नाङ्गानुरोधेन प्रधानबाधो युक्त इति विज्ञानेश्वरादयः ।

*अन्नमिति । प्रकृतस्य प्रकृतश्राद्धीयस्य सर्वस्यान्नस्यैकदेशमन्नं वैश्वदेविकब्राह्मणभोजनपर्याप्तं पात्रे परिविष्य तत्रत्यासने विश्वान् देवानावाह्य तान् पुरोवर्तिन इव ध्यायन् 'पृथिवी ते पात्रम्' इत्यादि जप्त्वा अमुकसंज्ञकेभ्यो विश्वेभ्यो देवेभ्यः स्तुत्वा पित्र्यमन्नं सङ्कल्पयेत् । ततो वक्ष्यमाणसावित्रीजपादिकं कृत्वा पित्र्यविप्रभोजनकाले वैश्वदेविकान्नप्रतिपत्तिमाह-*प्रास्येदिति ।

*प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे ॥

*एतच्च सपिण्डीकरणवर्ज्यं ज्ञेयम्, *'न त्वेवैकं सर्वेषां काममनाद्ये' इत्याश्वलायनोक्तेः । *अस्यार्थ उक्तो नारायणवृत्तौ-'आद्यं सपिण्डीकरणं (१)तद्वर्ज्येषु श्राद्धेषु *कामं त्रयाणामेकं भोजयेत्, सपिण्डीकरणे तु नियतं त्रिभिर्भवितव्यम्' इति । अनाद्ये *पार्वणवर्जिते वा अभोजनआमहेमश्राद्धादौ वा । (२)*अन्नाभावे चेति एतच्च भोजनाभ्यनुज्ञानन्तरं कार्यम्,

प्रास्येदग्नौ ततोऽन्नं तु दद्याद्वा ब्रह्मचारिणे ।

इति वासिष्ठे 'ततः'पदोपादानात् । चतुर्विंशति(३)मते जलमप्युक्तम्--

विप्राभावे वृथा न स्याद्दद्यादग्नौ जलेऽपि वा । इति ।

*एतच्चेति । दैवपित्र्ययोरेकैकब्राह्मणनिमन्त्रणं चेत्यर्थः । *न त्वेवैकमित्यादि । अत्र वृत्तिः—एकैकमुभयत्र वेति मनूक्तपक्षस्यायं निषेधः । तं कुर्वता मनूक्तमन्यदनुज्ञातं भवति । तच्च दैवं भोजनं, तस्य विधिः स्मृताववगन्तव्यः । आचार्येण तु पित्र्यस्यैव विधिरुच्यते अस्मद्गृह्योक्तेतिकर्तव्यतामात्रमेव कार्यं, शास्त्रान्तरं दृष्ट्वा न विस्तरः कार्यः, 'सत्क्रियम्' इति मनूक्तेः; 'बहल्पं वा' इति वचनाच्चेति । अत्रेतिकर्तव्यताविस्तरो निषिद्धः न तु ब्राह्मणविस्तरः, 'वृद्धौ फलभूयस्त्वम्' इत्याचार्योक्तेः । आचार्यज्ञापितत्वाच्च दैवमप्यावश्यकमिति भावः । *अस्य "काममनाद्ये" इत्यस्य । *कामामिति । आपत्कल्पोऽयामिति ज्ञापनार्थम् । *पार्वणवार्जिते इति । 'अथातः पार्वणश्राद्धे काम्य आभ्युदयिके' इति सूत्रोक्तेषु पार्वणम् । *अन्नाभावे सम्पदभावे

---

(१) 'तद्वर्ज्येषु सर्वश्राद्धेषु' क०

(२) 'अन्नाभावे वेति पाठान्तरं तत्रैव' क० (३) 'मते च' ङ,०

व्याख्यान्तरं तत्रैव ज्ञेयम्। कारिकाऽपि—

दैवे पित्र्येऽथ वैकैकं सपिण्डीकरणं विना। इति।

अत्रैकविप्रे साग्नेर्विशेषमाह पृथ्वीचन्द्रोदये प्रचेताः—

एकस्मिन् ब्राह्मणे दैवे साग्नेरग्निर्भवेत्सदा।
अनग्नेः कुशमुष्टिः स्याच्छ्राद्धकर्मणि सर्वतः॥

सर्वथा विप्रालाभे तत्रैव हेमाद्रौ (१)च सत्यव्रतः-

निधाय दर्भनिचयमासनेषु समाहितः।
प्रैषानुप्रेषसंयुक्तं सर्वं श्राद्धं प्रकल्पयेत्॥

'अत्रानन्यभावात्सत्र इव ऋत्विक्कार्ये यजमानविधौ न दक्षिणा' इति केचित्। तन्न, अदृष्टार्थाया (२)दक्षिणायाः प्राप्तेः,—

सर्वं तत्त्रिजटे तुभ्यं यच्च श्राद्धमदक्षिणम्।

इति पाद्मात्;—

विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्धहरो भवेत।
स्वयं चेदुभयं कुर्यादन्यस्मै प्रतिपादयेत्॥

इति छन्दोगपरिशिष्टाच्च। एवं यतिश्राद्धेऽपि कात्यायनः—

यज्ञव(३)स्तुनि मुष्टौ च स्तम्भे दर्भवटौ तथा।
दर्भसंख्या न विहिता विष्टरास्तरणेषु च॥

मातृश्राद्धे तु विप्रालाभे सुवासिन्योऽपि भोजनीया इत्याहापरार्के वृद्धवसिष्ठः—

मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि।
पतिपुत्रान्विता भव्या योषितोऽष्टौ कुलोद्भवाः॥ इति।

अष्टाविति वृद्धिश्राद्धविषयम्।

पाद्मे उत्तरखण्डे—

सकृदभ्यर्चितं लिङ्गं शालग्रामशिलां च यः।
पीठे संस्थापयित्वा तु श्राद्धं च कुरुते नरः॥

---

(१) 'च' नास्ति क० (२) 'दक्षिणायाः' नास्ति क० (३) 'यज्ञवास्तुनि' क

पितरस्तस्य तिष्ठन्ति कल्पकोटिशतं दिवि ॥

चन्द्रिकायां मात्स्ये—

पठन्निमन्त्र्य नियमान् श्रावयेत्पैतृकान् बुधः ।
अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः ॥
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥

यत्तु मनुः—

सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः ।
भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्मणि ॥ इति,

तत्पूर्वेद्युर्निमन्त्रणपरं न तदहः । तत्रैव देवलः—

असम्भवे परेद्युर्वा ब्राह्मणांस्तान्निमन्त्रयेत् ।
अज्ञातीनसमानार्षानयुग्मानात्मशक्तितः ॥

कात्यायनः—*'अनिन्द्येनामन्त्रितो *नापक्रामेत्' (का० दुर्भिक्षे च । *अनिन्द्येन भोज्यान्नेन । *नापक्रामेत् न नाभ्युपगच्छेत् , किन्त्वभ्युपगच्छेदेव । केतनं गृह्य गृहीत्वा शक्तश्चेत् । 'अनिन्द्येनामन्त्रिते शक्तेन न प्रत्याख्यानं कर्तव्यम्'इति गौतमः । तेन निन्द्येनामन्त्रणे भोक्तुमसामर्थ्ये च प्रत्याख्येयमिति गम्यते । इदं च फललिप्सूनां परान्नभोजनाभ्यनुज्ञामात्रम् ,

कामं प्रतिश्रवस्तेषामनिन्द्यामन्त्रिसात्कृते ।

इति देवलोक्तेः । तत्र परान्नभोजनेऽल्पो दोषः न तु दोषसामान्याभावः । तत्रापदि द्रुपदाजपः, आपदाधिक्ये मनस्तापः । अत एव परान्नभोजनं प्रकृत्य मनुः—

लिप्यतैवैनसा विप्रो ज्वलनार्कमयोऽपि सन् । इति ।

निमन्त्रितान् नातिक्रामेत् , तदनन्तरं कस्यचिद्दोषजननेन परस्परातिक्रमे तु न दोषः । निन्द्यानाह याज्ञवल्क्यः—

कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम् ।

आ० स्मृ० १-१२) 'केतनं गृह्य शक्तः'।

अथ श्राद्धकर्तृभोक्तृनियमाः। तत्र निमन्त्रितविप्रत्यागेऽपरार्के यमः—

केतनं कारयित्वा तु योऽतिपातयति द्विजम्।
ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते॥
आमन्त्र्य ब्राह्मणं यस्तु यथान्यायं न पूजयेत्।
अतिकृच्छ्रासु घोरासु तिर्यग्योनिषु जायते॥

प्रमा(१)दात्त्यागे तु हारीतः—

प्रमादाद्विस्मृतं ज्ञात्वा प्रसाद्यैनं प्रयत्नतः।
तर्पयित्वा यथान्यायं सर्वं तत् फलमश्नुते॥

वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम्॥
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्।
क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम्॥
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्।
शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम्॥
नृशंसराजरजककृतघ्नवधजीविनाम्।
चैलधावसुराजीवसहोपपतिवेश्मनाम्॥
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा॥ (या० स्मृ० आ० १६३–१६७)

कदर्यः लक्षितः। बद्धः श्रृङ्खलितः। रङ्गावतारी नटः। वैणः वीणावादनोपजीवी, वीणेति तौर्यत्रिकोपलक्षणम्। दीक्षी दीक्षासंस्कारवान्। अग्नीषोमीयवपाहोमोत्तरं न दोषः, 'असंस्थितेऽग्नीषोमीये यजमानस्य गृहे नाशितव्यम्' इति श्रुतेः। क्रुद्धः दृढतरान्तरकोपः। मत्तः धनादिना गर्वितः। क्रूरः निष्ठुरः। उग्रः परदुःखकृत्। रजकः वस्त्ररागकारी। चैलधा-

---

(१) 'प्रमादत्यागे' क०

प्रमादाभावे तु नारायणः—

एतस्मिन्नेनसि प्राप्ते ब्राह्मणो नियतः शुचिः ।
यतिचान्द्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते ॥

धकः वस्त्रप्रक्षालकः । एषां कदर्यादिसोमाविक्रयपर्यन्तानां त्रैवर्णिकानामन्नं न भोक्तव्यमित्यर्थः । यमोऽपि—

चक्रोपजीवी गान्धर्वः कितवस्तस्करस्तथा ।
ध्वजी दारोपजीवी च शूद्राध्यापकयाजकौ ॥
कुलालश्चित्रकर्मा च वार्धुषी चर्मविक्रयी ॥

चक्रोपजीवी शकटोपजीवी । गान्धर्वः गायकः । ध्वजी मद्यविक्रेता । इतरे प्रसिद्धाः । एते अभोज्यान्ना इत्यर्थः । आपस्तम्बोऽपि—

द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा ।
मुनेरन्नमभोज्यं स्यात्सर्वेषां लिङ्गिनां तथा ॥

मुनिरित्युपलक्षणम् । लिङ्गिनः पाशुपतादयः । अङ्गिराश्च—

षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम् ।
स तु जीवन् भवेच्छूद्रो मृतः श्वा चाभिजायते ॥

यत्तु सौमन्तवं—

गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च ।
अपूपान् भक्षयेच्छूद्रात् यच्चान्यत् पयसा शृतम् ॥

यदपि विष्णुपुराणम्—

सम्प्रोक्ष्य विप्रो गृह्णीयाच्छूद्रान्नं गृहमागतम् । इति,

तदापद्विषयम्,

अदत्तान्याग्निहीनस्य नान्नमद्यादनापदि । (या० स्मृ० १-१६०)

इति याज्ञवल्क्योक्तेः ।

(य(१)स्य नाश्नन्ति देवाश्च पितरश्च तथाऽतिथिः ।

---

(१) कंसान्तर्गतं नास्ति घ०

यमः—

*आमन्त्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति ।
नरकाणां शतं गत्वा चाण्डालेष्वभिजायते ॥

तत्रैव देवलः—

पूर्वं निमन्त्रितोऽन्येन कुर्यादन्यप्रतिग्रहम् ।
भुक्ताहारोऽथवा भुङ्क्ते सुकृतं तस्य नश्यति ॥

वृथापाकः स विज्ञेयः तस्य नाद्यात् कथञ्चन ॥
योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते ।
अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥

देवलः—

परपाकनिवृत्तस्य परपाकरतस्य च ।
अपचस्य च भुक्त्वाऽन्नं द्विजश्चान्द्रायणं चरेत् ॥

एतच्चाभ्यासविषयम् ।

गृहीत्वाऽग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत् ।
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः ॥
पञ्चयज्ञान् स्वयं कृत्वा परान्नमुपजीवति ।
सततं प्रातरुत्थाय परपाकरतस्तथा ॥
गृहस्थधर्मवृत्तो यो ददाति परिवर्जितः ।
ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः ॥

एवमन्येऽप्यभोज्यान्ना अन्यतो ज्ञे(१)याः ।

*आमन्त्रित इति । आमन्त्रणमङ्गीकृत्य सत्यपि सामर्थ्ये पश्चान्निवारणं चेत् कुर्यात् तदा मनुः—

केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः ।
कथञ्चिदप्यतिक्रामन् पापः शूकरतां व्रजेत् ॥ इति । (म० स्मृ० ३-१९०)

---

(१) 'बोध्याः' ङ०

यदि विप्रो *विलम्बेत तदोक्तमादित्यपुराणे—

आमन्त्रितश्चिरं नैव कुर्याद्विप्रः कदाचन ।
देवतानां पितॄणां च दातुरन्नस्य चैव हि ॥
चिरकारी भवेद् द्रोही पच्यते नरकाग्निना ॥

पृथ्वीचन्द्रोदये यमः—

निमन्त्रितस्तु यो विप्रो ह्य*ध्वानं याति दुर्मतिः ।
भवन्ति पितरस्तस्य तं मासं पांसुभोजनाः ॥
आमन्त्रितस्तु यः श्राद्धे हिंसां वै कुरुते द्विजः ।
पितरस्तस्य तं मासं भवन्ति रुधिराशनाः ॥
आमन्त्रितस्तु यः श्राद्धे भारमुद्वहते द्विजः ।
पितरस्तस्य तं मासं भवन्ति स्वेदभोजनाः ॥
निमन्त्रितस्तु यो विप्रः प्रकुर्यात्कलहं यदि ।
पितरस्तस्य तं मासं भवन्ति मलभोजनाः ॥

शङ्खः—

निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः ।
श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्महतैनसा ॥

मैथु(१)नम् ऋतावपि निषिद्धम् ।

(मृ(२)ष्टान्नदक्षिणादिलोभेनातिक्रमे तु चान्द्रायणं कार्यम् ।)

यत्तु निर्धनस्य लोभादिनाऽतिक्रमे दोषाभाववचनं—

विद्यमानधनो विद्वान् भोज्यान्नेन निमन्त्रितः ।
कथञ्चिदप्यतिक्रामन् पापः शूकरतां व्रजेत् ॥ इति ।

तस्य समूलत्वे अत्यावश्यकधनव्यये उपस्थिते निर्धनस्य केतनदक्षिणामात्रेण तदनिर्वाहे लोभादिना तदतिक्रमानुज्ञापरम् । *विलम्बेत आहूतोऽपि श्राद्धकालातिक्रमं करोति । *अध्वानमिति ।

---

(१) 'मैथुनं च' क० (२) धनुश्चिन्हान्तर्गतं नास्ति घ०

ऋतु(१)काले नियुक्तो वा नैव गच्छेत्स्त्रियं क्वचित् ।
तत्र गच्छन्नवाप्नोति ह्यनिष्टानि फलानि तु ॥ इति

तत्र माधवीये च वृद्धमनूक्तेः;

श्राद्धं करिष्यन् कृत्वा वा भुक्त्वा वाऽपि निमन्त्रितः ।
उपोष्य च तथा भुक्त्वा नोपेयाच्च ऋतावपि ॥
भोक्ष्यन् करिष्यन् श्वः श्राद्धं पूर्वरात्रौ प्रयत्नतः ।
व्यवायं भोजनं चापि ऋतावपि विवर्जयेत् ॥ इति

तत्रैवाश्वलायनोक्तेश्च । विज्ञानेश्वरेण तु श्राद्धे ऋतौ गच्छतोऽपि न दोष इत्युक्तं तत्त्वगतिक(२)गतित्वे ज्ञेयम् । बृहस्पतिः—

द्विनिशं ब्रह्मचारी स्याच्छ्राद्धकृद्ब्राह्मणैः सह ।
अन्यथा वर्तमानौ तु स्यातां निरयगामिनौ ॥
पुनर्भोजनमध्वानं भारमायासमैथुनम् ।
श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत् ॥
स्वाध्यायं कलहं चैव दिवास्वापं तथैव च ॥

यत्तु श्राद्धकारिकायां पुराणसमुच्चये—

कृत्वा तु रुधिरस्रावं न विद्वान् श्राद्धमाचरेत् ।
एकं द्वे त्रीणि वा विद्वान् दिनानि परिवर्जयेत् ॥ इति,

तन्निर्मूलम् । पृथ्वीचन्द्रोदये यमः—

पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् ।
सन्ध्यां प्रतिग्रहं होमं श्राद्धभोक्ताऽष्ट वर्जयेत् ॥ इति ।

(३)तत्र सन्ध्यानिषेधः प्रायश्चित्तात् पूर्वं ज्ञेयः । यथाऽऽहोशनाः—

दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुक् द्विजः ।
ततः सन्ध्यामुपासीत जपेच्च जुहुयादपि ॥

---

(१) 'ऋतुकालं' क० (२) 'तत्त्वगतिकत्वे' क० (३) 'तत्र नास्ति' छ० ग०

गौडास्तु—

सायंसन्ध्यां परान्नं च छेदनं च वनस्पतेः ।
अमावास्यां न कुर्वीत रात्रिभोजनमेव च ॥
द्यूतं च कलहं चैव सायंसन्ध्यां दिवाशयम् ।
श्राद्धकर्ता च भोक्ता च पुनर्भुक्तिं च वर्जयेत् ॥

इति कामधेनौ वाराहाद्युक्तेः श्राद्धकर्तुरपि सायंसन्ध्यानिषेधमाहुः । शिष्टास्तव(१)स्य निर्मूलत्वमाहुः । होमनिषेधस्तु *स्वविषयः,

सूतके च प्रवासे च अशक्तौ श्राद्धभोजने ।
एवमादिनिमित्तेषु हावयेन्न तु हापयेत ॥

इति छन्दोगपरिशिष्टात् । तत्रैवादित्य(२)पुराणे—

निमन्त्रितस्तु न श्राद्धे कुर्याद्भार्यादिताडनम् ॥

चन्द्रिकायां प्रचेताः—

श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दन्तधावनम् ।
श्राद्धकर्ता न कुर्वीत दन्तानां धावनं बुधः ॥

हेमाद्रौ जा(३)बालिः—

दन्तधावनताम्बूले तैलाभ्यङ्गमभोजनम् ।
रत्यौषधपरान्नं च श्राद्धकृत्सप्त वर्जयेत् ॥ इ(४)ति ।

विष्णुरहस्ये—

श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्या शतसम्पूतमम्बु प्राश्य विशुध्यति ॥

न सीमानमतिक्रामेत् श्राद्धार्थं वै निमन्त्रितः ।
पर्यटन् सीममध्ये तु न कदाचित् प्रदुष्यति ॥

इति ब्रह्माण्डात्, सीम्नः परस्तान्न गच्छेत् । *स्वविषय

---

(१) 'अस्य नास्ति' छ० ग० (२) 'आदिपुराणे' क०
(३) 'जाबालः' क० (४) 'इति' नास्ति क०

पुनर्भोजनमध्वानं यानमायासमैथुनम् ।
दानप्रतिग्रहौ होमं श्राद्धभुक् त्वष्ट वर्जयेत् ॥

सोमोत्पत्तौ —

वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिम् ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥

एतद्विहितेध्मादिव्यतिरेकेण ।

वनस्पतिगते सोमेऽनडुहो यस्तु वाहयेत् ।
नाश्नन्ति पितरस्तस्य दश वर्षाणि पञ्च च ॥
वनस्पतिगते सोमे मन्थनं यस्तु कारयेत् ।
गावस्तस्य प्रणश्यन्ति चिरकालमुपस्थिताः ॥

वनस्पतिगतस्वरूपमाह पृथ्वीचन्द्रोदये व्यासः—

त्रिमुहूर्तं वसेदर्के त्रिमुहूर्तं वसेज्ज(१)ले ।
त्रिमुहूर्तं वसेद्गोषु त्रिमुहूर्तं वनस्पतौ ॥

कालिकायां वृद्धमनुः—

निमन्त्र्य विप्रांस्तदहर्वर्जयेन्मैथुनं *क्षुरम् ।
प्रमत्ततां च स्वाध्यायं क्रोधाशौचे तथाऽनृतम् ॥

केचिन्निमन्त्रणात्पूर्वं शुद्ध्यर्थं पूर्वेऽह्नि क्षौरं कुर्वन्ति, तत्र मूलं मृग्यम् । मरीचिः—

षष्ठ्यां पर्वसु पक्षादौ रिक्ताभद्रातिथिष्वपि ।
पाते श्राद्धे व्रताहे च क्षौरं वर्ज्यं निशासु च ॥

यदा कर्तुरशक्त्या तत्पुत्रशिष्यादिः श्राद्धं करोति तदा कर्त्रा प्रतिनिधिना च प्रागुक्तनियमाः कार्याः,

इति । अन्यहोमकर्तुरभावे स्वयमेव प्रायश्चित्तानन्तरं होमः कार्यः, 'दशकृत्व'इति वचनात् । *क्षुरमिति । नखकृन्तनाद्युपलक्षणम् ।

---

(१) 'जले वसेत्' क०

न शक्नोति स्वयं कर्तुं यदा ह्यनवकाशतः।
श्राद्धं शिष्येण पुत्रेण तदाऽन्येनापि कारयेत्॥
नियमानाचरेत्सोऽपि नियतांश्च वसुन्धरे।
यजमानोऽपि तान्सर्वानाचरेत्सुसमाहितः॥

इति हेमाद्रौ वाराहोक्तेः। स्त्रियास्तु पाद्मे—

मुक्तकच्छा तु या नारी मुक्तकेशी तथैव च।
हसते वदते चैव निराशाः पितरो गताः॥

आश्वलायनः—

श्राद्धेऽह्नि भोजयेद्वास्तौ न बालानपि यत्नतः।
प्राक्पिण्डदानाद्गन्धाद्यैर्नालङ्कुर्यात्स्वविग्रहम्॥

वास्तौ गृहे।

अथ श्राद्धवस्तूनि। तत्रादौ *कुशाः पृथ्वीचन्द्रोदये दक्षः—

समित्पुष्पकुशादीनां द्वितीयः परिकीर्तितः।

अष्टधा भक्ते दिने द्वितीयो भाग इत्यर्थः। तत्रैव यमः—

समूलस्तु भवेद्दर्भः पितॄणां श्राद्धकर्मणि।
मूलेन लोकान् जयति शक्रस्य सुमहात्मनः॥

व्यासः—

तर्पणादीनि कर्माणि पितॄणां यानि कानिचित्।
तानि स्युर्द्विगुणैर्दर्भैः सप्तपत्रैर्विशेषतः॥

शालङ्कायनः—

सपिण्डीकरणं यावदृजुदर्भैः पितृक्रिया।
सपिण्डीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत्॥

---

*कुशा इति। दर्भकुशयोर्भेदमाह कौशिकः—

सप्तपत्राः शुभा दर्भास्तिलक्षेत्रसमुद्भवाः।
अप्रसूता स्मृता दर्भाः प्रसूतास्तु कुशाः स्मृताः॥
समूलाः कुतपाः प्रोक्ताश्छिन्नाग्रास्तृणसंज्ञिताः॥

शङ्खः—

*अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

हारीतः—

*पवित्रं ब्राह्मणस्यैव चतुर्भिर्दर्भपिञ्जुलैः ।
एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् ॥

स्मृत्यर्थसारे—

सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रन्थितं*नवम् ॥

रत्नावल्याम्—

द्वयोस्तु पर्वणोर्मध्ये पवित्रं धारयेद्बुधः ॥

हेमाद्रौ स्कान्दे—

अनामिकाधृता दर्भा ह्येकानामिकयापि वा ।
द्वाभ्यामनामिकाभ्यां तु धार्ये दर्भपवित्रके ॥

पवित्राभावे (१)तु तत्रैव सुमन्तुः—

समूलाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे करे ।
सव्ये चैव तथा त्रीन्वै बिभृयात्सर्वकर्मसु ॥

*अनन्तर्गर्भि अनन्तर्गर्भ एकः । कुश एव पवित्रं कौशमिति स्वार्थे तद्धितः । आज्योत्पवने च तादृशे द्वे पवित्रे ग्राह्ये, 'पवित्राभ्यामाज्यमुत्पुनाति' इति सूत्रात् । तथा च पवित्रं यत्र कुत्रचित्कर्मणि द्विदलं पवित्रद्वयात्मकं विज्ञेयमिति, न तु दलद्वयोपेतकुशद्वयात्मकम्, पदार्थैकदेशतया कुशे द्विदलानन्वयात् सापेक्षतया कौशमिति तद्धितासम्भवाच्च । धार्यं पवित्रमाह-*पवित्रमिति । 'पिञ्जुलं कुशपत्रे स्यात्' इति कोशः । *नवमिति ।

त्रिभिस्तु शान्तिके कार्यं पौष्टिके पञ्चभिस्तथा ।
चतुर्भिश्चाभिचाराख्यं कुर्वन् कुर्यात्पवित्रकम् ॥

---

(१) 'तु'नास्ति क० ङ०

बौधायनः—

हस्तयोरुभयोर्द्वौ द्वावासनेऽपि तथैव च ।

दर्भग्रहणे मन्त्रमाह शङ्खः—

विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज ।
नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव ॥

स्मृत्यर्थसारे—

हुंफट्कारेण मन्त्रेण सकृच्छित्वा समुद्धरेत् ।

भारद्वाजः—

प्रेतक्रियार्थं पित्र्यर्थमभिचारार्थमेव च ।
दक्षिणाभिमुखश्छिन्द्यात्प्राचीनावीतिको द्विजः ॥

कुशाभावेऽपरार्के सुमन्तुः—

कु(१)शाः काशाः शरो गुन्द्रो यवा दूर्वाऽथ बल्वजाः ।
गोकेशमुञ्जकुन्दाश्च पूर्वाभावे परः परः ॥

इत्यपि । अस्याचमनाङ्गत्वमाह कात्यायनः--

सपवित्रः सदर्भो वा कर्माङ्गे पितृकर्मणि ।
अशून्यं तु करं कृत्वा सर्वत्राचमनं चरेत् ॥

सर्वकर्माङ्गत्वं च शातातपः—

जपे होमे तथा दाने स्वाध्याये पितृकर्मणि ।
सव्यापसव्यौ कुर्वीत सपवित्रौ करौ बुधः ॥

पवित्रे च ग्रन्थिमाहात्रिः—

ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते ।
भोजने वर्तुलः प्रोक्तः एवं धर्मो न हीयते ॥

द्विगुणीकृतानां दर्भशिखानां पाशं प्रदक्षिणम् अर्धवेष्टनं विधाय पश्चाद्भागेन यदा प्रवेशयेत्तदा वर्तुलो ग्रन्थिः । स एव यदा प्रादक्षिण्येन समवेष्टनं विधाय पुरोभागेन प्रवेशयेत्तदा ब्रह्मग्रन्थि-

---

(१) 'कुशः काशः' क० छ० ।

काशादौ विशेषमाह शङ्खः—

काशहस्तस्तु नाचामेत्कदाचि*द्विधिशङ्कया।
प्रायश्चित्तेन युज्येत दूर्वाहस्तस्तथैव च॥

पृथ्वीचन्द्रोदये यमः—

मासिमास्युद्धृता दर्भा मासिमास्येव (१)चोदिताः।

षट्त्रिंशन्मते—

मासेन स्यादमावास्या दर्भो ग्राह्यो नवः स्मृतः।

गृह्यपरिशिष्टे—

*ये च पिण्डाश्रिता दर्भा यैः कृतं पितृतर्पणम्।
अमेध्याशुचिलिप्ता ये तेषां त्यागो विधीयते॥

रिति हेमाद्रिः। एतेन भोजने पवित्रस्याप्यावश्यकत्वं गम्यते।
*विधिशङ्कयेति।

सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम्।
नोच्छिष्टं तत्पवित्रं तु भुक्त्वोच्छिष्टं तु वर्जयेत्॥

इति विधेरनुकल्पेऽपि प्रवृत्तिशङ्कयेत्यर्थः।

मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः।
अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः॥

इत्युपयुक्तानामप्यन्यत्र विनियोज्य(२)त्वात्तदपवादमाह-*ये चेति। अग्राह्यान् कुशानाह भरद्वाजः—

शुना शूद्रवराहेण मार्जारेणैकचक्षुषा।
खरेण कुक्कुटेनैव स्पृष्टः कर्मरिपुः कुशः॥
कृमिना कृकलासेन पतितेनान्त्यजेन च।
भिषजा रोगिणा स्पृष्टः कुशः कर्मस्वशोभनः॥
देवलेन च षण्ढेन व्रात्येनाज्ञातजन्मना।
वर्ज्यः सूतकिना स्पृष्टः कुशोऽनुष्ठेयकर्मसु॥

---

(१) 'ते स्मृताः। मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः। षट्त्रिं' क०।

(२) 'त्वात्तन्नाह' ङ।

लघुहारीतः—

पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासनपिण्डेषु षट् कुशान् परिवर्जयेत् ॥
ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे ।
हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते ॥

हेमाद्रौ—

*अन्यानि च पवित्राणि कुशदूर्वात्मकानि च ।
हेमात्मकपवित्रस्य ह्येकां नार्हन्ति वै कलाम् ॥

अथ हविः । हेमाद्रौ प्रचेताः—

कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्यु*र्यवशालयः ।
*महायवा व्रीहियवास्तथैव च मधूलिकाः ॥
*कृष्णाः श्वेताश्च*लोहाश्च ग्राह्याः स्युः श्राद्धकर्मणि ॥

महायवा वेणुबीजम् । मधूलिका*यावनाला इति

रक्तश्लेष्मास्थिभिः स्पृष्टः क्रियायुक्तः पुरा धृतः ।
उच्छिष्टजनसंस्पृष्टः कुशो ज्ञेयः क्रियारिपुः ॥

हारीतश्च—

येत्वन्तर्गर्भिता दर्भा ये च च्छिन्ना नखैस्तथा ।
क्वाथिताश्चाग्निना ये च तान् दर्भान्परिवर्जयेत् ॥

इत्यादि । *अन्यानि चेति दर्भपवित्रासत्त्वे । तत्सत्त्वे त्वेतद्धेयमेव, विकल्पितयोरिव कल्पानुकल्पितयोरेकार्थविरोधित्वात् ।

*यवशालयः । यवाः शितशूकाः । शालयः कलमाद्याः । 'यवशालिः शालिभेदः' इति(१)माधवानुमतम् । *महायवव्रीहियवौ यवभेदौ । 'महायवा वेणुबीजम्' इति पाठस्तु न माधवानुमतः । *कृष्णाः स्थलजाः कृष्णवर्णव्रीहयः । *लोहाः रक्तशालयः । प्रागुक्तस्यैव विवरणमित्यन्ये । *यावनाला

---

(१) 'माधवानुक्तं' घ० ङ झ० ।

हेमाद्रिः कल्पतरुश्च । भारते—

वर्धमानतिलं श्राद्धमक्षय्यं मनुरब्रवीत् ।
सर्वकामैः स यजते यस्तिलैर्यजते पितॄन् ॥

चन्द्रिकायां देवलः—

इष्टापूर्तं मृताहे च दर्शवृद्ध्यष्टकासु च ।
पात्रेभ्यस्तेषु कालेषु देयं नैव कुभोजनम् ॥

सा(१)यणीये—

*अगोधूमं च यच्छ्राद्धं माषमुद्गविवर्जितम् ।
तैलपक्वेन रहितं कृतमप्यकृतं भवेत् ॥

हेमाद्रावत्रिः—

अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेत् ।

तत्रैव ब्राह्मे—

यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा ।
सन्तर्पयेत् पितॄन् मुद्गैः श्यामाकैः*सर्षपद्रवैः ॥
नीवारैर्हरिश्यामाकैः प्रियङ्गुभिरथार्चयेत् ॥

इति । तद्विशेषा इत्यर्थः । शालिविशेषा इत्यपि स एव । धान्यविशेषा इति माधवः । महुलीति प्रसिद्धो दीर्घगोधूम इति तदर्थविदः । *अगोधूममिति गोधूमादेरत्यावश्यकत्वार्थम् । तैलयावनालयोरापत्कल्पत्वमाह निगमः—

यावनालानपि तथा वर्जयन्ति विपश्चितः ।
तैलमप्यापदि प्राज्ञाः सम्प्रयच्छन्ति याज्ञिकाः ॥

तैलमपि वर्जयन्ति । आपदि तु उभयमपि सम्प्रयच्छन्तीत्यर्थः ॥ *सर्षपाः गौराः । मार्कण्डेयः—

नीवाराः पौष्कराश्चैव वन्यानां पितृतृप्तये ।
प्रियङ्गवः कोविदारा निष्पावाश्चात्र शोभनाः ॥

---

(१) 'सायनीये' क० ।

हेमाद्रौ कार्ष्णाजिनिः—

*यादिष्टं जीवतश्चासीत्तद्दद्यात्तस्य यत्नतः ।
स तृप्तो दुस्तरं मार्गं ततो याति न संशयः ॥

कलिकायामाश्वलायनः—

कदल्यादिफलैः शस्तैर्मूलैरार्द्रादिकैरपि ।
गोरसैर्मधुना दध्ना श्राद्धे संतर्पयेत् पितॄन् ॥
कदल्याम्रफलादीनि श्राद्धे सम्पादयेत्सुधीः ॥

हेमाद्रौ पृथ्वीचन्द्रोदये च मार्कण्डेयः—

गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि ।
श्राद्धेषु दत्तैः प्रीयन्ते मासमेकं पितामहाः ॥
विदार्या च भरुण्डैश्च तिलैः शृङ्गाटकैस्तथा ।
क(१)ञ्चुकैश्च तथा कन्दैः कर्कन्धूबदरैरपि ॥
पालेवतैरारुकैश्चाप्यक्षोटैः पनसैस्तथा ।
काकोल्या क्षीरकाकोल्या तथा पिण्डालकैः शुभैः ॥
लाजाभिश्च सधानाभिस्त्रपुसोर्वारुचिर्भटैः ।
सर्षपाराजशाकाभ्यामिङ्गुदै राजजम्बुभिः ॥
प्रियालामलकैर्मुख्यैः फल्गुभिश्च तिलण्टकैः ।
वेत्राङ्कुरैस्तालकन्दैश्चुक्रिकाक्षीरिकावचैः ॥
लोचैः समोचैर्लकुचैस्तथा वै बीजपूरकैः ।
मुञ्जातकैः पद्मफलैर्भक्ष्यभोज्यैश्च संस्कृतैः ॥
रागखाण्डवचोष्यैश्च त्रि(२)जातकसमन्वितैः ।
दत्तैस्तु मासं प्रीयन्ते श्राद्धेषु पितरो नृणाम् ॥

पौष्कराः पद्मबीजम् । कोविदारः काञ्चनारः । निष्पावः वल्लः । *यादिष्टमिति । अनिष्टासाधनत्वेन संवादीच्छाविषयत्वाभिष्टत्वम् । अदनीयस्यान्नमिष्टं 'हविष्यं च' इति

---

(१) 'कैचुकै' क० छ० । (२) 'द्विजातक' ग० ।

एषां कोशहेमाद्र्यादिव्याख्यावैद्यकाद्यनुसारेण मध्यदेशभाषया नामान्युच्यन्ते । सतीनैः कलायैः, 'कलायस्तु सतीनकः' इत्यमरः । बटूरीति प्रसिद्धैः । विदार्या *तत्कन्देन । *भरुण्डं जलजं 'मखाणा' इति श्राद्धमञ्जर्याम् । *(१)कूष्माण्डमित्यन्ये । *शृङ्गाटकं सिंघाडा। *कञ्चु(२)कः कंचनारः। *कन्दः सूरणः, 'अर्शोघ्नः सूरणः कन्दः' इत्यमरः । कर्कन्धूः वन्यं*सूक्ष्मं बदरम् । *पालेवतं कोशातकी । *आरुकम् अरुई । अक्षोटम् अखरोटः । काकोलीक्षीरकाकोल्यौ गौडेषु प्रसिद्धे । पिण्डालकं सुथनी । (महा(३)राष्ट्राणां मोहलकन्द इति प्रसिद्धम्)। *त्रपुसादयस्त्रयः कर्कटीभेदाः । *चिर्भटं खर्बुजम् । स-

हविष्यत्वेन विशेषणात् । *तत्कन्देन भूकूष्माण्डीकन्देन । कृष्णवर्णभूकूष्माण्डफलमिति माधवः । *भरुण्डं काश्मीरदेश इति केचित् । *कूष्माण्डमिति । कूष्माण्डनिषेधस्तु अल्पतत्परः, वर्ज्यानुवृत्तौ

स्वल्पं तु कूष्माण्डफलं वज्रकन्दश्च पिप्पली ।

इति भरद्वाजोक्तेः । बहुशः कूष्माण्डनिषेधात् स्वल्पनिषेधो दोषाधिक्यार्थ इति भरुण्डं न कूष्माण्डमित्यस्वरसः । भूकूष्माण्डमिति वा पाठः । *शृङ्गाटक इति । आमशृङ्गाटकस्तु निषिद्ध इति श्राद्धदीपः । *कञ्चुक इति । कर्चूर इत्याख्यः शाक इति माधवः । *कन्द इति । वज्रकन्दस्तु निषिद्ध इति श्राद्धदीपः । कर्कन्धूबदरयोः पुनरुक्तिवारकं—*सूक्ष्मामिति। *पालेवतं जम्बीरानुकारिफलभेद इत्यन्ये । *आरुकम् अरण्यैर्वारुकमित्यन्ये । *त्रपुसं स्थूलकर्कटीभेदः । उर्वारुः स्वादुकर्कटी । चिर्भटं तिक्तकर्कटी । अर्थान्तरमाह—*चिर्भटामिति।

---

(१) 'भूकूष्माण्ड' क० ग० छ० । (२) 'केचुकः' क० छ० ।
(३) कंसान्तर्गतं नास्ति क० छ० ।

र्पा इति दीर्घश्छान्दसः । प्रियालं चिरौंजी । फल्गु उदुम्बरम् । तिलपर्णकं *पटोलम् । तालकन्दः कन्दविशेषः । चुर्क्रिका तिन्तिणी बि(१)म्बा । क्षीरिका खीराणि । मोचं कदलीफलम् । लकुचं बडहरम् । मुञ्जातकं गौडदेशे प्रसिद्धम् । पद्मफलं गट्टा । रागखाण्डवः—

पिप्पलीशुण्ठियुक्तस्तु मुद्गयूषस्तु खाण्डवः ।
रागखाण्डवतां याति शर्करासंयुतं तु तत् ॥

इत्युक्तः पानविशेषः । त्रिजातं लवङ्गैलापत्रकाणि ।
मदनरत्ने कौर्मे—

*कालशाकं च वास्तूकं मूलकं कृष्णनालिका ।
प्रशस्तानीति शेषः ।

हेमाद्रौ पृथ्वीचन्द्रोदये च वायुपुराणे—

कालशाकं महाशाकं द्रोणशाकं तथार्द्रकम् ।
बिल्वामलकमृद्वीकापनसाम्रातदाडिमम् ॥
चव्यं पालिवताक्षोटं खर्जूरं च कसेरुकम् ।
कोविदारश्च कन्दश्च पटोलं बृहतीफलम् ॥
पिप्पली मरिचं चैव एला शुण्ठी च सैन्धवम् ।
शर्करागुडकर्पूरबदरीद्रोणपत्रकम् ॥

तथा—

मधुकं रामठं चैव कर्पूरं गुडमेव च ।

राजशाकं कृष्णसर्षपः । इङ्गुदः तापसतरुफलम् । *पटोलं स्वादु । लोचं नारिकेरं "नारिकेरफलं लोचम्" इति कोशः । बीजपूरं मातुलिङ्गम् ।

*कालशाकं कालिकाख्यमुत्तरदेशे । एतेन कृष्णनालिका तदन्येति सिद्धम् ।

---

(१) 'बिम्बी वा' क० ङ० ।

श्राद्धकर्मणि शस्तानि सैन्धवं त्रपुसं तथा ॥

रामठं हिङ्गु ।

कसेरुः कोविदारश्च तालकन्दस्तथा बिसम् ।
तमालं शतकन्दश्च मध्वालुः शीतकन्दकम् ॥
कालेयं कालशाकं च सुनिषण्णं सुवर्चलम् ।
मांसं शाकं दधि क्षीरं चाम्बुवेत्राङ्कुरस्तथा ॥
कट्फलं कौङ्कणी द्राक्षा तिन्दुकं मोचमेव च ।
अलाबु ग्रीवकं चारं कर्कन्धुर्मधुसाह्वयम् ॥
वैकङ्कतं नारिकेलं शृङ्गाटकपरूषकम् ॥
पिप्पलीमरिचे चैव पटोलं बृहतीफलम् ॥
एवमादीनि चान्यानि स्वादूनि मधुराणि च ।
नागरं चार्द्रकं देयं दीर्घमूलकमेव च ॥ (१)इति ।

तथा—

शर्कराक्षीरसंयुक्ताः पृथुका नित्यमक्षयाः ।

द्रोणशाकं *(२)'गूम' इति प्रसिद्धम् । मृद्वीका द्राक्षा । *आम्रातम् आंबाडा इति प्रसिद्धो वृक्षः तत्फलं च । *पालिवतं जम्बीरम् पालि(३)आलमिति गौडप

*गूमेति । कुम्भेति महाराष्ट्राः । *आम्रातं कपीतक इति वृद्धाः, अम्बडी इति देशीयाः । रातम्बा इति वृक्षे, तत्फले च आम्बसोल इति महाराष्ट्राः । चव्यं चविका । 'भव्यम्' इति वा पाठः । भव्यं कर्मरङ्गं कम्रक इति तुरुष्काः । मधुकं मधुकफलम् । बि(४)सम् पद्मिनीमूलम् । सुनिषण्णं वितुन्नशाकम् इति वृद्धाः । *पालवितमिति । पारावतमिति पाठेऽपि पालि

---

(१) 'इति' नास्ति क. (२) 'गूमा' क.

(३) 'उपानिआलम्' क., 'पानिआलं' छ.

(४) यद्यपि 'घ' 'छ' झपुस्तकेषु "बिसं पद्मिनीफलम्" इति "मधुकं मधुकफलम्" इत्यस्मात्पूर्वं वर्तते परमस्माभिरग्रे मूलप्रतीकानुरोधेन स्थापितम् ।

सिद्धं वा । खर्जूरं खजूर इति प्रसिद्धम् । कसेरुः जलजः कन्दः । कोविदारः *कञ्चनारस(१)दृशः । तालकन्दः तालमूली । बिसं भसीडम् । शतकन्दः शतावरी । (२)शीतकन्दः शालूकं, सेरुकीति प्रसिद्धम् । कालेयं करालसंज्ञः शाकः, दारुहारिद्रा वेति पृथ्वीचन्द्रोदयः । सुनिषण्णं *कर्कटीसदृशं सुलटीया इति गौडप्रसिद्धम् । *सुवर्चलं शा(३)कविशेषः । *कट्फलं श्रीपर्णीवृक्षफलम् । कौङ्कणी *अम्लरसा द्राक्षा । तिन्दुकं डिण्डिसमिति कैदेवः *तिन्दुफलं वा । ग्रीवकं फलविशेषः । चारं क्षुद्रतालम् । मधुसाह्वयं मधूकपुष्पं फलं वा । *वैकङ्कतं वैञ्चीति गौडख्यातम् । परूषकं *परूसमिति प्र-

आलमिति गौडाः । *काञ्चनारसदृश इति । प्राक् काञ्चनार इति व्याख्यातमपि व्याख्यातम्,

कूष्माण्डालाबुवार्ताककोविदारांश्च वर्जयेत् ।

इति काञ्चनारनिषेधात् । अयं च करकापरपर्यायः । *क(४)र्कटीति । सुलटीयेति गौडाः । *सुवर्चलं सुमसुमीति गौडाः । च(५)ञ्चुः कचूरेत्यतिप्रसिद्धः । *कट्फलमिति । कायफलमिति महाराष्ट्राः । *अम्लेति । 'स्वादूनि' 'मधुराणि' इति च सम्भवाभिप्रायेणोपात्तेष्वपि योजनीयम् । *तिन्द्विति पाठद्वयेऽप्यर्थः । *वैकङ्कतं स्रुवावृक्षफलम् । *परूसमिति प्रसिद्धमिति । परशुरामक्षेत्रमध्यं दीर्घमूलकं. तुण्डकेरीफलमि-

---

(१) 'सदृश' नास्ति क. छ. (२) 'शीतकन्दः' नास्ति ग. छ.

(३) 'सुवर्चल सुमसुमीति गौड़प्रसिद्धं' क. छ.

(४) 'कर्कटीति' इत आरभ्य 'गौडाः' पर्यन्तं टीकाग्रन्थो मूल'क' 'छ' पुस्तकानुरोधिपाठानुवादो दृश्यते ।

(५) चञ्चुरित्यस्य मूले स्थितिर्नैव दृश्यते इति चिन्त्यमिदं प्रतीकम् । 'चञ्चुः चुञ्चुरित्यतिप्रसिद्धः' छ पुस्तके ।

सिद्धम् । नागरं शुण्ठी । पृथ्वीचन्द्रोदये ब्राह्मे—

(आम्र(१)मान्नातकं बिल्वं दाडिमं बीजपूरकम् ।
प्राचीनामलकं *क्षीरं नारिकेरं परूषकम्) ॥
नारङ्गकं च *खर्जूरं द्राक्षा नीलकपित्थकम् ।
एतानि फलजातानि श्राद्धे देयानि यत्नतः ॥

(मा(२)त्स्ये--

अन्नं तु सदधिक्षीरं गोघृतं शर्करान्वितम् ।
मासं प्रीणाति सर्वान्वै पितॄनित्याह केशवः ॥)

याज्ञवल्क्यः—

हविष्यान्नेन वै मासं पायसेन तु वत्सरम् ।
*मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः ॥
ऐणरौरववाराहशाशैर्मांसैर्यथाक्रमम् ।
मासवृद्ध्याऽभितृप्यन्ति दत्तैरिह पितामहाः ॥
खड्गामिषं *महाशल्कं मधु मुन्यन्नमेव च ।

ति वृद्धाः । प्रागुक्तमूलकमेतदेव । *क्षीरं राजादनफलम् । 'खिरणी' इति गुर्जराः । *खर्जूरमिति । वत्सकं वारुकं वाऽन्यत्र पठितम् । आद्यं कुटजफलं, द्वितीयं वालुकमिति महाराष्ट्राः । शङ्खः—

आम्रान् पालेवतानिक्षून् मृद्वीकाभव्यदाडिमान् ।

अन्यत्रापि—

वीणाकं लकुचं जम्बु भव्यं भूतं तथाहकम् ।

भूतं कर्णाटेषु ।

श्राद्धे मांसमधुनोरावश्यकत्वमाभासितुं मांसं कीर्तयति-*मात्स्येति । *महाशल्कः मत्स्यभेदः । पृष्ठभागः शुक्त्याकारोऽवय-

---

(१) कंसान्तर्गतं नास्ति क. छ.
(२) कंसान्तर्गतं नास्ति क. छ.

*लोहामिषं *कालशाकं मांसं वार्ध्रीणसस्य च ॥'

निगमः—

त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।
वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि ॥

वार्ध्रीणसो जरच्छाग इति मेधातिथिः । कात्यायनः—

'छागो(१)स्रमेषानालभ्य शेषाणि क्रीत्वा लब्ध्वा वा स्वयं मृतान्वाहृत्य पचेत्' । कौर्मे—

क्रीत्वा लब्ध्वा स्वयं वाऽथ मृतानाहृत्य वा द्विजः ।
दद्याच्छ्राद्धे प्रयत्नेन तदस्याक्षय्यमुच्यते ॥

श्राद्धे दत्तस्य मांसस्याभक्षणे दोषमाह मनुः—

नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुनां याति संभवानेकविंशतिम् ॥

अत्र बहुषु वचनेषु श्राद्धे मांसमधुनोः प्राशस्त्योक्तेः,

विना मांसेन यच्छ्राद्धं कृतमप्यकृतं भवेत् ।

इति हेमाद्रौ देवलोक्तेः,

यच्छ्राद्धं मधुना हीनं तद्रसैः सकलैरपि ।
मिष्टान्नैरपि संयुक्तं पितॄणां नैव तृप्तये ॥
अणुमात्रमपि श्राद्धे यदि न स्याच्च माक्षिकम् ।
नामापि कीर्तनीयं स्यात् पितॄणां प्रीतये ततः ॥

इति हेमाद्रौ ब्राह्मोक्तेश्च मांसमधुनोः श्राद्धे नियतत्वं गम्यते । गौडनिबन्धे मात्स्य(२)सूक्ते—

मध्वभावे गुडो देयः क्षीरस्य च तथा दधि ।

वो हि शल्कः । शल्लक इत्यन्ये । *लोहः लोहितवर्णश्छागः । कृष्णवर्ण इत्येके । लोहपृष्ठनामा शकुनिरित्यन्ये । *कालशाकं कालिका ।

---

(१) उस्रो वृषभः । अत्र छागसन्नियोगेनोस्रग्रहणं कल्पान्तरविषयं ज्ञेयम् ।

(२) 'मात्स्यसुमन्तू' ग०

न लभ्यते घृतं यत्र कुर्यात् घृतवतीजपम् ॥

श्राद्धकालिकायां नागरखण्डे—

कथंचिद्यदि विप्रेभ्यो न दत्तं भोजने मधु ।
पिण्डास्तु नैव दातव्याः कदाचिन्मधुना विना ॥

*बृहत्पराशरस्तु मांसं निषेधति—

यस्तु प्राणिवधं कृत्वा मांसैस्तर्पयते पितॄन् ।
स विद्वांश्चन्दनं दग्ध्वा कुर्यादङ्गारविक्रयम् ॥
क्षिप्त्वा कूपे यथा किञ्चिद्बाल आदातुमिच्छति ।
पतत्यज्ञानतः सोऽपि मांसेन श्राद्धकृत्तथा ॥

स एव—

*सर्वथान्नं यदा न स्यात्तदैवामिषमाश्रयेत् ।
*ब्राह्मणश्च स्वयं नाद्यात्तच्च श्वादिहतं यदि ॥

सिद्धान्तमाह— *बृहत्पराशरास्त्विवाति । सर्ववर्णान् प्रति श्राद्धीयमांसत्वेन पुरुषार्थस्य क्रत्वर्थस्य च मांसस्यायं निषेधः "कलौ पाराशरा धर्माः" इत्यत्र पराशरशब्देन बृहत्पराशरग्रहणस्यापि समस्तधार्मिकसंमतत्वादिति भावः । *सर्वथान्नमिति । इदमामिषविधेर्विषयप्रदर्शनमात्रम् । 'आमिषं नाश्रयेत्' इत्यत्र तात्पर्यम् । *ब्राह्मणश्चेति । एतत्सर्वादननिषेधोपलक्षकं सत् कलौ नियोगवचनं न प्रवर्तते इत्येवमर्थम् । वस्तुतस्तु मा(१)नवं यथान्यायशब्दसमभिव्याहारात् नियुक्तपदमन्यायनियोगेऽभक्षणे दोषाभावसूचकं 'यथान्यायं नात्ति' इत्यन्वयेऽव्ययीभावत्वैयर्थ्यात् काकाक्षिन्यायेनोभयत्राप्यन्वयसम्भवाच्च । अत एव ।

मन्वर्थविपरीता तु स्मृतिः साऽपि विनश्यति !

इति व्यवस्थावचनस्यापि न प्रवृत्तिः । तदेतत् सकलं मनासि-

---

१) "नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।" इत्यादिमानववचनमर्थः ।

*भागवतेऽपि—

न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित् ।
मुन्यन्नैः स्यात्परा प्रीतिर्यथा न पशुहिंसया ॥

तथेति शेषः ।

अत्र केचित्—

मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः ।
मधु प्रधानं शूद्रस्य सर्वेषां वाऽविरोधि यत् ॥

इति हेमाद्रौ पुलस्त्योक्त्या *व्यवस्था*माहुः ।

त्य कलिक्षारसागरसमुत्तरणतरणिं श्रीभागवतं प्रमाणयति—*भागवतेऽपि न दद्यादिति । *व्यवस्थामिति । क्षत्रियवैश्ययोरेव मांसमिति वचनव्यक्त्या सर्वेषां मांसदानविधीनां क्षत्रियवैश्यपरत्वावगमान्न ब्राह्मणस्य श्राद्धे मांसदानसम्भवः । न च मांसमेव क्षत्रियवैश्ययोरिति कुतो नार्थः ? सर्ववर्णानामप्रतिषिद्धद्रव्यविधानानुपपत्तेः, तुल्यन्यायेन 'मुन्यन्नमेव ब्राह्मणस्य' इति वचनव्यक्त्या द्रव्यान्तरविधीनामानर्थक्यापाताच्च । न च प्रधानपदानुषङ्गान्मांसमेव क्षत्रियवैश्ययोः प्रधानमित्यर्थः, "याते अग्नेरजाशया हराशया" "इष एकपद्यूर्जद्विपदी" इत्यादावनुषङ्गं विना साकाङ्क्षत्वस्य, एवं "चित्पतिस्त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनातु" इत्यत्र तेनैव पदेन अग्रे "वसोः सूर्यस्य रश्मिभिः" इत्यस्यान्वयस्य चानुषङ्गे प्रमाणत्वात्; प्रकृते च तदभावात् । *आहुरिति अस्वरसः । एवमपि काम्यमांसदानवारणं न स्यात्, "सप्तदश वैश्यस्य सामिधेन्यः" इत्यस्य वैश्यस्य सप्तदशैव सामिधेन्य इति वचनार्थमुपेत्य तस्य नित्यपरत्वसम्भवाद् वैश्यं प्रति काम्यैकविंशसामिधेन्यनुवचनस्य सिद्धान्तितत्वात् । अत एव विज्ञानेश्वरेण मुन्यन्नं नीवारादि यच्छ्राद्धयोग्यमुक्तं तद्ब्राह्मणस्य प्रधानं समग्रफलदम् । एवमग्रेऽपि एतत्त्रयव्यतिरिक्तं यदविरोधि

पृथ्वीचन्द्रोदयस्तु--

*अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

इति निगमोक्तेः,

वराऽतिथिपितृभ्यश्च पशूपाकरणक्रिया ।

इति कलिवर्ज्येषु हेमाद्रावादित्यपुराणात्;

मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥

इत्युक्त्वा--

इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिणः ।

अप्रतिषिद्धं सद् विहितं, तत्र सर्वेषां प्रधानमित्यव्यवस्थयैव व्याख्यातमिति ।

*अक्षतेति । सर्ववर्णानां कलौ श्राद्धे मांसं क्षौद्रं च क्रत्वर्थं पुरुषार्थं च निषिद्धम् । न च "श्राद्धे मांसम्" इति श्राद्धार्थस्यैव निषेधः, न फलार्थस्येति वाच्यम्; एतद्वाक्यस्य सर्ववर्णान् प्रति प्राप्तेस्तत्र ब्राह्मणस्य नित्यमांसाभावेन काम्यमांसनिषेधपरत्वं, क्षत्रियवैश्ययोस्तु श्राद्धार्थमांससामान्यनिषेधपरत्वमिति वैरूप्यापत्तेः । अतः सर्ववर्णान् प्रति श्राद्धसम्बन्धिमांसत्वमधुत्वाभ्यां निषेधः "दीक्षितो न जुहोति" इत्यादिना दीक्षितं प्रति नित्यानामग्निहोत्रहोमादीनां काम्यानां चतुर्होतृहोमादीनां निषेधवत् । यत्तु-

कथञ्चिद् यदि विप्रेभ्यो न दत्तं भोजने मधु ।
पिण्डास्तु नैव दातव्याः कदाचिन्मधुना विना ॥

इति का(१)लभेदाप्रत्ययात् कलिनिषेधो भोजनमात्रपर इति पिण्डे कलावपि मधु देयम्,

सर्वकालं तिला ग्राह्याः पितृकृत्ये विशेषतः ।

---

(१) 'काले दाप्रत्ययात्' च०

इति बृहन्नारदीयेऽभि(१)धानाच्च मांसविधिः कलिव्यतिरिक्तविषयः । *कलौ मांसनिषेधानां च देशाचाराद्व्यवस्था । तथाच बृहन्नारदीये श्राद्धं प्रकृत्य--

यथाचारं प्रदेयं तु मधु मांसादिकं तथा ।
देशाचाराः परिग्राह्यास्तत्तद्देशीयजैर्नरैः ॥
अन्यथा पतितो ज्ञेयः सर्वधर्मबहिष्कृतः ॥ इति ।
यस्मिन्देशे पुरे ग्रामे त्रै(२)विद्यैर्नगरेऽपि वा ।
यो यत्र विहितो धर्मस्तं धर्मं न विचारयेत् ॥

इति भृगूक्तेश्चेत्याह । तन्न, *हो(३)लाकाधिकरणन्यायेन देशविशेषव्यवस्थापकपदकल्पनायोगात् । निरूपितं चैतत् पितामहचरणैर्मांसमीमांसायामिति दिक् ।

मनुः--

*संवत्सरं तु *गव्येन पयसा पायसेन च ।
भोज्यपात्रे तिलान् दृष्ट्वा निराशाः पितरो गताः ॥

इतिवदिति; तदशुद्धम्, 'कथञ्चित्' इति विस्मरणादेरेव लाभात्तद्वचनस्यैकमूलकल्पनालाघवेन कलिभिन्नपरत्वात् । मतान्तरमाह—*कलावीति । *होलेति । होला हि क्वचिद्देशे क्रियते क्वचित्तु नेति देशविशेषव्यवस्थापकपदकल्पनयाऽनाचार इति सिद्धान्तः । मांसे देशविशेषव्यवस्थाऽपि युगान्तर एव, कलिनिषेधस्य जागरूकत्वात्

समयश्चापि साधूनां प्रमाणं वेदवद् भवेत् ।

इति वचनादिति दिगर्थः । *संवत्सरं त्विति । *गव्येन मांसेन, प्रकरणात् । अयम्भावः—

तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा ।
दत्तेन मासं प्रीयन्ते विधिवत् पितरो नृणाम् ॥

---

(१) 'विधानात्' क. (२) 'त्रैविद्ये' क. छ; (३) 'होलाधि क' क.

वा(१)र्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥
*त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् ।
वा(१)र्ध्रीणसं तु तं प्राहुर्याज्ञिकाः श्राद्धकर्मणि ॥

द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु ।
(हरिणो गौरमृगः ।)
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च वै ॥
(शाकुनः भक्ष्यः पक्षी ।)
षण्मासान् छागमांसेन पार्षतेन च सप्त वै ।
(पृषतः चित्रमृगः ।)
अष्टावैणेयमांसेन रौरवेण नवैव तु ॥
(रुरुः कृष्णमृगः ।)
दश मासास्तु तृप्यन्ति वराहमहिषामिषैः ।
शशकूर्मयोस्तु मांसेन मासानेकादशैव तु ॥

इत्यभिधाय “संवत्सरं तु गव्येन” इति श्लोकानन्तरं—

कालशाकं महाशल्कं खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्वशः ॥

इति काम्यानां मांसानां विधानेऽपि न तद्दानं युक्तम्, काम्यगव्यमांसस्यापि दानप्रसङ्गात् । अतस्तेषां कलिभिन्न एव विषयत्वमुपेयम् । तथाच कलौ मांसस्य प्राप्तिरेव नास्ति । (२)बृहन्नारदीयवाक्यं तु विगीतमेवेति । *त्रिपिबं त्विति । त्रिभिः पिबतीति त्रिपिबः ।

पिबतो यस्य कर्णौ द्वौ जिह्वा चेति त्रयं स्पृशेत् ।
त्रिपिबं त्विन्द्रियक्षीणं यूथस्याग्रसरं तथा ॥
रक्तवर्णं तु राजेन्द्र छागं वार्ध्रीणसं विदुः । इति माधवः ।

---

(१) ‘वार्धीणस’ क ‘व्याघ्रीणस’ छ.
(२) “यथाचारं प्रदेयं तु मधु मांसादिकं तथा” इत्यादीत्यर्थः ।

क्षीरादौ विशेषमाह हेमाद्रौ सुमन्तुः—

*पयो दधि घृतं चैव गवां श्राद्धेषु पावनम् ।
माहिषीणां घृतं प्राहुः श्रेष्ठं न तु पयः क्वचित् ॥

याज्ञवल्क्यः—

*सन्धिन्य*निर्दशा*ऽवत्सागोपयः परिवर्जयेत ।
औष्ट्रमैकशफं स्त्रैण*मारण्यकमथाविकम् ॥

हेमाद्रौ हारीतः—'नवप्रसूतायाः सप्तरात्रादित्येके, द-

पक्षिविशेषो वा,

कृष्णग्रीवो रक्तशिराः श्येनपक्षी विहङ्गमः ।
स वै वार्ध्रीणसः प्रोक्त इत्येषा वैदिकी श्रुतिः ॥

इति निगमवचनात् । *पय इति । माधवीये मात्स्ये—

अन्नं तु सदधिक्षीरं गोघृतं शर्करान्वितम् ।
मासं प्रीणाति सर्वान् वै पितॄनित्याह केशवः ॥

*सन्धिनीति । वृषेण या सन्धीयते सा सन्धिनी । गर्भिणीत्यर्थः । मृतवत्सत्वाद्वत्सान्तरेण सन्धीयमाना सन्धिनीति विज्ञानेश्वरः । एककालदोहना च । *अनिर्दशा अनिर्गतदशरात्रा । *अवत्सा वत्सरहिता । अन्यवत्सोपलक्षणमेतत्, "क्षीरमपेयमन्यवत्सायाः" इति बौधायनोक्तेः । *आरण्यकपयोनिषेध आरण्यकमहिषीव्यतिरिक्तविषयः,

अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ।
आविकं सन्धिनीक्षीरं विवत्सायाश्च गोः पयः ॥
आरण्यानां च सर्वेषां मृगाणां महिषीं विना ।

इति मनूक्तेः । गौतमः—"स्यन्दिनीयमसूसन्धिनीनां क्षीरं न पेयम्" इति । स्यन्दिनी स्रवत एव स्रवत्पयःस्तनी । यमसूः

शरात्रादित्यपरे, (१)मासेनो*पेयुषं भवतीति धर्मविदः । *एतद्रजोभावपरम् । देवलः—

अजाऽऽविमहिषीणां तु पयः श्राद्धेषु वर्जयेत् ।
विकारान् पयसश्चैव माहिषं तु घृतं हितम् ॥

तत्रैव ब्राह्मे—

माहिषं चामरं मार्गमाविकैकशफोद्भवम् ।
स्त्रैणमौष्ट्रं (२)याचितं च दधि क्षीरं *त्यजे*द् घृतम् ॥
सगुडं मरिचाक्तं तु तथा पर्युषितं दधि ।
*दीर्णं तक्रमपेतं च नष्टास्वादं च फेनवत् ॥

माहिषापवादोऽपरार्के ब्राह्मे--

*देयं तक्रं तु सद्यस्कं नवनीतादनुद्धृतम् ।

यमलप्रसूः । *उपेयुषमिति । नञ्पाठे 'सप्तरात्रात्' इत्यादेः ससप्तरात्रं व्याप्येत्यर्थः । *एतत् अपेयत्वम्, अपेयं प्रकृत्य—

घृतात्फेनं घृतान्मण्डं पीयूषमथ चार्द्रगोः ।

इति स्मरणात् । अस्यार्थः–घृतादुद्धृत्य तत्फेनमात्रं न पेयम् । घृतादुद्धृत्य मण्डं तदग्रं न पेयम् । आर्द्रायाः प्रसवप्रभृत्यनिवृत्तरजस्काया गोः पयो न पेयम् । एतदेव पीयूषम् "पीयूषोऽभिनवं पयः" इति कोशात् । मनुनाऽपि--

शेलुं गव्यं च पीयूषं प्रयत्नेन विवर्जयेत् ।

इत्युक्तम् । *त्यजेदिति । श्राद्धे विशेषतो महिष्या अपि निषेधादारण्यमाहिषीपयः श्राद्धादन्यत्र बोध्यम् । याचितं याच्ञया लब्धम् । *घृतमिति । माहिषे तु घृते प्रतिप्रसवो दर्शितः । *दीर्णं स्फुटितम् । दीर्घकालस्थित्या नष्टस्वादु फेनवच्च तक्रं न पेयमित्यर्थः । *देयमिति उद्धृतनवनीततक्रनिषेधार्थम् ।

---

(१) अत्रापि पूर्ववदेव मासंव्याप्य नवसूतायाः क्षीरमपेयमित्यर्थः । एकमासोत्तरं ग्रहणयोग्यं भवतीतितु फलितोऽर्थः । (२) 'वाचितम्' क. ग.

*आरण्यमाहिषीक्षीरं शर्करास्नुतिसंयुतम् ॥
मध्वक्तं तु हितं चैव दद्यात्तदमृतं यतः ॥

*स्नुतिः क्षीरशरः । श्राद्धकौमुद्यां चैवम् । यद्यपि याज्ञवल्क्येन—

अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥

इति पर्युषितं दध्यादि भोज्यमुक्तम्, तथापि *गुडमरीचाक्तस्य पर्युषितदोषोऽत्रोच्यत इति हेमाद्रिः । तत्रैव ब्राह्मे—

कालशाकं तन्दुलीयं *वास्तुकं मूलकं तथा ।
शाकमारण्यकं चैव दद्याच्छ्राद्धेषु नित्यशः ॥

तन्दुलीयं सूक्ष्मपत्रमिति हेमाद्रिः । महाराष्ट्राणां माठ इति प्रसिद्धम् । आरण्यकं फांजीचू(१)कादि । तत्रैव—

दाडिमं मागधी चैव नागरार्द्रकतिन्तिणी ।
आम्रातकं जीरकं च कु(२)म्बरं चैव योजयेत् ॥

मागधी पिप्पली । (ना(३)गरं शुण्ठी) । कु(२)म्बरं

दीर्णादिनिषेधस्तु दोषाधिक्यार्थः । *आरण्येति । द्रव्यसंपद्विशेषस्य श्राद्धबीजत्वान्निषेधो ग्राम्यविषय इति भावः । स्नुतिं व्याकरोति-*स्नुतिः क्षीरशर इति । *गुडेति । दध्न इति शेषः । *वास्तुकमिति ।

श्राद्धे न देया पालङ्क्यास्तथा निष्पावकोद्रवाः ।
मसूरक्षारवास्तोककुलित्थशणशिग्रवः ॥

इति तु माधवः ।

---

(१) 'फांजीचूचादि' ग. (२) 'कुवरम्' ग.
(३) कंसान्तर्गतं नास्ति क. छ.

कुस्तुम्बरं धानिया इति प्रसिद्धम्। वायवीये—

अगस्त्यस्य शिखास्ताम्राः का(१)षायाः सर्व एव च।

शिखा नवपल्लवाः। प्रभासखण्डे—

आरामस्य तु सीमन्ताः कलायाः सर्व एव च।

सीमन्ताः नवपल्लवाः। कौर्मे—

तमालं शतकन्दं च मध्वालुः शीतकन्दली।

मध्वालुः मोहलकन्दः। शीतकन्दली रताळू इति प्रसिद्धम्।

अथ वर्ज्यम्। मार्कण्डेयपुराणे—

यच्चोत्कोचादिना प्राप्तं पतिताद्यदुपार्जितम्।
अन्यायकन्याशुल्कार्थं द्रव्यं चात्र विगर्हितम्॥
पित्रर्थं मे प्रयच्छस्वेत्युक्त्वा यच्चाप्युपाहृतम्॥

चन्द्रोदये शङ्खः—

*भूस्तृणं सुरसा *शिग्रु *पालङ्की मृचुकं तथा।
कूष्माण्डालाबु*वार्त्ताककोविदारांश्च वर्जयेत्॥
*पिप्प(२)ली मरिचं चैव तथा वै*पिण्डमूलकम्।
कृतं च लवणं सर्वं वंशाग्रं च विवर्जयेत्॥

*भूस्तृणं। भूतिकाख्यः शाकः। *शिग्रुः सौभाञ्जनो रक्तपुष्पो न श्वेतपुष्पः। *पालङ्की मुकुन्दाख्यो गन्धद्रव्यभेदः। *वार्ताकं वनभण्टा इति ख्यातम्। क्षुद्रवार्ताकीफलमित्यन्ये। *पि(३)प्पलीति।

कुलित्थाश्चणकाः श्राद्धे न देयाश्चैव कोद्रवाः।
कटुकानि च सर्वाणि विरसानि तथैव च॥

इति मरीचिना सामान्यतोऽपि कटुकत्वेन पिप्पल्यादीति

---

(१) 'शेषायाः' क. छ. (२) 'पिप्पलीम्' ग.

(३) यद्यपीतः प्रभृति प्रतीकत्रयं सर्वेषु पुस्तकेषु विपर्यस्ततया दृश्यते तथाप्यस्माभिर्मूलक्रमानुरोधेन स्थापितम्।

राजमाषान् मसूरांश्च कोद्रवान् कोरदूषकान् ।
*लोहितान् वृक्षनिर्यासान् श्राद्धकर्मणि वर्जयेत् ॥

भूस्तृणं काश्मीरदेशे प्रसिद्धम् । सुरसा निर्गुण्डीति माधवः । तुलसीति पृथ्वीचन्द्रोदयः । *साच भक्ष्यत्वेन निषिद्धा न पुष्पत्वेनेति गौडाः । पालङ्की पालक इति प्रसिद्धा । मृचुकं जलजः शाकः । 'ससुकम्' इति पाठे खदिरशाक इति हेमाद्रिः । मरीचान्या*र्द्राणीति हेमाद्रिः । कृतलवणं सांभरभिन्नम्,

*सैन्धवं लवणं चैव तथा मानससंभवम् । 'यच्च सामुद्रिकं भवेत्' इति शूलपाणौ पाठः ।

पवित्रे परमे ह्येते*प्रत्यक्षे अपि नित्यशः ।

इति वायवीयोक्तेः । मानसं साम्भरम् । यत्तु भविष्यम्—

तर्जन्या दन्तकाष्ठं च प्रत्यक्षं लवणं तथा । इति ।

तत्र (प्रत्यक्ष(१)लवणं) चारलवणं खारीति प्रसिद्धं निषिद्धम्,

भुक्त्वा तु चारलवणं त्रिरात्रं तु वने वसेत् ।

इति ब्राह्मोक्तेरिति शूलपाणिः । क्षीरलवणमिति पाठात् चीरमिश्रं लवणं निषिद्धमिति वाचस्पतिः । रा

वर्जितानि । *पिण्डमूलकं पिण्डाकारं मूलकम् । *लोहितानिति । लाक्षादीनित्यर्थः । लोहितग्रहणं निर्यासत्वेऽपि पाटलश्वेतहिङ्गुकर्पूरादेरनिषेधार्थम् । *सा चेति ।

तुलसीगन्धमाघ्राय पितरस्तुष्टमानसाः ।
प्रयान्ति गरुडारूढास्तत्पदं चक्रपाणिनः ॥

इति पुराणात् । *आर्द्राणीति । पिप्पल्यप्यार्द्रैव । *सैन्धवमिति । सामुद्रमपि ग्राह्यं हविष्येषु सहचारात् । *प्रत्यक्ष इति

---

(१) कंसान्तर्गतं नास्ति ग. छ.

जमाषाः *(१)रतरा इति प्रसिद्धाः। कोरदूषकाः *वन-कोद्रवाः। चन्द्रिकायां शङ्खः—

*पिण्डालकं च तुण्डीरं करमर्दं च *नालि(२)काम्।
कूष्माण्डं बहुबीजानि श्राद्धे दत्वा व्रजत्यधः॥

पिण्डालकं महाराष्ट्रेषु पे(३)ण्डरमिति प्रसिद्धम्। तुण्डीरं बिम्बीफलमिति कैदेवः। करमर्दं करवन्दमिति प्रसिद्धम्। तत्रैव—

बिडालोच्छिष्टमाघ्रातं श्राद्धे यत्नेन वर्जयेत्।
कूष्माण्डं माहिषीक्षीरमा*ढ(४)क्यो *राजसर्षपाः।
चणका राजमाषाश्च घ्नन्ति श्राद्धं न संशयः॥

(५)वृद्धपराशरः—

करीरफलपुष्पाणि विडङ्गमरिचानि च।
जम्भारिका सजम्बीरा सुपक्वं *बीजपूरकम्॥

"न प्रत्यक्षं लवणं दद्यात्" इति वैष्णवापवादार्थम्। *रतरा इति। 'चवळ्या' इति माहाराष्ट्राः। *व(६)नेति कोद्रवाङ्गे-दार्थम्। पिण्डालकस्य विधानादाह--*पिण्डालकमिति। *नालिका अब्जदण्डः। एलापल्लवभेद इत्यन्ये। *आढकी तुवरी। *राजसर्षपो राजिका,

आसुरी राजिका चैव कथ्यते राजसर्षपः।

इति हलायुधात्। (७)*बीजपूरानिति। बीजपूरनिषेधः प्रत्य-

---

(१)'पोवटे' क. 'चवळी' ग. (२)'नालिकम्' ग. (३)'पेण्ढ़रे' क. 'पेठर' छ. (४) 'तुरी' इतिमहाराष्ट्रभाषायाम् (५) 'बृहत्' क० छ०।

(६) इदमपि प्रतीकत्रयं विपर्यस्तत्वेन सर्वपुस्तकेषु दृश्यमानत्वेऽपि मूलानुरोधिक्रमशो निर्दिष्टमस्माभिः।

(७) इदं "सौवीरतिक्तैर्लवणादिभिस्तु पाकस्य सिद्धिर्महतीह यैस्तु। तद्बीजपूरान् मरिचादियोगात् सिद्धं प्रदेयं न तु दुष्यतीह॥ इति पृथ्वीचन्द्रोदये वृद्धपराशरेणान्यद्रव्यमिश्राणां बीजपूराणामदुष्टत्वात्फलितमिति बोध्यम। 'बीजपूरकम्' इति प्रतीकं शोभनं भवेत् तथैव मूलपाठादित्यवधेयम्।

जम्ब्वलाबूनि पिप्पल्यः पटोलं पिण्डमूलकम्।
*मसूराञ्जनपुष्पं च श्राद्धे दत्त्वा पतत्यधः॥

जम्बू (१)सूक्ष्मम्। माधवीये चतुर्विंशतिमते—

यावनालान् कुलित्थांश्च वर्जयन्ति विपश्चितः।

यावनालाः जोंधळाः। अत्र यानि चणकादीनि विहितनिषिद्धानि तेषां विकल्पः। अन्यथा—

श्यामाकैश्चणकैः शाकैर्नीवारैश्च प्रियङ्गुभिः।
गोधूमैश्च तिलैर्मुद्गैर्मासं प्रीणयते पितॄन्॥

इति,

गोधूमैरिक्षुभिर्मुद्गैः सतीनैश्चणकैरपि।

इति हेमाद्रौ कौर्मविष्णुधर्मादिविरोधः स्यात्।
पिप्पलीमरीचादेस्तु प्रत्यक्षस्य निषेधो नत्वन्यद्रव्यमिश्रस्य,
सौवीरतिक्तैर्लवणादिभिस्तु पाकस्य सिद्धिर्महतीह यैस्तु।
तद्बीजपूरान् मरिचादियोगात्सिद्धं प्रदेयं न तु दुष्यतीह॥
इति पृथ्वीचन्द्रोदये वृद्धपराशरोक्तेः। तत्रैव—
दातुश्च यस्मिन्मनसोऽभिलाषः श्रद्धा भवेद्यत्र च दीयमाने।
श्राद्धेषु देयं विधिवत्तदेव तद्दत्तमक्षय्यमिति ब्रुवन्ति॥

एतन्निषिद्धेतरविषयम्। चन्द्रिकायाम्—

कृष्णधान्यानि सर्वाणि वर्जयेच्छ्राद्धकर्मणि।
न वर्जयेत् तिलांश्चैव मुद्गमाषांस्तथैव च॥

क्षपरः। *मसूरेति। वायुपुराणे--

अकृताग्रयणं धान्यं जातं वै पारिपाटलान्।
राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत्॥

पारिपाटलाः स्थूला राजमाषाः कृष्णा इति,

कोद्रवान् राजमाषांश्च कुलत्थान् वरकांस्तथा।
निष्पावांस्तु विशेषेण पञ्चैतांस्तु विवर्जयेत्॥

---

(१) 'सूक्ष्मा' ग०

मात्स्ये—

मसूरशणनिष्पावराजमाषकुसुम्भिकाः ।
पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः ॥
न देयाः पितृकार्येषु पयश्चाजाविकं तथा ।
कोद्रवोद्दारवरककपित्थमधुकातसी ॥
एतान्यपि न देयानि पितृभ्यः श्राद्धमिच्छता ॥

निष्पावाः वल्लाः । यत्तु मार्कण्डेयः—

प्रियङ्गवः कोविदाराः निष्पावाश्चात्र शोभनाः । इति ।

तत्र*निष्पावः श्वेताशिम्बीति दानसागरे श्राद्धप्रकाशे चोक्तम् । बिल्वं च रक्तं निषिद्धम्,

जम्बीरं रक्तबिल्वं च शालस्यापि फलं त्यजेत् ।

इति ब्राह्मोक्तेः । 'पारिभद्रे निम्बतरुः' इत्यमरः । रक्तमन्दार इति हेमाद्रिः । आट(१)रूषो वासा तत्पुष्पम् । उद्दारः काञ्चनारः । मधुकं ज्येष्ठीमध्विति चन्द्रिका । वरका वनमुद्गाः ।

हेमाद्रौ ब्रह्माण्डे—

*आसनारूढमन्नाद्यं पादोपहतमेव च ।
अमेध्यैर्जङ्गमैः स्पृष्टं शु(२)ष्कं पर्युषितं च यत् ॥
द्विःस्विन्नं परदग्धं च तथैवाग्रावलेहितम् ।
शर्करा*कीटपाषाणैः केशैर्यच्चाप्युपद्रुतम् ॥

इति वाक्ये "निष्पावाश्चात्र शोभनाः" इति वाक्यान्तराविरोधाय "कृष्णधान्यानि सर्वाणि" इति वचनैकवाक्यतया माषत्वेन तथा व्याख्यानात् । *निष्पाव इति । तत्सदृशजातिविशेष इति पक्षान्तरम् ।

*आसनारूढमिति । एतन्नित्यभोजने प्रसिद्धम् । *कीट-

---

(१) 'आडुळसा' इति ख्यातम्० । (२) 'शुक्रम्' क० छ० ।

पिण्याकं *माथितं चैव तथातिलवणं च यत् ।
*सिद्धाः कृताश्च ये भक्ष्याः प्रत्यक्षलवणीकृताः ॥
वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि ॥

द्विःस्विन्नं यत्सकृत्पाकेन भक्ष्यमपि हिङ्गुजीरकादिसंस्कारार्थं पुनः पच्यते तद्वर्ज्यम् । यत्तु तिक्तशाकान्नविकारादि द्विःपाकेनैव भक्षणार्हं तन्न निषिद्धम् । अत्रावलेहितमास्वादितपूर्वम् । पर्युषितस्य सदा निषेधेपि पुनर्वचनम्—

*अपूपाश्च करम्भाश्च धाना *वटकसक्तवः ।
शाकं मांस*मपूपं च सूपं *कृसरमेव च ॥

ति । देवलः--

विशुद्धमपि चाहारं मक्षिकाकृमिजन्तुभिः ।
केशरोमनखैर्वाऽपि दूषितं परिवर्जयेत् ॥

विशुद्धं जात्या । मक्षिकाकृमिजन्तवो मृता विवक्षिताः । एतच्च सति संभवे । असंभवे तु सुमन्तुः । "केशकीटक्षुतवचोपहतं श्वभिराघ्रातं प्रेक्षितं वा । अदधि पर्युषितं पुनः सिद्धं चण्डालाद्यवेक्षितमभोज्यमन्यत्र हिरण्योदकैः स्पृष्ट्वा" इति । केशादिकमुद्धृत्य संप्रोक्ष्य हिरण्यस्पर्शं कृत्वा भुञ्जीतेति । *माथितं विलोडितं निर्जलं दधि । *सिद्धा भक्ष्याः आमलकादयः । प्रत्यक्षलवणमिलिता इति माधवादयः । एवं कृता भक्ष्याः शाकादयोऽपि । वस्तुतस्तु आपणादौ श्राद्धेतरभोजनोद्देशेन वा सिद्धा दिनान्तरकृताश्च भक्ष्या इति द्वौ निषेधौ, प्रत्यक्षलवणीकृता इति च तृतीयः । वाग्भावदुष्टाश्च तथा दुष्टैश्चोपहतास्तथेति च द्रष्टव्यम् । भक्ष्या इति प्रकृतम् । *अपूपाः यवगोधूमविकारा मण्डकादयः । *वटकाः माषादिपिष्टमयाः प्रसिद्धाः । पुनरपूपग्रहणं व्रीह्यादिपिष्टविकारसङ्ग्रहार्थम् । *कृसरं भृष्टतिलचूर्णम् ।

यवागूः पायसं चैव यच्चा*न्यत्*स्नेहसंयुतम् ।
सर्वं *पर्युषितं भोज्यं शु(१)क्तं चेत्परिवर्जयेत् ॥

इति माधवीये यमोक्तवटकादेरपि पर्युषितस्य निषेधार्थमिति चन्द्रिकादयः । वर्ज्येषु विश्वामित्रः—

कपित्थं कु(२)रुकं चैव नारिकेलं च पैनिकम् ।
जम्बूफलादि पक्वं च पिण्याकं तन्दुलीयकम् ॥

हेमाद्रौ षट्त्रिंशन्मते—

वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथैव च ।

मर्कटकाः लाका इति प्रसिद्धाः । पैठीनसिः—

---

*अन्यत् ओदनादि । *स्नेहसंयुतं घृतेन दध्ना वा विघारितम् । *पर्युषितम् अग्निपक्वं सद् रात्र्यन्तरितम् । शुक्तस्वरूपं बृहस्पतिनोक्तम्—

अत्यम्लं शुक्तमाख्यातं निन्दितं ब्रह्मवादिभिः ।

अस्यार्थो माधवेनोक्तः—अनम्लमीषदम्लं वा यद् वस्तु कालान्तरेण वा द्रव्यान्तरसंसर्गेण वाऽत्यम्लं भवति तत् शुक्तं, न तु स्वभावतोऽत्यम्लमिति । शुक्तनिषेधो दध्यादिभिन्नविषयः,

दधि भक्ष्यं च शुक्तेषु सर्वं च दाधिसंभवम् ।
ऋजीषपक्वं भक्ष्यं स्यात् सर्पिर्युक्तमिति स्थितिः ॥

इति शङ्खोक्तेः । अनग्निक ऊष्मा ऋजीषं, तेन पक्वम् । यत्तु माधवेन यदि पर्युषितं प्रक्षालितं भोज्यम् ।

शुक्तानि हि द्विजोऽन्नानि न भुञ्जीत कदाचन ।
प्रक्षालितानि निर्दोषाण्यापद्धर्मो यथा भवेत् ॥
मसूरमाषसंयुक्तं तथा पर्युषितं च यत् ।
तत्तु प्रक्षालितं कृत्वा भुञ्जीत ह्यभिघारितम् ॥

---

(१) 'भुक्तम्' ग० शुष्कमिति युक्तं भाति । (२) 'कुसुमम्' ग० ।

*वृन्ताकं ना(१)लिकापोतकुसुम्भाश्मन्तकानि च ।
शाकानामभक्ष्याः । इति ।

पोतं पोई इति प्रसिद्धम् । (कुसुम्भं कु(२)रडु इति माहाराष्ट्र प्रसिद्धम्) । मार्कण्डेयः—

वर्ज्याश्चाभिषवा नित्यं शतपुष्पा*गवेधुकाः ।
जम्बीरकफलं वर्ज्यं कोवि(३)दाराश्च नित्यशः ॥

अभिषवः शु(४)क्तं इति इति चन्द्रिका । सन्धानकमिति पृथ्वीचन्द्रः । शतपुष्पा ओंवा इति प्रसिद्धम् । शाट्यायनः—

मारिषं नालिका चैव रक्ता या च कलम्बिका ।
असुरान्नमिदं सर्वं पितॄणां नोपतिष्ठते ॥

मारिषं मध्यदेशे मरसा इति, महाराष्ट्रेषु राजगिरा इति च प्रसिद्धम् । कलम्बिका वेणवाकृतिपत्रम् । तत्रैव—

गान्धारिका पटोलानि श्राद्धकर्मणि वर्जयेत् ।

गान्धारिका तन्दुलीयमिति चन्द्रिका । 'जवासाख्या दुरालभा' इति कैदेवः । भारते—

*हिङ्गु द्रव्येषु शाकेषु अ(५)लाबुं लशुनं तथा ।

इति यमोक्तेरित्युक्तं, तदपि श्राद्धे वर्ज्यमित्यर्थः। *वृन्ताकेति। नित्यभोजनेऽप्ययं निषेधः। *गवेधुकाः अरण्यगोधूमाः। तन्दुलेषु श्वेतवर्णाः शङ्खाकारा धान्यविशेषा इति ग्रन्थान्तरे। *हिङ्ग्विति।

अश्राद्धेयानि धान्यानि कोद्रवाः पुलकास्तथा ।

इति पूर्वार्धम् । पुलका तुच्छधान्यम् । द्रव्येषु हिङ्गु अश्राद्धेयम् ।

मधुकं रामठं चैव कर्पूरं मरिचं गुडम् ।
(रामठं हिङ्गु)

---

(१) 'नलिका' ग० । (२) 'करडी' क 'करड' ग० ।
(३) 'कोविदार' क० । (४) 'सूक्तम्' ग० ।
(५) 'अलाबु' क० ।

कुकुण्डकान्यलाबूनि कृष्णं लवणमेव च ॥

पुनरलाबुग्रहणमुभयालाबुनिषेधार्थमिति पृथ्वीचन्द्रः। कुकुण्डकं *वर्तुलं छत्राकम्। तत्रैव-

कुस्तुम्बुरुं कालिङ्गोत्थं वर्जयेदाम्लवेतसम्।

हेमाद्रौ ब्राह्मे—

वृन्ताकं पञ्चशिम्बं च लोमशानि फलानि च।
क(१)लिङ्गं रक्तचारं च वीणाकं धूतचारकम् ॥
कपालं काचमारी च *करञ्जं पिण्डमूलकम्।
गृञ्जनं चु(२)क्रिकां चैव गाजरं *जीव(३)कं तथा ॥

वृन्ताकं श्वेतम्,

कण्डूरां श्वेतवृन्ताकं कुम्भाण्डं च विवर्जयेत्।

इति देवलोक्तेः। तेन कृष्णस्यानिषेध इति चन्द्रिकामा-

श्राद्धकर्मणि शस्तानि सैन्धवं त्रपुसं तथा ॥

इत्यादिपुराणोक्तेर्विहितप्रतिषिद्धत्वाद्विकल्पः। (ए(४)वमन्यत्रापि विहितप्रतिषिद्धत्वे) 'कालानलशुभास्तथा' इति माधवपाठः। कालानलः कृष्णार्जकः। अत्र श्वेतार्जकोऽपि ग्राह्यः "अर्जकं वर्जयेत्" इति विष्णूक्तेः। शुभा तदाख्यः शाकः। *वर्तुलेति अतन्त्रम्,

नालिकाशणछत्राककुसुम्भालाबुविड्भवान्।
कुम्भीकञ्चुकवृन्ताककोविदारांश्च वर्जयेत् ॥

इत्युशनसा सामान्यतश्छत्राकोक्तेः। छत्राकं कवकम्। कञ्चुकं वृत्तालाबु। *करञ्जं नक्तमालफलम्। *जीवकं 'जीरकम्' इति पाठे कृष्णजीरकम्,

कृष्णाजाजीविडं चैव शीतपाकी तथैव च।
अन्नक्षुतावरुदितं तथा श्राद्धेषु वर्जयेत् ॥

---

(१) 'कालिङ्गम्' क०। (२) 'चुलिकाम्' क०। (३) 'जीवकाम्' क०।
(४) कंसान्तर्गतो ग्रन्थो नास्ति 'ङ' पुस्तके।

धवौ । *वस्तुतस्तु सदा श्वेतानिषेधात् पुनः श्राद्धे निषेधो ऽयर्थः । तेन भक्ष्यस्य कृष्णवृन्ताकस्यापि निषेधार्थमिदामिति वयम् । *कण्डूरा कपिकच्छूः । कुम्भाण्डं *वृत्तालाबूः। पञ्चाशिम्बं वल्लमसूरराजमाषमठकुलित्थाः। लोमशानि कपित्थानि । रक्तचारं लोहितचारफलम् । वीणाकं कृष्णदीर्घकर्कटी। घृतचारकं चिरस्थितचारफलम् चारोळीति प्रसिद्धम् । कपालं नारिकेलम् । काचं कचुवृक्षफलम्। मरीचं आर्द्रमरीचानि। गृञ्जनं *पलाण्डुभेदः।

इति शङ्खोक्तेः । *वस्तुतस्त्विति । मिताक्षरायां—

सेधाकच्छपगोधानां शशशल्लकघातकः ।
वृन्ताकफलगुञ्जाशी अहोरात्रेण शुद्ध्यति ॥

इति पराशरेण प्रायश्चित्तं स्मर्यते । तच्च कृ(१)ष्णवृन्ताकस्य भक्ष्यताप्रयोजकं पावित्र्यं गमयति अपवित्रेण पवित्रीकरणासंभवात् । न चैवं—

सुराम्बुघृतगोमूत्रपयसामग्निसंनिभम् ।
सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमृच्छति ॥

इति कथमपवित्रेणाप्यत्युष्णसुरापानेन पावित्र्यमिति वाच्यं, तत्र तथामरणस्यैव पञ्चम्या पावित्र्यहेतुत्वाम्नानात् । एकस्यापि मरणस्योष्णानुष्णसुरापानद्वयशोधकत्वं तु वचनात् । एवञ्च चातुर्मास्यव्रतादाविव श्राद्धेऽपि कृष्णवृन्ताकाविषयो निषेध इत्यर्थः । *कण्डूरेति । कण्डूरा प्रावृषायणी । तत्फलमित्यन्ये । *वृत्तालाबूरिति । तत्सदृशमिति माधवः । *पलाण्डुभेद इति । स च—

वर्जयेद् गृञ्जनं श्राद्धे का(२)ञ्चिकापिण्डमूलकम् ।
करञ्जं येऽपि चान्ये वै रसगन्धोत्करास्तथा ॥

इति वाक्ये हरिद्रक्तवर्ण इति माधवः । गृञ्जनं लशुनानुकारि

---

(१) ‘कृष्ण’ नास्ति ङ पुस्तके । (२) ‘काञ्जिका’ ङ ।

पश्चिमदिशि प्रसिद्धः न तु गाजरम्, तस्य पृथगुक्तेः। हेमाद्रिणा तु गृञ्जनं गाजरमेवोक्तम्। गौडश्राद्धकौमुद्यामप्येवं तच्चिन्त्यम्। चु(१)क्रिका चिरकालशुक्तं पानकम्। चन्द्रिकायां हारीतः- 'न वटप्लक्षोदुम्बरशेलुदधित्थनीपमातुलिङ्गानि भक्षयेत्'। शेलुः श्लेष्मातकः भोंकरसंज्ञः। दधित्थं कापित्थम्। (स्मृ(२)तिसारे—

क्षीरे तु लवणं दत्त्वा उच्छिष्टेऽपि च यद् घृतम्।
स्नानं रजकतीर्थेषु ताम्रे गव्यं सुरासमम्॥)

गौडनिबन्धसागरे स्मृतिः—

नारिकेरोदकं कांस्ये ताम्रपात्रे स्थितं मधु।
गव्यं च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना॥

सूक्ष्मनालः कन्दभेद इति विज्ञानेश्वरः।

गन्धाकृतिरसैस्तुल्यं गृञ्जनं तु पलाण्डुना।
सूक्ष्मनालाग्रपत्रत्वाद् भिद्यते तु पलाण्डुतः॥

इति वाग्भटटीकावचनं च तत्र मानम्। प्रायश्चित्तप्रकरणे माधवस्तु गृञ्जनं पत्रविशेषः यदीयं चूर्णं गायकाः कण्ठशुद्ध्यर्थं भक्षयन्तीति लिखित्वा तच्च 'तमाखु' इति प्रसिद्धमिति चतुर्विंशतिमतव्याख्यायां भट्टोजीदीक्षिताः।

विषलिप्तेन शस्त्रेण मृगो यः परिहन्यते।
अभक्ष्यं तस्य तन्मासं ताद्धि वै गृञ्जनं स्मृतम्॥

इत्यपि त एव लिखन्ति। काञ्जिका आरनालम्। पुराणेऽपि—

वांशं करीरं सुरसं सर्जकं भूतृणानि च।
श्राद्धकर्माणि वर्ज्यानि याश्च नार्यो रजस्वलाः॥

सर्जकः पीतसारकः। अर्जक इति पाठे श्वेतकुबेरपत्रमिति मयूखः। रजस्वलाः दिनत्रयादूर्ध्वमनिवृत्तरजसः। भविष्ये—

---

(१) 'चुलिका' क० छ०। (२) कंसान्तर्गतं नास्ति क०।

ताम्रपात्रे धृतं मांसं यच्च गव्यं घृतेतरत् ।
आमिषं तु गवां मांसं दधि मद्यं पयो रजः ॥
द्रव्यान्तरयुतं मांसं पयसा संयुतं दधि ।
पयोऽनुद्धृतसारं च ताम्रपात्रे न दुष्यति ॥

लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च ।
वृन्ताकनालिकालाबु जानीयाज्जातिदूषितम् ॥

लशुनः श्वेतकन्दः पलाण्डुविशेषः ।

लशुनं दीर्घपत्रश्च पिच्छगन्धो महौषधम् ।
करण्यश्च पलाण्डुश्च लतार्कश्च परारिका ॥
गृञ्जनं यवनेष्टश्च पलाण्डोर्दश जातयः ।

इति सुश्रुतेनोक्तत्वात् । आपद्यपि श्वादिभिरवलीढं न भुञ्जीत,

अवलीढं श्वमार्जारध्वाङ्क्षकुक्कुटमूषकैः ।
भोजनं नोपभुञ्जीत तदमेध्यं हि सर्वतः ॥

इति देवलोक्तेः । भविष्ये—

सुरालशुनसंस्पृष्टं पीयूषादिसमन्वितम् ।
संसर्गाद् दुष्यते तद्धि शूद्रोच्छिष्टवदाचरेत् ॥

आदिशब्देन छत्राकादिदुष्टपरिग्रहः । स्मृत्यन्तरे—

नापणीयं न चाश्नीयाद्भिःपक्वं न पर्युषितम् ।
घृतं वा यदि वा तैलं विप्रो नाद्यान्नखच्युतम् ॥
यमस्तदशुचि प्राह तुल्यं गोमांसभक्षणैः ।
हस्तदत्ताश्च ये स्नेहा लवणं व्यञ्जनानि च ॥
दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बिषम् ।
एकेन पाणिना दत्तं शूद्रदत्तं न भक्षयेत् ॥

यत्तु आपणीयनिषेधोऽपूपादिव्यतिरिक्तविषयः,

अपूपाः सक्तवो धानास्तक्रं दधि घृतं मधु ।
एतत् पण्येषु भोक्तव्यं भाण्डलेपो न चेद्भवेत् ॥

इति शङ्खोक्तेरिति; तन्न, पुनर्निषेधवचनात्पर्युषितानामपूपानां

अथ जलम् । याज्ञवल्क्यः—

शुचि *गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् ।

वर्ज्यं जलमुक्तं हेमाद्रौ ब्रह्माण्डे—

दुर्गन्धि फेनिलं क्षारं पङ्किलं पल्वलोदकम् ।
न भवेद्यत्र गोतृप्तिर्नक्तं यच्चाप्युपाहृतम् ॥
यन्न सर्वार्थमुत्सृष्टं यच्चाभोज्यानिपानजम् ।
तद्वर्ज्यं सलिलं तात सदैव श्राद्धकर्मणि ॥

निपानो जलाशयः । शुद्धितत्त्वे शङ्खः—

स्नानमाचमनं दानं देवतापितृतर्पणम् ।
शूद्रोदकैर्न कुर्वीत तथा मेघाद्विनिःसृतैः ॥

वर्ज्यत्वे आपणीयानामपि श्राद्धे वर्ज्यत्वौचित्यात् । "बहूनामेकधर्माणाम्" इति न्यायात् "सिद्धाः कृताश्च ये भक्ष्याः" इति निषेधाच्च । भरद्वाजः—

स्वल्पाम्बु कूष्माण्डफलं वज्रकन्दश्च पिप्पली ।
कुलित्थशणजीराणि करम्भाणि तथैव च ॥
अब्जादन्यद्रक्तपुष्पं शिग्रुः क्षारस्तथैव च ।
एतानि नैव देयानि सर्वस्मिन् श्राद्धकर्मणि ॥

(*गो(१)तृप्तीति । एवञ्च कलिवर्ज्यं 'गोतृप्तिशिष्टे पयसि' इत्युक्तेः

अन्त्यैरपि कृते कूपे सेतौ वाप्यादिके तथा ।
तत्र स्नात्वा च पीत्वा च प्राजापत्यं समाचरेत् ॥

इत्याद्यन्यत्र विस्तरः) । स्वल्पाम्बु गोतृप्तिहीनं जलम् । वज्रकन्दः आरण्यसूरणः । जीरं कृष्णम् । करम्भा दधिसक्तवः । क्षारो यवक्षारादिः । केचित्तु ग्राह्येषु कारवेल्यादि लिखन्ति । पठन्ति च—

उर्वारुः कारवेलिश्च पटोली करपत्रकः ।

---

(१) कंसान्तर्गतं नास्ति 'च' पुस्तके ।

हेमाद्रावादित्यपुराणे—

(१)चिरपर्युषितं वाऽपि शूद्रस्पृष्टमथापि वा।
जाह्नव्याः *स्नानदानादौ पुनात्येव सदा पयः॥

कात्यायनः—

अपो निशि न गृह्णीयान्न पिबेच्च कदाचन।
उद्धृत्याग्निमुपर्यग्नेर्धाम्नो धाम्न इतीरयेत्॥

रजोदोषे तु प्रागुक्तं नारदीये--

त्यजेत्पर्युषितं पुष्पं त्यजेत्पर्युषितं जलम्।
न त्यजेज्जाह्नवीतोयं (२)तुलसीपद्मबिल्वकम्॥

अन्यान्यपि पृथ्वीचन्द्रोदये मात्स्ये--

मध्याह्नः खड्गपात्रं च तथा नेपालकम्बलः।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य संतापकारिणः।
अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः॥

ब्राह्मे--

यतिस्त्रिदण्डः करुणा राजतं पात्रमेव च।
दौहित्रं कुतपः कालश्छागः कृष्णाजिनं तथा॥
श्राद्धेष्वेतानि मुख्यानि मोचं चेक्षुरसं तथा॥ इति।

क्षत्रियादिभिश्च गोपयो न भक्ष्यम्,

क्षत्रियश्चैव वृत्तिस्थो वैश्यः शूद्रोऽथवा पुनः।
यः पिबेत् कापिलं क्षीरं न ततोऽन्योऽस्त्यपुण्यकृत्॥

इति माधवीये आपस्तम्बोक्तेः। शूद्रस्य तु पातित्यम्,

पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत्।
उभौ तौ पापकर्माणौ पूयाशे नरके पतेत्।

इति स्मृतेः। *स्नानदानादाविति। सर्वकर्मोपलक्षणम्। *अ-

---

(१) 'चिरं' ग०। (२) 'तुलसीबिल्वपद्मकम्' ग०।

शस्तानीति शेषः । दौहित्रं खड्गपात्रमिति कल्पतरुः । अपरार्के स्मृत्यन्तरे--

अपत्यं दुहितुश्चैव खड्पात्रं तथैव च ।
घृतं च (१)कपिलाया गोर्दौहित्रमिति कीर्तितम् ॥

ब्रह्माण्डे--

अमावास्यागते सोमे या तु खादति गौस्तृणम् ।
तस्या गोर्यद्भवेत् क्षीरं तद्दौहित्रमुदाहृतम् ॥

स्मृतिसंग्रहे--

उच्छिष्टं शिवनिर्माल्यं वान्तं च मृतकर्पटम् ।
श्राद्धे सप्त पवित्राणि दौहित्रः कुतपस्तिलाः ॥

उच्छिष्टं वत्सस्य दुग्धमित्यर्थः । शिवनिर्माल्यं गङ्गोदकम् । वान्तं मधु । मृतकर्पटं तसरीपट्टम् ॥

तिलेष्वापस्तम्बः--

अटव्यां (२)ये समुत्पन्ना *अकृष्टफलितास्तथा ।
ते वै श्राद्धे पवित्राः स्युस्तिलास्ते न तिलास्तिलाः ॥

*अभावे ग्राम्याः,

गौराः कृष्णास्तथारण्यास्तथैव त्रिविधास्तिलाः ॥

इति ब्राह्मोक्तेः ।

अथ वर्ज्यानि चन्द्रि(३)कायां यमः--

कुक्कुटो विड्वराहश्च काकश्चाथ बिडालकः ।

टव्यामिति ।

जर्तिलास्तु तिलाः प्रोक्ताः कृष्णवर्णा वनोद्भवाः ।
जर्तिलाश्चैव ते ज्ञेया अकृष्टोत्पादिताश्च ये ।

इति सत्यव्रतः । *अकृष्टफलिताः अकृष्टभूमौ जाताः । निषेधस्तु "अपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वाः" इतिवत् जर्तिलप्रशंसार्थः । जर्तिलाभावे क्षेत्रोत्पन्नानाह--*अभावे इति । *मूल

---

(१) 'कपिला या गौदोहित्रम्' क० । (२) 'च' क० ।
(३) 'चन्द्रिकायाम्' नास्ति क० ।

वृषलीपतिश्च वृषलः षण्ढोऽवीरा रजस्वला ॥
एते तु श्राद्धकाले वै वर्जनीयाः प्रयत्नतः ।
खञ्जः काणः कुणिः श्वित्री दातुः प्रेष्यकरस्तथा ॥
न्यूनाङ्गोऽप्यतिरिक्ताङ्गस्तमप्यपनयेत्ततः ॥

वायवीये--

अन्नं पश्येयुरेते तु यदि वै हव्य(१)कव्ययोः ।
उत्सृष्टव्यं प्रधानार्थं संस्कारस्त्वापदि स्मृतः ॥

सुमन्तुः--

'चाण्डालादिवीक्षितमन्नमभोज्यमन्यत्र *मृद्भस्महिरण्योदकस्पर्शात् ।' तत्रैव जमदग्निः—

शुद्धवत्योऽथ कूष्माण्ड्यः पावमान्यस्तरत्समाः ।
पूतेन वारिणा दर्भैरन्नदोषमपोनुदेत ॥

चन्द्रोदये—

पादुकोपानहौ छत्रं चित्ररक्ताम्बरं तथा ।
रक्तपुष्पं च मार्जारं श्राद्धभूमौ विवर्जयेत् ॥

निर्णयदीपे—

घण्टानिनादो हयसंनिधानं शम्बूकशङ्खौ कदलीदलं च ।
उन्मत्तजात्यर्कहयारिजानि श्राद्धस्य वैगुण्यकराण्यमूनि ॥

हयारिजं महि(२)षक्षीरादि ।

अथ श्राद्धदिनकृत्यम् । चन्द्रोदये उशनाः--
'गोमयोदकै*भूमिभाजनशौचं कुर्यात् ।' पराशरः--

काञ्जिकं दधि तक्रं च शृतं(३)चाशृतमेव च ।
पूर्वमेव न दातव्यमेकोद्दिष्टेऽथ पार्वणे ॥

स्पदं श्राद्धप्रकरणे माधवो न लिखति । *भूमिः महानसादिभूमिः ।

---

(१) 'कव्यवाहयोः' क० ।
(२) 'करवीरपुष्पम्' क० ।
(३) 'वा' ग० ।

हेमाद्रौ पराशरः—

*गृहाग्निशिशुदेवानां ब्रह्मचारितपस्विनाम् ।
तावन्न दीयते किञ्चिद्यावत्पिण्डान्न निर्वपेत् ॥

कौर्मे—

तिलानवकिरे*त्तत्र सर्वतो बन्धयेदजान् ।

तत्रैव देवलः—

तथैव यन्त्रितो दाता प्रातः स्नात्वा सहाम्बरः
आरभेत नवैः पात्रैरन्नारम्भं च बान्धवैः ॥

अत्रात्मनेपदात्स्वयमेव पाकः कार्यः । अशक्तौ पत्न्या तदभावे बान्धवैः,

ततस्तानि पपाचाशु सीता जनकनन्दिनी ।

इति पाद्मलिङ्गादिति हेमाद्रिः । श्राद्धदीपकलिकायामाश्वलायनः--

समानप्रवरै(१)र्मित्रैः सपिण्डैश्च गुणान्वितैः ।
कृतोपकारिभिश्चैव पाककार्यं प्रशस्यते ॥

व्यासः--

गृहिणी चैव सुस्नाता पाकं कुर्यात्प्रयत्नतः ।
निष्पन्नेषु च पाकेषु पुनः स्नानं समाचरेत् ॥

पृथ्वीचन्द्रोदये ब्राह्मे--

*रजस्वलां च पाखण्डां पुंश्चलीं पतितां तथा ।
त्यजेच्छूद्रां तथा वन्ध्यां विधवां चान्यगोत्रजाम् ॥
व्यङ्गकर्णीं चतुर्थाहःस्नातामपि रजस्वलाम् ।
वर्जयेच्छ्राद्धपाकार्थममातृपितृवंशजाम् ॥

मातृपितृवंशजभिन्नां त्यजेदित्यर्थः । स्मृतिसारे--

न पाकं कारयेत् पुत्रीमन्यां वाऽप्यन्यगोत्रजाम् ।

काञ्जिकं तु निषिद्धमेव । *गृहाग्नीति । प्रातर्होमं विना । *तत्र

---

(१) 'मिश्रैः' ग० ।

मृतवत्स्यां च *गर्भघ्नीं गर्भिणीं चैव दुर्मुखीम् ॥

पाकभाण्डानि तु हेमाद्रौ नागरखण्डे--

सौवर्णान्यथ रौप्याणि कांस्यताम्रोद्भवानि च ।
मार्तिकयान्यपि भ(१)व्यानि नूतनानि दृढानि च ॥

तत्रैव आदित्यपुराणे--

पचेदन्नानि सुस्नातः पात्रेषु शुचिषु स्वयम् ।
स्वर्णादिधातुजातेषु मृन्मयेष्वपि वा द्विजः ॥
अच्छिद्रेष्वविलिप्तेषु तथाऽनुपहतेषु च ।
नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् ॥
पूर्वं कृतोपयोगेषु मृन्मयेषु न तु क्वचित् ॥

वायुपुराणे--

न कदाचित्पचेदन्नमयःस्थालीषु पैतृकम् ।
अयसो दर्शनादेव पितरोऽपि द्रवन्ति हि ॥
कालायसं विशेषेण निन्दन्ति पितृकर्मणि ।
फलानां चैव शाकानां छेदनार्थानि यानि तु ॥
महानसेऽपि शस्त्राणि तेषामेव हि सन्निधिः ।
इष्यते नेतरस्यात्र शस्त्रमात्रस्य दर्शनम् ॥
((२)श्राद्धदेशे तु विदुषा पितॄणां प्रीतिमिच्छता ।)
महान(३)से नियुक्तानामपि कार्यं न दर्शनम् ॥

तत्रैव--

पचमानस्तु भाण्डेषु भक्त्या ताम्रमयेषु च ।
समुद्धरति वै घोरात् पितॄन् दुःखमहार्णवात् ॥
तैजसानामभावे तु पिठरे मृन्मयेऽपि च ।
नवे शुचौ प्रकुर्वीत पाकं पित्रर्थमादरात् ॥

महानसादिभूमौ । *रजस्वला व्याख्याता । *गर्भघ्नी कृतपा·

---

(१) 'भाव्यानि' छ० । (२) कंसान्तर्गतं नास्ति क० छ० ।
(३) 'महानसेऽपि यु' छ० ।

तत्रैवादित्यपुराणे--

पक्वान्नस्थापनार्थं तु शस्यन्ते दारुजान्यपि ।
दर्व्यादीन्यपि कार्याणि यज्ञियैरपि दारुभिः ॥

यमः--

विवाहे प्रेतकार्ये च मातापित्रोः क्षयेऽहनि ।
(नव(१)भाण्डानि कुर्वीत यज्ञकाले विशेषतः ॥

अथ पाकाग्निः । हेमाद्रौ प्रजापतिः--

*औपासनेनान्नसिद्धिरग्नौकरणमेव च ।

पृथ्वीचन्द्रोदयेऽङ्गिराः--

*शालाग्नौ तु पचेदन्नं लौ(२)किके वाऽपि *नित्यशः ।
यस्मिन्नग्नौ पचेदन्नं तस्मिन्*होमो विधीयते ॥

मनुः--

*वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि ।

यश्चित्ता बोध्या । ((३)हेमाद्राविति । अस्य 'इति केचित्' इत्यत्रान्वयः । *औपासनेनेति ।) येषां सूत्रे औपासनाग्नौ नित्यः पाकः तेषां श्राद्धपाकोऽपि तत्रैवेत्यर्थः । *शालाग्नाविति । तथा चार्धाधानिनः स्मार्ताग्नेश्चौपासनसद्भावात्तत्रैव पाकः, सर्वाधानिनस्तु लौकिक एवेत्यर्थः । होमः वैश्वदेवहोमः । न त्वग्नौकरणं तस्य सर्वाधानिनो दक्षिणाग्नौ कर्तव्यत्वात् 'नित्यशः' इति विशेषणाच्च । तथापि नैत्यकपाकाग्नेः श्राद्धे बाधो नास्तीत्यावेदनार्थमिदम् । नन्वेवं तीर्थमहालयादिश्राद्धेषु औपासनाग्निः स्यादित्यत्राह-*वैवाहिके इति । गृह्यकारैरुक्तम्-अष्टकापार्वणश्राद्धहोमादि गृह्याग्निसाध्यं गृह्यम् । न च गृहं शाला तत्रोक्तं वास्तुकर्ममात्रं ग्राह्यं, न त्वष्टकाहोमादीति वाच्यम्, तावन्मात्रग्रहे मानाभावात्, वचनवैयर्थ्यात् । नापि गृहं दारास्त-

---

(१) कंसान्तर्गतं नास्ति छ.   (२) 'लौकिकेनापि' क०
(३) कंसान्तर्गतं नास्ति 'च' पुस्तके ।

प्रोक्तं गृह्यमिति वाच्यं, गृहीत्यनेन गतत्वात् । पञ्चयज्ञविधानं गृही कुर्यादिति योजना । यत्तु वैवाहिकेग्नौ पञ्चयज्ञविधानं कुर्यादिति वैश्वदेवस्य गृह्यकर्मत्वेन । तन्न, “शालाग्नौ तु पचेदन्नम्” इति पूर्वोक्ताङ्गिरोवाक्यात् । वैश्वदेवाविशेषे च भोजनं कार्यम् । पञ्चपदं विप्रभोजनहन्तकारादेर्मनुष्ययज्ञस्यापि तेनैव कर्त्तव्यत्वार्थम् । तत्राग्नेरनधिकरणत्वेऽपि तदनुकूलपाकस्याधिकरणत्वं बोध्यम् । वैश्वदेवे कृते पश्चात्तदन्नोपघाते भोजनार्थपाको लौकिक एव, न गृह्ये।

अचोदितेन पाकेन कृतेनोद्धरणेन वा ।
लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति ॥

इति बौधायनेनाविहितपाकनिषेधात् ,

अपचन्नेकरात्रेण पुनराधानमर्हति ।

इति स्मृत्यविषयत्वाच्च । यत्तु——

यस्य चाग्नौ न क्रियते यस्य चान्नं न दीयते ।
अभोज्यं तद्भवेदन्नं भुक्त्वा तूपवसेदहः ॥

इत्यापस्तम्बवचनं, तद्वैश्वदेवस्य पुरुषार्थत्वमात्रप्रकाशकं नतु भोजनार्थपाकार्थत्वमपि। अत एवाशौचे वैश्वदेवाभावान्न गृह्याग्नौ पाकः ।

पराग्निपक्वमश्नीयात्पर्वणि प्रोषितोऽग्निमान् ।

इति वाक्यं तु निर्मूलम् । एतेन पर्वणि वैश्वदेवार्थंपाको भुज्यर्थः । अन्यथा तु लौकिकाग्निपक्वभोजनेऽपि न दोष इति परास्तम्, पर्वण्यन्नोपघातेऽभोजनप्रसङ्गात् ।

केचित्तु प्रोषितोऽग्निमान्पराग्निपक्वं नाश्नीयादिति सम्बन्धः । पृष्ठोदिविविधानेनाग्निं सम्पादयेत्पर्वणि॥ इति तत्राधिकदोषार्थमित्याहुः

यत्तु यज्ञपार्श्वः——

पचनाग्नौ पचेदन्नं सूतके मृतके तथा ।
अपक्त्वा तु वसेद्रात्रिं पुनराधानमर्हति ॥

इति, तददृष्टार्थपाकपरम् । अनाकरमित्यन्ये । ननु गृहं दम्पती तयोः फलदं कर्म गृह्यम् । तच्चाष्टकाहोमादि, नवग्रहादिशान्तिकपौ-

पञ्चयज्ञविधानं च *पाक्तिं चान्वाहिकीं द्विजः ॥

*श्राद्धस्य गृह्यत्वं चोक्तमपरार्केण । अत्र विशेषः कर्मप्रदीपे—

प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् ।
शेषं महानसे कृत्वा तत्र पाकं समाचरेत् ॥
पाकान्तेऽग्निं त(१)माहृत्य गृह्याग्नौ तु पुनः क्षिपेत् ।
ततोऽस्मिन्वैश्वदेवादि कर्म कुर्यादतन्द्रितः ॥

तदभावे लौकिके,

ततः पचेयुरन्नानि निर्वापानन्तरं शनैः ।
वैवाहिकेऽग्नावन्यत्र लौकिके वापि संयतः ॥

इति कलिकायां सङ्ग्रहोक्तेः । पित्रर्थं निर्वापं कूर्चेत्यर्थः, अत एव हेमाद्रौ वायुपुराणे—

पित्रर्थं निर्वपेद् भूमौ कूर्चे वा दर्भसंस्कृते ॥ इति ।

तत्रैव पाद्ममात्स्ययोः—

अ)ग्निमान्निर्वपेत्पैत्रं चरुं वा सममुष्टिभिः ।
पितृभ्यो निर्वपामीति सर्वं दक्षिणतो न्यसेत् ॥

चरुग्रहणादन्नशाकादाविति हेमाद्रिः । *पिण्डपितृयज्ञार्थपाकविषयोऽयं निर्वाप इति तु युक्तम् । अयं चेत-

ष्टिकादिहोमस्थदेवतादिहोमादि, तत्राप्यावसथ्याग्निः स्यात् ? न स्यात्, ग्रहयज्ञादेर्दम्पतीमात्रसाध्यत्वाभावादेव गृह्यत्वाभावात् । येषां सूत्रे औपासनाग्नौ नियमः पाकः तेषां श्राद्धीयपाकोऽपि तत्रैव । *पाक्तिं पाकम् । तस्या आन्वीहिकत्वविशेषणाच्छ्राद्धपाकस्य कथमौपासनाग्निलाभ इत्यत्राह—*श्राद्धस्येति । तथाच तत्राग्नौकरणस्यौपासने कर्तव्यतया पाकोऽपि तत्रैवेति भावः । *पिण्डेति । तथाच श्राद्धे निर्वापो न कार्यः । श्रपणं त्वौपासने

---

(१) 'समाहृत्य' क०

रेषा(१)मग्निः । आश्वलायनानां तु 'गुरुणा*भिमृता अन्यतो वाऽपक्षीयमाणा अमावास्यायां शान्तिकर्म कुर्वीरन्' इत्यादिसूत्रेण पचनाग्नेस्त्यागमुक्त्वा 'इहैवायमितरो जातवेदाः' इत्यर्धर्चेन, 'शमीमयीभ्यामरणिभ्यामग्निं म(२)न्थेत्स पचनाग्निर्भवति' इति सूत्रे वृत्तौ चोक्तेः पचनाग्नावेव पाकः । बौधायनेनाप्युक्तम्--'आ(३)हृत्य पचनाग्निमौपासनं वाऽभिप्रव्रजन्ति' इति । स्मार्ताग्नौ पाकस्त्वन्यशाखाविषय इति केचित् । वस्तुतस्तु पूर्वोक्तस्य सर्वाधानविषयत्वं युक्तम् । *शिष्टाचारेपि न पचनो दृश्यते । अण्डविलायामपि सर्वाधानपक्षे वै(४)श्वदेवं श्राद्धं च प(५)चनेऽग्नौ कुर्यात् *अन्यथौपासने इत्युक्तम् । अग्नौकरणं तु *प्रयोगपारिजातादिभिराब्दिकादिसर्वश्राद्धेषु पिण्डपितृयज्ञव्यतिषङ्गोक्तेर्लौकिके पचने वा पाके कृतेऽपि गृह्याग्नौ पक्वचरुणैव कार्यमिति प्रतिभाति । मदनरत्नेऽप्येवम् । *विधु(६)रोत्सन्नाग्न्यादेस्तु पृष्ठोदिविविधानेनाग्निसंपादनमित्युक्तं हरिहरभाष्ये । इति पाकाग्निः ।

कार्यम् । तदभावे लौकिके इति । *अभिमृताः अपध्याताः । *अपक्षीयमाणाः पुत्रपशुहिरण्यादिभिरित्यादिः । *शिष्टाचारेऽपीति । तथाच लौकिकाग्नावेव श्राद्धपाक इति भावः । *अन्यथा अर्धाधाने । *प्रयोगेति । अमावास्याश्राद्धमात्रे व्यतिषङ्गपक्षेऽपि अग्नौकरणं गृह्याग्निपक्वेनैवेति द्रष्टव्यम् । *विधुरा इत्यादि कात्यायनादिपरम् ।

---

(१) 'अस्ति' ग० (२) 'मन्थयेत्' ग० (३) 'आहृत' ग०
(४) 'वैश्वदेवश्राद्धम्' ग० (५) 'पचनाग्नौ' क. 'पचने कु' ग०
(६) 'विधुरोच्छिन्ना' क. छ०

चन्द्रिकायां मार्कण्डेयः--

अह्नः षट्सु मुहूर्तेषु गतेषु प्रयतान्द्विजान् ।
प्रत्येकं प्रेषयेत्ते(१)षां प्रदायामलकोदकम् ॥

देवलः--

ततो निवृत्ते मध्याह्ने कृत्तरोमनखान् द्विजान् ।
अभिगम्य यथान्यायं प्रयच्छे*द्दन्तधावनम् ॥
तैल*मभ्यञ्जनं*स्नानं*स्नानीयं च पृथग्विधम् ।
पात्रैरौदुम्बरैर्दद्याद्वैश्वदेविकपूर्वकम् ॥

औदुम्बरैस्ताम्रमयैः । *'अत्र क्षौरामलकस्नानादि निषिद्धतिथ्यादिव्यतिरिक्तविषयम्' इति हेमाद्रिर्माधवश्च । यत्तु चन्द्रिकायां प्रचेताः-

तैलमुद्वर्तनं स्नानं दद्यात्पूर्वाह्ण एव तु(२) ।
श्राद्धभुग्भ्यो नखश्मश्रुच्छेद(३)नं तु न कारयेत् ॥

इति, तन्निषिद्धतिथ्यादिविषयम् । निषिद्धतिथ्यादि तु प्रागुक्तम् । अभ्यङ्गे तु कलिकायां कात्यायनः—

तैलमु(४)द्वर्तनं देयं ब्राह्मणेभ्यः प्रयत्नतः ।
तैरभ्यङ्गश्च कर्तव्यो वर्ज्यं कालं न चिन्तयेत् ॥

अपरार्के प्रचेताः--

स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि ।
श्राद्धकृच्छुक्लवासाः स्यान्मौनी च विजितेन्द्रियः ॥

---

*दन्तधावनं दन्तधावनसाधनं काष्ठादि । *अभ्यञ्जनं तैलमित्येकम् । *स्नानं स्नानसाधनं जलम् । *स्नानीयम् उद्वर्तनम् । *अत्रेति । क्षौरादिकारणं तैलादिदानं च निषिद्धतिथिवर्जं कार्यम् । आमलोदकस्नानमप्यमावास्याव्यतिरिक्तविषयम्,

---

(१) 'प्रेष्यान्' क० (२) 'च' ग० (३) 'छेदनं न तु' क०
(४) 'उद्वर्तने' ग०

हेमाद्रौ जा(१)बालः—

ताम्बूलं दन्तकाष्ठं च स्नेहस्नानमभोजनम् ।
रत्यौ(२)षधपरान्नानि श्राद्धकर्ता विवर्जयेत् ॥

वस्त्रे विशेषमाह तत्रैव भृगुः—

नग्नः स्यान्मलवद्वासा नग्नः कौपीनकेवलः ।
द्विकच्छोऽनुत्तरीयश्च अकच्छोऽवस्त्र एव च ॥
नग्नः काषायवासाः स्यान्नग्नश्चार्द्रपटः स्मृतः ।
नग्नो द्विगुणवस्त्रः स्यान्नग्नो रक्तपटः स्मृतः ।
नग्नस्तु स्निग्धवस्त्रः स्यान्नग्नः स्यूतपटस्त(३)था ॥

ततः कर्ता ऊर्ध्वपुण्ड्रं कुर्यात ,

जपे होमे तथा दाने स्वाध्याये पितृकर्मणि ।
तत्सर्वं नश्यति क्षिप्रमूर्ध्वपुण्ड्रं विना कृतम् ॥

इति हेमाद्रावुक्तेः,

यज्ञो दानं ज(४)पो होमः स्वाध्यायः पितृकर्म च ।
वृथा भवति विप्रेन्द्रा ऊर्ध्वपुण्ड्रं विना कृतम् ॥

इति बृहन्नारदीयात् ;

ऊर्ध्वं च तिलकं कुर्यात् दैवे पित्र्ये च कर्मणि ।

इति वृद्धपराशरोक्तेश्च । अन्ये तु—

ऊर्ध्वपुण्ड्रं द्विजातीनामग्निहोत्रसमो विधिः ।
श्राद्धकाले तु संप्राप्ते कर्ता भोक्ता च तत्त्यजेत् ॥

"धात्रीफलैरमावास्यायां न स्नायात्" इति स्मृत्यन्तरे तन्निषेधात् । (५)अन्यत्र तु तैलनिषिद्धतिथिषु तैलाभावेऽपि आमलोदकं दद्यादित्यर्थः ।

---

(१) 'जाबालिः' ग० (२) 'रत्यौषधम' ग० (३) 'स्मृतः' क०
(४) 'तपः' ग. (५) 'अन्यत्र तु' नास्ति 'च' पुस्तके ।

वामहस्ते च दर्भांस्तु गृहे (१)रङ्गावलिं तथा ।
ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः ॥

इति सङ्ग्रहोक्तेः,

ऊर्ध्वपुण्ड्रं त्रिपुण्ड्रं वा चन्द्राकारमथापि वा ।
श्राद्धकर्ता न कुर्वीत यावत्पिण्डान्न निर्वपेत् ॥

इति विश्वप्रकाशे वचनाच्च न कार्यमित्याहुः । अत्राचाराद् व्यवस्था । अत एव बृहन्नारदीये--

ऊर्ध्वपुण्ड्रं च तुलसीं श्राद्धे नेच्छन्ति केचन । इति ।

ऊर्ध्वपुण्ड्रविधिर्विप्रविषयः । निषेधः कर्तृपर इति पृथ्वीचन्द्रः । यत्तु हेमाद्रौ देवलः--

ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे माल्यं तथैव च ।
निराशाः पितरो यान्ति दृष्ट्वा च वृषलीपतिम् ॥

इति, तद्गन्धेन त्रिपुण्ड्रविषयम्,

प्राक्पिण्डदानाद्गन्धाद्यैर्नालङ्कुर्यात्स्वविग्रहम् ।

इत्याश्वलायनोक्तेः । पुण्ड्रं वर्तुलमित्यपरार्के मदनरत्ने च । पृथ्वीचन्द्रस्तु (२)पुण्ड्रं त्रिपुण्ड्रम्,

ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुण्ड्रकम् ।
निराशाः पितरो यान्ति दृष्ट्वा चैव त्रिपुण्ड्रकम् ॥

इति बृहत्पराशरोक्तेः । भोक्तुस्तिर्यग्लेपो भवत्येव,

वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा ।
तिर्यगप्यूर्ध्वपुण्ड्रं वा धारयेत्तु प्रयत्नतः ॥

इति व्यासोक्तेरित्याह । पृथ्वीचन्द्रोदये ब्राह्मे--

सदर्भेण तु हस्तेन यः कुर्यात्तिलकं बुधः ।
आचम्य स विशुद्ध्येत दर्भत्यागेन चैव हि ॥

---

(१) 'रङ्गवलिम्' क. 'रङ्गबलिम्' छ.

(२) 'पुण्ड्रम्' नास्ति क. छ.

श्राद्धा(१)रम्भे कालमाहापरार्के गौतमः—

*आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत्।

एतदेकोद्दिष्टे। पार्वणे तूक्तं मात्स्ये—

ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम्।
मुहूर्तपञ्चकं ह्येतत्स्वधाभवनमि(२)ष्यते॥
मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते॥

*आरभ्येति।

अह्नो मुहूर्त्ता विज्ञेया दश पञ्च च सर्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः॥

इति मत्स्यपुराणादह्नोऽष्टमो मुहूर्तः कुतपः, नवमस्तु रौहिणः। यद्यपि मध्याह्न एकोद्दिष्टश्राद्धकालः तथापि गान्धर्वं हित्वा कुतपरौहिणात्मकं मुहूर्तद्वयमेव ग्राह्यमित्यर्थः। एतच्च न पार्वणविषयम्, "ऊर्ध्वं मुहूर्त्तात्कुतपात्"इति वचनात्। "आ(३)रभ्य कुतपे श्राद्धं कुर्यात्" इति प्रारम्भात् पृथक् श्राद्धविधानेन परिशेषादप्येकोद्दिष्टविषयत्वात्।

*ऊर्ध्वमिति। द्वेधाविभक्तदिनापराण्हे सायाह्ननिषेधवशेन पार्वणे तथाविधकाले एव पर्यवसानादिति भावः। वस्तुतस्तु पार्वणे अपराण्हव्याप्तेर्मुख्यत्वादिदं वचनं पार्वणैकोद्दिष्टयोः क्रोडीकाराभिप्रायं, स्वधाभवनपदस्य श्राद्धार्थकत्वात्।

(४)मध्येऽह्नस्त्रिमुहूर्त्तं तु यदा चलति भास्करः।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम्॥

इति तु पार्वणेऽपराह्नस्य कुतपत्वं कुतपे आरम्भसिद्ध्यर्थम् एको-

---

(१) 'श्राद्धारम्भकालम्' ग. (२) 'इष्यते। तथा—मध्याह्ने' ग.
(३) 'आरभ्य श्राद्धं कुर्यात्' 'च' पुस्तके।
(४) 'मध्ये तु त्रिमु' ङ पुस्तके।

अथ श्राद्धपरिभाषा । चन्द्रिकायां कात्यायनः—

दक्षिणं पातयेज्जानुं देवान् *परिचरन् सदा ।
पातयेदितरं जानुं पितॄन् परिचरन् सदा ॥

बौधायनः—

*प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणम् ।
देवानामृजवो दर्भाः पितॄणां द्विगुणास्तथा ॥

पृथ्वीचन्द्रोदये शङ्खः—

आवाहनार्घ्य*संकल्पे पिण्डदाना*न्नदानयोः ।
पिण्डाभ्यञ्जनकाले तु तथैवाञ्जनकर्मणि ।
अक्षय्यासनयोः पाद्ये *गोत्रं नाम प्रकाशयेत् ॥

द्दिष्टगौणकालविधानार्थं वा । *परिचरन्निति अतन्त्रं, सङ्कल्पादेः दैवपितृसाधारणधर्मतया सव्यजानुपातसद्भावात् ।

दक्षिणजानुभूलग्नो देवेभ्यः सेचयेज्जलम् ।
भूलग्नसव्यजानुश्च पितृभ्यः सेचयेज्जलम् ॥

इति वृद्धपराशरेण तर्पणेतिकर्तव्यतायां तदभिधानं दैवपितृभेदेन सिद्धस्य सव्येतरजानुपातस्योद्बोधनार्थम् ।

मनुष्यतर्पणं कुर्वन्न किञ्चिज्जानु पातयेत् ।

इति पुलस्त्यवाक्यं "नान्तरिक्षे न दिवि" इतिवन्नित्यानुवादः । (*(१)प्रदक्षिणमिति ।

उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः ।

इति शातातपो द्रष्टव्यः ।) *सङ्कल्पे तिथ्यादिकीर्त्तने । *अन्नदाने अन्नसङ्कल्पे ।

*गोत्रं नामेति बह्वृचानाम् "गोत्रं नाम च गृहीत्वा" इति तत्सूत्रात् । अस्य प्रकरणान्तरीयत्वेऽपि "त्रिशये प्रायदर्शनात्" (जै०सू०२-३-५-१६) इति न्यायेनेहापि प्रवृत्तेः । इतरेषां तु नामप्र-

---

(१) कंसान्तर्गतं नास्ति 'च' पुस्तके ।

तत्रैव परिशिष्टे —

(१)तर्पणे च पिण्डदाने च गन्धधूपाक्षये तथा ।
सङ्कल्पे चासने दीपे अञ्जनाभ्यञ्जने तथा ॥
अन्नाद्यर्घदाना(२)द्यन्तेषु गोत्रं नाम च कीर्तयेत् ॥

कलिकायां सङ्ग्रहे—

आसनावाहने पा(३)द्ये अन्नदाने तथैव च ।
अक्षय्ये पिण्डदाने च षट्सु नामानि कीर्तयेत् ॥

मा(४)त्स्ये —

सम्बन्धं प्रथमं ब्रूयाद्गोत्रं नाम तथैव च ।
पश्चाद्रूपं विजानीयात् क्रम एष सनातनः ॥

तत्रैव—

सकारेण तु वक्तव्यं गोत्रं सर्वत्र धीमता ।
सकारः कुतपो ज्ञेयस्तस्माद्यत्नेन तं वदेत् ॥

यथा काश्यपसगोत्रेति;

पराशरसगोत्रस्य वृद्धस्य तु महात्मनः ।
भिक्षोः पञ्चशिखस्याहं शिष्यः परमधार्मिकः ॥

इति मोक्ष(५)धर्मे प्रयोगाच्च । तेन गोत्रसगोत्रयोः पर्यायत्वाच्छाखाभेदाद्व्यवस्थेति शूलपाणिः । (ए(६)तद्येषार्वकं गोत्रमिति स्फुटीभविष्यति । विभक्तीरुदाहरति-*गोत्रं स्वरान्तमिति । स्त्रियामपि विभक्तयो नागरखण्डे--

मातर्मात्रे तथा मातुरासने कल्पने क्षणे ।
गोत्रे गोत्रायै गोत्रायाः प्रथमाद्या विभक्तयः ॥
देवि देव्यै तथा देव्या एवं सर्वत्र कीर्त्तयेत् ।

गोभिलोऽपि—

गोत्रायाश्चासने कुर्याद्गोत्रे चैवार्घ्यपिण्डयोः ।

---

[१] 'दक्षिणा पि' ग. (२) 'द्यङ्गेषु' क.
(३) 'पात्रे' क० छ० । (४) 'मत्स्यः' क० छ० ।
(५) 'मोक्षधर्मेषु' ग० । (६) कंसान्तर्गतं नास्ति क० छ० ।

माम्नातं तेषामेव ।) हेमाद्रौ बृहत्प्रचेताः—

*गोत्रं स्वरान्तं सर्वत्र गोत्रस्याक्ष(१)यकर्मणि ।
गोत्रस्तु तर्पणे प्रोक्त एवं दाता न मुह्यति ॥
सर्वत्रैव पितः प्रोक्तः पिता तर्पणकर्मणि ।
पितुरक्षय्यकाले तु पित्र्ये सङ्कल्पने तथा ॥
शर्मन्नर्घादिके कार्ये शर्मा तर्पणकर्मणि ।
शर्मणोऽक्षय्यकाले तु पितॄणां दत्तमक्षयम् ॥

स्वरान्तं सम्बुद्ध्यन्तमिति हेमाद्रिः । तत्रैव चन्द्रिकायां च स्मृत्यन्तरे—

गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमुच्यते ।
यस्मादाह श्रुतिः सर्वाः प्रजाः कश्यपसम्भवाः ॥

यत्तु सत्याषाढः-'अथाज्ञातबन्धोः पुरोहितगोत्रेणाचार्यगोत्रेण वा' इति तद्विवाहपरम् । नामोच्चारणे विशेषमाह हेमाद्रौ बौधायनः—

शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु ।
गुप्तान्तं चैव वैश्यस्य दासान्तं शूद्रजन्मनः ॥

पित्रादिनामाज्ञाने तत्रैव—

पृथिवीषत्पिता वाच्यस्तत्पिता चान्तरिक्षसत् ।
अभिधानापरिज्ञाने दिविषत्प्रपितामहः ॥
पित्रादीनां नाम यदा पुत्रैर्न ज्ञायते तदा ।

आपस्तम्बसूत्रेऽप्येवम् । एतदन्यशाखापरम् । आश्वलायनानां तूक्तं तत्सूत्रे-'यदि नामान्यविद्वांस्ततपितृपितामहप्रपितामहेति ब्रूयात् ।' तत्कारिकापि—

नामानि चेन्न जानीयात्ततेत्यादि वदेत् क्रमात् ।

ततेति सम्बन्धमात्रपरम् । ते(२)न पितृव्यादावपि

गोत्रायाश्चाक्षय्यकाले गोत्रायै त्याग एव च ॥

---

(१) 'अक्षय्यक' म० । (२) 'तत्' क० छ० ।

तथेति गौडाः । स्त्रीणां (१)तु *दान्तं नाम (२)इति ज्ञेयम्, 'दान्तं नाम स्त्रीणाम्' इति पृथ्वीचन्द्रोदये गोभिलोक्तेः । केचिद्देवीशब्दान्तमाहुः । अन्ये तु देवीदा इति द्वयोः समुच्चयमाहुः ।

हेमाद्रौ नारायणः—

विभक्तिभिस्तु यत्किञ्चिद्दीयते पितृदैवते ।
तत्सर्वं सफलं ज्ञेयं विपरीतं निरर्थकम् ॥

चन्द्रिकास्मृत्यर्थसारयोः नारदीये च—

*अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा ।
अन्नदाने चतुर्थी च शेषाः सम्बुद्धयः स्मृताः ॥

यत्तु व्यासः--

चतुर्थी चासने *नित्यं संकल्पे च विधीयते ।
*प्रथमा तर्पणे प्रोक्ता सम्बुद्धिमपरे जगुः ॥ इति ।

*अत्र शाखाभेदाद्व्यवस्थेति हेमाद्रिः । हेमाद्रौ भृगुः—

गोत्रामावाहने कुर्यात्स्त्रीलिङ्गे तु न संशयः ।

*दान्तमिति । 'यशोदादा' इत्यादि । नागरखण्डे अन्तपदाश्रवणाद्देवीशब्दः नामोपलक्षणमिति नाम्नो न देवीशब्दान्तत्वं समुच्चयो वेत्यस्वरसः ।

*अक्षय्येति । एताश्च सम्बन्धनामगोत्ररूपपदेषु । *नित्यमिति । अस्य सङ्कल्पेऽन्वयः, आसने षष्ठ्या अप्युक्तेः । सङ्कल्पोऽन्नदानम् । *प्रथमेति । प्रथमासम्बुद्धिभ्यां विकल्पिताभ्यां द्वितीया विकल्पते,

सम्बन्धनामगोत्रेण स्वधान्तेन नमो मतः ।
तर्पयामिपदेनैव तर्पयेत्पितृपूर्वकम् ॥

इत्याख्यातयोगबलाद्द्वितीयालाभात् । *अत्रेति । आसने षष्ठी-

---

(१) 'तु' नास्ति क० छ० ।   (२) 'इति' नास्ति ग० छ० ।

अर्घ्या*वनेजनं पिण्डमन्नं *प्रत्यवनेजनम् ।
सम्बुद्धिं तत्र कुर्वीत *शेषे षष्ठी विधीयते ॥

(तत्रै(१)व मातुर्विशेषो नागरखण्डे-

मातर्मात्रे तथा मातुरासने कल्पनेऽक्षये ।
गोत्रे गोत्रायै गोत्रायाः प्रथमाद्या विभक्तयः ॥)

हेमाद्रौ प्रभासखण्डे—

*यज्ञोपवीतिना कार्यं दैवं कर्म प्रदक्षिणम् ।
प्राचीनावीतिना कार्यं पितृकर्माऽप्रदक्षिणम् ॥

चतुर्थ्यौं । *अवनेजनम् आस्तीर्णे बर्हिषि पिण्डदानात् प्राग्दीयमानं जलम् । *प्रत्यवनेजनं पिण्डदानोत्तरं दीयमानमुदकम् । निमन्त्रणे तु षष्ठी,

गृहीतामुकसंज्ञस्यामुकगोत्रस्य चामुके ।

इति विधौ तदुक्तेः । *शेषे षष्ठीति ।

आसने तु भवेत् षष्ठी तथैवाक्षय्यपृच्छयोः ।
आवाहने द्वितीया स्यादेष शास्त्रविनिश्चयः ॥
गन्धं माल्यं च धूपं च दीपमन्नं सदक्षिणम् ।
अपृ(२)थक्त्वेन दातव्यं चतुर्थ्या भूतिमिच्छता ॥

इति भृगूक्तेः । ब्राह्मणानुज्ञाग्रहणार्थं श्राद्धारम्भे प्रश्नवाक्यं पृच्छा । आवाहने द्वितीयानियमः—

आवाहनं च कर्तव्यं विभक्त्या च द्वितीयया ॥
येनागच्छन्ति ते सर्वे समाहूताः पृथक् पृथक् ।
अन्यया च विभक्त्या तु पितॄनावाहयेत्क्वचित् ॥
नागच्छन्ति महाभागा यद्यपि स्युर्बुभुक्षिताः ।

इति नागरखण्डात् । धूपादौ तु सम्बुद्ध्या विकल्पः । दक्षिणा चेहाच्छादनम् । *यज्ञोपवीतिनेति । चतुर्विधं कर्म । किञ्चि-

---

(१) कंसान्तर्गतं नास्ति क० छ० ।

(२) 'अष्टधा केन दात' ङ पुस्तके ।

देवसम्बन्धित्वाद्दैवमेव । यथा—'विश्वेदेवाः प्रीयन्ताम्' इति वाचनादि । किञ्चित् पित्र्यमेव, पित्रेकसम्बन्धित्वात् । यथा—स्वधानिनयनादि । किञ्चिदुभयसम्बन्धादुभयात्मकम् । यथा पाकप्रोक्षणादि । किञ्चिद्देवपितृसम्बन्धराहित्याल्लौकिकमेव । यथा—स्वागतप्रश्नादि । तत्र दैवं यज्ञोपवीतिना कार्यम् । वामस्कन्धोपरि दक्षिणकक्ष्याधो निहितं ब्रह्मसूत्रं यज्ञोपवीतम्——

उत्तरे दक्षिणे पाणावुपवीत्युच्यते बुधैः ।
सव्ये प्राचीनावीती निवीती कण्ठसज्जने ॥

इति मनु-स्मरणात् । पित्र्यं साधारणं च प्राचीनावीतिना कार्यम् ;

प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा ।
पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना ॥

इति मनूक्तेश्च । आनिधनात् आसमाप्तेः । दक्षिणस्कन्धोपरि वामकक्ष्याधो निहितं ब्रह्मसूत्रं प्राचीनावीतम् । दर्भपाणिनेति पित्र्ये दर्भपाणित्वायोगव्यावृत्त्यर्थं, न तु दैवमानुषेभ्यो निवृत्त्यर्थं "दर्भपाणिः श्राद्धदेशं प्रोक्ष्य सर्वं कुर्यात्" इति विष्णुना तस्य सर्वार्थत्वोक्तेः । यद्यपि पितृकर्मेत्येवोक्तं तथापि दैवपितृसाधारणं पाकप्रोक्षणाद्यपि (१)कार्यं विप्रतिषिद्धप्रधानधर्मसमवाये प्रधानधर्मस्य बलीयस्त्वात् । तत्र साङ्गं विकिरदानं साङ्गं पिण्डदानं चाचमनवर्जं पित्र्यम् ।

अपसव्येन दर्भेषु पिण्डा देयास्त्रयस्तु वै ॥

इति कार्ष्णाजिन्युक्तेः । एवं सुप्रोक्षितमस्त्विति श्राद्धदेशप्रोक्षणं कर्मैकसम्बन्धात् । एवं साङ्गं स्वधावाचनं पात्रस्थार्घसंस्रवमोचनं न्युब्जपात्रोत्तानकरणं च ।

अपसव्यं ततः कृत्वा पिण्डपार्श्वे समाहितः ॥
क्षिप्त्वा दर्भपवित्राणि मोचयेत्संस्रवांस्ततः ।

---

(१) 'ग्राह्यं' च पुस्तके ।

इति अत्रिवचनाच्च । ततः आशीर्ग्रहणानन्तरं पिण्डपार्श्वे पिण्डार्थं कल्पिते देशे इत्यर्थः । पितृभ्यो वो जुष्टं निर्वपामि पितामहेभ्यो वो जुष्टं निर्वपामि इत्यादिमन्त्रव(१)न्निर्वपणं च पित्र्यमपि साधारणमेव, अत्र वैश्वदेविकार्थं पृथक् पाकाभावात् । यस्तु—

पित्रर्थं निर्वपेत् पाकं वैश्वदेवार्थमेव च ।

इति पृथक् पाकः, स पञ्चमहायज्ञान्तर्गतवैश्वदेवार्थ इत्यग्रे स्फुटम् । एवं श्राद्धार्हद्रव्याणां श्राद्धदेशं प्रत्याहरणम् ॥

आहरेदपसव्येन सर्वं दक्षिणतः शनैः ।

इति मत्स्यपुराणात् । एवं द्रव्यप्रोक्षणमपि । एवमधिकारसम्पद्वाचनम् । ननु "जयाशीः स्वस्तिवाचनम्" इति विधानाद्यज्ञोपवीतं स्यात् अस्याशीरूपत्वादिति चेत् ? न आशीर्हि अभ्यर्थना । नचेदमाशीः किन्तु कर्मस्वरूपसम्पत्त्यर्थं वाक्यमात्रम् । एवमेव पैतृकाभ्यर्चनपिण्डदानश्राद्धानां सम्पूर्णताभ्यर्थनं पित्र्यब्राह्मणेषु स(२)ङ्कल्पसिद्धिवाचनम् । अ(२)च्छिद्रवाचनं च नाशीरिति तत्राप्यपसव्यमेव । एवं गोमयगोमूत्रोपालेपा उल्मुकपरिभ्रमणकुशयवतिलविकिरणाद्यः श्राद्धसंस्काराश्च-((४)एवं देशकालसङ्कीर्त्तनादि 'युष्मदनुज्ञया करिष्ये' इत्यादि वाक्यं तत्पूर्वभाविजपश्च;

अपसव्यं ततः कृत्वा जप्त्वा मन्त्रं तु वैष्णवम् ।
गायत्रीं प्रणवं वापि ततः श्राद्धमुपक्रमेत् ॥

इति प्रचेतोवचनात् । ततः ब्राह्मणानुपवेश्य प्राणायामानन्तरम् उपक्रमेत् सङ्कल्पयेत् । एवं ब्राह्मणभोजनप्रागुत्तरकालीनो गायत्रीमधुमत्यादिजपः सर्वोऽपि "मुक्त्वा यत्त्वश्नतां जपः" इत्यनेन भोजनकालीनजप एव, प्राचीनावीतापवादवचनानामुपसंहारात् ।

---

(१) 'न्निर्वापमेव पणं च' च पुस्तके ।
(२) 'सङ्कल्पमिति वा वचनं' ङ पुस्तके ।
(३) 'अच्छिद्र वा वचनं' ङ पुस्तके ।
(४) कंसान्तर्गतं नास्ति ङ पुस्तके ।

एवं 'तृप्ताः स्थ' इति प्रश्नः, शेषान्नविनियोगाश्च । एवं ब्राह्मणानुव्रजनम् । एवं जान्वालम्भादि नियमश्रावणान्तं विप्रनिमन्त्रणं दैवं यज्ञोपवीतिना,

सव्येन वैश्वदेवार्थान् प्रणिपत्य निमन्त्रयेत् ।

इति प्रचेतोवचनाच्च । पित्र्यं च प्राचीनावीतिना,

कृतापसव्यः पूर्वेद्युः पितृपूर्वं निमन्त्रयेत् ।

इति तेनैवोक्तेश्च । पुनर्निमन्त्रणद्वयं च दैवपित्र्यविभागेन सव्यापसव्येनैव "यथा प्रथममेवं द्वितीयमेवं तृतीयम्" इत्यापस्तम्बवचनात् । एवं दैवपित्र्याणि मण्डलकरणतदर्चनब्राह्मणचरणक्षालनतदर्चनार्घ्यदानानि दैवपित्र्यपादक्षालनार्चनाद्युपयुक्तद्रव्यप्रतिपत्तिरपि । एवम्—

ऋजून् सव्येन वै दत्वा दैवे दर्भान् प्रदाक्षिणम् ।
द्वि) गुणानपसव्येन दद्यात् पित्र्येऽपसव्यवत् ॥

इति बृहस्पतिना दर्भासनं वैश्वदेविकं यज्ञोपवीतिना, पित्र्यं च प्राचीनावीतिना दर्शितम् । अत्र सव्यापसव्यशब्दाभ्यां यज्ञोपवीतप्राचीनावीतयोः प्रदक्षिणापसव्यशब्दाभ्यां च प्रादक्षिण्याप्रादक्षिण्ययोरिति नाभेदः । दर्भानिति दर्भासनम् । तच्चासनोपकल्पनं तत्र द्विजपादयोरधश्च कुशयवादिनिधानं द्विजोपवेशनं चेति । (१)(दैवे । पित्र्ये तु आसनोपकल्पनं द्विजपादयोरधश्च कुशतिलादिनिधानं द्विजोपवेशनं चेति ।) एतच्च यज्ञोपवीतं दर्भासनादि आच्छादनदानान्तवैश्वदेविकपदार्थेषु द्रष्टव्यम् ;

अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम् ।
द्विगुणांस्तु कुशान् कृत्वा ह्युशन्तस्त्वेत्यृचा पितॄन् ॥

"आवाहयेत्" इति याज्ञवल्क्येन दर्भासनदानाद्याच्छादनान्तवैश्वदेविकपदार्थकाण्डं समाप्यैव प्राचीनावीतोपदेशात् । एवं

---

(१) कंसान्तर्गतं नास्ति ङ० पुस्तके।

भाजनदीपिकादिस्थापनं पाङ्क्तिभेदार्थं भस्मादिना मर्यादाकरणं भाजनक्षालनं करशोधनं तदुदकप्रतिपत्तिः भाजनेष्वाज्योपस्तरणं पात्रालम्भनाङ्गुष्ठनिवेशनान्नत्यागभोजनप्रैषाः अक्षय्योदकदानं भोजनपात्रचालनं च दैवपित्र्यभेदेन सव्यापसव्यविभागेन । अतिथेस्तु निमन्त्रणादि एतदन्तं सर्वं यज्ञोपवीतेन । अग्नौकरणे तु अनुज्ञाऽभ्यर्थनात् प्रभृति कातीयानां प्राचीनावीतम् आश्वलायनानां तु अनुज्ञाऽभ्यर्थनात् प्रभृति तदुत्तरपदार्थप्रभृति वा । अथवा सर्वेषामेवादितः प्राचीनावीतमुपवीतं वा "अनुज्ञाऽभ्यर्थनात् प्रभृति पर्युक्षणान्तं यज्ञोपवीतिना कृत्वा प्राचीनावीतं कार्यम्" इति मात्स्यानुसारिणः । हुतशे(१)षप्रतिपत्तिश्च प्राचीनावीतिनैव,

हुत्वाग्नौ परिशेषं तु पितृपात्रेष्वनन्तरम् ।
निवेद्यैवापसव्येन परिवेषणमाचरेत् ॥

इति शौनकोक्तेः । अत्रापसव्येनेत्यस्य न परिवेषणेन सम्बन्धः,

अपसव्येन यस्तदन्नं ब्राह्मणेभ्यः प्रयच्छति ।
विष्ठामश्नन्ति पितरः तेन सर्वे द्विजोत्तमाः ॥

इति कार्ष्णाजिनिना निन्दाश्रवणात् । (२)("पिण्डांस्तु गोऽत्रपित्र्येभ्यः" इति प्रतिपत्तिस्तु पित्र्यैव, तत्सम्बन्धसत्त्वादिति दिक्) ।

अथ लौकिकं यथा व्रीह्यादिक्रयकृषिप्रतिग्रहादि । न च पितृपाकसाधनस्य व्रीह्यादेः क्रयादिपितृसम्बन्धितया पित्र्यमिति तत्र प्राचीनावीतं स्यात् । अत्रोक्तं श्राद्धसागरे-यद्यपि पित्र्यसम्बन्धि पित्र्यं तथापि विहितमेव पित्र्यं ग्राह्यम् । एवं पितृकर्मेति कर्मशब्देनापि । किञ्च--

प्राचीनीवीतिना सम्यगपसव्यमतन्द्रिणा ।
पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना ॥

---

(१) 'शिष्टं' 'च' पुस्तके । (२) कंसान्तर्गतं नास्ति 'च'० ।

इति मनुवचने विधिवाप्तिऽयमिति योजनया विहितपित्र्यं लभ्यते । नच क्रयादयो विहिताः । विहितव्रीह्यादिसिद्धिकरत्वात्तु ते प्रयोगान्तःपातित्वाच्च यदा कदाचिदपि कर्त्तव्याः । अतः क्रयादि लौकिकम् । एवं दर्भच्छेदो गृहं प्रत्याहरणं च अविधानादेवावघातनिष्पन्नफलीकरणसंयवनादि । नच स्थालीपाक इवावघातादेरतिदेशतः प्राप्तिरिति वाच्यं, धान्यस्यानिर्वापात्--

अग्निमान्निर्वपेत् पैत्रं पाकं चासममुष्टिभिः ।
पितृभ्यो निर्वपामीति सर्वं दक्षिणतो न्यसेत् ॥

इति वचने पाकसंकथनात्तत्साधनस्य तण्डुलावस्थस्यैव निर्वापोक्त्या धान्यावस्थस्य बाधात् । अग्निमानिति तु साग्निके निर्वापो नियम्यते । एवं वस्त्रशौचादि, दैवपित्र्ययोरपेक्षणीयतयाऽर्थतः प्राप्तस्य तस्य कालमात्रविधानात् । एवं वरुणस्तुत्यादिपूर्वकजलाहरणमपि, सर्वार्थत्वात् । एवमुपहतानुपहतभाण्डादिशौचमपि, तमकृत्वा तादृशभाण्डैः श्राद्धपाकादि कुर्वतः प्रत्यवायापत्तेः तस्य नियमतो यजमानकर्तृकत्वाभावाच्च । अत एव श्राद्धभूम्युपलेपनादि च शुचित्वाविशिष्टश्राद्धदेशविधेरर्थप्राप्तानुवादत्वाच्च । एवं निमन्त्रणाय सुतशिष्यादिप्रेरणमादरार्थं निमन्त्रणीयस्थानोपसर्पणं च, लोकतः प्राप्तस्यैवाप्रमादार्थमनुवादात् । एवं मनोवाक्कायशुद्ध्यर्थमिष्टदेवतासंकीर्तनप्राणायामादि, श्राद्धानङ्गत्वात् । एवं--

निरामिषं सकृद् भुक्त्वा भुक्तसर्वजने गृहे ।
निमन्त्रयीत पूर्वेद्युरुपगम्य द्विजोत्तमान् ॥

इति पूर्वेद्युर्निमन्त्रणाङ्गं भोजनं, रागतः प्राप्तेरविधेयत्वात् । नच तदाश्रितो निरामिषत्वादिनियमो विधेय इति तस्य पित्र्यङ्गत्वात्तद्विशिष्टभोजने प्राचीनावीतं दुर्वारमिति वाच्यं, भोजनं हि पुरुषार्थं, निरामिषत्वादिनियमः श्राद्धीयनिमन्त्रणार्थत्वात्कर्मार्थः, कर्मा-

र्थाच्च पुरुषार्थं बलीयः इति न कर्मार्थप्रयुक्तं प्राचीनावीतं, किन्तु पुरुषार्थप्रयुक्तं यज्ञोपवीतमेव । किञ्च भोजनं धर्मी, तदाश्रितो नियमस्तु धर्मः, धर्मधर्मिणोर्धर्मी बलीयानिति भोजनाश्रितं यज्ञोपवीतं युक्तम् । किञ्च "सोत्तरच्छदमन्हैव यज्ञोपवीती भुञ्जीत" इत्यापस्तम्बोक्तेर्भोजनं प्रधानं, नियमाश्रितं प्राचीनावीतं तु निमन्त्रणाङ्गत्वादप्रधानं, प्रधानाप्रधानयोर्विशेषे प्रधानेन प्राबल्यादप्रधानं प्राचीनावीतं बाध्यते । किञ्च पित्र्यत्वेन प्राचीनावीतप्राप्तौ–

कृतापसव्यः पूर्वेद्युः पितृपूर्वं निमन्त्रयेत् ।

इति सङ्कल्पप्रभृतिनिमन्त्रणे पुनर्विधानात् तत् पूर्वकृत्ये निरामिषभोजनादौ प्राचीनावीतं परिसंख्यायते । एवं ब्रह्मचर्यादिनियमपालनं यद्यपि तच्छ्राद्धार्थत्वेन विहितत्वात् पित्र्यमिव भासते तथापि यज्ञोपवीतधर्मकदैवमानुषानेककार्यसङ्कीर्णत्वात् "भूयसा स्यात्सधर्मत्वात्" इति न्यायेन लौकिकम् । एवं श्राद्धभूम्युपलेपनपाकभूम्युपलेपनप्रोक्षणोल्मुकोपनयनतिलसर्षपावकिरणवस्त्रबन्धनापासनीयापासनभाण्डादिमेलनक्षालनतण्डुलाद्यधिश्रयणाधःश्रयणावस्रावणोद्वासनादीनि, दैवपित्र्यसाधारणानामपि तेषां पत्न्यादिभिः सुकरतया यजमानैककर्तृकत्वाभावात् । एवं ब्राह्मणनखरोमकर्तृकदन्तधावनकाष्ठादि तैलामलकादिस्नानार्थद्रव्यप्रापणानि, दैवपित्र्यशून्यत्वात् । एवं नित्यकर्माङ्गस्नानयोस्तन्त्रेणानुष्ठाने स्नानम्, विरुद्धयोर्यज्ञोपवीतप्राचीनावीतयोरन्यतरस्मिन हेये आगन्तुकस्य प्राचीनावीतस्यैव हेयत्वौचित्यात् । ननु कर्माङ्गस्नानं नित्यस्नानविकृतिः । तथाच कर्माङ्गस्नाने औपदेशिकेनापसव्येनातिदेशिकं यज्ञोपवीतं बाध्येत । एवञ्च पृथगनुष्ठीयमाने कर्माङ्गस्नाने सुतरामपसव्यं स्यात् ? न स्यात् ! यतः पित्र्यमानिधनादिति वाक्येन सामान्यतोऽपसव्यं विधीयते । प्रेतस्नानमपि पित्र्यं प्रेतक्रियायाः पितृमेधशब्दितत्वात् । ततश्च तत्रापसव्ये सिद्धे मरणे

तु यथावृद्धं पुरस्कृत्य यज्ञोपवीतान्यपेशलानि कृत्वा तीर्थमवतीर्य सकृन्निमज्योन्मज्येति बौधायनेन प्रेतस्नानेऽपसव्यपरिसंख्यानान्न तदितरपार्वणश्राद्धादिकर्माङ्गस्नानेऽपसव्यम् । यदि च दर्शश्राद्धं प्रकृत्य मानवं वचनमुक्तमिति न प्रेतस्नाने प्रवर्तते इति मन्यते तदा "प्राचीनावीतं पितॄणाम्" इति वैदिकलिङ्गदर्शनात्सामान्यतः पित्र्यमात्रे प्राचीनावीतप्राप्तिरस्त्येव । एवं पित्र्यकर्मार्थस्नानाङ्गाचमनमपि । "यज्ञोपवीती स्नायात्" इति सेतिकर्तव्यताके स्नाने यज्ञोपवीतविधानात् । एवं श्राद्धारम्भब्राह्मणपादशौचार्चनविकिरपिण्डदानश्राद्धान्तेषु कर्माङ्गमाचमनमपि । अत एव यज्ञोपवीतं प्रकृत्य गौतमः—"यज्ञोपवीत्यामणिबन्धनात् पाणी प्रक्षाल्य वाग्यतो हृदयस्पृशस्त्रिचतुर्वा अप आचामेत्" इति । ननु गौतमं सामान्यवचनं "पित्र्यं प्राचीनावीतिना कार्यम्" इति विशेषेण बाध्येतेति चेत् ? न, पित्र्यमिति तद्धितश्रुत्या हि पितृसम्बन्धितया विहितं कर्माभिधीयते । तच्च किञ्चित्साक्षात् पितृसम्बन्धितया विहितं पित्र्यार्घगन्धदानादि, किञ्चित्तु पित्र्यकर्माङ्गत्वात् पित्र्यं पाकप्रोक्षणादि । तत्राचमने साक्षान्न पितृसम्बन्धः, किन्तु प्रकरणावगताङ्गत्वानुसन्धानात्स इति तत्र प्राचीनावीतशास्त्रं विलम्बते, झटिति यज्ञोपवीतशास्त्रमेव प्रवर्तते; पश्चात्प्राप्तवता प्राचीनावीतशास्त्रेणाचमनातिरिक्तविषये सावकाशेन बाधायोगाच्च । दक्षिणामुखत्वं तु कार्यम्, आचमनाधिकारे——

प्रथमं प्राङ्मुखं स्थित्वा पादौ प्रक्षालयेच्छनैः ।
उदङ्मुखस्तु दैवत्ये पैतृके दक्षिणामुखः ॥

इति देवलोक्तेः । यत्तु मध्ये क्षुतादिनिमित्तमाचमनं तत्कर्मानङ्गम् । ननु तस्यापि कर्मवैगुण्यहेत्वशुचित्वनिवृत्तिद्वारा साद्गुण्यापादकशुचित्वजननद्वारा वा कर्माङ्गत्वं दुर्वारम् । तथाचोक्तं——

वेदं कृत्वा यदा वेदिमकृत्वाचमति क्षुते ।

वेदिमेव करोतीति स वक्तुं शक्यते तदा ॥

इतिचेत् ? न, "शुचिना कर्म कर्तव्यम्" इति शुद्धिः कर्माङ्गम् । सा च पुरुषार्थेनाचमनेन निष्पाद्यमाना क्रतुनापि सम्बध्यते । कारिका त्वाचमनं न व्यवधायकमित्येतत्परा,

वेदिरेव ह्यनाचम्य कुर्वतो विगुणीभवेत् ।
तामेव सगुणीकर्तुं शुद्ध्या न व्यवधास्यते ॥

इत्युक्तेः । एवञ्चेदं शुद्ध्यर्थतया लौकिकम् ।

विना यज्ञोपवीतेन तथा मुक्ताशिखो द्विजः ।
अप्रक्षालितपादस्तु आचान्तोऽप्यशुचिर्भवेत् ॥

इति शङ्खोक्तिश्च तत्र प्राचीनावीतनिवर्तिका । एवञ्चाशुचित्वापादकनिमित्तप्रयुक्ताचमनं तु सुतरां लौकिकमिति सर्वमनवद्यम् एवं ब्राह्मणाह्वानमपि । ब्राह्मणानाहूयेत्यर्थः, प्राप्तस्यैवानुवादात् । (१)(एवं प्रत्युत्थानस्वागतप्रश्नोपवेशनानि रथ्यारजोमार्जनार्थं पादप्रक्षालनं रथ्यापसर्पणप्रयुक्ताप्रायत्यनिवर्तकाचमनदानानि च ।) एवं यजमानस्य श्राद्धभूम्यागमनातिथ्युपवेशनभूम्यादिस्तुतिदेवतास्मरणप्राणायामाश्च । एवमापोशनार्थमुदकदानं, नित्यभोजनविहितत्वात् । एवं पात्रमोचनार्थं सकृद्गण्डूषदानम् । एवम् "अघोराः पितरः सन्तु" इत्याद्याशीः "जपाशीः" इति मरीचिवचनात् । "विश्वेदेवाः प्रीयन्ताम्" इति केवलदैवम् । स्वस्तिवाचने उपवीतं, मरीचिवचनात् । एवं ब्राह्मणदत्तपुष्पाक्षतग्रहणादि । "अद्य मे सफलं जन्म" इत्यादिप्रियभाषणब्राह्मणचरणसंवाहनस्वस्थानगमनार्थानुज्ञापनसीमान्तगमनानि प्रस्थाप्यमानाविशिष्टपुरुषसत्कृतिरूपतया लौकिकानि । एवमुच्छिष्टोद्वासनं स्वयजमानकर्तृकं पत्न्ये पिण्डदानं च, पितृसम्बन्धराहित्यात् । स्वजनकर्तृकं यजमानकर्तृकं वा शेषान्नभोजनं श्राद्धोपकारकमपि पञ्च

---

(१) धनुश्चिन्हान्तर्गतं नास्ति च० ।

अनुपनीतस्त्रीशूद्रादेस्तूत्तरीयेणैव सव्यापसव्ये ज्ञेये, तस्योपवीतस्थानीयत्वात्;

अपसव्यं क्रमाद्वस्त्रं कृत्वा कश्चित्सगोत्रजः ।

इति ब्राह्माच्चेति वाचस्पतिः । यत्तु केचित् 'सदोपवीतिना भाव्यम्' इत्यस्य *पुरुषार्थत्वात् प्राचीनावीतकालेऽप्यु*पवीतान्तरेण तत्का(१)र्यमेवेति । तन्न, *वि(२)-

---

महायज्ञव्यवहितत्वात् प्रयोगबहिर्भावात् लौकिकमेवेति दिक् ।

*पुरुषार्थत्वादिति ।

विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

इति तस्य कर्मार्थत्वोक्तेरिति भावः *उपवीतान्तरेणेति । शूद्रस्य --

न शिखी नोपवीती स्यान्नोच्चरेत्संस्कृतां गिरम् ॥

इति निषेधेऽपि कर्मार्थमुपवीतमावश्यकं "विशिखो व्युपवीतश्च" इति वचनादित्यर्थः । *विशेषेणेति । 'वस्त्रं कृत्वा' इति । विशेषेणेत्यर्थः । "नोपवीती स्यात्" इति सामान्यतः कर्मार्थपुरुषार्थोपवीतनिषेधात्तदप्राप्तौ अपूर्वमुत्तरीयापसव्यं बोध्यते इति तु द्रष्टव्यम् । यज्ञोपवीतान्तरेणेति द्विजस्य कर्मार्थोपवीतेनेत्यर्थः "विशिखः" इत्युक्तेः । विशेषेणेति । प्राचीनावीतेनेत्यर्थः । पुरुषार्थस्यैवोपवीतस्य कर्मार्थत्वं "विशिखः" इत्यनेन बोध्यते । "नानृतं वदेत्" इति पुरुषार्थनिषेधे दर्शपूर्णमासप्रकरणे पुनः "नानृतं वदेत्" इति अनृतवदनवर्जनवत् । प्राचीनावीतेन कर्मार्थेन कर्मार्थं पुरुषार्थं चोपवीतं बाध्यते इति भावः । नचैवं जीवत्पितृकस्यात्यावश्यके पित्र्येऽपि यज्ञोपवीतापत्तिः,

न कुर्वीतापसव्यं च न कुर्वीतापि मुण्डनम् ॥

इति वृद्धगार्ग्येण निषेधादिति वाच्यं, तस्य पूर्णापसव्यनिषेधात्,

---

(१) 'तत्कार्यमिति' क० ।   (२) 'विशेषबाधात्' ग० ।

शेषेण बाधात् । जमदग्निः—

*सू(१)क्तस्तोत्रजपं त्यक्त्वा *पिण्डाघ्राणं च दक्षिणाम् ।

अपसव्यं द्विजाग्र्याणां पित्र्ये पूर्वत्र कीर्तितम् ।
आप्रकोष्ठात्तु कर्तव्यं मातापित्रोस्तु जीवतोः ॥

इति वाक्येन प्रकोष्ठादुपरि तन्निषेधपर्यवसानात् । मातेत्यतन्त्रम् । उत्तरीयापसव्यमाह शङ्खः—"अपसव्ये वासोयज्ञोपवीते कृत्वा" इति । क्वचित्प्राचीनावीतापवादमाह—*सूक्तेति । सूक्तजपः भुञ्जानेषु विप्रेषु पित्र्यसूक्तजपः ।

प्रदक्षिणं शिवा आपो जपाशीः स्वस्तिवाचनम् ।
विप्रेषु दक्षिणादानं षट् सव्यानि प्रचक्षते ॥

इति मरीच्युक्तेः । प्रदक्षिणं विसर्जनानन्तरं बहिर्निर्गत्य मण्डलोपरि स्थितानां ब्राह्मणानां प्रदक्षिणीकरणम् । शिवा आप इति । अनेन "शिवा आपः सन्तु" इत्यादिना क्रियमाणं जलकुसुमाक्षतक्षेपरूपं कर्म । अदृष्टार्थं मंत्राद्युच्चारणं जपः । आशीः "दातारो नोऽभिवर्धन्ताम्" इति, "अघोराः पितरः सन्तु" "गोत्रं वर्धन्ताम्" इत्यादिका । स्वस्तिवाचनं "स्वस्ति भवन्तो ब्रुवन्तु" इति वाचनम् । दक्षिणादानं पित्राद्युद्देशमन्तरेण ब्राह्मणानामानत्यर्थत्वपक्षे ।

सर्वं कर्मापसव्येन यत्किञ्चिदिह कीर्तितम् ।
विहाय दक्षिणामेकां तथा विप्रविसर्जनम् ॥

इति मरीचिवचनेऽपि एतदेव । पितृभ्य एव दानमिति पक्षे त्वपसव्येन । "हिरण्यं देवेभ्यो ददाति रजतं पितृभ्योऽपसव्यं तत्रापि" इति पारस्करवचनात् । एतानि सव्येनैव कर्तव्यानीत्यर्थः । नतु "सहस्रशीर्षा" इत्यादिजपः, आधिकारार्थतया ब्रह्मदण्डवल्लौकिकत्वात् । नापि भोजनप्रागुत्तरकालीनो गायत्री-

---

(१) 'सूक्तम' ग० ।

आह्वानं स्वागतं चा*र्घ्यं विना च परिवेषणम् ॥
*विसर्जनं *सौमनस्यमाशिषां प्रार्थनं तथा ।
विप्रप्रदक्षिणां चैव स्वस्तिवाचनकं विना ॥
पितॄनुद्दिश्य कर्तव्यं प्राचीनावीतिना सदा ॥

हेमाद्रौ सङ्ग्रहे—

आदौ *विप्राङ्घ्रिशौचान्तेऽभ्यर्चने विकिरे कृते ।
पिण्डान्न्युप्यार्चयित्वा च विसर्ज्य ब्राह्मणांस्तथा ॥
आचामेच्छ्राद्धकर्ता च स्थानेष्वेतेषु सप्तसु ।
आद्यन्तयोर्द्विराचामेच्छेषेषु तु सकृत्सकृत ॥

मधुमत्यादिजपः,

कृतापसव्यः कुर्वीत मुक्त्वा यस्त्वक्षतां जपः ।

इति वृद्धशातातपेनापसव्योक्तेः । अक्षतामिति विप्रभोजनोत्तरकालीनलाभः । स्तोत्रजपः "सप्तव्याधा" इत्यादिः । *पिण्डाघ्राणं पिण्डचालनोत्तरं क्रियमाणं तदाघ्राणम् । आह्वानस्वागते लौकिके एवेति न तत्रापसव्यप्राप्तिरित्येके; साधारण्यात् । तत्प्राप्तिरित्यन्ये ।*अर्घ्यं गृहागतेभ्यो विप्रेभ्यः पाद्योत्तरं दीयमानमर्घ्यम् । तत्र साधारण्यात् प्राप्तिः । नत्वर्चनाङ्गं तत् । तस्य काण्डान्तःपातित्वात् । *विसर्जनम् "वाजेवाजे" इति विसर्जनम् । *सौमनस्यं "शिवा आपः सन्तु" इत्यादि । अत्र कर्कः आचान्तेषूदकपुष्पाक्षतदानं दैवपूर्वं ततोऽपसव्यं पित्र्ये । केचित्तु सव्यमिच्छन्ति, तत्र दानसंयोगात् । पितृयज्ञवदुपचारः पित्र्ये इति च दर्शनादिति । तदसत्, एतद्वचनविरोधात् । पूर्वोक्त मरीचिवचनविरोधात् पित्राद्युद्देशमन्तरेण क्रियमाणत्वाच्च ।

ततः पुष्पाणि सव्येन सोदकानि पृथक् पृथक् ।
दर्भपाणिः प्रदद्यात्तु वाङ्मनःकायसंयतः ॥

इति छागलेनोक्तेश्च । *विप्रान्ते दैवे । पित्र्ये तु आचमन-

तत्रैव--

श्राद्धारम्भेऽवसाने च पादशौचार्चनान्तयोः।
विकिरे पिण्डदाने च षट्स्वाचमनमिष्यते ॥

आश्वलायनः—

दानाध्ययनदेवार्चाजपहोमव्रतादिकान्।
न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात् ॥

एतन्नित्यवर्ज्यमिति बोपदेवः। इदं विष्णुभिन्नदेवपरम्,

विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरम्।
पितृभ्यश्चापि तद्देयं तदानन्त्याय क(१)ल्पते ॥
पितृशेषं तु यो दद्याद्धरये परमात्मने।
रेतोधाः पितरस्तस्य भवन्ति क्लेशभागिनः ॥

इति स्कान्दात् 'पितरः स(२)र्वमनुष्या विष्णुनाशितमन्नमश्नन्ति' इति श्रुतेः,

यः श्राद्धकाले हरिभुक्तशेषं ददाति भक्त्या पितृदेवतानाम्
तेनैव पिण्डांस्तुलसीविमिश्रानाकल्पकोटिं पितरस्तु तृप्ताः ॥

इति ब्राह्मोक्तेश्चेति श्रीधरस्वामिनृसिंहपरिचर्यादयः। एतत्सर्वं निबन्धविरोधान्निर्मूलम्।

अत्र विशेषो हेमाद्रौ विष्णुधर्मे--

श्राद्धाह्नि तु समभ्यर्च्य नृवराहं जनार्दनम्।

शिवपुराणे--

पूजयित्वा शिवं भक्त्या पितृश्राद्धं प्रकल्पयेत्।

पूर्वनिषेधस्तु विहितभिन्नपरः। तथा हेमाद्रौ-

(३)देवार्चा दक्षिणाङ्गादिः पादजान्वंसमूर्धसु।
शिरोंसजानुपादेषु वामाङ्गादि च पैतृ(४)के ॥

---

(१) 'कल्प्यते' क० छ०। (२) 'सर्वे' ग०।
(३) 'दैव्यर्चा' क०। (४) 'पैतृकम्' ग०।

कलिकायां स्मृत्यन्तरे—

*श्राद्धारम्भे तु (१)ये दर्भाः पादशौचे विसर्जयेत् ।
अर्चनादौ तु ये दर्भा उच्छिष्टान्ते विसर्जयेत् ॥
मार्जनादौ तु ये दर्भाः पिण्डोत्थाने विसर्जयेत् ।
उत्तानादौ तु ये दर्भा दक्षिणान्ते विसर्जयेत् ॥
प्रार्थनादौ तु ये दर्भा नमस्कारे विसर्जयेत् ।

ऊहमाह विष्णुः—

*मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ।
मन्त्रोहेन यथान्यायं शेषाणा मन्त्रवर्जितम् ॥

*यथान्यायमिति । *यत्र बहुवचनान्तः पितृशब्दस्तत्र *सर्वपितृवाचित्वान्नोहः । तत्रापि *'शुन्धन्तां

द्वयं वक्ष्यति । *श्राद्धारम्भे चेति ।

आचान्तः प्राक्कुशांस्त्यक्त्वा पाणावन्यांश्च धारयेत् ।

इति श्राद्धारम्भे उक्ता बोध्याः ।

आतिदेशिकस्य मन्त्रसंस्कारान्यतरस्यान्यथाभाव ऊहः साम्नः प्रयोजनाभावान्नोद्देशः । *मातामहानामप्येवमिति । ननु नायमतिदेशः । तथा सति तन्मात्रेणोहे सिद्धे मन्त्रोहेनेत्यस्य वैयर्थ्यादिति चेत् ? सत्यम् । अस्ति च--

मातामहानामप्येवं तत्र वा वैश्वदेविकम् ।

इति पितृपार्वणातिदेशेन मातामहपार्वणे धर्मप्राप्तौ अपूर्वप्रयुक्तत्वान्मन्त्राणामूहः । तस्य न्यायप्राप्तत्वं व्युत्पादयति—*यथान्यायमित्यादिना । *यत्र "एतद्वः पितरो वासो" "अमीमदन्त पितरो यथाभागम्" इत्यादौ । *सर्वेति--

प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु ।
ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते ॥

---

(१) 'च' क० छ० ।

पितरः' इत्यत्रोह एव; *सर्वपितृवाचित्वे उत्तरमन्त्रद्वयवैयर्थ्यात् । *बहुवचनं तु नोह्यते, प्रकृतावसमर्थत्वात् *पाशानितिवत् । *ऋगन्ते च नोहः, *'तस्मादृचं

इति दर्शनात्;

षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ।
पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥

इति मातामहपितामहादिसाधारण्येन प्रयोगाच्च । तन्मन्त्रेषु सपिण्डीकरणान्तश्राद्धजन्यपितृत्वेन मातामहसाधारणार्थतया समवेतार्थत्वादित्यर्थः । *शुन्धन्तामिति जनकत्वोपाधिना ह्ययं पितृशब्दः प्रयुक्तः । “पिता यस्य तु वृत्तः स्यात्” इत्यादिवत् । नन्वयमप्यस्तु सपिण्डनान्तश्राद्धजन्यपितृत्वेनोपाधिना प्रयुक्त इत्यत आह--*सर्वेति । शुन्धन्तां पितामहाः शुन्धन्तां प्रपितामहा इति पितामहप्रपितामहशब्दयोरुपादानेन पितृशब्दो जनकपर एव । अन्यथा तन्मन्त्रद्वयं व्यर्थं स्यादित्यर्थः । एवञ्च “शुन्धन्तां मातामहाः” इत्यादि “शुन्धन्तां मातरः” इत्यादिरूहः । येषां च “पितृभ्यः स्वधोच्यतां, पितामहेभ्यः स्वधोच्यतां, प्रपितामहेभ्यः स्वधोच्यताम्” इति शुन्धनमन्त्रास्तेषामप्युक्तन्यायादेवोहः । ननु प्रकृतौ एकस्मिन् पितरि बहुवचनस्यासमवेतार्थत्वाद्विकृतावेकवचनस्याप्यूहप्रसङ्ग इत्याह--*बह्विति । *पाशानिति । प्रकृत्यर्थसमवेतार्थकबहुवचनस्य विकृतावविकृतस्यैव प्रयोग इति पाशाधिकरणसिद्धान्त इति भावः *ऋगन्ते चेति । “पितॄन् हविषे अत्तवे आयन्तु नः पितरः” इत्यादि ऋक् । *तस्मादिति । “पूयति वा एतदृचोऽक्षरं यदेनदूहति” इत्यादिः । यदि च अनृगूहवत् यथान्यायमित्युक्तत्वादेव ऋगूहस्य वारणं तदापि निषेधोऽपि द्रष्टव्य इत्यर्थः । नन्वृचि अनृचि वा जनकपरोऽपि पितृशब्दः बहुवचनेन पितृसमुदाये वर्तताम् “प्राणदुभृपदधाति”

नोहेत' इति निषेधात् । *एकोद्दिष्टेऽप्येवम् । प्रेतैकोद्दिष्टे तु *'एकवन्मन्त्रानूहेतैकोद्दिष्टे' इति विष्णूक्तेरूहः ।

इत्यत्रैव लिङ्गसमवायात् प्राणभृच्छब्दः प्राणभृदप्राणभृत्समुदाये । तादृशस्य च विकृतौ मातामहादिश्राद्धेऽसमर्थत्वात्प्रकृतिवद्देव मातामहमातुःपितामहमातुःप्रपितामहेषु 'मातामहा' इत्यूहः । ऋङ्मन्त्रे तु वचनात्तन्निषेधश्चेति ? मैवं, नानार्थो हि पितृशब्दः तत्र जनकपरत्वोपगमे गौणी स्यादतः तादृशपितृत्वापन्नपर एव गृह्यते । तथा सति बहुवचनस्याप्यनायासेनोपपत्तिः । एवञ्च प्रकृतौ यादृशः शास्त्रार्थस्तादृश एव विकृताविति नोहप्रसङ्गः । ननु "पितरेतत्तेऽर्घ्यम्" इत्यादौ ऊहानूहविचारो न स्यात्, एतस्याभिलापमात्रत्वेन मन्त्रत्वाभावात् । अन्यथा शूद्रादेर्मन्त्रनिषेधात्तदुच्चारानापत्तेरिति चेत् ? नैवमपचीयते किञ्चिदस्माकम्, पितामहादौ मितामहेदं तेऽर्घ्यमित्यादि समवेतार्थाभिलापस्य दुर्वाररत्वात् । न च तत्र "पितरिदं तेऽर्घ्यम्" इत्याद्यपि समवेतार्थम् । "अर्घ्यप्रदानमन्त्रे तु" इत्यादिबह्वृचकारिकादिदर्शनेन तत्र स्वसम्बन्धवचनस्यावश्यकत्वेन चातथाभूतसापिण्डनश्राद्धजन्यपितृपरपितृशब्दानभिलापस्य समस्तधार्मिकसंमतत्वात् । *एकोद्दिष्टेऽप्येवमिति । पुराणैकोद्दिष्टे नोहः, तस्य पार्वणवदेव कर्तव्यत्वादित्यर्थः । *एकवादिति । एकोद्दिष्टे प्रेतैकोद्दिष्टे पितृपदघटितान् मन्त्रान् पितृपदस्थाने प्रेतपदघटितान् कुर्यादित्यर्थः । वचनादिति । "एकवत्" इतिवचनादित्यर्थः । वस्तुतस्तु इदं प्राचीनमतं न सम्यक् । एतद्वाक्यस्य प्रेतैकोद्दिष्टविषयत्वे मानाभावेन प्रेतशब्दोहाप्रतीतेः । किन्त्विदं प्रेतपुराणैकोद्दिष्टसाधारणम्, एकोद्दिष्ट इति सामान्यत एवाभिधानात् । ग्रन्थस्त्वित्थं योजनीयः एकोद्दिष्टे "शेषं पूर्ववदाचरेत्" इति पार्वणातिदेशात् "पितॄनिमान् लोकान्" इत्याद्यृक्षु "शुन्धन्तां पितरः" इत्याद्यनृक्षु च प्राप्त ऊहः प्रथमे 'त-

*अत्र*बहुवचनस्याप्यूहो *वचनात्। वृद्ध्यादौ तु*विशेषं स्मादृचं नोहेत्' इति निषेधादन्त्ये न्यायाद्बाधितो विष्णुना प्रतिप्रसूयते। एकोद्दिष्टे श्राद्धे क्षयाहादौ क्रियमाणे मन्त्रानेकवद्यथा भवति तथा ऊहेतेति हि तदर्थः। एवञ्च पुराणैकोद्दिष्टे सर्वपितृवाचिनः पितृशब्दस्य नोह इत्याह–एकोद्दिष्टेऽप्येवमिति। पुराणैकोद्दिष्टे सर्वपितृवाचिनः पितृशब्दस्य नोह इत्यर्थः। प्रेतैकोद्दिष्टे त्विति। "पितृशब्दं न युञ्जीत" इत्याश्वलायनेन पितृशब्दस्य निवर्तितत्वात्। पितृशब्दस्येति शेषः। तस्योह इति पदेन सम्बन्धः। उभयत्राप्येकवचनोहमाह–एकवादिति। तथाच पुराणैकोद्दिष्टे ऋक्षु अनृक्षु चोह इत्यर्थः। *अत्र प्रेतैकोद्दिष्टे। *बहुवचनस्यापीति। अपिना पितृशब्दसमुच्चयः। तथाच "एतद्वः पितरः" इत्यादौ "एतत्ते प्रेत" इत्याद्यप्यूह इत्यर्थः। *वचनाद् विष्णुवचनादाश्वलायनवचनाच्चेत्यर्थः।

वाजपेयिनस्तु यथाशौचापगमे सुस्नात इत्याद्यभिधाय विष्णुना बहुवचनान्तपितृशब्दोपेतेषु मन्त्रेषु एकवचनोह उक्तः। स ऐकादशाहिके सपिण्डनप्रागभाविनि वा एकोद्दिष्टे न प्रवर्तेत तदानीमुक्तपितृत्वासत्त्वेन तद्वाचिपितृपदोपेतमन्त्राणां तत्राप्रवृत्तेः। नच मन्त्रे पितृशब्दो जनकपरः, बहुत्वान्वयार्थं पितामहादौ लक्षणापत्तेः। एकेन पितृत्वेन (१)सर्वेषु मुख्यत्वोपपत्तौ तस्या अन्याय्यत्वात्। नच शुन्धनमन्त्रे जनकवाचिपितृशब्दोत्तरबहुवचनेन ऊहो विधीयतामिति वाच्यम्। प्रेतशब्देनैवोद्देशविधानात्। "पितृशब्दं न युञ्जीत" इत्याश्वलायनेन पितृशब्दमुखेन तद्वन्मन्त्रनिषेधाच्च। तस्मात्पुराणैकोद्दिष्ट एवोहः, एकोद्दिष्टप्रकरणपाठेऽपि विष्णुना पुनरेकोद्दिष्टशब्दाभिधानात्। ऊहश्च "नमो वः पितरः" इत्यादावेव तत्र सर्वपितृपरपितृशब्दसत्त्वाद्बहुवचनस्य समवेतार्थ-

---

(१) 'सर्वेषु मुख्यत्वेन सर्वेषु मुख्यत्वो' च०।

वक्ष्यामः । शेषाणामिति पितृभ्याद्येकोद्दिष्टे आवाहनादिमन्त्रत्रयं कार्यमिति कल्पतरुः । ऊहयोग्यपितृपदवान् मन्त्र एव तत्र न प्रयोज्यः, नतूहः । नापि पितृपदरहितः प्रयोज्य इति शूलपाणिः । *अर्थान्तरं चोक्तं प्राक् । बह्वृचकारिकाऽपि—

अर्घ्यप्रदानमन्त्रे तु मात्रादिपदमावपेत् ।
शुन्धन्तामिति पित्रादौ मात्रादिपदमावपेत् ॥

मातृश्राद्धे पिण्डदाने *'ये च त्वामत्रानु' इत्यत्र नोह इति वृत्तिकृत् । तथा—

मातुःश्राद्धेऽप्यनूहेन कुर्यात्पिण्डानुमन्त्रणम् ।
दशदानमुपस्थानं तद्वत्कार्यमिति स्थितिः ॥
प्रवाहणमनूहेन तद्वत्प्राशनमिष्यते ॥

तथा—

आयन्तुनस्तिलोऽसीति उशन्तस्त्वेति यानि तु ।
अनूह्यः पितृशब्दोऽत्र पितृसामान्यवाचकः ॥

आपस्तम्बानां तु वक्ष्यते ।

त्वाच्च । नत्वर्घ्यपात्रेति तिलावापमन्त्रे । तत्र प्रत्येकं प्रयोगेन प्रकृतावसमवेतार्थत्वात् । नापि--

एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् ।

इति ब्रह्मपुराणोक्तपक्षेएतद्व इति मन्त्र इत्याहुः ॥

*विशेषम् "शुन्धन्तां पितरः" इत्यादौ 'शुन्धन्तां पितुः पितरः' इत्यादिकम् । कल्पतरुशूलपाण्योर्व्याख्याने प्रमाणाभावमालोच्याह—*अर्थान्तरमिति । भोजस्त्रीणां शूद्रापुत्रस्य चैकोद्दिष्टममन्त्रकं "स्त्रीणाममन्त्रकं श्राद्धम्" तथा 'शूद्रस्य च' इत्यादिप्रागुक्तमारीचादित्यर्थः । *ये चेति । याश्च ताभ्यश्चेति नोहः ये च तेभ्यश्चेति पुंल्लिङ्गशेषात् ।

हेमाद्रौ मार्कण्डेयः—

स्नातः *स्नातान् समाहूतान् *स्वागतेनार्चयेत् पृथक् ।

कलिकायां नारदीये—

प्रायश्चित्तविशुद्धात्मा लब्ध्वानुज्ञां प्रगृह्य च ।
दद्याद्वै ब्रह्मदण्डार्थं हिरण्यं कुशमेव च ॥

तत्रैव सङ्ग्रहे—

तिथिवारादिकं ज्ञात्वा सङ्कल्प्य च यथाविधि ।
प्राचीनावीतिना कार्यं सर्वं सङ्कल्पनादिकम् ॥
सम्बन्धं प्रथमं ब्रूयान्नामगोत्रे तथैवच ।
वस्वादिरूपतां चापि स्वपितॄणामनुक्रमात् ॥

चन्द्रोदये नारदीये—

श्राद्धार्थं समनुप्राप्तान् विप्रान् भूयो निमन्त्रयेत् ।

आपस्तम्बस्तु 'पूर्वेद्युर्निमन्त्रणं, परेद्युर्द्वितीयं, तृतीयमामन्त्रणम्' इत्याह । यूयं मया निमन्त्रणीया इति निवेदनरूपं आद्यम् । तद्विधिमाह शौनकः—

गृहीत्वामुकसंज्ञस्यामुकगोत्रस्य चामुके ।
श्राद्धे तु वैश्वदेवार्थं करणीयः क्षणस्त्वया ॥
इत्येवं श्राद्धकृद् ब्रूयादोंतथेति वदेत्तु सः ।
श्राद्धस्य कर्ता स ब्रूयात्तं प्राप्नोतु भवानिति ॥
स वदेत् प्राप्नवानीति इतरस्तं प्रति द्विजः ॥

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषामिति लेपभाक्त्वस्य स्त्रीपुंससाधारणत्वाद्दासीदासरूपार्थाविसंवादाच्च ।

*स्नातानिति नियमः केनचित्कारणेनास्नातान्न भोजयेदित्यर्थः । *स्वागतेनेति ।

ततः स्नात्वा निवृत्तो यः प्रत्युत्थाय कृताञ्जलिः ।

देवौ पार्वणे पुरूरवार्द्रवौ वाच्यौ ।

पित्रादेरप्यनेनैव वृणीत विधिना द्विजान् ।

ततः कर्ता बह्वृचोऽनाहिताग्निः पिण्डपितृयज्ञं परिस्तरणादीध्माधानान्तं कुर्यात् । 'अर्धाधानिनोऽप्येवम्' इति प्रयोगपारिजाते परिशिष्टे च । भाष्यकारमते आग्निकेऽप्येवम् । वृत्तिकारमते नेदम् ।

हेमाद्रौ शम्भुः—

*संमार्जितोपलिप्ते तु द्वारि कुर्वीत मण्डले ।
उदक्प्लवमु*दीच्यं स्याद्द*क्षिणं दक्षिणाप्लवम् ॥

व्याघ्रः—

उत्तरेऽक्षतसंयुक्तान् पूर्वाग्रान् विन्यसेत् कुशान् ।
दक्षिणे दक्षिणाग्रांस्तु सतिलान् विन्यसेत् कुशान् ॥

तत्रैव बौधायनः—

चतुरस्रं त्रिकोणं च वर्तुलं चार्धचन्द्रकम् ।
कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम् ॥

तत्रैव लौगाक्षिः—

हस्तद्वयमितं कार्यं वैश्वदेविकमण्डलम् ।
दक्षिणे च चतुर्हस्तं पितॄणामङ्घ्रिशोधने ॥

कालिकायां सङ्ग्रहे तु—

प्रादेशमात्रं देवानां चतुरस्रं तु मण्डलम् ।

पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रमम् ॥

इति यमः कृताञ्जलिः स्वागतमित्युक्त्वाऽध्वकृतोपहतिशुध्यर्थं पादप्रक्षालनार्थमाचमनीयं चोदकं क्रमेण प्रयच्छेदित्यर्थः । *संमार्जितेति । उपलेपो गोमूत्रयुक्तगोमयेन कार्यः—

भवनस्याग्रतो भुवि ।
गोमयेनानुलिप्तायां गोमूत्रेण तु मण्डले ॥

इति मात्स्यात् । *उदीच्यं दैवम् । *दक्षिणं पित्र्यम् ।

त्यक्त्वा षडङ्गुलं तस्माद्दक्षिणे वर्तुलं तथा ॥

इत्युक्तम् । यत्तु स्मृत्यन्तरे—

गर्तः पञ्चाङ्गुलो विप्रे जानुमात्रो महीभुजि ।
प्रादेशमात्रो वैश्ये च साधिकः स तु शूद्रके ॥
तिर्यगूर्ध्वप्रमाणेन व्याख्यातो दैवपित्र्ययोः ।
चतुरस्रं वर्तुलं च कथितं गर्तलक्षणम् ॥
पादप्रक्षालनं प्रोक्तमुपवेश्यासने द्विजान् ।
तिष्ठंश्चेत् क्षालनं कुर्यान्निराशाः पितरो गताः ॥

इति, तत्समूलत्वे मण्डलाग्रे पृथक् ज्ञेयम् । तत्र गोमये हेमाद्रौ भृगुः—

अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः ।
आर्ताया नवसूताया न गोर्गोमयमाहरेत् ॥

मात्स्ये—

अक्षताभिः सपुष्पाभिस्तदभ्यर्चा*पसव्यवत् ।
विप्राणां क्षालयेत्पादावभिवन्द्य पुनः पुनः ॥
प्रत्यङ्मुखस्थितः कुर्याद्विप्रपादाभिषेचनम् ॥

तत्रैव भविष्ये--

प्रक्षालयेद्विप्रपादान् शन्नोदे(१)वीरिति तृचा ।

पृथ्वीचन्द्रोदये वृद्धवसिष्ठः—

न कुशग्रन्थिहस्तस्तु पाद्यं दद्याद्विचक्षणः ।

कलिकायां सङ्ग्रहे—

ततः प्रक्षालयेत्पादौ भार्यास्त्रावितवारिणा ।

तथा--

श्राद्धकाले यदा *पत्नी वामे नीरप्रदा भवेत् ।

*अपसव्यवदिति । पूर्वमुदीच्यं पश्चाद्दक्षिणं तन्मण्डलमित्यर्थः ।

*पत्नी वामे इति ।

---

(१) 'देवीरित्यृचा' ग० ।

आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥

तत्रैव—

नाधः प्रक्षालयेत्पादौ कर्ता पित्रादिकर्मसु ॥

पाद्यानन्तरमर्घ्यमपि दद्यादिति हेमाद्रिः। तत्रैव लौगाक्षिः—

मण्डलादुत्तरे देशे दद्यादाचमनीयकम् ।

तत्रैव--

विधाय क्षालनं तेषां द्विराचमनमिष्यते ।
स्वयं चापि द्विराचामेद्विधिज्ञः श्रद्धयान्वितः ॥

हेमाद्रौ नारदीये--

यत्राचमनवारीणि पादप्रक्षालनोदकैः ।
सङ्गच्छन्ते बुधाः श्राद्धमासुरं तत्प्रचक्षते ॥

हे(१)माद्रौ व्यासः--

*सव्येनैवासनं धृत्वा दक्षिणे दक्षिणं करम् ।
व्याहृतीभिः समस्ताभिरासनेषूपवेशयेत् ॥
समाध्वमिति चैवोक्त्वा दक्षिणं जानु संस्पृशन् ।
आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि ॥

सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता ।
विप्रपादक्षालने च अभिषेके च वामतः ॥

इति वचनापवादः ।

*सव्येनैवेति ।

दर्भपाणिर्द्विराचम्य लघुवासा जितेन्द्रियः ।
परिश्रिते शुचौ देशे गोमयेनोपलेपिते ॥
दक्षिणाप्रवणे सम्यगाचान्तान् प्रयतान् शुचीन् ।
आसनेषु विविक्तेषु सदर्भेषूपवेशयेत् ॥

---

(१) 'हेमाद्रौ' नास्ति क०छ० ।

(हे(१)माद्रौ शातातपः——

द्वौ दैवेऽथर्वणौ विप्रौ प्राङ्मुखावुपवेशयेत् ।
पित्र्ये तूदङ्मुखांस्त्रींश्च बह्वृचाध्वर्युसामगान्) ॥

याज्ञवल्क्यः——

द्वौ दैवे प्राक्त्रयः पित्र्ये उदगेकैकमेव वा ।

यत्तु हेमाद्रौ हारीतः—'दक्षिणाग्रदर्भेषु प्राङ्मुखान् ब्राह्मणान् भोजयेत् उदङ्मुखानित्येके' इति तन्मैत्रायणीयविषयम् । 'प्राङ्मुखान् भोजयेदुदङ्मुखानित्येके' इति तत्परिशिष्टात् विकल्प इति हेमाद्रिः । माधवीये यमः-

भिक्षुको ब्रह्मचारी वा भोजनार्थमुपस्थितः ।
उपविष्टेष्वनुप्राप्तः *कामं तमपि भोजयेत् ॥

कौर्मे—

अतिथिर्यस्य नाश्नाति न तच्छ्राद्धं प्रचक्षते ।

विप्रनियमा माधवीये—

पवित्रपाणयः सर्वे ते च मौनव्रतान्विताः ।
उच्छिष्टोच्छिष्टसंस्पर्शं वर्जयन्तः परस्परम् ॥

तत्रासनानि । पृथ्वीचन्द्रोदये यमः—

आसनं *कुतपं दद्यादितरद्वा पवित्रकम् ।

हेमाद्रौ चमत्कारखण्डे——

पितॄणां घटितं हैमं राजतं वापि चासनम् ।
येन ताम्रमयं दत्तमासनं पितृकर्मणि ॥
स वै दिव्यासनारूढो नहि प्रच्यवते दिवः ॥

हेमाद्रौ नागरखण्डे——

अयःशङ्कुमयं पीठं प्रदेयं नोपवेशने ।

*काममिति । तदनिच्छायां न दोषः । *कुतपं नेपालकम्ब-

---

(१) कंसान्तर्गतं नास्ति क० छ० ।

कालिकायां सङ्ग्रहे--

क्षौमं दुकूलं नैपालमाविकं दारुजं तथा ।
तार्णं पार्णं *बृसीं चैव विष्टरादि च विन्यसेत् ॥
अग्निदग्धान्यायसानि भग्नानि च विवर्जयेत् ॥

हेमाद्रौ छागलेयः--

पश्चाद्भागादुपक्रम्य *प्रा(१)चां पङ्क्तिर्यथा भवेत् ।
दक्षिणासंस्थिता ह्येषा पितॄणां श्राद्धकर्मणि ॥

पुलस्त्यः--

श्रीपर्णी वा(२)रुणी क्षीरी जम्बुकाम्रकदम्बकम् ।
सप्तमं वा(३)कुलं पीठं पितॄणां दत्तमक्षयम् ॥

सङ्ग्रहे--

शमी च काश्मरी शल्लुः कदम्बो *वार(४)णस्तथा ।
पञ्चासनानि शस्तानि श्राद्धे देवार्चने तथा ॥

(का(५)रिका--

द्वौ दैवे प्राङ्मुखौ पित्र्ये त्रीन्विप्रानुदगाननान् ।

पैठीनसिः--

कुतपः श्राद्धवेलायां श्रोत्रियो यदि दृश्यते ।)

आश्वलायनः--

नीवीवासोदशान्तेन स्वरक्षार्थं प्रबन्धयेत् ।

वृद्धयाज्ञवल्क्यस्तु--

दक्षिणे कटिदेशे तु तिलैः सह कुशत्रयम् ।

यत्तु कातीयम्--

नीवी कार्या दशागुप्तिर्वामकुक्षौ कुशैः सह । इति ।

लः । *बृसी आसनविशेषः । *प्राचां प्राङ्मुखानाम् । *वारणः

---

(१) 'प्राच्याम्' ग० क० ।   (२) 'वारिणी' छ० ।
(३) 'वालुकम्' क० ।   (४) 'वारुणः' ग० ।
(५) कंसान्तर्गतं नास्ति' छ० ।

तद् वृद्धिश्राद्धे,

पितॄणां दक्षिणे पार्श्वे विपरीता तु दैविके।

इति स्मृत्यन्तरात्। वामे दक्षिणे वेत्याचाराद्व्यवस्थेति मदनपारिजाते।

आचार्यः—

प्राणायामत्रयं कृत्वा गायत्रीस्मरणं तथा।
*श्राद्धं कर्तास्मीति वदेद्विप्रैर्वाच्यं कुरुष्व च॥

ब्राह्मे—

*ततस्तिलान् गृहे तस्मिन् विकिरेच्चाप्रदक्षिणम्।
श्रद्धया परया युक्तो जपेदपहता इति॥

स्मृत्यर्थसारे—‘अपहता इति तिलान्विकीर्य उदीरतामित्यृचा प्रोक्षेत।’ पराशरः—

राजादनः। उपवेशनोत्तरं विप्रधर्मानाह मनुः—

आमन्त्रितो जपेद्दोग्ध्रीमासीनस्तु निषङ्गिणः।
भुक्त्वा तु वामदेव्यं च श्राद्धभोक्ता न दुष्यति॥

दोग्ध्रीम् “उपह्वये सुदुघाम्” इति, “हिं कृण्वतीम्” इति वा। साप्येका का चित् एकवचनात्। निषङ्गिणस्तु त्रयः “इन्द्रद्रुह्याम” इति “सइषुहस्तैः” “सनिषंगिभिः” इति च ऋक्। “नमो वञ्चते” इत्यादियजुः।

आमन्त्रितो जपेद्दोहान् नियुक्तस्त्वृषभानपि॥
अभीषङ्गांश्च तत्रैव जप्त्वाऽश्नीयाद्द्विजोत्तमः।

दोहऋषभाभीषङ्गानि सामानि। *श्राद्धं कर्ताऽस्मीति।

उभौ हस्तौ समौ कृत्वा जानुभ्यामन्तरा स्थितौ॥
सम्प्रयतश्चोपविष्टान् सर्वान् पृच्छेद्द्विजोत्तमान्।

इति वाक्ये श्राद्धं करिष्ये इति पृच्छेदिति श्राद्धिकोक्त्या कर्तेति न लुट् किन्तु तृच्। *तत इति प्रवृत्तिराज्ञादानम्। ततोऽपह-

तद्विष्णोरिति मन्त्रेण गायत्र्या च प्रयत्नतः ।
प्रोक्षयेदन्नजातं तु शूद्रदृष्ट्यादिशुद्धये ॥

हेमाद्रौ ब्रह्माण्डे—

श्राद्धभूमौ गयां ध्या(१)त्वा (ध्या(२)त्वा देवं गदाधरम् ।
वस्वादींश्च पितॄन् ध्यात्वा ततः श्राद्धं प्रवर्तते ॥)
देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वाहायै स्वधायै नित्यमेव नमोनमः ॥
*आदिमध्यावसानेषु त्रिरावृत्तं जपेद् बुधः ।
पितरः क्षिप्रमायान्ति राक्षसाः प्रद्रवन्ति च ॥

तत्रैव स्कान्दे—

तिला रक्ष(३)न्त्वसुरान् दर्भा रक्ष(३)न्तु राक्षसान् ।
पङ्क्तिं वै श्रोत्रियो रक्षेदतिथिः सर्वरक्षकः ॥

वसिष्ठः—'शुद्धवतीभिः कूष्माण्डीभिः पावमानीभिश्च पाकादि प्रोक्षयेत् ॥' इति ।

अथ देवार्चा । तत्र प्रत्युपचारमाद्यन्तयोरपो दद्यादित्युक्तं वृत्तौ स्मृत्यर्थसारे च । हेमाद्रौ ब्राह्मे--

*आसनेष्वासनं दद्याद्वामे वा दक्षिणेऽपि वा ।
पितृकर्मणि वामे च दैवे दद्यात्तु दक्षिणे ॥

ता इति तिलाविकिरणानन्तरं देवताभ्य इति जप इत्येकं मतम् । जपानन्तरं तिलविकिरणमित्यपरम् । *आदिमध्येति । "आद्येऽवसाने श्राद्धस्य' इति माधवपाठः *आसनेष्विति । दर्भासनदानं च विप्रहस्ते जलदानोतरमाह योगीश्वरः—

पाणिप्रक्षालनं दत्त्वा विष्टरार्थं कुशानपि ।
प्रदद्यादासने दर्भान्न तु पाणौ कदाचन ॥
देवानां सयवान् दर्भान् पितॄणां च तिलैः सह ।

---

(१) 'ध्यायेत्' ग० (२) कंसान्तर्गतं नास्ति छ० ।
(३) 'रक्षन्ति' क० छ०

प्रचेताः--

आसनेष्वासनं दद्यान्नतु पाणौ कदाचन ।
धर्मोसीत्यथ मन्त्रेण गृह्णीयुस्ते तु तान् कुशान् ॥

'धर्मोऽसि विशिराजा प्रतिष्ठितः' इति मन्त्रः ।

गालवः--

*दर्भानादाय हस्ताभ्यां गृहीत्वा दक्षिणे करे ।
दैवे *क्षणः क्रियतां तु निरङ्गुष्ठं करं ततः ॥
ओंतथेति द्विजा ब्रूयुस्ते प्राप्नोतु भवानिति ।
कर्ता ब्रूयात्ततो विप्रः प्राप्नवानीति वै वदेत् ॥

पृथ्वीचन्द्रोदये बृहन्नारदीये--

यवैर्दर्भैश्च विश्वेषां देवानामिदमासनम् ।
दत्त्वेति भूयो दद्याद्वै दैवे क्षण इति क्षणम् ॥

*'तच्च षष्ठ्या चतुर्थ्या वा कार्यम्' इति स एव । 'ततोऽर्घ्यं कल्पयेत्' इति मन्वादयः । शौनकजयन्ताभ्यामर्घ्यरहितस्य देवार्चनस्योक्तेः—'आश्वलायनानां दैवेऽर्घ्यदानं न' इति बोपदेवः । तन्न, परिशिष्टप्रयोग-

---

पुराणे—

आसने चासनं दद्याद्वामे वा दक्षिणेऽपि वा ।
पितृकर्मणि वामे वै दैवे कर्मणि दक्षिणे ॥

ततः सधर्मकं द्वितीयं निमन्त्रणमाह--*दर्भानिति ।

एतच्च पुनरपो दत्त्वा, "ततः पुनरपो दत्त्वा निमन्त्रयेत्" इति सङ्ग्रहोक्तेः । निरङ्गुष्ठं गृहीत्वा च,

निरङ्गुष्ठं गृहीत्वा तु विश्वान् देवान् समाह्वयेत् ।

इति पुराणात् । समाह्वानं निमन्त्रणम् । *क्षणः व्यापारान्तररहितस्थितिः ।

निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः । इत्यमरः ।

पारिजातविरोधात । वृद्धिश्राद्धे तु दैवेऽप्यर्घ्यं दद्यात्,

देवेभ्योऽपि पृथग्दद्यादिहार्घ्यं श्रुतिचोदनात् ।

इति शौनकोक्तेः ॥

अथार्घ्यपात्रम् । पृथ्वीचन्द्रोदये मात्स्यपाद्मयोः--

पात्रं वनस्पतिमयं तथा पर्णमयं पुनः ।
जलजं वापि कुर्वीत तथा सागरसंभवम् ॥

ब्राह्मे--

सौवर्णताम्ररौप्याश्मस्फाटिकं शङ्खशुक्तयः ।
भिन्नान्यपि हि योज्यानि पात्राणि पितृकर्मणि ॥

हेमाद्रौ प्रजापतिः--

सौवर्णं राजतं ताम्रं खा(१)ड्गं मणिमयं तथा ।
यज्ञियं चमसं वापि अर्घ्यार्थं पूरयेद् बुधः ॥

अत्र वि(२)प्रैकत्वचतुष्ट्वादावर्घ्यपात्रे द्वे एव । मानवसूत्रे तु-'द्वे वैश्वदेविके त्रीणि पित्र्ये एकैकमुभयत्र वा' इत्युक्तम् । तदेकविप्रपरं, पात्रालाभपरं वे(३)ति हेमाद्रिः । मदनरत्ने तु दैवे (४)एकं पात्रमुक्तम् । पृथ्वीचन्द्रोदयोपि--

त्रीणि पैतृकपात्राणि द्वे द्वे वै वैश्वदेविके ।

इति बृहत्पराशरोक्तेर्द्वे एवेत्याह । बह्वृचानां तु *तच्च आसनं च । *विप्रद्वित्वेऽपीति । वस्तुतस्तु देवताभेदात् पात्रभेदो न ब्राह्मणभेदात् । देवेऽपि पुरूरवार्द्रवाद्योर्देवतयोर्भेद एव । अत एव—

विश्वान् देवान् यवैः पुष्पैरभ्यर्च्यर्चयन्त्यभिपूर्वकम् ।
पूरयेत् पात्रयुग्मं तु पवित्रेस्थ इति त्वृचा ॥

---

(१) 'खड्गम' क० ग० (२) 'विप्रैकत्वद्विचतुष्ट्वादौ' ग०
(३) 'च' ग० (४) 'एकपात्रम्' क० ग०

दैवे *विप्रद्वित्वेप्येकमर्घ्यपात्रमर्धशो दद्यादित्युक्तं परिशिष्टे प्रयोगपारिजाते च। कालिकायां हारीतः--

दत्तमक्षय्यतां याति ख(१)ड्गेनार्घ्यं तु यत्कृतम्।

वृद्धमनुः--

*मृन्मयं दारुजं पात्रमयःपात्रं च यद्भवेत्।
*राजतं दैविके कार्ये शिलापात्रं च वर्जयेत्॥

पुराणसमुच्चये—

मृत्स्नाभवं तथा *कांस्यमारक्तं ज(२)तुसंभवम्।
त्रपुसीसलोहभवं सदा पा(३)त्रं विवर्जयेत्॥

तत्रैव—

अष्टाङ्गुलं भवेत्पात्रं पितृणां राजतं शुभम्।
दशाङ्गुलं तु देवानां सौवर्णं शक्तितः कृतम्॥
स्थापयेदर्घ्यपात्रे द्वे न्युब्जे तत्र कुशोपरि।
*द्वे द्वे पवित्रे विधिवत्पात्रयोश्चोपरि क्षिपेत्॥

इति वचनं "स्थापयेदर्घ्यपात्रे द्वे" इत्यग्रिमं च सङ्गच्छते। *मृन्मयमिति अपक्वमृन्मयनिषेध इत्येके।

खादिरौदुम्बराण्यर्घ्यपात्राणि श्राद्धकर्मणि।
अप्यश्ममृन्मयानि स्युरपि पर्णपुटास्तथा॥

इति बैजवापोक्तेरन्यलाभे निषेधः। अधिकमग्रे। *राजतमिति।

शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभम्।
अमङ्गलं तद्यत्नेन देवकार्येषु वर्जयेत्॥

इति सोपपत्तिकोऽपि तन्निषेधः। *कांस्यमिति। कांस्यपर्णराजतान्यर्घ्योदकधारणानीति हारीतं तु पित्र्यपरं। *द्वे द्वे इति

---

(१) 'खाड्गेन' ग० (२) 'जन्तुसम्भवम्' क.
(३) 'पात्रं च वर्जं' ग०

यज्ञपार्श्वः--

*पवित्रेस्थेति मन्त्रेण पवित्रे छेदयेत्तु ते ।
*ओषधीमन्तरे कृत्वा अङ्गुष्ठाङ्गुलिपर्वणोः ॥
(१)स्फयेन काष्ठेन लोहेन न मृन्मयनखादिभिः ॥

वसिष्ठः--

तूष्णीं प्रोक्ष्याम्भसा पात्रे कुर्यादूर्ध्वबिले ततः ।
पूरयेत्पात्रयुग्मं तु कृत्वोपरि पवित्रके ॥

वृद्धपराशरः--

पात्रद्वयमथार्घ्यार्थं तैजसं चैकवस्तुनः ।
प्राङ्मुखोऽमरतीर्थेन शन्नोदेव्योदकं क्षिपेत् ॥
यवोऽसीति यवांस्तत्र तूष्णीं पुष्पाणि चन्दनम् ॥

मानवसूत्रे—'सुमनसः प्रक्षिप्योत्पूय यवान् प्र(२)क्षिपेत्' इति । यवोऽसीति मन्त्रः । पाद्मे--

यवोसि धान्य(३)राजो वा वारुणो मधुमिश्रितः ।
निर्णोदः सर्वपापानां पवित्रमृषिभिः (४)स्मृतम् ॥

'राजो वा वारुणो मधुसंयुतः' इति (५)परिशिष्टपाठः । गोभिलेन तु-'यवोसि सोमदैवत्यः' इति तिलमन्त्रोऽत्र स्वाहा(६)युक्त (७)उक्तः । हेमाद्रौ यमः —

पात्रभेदेन पवित्रयोर्भेदार्थम् । *पवित्रेस्थेति । पवित्रे स्थो वैष्णुवी वायुर्वा मनसा पुनात्विति मन्त्रः ।

अन्तर्गर्भे कुशाच्छिन्ने कौशे प्रादेशसंमिते ॥

इति उत्तरार्धम् । कुशमन्तरा कृत्वा च्छिन्ने कुशाच्छिन्ने । अत एवाह-

---

(१) 'स्फेन' क० छ०
(२) 'प्रक्षिप्य' ग० छ० (३) 'धान्यराजोऽसि' छ० ।
(४) 'स्मृतः' ग० । (५) 'परिशिष्टपाठः' ग० ।
(६) 'स्वाहान्तः' क० । (७) 'उक्तः' नास्ति छ० ।

यवहस्तस्ततो देवान् विज्ञाप्यावाहनं प्रति ।
आवाहयेदनुज्ञातो विश्वेदेवास इत्यृचा ॥

वृद्धपराशरः—

ततः सव्यकरं न्यस्य विप्रदक्षिणजानुनि ।
देवानावाहयिष्येऽहमिति वाचमुदीरयेत् ॥
आवाहयेत्यनुज्ञातो विश्वेदेवास आगता ।
विश्वेदेवाः शृणुतेममिति मन्त्रद्वयं पठेत् ॥

श्राद्धविशेषे विश्वेदेवानामज्ञाने हेमाद्रौ बृहस्पतिः—

उत्पत्तिं नाम चैतेषां न विदुर्ये द्विजातयः ।
अयमुच्चारणीयस्तैर्मन्त्रः श्रद्धासमन्वितैः ॥
आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ।
ये अत्र विहिताः श्राद्धे सावधाना भवन्तु ते ॥

इदं चावाहनमर्घ्यपात्रासादनात्प्राक् हेमाद्रिणोक्तम् । तत्र कातीयैः *प्राक्कार्यम्, तथैव तत्सूत्रात् । अन्यैस्तदुत्तरम् । पृथ्वीचन्द्रोदये शङ्खः—

सयवं पुष्पमादाय चरणादिशिरोन्तकम् ।
अर्चतेत्यर्चनं कुर्यादन्तरे चोदकं तथा ॥

पित्र्ये तु मूर्धादिपादान्तम्,

पादप्रभृति मूर्धान्तं दैविके पूजनं भवेत् ।
शिरःप्रभृति पादान्तं नमो व इति पैतृके ॥

---

*ओषधीमिति। "तृणं काष्ठं वाऽन्तर्धाय" इत्यापस्तम्बः *प्रागिति ।

विश्वान् देवान् यवैः पुष्पैरभ्यर्च्यासनपूर्वकम् ।
पूरयेत्पात्रयुग्मं तु स्थाप्य दर्भपवित्रके ॥

इति मदनरत्ने (१)प्रचेतोक्तेः । कालिकायां सङ्ग्रहे--

तिष्ठन् कृताञ्जलिर्भूत्वा पठे(२)न्मन्त्रौ समाहितः ।
विश्वेदेवाः शृणुत इत्यागच्छन्त्वपरं ततः ॥

हेमाद्रौ जातूकर्ण्यः--

ततोऽर्घ्यपात्रसंपत्तिं वाचयित्वा द्विजोत्तमान् ।
तदग्रे चार्घ्यपात्रं तु स्वाहार्घ्या इति विन्यसेत् ॥

गार्ग्यः--

दत्त्वा हस्ते पवित्रं च कृत्वा पूजां च पादतः ।
या दिव्या इति मन्त्रेण *हस्तेष्वर्घ्यं विनिक्षिपेत् ॥

सङ्ग्रहे--

विश्वेदेवा इदं वोऽर्घ्यमिति दानं समादिशेत् ।

तदन्ते 'स्वाहा नमः' इति वाच्यम्,

या दिव्या इति मन्त्रेण स्वाहाकारं नमोन्तकम् ।

इति हेमाद्रौ नागरखण्डात् । आथर्वणसूत्रे तु-'पाद्यमर्घ्यमाचमनीयमिति द्विजकरे निनयेत्' इत्य*स्यैव त्रयमुक्तम् । गभस्तिः--

अर्घ्यं पिण्डप्रदानं च स्वस्त्यक्षय्ये तथैव च ।
गन्धपुष्पादिकं सर्वं हस्तेनैव तु दापयेत् ॥

प्रतिविप्रं या दिव्येत्यावृत्तिः बह्वृचानां त्व*नेन दत्तार्घ्यानुमन्त्रणम् । ततः पात्रं 'देवेभ्यः स्थानमसि' इति न्युब्जमुत्तानं वा कार्यमिति (३)गारुडे उक्तम् । एतदापस्तम्बानां नियतमन्येषां न ।

इति मात्स्यात् । *हस्तेष्विति बहुवचनमतन्त्रम्, एकार्घ्यस्यानेकहस्तेषु दानासम्भवात् । *अस्यैव द्विजकरस्यैव *अनेनेति ।

---

(१) 'प्रचेतसोक्तेः' ग० । (२) 'मन्त्रम्' ग० ।
(३) 'गौडे' छ० ।

हेमाद्रौ विष्णुधर्मे--

(१)गन्धैः पुष्पैश्च धूपैश्च वस्त्रैश्चाप्यथ भूषणैः ।
अर्चयेद्ब्राह्मणान् शक्त्या श्रद्दधानः समाहितः ॥

पृथ्वीचन्द्रोदये मार्कण्डेयः--

चन्दनागरुकर्पूरकुङ्कुमानि प्रदापयेत् ।

विष्णुः 'चन्दनकुङ्कुमकर्पूरागरुपद्मकान्यनुलेपनाय' इति । व्यासः--

अ*पवित्र(२)करो गन्धैर्गन्धद्वारेति पूजयेत् ।

कलिकायां स्मृतिः--

गन्धद्वारेति वै गन्धमा*यने ते च पुष्पकम् ।
धूरसीत्यमुना धूपमुद्दीप्यस्वेति दीपकम् ॥
युवं वस्त्राणि मन्त्रेण वस्त्रं दद्यात्प्रयत्नतः ।
आसने स्वासनं ब्रूयादर्घ्येऽस्त्वर्घ्यं द्विजोत्तमः ॥

'प्रसृष्टा अनुमन्त्रयेत' इत्याद्यग्रे स्पष्टम् । *अपवित्रकर इति । विप्रहस्ते "गन्धद्वारा"इति गन्धं दत्त्वा विगतपवित्र एव तैर्गन्धैर्भालगात्रकुक्षिवक्षःकक्षाद्यङ्गेषु लेपनरूपां पूजां कुर्यादित्यर्थः । द्विजैः स्वयं प्रतिगृहीतगन्धविलेपने तु नैतत्, "अपवित्रकरः पूजयेत्" इत्युक्तेः । वृद्धमनुः—

उपवीतित्वमुत्सृज्य कारयेन्नानुलेपनम् ।

शातातपः--

कट्यां त्रिपुष्करं कृत्वा गन्धैर्यस्तु विलिम्पति ।
पितृयज्ञे भवेच्छिद्रं निराशैः पितृभिर्गतैः ॥

त्रिपुष्करम् उपवीतम् । देवलः--

यज्ञोपवीतं विप्राणां स्कंधान्नैवावतारयेत् ।
गन्धादिपूजासिद्ध्यर्थं दैवे पित्र्ये च कर्मणि ॥

*आयने ते चेति । "पुष्पवतीरिति पुष्पम्" इति वि-

---

(१) 'गन्धपुष्पैश्च' छ० । (२) 'करा' छ० ।

(१)सुगन्धिश्च सुपुष्पाणि सुमाल्यानि सुधूपकः ।
सुज्योतिश्चैव दीपे तु स्वाच्छादनमिति क्रमः ॥

विप्राणां गन्धेन वर्तुलं त्रिपुण्ड्रं वा न कार्यम् । हेमाद्रौ देवलः—

ललाटे पुण्ड्रकं दृष्ट्वा स्कन्धे मालां तथैव च ।
निराशाः पितरो यान्ति दृष्ट्वा च वृषलीपतिम् ॥

पुण्ड्रकं वर्तुलमित्यपरार्के । मदनरत्ने च-'पुण्ड्रं त्रिपुण्ड्रं वर्तुलमर्ध(२)चन्द्रं च',

ऊर्ध्वं च तिलकं कुर्यान्न कुर्याद्वै त्रिपुण्ड्रकम् ।
ऊर्ध्वं च तिलकं कुर्याद्दैवे पित्र्ये च कर्माणि ॥
निराशाः पितरो यान्ति दृष्ट्वा चैव त्रिपुण्ड्रकम् ॥

इति वृद्धपराशरोक्तेः । तिर्यग्लेपो भवत्येव,

वर्जयेत्तिलकं भाले श्राद्धकाले च सर्वदा ।
तिर्यगप्यूर्ध्वपुण्ड्रं वा धारयेतु प्रयत्नतः ॥

इति व्यासोक्तेरिति पृथ्वीचन्द्रः । यत्तु (३)नारदीये—

ऊर्ध्वपुण्ड्रं च तुलसीं श्राद्धे नेच्छन्ति केचन । इति ।

तत् कर्तृपरम् । हेमाद्रौ ब्राह्मे--

पूतिकं मृगनाभिं च (४)रोचनं रक्तचन्दनम् ।
कालेयकं तूग्रगन्धं तुरुष्कं चापि वर्जयेत ॥

कस्तूर्यां विकल्प इति हेमाद्रिः । वृद्धशातातपः—

पवित्रं तु करे कृत्वा यः समालभते द्विजान् ।

णुः । पुष्पवतीरिति मध्यप्रतीको मन्त्रः । यथा ओषधीः प्रतिमोदध्वमेनं पुष्पवतीः सुपिप्पलाः अयं वो गर्भ ऋत्वियः प्रत्नः स-

---

(१) 'सुगन्धश्च' क० छ० ।

(२) 'अर्धचन्द्रं । तिर्यग्लोपो भवत्येवेति पृथ्वीचन्द्रः । यत्तु बृहन्नारदीये-ऊर्ध्वपुण्ड्रं' छ.

(३) 'बृहन्नारदीये' क. (४) 'रोचना' क. छ.

राक्षसानां भवेच्छ्राद्धं निराशैः पितृभिर्गतैः ॥

पुष्पं तु ब्राह्मे--

(१)जातीचम्पकलोध्राश्च मल्लिका (२)बाणबर्बरी ।
चूताशोका*टरूषं च (३)तुलसी शतपत्रकम् ॥
कुब्जकं तगरं चैव भृङ्गमारण्यकेतकी ।
यूथिकामतिमुक्तं च श्राद्धे योग्यानि भो द्विजाः ॥
कमलं कुमुदं पद्मं पुण्डरीकं च यत्नतः ।
इन्दीवरं कोकनदं कह्लारं च निवेदयेत् ॥

हेमाद्रौ वायुभविष्ययोः—

सुकुमारैः किसलयैर्यवदूर्वाङ्कुरैरपि ।
सम्पूजनीयाः पितरः श्रेयस्कामेन सर्वदा ॥

स्कान्दे—

(४)जातिश्च सर्वा दातव्या मल्लिका श्वेतयूथिका ।
जलोद्भवानि सर्वाणि कुसुमानि च चम्पकम् ॥

तत्रैव वृद्धमनुः--

न *नियुक्तः (५)शिखावर्ज्यं माल्यं शिरसि धारयेत् ।

वर्ज्यानि पृथ्वीचन्द्रोदये भविष्ये--

केतकीं तुलसीपत्रं बिल्वपत्रं च वर्जयेत् ।
द्रोणं च करवीरं च धत्तूरं किंशुकं तथा ॥

माधवीये स्मृत्यर्थसारे च तुलसी निषिद्धा। तुलसीनिषेधो निर्मूल इति हेमाद्रिः। समूल(६)त्वेऽपि

धस्थमासदादिति । *आटरूषेति । "पित्र्ये च पद्माबिल्वार्कधत्तूरपारिभद्राटरूषका (७)न देयाः पितृकार्येषु" इति मात्स्यो निषेधः । पारिभद्रो मन्दारः । आटरूषो वासा । *नियुक्तः श्राद्धे निमन्त्रितः ।

---

(१) 'जातिचम्पक' क. छ. (२) 'बाणचर्चरी' क. छ.
(३) 'तुलसीम' क छ. (४) 'जात्यश्च' छ.
(५) 'शिखावर्जम' छ. (६) 'अपि' नास्ति क.
(७) 'न देयाः' नास्ति च०

पिण्डपरः,

तुलसीगन्धमाघ्राय पितरस्तुष्टमानसाः।
प्रयान्ति गरुडारूढास्तत्पदं चक्रपाणिनः॥

इति प्रयोगपारिजाते पाद्मोक्तेरिति बोपदेवः। (१)वृद्धपराशरः--

न जातीकुसुमैर्विद्वान् बिल्वपत्रैश्च नार्चयेत्।
जपादिकुसुमं *झि(२)ण्टी *रूपिका सकुरण्टका॥
पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः॥

हैमाद्रौ शङ्खः--

उग्रगन्धीन्यगन्धीनि चैत्यवृक्षोद्भवानि च।
पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च॥
जलोद्भवानि देयानि रक्तान्यपि विशेषतः॥

अङ्गिराः "न (३)जातीकुसुमानि दद्यान्न कदलीपत्रम्' इति। जात्यां विकल्प इति हेमाद्रिः। निषेधः पिण्डविषयः,

कुन्दं शंभौ च नो दद्यान्नोन्मत्तं गरुडध्वजे।
पिण्डे (४)जाती च नो दद्याद्देवीमर्केण नार्चयेत्॥

इति वृद्धयाज्ञवल्क्योक्तेरिति बोपदेवः। स्मृतिसारे--

*आगस्त्यं भृङ्गराजं च तुलसी शतपत्रिका।

स्कन्धे माल्यनिषेधः प्रागुक्तः। *झिण्टीति। "तत्र शोणे कुरबकस्तत्र पीते कुरण्टकः। नीले झिण्टी" इत्यमरः *रूपिका अर्कपुष्पम्। *आगस्त्यमिति। मार्कण्डेयपुराणे-

शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च।

---

(१) 'बृहत्पराशरः' छ.

(२) झिण्टी नीलकुरण्टकः। अर्कपुष्पमिति मयूखे।

(३) नजातिकुसुमं दद्यान्न दद्यात्कदलीफलम्। इति। जात्यां' क०

(४) 'जातीम्' छ.

चम्पकं तिलपुष्पं च षडेते पितृवल्लभाः ॥
केतकीं करवीरं च बकुलं कुन्दकं तथा ।
पाटलां चैव जातीं च श्राद्धे यत्नेन वर्जयेत् ॥

केचित्पिण्डेऽपि तुलसीमाहुः--

पितृपिण्डार्चनं श्राद्धे यैः कृतं तुलसीदलैः ।
प्रीणिताः पितरस्तैस्तु यावच्चन्द्रार्कमेदिनी ॥

इति मार्कण्डेयोक्तेः ।

धूपस्तत्रैव विष्णुधर्मे—

धूपस्तु गुग्गुलुर्देयस्तथा चन्दनसारजः ।
अगरुश्च सकर्पूरः*तुरुष्क*त्वक् तथैव च ॥

(१) विष्णुः--

'घृत*मधुयुक्तं गुग्गुलुं श्रीखण्डदेवदारुसरलादि दद्यात्' इति । तत्रैव देवलः--

ये हि *प्राणयङ्गजा धूपा *हस्तवाताहताश्च ये ।
न ते श्राद्धे नियोक्तव्या ये च केचोग्रगन्धयः ॥
घृतं न केवलं दद्यात् दुष्टं वा तृणगुग्गुलुम् ॥
गन्धधूपोपपन्नानि यानि चान्यानि कृत्स्नशः ॥

तुरुष्कः लोहवानेत्याख्यः ।

तुरुष्कः सल्लकः । सिह्लो यावनोपीत्यमरात् । (अ०को० का०२व०६श्लो०१२८) तुरुष्कः सल्लकीवृक्ष इति माधवाच्च ।

*त्वक् दालचीनीत्याख्या । मरीचिः--

चन्दनागुरुणीचोभे तमालोशीरपद्मकम् ॥ इति ।

*मध्विवति शर्करापि प्रशस्ता;

माहिषाख्यं गुग्गुलं चाथाज्ययुक्तं सशर्करम् ।
ददाति नरसिंहाय हरये भक्तितत्परः ॥

इतिवत् । *प्राणयङ्गजाः कस्तूर्यादयः । *हस्तवातेति । तथाच

---

(१) 'विष्णुः-लोहबाणघृतमधु' छ०

दीपमाह विष्णुः--

*घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः ।
वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत् ॥

वस्त्रं ब्राह्मे--

कौशेयं क्षौमकार्पासं दुकूलमहतं तथा ।
(१)श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति चोत्तमान् ॥

हेमाद्रौ ब्रह्मवैवर्ते--

यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता ।
पितृभ्यो वस्त्रदानस्य फलं तेनाश्नुतेऽखिलम् ॥

तत्रैव पाद्मे--

निष्क्रयो वा यथाशक्ति वस्त्राभावे प्रदीयते ।

अन्यान्यपि च देयानि तत्रैव कालिकापुराणे--

(२)धात्वादिनिर्मिता रम्या दीपिकाः श्राद्धकर्मणि ।
पितृनुद्दिश्य यो दद्यात्स भवेद्भाजनं श्रियः ॥
यो (३)धूपदानपात्रं तु पात्र(४)मारार्तिकस्य च ।
दद्यात्पितृभ्यः प्रयतस्तस्य स्वर्गेऽक्षया गतिः ॥

विष्णुधर्मे—

यः कञ्चुकं तथोष्णीषं पितृभ्यः प्रतिपादयेत् ।

व्यजनादिना देयः,

धूमस्य व्यजनेनैव धूपेनाङ्गं विधूपयेत् ।

इत्यस्येहापिप्रवृत्तेः सुवचत्वात् । *घृतेनेति । यत्तु-

घृताद्वा तिलतैलाद्वा नान्यद्द्रव्यं तु दीपकम् ॥ इति,

तत्रान्यनिषेधो वसामेदोविषयः, न पुनः कौसुम्भादितैलविषय इति माधवः ।

---

(१) 'श्राद्धेत्वेतानि' छ०
(२) 'धात्वादिनिर्मितां रम्यां दीपिकां' क. छ.
(३) 'धूपदानं पात्रं' क. ग.   (४) 'आरात्रिकस्य' छ.

ज्वरोद्भवानि दुःखानि स कदाचिन्न पश्यति ॥
स्त्रीणां श्राद्धे तु *सिन्दूरं दद्याच्चण्डातकानि च ।
निमन्त्रिताभ्यः स्त्रीभ्यो ये ते स्युः सौभाग्यसंयुताः ॥

हेमाद्रावादित्यपुराणे—

न कृष्णवर्णं दातव्यं नापि कार्पाससम्भवम् ।
पितृभ्यो नापि मलिनं (१)नोपभुक्तं कदाचन ॥
न छिद्रितं नापदशं न धौतं कारुणापि च ॥

कार्पासनिषेधोऽन्यसम्भवे । तत्रैव—

पितॄन् सत्कृत्य वासोभिर्दद्याद्यज्ञोपवीतकम् ।
यज्ञोपवीतदानेन विना श्राद्धं तु निष्फलम् ॥

एतद्यतिस्त्रीशूद्रस्त्री(२)श्राद्धेऽपि देयमिति हेमाद्रिः ।

तत्रैव नृसिंहपुराणे—

कमण्डलुं ताम्रमयं श्राद्धेषु प्रददाति यः ।
काष्ठेन निर्मितं वाऽपि नारिकेलमथापि वा ॥
दद्यात् कमण्डलुं श्राद्धे स श्रीमानभिजायते ।
यो मृत्तिकाविरचितान् श्राद्धेषु च घटान् शुभान् ॥
प्रदद्यात्करकान्वाऽपि सोऽक्षयं विन्दते सुखम् ॥

*सिन्दूरमिति । कूर्पासमन्यत्रोक्तम् ।

हृच्छादनं कञ्चुकं च चोलः कूर्पासकः स्त्रियः ।

इति त्रिदण्डिः ।

चण्डातकं साटकं च सदृशं बहुकल्पनम् ।
निर्दशा साटिका ज्ञेयाऽप्यथवा चित्रवद्दशा ॥

इति कोशः ।

अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम् ।

---

(१) 'नोपयुक्तम्' छ.   (२) 'श्राद्धेष्वपि' छ.

तत्रैव—

उपानच्छत्रवस्त्राणि भुक्तिपात्रं कमण्डलुम् ।
शयनासनयानानि दर्पणव्यजनानि च ॥
अन्नं सुसंस्कृतं गन्धांस्ताम्बूलं (१)दीपचामरम् ।
पितृभ्यो यः प्रयच्छेत्तु विष्णुलोकं स गच्छति ॥

सौरपुराणे—

चामरं तालवृन्तं च श्वे(२)तच्छत्रं च दर्पणम् ।
दत्त्वा पितॄणामेतानि भूमिपालो भवेदिह ॥

तत्रैव नन्दिपुराणे—

अलङ्काराः प्रदातव्या यथाशक्ति हिरण्मयाः ।
केयूरहारकटकमुद्रिकाकुण्डलादयः ॥

तथा—

स्त्रीश्राद्धेषु प्रदेयाः स्युरलङ्कारास्तु योषिताम् ।
मञ्जीरमेखलादामकर्णिकाकङ्कणादयः ॥

तथा(३)—

आदर्शव्यजनच्छत्रशयनासनपादुकाः ।
मनोज्ञाः पट्टवासाश्च सुगन्धाश्चूर्णमुष्टयः ॥
अङ्गारधानिकाः शीते योगपट्टाश्च यष्टयः ।
कटिसूत्राणि रौप्याणि मेखलाश्चैव कम्बलाः ॥
कर्पूरादेश्च भाण्डानि ताम्बूलायतनं तथा ।
भोजनाधारयन्त्राणि पतद्ग्राहांस्तथैव च ।
तथाऽञ्जनशलाकाश्च केशानां च प्रसाधनम् ।
एतान् दद्यात्तु यः सम्यक् सोऽश्वमेधफलं लभेत् ॥

स्कान्दे—

सौवर्णं राजतं वाऽपि कांस्येनाप्यथ निर्मितम् ।

---

(१) 'दीपचामरं' ग.
(२) 'श्वेतं छत्रं' छ.
(३) 'तथा' नास्ति ग.

दत्त्वा भोजनपात्रं तु सम्राड् भवति भूतले ॥

वामनपुराणे—

बन्दीकृतास्तु ये केचित्स्वयं वा यदि वा परैः ।
येन केनाप्युपायेन यस्तान्मोचयते नरः ॥
पितरस्तस्य गच्छन्ति शाश्वतं पदमव्ययम् ॥

पराशरः—

वाचयेत्परिपूर्णत्वं वासो दत्त्वा विधानतः ।

नारदीये—

*देवैश्च समनुज्ञातो यजेत्पितृगणं त्वथ ।

तत्र पित्र्ये आसनाद्यशेषमर्चनकाण्डं वैश्वदेविकं ज्ञेयम् । विशेषस्तूच्यते । तत्रासने द्विगुणभुग्नाः कुशाः । अत्रावाहनमासनात्पूर्वं वा, अर्घ्यपूरणोत्तरं वा, अग्नौकरणोत्तरं वेति स्मृतिषु पक्षा उक्ताः । एषां शाखाभेदेन व्यवस्था । द्वितीयपक्ष एव बहुसंमतः । तत्रार्घ्यमाहाश्वलायनः-*'तैजसाश्ममयमृन्मयेषु त्रिषु पात्रेष्वेकद्र

इत्यमरः तच्च लहङ्गाख्य इति तद्व्याख्यातारः । *देवैश्चेति । यद्यपि पदार्थप्रत्यासत्तेः पदार्थानुसमयः प्राप्नोति तथापि—

अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम् ।

इति याज्ञवल्क्येन तत इत्यनेन वैश्वदेविकपदार्थकाण्डोत्तरं पित्र्यर्चनविधानाद्वाचनिकः काण्डानुसमयो व्यञ्जितः । स च देवानामनुज्ञामपेक्षते । आसनदानात् प्रागुत्तरं चापो दद्यात् । "अपः प्रदाय दर्भान् द्विगुणभुग्नानासनं प्रदायापः प्रदाय" इत्याश्वलायनसूत्रात् । कौर्मे—

यवार्थस्तु तिलैः कार्यः कुर्यादर्घ्यादि पूर्ववत् ।

श्राद्धे क्षणः क्रियतामित्यादि क्षणं कृत्वाऽर्घ्यादि पूर्ववत् कुर्यादित्यर्थः । *तैजसेति । तैजसमेकं पात्रम्, अश्ममयमेकम्, मृन्मय

व्येषु वा दर्भान्तर्हितेष्वप (१)आसिच्य—“शं नो देवीरभिष्टये” इत्यनुमन्त्रितासु तिलानावपति—

तिलोसि सोमदेवत्यो गोसवे देवनिर्मितः ।
प्रत्नवद्भिः (२)प्रत्तः स्वधया पितॄनिमाँल्लोकान् प्रीणयाहि नः स्वधा नमः ॥ इति ।

अश्ममयं स्फाटिकादि । मृन्मयं हस्तकृतमेव,

कुलालचक्रनिष्पन्नमासुरं दैविकं न तत् ।
तदेव हस्तघटितं दैविकं केवलं तथा ॥

इति छन्दोगपरिशिष्टात् । अन्यान्यपि पात्राणि पूर्वमुक्तानि । मनुः—

अन्नाभावे द्विजाभावे यद्येको ब्राह्मणो भवेत् ।
पात्राण्यासादयेत्त्रीणि न तु ब्राह्मणसंख्यया ॥

दत्तकादेः कर्तुर्द्विपितृत्वादावपि वचनात् त्रीण्येव पात्राणीति हरिहरः । माधवीये बैजवापः--

अर्घ्ये पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित् ।
एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधि ॥

हेमाद्रावप्येवम् । अत्रानुमन्त्रणं सकृत् । ‘तिलोसि’ इत्यस्य प्रतिपात्रमावृत्तिः पितृशब्दस्यानूहश्चेति वृत्तिकृत् । दर्भश्च त्रिगुणं पवित्रम्,

तिस्रस्तिस्रः शलाकास्तु पितृपात्रेषु पार्वणे ।
एकोद्दिष्टे शलाकैकां निधायोदकमाहरेत् ॥

मेकम् । एतेषु त्रिषु द्रव्यासम्भवे एकद्रव्येषु वा त्रिषु । त्रीण्यपि तैजसानि वा त्रीण्यप्यश्ममयानि वा त्रीण्यपि मृन्मयानि वा। एतान्याग्नेयीदिक्संस्थानि निधाय तेषु दर्भानन्तर्धाय ततस्तेष्वपो निषिच्य ततः पात्रस्था अपः “शन्नो देवीः” इत्यनुमन्त्र्य त्रिषु पात्रेषु तिलानावपति “ति-

---

(१) ‘प्रासिच्य’ क. ‘प्रदाय’ छ.   (२) ‘पत्नः’ क.

इति हेमाद्रौ चतुर्विंशतिमतात् । तत्रैव विष्णुः-*“दक्षिणाग्रदर्भेषु दाक्षिणा(१)पवर्गचमसेषु पवित्रान्तर्हितेष्वप आसिञ्चेत्”। ‘शन्नो देवीः’ इति मन्त्रेण (२)जलासेचनं बह्वृचभिन्नविषयम् । अत्रास्मिन्पक्षे प्रतिपात्रं मन्त्रावृत्तिः ।

कारिकायाम्—

गन्धपुष्पाणि चैतेषु पात्रेषु प्रक्षिपेदथ ।

ब्राह्मे—

जलं क्षीरं दधि घृतं तिलतण्डुलसर्षपान् ।
(३)कुशाग्रमधुपुष्पाणि दत्त्वाऽऽचामेत्ततः स्वयम् ॥

जातूकर्ण्यः—

ततोऽर्घ्यपात्रसम्पत्तिं वाचयित्वा द्विजोत्तमान् ।
तदग्रे चार्घ्यपात्राणि स्वधार्घ्या इति विन्यसेत् ॥

ततस्तिलहस्तो विप्रसव्यजानौ दक्षिणकरं न्यस्यावाहनं पृच्छेत । अत्र गोत्रसम्बन्धनामानि द्वितीयान्तत्वं च प्रागुक्तम् । बैजवापगृह्ये—‘तिष्ठन् पितॄनावाहयिष्यामीत्यामन्त्र्य ।’ कौर्मे—

अपसव्यं ततः कृत्वा पितॄणां दक्षिणामुखः ।
आवाहनं ततः कुर्यादुशन्तस्त्वेत्यृचा बुधः ॥
आवाह्य तदनुज्ञातो जपेदायन्तुनस्ततः ॥

अत्र सव्यस्यापि प्रागुक्तेर्विकल्पः । अत्राद्यमन्त्रावृत्त्याऽस्मत्पितरममुकशर्माणममुकगोत्रं वसुरूपमावाह-

लोसि” इति मन्त्रेणेति वृत्तिः *दाक्षिणाग्रदर्भेष्विति अर्घ्यपा-

---

(१) दक्षिणाग्रेषु दर्भेषु दक्षिणापवर्गतयाऽऽसादितेषु चमसेषु पात्रेष्वित्यर्थः । अपवर्गः समाप्तिः ।

(२) ‘जलसेचनम्’ ग.

(३) ‘कुशाग्रं मधुपु’ क. छ.

यामी(१)त्युक्त्वा मूर्धादिपादान्तं तिलान्विकीर्य–'आयन्तु नः' इति सर्वान्ते सकृज्जपेदिति निबन्धाः। अत्रोपवेशनसंवेशनपाद्यार्घ्याचमनीयान्यपि हेमाद्रिणोक्तानि तान्यथर्ववेदिनां नियतानि, नान्येषाम्। तेषां च प्रपितामहादिपित्रन्तं प्रातिलोम्येन सर्वः प्रयोगः।

वाराहे—

गन्धपुष्पार्चनं कृत्वा दद्याद्धस्ते तिलोदकम्।

गार्ग्यः—

शिरस्तः पादतो वाऽपि सम्यगभ्यर्चयेत्ततः।

"ततः–'स्वधाऽर्घ्याः' इति पितृपितामहादिविप्राग्रे प्रत्येकं निवेदयेत्" इति कारिकायां वृत्तौ च। आश्वलायनः–*"प्रसव्येनेतरपाण्यङ्गुष्ठान्तरेणोपवीतित्वाद्दक्षिणेन वा सव्योपगृहीतेन–'पितरिदं ते अर्घ्यं, पितामहेदं ते अर्घ्यम्, प्रपितामहेदं ते अर्घ्यम्' इत्यप्पूर्वं ताः प्रतिग्राहयिष्यन् सकृत्सकृत्स्वधा अर्घ्या इति प्रसृष्टा अ(२)नुमन्त्रयेत 'या दिव्या आपः पृथिवि संबभूवुर्या अन्तरिक्ष्या उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शं स्योना

त्रासादनप्रकारः। *प्रसव्येनेति। प्रसव्येन सर्वं पित्र्यं कर्म प्रसव्येन प्रकृत्यादित्वात्तृतीया। अप्रदक्षिणं कार्यमित्यर्थः। "प्रदक्षिणमुपचारः" इत्याभ्युदयिकश्राद्धेऽपवाददर्शनाद् योगविभागोऽवगतः। इतरस्य सव्यस्य पाणेरङ्गुष्ठान्तरेणार्घ्यं प्रयच्छेत्, उपवीतित्वात् पित्र्ये तावत् प्राचीनावीतिना भाव्यम्, अयं चोपवीती, तस्मादित्यर्थः। येन पाणिकर्म करोति दक्षिणेन वा सव्येन वा। येन पाणिना कर्म करोति तस्मिन्नंसे उपवीते स्थिते प्राचीनावीती। ततोऽन्यस्मिन्नंसे स्थिते तु उपवीती। अत्र तूपवीतित्वात्प्राचीनावी-

---

(१) 'इत्यभ्युक्त्वा' छ.

(२) 'अनुमन्त्रयीत' ग०

भवन्तु ॥" इति । *अर्घ्यादि प्राग्गन्धादेर्यज्ञोपवीतमेव । *अर्घ्यदानात् प्रागन्या अ(१)पो दद्यात् । यद्यप्यत्र सव्येन दक्षिणेन वाऽर्घ्यं दद्यादित्युक्तं, तथापि दक्षिणेनेत्य*भिमतोऽर्थः । कारिकायां वृत्तौ चैवम् । "पित्रादेस्त्रिभिः पात्रैर्दद्यात् । पितुः स्थाने विप्रत्रयं चे(२)देकार्घ्यं विभज्य दद्यात् । *त्रयाणां–'स्वधा अर्घ्याः' इति स(३)कृत्प्रश्नः । *एवं पैतामहादावपि । अन्यजलदानमर्घ्यमन्त्राश्च प्रतिविप्रमावर्तन्ते । तेषु गन्धादौ च प्रतिविप्रं पदार्थानुसमयः काण्डानुसमयो वा । पित्रादित्रयाणामेकविप्रपक्षे त्रिभिः पात्रैरेकस्यैवार्घ्यं दद्यात्" इति वृत्तिः । कारिकापि-

*स्वधाऽर्घ्या इत्यपोऽर्घ्यास्ता उपवीती निवेदयेत् ।

निवेदनात्प्राक् प्राचीनावीतमेवेत्यर्थः ।

तासिद्ध्यर्थं सव्यपाणेः पितृतीर्थेन दद्यादिति । अथवा दक्षिणं पाणिं सव्येन पाणिना गृहीत्वा दक्षिणेनैव पाणिनोपवीत्येवार्घ्यं प्रयच्छेदित्यर्थः । अत्रोपवीतित्वादिति हेतुवशादर्घ्यमारभ्य उपवीतलाभे उत्तरावधिमाह–*अर्घ्यादीति । अप्पूर्वमित्यस्यार्थमाह–*अर्घ्यदानादिति । *अभिमतोऽर्थ इति । सव्यपाणेः शिष्टविगर्हितत्वादिति भावः । *त्रयाणामिति । त्रयाणां पात्राणां मध्ये पैत्रस्य पात्रस्येत्यर्थः । *एवं पैतामहादावपीति । यथा पैत्रस्य पात्रस्य सकृन्निवेदनं तथा पैतामहादिपात्रस्येत्यर्थः । तथा सत्येव सकृत्सकृदिति वीप्सासार्थक्यम् । पात्रभेदेन सकृन्निवेदनं न ब्राह्मणभेदेनेति भावः । एतत्सर्वं संगृह्य सौत्रस्य 'प्रसृष्टा' इत्यस्य निनीता इत्यर्थं कारिकाकारो दर्शयतीत्याह–*स्वधार्घ्या इति । हस्ते पवित्रं दत्त्वा शिरःप्रभृति पूजां विधाय हस्तेऽर्घ्यदान-

---

(१)'आपः' क० छ०

(२) 'एकमर्घ्यम्' ग० (३) 'सकृन्निवेदनम्' छ०

अर्घ्यं सशेषमादाय दक्षिणेन तु पाणिना ।
सव्यहस्तगृहीतेन निनयेत् पितृतीर्थतः ॥
दत्त्वा दत्त्वा निनीतास्ता यादिव्यार्चानुमन्त्रयेत् ॥

यत्तु—

या दिव्या इति मन्त्रेण हस्तेष्वर्घ्यं विनिक्षिपेत् ।

इति, यच्च वाराहे—

तिलाम्बुना चापसव्यं दद्यादर्घ्यादिकं द्विजः । इति, यच्च व्यासः—

गोत्रसम्बन्धनामानि पितॄणाम(१)नुकीर्तयन् ।
एकैकस्य तु विप्रस्य अर्घ्यपात्रं विनिक्षिपेत् ॥ इति;

तद्बह्वृचातिरिक्तविषयम् । तत आचामेत् । एवं मा(२)तामहेष्वपि ।

आश्वलायनः—'संस्रवान् समवनीय ताभिरद्भिः *पुत्रकामो मुखमनक्ति' । संस्रवः *शेषः, 'संस्रवो हि परिशिष्टो भवति' इति शतपथश्रुतेः । केचित्तु हस्तगलिताम्बु वदन्ति । समवनीयाऽ*न्त्ये द्वे पात्रे पितृपात्रे आ(३)सिच्येति वृत्तिः । 'प्रथमे पात्रे संस्रवान् समवनीय' इति कातीयसूत्राच्च । ब्राह्मे तु प्रतिबिम्बावलोकनमुक्तम् । स्कान्दे त्वायुःकामस्य नेत्रासेचनमुक्तम् । पित्र्यविप्रैः प्राङ्मुखस्य कर्तुरभिषेकः कार्य इति केचित् । आश्वलायनः-

नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपातितम् ।
आवृतास्तत्र तिष्ठन्ति पितरः शौनकोऽब्रवीत ॥

मिति पूर्वमुक्तम् । *पुत्रकाम इति । न चेन्नानक्तीति वृत्तिः । *शेष इति । अर्घ्यस्येति शेषः । समवनीयेत्यस्यार्थमाह--*अन्त्ये इति । संस्रवानितीहापि संबध्यते । *पितृपात्रमिति । अ-

---

(१) 'अनुकीर्तयेत्' क०

(२) 'पितामहेष्वपि' क० (३) 'आसिञ्चेत्' छ०

'यावद्विप्रविसर्जनम्' इति तुर्यपादे यमीयः पाठः। अत्र वृत्तिः-*'पितृपात्रं समवनयनदेशान्न चालयेदाश्राद्धसमाप्तेः *यस्मात्तत्र तृतीयपात्रेणा*वृताः' इति। यद्वा *'प्रथमपात्रमेव न्यग्बिलं कुर्यात्' इति। कामाभावेऽपीदमेव शेषप्रतिपादनम्। हेमाद्रौ कौर्मे—

*संस्रवांश्च ततः सर्वान् पात्रे कुर्यात्समाहितः।
पितृभ्यः स्थानमसीति(१)न्युब्जं पात्रे निधापयेत्॥

शूलपाणौ यमस्तु—

पैतृकं प्रथमं पात्रं (२)तस्मिन् पैतामहं न्यसेत्।
प्रपितामहं ततो न्यस्य नोद्धरेन्न च चालयेत्।

इत्याह। (३) अथ 'संस्रवानानीय तृतीयेनाच्छाद्य न्युब्जीकुर्यात्' इति सर्वैक(४)वाक्यतयार्थ इति केचित्। अत्रिः—

गन्धादिभिस्तदभ्यर्च्य तृतीयेनापिधापयेत्।
पितृभ्यः स्थानमसीति शुचौ देशेऽर्चि(५)तेऽर्चयेत्॥

र्घ्यपातितामित्यादिः। पितॄणामर्घ्यशेषा आपो यस्मिन्नेकीकृताः, एवंभूतपात्रमित्यर्थः। कुतो न चालयेदित्यत्राह*यस्मादिति। *आवृताः अपिहिताः। तथाच प्रथमपात्रस्य तृतीयेण पात्रेण पिधानं कार्यमित्यर्थः। शौनकग्रहणं पूजार्थं न तु विकल्पार्थम्। *प्रथमपात्रमेवेति। तत्रेति सप्तमी तृतीयार्थे। तेन प्रथमेन पात्रेण पितरस्तिष्ठन्तीत्यस्यायं पर्यवसितार्थः। तच्चाश्राद्धसमाप्तेर्नोद्धरेदिति पूर्ववत्। *संस्रवानिति। तृतीयेनाच्छादनन्युब्जीकरणयोर्विकल्पितत्वात्समुच्चये प्रमाणाभाव इत्यस्वरसः। वृत्तिकृतामाच्छदाने

---

(१) 'न्युब्जपात्रं' छ० (२)'तस्मिन् पैतामहे' क०'तस्म पैतामहं' ग०
(३) 'अथ' नास्ति छ० (४) 'वाक्यतार्थः' क०
(५) 'अर्चिते च यत्' छ०

अर्चनं न्युब्जीकृतेऽपि तुल्यम्, 'न्युब्जमुत्तरतो न्यसेत्' इति प्रचेतसोक्तेः । 'सर्वविप्रोत्तरतो न्यसेत्' इति हेमाद्रिकल्पतरू । 'विप्रवामे' इति हलायुधः । 'कर्तुर्वामे' इति शूलपाणिः ।

*उत्तानं विवृतं वाऽपि पितृपात्रं न तद्भवेत् ।

इत्युशनसोक्तेर्न्युब्जतैव साधुः *मातामहादिसंस्रवानपि पितृपात्र एव(१) गृहीत्वा प्रयाजवत्तन्त्रेण न्युब्जीकुर्यात् इति शूलपाणिः । एकोद्दिष्टे तू*हेन न्युब्जतेति पितृभक्तौ श्रीदत्तः । यमोऽपि—

*स्पृष्टमुत्तानमन्यत्र नीतमुद्घाटितं तथा ।
पात्रं दृष्ट्वा व्रजन्त्याशु पितरस्तं शपन्ति च ॥

वैश्वदेवे उत्तानमिति मदनपारिजातः । बैजवापः—

*तस्योपरि कुशान् दत्त्वा प्रदद्याद्दैवपूर्वकम् ।
गन्धपुष्पाणि धूपं च दीपं वस्त्रोपवीतके ॥

अत्र गन्धादेर्दैवे पित्र्ये च पदार्थानुसमयस्य याज्ञवल्क्योक्तकाण्डानुसमयेन विकल्पो ज्ञेयः । बह्वृचानां तु सूत्रे दैवानुक्तेः काण्डानुसमय एव । अत्र प्राचीनावीती । नामगोत्रसम्बुद्ध्याद्युक्तं प्राक् । अन्यद्दैववत्तदन्ते आच-

---

निर्भरः । अतोऽयं ग्रन्थकृन्न्युब्जतायां निर्भरमाह-*उत्तानमिति । *मातामहादीनामिति । 'पितृणामर्घ्यपातितम्' इति यद्यपि पितृशब्दो न सपिण्डनान्तश्राद्धजन्यापितृत्वाश्रयपरः पितरिदं तेऽर्घ्यमित्यादि विरोधात् । किन्तु लक्षणया जनकादिपरः तथापि "मातामहानामप्येवम्" इत्यतिदेशात् तेषामपि संस्रवो ग्राह्य इत्यर्थः । *ऊहेन 'पित्रे स्थानमासि' इति ऊहेन । *स्पृष्टं

---

(१)'एवम्' छ०

मनं च। हेमाद्रौ कालिकापुराणे—

निर्वर्त्य ब्राह्मणादेशात् क्रियामेवं यथाविधि।
*भाजनानि ततो दद्याद्धस्तशौचं पुनः क्रमात्॥

आदेशात्पात्राणि दद्यादित्यन्वयः।(१)तेन तत्रापि प्रश्नानुज्ञे ज्ञेये। तत्रैव ब्राह्मे—

मण्डलानि च कार्याणि नैवारैश्चूर्णकैः शुभैः।
गौरमृत्तिकया वापि भस्मना गोमयेन वा॥

भृगुः--

भस्मना वारिणा वाऽपि कारयेन्मण्डलं ततः।
चतुःकोणं द्विजाग्र्यस्य त्रिकोणं क्षत्रियस्य तु॥
मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्॥

बह्वृचपरिशिष्टे तु-'दैवे चतुरस्रं पित्र्ये वृत्तं मण्डलं कृत्वा क्रमेण सयवान् सतिलांश्च दर्भान् दद्यात्' इत्युक्तम्। मार्कण्डेयः--

यातुधानाः पिशाचाश्च क्रूरा ये चैव राक्षसाः।
हरन्ति रसमन्नस्य मण्डलेन विवर्जितम्॥

हेमाद्रौ हारीतः-'भूमावेव निदध्यान्नोपरि पात्राणि' इति तानि (२)च हेमाद्रावत्रिराह--

भोजने हैमरौप्याणि दैवे पित्र्ये यथाक्रमम्।

हारीतः--'(३)राजतपार्णताम्र (कां(४)स्यपात्राणि भोजने'। (५)इति। तत्रैव वाराहे--

सौवर्णानीह रौप्याणि) कांस्यानि तदसम्भवे।

हस्तादिना। तदुत्तरकृत्यमाह-*तस्योपरीति।*भाजनानीति। तानि च भोजनार्थोपकल्पितसर्वान्नधारणसमर्थानि, महान्तीति

---

(१) 'ते' छ०   (२) 'तु' क० छ०
(३) 'राजतं पार्णं' क० ग० (४) कंसान्तर्गतं नास्ति छ०
(५) 'इति अन्यान्यपि हेमाद्रावत्रिराह-सौवर्णानि' क०

अन्यान्यपि हि कार्याणि दारुजान्यपि जानता ॥
ना*यसान्यपि कार्याणि पैत्तलानि नतु क्वचित् ।
नच सीसमयानीह शस्यन्ते त्रपुजान्यपि ॥

अत्रिः—

पञ्चाशत्पलिकं कांस्यं ह्यधिकं (१)भोजनाय वै ।
गृहस्थैस्तु सदा कार्यमभावे हेमरौप्ययोः ॥
पालाशेभ्यो विना न स्युः पर्णपात्राणि भोजने ॥

पृथ्वीचन्द्रस्तु—

*कांस्यपात्रे हविर्दृष्ट्वा निराशाः पितरो गताः ।

इति ब्राह्मोक्तेः कांस्यपात्रनिषेधमाह । बोपदेवस्तु स्मृतिसंग्रहमुदाजहार—

श्राद्धे पलाशपात्राणि मधुकौदुम्बराणि च ।
पारिकाकुटजप्लक्षक्रकचानि क्रमाज्जगुः ॥
कदलीचूतपनसजम्बुपुन्नागचम्पकाः ।
अलाभे मुख्यपात्राणां ग्राह्याः स्युः पितृकर्मणि ॥ इति

हेमाद्रौ तु कदलीपात्रनिषेधमाहाङ्गिराः—'न जातीकुसुमानि दद्यान्न कदलीपत्रम्' इति । क्रतुः—

असुराणां कुले जाता रम्भा पूर्वपरिग्रहे ।
तस्या दर्शनमात्रेण निराशाः पितरो गताः ॥

एवं पात्राण्यासाद्य भस्ममर्यादां कृत्वा विप्रहस्तशोधनं कुर्यात् । तत्र 'पिशङ्ग' 'रक्षाणो' इति मन्त्रद्वयं केचित्पठन्ति । मात्स्ये—

अकृत्वा भस्ममर्यादां यः कुर्यात्पाणिशोधनम् ।

विशेषस्मरणात् । *नायसानीति ।

यथोपपन्नं कार्याणि मृन्मयानि न तु क्वचित् ।

इति च । *कांस्यपात्रे इति । पञ्चाशत्पलान्न्यूनं कांस्यं

---

(१) 'भाजनाय' क०

आसुरं तद्भवेच्छ्राद्धं पितृणां नोपतिष्ठते ॥

तथैव ब्रह्माण्डे—

प्रक्षाल्य हस्तपात्रादि पश्चादद्भिर्विधानवत् ।
प्रक्षालनजलं दर्भैस्तिलैर्मिश्रं क्षिपेच्छुचौ ॥

*मण्डलोपरीति हेमाद्रिः ॥

अथाग्नौकरणम् । हेमाद्रौ मार्कण्डेयः—

आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः ।
अनाहिताग्निश्चौपासने*ऽग्न्यभावे द्विजे*प्सु वा ॥

वायवीये—

*आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः ।
अग्न्यर्थं लौकिकं वापि जुहुयात्कर्मसिद्धये ॥

*आहिताग्निः सर्वाधानी । अर्धाधानी तु गृह्य एवेवर्ज्यमित्यन्ये । *मण्डलोपरीति । पादप्रक्षालनेत्यादिः । *अन्यभावे उभयविधाग्न्यभावे । त(१)थाचानग्निकस्य विप्रपाणावित्यर्थः । *अद्भिवति तीर्थश्राद्धपरमित्यग्रे स्फुटं । आहिताग्निपदस्य नार्धाधानिपरत्वमित्यत्र मानान्तरमाह-*आहृत्येति । प्रयत्नत आहृत्येत्युक्त्याऽर्धाधाने स्मार्ताग्नेः सत्त्वान्न दक्षिणाग्निर्युक्त इति भावः । पूर्ववाक्यं व्याचष्टे-*आहिताग्निरिति ।

अग्नौ करिष्यन्नादाय पृच्छेदन्नं घृतप्लुतम् ।
कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत् ॥

इत्यतिदेशसामान्यवचनं "कर्म स्मार्तम्" इत्युपदेशसामान्यवचनानुरोधेन दक्षिणाग्निव्यतिरिक्तप्राकृतपदार्थविषयम् । अतोऽर्धाधानेन गृह्यसत्त्वे तत्रैव होमः । तदभावे तु दक्षिणाग्नौ । एवञ्चाहिताग्निपदं सर्वाधानिपरम् । अनाहिताग्निपदं स्मार्ताग्निपरमर्धाधा-

---

(१) 'तथाच त्रिविधानग्निकस्य प्रवासादिश्च सर्वाधानिनश्च विप्रपाणावित्यर्थः' ङ पुस्तके ।

ति चन्द्रिकापरार्कमिताक्षरामाधवादयः । *तस्यापि दक्षिणाग्नौ *लौकिको गृह्य इति हेमाद्रिः कल्पतरुश्च ।

न्युपलक्षकम् । चकारो वा तत्समुच्चायकः । औपासनो गृह्याग्निः । एवञ्च "अग्न्यर्थं लौकिकं वाऽपि" इत्यस्यायमर्थः-अग्न्यर्थम् । औपासनाग्निकार्यसिध्यर्थम् । तच्च कार्यं निरग्निकस्य सर्वाधानिनश्च तदर्थम् । ताभ्यां लौकिको वा हर्तव्य इति विकल्पः,

हस्तेऽग्नौकरणं कुर्यादग्नौ वा साग्निको द्विजः ।

इति पराशरोक्तेरिति । होमार्थमित्यनेन गृह्याग्निकार्ये दक्षिणाग्निविधानात् गृह्यसत्त्वे तत्कार्यस्य तत्रैव सुकरतया फलतः सर्वाधानेन तदसत्त्वे दक्षिणाग्निरिति भावः । ((१)प्रवासादौ दक्षिणाग्न्यसत्त्वे त्वाह)-लौकिक इति । पाणिहोमव्यावृत्तये(२) । अत एव कर्मसिद्धये इति । दक्षिणाग्न्यादिलौकिकाग्निं विना पाणिहोमेनाग्नौकरणासिद्धेः । पा(३)णिहोमस्त्वाश्वलायनपरः । *तस्यापीति । अर्धाधानिनोऽपीत्यर्थः । तस्याप्याहिताग्नितया दर्शयागार्थं विहृतदक्षिणाग्निसद्भावात् । फलचमसेनेव सोमस्य शरैरिव च कुशानां गृह्याग्निसद्भावेऽपि दक्षिणाग्निना तद्बाधस्यैवौचित्यात् । अग्न्यर्थं लौकिके वाऽपीति दक्षिणाग्निकार्ये लौकिकस्य विधानाद्दक्षिणाग्न्यभावे गृह्याग्निप्राप्तेश्च । एतन्मते आहिताग्निराहिताग्निमात्रं । अनाहिताग्निः स्मार्ताग्निः । अत्र लौकिकशब्देन नासंस्कृतोऽग्निरुच्यते,

न पैतृयाज्ञियो होमो लौकिकेऽग्नौ विधीयते ॥

इति तन्निषेधादित्यत आह-*लौकिक इति । नच श्राद्धस्य गृह्यत्वात् "कर्म स्मार्तं विवाहाग्नौ" इत्युपदेशेन 'पितृयज्ञवत्' इत्य

---

(१) कंसान्तर्गतं नास्ति च, 'लौकिक इति च' इत्यग्रे पाठः च पुस्तके । (२) अस्य 'इदम्' इति शेषः ।

(३) 'पाणिहोमस्त्वाश्वलायनपरः' नास्ति ङ ।

*आद्यपक्ष एव तु युक्तो बहुसंमतश्च । यद्यपि स्मार्तमग्नौकरणं *श्रौते दक्षिणाग्नौ न युक्तं तथापि वचनाद्भवतीति हेमाद्रिचन्द्रिकादयः । इदं दर्शश्राद्ध एव । आह्निकादिषु तु सर्वाधानी पाणौ, अर्धाधानी गृह्ये कुर्यादिति हेमाद्रिर्माधवादयश्च;

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

इति लौगाक्ष्यादिभिः क्रमोक्तेर्विहृतदक्षिणाग्निसत्त्वात् । *अत एवात्र वचने साग्निकः आहिताग्निरुक्तो हेमाद्रिणा । एतदापस्तम्बादीनामेव । आश्वलायनस्या·

तिदेशबाधात्सत्यपि दक्षिणाग्नौ औपासने एवार्धाधानिनो होम इति वाच्यम् , उपदेशस्यौपासनहोमादिषु सावकाशत्वाद्विरोधाभावेनातिदेशबाधस्यान्याय्यत्वाच्च वाचनिकातिदेशस्योपदेशतुल्यत्वाच्च । नापि "कर्म स्मार्तं विवाहाग्नौ" इत्यस्याबाधाय "आहिताग्निस्तु" इति वाक्यं सर्वाधाने गृह्यासत्त्वे दक्षिणाग्निविधानपरमिति वाच्यं, विशेषविषयेऽपवादविषये चोत्सर्गशास्त्रस्याप्रवृत्तेः । एवं प्रबलेऽपि हेमाद्रिमते श्राद्धसागरादिकृत् यायजूकसम्प्रदायं दर्शयति—*आद्य एवेति । *श्रौते इति ।

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ॥

इति वचनविरोधात् । तथाच सर्वाधानिनः पाणिहोमः स्यादित्याशयः । ननु 'आहृत्य' इत्युक्तेर्वार्षिकादौ सर्वाधानिनो होमार्थत्वेन विहारः स्यादत आह—*अत एवेति । तथाचाहिताग्निमात्रस्य विहृतदक्षिणाग्निसद्भावादेव दर्शश्राद्धेऽर्धाधानिनोऽपि स्मार्तं बाधित्वा तत्रैव होमः । नह्यग्नौकरणेन दक्षिणाग्नेः अपूर्वो विहारश्चोद्यते क्लृप्तमादायैव तदुपपत्तेरिति । आह्निकादिषु तदभावेन पाणावेव होमः । अर्धाधानिनस्तु गृह्ये स्मार्ताग्निवदिति । परन्तु हेमाद्रिणा लौकि·

हिताग्नेः *पाणावेवेति वृत्तिः । *अर्धाधानिनो गृह्ये एव व्यतिषङ्गेणेति प्रयोगपारिजाते परिशिष्टे च । बोपदेवस्त्वाह *होमशब्दः पिण्डपितृयज्ञपरः,

पितृयज्ञे तु जुहुयाद्दक्षिणाग्नौ समाहितः ।
*श्राद्धे त्वौपासनाग्नौ तु निरग्निर्लौकिकेऽनले ॥
*अनग्नि*र्दूरभार्यश्च पार्वणे समुपस्थिते ।
*सन्धायाग्निं ततः कुर्याद्धोममग्निं समुत्सृजेत् ॥

इति त्रिकाण्डमण्डनोक्तेः । श्राद्धे गृह्याग्नावेवेति

को गृह्य इति यद्व्याख्यातं तन्न युक्तं, "न पैतृयज्ञिय" इति निषेधस्य पितृयज्ञाङ्गहोमपरत्वात् । नच तत्र तस्य वैयर्थ्यम्, अग्निप्रातिनिध्यभावस्य न्यायप्राप्तत्वादिति वाच्यं, तस्य तादृशानुवादत्वात् । वायुपुराणादिप्राप्ततन्निषेधकत्वाच्च । ((१)यत्तु धूर्तेन आपस्तम्बानां मासिश्राद्धस्यापूर्वत्वेन पितृयज्ञाद्दक्षिणाग्नेरप्राप्तत्वात् स्मार्तस्य चाभावेनाधिकरणाभावाद्धोमलोप एवेत्यभ्यधायि । तदयुक्तं, तत्र पितृयज्ञधर्मकत्वाभावेऽपि स्मृतिवाक्यैर्दक्षिणाग्नेः पाणिलौकिकाग्न्यादेश्च प्राप्तिसम्भवात् ।) *पाणावेवेति । एतन्मते आहिताग्निसामान्यस्य पितृयज्ञं कृत्वा श्राद्धं, "पितृयज्ञं तु निर्वर्त्य" इति वचनात् । *अर्धाधानिन इति । आश्वलायनस्येति वर्तते । *होमशब्दः होमार्थमित्यत्र होमशब्दः । *श्राद्धे त्विति । एतावता स्मार्ताग्नेरौपासनाग्निरार्थिकः । *अनग्निरिति । अनग्नित्वं त्रेधा—भार्यापरिग्रहाभावात्, तदुत्तरकालिकाग्न्यस्वीकारात्, स्वीकृतोच्छेदात् । *दूरभार्य इति । अग्न्यसंनिधाने । *संधायेति । संधानं च "अयाश्च"इत्यादिनाऽग्रे स्फुटम् । अत्र सर्वाधानिनो दर्शश्राद्धे अग्नौकरणे मार्कण्डेयोक्तदक्षिणाग्निर्दुर्वारः । औपासनाग्न्यभावेन निरग्नित्वाभावेन चाधिकरणद्वयाप्राप्तेरित्यस्वरसस्तुना सूचितः ।

(१.) कंसान्तर्गतं नास्ति ङ ।

*लौकिकाग्न्यादिविधानं च तैत्तिरीयादिविषयम्। बह्वृचस्य त्वनग्नेरपि पाणिहोम एव। अग्निपाणी विना सूत्रे विधानान्तरानुक्तेः ;

अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्।

इति मनूक्तेश्च। वृत्तावप्येवम्।

क्वचित्साग्नेरपि पाणिहोम उक्तो गृह्यपरिशिष्टे–

*अन्वष्टक्यं च पूर्वेद्युर्मासिमास्यथ पार्वणम्।
काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टं तथाष्टमम्॥
चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते।
पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि॥ इति।

*एकोद्दिष्टं सपिण्डीकरणं, शुद्धे तन्निषेधात्। बह्वृचभाष्यकारास्तु *सर्वैकोद्दिष्टेषु पाणिहोममाहुः। इदं च बह्वृचानामेव। *अत्रेदं तत्त्वम्। 'स्थालीपाकेन सह

---

*लौकिकाग्न्यादीति। आदिना अबादिपरिग्रहः। तैत्तिरीयादीनां पाणिहोमाभावात्। *अन्वष्टक्यं चेति। हेमन्तशिशिरयोः कृष्णनवम्यामान्वष्टक्यं तदष्टमीपूर्वदिने पूर्वेद्युः। मासिमासि प्रतिकृष्णपक्षं यस्यां कस्याञ्चित्तिथौ आन्वष्टक्यविधानेनोक्तम्। पार्वणं दार्शम्। काम्यं पुत्रादिकामनायां कृत्तिकादिषु। अभ्युदये पुत्रजन्मनि। अष्टम्यां हेमन्तशिशिरकृष्णाष्टम्याम्। एकोद्दिष्टं व्याकरोति–*एकोद्दिष्टमिति। *सर्वेति। "अथातः पार्वणश्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे च" इति सूत्रे समानविधानतया पार्वणधर्मप्राप्तेर्दुर्वारत्वात्। तथा आन्वष्टक्यादौ पक्षान्तकर्माभावेन विहृतदाक्षिणाग्न्यसत्त्वेऽपि आहिताग्निभिः प्रयोगपारिजातमते सर्वाधानेनौपासनाग्न्यसत्त्वे विहृत्य होमः कार्यः। अनेनैव न्यायेन सर्वश्राद्धेषु दक्षिणाग्निविहरणं कार्यमिति तु मयूखे। बह्वृचानां वार्षिकश्राद्धे मतभेदं दर्शयति–*अत्रेति।

पिण्डार्थमुद्धृत्य' इति सूत्रे 'नात्रापूर्वः स्थालीपाकश्चोद्यते सर्वश्राद्धेषु प्रसङ्गात्तेनानुवादोयम्' इति वृत्तिकारोक्तेः पार्वणे आर्थिकस्या*नङ्गस्य व्यतिषङ्गस्य वार्षिकादिष्वनतिदेशादर्धाधानिनोऽपि पाणिहोम एवेति वृत्तिस्वरसः। एवं मासिकादावपि,

षोडशे मासिके श्राद्धे सपिण्डीकरणे तथा।
पाणावेव तु होतव्यमन्यत्राग्नौ तु हूयते॥

इति बोपदेवोदाहृतवचनाच्च। भाष्यकारमते तु—सूत्रे स्थालीपाकेनेति *करणत्वा*न्नित्यवच्छ्रवणाच्च पार्वणे *सोऽङ्गम्। ततः *काम्यादिषु तदभावे कार्यस्य पिण्डदानस्याप्यभावः। एतदेवानुसृत्य विकृतावपि वार्षिकादौ व्यतिषङ्ग उक्तः प्रयोगपारिजाते परिशिष्टे च। तेनैतन्मतेऽर्धाधानिनो*ऽग्नावेव। *वस्तुतस्तु स्थालीपाकेन *"स-

---

*अनङ्गस्येति। यदि व्यतिषङ्गोऽतिदिश्येत तदाङ्गं स्यान्न त्वङ्गमतो नातिदिश्यते इत्यर्थः। *करणत्वादिति। "सह पिण्डार्थम्" इत्येतस्य श्राद्धपाकसाहित्येन पिण्डनिर्माणार्थमित्यर्थः। तथाचोद्धरणकरणत्वं स्थालीपाकस्य भवति, उपपदविभक्तिमपेक्ष्य कारकविभक्तेर्बलीयस्त्वात्। *नित्यवदिति। अनियतश्रवणे हि कदाचित्स्थालीपाकानुद्धरणेऽपि पिण्डप्रसङ्गः। *सः स्थालीपाकः। *काम्यादिष्विति। सूत्रकृता काम्यादीनां पृथगभिधानेन पार्वणविकृतित्वाभावादिति भावः। *अग्नावेवेति। एवकारेण पाणिव्यवच्छेदः। वार्षिकादाविति वर्तते। वृत्तिकृन्मते तत्र व्यतिषङ्गाभावात्पाणावेवेति ध्वननायैव तन्मते इति। अनयोर्मतयोः किं ग्रन्थकृन्मते समञ्जसमित्यत्राह—*वस्तुतस्त्विति। *सह शाखयेति। यथा "सूक्तवाकेन प्रस्तरं प्रहरति" इत्यत्र सूक्तवाकप्रतिपाद्यानामग्न्यादीनां प्रहरणे देवतात्वं स्वीकार्यम् अन्यथा तत्र सूक्तवा-

हशाखया प्रस्तरं प्रहरति" इतिवत्सहभावमात्रश्रुतेः। पत्नीवते त्वष्टुरुपलक्षणमिव नाङ्गत्वम्। *तत्वे वा नाङ्गानुरोधेन प्रधानभूतपिण्डदानत्यागो युक्तः। तेन *उप-

कस्य करणत्वानुपपत्तेः। इष्टदेवतासम्बन्धाच्च प्रहरतिना याग उपलक्षणीयः, तद्वत् सहशाखया प्रस्तरं प्रहरतीत्यत्रापि, शाखाया अपि यागसाधनतया प्रस्तरतुल्यत्वादिति पौर्णमास्यां यागाङ्गतया शाखा संपाद्येति प्राप्ते सूक्तवाकवाक्ये एव प्रहरतिपदं यागोपलक्षणं न शाखावाक्ये। आर्थिक्याः शाखायाः प्रहरणे मुख्यार्थ एव प्रस्तरवत् कर्मत्वेन सहभावेनान्वयसंभवात्। तथा चानङ्गत्वान्न पौर्णमास्यां तत्संपादनमिति राद्धान्तः। एवं पात्नीवते आध्वर्यवो होममन्त्रः श्रूयते—"अग्नाइ पत्नीवाः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा" इति। अत्र त्वष्ट्रा सह पानं गम्यते, सजूःशब्दस्य सहार्थत्वात्। नच "जूषी प्रीतिसेवनयोः" इति धातुवशात्त्वष्ट्रा समानप्रीतिरेव प्रत्येतव्या नतु साहित्यमिति वाच्यम्, एवमपि त्वष्ट्रा सह पानं विना समानप्रीतेरसिद्धेः। सहपानं च तदा नोपपद्यते यदि त्वष्टा न पिबेत्। नवा देवतायाः पानं भवतीति। तत्र त्वष्टापि उपलक्षणीय इति होमोङ्गमिति प्राप्ते शब्दतस्तावदग्नेरेव पानं गम्यते त्वष्टुस्तु सहभावमात्रम्। स च तस्याऽपानेऽप्युपपद्यते।

सहैव दशभिः पुत्रैर्भारं वहति गर्दभी।

इत्यादौ भारमनुद्वहद्भिः पुत्रैः सहभावमात्रस्यापि दर्शनात्। तस्मात्त्वष्टुर्न देवतात्वमिति सिद्धान्तः। तथाच यथा शाखाया न यागसाधनत्वं त्वष्टुर्वा नोपलक्षणत्वं तथा स्थालीपाकस्य न पिण्डदानसाधनत्वमिति नाङ्गत्वमित्यर्थः। अतः काम्यादिषु तदनपेक्षणात् पिण्डदानं भवत्येवेति भावः। तुष्यतु दुर्जनन्यायेनाह—*तत्वेवेति। बाधिताङ्गस्यैव त्याज्यत्वादिति भावः। *व्यतिषङ्गाभावेऽपीति। श्राद्धपितृयज्ञयोरेककालत्वे इत्यादिः। अन्व-

तिषङ्गाभावेऽप्यग्नौ होमो भवतीति बोपदेवः । *अनाहिताग्नेर्गृह्याग्निमतस्तु सर्वमतेऽग्नावेव । *वार्षिकादौ वृत्तिमते व्यतिषङ्गो न, अन्यमते त्वस्ति । अत्र यथाचारमनुष्ठेयम् ।

आश्वलायनः-'उद्धृत्य *घृताक्तमन्नमनुज्ञापयत्यग्नौ करिष्ये करवै करवाणीति वा । प्रत्यभ्यनुज्ञा क्रियतां कुरुष्व कुर्विति । अथाग्नौ जुहोति यथोक्तं पुरस्तात्' इति । *व्यतिषङ्गपक्षे इदमिति वृत्तिः । करवै करवाणीत्यादिचतुष्टये सर्वाधानिनो दक्षिणाग्निविहारस्यार्धाधानिन औपासनाग्निमतश्च औपासनाग्नेश्च सत्त्वादित्यर्थः । *अनाहिताग्नेरिति स्थालीपाकस्यानङ्गत्वे आश्वलायनस्य द्विविधाहिताग्नेर्निरग्नेश्च दर्शेऽग्नौकरणहोमेऽधिकरणं विवेचितम् । इदानीं तस्य गृह्याग्नेस्तदाधारत्ववस्थापनफलमाह—*वार्षिकादाविति । अत्र च पाणिहोमादिति भावः ।*घृताक्तमिति । (१)अनग्निश्चेदाज्यंगृहीत्वेतिशौनकोक्तेस्तादृशान्नासम्भवे घृतमेवेति स्मृत्यर्थसारः । तत्र आज्यपदस्य तद्युक्तान्नपरत्वात् । अन्यथा—

अग्नौकरिष्यन्नादाय पृच्छेदन्नं घृतप्लुतम् ।
कुरुष्वेत्यभ्यनुज्ञातो हुत्वाऽग्नौ पितृयज्ञवत् ॥

इति योगीश्वरादिविरोधात् । घृतपदेन शाकादिनिरासः—

जुहुयाद् व्यञ्जनक्षारवर्जितं तु यथाविधि ।

इति मदालसावाक्ये व्यञ्जनादिपदं घृतेतरार्थकम् । *व्यतीति । उद्धृत्येत्युक्तेरिध्माधानान्तं पिण्डपितृयज्ञं कृत्वा ब्राह्मणव-

---

(१) "घृताक्तमिति । तादृशान्नसम्भवे घृतमेवेति स्मृत्यर्थसारः । अनग्निश्चेदाज्यं गृहीत्वेति शौनकोऽपि वक्ष्यामि तथापि तत्रानयमाज्यमुक्तान्नपरम् । अनेनाग्नौकरिष्यन्नादाय पृच्छेदन्नं घृतप्लुतम् कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवदिति योगीश्वरादिभिश्चान्नस्यैवोक्तेः ।" इति ख पुस्तके पाठः ।

त्यत्राग्नावित्यनुषङ्गः । पुरस्तात् पिण्डपितृयज्ञे । तच्चैवम्-'मेक्षणेनावदायावदानसंपदा जुहुयात्सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इति स्वाहाकारेण वाऽग्नौ पूर्वं यज्ञोपवीती मेक्षणमनुप्रहृत्य' इति । अवदानसंपदा *उपस्तरणाद्यपेक्षयेत्यर्थः । व्यतिषङ्गपक्षे

च्छौचाद्याच्छादनान्तं पार्वणं कृत्वा पिण्डपितृयज्ञस्थालीपाकादुद्धरणलाभादिति भावः । क्रियतामित्यादि यथासंख्यम् । ननु अवदायेत्येव सम्यक् न तु संपदिति, अत आह-*उपस्तरणादीति । सम्पत्पदेन पूर्वोत्तरयोरुपस्तरणाभिघारयोर्लाभादित्यर्थः । अवदानसंपन्नाम उपस्तरणं द्विरवदानं प्रत्यभिघारणं चेति वृत्तिः । द्विरवदानं चतुरवत्तिनः पञ्चावत्तिनस्तु त्रिरवदानं द्रष्टव्यम् । नच (१)वृत्तौ हविरभिघारणं कुतस्त्यक्तं ? तत्सहितचतुरवदानानन्तरमेषोऽवदानधर्म इति सूत्रकारोक्तेरिति वाच्यं, "नात्र हवींषि प्रत्यभिघारयति" इति स्विष्टकृति प्रत्यभिघारणनिषेधाद् हविरभिघारणस्यावदानधर्मानन्तर्गतत्वात् । अत एव यत्किञ्चिदेकतरावदानलोपे यादृशं प्रायश्चित्तं हविरभिघारणलोपे तादृशप्रायश्चित्तं न कार्यं, किन्तु अग्न्याज्ययोर्मध्येन हविर्नयनानन्तरं प्राथमिकहविरभिघारणलोपे यादृशं तादृशमेव द्वितीयादिहविरभिघारणलोपे । स्पष्टं चेदं याज्ञिकग्रन्थेषु । एवञ्च स्विष्टकृद्धोमानन्तरम् तेन हविषा होमान्तराभावाद् ग्रहीतव्यावदानार्हतासंपादकं हविरभिघारणं न कार्यं, व्यर्थत्वात् । तथा च "नात्र हवींषि प्रत्यभिघारयति" इति निषेधो नित्यानुवादः । एवञ्चाग्नौकरणादौ तृतीयं हविरभिघारणं न कार्यम् । किञ्च यत्र यत्रावदानमस्ति तत्रैव धर्मो अनुष्ठेय इति वृत्तिः । "नात्र हवींषि" इति निषेधे जागरूके कस्तदर्थः ? स्विष्टकृदवदानधर्मो हविरभिघारणा-

---

(१) 'वृत्तिकृता' च०

आतिप्रणीतेऽ*यं होमोऽन्यथा मुख्ये। 'अतिप्रणीते*ऽग्नाविध्ममुपसमाधाय' इति बह्वृचपरिशिष्टात्। केचित्तघटितोऽन्यावदानधर्मस्तु तद्घटित इति चेत्? अशुद्धत्वाद्वृत्तिलभ्यस्य सामान्यतोऽवदानधर्मस्यानिरुक्तेः। अत्र स्विष्टकृतीति व्याख्यातं च प्रकृताभिप्रायं, चरमावत्ते इत्यर्थात्। अग्नौकरणादौ चरमावत्तस्य स्विष्टकृत्त्वाच्च तत्र हविषो नाभिघारणं, प्रयोजनाभावादित्यर्थः। *अयं होम इति। पूर्वोक्तमनुज्ञातं कृत्वाऽतिप्रणीतं यज्ञोपवीती परिसमुह्य पर्युक्ष्य प्राचीनावीती तूष्णीमग्नाविध्ममाधाय मेक्षणं स्रुवेणोपस्तीर्य तदन्नं द्विधा विभज्योत्तरभागमध्यादङ्गुष्ठपर्वमात्रं मेक्षणेनावदाय पूर्वभागादादाय पञ्चावत्ती तु तृतीयं क्षिप्त्वा हविरवत्तं चाभिघार्य 'सोमाय' इत्याहुतिमग्निदक्षिणभागे पराचीनपाणिर्हुत्वा पूर्ववद्दक्षिणभागस्थचरोरवदाय द्वितीयामाहुतिं जुहुयात्। नात्र हविःप्रत्यभिघारणम्। ततो यज्ञोपवीती मेक्षणमनुप्रहरेदिति। पैतृकधर्मेण जुह्वतां प्रयोगः। *अग्नाविति। बह्वृचपरिशिष्टत्वेग्निर्विशेषितः–

योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्चापि जायते॥
तस्मात्समिद्धे होतव्यं नासमिद्धे कदाचन।
आरोग्यमिच्छता चायुः श्रियं चात्यन्तिकीं तथा॥ इति।

समिन्धनं चोक्तम्—

जुहूषंश्च हुते चैव पाणिशूर्पस्रुवादिभिः।
न कुर्यादग्निधमनं कुर्यात्तु व्यजनादिना॥ इति।

(य(१)त्तु—

मुखेन च धमेदग्निं मुखाद् ह्येषो ह्यजायत।
नाग्निं मुखेनेति तु यल्लौकिके योजयेत्तु तत्॥ इति) तत् "मु-

---

(१) कंसान्तर्गतं नास्ति ङ।

स्वाग्निधमनक्रिया” इति कलिवर्ज्यम् । अत्र श्राद्धहेमाद्रिस्थोऽग्निसमिन्धनसमित्सु वर्ज्यावर्ज्यविवेको वृद्धैः श्राद्धसागरे प्रदर्शितः । यथा--

पलाशफल्गुन्यग्रोधप्लक्षाश्वत्थविकङ्कताः ।
उदुम्बरस्तथा बिल्वश्चन्दनं यज्ञियाश्च ये ॥
सरलो देवदारुश्च सारश्च खदिरस्तथा ।
समिदर्थे प्रशस्ताः स्युरेते वृक्षा विशेषतः ॥
ग्राह्याः कण्टकिनश्चैव यज्ञिया येच केचन ।
पूजिताः समिदर्थे ते पितॄणां वचनं यथा ॥
समिद्भिस्त्वाज्यलिप्ताभिर्जुहुयाद् यो हुताशनम् ।
फलं यत्कर्मणस्तस्य तन्मे निगदतः शृणु ॥
अक्षयं सर्वकामीयमश्वमेधफलं हि तत् ।
श्लेष्मातको नक्तमालः कपित्थो नीलशाल्मली ॥
चिरबिल्वस्तथा टङ्कस्तिन्दुकाम्रातकौ तथा ।
तिलकः कोविदारश्च एते श्राद्धे विगर्हिताः ॥
निवासाश्चापि कीटानां गर्हिताः स्युरयज्ञियाः ।
गुल्मैश्च वेष्टिता ये च वल्लीभिश्च समन्ततः ॥
शकुनीनां निवासाश्च वर्जयेत्तान् द्विजोत्तमः ।
अन्यांश्चैवंविधान् सर्वान् वर्जयेद्वै अयज्ञियान् ॥ इति ।

पलाशः किंशुकः । फल्गुः काकोदुम्बरिका । न्यग्रोधो वटः । प्लक्षः जटी । अश्वत्थः पिप्पलः । विकङ्कतः स्रुववृक्षः । उदुम्बरः जन्तुफलः । बिल्वो मालूरः । चन्दनं मलयजम् । यज्ञियाः काश्मर्यादयः । सरलः पीतद्रुः । सालो रालः । खदिरो वालपत्रः । कण्टकिनः इङ्गुदीप्रभृतयः । श्लेष्मातकः शेलुः । नक्तमालः करञ्जः । कपित्थो दधित्थः । नीपः कदम्बः । शाल्मलिः स्थिरायुः । चिरबिल्वः पूतिकरञ्जः । टङ्को हिमारकः । तिन्दुकः स्फूर्जकः । आम्रातकः कपीतनः । तिलको रोध्रः । कोविदारकः

स्य *रक्षोनिबर्हणार्थत्वान्मुख्ये वदन्ति । तदे*तद्विरोधाच्चिन्त्यम् । प्रयोगपारिजातेऽप्येवम् । शौनकः—

*स्वाहाकारेण होमं तु भवेद्यज्ञोपवीतवान् ।
तत्र प्रागग्नये हुत्वा पश्चात्सोमाय हूयते ॥
अग्नौ यज्ञोपवीत्येव प्रक्षिपेन्मेक्षणं ततः ॥

छन्दोगपरिशिष्टे--

अग्नौकरणहोमश्च कर्तव्य *उपवीतिना ।
अपसव्येन वा कार्यो *दक्षिणाभिमुखेन च ॥

*कातीयानां त्वपसव्यमेव, पिण्डपितृयज्ञवद्धुत्वेति सर्वातिदेशात् । सव्यं तु छन्दोगपरम्, गोभिलेनैतदुत्तरमेवापसव्योक्तेः ;

छन्दोगा जुहुयुः सव्येनापसव्येन याजुषाः ।

कश्चनारः । अयज्ञियाः पिचुमन्दादयः । *रक्ष इति । अदृष्टार्थत्वादित्यर्थः । *एतद्विरोधादिति । अधिकरणसप्तमीविरोधादित्यर्थः । सतिसप्तम्या अकारकविभक्तित्वेन दुर्बलत्वादिति भावः । एतच्च पार्वणाद्यग्नौकरणं प्राचीनावीती उपवीती वा कुर्यात्, तत्प्रकृतिभूतस्य पैतृयज्ञिकहोमस्य पैतृकत्वदैविकत्वाभ्यां विकल्पितोभयधर्मकत्वात् । तथाचोक्तं पितृयज्ञे स्वाहाकारेण वाग्निं पूर्वमिति । तत्र प्रकृतौ पैतृकधर्मेण जुह्वतां प्रयोगमुक्त्वा दैविकधर्मेण जुह्वतां तमाह--*स्वाहाकारेणेति । *उपवीतिनेति समीचीनपाणित्वप्राङ्मुखत्वयोरुपलक्षणम् । *दक्षिणाभिमुखेन चेति पराचीनपाणित्वोपलक्षकम् । बह्वृचानामेवायं विकल्पः । कातीयच्छन्दोगयोस्त्वेकैकधर्मनियम इत्याह--*कातीयानांत्वित्यादिना । वृत्तिमते पाणिहोमेऽनुज्ञाविरहादभ्यनुज्ञायामिति पदं यत्र पिण्डपितृयज्ञकल्पः प्राप्नोति तत्राग्निप्राप्तेः सत्त्वान्न पाणिहोमेऽभ्यनुज्ञा, यत्र तु काम्यादौ न तत्कल्पः तत्राग्निप्राप्त्यभावात्तस्मिन्सत्याज्ञा-

इति वृद्धयाज्ञवल्क्योक्तेश्च ॥

अथ पाणिहोमः । आश्वलायनः—'अभ्यनुज्ञायां पाणिष्वेव वा' इति । *पिण्डपितृयज्ञकल्पाभावेनाऽग्न्यभावे काम्यादिष्वित्यर्थः । *तेन बह्वृचानामेकोद्दिष्टे पाणिहोमो भवत्येव । निषेधोऽन्यपरः । पाणिष्विति बहुवचनात्सर्वविप्रपाणिषु होम इति वृत्तिः । *एवं मातामहेऽपि । शौनकोऽपि--

*सर्वेषामुपविष्टानां विप्राणामथ पाणिषु ।
विभज्य जुहुयात्सर्वं सोमायेत्यादिमन्त्रतः ॥

यत्तु हेमाद्रौ कात्यायनः--

पित्र्ये यः पङ्क्तिमूर्धन्यस्तस्य पाणावनग्निकः ।
हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत् ॥ इति,

तद् बह्वृचातिरिक्तानाम् । यत्तु तत्रैव मात्स्ये—

अग्न्यभावे तु विप्रस्य पाणौ वाऽथ जलेऽपि वा ।
अजकर्णेऽश्वकर्णे वा गोष्ठे वाऽथ शिला(१)न्तिके ॥ इति

तत्तीर्थश्राद्धविषयम्,

*तद्यदापां समीपे स्याच्छ्राद्धं ज्ञेयो विधिस्तदा ।

येन व्याचष्टे—*पिण्डेति । *तेनेति भाष्यकारमतम् । वृत्तिकारमते एकोद्दिष्टशब्दस्य सपिण्डनार्थत्वादित्युक्तम् । पाणिर्दक्षिणः, सव्यस्य शिष्टगर्हितत्वात् । *एवमिति । मातामहादित्रिप्रकरस्याप्यधिकरणकारकत्वात् । *सर्वेषामिति । विभागस्य मन्त्रान्तरस्य च शङ्कावारणाय । उपविष्टेषु विप्रेष्वपि पित्र्याद्यर्थं निमन्त्रित एव प्रकृतत्वात् । यथा "आग्नेय्याग्नीध्रमुपतिष्ठते" इत्यत्र ज्योतिष्टोमे प्रकृता आग्नेय्य ऋचः । "अग्न आयाहि वीतये" इत्यादयः अन्याश्च दाशतय्याम् । तत्र या काचनाग्नेयी ग्राह्येति प्राप्ते लाघवात् प्रकृतैव सा ग्राह्येति तद्वत् । *तद्यदेति ।

---

(१) 'शिवान्तिके' क० ञ० ।

इति तत्रैव कात्यायनोक्तेः । निर्जले त्व *जकर्णादौ । यत्तु चन्द्रोदये यमः—

*दैवविप्रकरेऽनग्निः कृत्वाग्नौकरणं द्विजः । इति,
*तदभार्यपरम् ,
अपत्नीको यदा विप्रः श्राद्धं कुर्वीत पार्वणम् ।
पित्र्यविप्रैरनुज्ञातो विश्वेदेवेषु हूयते ॥

इति तत्रैव कात्यायनोक्तेः । हूयते इति छान्दसो व्यत्ययः । हेमाद्रौ वायवीये—

वि(१)धुरो दैविके कुर्याच्छेषं पित्र्ये निवेदयेत् ।

दैवविप्रानेकत्वे तत्रैव--

वैश्वदेवे यदैकस्मिन् भवेयुर्द्व्यादयो द्विजाः ।
तदैव पाणौ होतव्यं स्याद्विधिर्विहितस्तदा ॥

सोऽप्याद्यः, *'प्रथमं वा नियम्येत' इति न्यायात् ।

अग्नौकरणहोमं तु कुर्यादप्स्वातियन्मतम् ।

इतिपूर्वार्धम् । *अजकर्णादाविति ।

अप्सु चैव कुशस्तम्बे अग्नि कात्यायनोऽब्रवीत् ।
रजते च सुवर्णे च नित्यं वसति पावकः ॥

इति शङ्खोक्तकुशस्तम्बाद्यपि द्रष्टव्यम् । दर्भवटुश्राद्धे शिष्टानां कुशस्तम्बे तदाचारोऽपि--*दैवविप्रेति । तदेकत्वमनुपदं स्फुटम् । पृथ्वीचन्द्रमतमाह-*तदभार्यपरमिति । *प्रथमं वेति । "प्रथमं वा नियम्येत कारणादतिक्रमः स्यात्" (जै० सू० ११-१-८-४३) इति सूत्रम् । यथा "कपिञ्जलानालभेत" इत्यादौ प्रथमोपस्थितं त्रित्वमेव नियम्यते । यावत्कपिञ्जलालम्भासम्भ-

---

(१) पराशरमाधवीये-दैविकब्राह्मणपाणौ होमपक्षेऽपि पित्र्यब्राह्मणपात्रेष्वेव शेषं निक्षिपेत् । अत एव वायुपुराणे-हुत्वा दैवकरेऽनग्निः शेषं पित्र्ये निवेदयेत् । न स्मृताः शेषभाजो हि विश्वेदेवाः पुरागगैः ॥ इति ।

*तेन मृतभार्यस्य दैवे होमः। अनुपनीतब्रह्मचार्यादेस्तु *पित्र्ये,

*'अग्न्यभावः स्मृतस्तावद्यावद्भार्यां न *विन्दति ।'
इति हेमाद्रौ जातूकर्ण्योक्तेः। *सभार्यस्य नष्टाग्नेरपि

वेनै क्वचिद्विश्रान्तेः स्वीकर्तव्यत्वात् प्रथमबहुत्वातिक्रमे कारणाभावाच्च। यथा 'ब्राह्मणान् भोजयेत्' इत्यादौ विप्रत्रयभोजनेन शास्त्रार्थसिद्धावप्यधिकफलार्थं त्रित्वमतिक्रम्य चतुरादिर्भोज्यते नचेह चतुराद्यालम्भे फलविशेषस्तद्वदत्रापि कारणाभावान्न प्रथमातिक्रम इत्यर्थः। *नेनेति। अपत्नीक इत्यस्य विधुर इत्युपसंहारेणेत्यर्थः। *पित्र्ये इति। विधुरान्यत्वात्;

अग्न्यभावे तु विप्रस्य प्राणौ दद्यात्तु दक्षिणे।

इति अग्न्यभावरूपनिमित्तोपादानाद्विप्रपदेन पित्र्यलाभाच्च। अत्राग्न्यभावः कुत इत्याकाङ्क्षायां भार्यापरिग्रहाभावेन तदुत्तरकालाग्निस्वीकाराभावेन चेत्यर्थमुत्तरार्धमाह-*अग्न्यभाव इति। *विन्दतीति। सप्तपदीभ्रमणं विना भार्यात्वाजननलाभेन तादृशाग्निस्वीकाराभावस्यापि लाभः। स्वीकृताग्न्युच्छेदोऽपि अग्न्यभाव एवेत्याह-*सभार्यस्येति। अग्न्यसन्निधानोपलक्षणमेतत्। वस्तुतस्तु—

अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्।
यो ह्यग्निः स द्विजो विप्रैर्मन्त्रवद्भिरुदाहृतः॥

इति मनुवचने यत् पाणावेवेति एवकारेण लौकिकाग्निजलाद्यधिकरणान्तरनिराकरणं तद् भार्यापरिग्रहाभावप्रयुक्त एव,

अग्न्यभावे तु विप्रस्य पाणौ दद्यात्तु दक्षिणे।
अग्न्यभावः स्मृतस्तावद्यावद्भार्यां न विन्दति॥

इति वचनात् अन्यत्र तु पाणिरपीत्यर्थः। मृतभार्याधिकारिकदैवविप्रपाणिहोमे प्राचीनावीतं स्यादित्याशङ्कावारणायाह-

पित्र्यविप्रकरे इति पृथ्वीचन्द्रः । *उपवीतेन दैवे होमः, प्राचीनावीतेन पित्र्ये । *यद्वा सर्वत्र दैवपित्र्यकरयोर्विकल्प इति हेमाद्रौ मदनरत्ने पारिजाते च । यदा तु पितृमातामहयोर्दैवपित्र्यविप्रभेदस्तदा *भेदेन पाणिहोम इत्यपरार्कचन्द्रिकादयः । यदा तु दैवं तन्त्रं तदा तन्त्रेण सकृदेव पाणिहोम इति केचित् । *हेमाद्रिस्तु—

मातामहस्य भेदेऽपि कुर्या *त्तत्रैव साग्निकः ।

इति कातीयस्मृते *र्भेदमाह । *एवं पित्र्येपि । माध-

---

*उपवीतेनेति । ननु अपत्नीकत्वं विधुरत्वमिनि न सम्यक् । यतः पितृयज्ञे स्वाहाकारेण वाग्नि पूर्वमिति पक्षः दैविकधर्मेण जुहुतामुक्तः प्राक्तनश्च पैतृकधर्मेण । तदनुसारेण च दर्शश्राद्धादावपि पक्षद्वयम् । अत एव—

अनग्निको यदा विप्रः श्राद्धे कुर्वीत पार्वणम् ।
अग्नौकरणवत्तत्र होमो दैवकरे भवेत् ॥

इति कश्यपवचने उपवीतस्वाहाकारादिदैविकधर्मेण जुहुतामिदमिति हेमाद्रिः । यत्तत्रानग्निकत्वं यच्चान्यत्र विधुरत्वापत्नीकत्वादि तदतन्त्रम् । एवञ्च सर्वत्र स्वधाकारादिपित्र्यधर्मिणां पित्र्यविप्रकरे स्वाहाकारादिदेवधर्मिणां देवविप्रकरे होमो नतु पित्र्यधर्मिणां वैधुर्यादिनिमित्तको देवविप्रकरे, अन्यधर्मिणोऽन्यधर्मासंभवादित्यस्वरसं सूचयन्नेवाह—*यद्वेति । *भेदेनेति पार्वणान्तरसाद्गुण्यार्थम् । *हेमाद्रिस्त्विति तुरप्यर्थे । *तत्रैवेति । मातामहवैश्वदेविकविप्रभेदे तत्प्रथमकरे इत्यर्थः, "वैश्वदेवे यदैकस्मिन्" इत्युक्तवचनात् । *भेदम् आवृत्तिम् । अन्यथा तन्त्रमित्यर्थः । मातामहवैश्वदेविकविप्रभेदेऽभेदे वाऽऽवृत्तिरित्यर्थस्तु अशुद्धः । अभेदे आसनार्चनादिवत् होमस्यापि तन्त्रताया युक्तत्वात् । तन्त्रेणेति पाठान्तरम् । तत्र भेदमित्यस्य देवविप्रभेदे-

वीयेऽप्येवम्। एवं साग्नेरपि विदेशादौ पाणिहोमो ज्ञेयः। यत्तु कर्कैणाग्निं विना श्राद्धमेव नास्तीत्युक्तम्, तत्सपिण्डीकरणवार्षिकाद्यकरणापत्तेर्यत्किंचिदेव। यत्तु बृहन्नारदीये—

अनाग्निर्दूरभार्यश्च पार्वणे समुपस्थिते।
भ्रातृभिः कारयेच्छ्राद्धं साग्निकैर्विधिवद्द्विजः॥
क्षयाहदिवसे प्राप्ते स्वस्याग्निर्दूरगो यदि।
*तथैव भ्रातरः स्युश्चेल्लौकिकाग्नाविति स्थितिः॥
औपासनाग्नौ दूरस्थे समीपे भ्रातरि स्थिते।
यद्य *ग्नौ जुहुयाच्छ्राऽपि पाणौ वा सहि पातकी॥
औपासनाग्नौ दूरस्थे केचिदिच्छन्ति सत्तमाः।
पाणावेव तु होतव्यमिति नैतत्समञ्जसम्॥ इति,

तद्बृद्धानादरादुपेक्ष्यम्। हेमाद्रौ यमः—

अग्नौकरणवत्तत्र होमो विप्रकरे भवेत्।
*पर्युक्ष्य दर्भानास्तीर्य यतो ह्यग्निसमो द्विजः॥

ऽपि तन्त्रमित्यर्थस्तु अशुद्धः। तत्रासनार्चनादिवद्धोमस्याप्यावृत्तेरेवौचित्यात्। किंतु प्रकारेणेत्यर्थः। साग्निक इति तूपलक्षणम्। स्वधाकारादिपित्र्यधर्मेण जुह्वता त्वाह—*एवमिति। अमावास्यादिश्राद्धेषु विप्रभेदे पार्वणान्तरसाद्गुण्याय भेदेन पाणिहोमः। तदैक्ये तु तन्त्रेणैवेत्यर्थः।। यत्तु—

अग्नौकरणवत्कुर्याद् द्विजातौ वैश्वदेविके।
पाणावेव तु तद्यान्न तु पित्र्ये कदाचन॥ इति,

तद्दैवे कृत्वा पुनः पित्र्ये न कार्यमित्येवमर्थम्। * तथैव दूरगा एव। *अग्नौ लौकिकाग्नौ। शूद्रस्यामश्राद्धे पाणावग्नौकरणमित्युक्तं स्मर्तव्यम्। *पर्यस्तदर्भानिति। परितः सर्वतो अस्ता न्यस्ता दर्भास्तानित्यर्थः। परितो दर्भा न्यसनीयाः। पर्युक्ष्य

*मेक्षणेन करेण वा होमः। मेक्षणप्रहरणं नेति वृत्तिः। स्मृतिरत्नावल्याम्—

*नानुज्ञा पाणिहोमे स्यान्न स्तः पर्यूहनोक्षणे।
नाग्ने तमद्यादिति च न स्यातामिध्ममेक्षणे॥

कर्काचार्योऽप्येवमाह। माधवीये चन्द्रिकायां चा*नुज्ञादि सर्वं भवतीत्युक्तम्।

*पाणिहोमे प्रश्नाद्याहापरार्के शौनकः-'अनग्निश्चेदाज्यं गृहीत्वा भवत्स्वेवाग्नौकरणमिति पूर्ववत्तथास्तु'

दर्भानास्तीर्येति पाठः। पर्युक्षणे वाचनिकमिति मतान्तरम्। वृत्तिकृन्मतमाह—*मेक्षणेनेति। *नानुज्ञेति च। अनुज्ञावचनं प्रत्यनुज्ञावचने च न स्त इति वृत्तिकृदुक्तेः। मेक्षणेन होमपक्षे तत्प्रहरणमर्थाल्लुप्यते। करेण तत्पक्षे तु मेक्षणमेवेति विशेषः। अत्र पाणिहोमे इध्ममेक्षणविप्राभ्यनुज्ञा न सन्ति। पित्रादित्रिपपाणि परिसमुह्य पर्युक्ष्य वामेनोपस्तीर्य दक्षिणेनावदाय जुहुयादिति स्मृत्यर्थसारः। *अनुज्ञादीनि। विप्राभ्यनुज्ञा ग्राह्या विरोधविरहात् अग्रिमशौनकवाक्याच्च। मेक्षणं चोपादेयम्। अन्नदानरूपकार्यसत्त्वात्। कार्ये प्रतिनिध्यभावाच्च परिसमूहनपर्युक्षणे तु न भवतः। पांसुनिरसनलक्षणदृष्टकार्यलोपेन नियमादृष्टमात्रस्याप्रयोजकत्वात्। परिस्तरणं कार्यमेव। अदृष्टमात्रौपायिकत्वात्। इध्मा तु लुप्यते। अग्न्यभावे तत्समिन्धनार्थस्य तस्याप्यभावात्। अनुज्ञानिषेधेऽस्वरसं दर्शयन्नेवाह—*पाणिहोमे इति। आज्यमाज्यप्लुतमन्नं दर्व्यादिपात्रे स्थापयित्वा तत्पात्रमुद्धृत्य करे धारयित्वा भवत्स्वेवाग्नौकरणमिति कर्माधिकरणकारकयोर्निर्देशं कृत्वा शेषं पूर्ववत् अग्न्यधिकरणहोमवत् करिष्ये करवै करवाणीति वाऽख्यातपदं प्रयुञ्जीत ब्राह्मणास्तु तथाऽस्त्वित्यनुज्ञां दद्युः। यद्वा अत्रापि पूर्ववादित्यनुवर्तते। तेन क्रमेण क्रियतां कुरुष्व कुरु इति वा अनुज्ञावचनं ल-

इति। *आश्वलायनः-'यदि पाणिष्वाचान्तेष्वन्यदन्नमनुदिशत्यन्नमन्ने सृष्टं दत्तमृध्नुकम्' इति। पाणौ हुतं पात्रे निधाय विप्रैराचम्य भोजनार्थमन्ने परिविष्टे हुतशेषं पात्रेषु दद्यादित्यर्थः। सृष्टं प्रभूतम्। *नैमित्तिकं चेदमाचमनं न हुतभक्षणनिमित्तम्।

*अन्नं पाणितलं दत्तं पूर्वमश्नन्त्यबुद्धयः।
पितरस्तेन तृप्यन्ति शेषान्नं न लभन्ति ते॥
यच्च पाणितले दत्तं यच्चान्यदुपकल्पितम्।
एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते॥

इति बह्वृचपरिशिष्टात्। हेमाद्रावप्याचमने हेत्वर्थवाद उक्तः *'पाण्या(१)स्यो हि द्विजः स्मृतः' इति। भाष्ये

भ्यते। तथा पाणिहोमेऽग्नौकरणधर्मान्तरातिदेशोऽपि ज्ञातव्यः। तेन होमार्थान्ने पूर्वार्धपरार्धकल्पना अभिघारणप्रत्यभिघारणे द्विरवदानं मेक्षणेन करेण वा होम इति हुतशेषप्रतिपत्तिमाह-*आश्वलायन इत्यादिना। *यदीति। यदा द्विजपाणिषु जुहुयात्तदा होमाधिकरणीकृतपाणिषु द्विजेषु कृताचमनेषु सत्सु अन्यदन्नमनुदिशति ददाति। अथानन्तरं पाणौ हुतादन्नाच्छेषमन्नं किञ्चिद्ब्राह्मणेभ्यो दद्यात्। पित्र्यविप्रपात्रेषु निक्षिपेदित्यर्थः। आचमनं च निष्क्रम्य कार्यमिति वृत्तिः। ननु भक्षणाभावे कुत आचमनम् अशुचित्वाभावात् अथ भक्षणेऽशुचित्वेऽपि कुत आचमनम्? वचनादिति चेत्? अभक्षणेऽपि तत एवाचमनं कर्माङ्गत्वेचाशुचित्वाभावेऽपि नैमित्तिकाचमनदर्शनादित्याह-*नैमित्तिकमिति। पाणिहोमनिमित्तकमित्यर्थः। तेनाग्नौ होमपक्षे तन्न कार्यं निमित्ताभावात्। पूर्वभक्षणं निषेधति-*अन्नमिति। *पाण्यास्य इति। तथा चाभ्यवहार्यस्य गौणास्यसंयोगादाचमनम्।

---

(१) ब्राह्मणेवोक्तनिमित्तेषु नित्यमाचमनं कार्यमित्यर्थः।

ष्वाचान्तेषु *भक्षितेषु । चमु भक्षणे भक्षणोत्तरं च नाचमनं *अग्निसाम्यात् । (१)*पूर्वनिषेधस्तु सपिण्डीकरणे ज्ञेयः, *ददातिचोदितत्वात् न त्वत्र जुहोतिचोदितत्वादित्युक्तम् । नत्वेतद्बहुसंमतम् । यत्तु बौधायनेन—

*तस्मिंस्तु प्राशिते दद्याद्यदन्नं प्रकृतं भवेत् ।

इति भक्षणमुक्तं, तत् तच्छाखीयानामेवेति हेमाद्रिः । तत्रैव यमः—

पित्र्यपाणिहुताच्छेषं पितृपात्रेषु निक्षिपेत् ।
अग्नौकरणशेषं तु न दद्याद्वैश्वदेविके ॥

तच्च वाचनिकमेव, अशुचित्वाभावादित्यर्थः । *भक्षितेष्विति । एतन्मते नान्नद्वयमिश्रणम् । *अग्निसाम्यादिति । तदुक्तम्—

अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ।
यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते ॥ इति ।

एवं सति "अन्नं पाणितले दत्तम्" इति निषेधविषयमाह—*पूर्वेति । *ददातीति । हुतशेषं पितृभ्यो ददातीति सपिण्डने ददातिचोदितस्यैव दत्तमित्यनेन ग्रहणम् । इदं तु जुहोतिचोदितमिति नात्र तन्निषेधः प्रवर्तते इत्यर्थः । नच वृत्तिकृतां ददात्यचोदिते दत्तमिति कथमिति वाच्यम्, तन्मते दत्तमित्यस्य विधितः पाणौ निहितमित्यर्थकत्वात् । *तस्मिन्निति ।

अग्नौकरणशेषेण यदन्नमभिघारयेत् ।

इति पूर्वार्धम् । अग्नौ आज्याहुतित्रयं ततो हुतशिष्टाज्याभिघारितान्नभक्षणमित्यर्थः । शाङ्खायनानां तु अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा यमायाङ्गिरस्वते स्वाहेति दैविकधर्मेण जुह्वतामाहुतयः । एवमन्येषामपि स्वस्वसूत्रानुसारेण द्वयं त्रयं

---

(१) 'अन्नं पाणितले' इत्यादिकः ।

*एतद्वाग्निहोमेपि समम् । कर्कस्तु सूत्रे हुतशेषं दद्येत्यविशेषात्सर्वविप्रेषु दद्यादित्याह । *तत्रैव वृद्धवसिष्ठः—

पित्र्यविप्रकरे हुत्वा शेषं पात्रेषु निक्षिपेत् ।
पिण्डेभ्यः शेषयेत्किञ्चिन्न दद्याद्वैश्वदेविके ॥

(१)अथा*पस्तम्बानां सूत्रे-'उद्ध्रियतामग्नौ च क्रियतामित्यामन्त्रयते काममुद्ध्रियतां काममग्नौ च क्रियतामित्यतिसृष्ट उद्धरेज्जुहुयाच्च'। नष्टाग्निविधुरादेर्विशेषो बृहन्नारदीये-

नष्टाग्निर्दूरभार्यश्च पार्वणे समुपस्थिते ।
संधायाग्निं ततो होमं कृत्वा तं विसृजेत्पुनः ॥

अयाश्चेति तत्कालेऽग्निं संधाय हुत्वा त्यजेदित्यर्थः। एतदापस्तम्बानामेव । पाणिहोमस्तु छन्दोगादीनाम्। विश्वप्रकाशेपि-

*साग्निरौपासनेऽनाग्निरग्नौ कुर्वीत लौकिके ।
पाणौ होमं प्रशंसन्ति नत्वापस्तम्बशाखिनाम् ॥
*स्नातका विधुरा वा स्युर्यदि वा ब्रह्मचारिणः ।
अग्नौकरणहोमं तु कुर्युस्ते लौकिकेऽनले ॥
अयाश्चाग्ने मनोज्योतिरुद्बुध्य व्याहृतीर्हुनेत् ॥

वा बोध्यम् । *एतत् हुतशेषान्नस्य पित्र्यपात्रे दानं वैश्वदेवपात्रे वर्जनं च। कर्कोक्तमर्थं निराकरोति-*तत्रैवेति । इदमुपलक्षणम्-उपवीतादिधर्मेण जुह्वतामग्नौ दैवविप्रकरे वा होमेऽपि शेषदानं पित्र्य एव पात्रे न दैवे इत्यपि द्रष्टव्यम् । *आपस्तम्बेत्यादि आपस्तम्बानधिकृत्य । *साग्निरिति द्विविधस्याप्याहिताग्नेर्दक्षिणाग्निरिति मतेनेदम् । *स्नातका इति प्रागुक्तद्विजपाणिस्तु एतन्मते आश्वलायनपर इति न तद्विरोधः । आपस्तम्बेन मासि-

---

(१) 'अथ' नास्ति क० ञ०।

*ततोऽनुज्ञातोऽग्नीन्धनाद्याज्यभागान्ते यन्मे मातेत्याद्यैर्जुहुयात् । तत्र सप्तान्नाहुतयः षडाज्यस्येति त्रयोदश । व्यत्ययो वा । यथा—'यन्मे माता प्रलुलोभ तन्मे रेतः पिता वृङ्क्तां याऽस्तिष्ठन्ति' इति द्वाभ्याममुष्मैस्वाहेति पितुर्नाम्ना द्वौ होमौ । यन्मे पितामही प्रलुलोभ तन्मे रेतः पितामहो वृङ्क्तामन्तर्दधे (१)ऋतुभिरिति तन्नाम्ना पितामहाय द्वौ । यन्मे प्रपितामही प्रलुलोभ तन्मे रेतः प्रपितामहो वृङ्क्तामन्तर्दधे ऋतुभिरिति तन्नाम्ना प्रपितामहाय द्वौ । मातामहेषु तूहः—'यन्मे मातामही प्रलुलोभ तन्मे रेतो मातामहो वृङ्क्ताम् । अन्यं मातामहाद्वृद्ध(२)म् इत्यादौ । यन्मे मातुः पितामही प्रलुलोभ तन्मे रेतो मातुः पितामहो वृङ्क्ताम् । अन्यं मातुः पितामहाद्वृद्ध(२)म् यन्मे मातुः प्रपितामही प्रलुलोभ तन्मे रेतो मातुः प्रपितामहो वृङ्क्ताम् । अन्यं मातुः प्रपितामहाद्वृ(२)द्धम् सर्वत्रादयमुष्मा इत्यत्र ङेन्तं तत्तन्नाम योज्यम् । तदु गृह्यसंग्रहे—

योज्यः पित्रादिशब्दानां स्थाने मातामहादिकः ।
अन्नहोमे तथा *स्पर्शे जलपिण्डादिदानके ॥
यन्मे मातामहीत्यादि तत्रोदाहरणं भवेत् ॥

ततो ये चेत्येकान्नाहुतिः । ततः स्वाहा पित्र्ये इत्याद्यैराज्यं हुत्वा स्विष्टकृतं हुत्वा *सर्वभक्ष्यं किञ्चिदादायोदगुष्णं भस्मापोह्य तत्र तूष्णीं स्वाहाकारेण जुहोति । परिषेचनान्तं स्थालीपाकवत् ।

श्राद्धविधौ त्रयोदशाहुतय उक्तास्ता दर्शयति—*तत इति । *स्पर्शे ब्राह्मणभोजनार्थान्नस्पर्शे । *सर्वभक्ष्यं सर्वविधमन्नम् ।

---

(१) 'ऋतुभिः' नास्ति क० ञ० । (२) 'द्धे' ग० ।

अयमग्नौकरणहोमो मासिकश्राद्ध एव । 'तच्च स्मार्ताग्न्यभावे न कार्यम्' इति केचित् । कार्यमेवेति बहवः । अतएव *सर्वाधानिनो होमवर्जं मासिकश्राद्धमुक्तं सुदर्शनभाष्ये । महालये *तद्वदित्येके प्रकरणान्तरत्वात् । कर्मान्तरत्वेन स्मार्तपार्वणवत्कार्यम् इति त्वस्मद्गुरवः । आब्दिकादिषु तु स्मार्तपार्वणविधिरेव । एवं मातृवार्षिकादिषु । मासिश्राद्धविकृतावष्टकायां मातृश्राद्धे वैकृतहोमेन प्राकृतहोमबाधः । 'अन्वष्टकासु मातृश्राद्धं न' इति भाष्ये । *तत्रापि श्राद्धान्तरवत् क्रियमाणे तु यन्मे मातेत्यादौ गुणत्वेऽपि मातृप्राधान्यं विवक्षितम्, 'मासिश्राद्धेन कल्पो व्याख्यातः' इति सूत्रात् । *'आग्नेय्येव मनोता कार्या' इति वचनाद*ग्निशब्दस्यैव वैकृतदेवताभिधायित्वम् । *तेनामुष्मा इत्यत्र 'अमुकशर्मभ्यां *पितृभ्याम्' इत्याद्यूहः कार्यः । 'तच्च मासिश्राद्धं जीवत्पित्रा(१)दीनां व्युत्क्रममृतपित्रा(१)दीनां च कार्यम्' इत्युक्तं सुदर्शनभाष्ये । तत्प्रकारस्तु व-

*सर्वाधानिन इति । आपस्तम्बानां मासिश्राद्धस्यापूर्वत्वेन पितृयज्ञाद्दक्षिणाग्निप्राप्त्यभावात्स्मार्तस्याभावेन सर्वाधानिनोऽधिकरणाभावाद्धोमलोप इत्याशयः । इदमापाततः, पितृयज्ञधर्मकत्वाभावेऽपि स्मृतिवाक्ये न दक्षिणाग्नेः पाणिलौकिकाग्न्यादेश्च प्राप्तिसम्भवात् । *तद्वत् होमवर्जं मासिश्राद्धम् । भाष्याशयं निरस्यन्नेव मातुः श्राद्धे साधयति*-तत्रापीति । *आग्नेय्येवेति । यद्यप्यन्यदेवत्यः पशुः स्यादित्यग्नीषोमीयं प्रक्रम्य विहिताऽऽग्नेयीमनोतान्यदेवता कृत्वा दुष्करेति प्राप्ते सिद्धान्तमाह-*अग्निशब्दस्येति । *तेन मातुः प्राधान्येन । *पितृभ्यामिति । "पिता-

---

(१) 'पित्रादिना' क० ज० ।

क्ष्यते । मातापित्रोर्द्वित्वादौ तु नोहः, 'तस्मादृचं नोहेत्' इति निषेधात्, प्रकृतावूहाभावाच्च *पत्नीं सन्नह्येतिवत्। उपदेशमते तूहः। यथा—'यन्मे मातरौ प्रलुलोभतुश्चरत्यावननुव्रते' इत्याद्यस्मत्पितृकृतमासिश्राद्धनिर्णये ज्ञेयमिति दिक्। अन्यत्प्राग्वत् ॥

अथ परिवेषणम् । तच्चोपवीत्येवाऽग्येन देवपूर्वं 'आमासुपक्कम्' इति पात्राण्युपस्तीर्य कुर्यात इति हेमाद्रिः। भारते दानधर्मेऽपि—

आज्याहुतिं विना नैव यत्किंचित् परिविष्यते ।
दुराचारैश्च यद् भुक्तं तं भागं रक्षसां विदुः ॥

तत्रैव शौनकः—

*विधिना देवपूर्वं तु परिवेषणमाचरेत् ।

तत्रैव धर्मः—

फलस्यानन्तता प्रोक्ता स्वयं च परिवेषणे ॥

तत्रैव वायुभविष्ययोः—

भार्यया श्राद्धकाले तु प्रशस्तं परिवेषणम् ।

ब्रह्माण्डे—

नापवित्रेण नैकेन हस्तेन न विना कुशम् ।
(१)नायसे नायसेनैव श्राद्धे तु परिवेषयेत् ॥

मात्रा" (पा०सू०१-२-७०) इत्येकशेषः। *पत्नीमिति। पत्नीद्वित्वे बहुत्वे वा नोहः प्रकृतावूहाभावादिति सिद्धान्तः। *विधिनेति। याज्ञवल्क्यः—

अन्नमिष्टं हविष्यं च दद्यादक्रोधनो नरः।

इष्टं ब्राह्मणानाम्। मनुः—

यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः।

---

(१) अत्राऽयसेनेति पदमयत्नेनेत्यर्थकं ज्ञेयम् । 'नापसव्येन' इति पाठः । इति गपुस्तकाट्टिप्पण्यां दृश्यते तच्चिन्त्यम् ।

वसिष्ठः--

आयसेन तु पात्रेण यदन्नं सम्प्रदीयते।
भोक्ता विष्ठासमं भुङ्क्ते दाता च नरकं व्रजेत्॥

पैठीनसिः–'सीसका*यसरीतिपात्राण्ययज्ञियानि।

तत्रैव हारीतः--

सौवर्णराजताभ्यां च खड्गेनौ*दुम्बरेण वा।
दत्तमक्षय्यतां याति *फल्गुपात्रेण वा पुनः॥

कार्ष्णाजिनिः--

दर्व्या देयं घृतं चान्नं समस्तव्यञ्जनानि च।
उदकं चैव पक्वान्नं नो दर्व्या तु कदाचन॥

यमः--

पङ्क्त्यां विषमदातुश्च निष्कृतिर्नैव विद्यते।

पृथ्वीचन्द्रोदये पराशरः--

सर्वदा च तिला ग्राह्याः पितृकृत्ये विशेषतः।
भोज्यपात्रे तिलान् दृष्ट्वा निराशाः पितरो गताः॥

चन्द्रिकायां वृद्धशातातपः--

हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनादयः।
पितॄणां नोपतिष्ठन्ति भोक्ता भुञ्जीत*किल्बि(१)षम्॥

ब्रह्मोद्याश्च कथाः कुर्यात् पितॄणामेतदीप्सितम् ॥)

*आयसं दर्वीपात्रिकादि अयसेन। *औदुम्बरं ताम्रम्। *फल्गुः काकोदुम्बरिका । *किल्बिषमिति ।

तस्मादन्तरितं कुर्यात् पार्णेनाथ तृणेन वा।

---

(१) एतदग्रे 'तस्मादन्तरितं कुर्यात्पार्णेनाथ तृणेन वा' इत्यर्धमधिकं प· कंसाभ्यन्तरे गपुस्तके वर्तते तट्टिप्पणी च 'इदं धनुश्चिन्हगर्भितं पद्यार्धं केषुचित्पुस्तकेषु नास्ति' इति च वर्तते परमस्माभिस्तदर्धस्य टीकायामुपलम्भात् मूले न स्थापनं कृतमित्यवधेयम्।

घृतपात्रे विशेषो ग्रन्थान्तरे—

ओदने परमान्ने च पात्रमासाद्य मुग्धधीः ।
घृतेन पूरयेत्पात्रं तद् घृतं रुधिरं भवेत् ॥

घृतादिपात्राणि भूमौ स्थापयेन्न भोजनपात्रे इति मदनरत्ने । सङ्ग्रहे—

हस्तदत्तं तु नाश्नीयाल्लवणव्यञ्जनादिकम् ।
अपक्कं तैलपक्कं च हस्तेनैव *प्रदीयते ॥

पात्रालम्भनमुक्तं चतुर्विंशतिमते—

उत्तानं दक्षिणं सव्यं नीचं पात्राण्युपस्पृशेत् ।

याज्ञवल्क्यः—

दत्त्वान्नं पृथिवीपात्रमिति पात्राभिमन्त्रणम् ।
कृत्वेदं विष्णुरित्यन्ने द्विजाङ्गुष्ठं निवेशयेत् ॥

बौधायनः—'विप्राङ्गुष्ठेनानखेनानुदिशति' 'पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखेऽमृतेऽमृतं जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मा मे पितॄणां क्षेष्ठा अमुत्रामुष्मिँल्लोके' इति । अद्य जुहोम्यग्रे स्वाहाशब्दः कातीयसूत्रे उक्तः । पैत्रे स्वधाशब्दः । अङ्गुष्ठे विशेषमाह हेमाद्रौ धौम्यः--

परिघृत्य नचाङ्गुष्ठं द्विजस्यान्ने निवेशयेत् ।

तथा--

उत्तानेन तु हस्तेन द्विजाङ्गुष्ठनिवेशनम् ।
यः करोति द्विजो मोहात्तद्वै रक्षांसि भुञ्जते ॥

इत्युत्तरार्धम् । *प्रदीयते इति । निगमः—

अपेक्षितं यो न दद्याच्छ्राद्धार्थमुपकल्पितम् ।
अधः कृच्छ्रासु घोरासु तिर्यग्योनिषु गच्छति ॥

देवलः—

नाश्रु सम्पातयेच्छ्राद्धे न जल्पेन्न हसेन्मिथः ।

तत्रैव यमः—

विष्णोर्हव्यं च कव्यं च ब्रूयाद्रक्षस्व च क्रमात् ।

दैवे पित्र्ये चेत्यर्थः । तत्रैवात्रिः—

सम्बन्धनामगोत्राणि इदमन्नं ततः स्वधा ।
पितृक्रवादुदीर्येति स्वसत्तां विनिवर्तयेत् ॥
हस्तेनाभुक्तमन्नाद्यमिदमन्नमुदीरयेत् ।

अत्र 'अन्नदाने चतुर्थी स्यात्' इत्यादिविशेषाः पूर्वमुक्ताः । अत्र पूर्वोक्तमन्त्रान्ते 'पुरूरवार्द्रवसंज्ञका विश्वेदेवा देवता इदमन्नं सपरिकरं हव्यम् । (१)अयं ब्राह्मणस्त्वाहवनीयार्थे दत्तं दास्यमानं चातृप्तेः गयेयं भूः गदाधरो भोक्ता इदमन्नं ब्रह्म सौवर्णपात्रस्थमन्नमक्षय्यवटच्छायास्थम् अमुकेभ्यो विश्वेभ्यो देवेभ्य इदमन्नममृतरूपं परिविष्टं परिवेक्ष्यमाणं चातृप्तेः स्वाहा नमो न मम' इति बह्वृचपरिशिष्टहेमाद्र्याद्यनुमतः प्रयोगः । एवं पित्र्ये अमुकगोत्रवसुरूपादि तत्तन्नाम ज्ञेयम् । ततो 'ये देवासः' इति दैवे, 'ये चेह पितरः' इति पित्र्ये केचिज्जपन्ति।

ततोऽच्छिद्रं वाचयेत । तत्रैव प्रचेताः—

आपोशानकरे विप्रे संकल्पाच्छिद्रभाषणात् ।
निराशाः पितरो यान्ति देवैः सह न संशयः ॥

पारस्करः—

संकल्प्य पितृदेवेभ्यः सावित्रीमधुमज्जपः ।

न विभ्रंशेन्न संक्रुध्येन्नोद्विजेन्नात्र कुत्रचित् ॥
प्राप्ते हि कारणे श्राद्धे नैव क्रोधं समुच्चरेत् ।
आश्रितः स्विन्नगात्रो वा न तिष्ठेत् पितृसन्निधौ ॥

स्तम्भभित्त्यादौ निहितशरीर आश्रितः ।

---

(१) 'अयं' नास्ति क. ञ.

श्राद्धं निवे(१)द्यापोशनं जुषप्रैषोऽथ भोजनम् ॥

निवेद्येति ब्रह्मार्पणं कृत्वेत्यर्थः । अत एव बृहन्नारदीयेऽन्नत्यागमुक्त्वोक्तम्—

दत्तं हविश्च तत्कर्म विष्णवे वै समर्पयेत् । इति ।

यत्तु कृत्यरत्ने कार्ष्णाजिनिः—

अपसव्येन कर्तव्यं पितृ(२)कृत्यमशेषतः ।
अन्नदानादृते सर्वमेवं मातामहेष्वपि ॥ इति,

तदप्येतत्परम् । तत्र 'ब्रह्मार्पणं ब्रह्म हविः,' 'हरिर्दाता हरिर्भोक्ता,' 'चतुर्भिश्च' इति केचित्पठन्ति । धर्मप्रदीपे—

ततोऽन्नं पितृदेवेभ्यः सङ्कल्प्य च यथाविधि ।
दत्तं यद्दास्यमानं च आतृप्तेर्न ममेति च ॥

तथा—

श्राद्धीयान्नस्य संकल्पो भूमावेव प्रदीयते ।
हस्तेषु दीयमानं तु पितॄणां नोपतिष्ठते ॥
वैश्वदेवस्य वामे तु पितृपात्रस्य दक्षिणे ।
संकल्पोदकदानं स्यान्नित्यश्राद्धे यथारुचि ॥

प्रचेताः—

आपोशनं प्रदायाथ सावित्रीं त्रिर्जपेदथ ।
मधुवाता इति तृचं मध्वित्येतत्त्रिकं तथा ॥

विष्णुः—"नान्नमासनमारोपयेत्, नावक्षुतं कुर्यात्" । आसनपदम् आधारोपलक्षणम् । ततश्चान्नपात्रमाधाराद्युपरि न स्थापयेदित्यर्थः । ब्राह्मे—

पित्र्ये कर्माणि भुञ्जानो भूमौ पात्रं न चालयेत् ।

---

(१) 'निवेद्यापोशनं श्राद्धम्' इति पाठो बहुत्र ।

(२) 'पित्र्यं शेषमशेषतः' क० 'पित्र्यं कृत्यमशेषतः' ज० ।

मिताक्षरायां पारस्करः—

सङ्क(१)ल्प्य पितृदेवेभ्यः सावित्रीमधुमज्जपः।
श्राद्धं निवेद्यापोशानं जुषप्रैषोऽथ भोजनम्॥
गायत्रीं त्रिःसकृद्वापि जपेद्व्याहृतिपूर्विकाम्।
मधुवाता इति तृचं मध्वित्येतत्त्रिकं तथा॥

याज्ञवल्क्यः—

सव्याहृतिं च गायत्रीं मधुवाता इति त्र्यृचम्।
जप्त्वा यथासुखं वाच्यं भुञ्जीरंस्तेऽपि वाग्यताः॥

यथासुखं जुषध्वमिति वाच्यम्। अत्रिः—

असंकल्पितमन्नाद्यं *पाणिभ्यां यद्युपस्पृशेत्।
अभोज्यं तद्भवेदन्नं पितॄणां नोपतिष्ठते॥
अन्नं दत्तं न गृह्णीया*द्यावत्तोयं न संपिबेत्॥

व्यासः—

न्यस्तपात्रस्तु भुञ्जीत पञ्चग्रासान्महामुने।
शेषमुद्धृत्य भोक्तव्यं पित्रर्थे तु न चोद्धरेत्॥

*पाणिभ्यामिति।

उभयोर्हस्तयोर्युक्तं पितृभ्योऽन्नं निवेदितम्।
तस्मादेकेन हस्तेन तदन्नं समुपागतम्॥
भाजनं च समालभ्य तिष्ठेदुच्छेषणावधि॥

निवेदितान्नमुभयोर्हस्तयोरेकेन पात्रमालभ्यापरेण भोज्यमित्यर्थः। *यावत्तोयमिति। प्रचेताः—

---

(१) सङ्कल्पोत्तरं गायत्रीजपपूर्वकं मधुमतीः पठित्वाऽपोशनार्थं जलं दत्त्वा जुषध्वमिति प्रैषेण भोजनानुज्ञापनं कार्यमिति वचनार्थः। एवञ्च सावित्रीजपानन्तरमपोशनदानमुक्तं, प्रचेतोवचने तु विपरीतमुक्तम्। तत्रेयं व्यवस्था-पारस्करवचनं बह्वृचपरं प्रचेतोवचनं तदन्यपरम्। उपवीत्यन्नेषु मधु सर्पिर्वाऽऽसिच्य सप्रणवव्याहृतिं सावित्रीं मधुमतीश्च जपित्वा मध्विति च त्रिरुक्त्वा पितॄननुस्मृत्याऽपोशनं दत्त्वाऽपः प्रदाय ब्राह्मणान् यथासुखं जुषध्वमिति भोजनायातिसृजेदिति बह्वृचपरिशिष्टे।

आपोशने विशेषमाह स्मृतिसमुच्चये—

आपोशनं वामभागे सुरापानसमं भवेत् ।
दक्षभागे तु यः कुर्यात्सोमपानसमं भवेत् ॥

तथा—

पुनरापूर्यापोशनं सुरापानसमं भवेत् ।

हेमाद्रावत्रिः—

*दत्ते वाऽप्यथवाऽदत्ते भूमौ यो निक्षिपेद्बलिम् ।
तदन्नं निष्फलं याति निराशैः पितृभिर्गतैः ॥

केचिदाज्येन कुर्वन्ति, तन्न

पायसेन तथाज्येन माषान्नेन तथैव च ।
न कुर्याद्बलिदानं तु ओदनेन प्रकल्पयेत् ॥

इति स्मृतिसारे निषेधात्। शङ्खः—

श्राद्धे नियुक्तान् भुञ्जानान्न पृच्छेल्लवणादि तु ।
उच्छिष्टाः पितरो यान्ति पृच्छतो नात्र संशयः ॥

कात्यायनः—'अश्नत्सु जपेत्सव्याहृतिकां गायत्रीं सकृत्त्रिर्वा रक्षोघ्नीः पौरुषं सूक्तमप्रतिरथम्' इति। हेमाद्रौ सौरपुराणे—

ऐन्द्रं च पौरुषं सूक्तं श्रावयेद्ब्राह्मणांस्ततः ।

मात्स्यपाद्मयोः—

ब्रह्मविष्ण्वर्करुद्राणां स्तोत्राणि विविधानि च ।

पीत्वाऽपोशनमश्नीयात् पात्रे दत्तमगर्हितम् ।
सर्वेन्द्रियाणां चापल्यं न कुर्यात्पाणिपादयोः ॥

(*दत्ते(१)इति । भोक्तृणां बलिदाननिषेधः ।

पितृणामन्नमादाय बलिं यस्तु प्रयच्छति ।
स्तेयेन ब्राह्मणः स्तेनः स सर्वः स्तेयकृद्भवेत् ॥

इति भारद्वाजमिति बोध्यम् । बलिदाने त्वन्नमालभ्य त्रिः

---

(१) धनुश्चिन्हान्तर्गतं नास्ति च० ।

इन्द्रेशसोमसूक्तानि पावमानीश्च *शक्तितः ॥
मण्डलं ब्राह्मणं तद्वत् प्रीतिकारि च यत्पुनः ।
अभावे सर्वविद्यानां गायत्रीजपमाचरेत् ॥

पृथ्वीचन्द्रोदये ब्राह्मे--

वीणां वंशध्वनिं चाथ विप्रेभ्यः संनिवेदयेत् ।
जपेच्च पौरुषं सूक्तं नाचिकेतत्रयं तथा ॥
त्रिमधु त्रिसुपर्णं च पावमानीर्यजूंषि च ॥

हेमाद्रावत्रिः--

*हुङ्कारेणापि यो ब्रूयाद्धस्ताद्वापि वदेद् गुणान् ।
भूतलाच्चोद्धरेत्पात्रं मुञ्चेद्धस्तेन वा पिबेत् ॥

सावित्रीजपः प्रायश्चित्तमिति नागोजी । अत्रापोशानविधानबलिनिषेधाभ्यामन्ये पर्युक्षणादिप्राणाहुत्यन्ता नित्यभोजननियमाः सन्तीति लभ्यते ।) *शक्तित इति । यजुः सामाथर्वणां जप्यानि ग्रन्थान्तरेभ्यो द्रष्टव्यानि ।

अमूर्तानां च मूर्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यायिनां योगचक्षुषाम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥

इति सप्तार्चिर्जपस्तु सर्वेषाम् । आश्रावय, अस्तु श्रौषट् यज, ये यजामहे, वौषट् इति चतुर्भिरित्याद्यर्थः । हेमाद्रौ—

महालये गयाश्राद्धे प्रीतिश्राद्धे तथैव च ।
सपिण्डीकरणश्राद्धे न जपेत्किल सूक्तकम् ॥

इत्यभिश्रवणनिषेधो द्रष्टव्यः । *हुंकारेणापीति । स्वस्तिवाचनानन्तरमदोषमाह वसिष्ठः—

हविर्गुणा न वक्तव्या यावन्न पितृतर्पणम् ।
पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ॥

*प्रौढपादो बहिःकच्छो बहिर्जानुकरोऽपि वा ।
अङ्गुष्ठे विनाऽश्नाति मुखशब्देन वा पुनः ॥
पीतावशिष्टतोयानि पुनरुद्धृत्य वा पिबेत् ।
खादितार्धात् पुनः खादन्मोदकानि फलानि च ॥
मुखेन वा धमेदन्नं निष्ठीवेद्भाजनेपि वा ।
इत्थमश्नन् द्विजः श्राद्धं हत्वा गच्छत्यधोगतिम् ॥

जाबालिः—

इष्टमुष्णं हविष्यं च दद्यादन्नं शनैःशनैः ।

वृद्धशातातपः—

अपेक्षितं याचितव्यं श्राद्धार्थमुपकल्पितम् ।
न याचते द्विजो मूढः स भवेत् पितृघातकः ॥

यत्तु यमः—

श्राद्धे द्विजो नैव दद्यान्न याचेन्नैव दापयेत् । इति,
तद्दत्तसंपादितवस्तुविषयमिति हेमाद्रिः । हारीतः—

ऊर्ध्वपाणिश्च विहसन् सक्रोधो विस्मयान्वितः ।
भग्नपृष्ठश्च यद्भुङ्क्ते न तत्प्रीणाति वै पितॄन् ॥

प्रचेताः—

न स्पृशेद्वामहस्तेन भुञ्जानोऽन्नं कदाचन ।

---

*प्रौढपादलक्षणं च—

आसनारूढपादस्तु जान्वोर्वाऽथ जङ्घयोः ।
कृतावसक्थिको यस्तु प्रौढपादः स उच्यते ॥ इति ।

मनुः—

यद्वेष्टितशिरा भुङ्क्ते यद् भुङ्क्ते दक्षिणामुखः ।
सोपानत्कश्च यद् भुङ्क्ते तद्वै रक्षांसि भुञ्जते ॥

निगमः—

मांसापूपफलेक्ष्वादि दन्तच्छेदं न भक्षयेत् ।
ग्रासशेषं न पात्येत पीतशेषं तु नो पिबेत् ॥

न पादौ न शिरो बस्तिं न पदा भाजनं स्पृशेत् ॥

शङ्खः--

*श्राद्धपङ्क्तौ तु भुञ्जानो ब्राह्मणो ब्राह्मणं स्पृशेत्।
तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत् ॥

उशनाः--

भोजनं तु न निःशेषं कुर्यात् प्राज्ञः कथञ्चन।
अन्यत्र दध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्य एव च ॥

ब्राह्मे--

न चाश्रु पातयेज्जातु न शुष्कां गिरमीरयेत्।
न चोद्वीक्षेत भुञ्जानान्न च कुर्वीत मत्सरम् ॥

यमः--

स्वाध्यायं श्रावयेत्सम्यग्धर्मशास्त्राणि चैव हि।

प्रचेताः--

भुञ्जानेषु तु विप्रेषु ऋग्यजुःसामलक्षणम्।
जपेदभिमुखो भूत्वा पित्र्यं चैव विशेषतः ॥

---

*श्राद्धपङ्क्तौ त्विति। उच्छिष्टेन परिवेष्टृस्पर्शे श्राद्धेन्दुशेखरे मरीचिः--

उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तो नरो यदि।
भूमौ निधाय तद्द्रव्यमाचान्तोऽभ्युक्षणात् शुचिः ॥

पुनः परिवेष्टव्यमित्यर्थः। अत्रिः—

भुञ्जानस्य तु विप्रस्य सिक्थोच्छिष्टं तु यः स्पृशेत्।
प्रक्षाल्य भुक्त्वा स्नात्वा च गायत्रीद्विशतं जपेत् ॥
उच्छिष्टभोजने चैव सहस्रं समुपोषणम् ॥

सहस्रं जप उपोषणं चेत्यर्थः। अन्योन्यभोजनपात्रस्योच्छिष्टस्पर्शे व्यासः-

उच्छिष्टोच्छिष्टसंस्पर्शे स्पृष्टपात्रं विहृत्य च।
सर्वान्नं पूर्ववत्क्षिप्त्वा भोजयेत्तु द्विजोत्तमान् ॥

यजूंषि चैव रुद्रं च राक्षोघ्नीर्ऋच एव च ॥

राक्षोघ्नीः कृणुष्वरक्षोहणमित्याद्याः । तत्रैव निगमः--

'भुञ्जत्सु जपेत् पावमानीरुदीरतांमघवन्नवतीश्च' ॥

अन्नवत्यः पितुंनुस्तोषमिति । पृथ्वीचन्द्रोदये भरद्वाजः--

भुञ्जानेषु तु विप्रेषु प्रमादात्स्रवते गुदम् ।
*पादकृच्छ्रं ततः कृत्वा अन्यं विप्रं नि(१)योजयेत् ।

*क्षणपाद्यादि दद्येत्यर्थः ।

विप्रवमने तत्रैव दक्षः--

*निमन्त्रितस्तु यः श्राद्धे भोजने मुखनिःसृते ।
तदैव होमं कुर्वीत *स्वाग्नौ विप्रः समाहितः ॥
प्राणादिपञ्चभिर्मन्त्रैर्याव*द्द्वात्रिंशसंख्यया ।

शङ्खः--

उच्छिष्टलेपनस्पर्शे प्रक्षाल्यान्येन वारिणा ।
भोजनान्ते नरः स्नात्वा गायत्रीत्रिशतं जपेत् ॥

चण्डालादिस्पर्शे तु भरद्वाजः—

तदन्नमत्यजन् भुक्त्वा स्नात्वा देवीसहस्रकम् । इति ।

जपेदिति शेषः । एतान्निषेधान् स्मरन्तो भुञ्जीरन् । (*पा(२)दकृच्छ्रं ततः कृत्वेति । एतच्च प्रायश्चित्तं श्राद्धकर्तुः । कृत्वेत्यस्यार्थमाह-*क्षणेति । *निमन्त्रित इति । एतच्च वैश्वदेविकविप्रवमने इत्यग्रे स्पष्टम् । *स्वाग्नौ लौकिकाग्नौ । परिसमूहनादिप्राप्त्यर्थं स्वपदम् । *द्वात्रिंशेति । प्राणाय स्वाहेति पञ्चमन्त्रैः क्रमेण षट्कृत्वारं हुत्वा प्राणापानमन्त्राभ्यां जुहुयादित्य(३)-

---

(१) 'निमन्त्रयेत्' क० ञ० । (२) धनुश्चिन्हान्तर्गतं नास्ति च ।

(३) अत्र प्राणाय स्वाहा इत्यादि समानाय स्वाहेत्यन्तैः पञ्चभिर्मन्त्रैः पुनः पुनः षड्वारमावर्तितैस्त्रिंशत्संख्या भवति । अतो द्वात्रिंशत्पूर्तये प्राणापानमन्त्रौ पुनरावर्तनीयौ ।

*द्वा(१)त्रिंशदाहुतीर्हुत्वा होमशेषं समापयेत् ।
ब्राह्मणस्तु *ततः कृ(२)त्वा घृतप्राशनमाचरेत् ॥

*ऋग्विधाने तु--

इन्द्रायसामसूक्तेन *श्राद्धविघ्नो यदा भवेत् ।
अग्न्यादिभिर्भोजनेन श्राद्धं संपूर्णमेव हि ॥

इत्युक्तम् । अग्न्यादिभिरिति लौकिकाग्निस्थापनचरुनिर्वापाद्याज्यभागान्ते पितृनामगोत्रपूर्वमग्नौ *पितॄनावाह्य संपूज्यान्नत्यागं कृत्वा प्राणादिभिर्द्वात्रिंशदाहु(३)तीर्हुनेदित्यर्थः । भोजनेन पुनःश्राद्धेन । *तेन होमः पुनः श्राद्धं चेति पक्षद्वयमुक्तम् । सूक्तजपस्तूभयानुगतः ।

स्मृतिसङ्ग्रहे—

*प्राधान्यं पिण्डदानस्य भोजनस्य तदङ्गता ।
अतो भुक्तिक्रियाहानौ श्राद्धावृत्तिं न मन्वते ॥

*पिण्डदानोत्तरं वान्तौ होम एव नावृत्तिः । पिण्ड-

र्थः ।) *ततः कृत्वेति स्नानादिमध्यम् । (*ऋ(४)ग्विधानेतिवाति । *श्राद्धविघ्नः वमनम् । *पितॄनिति विश्वेदेवोपलक्षणम् । दक्षऋग्विधानवाक्यद्वयैकवाक्यतया ह्ययमर्थः—वैश्वदेविकस्य पित्र्यस्य वा वमने समप्रायश्चित्तप्रत्ययात् । वैश्वदेविकवमने चरुर्न कार्यः पित्र्यवमने तु स कार्य इति तु केचित् । एवञ्च व्रीहियववदनयोरेकत्र निवेशासम्भवादाह—*तेनेति । *प्राधान्यमिति । भोजनस्य पिण्डदानाङ्गताकथनं न तद्व्युत्पादनार्थं किन्तु अङ्गवत्तल्लोपे पुनस्तत्करणं नास्तीति सर्वसिद्धन्यायप्रापणार्थम् ।

---

(१) इदं पद्यार्धं नास्ति ग० ञ० ।
(२) 'स्नात्वा' क० । (३) 'हुतीर्हुत्वा सूक्तं जपेदित्यर्थः' क० ।
(४) धनुश्चिन्हान्तर्गतो ग्रन्थसन्दर्भो नास्ति च पुस्तके अस्ति च केवलं 'मध्यं दर्शितं स्मृतिसङ्ग्रहार्थं पक्षद्वयप्रदर्शनपूर्वकं दर्शयति श्राद्धपङ्क्तौ त्वित्यादिसन्दर्भः । प्रक्रमादिति विरेके पश्वितिवमन' इति ।

दानात् प्राग्वान्तौ *तद्दिने उपवासं कृत्वा परेद्युः पुनः श्राद्धं कार्यमित्यर्थः । तत्रैव—

*श्राद्धपङ्क्तौ तु भुञ्जानो ब्राह्मणो वमते यदि ।
लौकिकाग्निं प्रतिष्ठाप्य अर्चयेच्च हुताशनम् ॥

तथा—

एक एव यदा विप्रो भोजने छर्दितो यदि ।
तदैवाग्निं समाधाय होमं कुर्याद्यथाविधि ॥

द्वितीयपक्षे ऋग्विधाने—

भो(१)जनोपक्रमादूर्ध्वं *प्रक्रमात् पूर्वतो यदि ।
श्राद्धविघ्ने पुनः कार्यं *जपहोमौ न तृप्तिदौ ॥

स्मृतिसंग्रहे—

*अकृते पिण्डदाने तु भुञ्जानो ब्राह्मणो वमेत् ।
पुनःपाकात्तु कर्तव्यं पिण्डदानं यथाविधि ॥

पिण्डदानं श्राद्धम्--

अकृते पिण्डदाने तु पिता यदि वमेत्तदा ।
पुनः पाकं प्रकुर्वीत श्राद्धं कुर्याद्यथाविधि ॥

इति तत्रैवोक्तेः । तथा--

*पित्रर्थानां त्रयाणां च पिता च वमते यदि ।

अतश्चाह-*पिण्डदानेति । *तद्दिने उपवासं कृत्वेति । अत्र प्रमाणमनुपदमग्रे । प्रथमपक्षे लौकिकाग्निस्थापनादि द्रढयति—*श्राद्धपङ्क्ताविति । अर्चयेदित्युक्त्या भिन्नावाहनादिलाभः । *प्रक्रमात् पि(२)ण्डदानप्रक्रमात् । *जपहोमौ इन्द्रायसामसूक्तजपसहितहोमः । *अकृते इति । श्राद्धस्यापराह्णिकतया तत्र पित्र्यविप्रवमने पुनः पाकेन तद्दुष्करमिति पुनः पाकोऽर्थात् परेद्युः फलितः । अतः स्पष्टं तद्वचनमाह—*पित्रर्थानामिति । विरे-

---

(१) भोजनानन्तरमित्यर्थः । (२) पिण्डदानात्पूर्वमित्यर्थः । अत्र 'पिण्डदानकरणात्' इति ङपुस्तके पाठः ।

तद्दिने चोपवासः स्यात्पुनः श्राद्धं परेऽहनि ।
वमने वा *विरेके वा तद्दिनं परिवर्जयेत् ॥

*एषु वचनेषु मूलं चिन्त्यम् । इदं मासिकाब्दिकविषयम् । दर्शादौ तु वान्तावामेन तदैव कार्यम्,

श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् ।
अमवास्यादिनियतं माससंवत्सरादृते ॥

इति मरीचिस्मृतेः । श्राद्धे पिण्डदानमेव प्रधानमिति कर्काचार्याः । तन्मते दक्षोक्तो होम एव नावृत्तिः । विप्रभोजनमिति मेधातिथिः । भोजनपिण्डदानाग्नौकरणानीति कपर्दिधूर्तस्वामिहेमाद्र्यादयः । तन्मते पूर्वोक्तो निर्णयः । अन्नत्यागमात्रं प्रधानम् । भोजनं तु प्रतिपत्तिरूपमङ्गम् । अतो वान्तौ तद्धानेपि नावृत्तिरिति गौडमैथिलादयः । तन्न, *श्राद्धस्य यागदानोभयरूपत्वात्संपूर्णदानाभावात् भोजनस्याङ्गत्वेपि सोमवमने इव नैमित्तिकविधानमिति युक्तं प्रतीमः ।

*अत्रेदं तत्त्वम् । वैश्वदेविकस्य वमने होम एव नावृत्तिः, *अङ्गत्वात् । नच रक्षार्थत्वात् 'इष्टिश्राद्धे क्रतूकेवंत्यभिधानं च "अन्यं विप्रं निमन्त्रयेत्" इति प्रागुक्तार्थकम् । तद्दिने विप्रान्तरनिमन्त्रणासम्भवेन तस्य परेद्युरेव सम्भवात् । *एषु वचनेष्विति । "अकृते पिण्डदाने तु" इत्यादिषु इत्यर्थः । एतद्वचनानां निर्मूलत्वेऽपि "अग्न्यादिभिर्भोजनेन" इति ऋग्विधानाद्धोमः पुनः श्राद्धं चेति पक्षद्वयं प्रा(१)माणिकमेव तत्र पुनः श्राद्धं परदिने तद्दिने चोपवास इसपि अर्थत एवेति । अन्नेति मतं दूषयन्नेवाह-*श्राद्धस्येति । ऋग्विधाने होमः पुनः श्राद्धं चेति पक्षद्वयमुक्तं तद् व्यवस्थापयति-*अत्रेदमिति । *अङ्गत्वादिति ।

---

(१) यद्यप्यत्र ङ पुस्तके 'प्रामादिकमेव' इति पाठस्तथापि स चिन्त्यः ।

दक्षौ' इत्यादिस्मृतेश्च । *तत्र जयान् जुहुयादितिवत् । *पितामहादेरपि तथा । पितेत्युक्तेरिति केचित् । *तस्यापि प्रधानत्वा*त्पितृवदिति तु युक्तम् । सपिण्डीकरणादौ *वार्षिकवत ।

*सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश ।
तत्र पिण्डप्रधानत्वं प्रेतत्वविनिवर्तकम् ॥

इति स्मृतेः । महैकोद्दिष्टादौ तूभयप्राधान्यादावृत्तिरेव,

एक एव द्विजो भोज्यः पिण्डोऽप्येको विधीयते ।

इति स्मृतेः । वृद्धिसंकल्पनित्यश्राद्धादौ तु भोजनप्राधान्याद्वान्तावावृत्तिरेव,

वृद्धिश्राद्धे विकल्पेन पिण्डदानं बुधैः स्मृतम् ।
नित्यश्राद्धमदैवं स्यात्पिण्डदानविवर्जितम् ॥

तदेवाग्नि समाधाय होमं कुर्याद्यथा विधिः ।

इति वचनाच्च । विश्वेदेवभोजनस्याङ्गत्वे दृष्टान्तमाह—*तत्रेति । केषाञ्चिन्मतमाह—*पितामहादेरपीति ।

पितुर्वान्तावुपोष्याह्नि तत्र श्राद्धं परेऽहनि ॥
पुनः कार्यं चान्यत्रान्तौ नोपोष्य श्राद्धमाचरेत् ।
दर्शादौ वमने वामश्राद्धं होम स्मृतीरितम् ॥

इति अभियुक्तोक्तेश्च तथा वमने होम एव । एतन्मतं दूषयति—*तस्यापीति । *पितृवदिति । तद्दिने उपोष्य परेद्युः श्राद्धमित्यर्थः । *वार्षिकवदिति । उभयप्राधान्यात् । तदहरेव पुनः श्राद्धमित्यर्थः । दृष्टान्ते तु पूर्वोक्तवचनानां समूलत्वे वार्षिकं परेद्युः निर्मूलत्वे च तदहरेव, सपिण्डनं तु तदहरेवेति विरोधः । एवं यदि विप्रालाभः तदा कथञ्चित्पुनः पाकं कृत्वा दर्भबटुषु तदसंभवे तयोः केवलपिण्डदानमात्रात्सिद्धिरङ्गीकार्येत्याशयेन तन्मात्रा-

इति स्मृतेः,

भुक्तिक्रियायाः प्राधान्यं श्राद्धे संकल्पसंज्ञके ।
तत्रैव पिण्डविप्रस्य तूपघाते पुनः क्रिया ॥

इति संग्रहोक्तेश्च ।*मघादावप्येवम् । तीर्थमहालयादौ दर्शवदित्या*शार्काद्यालोचनेन प्रतीमः ।

वश्यकतामाह-*सपिण्डीकरणान्तानीति । *मघादाविति । अपिण्डकश्राद्धेषु भोजनप्राधान्यावृत्तिरित्यर्थः । *आशार्केति । तदनादरणे तु) वमनविरेकयोः पूर्वोक्तं गौडमैथिलमतमेव ग्राह्यमित्यभिप्रायः । श्राद्धस्ये(त्या(१)दिग्रन्थस्तु आशार्काद्यभिप्राय इति । पारिजाते व्यासः-

वटार्काश्वत्थपर्णेषु कुम्भीतिन्दुकपर्णयोः ।
कोविदारे करञ्जे च भुक्त्वा चान्द्रायणं चरेत् ॥
करे कर्पटके चैव आयसे ताम्रभाजने ।
वटार्काश्वत्थपर्णेषु भुक्त्वा चान्द्रायणं चरेत् ॥

प्रचेताः—

मृन्मये पर्णपृष्ठे च कार्पासे तान्तवे तथा ।
नाश्नीयान्न पिबेच्चैव न करेण तथाञ्जलौ ॥ इति ।

स्मृतिसङ्ग्रहे—

वामहस्तविमुक्ते तु पात्रे हस्ते तथैव च ।
तथोदके पर्णपृष्ठे भुक्त्वा चान्द्रायणं चरेत् ॥

इत्यादि । जमदग्निः—

भुक्त्वा पीत्वा तु यः कश्चिद्रिक्तपत्रं समुत्सृजेत् ।
स नरः क्षुत्पिपासार्तो भवेज्जन्मनि जन्मनि ॥ इति ।

मनुः—

पिबतो यत्पतेत्तोयं भाजने मुखनिःसृतम् ।
अभोज्यं तद्भवेदन्नं भोक्ता भुङ्क्ते तु किल्बिषम् ॥

---

(१) कंसान्तर्गतो ग्रन्थो नास्ति च पुस्तके ।

आश्वलायनः--'तृप्तान् *ज्ञात्वा *मधुमतीः श्रावयेद्·

क्षीरं भुक्त्वा पिबेत्तक्रं ब्राह्मणो ज्ञानदुर्लभः ।
षष्टिवर्षसहस्राणि कुम्भीपाके स पच्यते ॥

ब्राह्मे—

यच्च पाणितले भुङ्क्ते यच्च फूत्कारसंयुतम् ।
अङ्गुलीं चोद्धरेद् यस्तु गोमांसाशनवत्स्मृतम् ॥

यमः—

वामभागे करं न्यस्य कटिभग्नस्तु यो द्विजः ।
हसते वदते चैव निराशाः पितरो गताः ॥

मार्कण्डेयः--

सर्वेन्द्रियाणां चापल्यं न कुर्यात्पाणिपादयोः ।
उद्धृत्य पाणिं विहसन् सक्रोधो विस्मयान्वितः ॥
श्राद्धकाले च यो भुङ्क्ते न तत्प्रीणाति वै पितॄन् ।
पादेन पादमाक्रम्य यो भुङ्क्ते नारकी तु सः ॥
अन्नं ब्रह्मेति च ध्यात्वा गर्हयन् भोजनं चरेत् ॥

स नारकीत्यनुवर्तते । **आपस्तम्बः**--

कौशं तु बिभृयान्नित्यं पवित्रं दक्षिणे करे ।
भुञ्जानस्तु विशेषेण गर्हितान्नस्य शोधनम् ॥
पवित्रं तु परित्यज्य श्राद्धे भुङ्क्ते तु यो द्विजः ।
अदभ्रमसुरान् गच्छेन्न तत्प्रीणाति वै पितॄन् ॥
ग्रन्थीकृत्य पवित्रेण न भुञ्जीयान्न चाचमेत् ।

इति निषेधस्तु वर्तुलग्रन्थिभिन्नपरः,

भोजने वर्तुलः प्रोक्त एवं धर्मो न हीयते ।

इति स्मृतेः । **उशनाः**--

नियुक्तश्चैव यः श्राद्धे यत्किञ्चित्परिवर्जयेत् ।
पितरस्तस्य तं मासं नैराश्यं प्रतिपेदिरे ॥)

*ज्ञात्वेति । तृप्तेषु श्रावयेदित्यनभिधाय ज्ञात्वेत्यभिधानं

क्षन्नमीमदन्तेति च संपन्नमिति *पृष्ट्वा यद्यदन्नमुपभुक्तं तत्त*त्स्थालीपाकेन सह पिण्डार्थमुद्धृत्य शेषं निवेदयेद्*भिमतेऽनुमते वा' इति । *अत्र गायत्री मधुवाति त्रिकजपोऽपि ज्ञेयः,

तृप्तान्बुद्ध्वान्नमादाय सतिलं पूर्ववज्जपेत् ।

इति प्रचेतसोक्तेः । व्यासः—

तृप्ताः स्थेति तु पृष्टास्ते ब्रूयुस्तृप्ताः स्म इत्यथ ।

अभिमतं विप्रैः स्वीकर्तुमिष्टे । शौनकोऽपि--

अन्नशेषैश्च किं कार्यमिति पृच्छेत तांस्ततः ।
ते इष्टैः सह भोक्तव्यमिति प्रत्युक्तिपूर्वकम् ॥
प्रदद्युः सकलं तस्मै स्वीकुर्युर्वा यथारुचि ॥

श्राद्धविशेषे प्रश्नभेदमाह हेमाद्रौ विष्णुः--"पित्र्ये स्वदितमिति, गोष्ठ्यां सुश्रुतं संपन्नमिति, अभ्युदये दैवे रोचते इति, आयुष्यमिति स्वैरिषु' । स्वैरमिच्छाश्राद्धम् । याज्ञवल्क्यः--

अन्नमादाय तृप्ताःस्थ शेषं चैवानुमान्य च ।
तदन्नं प्रकिरेद् भूमौ दद्यादापः सकृत्सकृत् ॥

इदं चात्र विकिरदानमन्यशाखिनाम् । आश्वलाय-

पूर्वमन्याः श्रावयेदित्यर्थम् । तथाच याज्ञवल्क्यः--

आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं ततः । इति ।

पूर्वजपः व्याहृतिगायत्रीमधुवाता इत्यृक्त्रयत्रिरावृत्तमधुपदरूप इत्याह-अत्रेति । *मधुमतीरिति । "मधुवाता" इति तिस्रः अक्षन्नित्येका च । *पृष्ट्वेति । विप्राश्च सुप्रसन्नमित्यूचुः । *स्थालीपाकेन सहेति व्यतिषङ्गपक्षे । अन्यत्र तु केवलभुक्तशेषेणैव ब्राह्मणसमीपे पिण्डदानम् । *अभिमते इति । तथाच ब्राह्मणैर्यदि स्वीकर्तुमभिमतः शेषः तं तदा तेभ्यो निवेदयेत् । अथ यद्यनुमत इष्टैः सह भुज्यतामिति तदा स्वयमेव सर्वं स्वीकृत्य बन्धु-

नानां तु *पिण्डान्त एव सूत्रकृतोक्तम्। *कात्यायनस्तु विकिरोत्तरं गायत्र्यादिजपं तृप्तिप्रश्नं चाह। हेमाद्रौ देवलः--

ततः सर्वाशनं पात्रे गृहीत्वा विविधं बुधः ।
तेषामुच्छेषणस्थाने *विकिरं भुवि निक्षिपेत् ॥

माधवीये प्रचेताः--

सार्ववर्णिकमादाय ये अग्नीति भुवि क्षिपेत् ।

स च कुशे कार्यः । 'दर्भेषु विकिरश्च यः' इत्युक्तेः । मन्त्रः कातीयः ।

*अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥ इति ।

अन्ये तु—

असोमपाश्च ये देवा यज्ञभागविवर्जिताः ।
तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकम् ॥

इति हेमाद्रौ गोभिलोक्तेन दैवे,

भिः भुञ्जीतेत्यर्थः । *पिडान्त एवेति । "पिण्डदानानन्तरं प्रकीर्णान्नम्" इति सूत्रात् । *कात्यायनस्त्विति। हेमाद्रौ धर्मः--

केषाञ्चिद्विकिरः पूर्वं तृप्तिप्रश्नस्तथापरः ।
प्रश्नः पूर्वमथान्येषां विकिरस्तदनन्तरम् ॥
अमृतापिधानात्पूर्वं केषाञ्चिद्विकिरः स्मृतः ।
अन्येषां तु ततः पश्चाद्विदुषामिति संमतम् ॥
गायत्र्यादिजपात्पूर्वं केषाञ्चित्तदनन्तरम् ॥ इति ।

विकिरप्रतिपत्तिमाह-*विकिरमिति । *अग्निदग्धाश्चेति पूर्वार्धे--

'येऽग्निदग्धा येऽनग्निदग्धा जीवा जाताः कुले मम' इति,
'अनग्निदग्धा ये जीवा अग्निदग्धाः कुले मम' ।
'येऽनग्निदग्धा जीवा येऽप्यग्निदग्धाः कुले मम' ॥

असंस्कृतप्रमीता ये त्यागिन्यो याः कुलस्त्रियः ।
दास्यामि तेभ्यो विकिरमन्नं ताभ्यश्च पैतृकम् ॥

इत्यग्निपुराणोक्तेन पित्र्येऽन्नं विकीर्य 'ये अग्निदग्धाः' इत्युच्छिष्टपिण्डं कुशोपरि पृथग्दद्यादित्याहुः । पृथ्वीचन्द्रोदयेऽप्येवम् । ब्राह्मे—

ततः प्रक्षाल्य हस्तौ च द्विराचम्य हरिं स्मरेत् ।

माधवीये गौतमः—'विकिरमु*च्छिष्टैः प्रतिपादयेत्' । हेमाद्रौ व्यासः—

उच्छिष्टैरेव विकिरं सदैव प्रतिपादयेत् ॥

भृगुः—

*पिण्डवत्प्रतिपत्तिः स्याद्विकिरस्येति तौल्वलिः ।

श्राद्धकारिकायाम्—

*यजमानस्य दासादीनुद्दिश्य द्विजसत्तम ।

इति वा पाठः । यमः—

येषां न माता न पिता न बन्धुर्नचान्नसिद्धिर्न तथान्नमस्ति ।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्प्रयान्तु लोकाय सुखाय ते तु ॥
येऽस्मत्कुले तु पितरोऽसपिण्डोदकक्रियाः ।
ये चाप्यकृतपिण्डास्तु ये च गर्भाद्विनिःसृताः ॥
तेषां दाहो न क्रियते येऽग्निदग्धाश्च ये परे ।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम् ॥

इति मन्त्रः । *उच्छिष्टैरिति सहार्थे तृतीया । *पिण्डवदिति । उच्छिष्टसन्निधौ पिण्डदाने तैः सह प्रतिपादनं पिण्डसन्निधौ चेत्पिण्डवदिति व्यवस्थेति केचित् । पिण्डसन्निधौ विकिरदानमाह धूम्रः—

कपित्थस्य प्रमाणेन पिण्डं दद्यात्समाहितः ।
तत्समं विकिरं दद्यात् पिण्डान्ते तु षडङ्गुलम् ॥ इति ।

उच्छिष्टभागेभ्योऽन्नदानमाह-*यजमानस्येति ।

तस्मादन्नं त्यजेद् भूमौ वामभागेषु पैतृके ॥

मनुः--

उच्छेषणं भूमिगतमजिह्मस्याशठस्य च ।
दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते ॥

विष्णुः—*'उदङ्मुखेष्वाचमनमादौ दद्यात् ततः प्राङ्मुखेषु' । पित्र्ये दैवे चेत्यर्थः । शातातपः—

विश्वेदेवनिविष्टानां चरमं हस्तधावनम् ।

हेमाद्रौ वाराहे--

*हस्तं प्रक्षाल्य यश्चापः पिबेद् भुक्त्वा द्विजः सदा ।
तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः ॥

मरीचिः—

हस्तं प्रक्षाल्य गण्डूषं यः पिबेदविचक्षणः ।
आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥

तत्रैव संग्रहे---

*पवित्रग्रन्थिमुत्सृज्य मण्डले भुवि निक्षिपेत् ।
हस्तादीन् क्षालयेद्विद्वाञ्छरावादौ तु कुत्रचित् ॥

यच्च शिष्टं भाजनेषु तदश्नन्ति प्रहर्षिताः ।
दासा मृतस्य ये दीनास्तस्मात् तत्परिशेषयेत् ॥

इति पुलस्त्योक्तेश्च । "दद्यादापः सकृत्सकृत्" इत्युक्तं तत्र क्रममाह-*उदङ्मुखेष्विति । गण्डूषग्रहणाय हस्तशोधनं निषेधति-*हस्तमिति द्वाभ्याम् । गण्डूषप्रकारः स्मृतौ--

अर्द्धं पिबति गन्डूषमर्धं त्यजति भूमिषु ।
प्रीणन्ति पितरः सर्वे ये चान्ये भूमिदेवताः ॥ इति ।

तत्प्राशनेऽमृतापिधानमसीति मन्त्रः । तदवशिष्टतोयत्यागे च-

रौरवे पुण्यनिलये ब्रह्मार्बुदनिवासिनाम् ।
अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठतु ॥

इति मन्त्रः । *पवित्रेति ।

व्यासः--

ताम्बूलोद्गिरणं चैव गण्डूषोद्गिरणं तथा ।
कांस्यपात्रे तथा ताम्रे न कुर्वीत कदाचन ॥
उष्णोदकैर्धान्यचूर्णैः करौ श्मश्रूणि *शोधयेत् ॥

अथ पिण्डदानम् ।*तच्चार्चनोत्तरमग्नौकरणोत्तरं भो-

पात्रे वै नि क्षिपेद्यस्तु स विप्रः पङ्क्तिदूषकः ।

इत्युत्तरार्धम् । *शोधयेदिति । मरीचिः—

आचम्य च ततः कार्यं दन्तकाष्ठस्य भक्षणम् ।
भोजयेद्दन्तलग्नानि निहृत्याचमनं चरेत् ॥ इति ।

गण्डूषहस्तशोधनादिविस्तरोऽन्यत्र ऊह्यः । *तच्चेति । ब्राह्मणार्चनानन्तरमाह देवलः—

अथ संगृह्य कलशं सदर्भं पूर्णमम्भसाम् ।
पुरस्तादुपविश्यैषां पिण्डावापं निवेदयेत् ॥

इत्यादिना । अथ ब्राह्मणार्चनानन्तरम् । अग्नौकरणानन्तरमाह मनुः-

अपसव्यमग्नौकृत्वा सर्वमावृत्परिक्रमम् ।
अपसव्येन हस्तेन निर्वपेदुदकं ततः ॥
त्रींस्तु तस्माद्धविःशेषात् पिण्डान् कृत्वा समाहितः ।
ओदनेनैव विधिना निर्वपेद्दाक्षिणामुखः ॥ इति ।

तस्मादिति । अग्नौकरणशेषादित्यर्थः । भोजनोत्तरमाह कात्यायनः-"आचान्तेषु पिण्डदानमनाचान्तेष्वित्येके" इति । आचान्तेषु कृतगण्डूषेषु, "सम्यगाचान्तेषु ब्राह्मणेषु पिण्डान्निदध्यात्" इति कातीयवचनान्तरात् । विकिरोत्तरमाह स एव। अनाचान्तेषु इति । तृप्तेषु अन्नं सतृणमभ्युक्ष्यान्नविकरणमुच्छिष्टाग्रतः कुर्यादिति विष्णुनाऽऽचमनात्प्रागाविकिरोक्तेः तदुत्तरमर्थात्पिण्डदानासिद्धेः । स्वधावाचनोत्तरमाहतुः शङ्खलिखितौ-गायत्रीं समनुश्राव्य तृप्तान् ज्ञात्वा स्वदितमिति पृष्ट्वा शेषमन्नमनुज्ञाप्य कृतादन्नाद्विकिरं कुर्यात्स्वधां वाचायित्वा त्रिष्टरांस्त्रपी(?)रश्नीन् दद्या-

जनोत्तरं विकिरोत्तरं स्वधावाचनोत्तरं विप्रविसर्जनोत्तरं वेति हेमाद्रौ स्मृतिषु पक्षा उक्ताः । तेषां शाखाभेदेन व्यवस्था । *'प्रेतश्राद्धेषु पूर्वम*न्येषु भोजनोत्तरम्' इति चन्द्रिकामाधवौ । सर्वत्र भोजनोत्तरमिति बहवः । आश्वलायनः-*'भुक्तवत्स्वनाचान्तेषु पिण्डान्निदध्यादाचान्तेष्वेके' । भुक्तवत्स्विति पूर्वनिषेधार्थम् । *साग्निरतिप्रणीतसमीपे ।*अनग्निर्द्विजसमीपे । हेमाद्रौ जातूकर्ण्यः--

व्याममात्रं समुत्सृज्य पिण्डांस्तत्र प्रदापयेत् ।

प्रसारितभुजान्तरं व्यामः । सं(१)कटे तु व्यासः—'अरत्निमात्रमुत्सृज्य' इति । यत्तु तत्रैव--

सिकताभिर्मृदा वापि वेदी दक्षिणनिम्नगा । इति,

दिति । विष्टराः पिण्डाधस्तना दर्भाः । यमोऽपि—

आचान्तांश्चानुजानीयादभिवाद्य कृताञ्जलिः ।
भवन्तो रमतामत्र ज्ञात्वाऽनुज्ञातलक्षणम् ॥
स्वधेति चेति वक्तव्यं प्रीयन्तां पितरस्तथा ।
अक्षय्यमन्नदानं तु वाच्यं प्रीतैर्द्विजातिभिः ॥
ततोऽर्पणं कुर्यात् पिण्डानां तदनन्तरम् ॥ इति ।

विप्रविसर्जनोत्तरमाह हारीतः-"वाजेवाजे इत्यनुव्रज्य हविःशेषस्य पिण्डान्निदध्यात्" इति । *प्रेतश्राद्धेष्विति ।

अप्रशस्तेषु यागेषु पूर्वं पिण्डावनेजनम् ।
भोजनस्य प्रशस्ते तु पश्चादेवोपकल्पयेत् ॥

इति लौगाक्ष्युक्तेः । प्रशस्ते सपिण्डनादौ । *अन्येष्वित्यस्याप्ययमेवार्थः । आश्वलायनानां त्वाह—*भुक्तवत्स्विति । *साग्निरिति । पिण्डपितृयज्ञेन व्यतिषङ्गस्थले । *अनग्निरिति । साग्नेरपि व्यतिषङ्गासत्त्वे इत्यपि बोध्यम् ।

---

(१) 'संकटे तु' नास्ति क०

तद*न्यशाखिपरम् । देवलः—

*ततस्तैरभ्यनुज्ञातो दक्षिणां दिशमेत्य च ।

चन्द्रिकायाम्—

पिण्डनिर्वपणं कार्यं कुशाभावे विचक्षणैः ।
काशेषु *राजदूर्वासु पवित्रे परमे हिते ॥

आश्वलायनः—*'स्फ्येन रेखा(१)मुल्लिखेत् 'अपहता असुरा रक्षांसि वेदिषदः' इति । तामभ्युक्ष्य *सकृदा-

हुत्वैवमग्निं पिण्डानां सन्निधौ त(दन(२))न्तरम् ।
पक्वान्नेन बलिं तेभ्यः पिण्डेभ्यो दापयेद् बुधः ॥

इति देवलेनाग्नौहोमस्य पिण्डसन्निधानं वदताऽर्था)दग्निसन्निधानेन पिण्डदानमुक्तम् । "अग्न्यभावे तु सर्वमन्नमुपादाय" इत्यग्निमयाज्ञवल्कयोक्तेर्विप्रसमीप एव । *अन्यशाखीति ।

उपलिप्ते महीपृष्ठे पिण्डदानं समाचरेत् ।

इति सामान्यतो मह्या एवोक्तेः । *तत इति । "अथ संगृह्य कलशम्" इति प्रागुक्तश्लोकानन्तरमिदमर्धम् । तत्र येषां शाखायां कलशेनैव कृत्यमभिहितं तत्परं कलशपदमित्यभिप्रेत्य तदुपेक्ष्य विप्रानुज्ञानन्तरदक्षिणदिक्प्राप्तिः सर्वशाखीयानुगतेति तावन्मात्रं संगृहीतम् । षट्त्रिंशन्मते—

सव्यं जानु निपात्यैव भूमौ पिण्डान् प्रयत्नतः ।
निर्वपेत् पितृतीर्थेन स्वधाकारमुदाहरन् ॥

मरीचिः—

पात्राणां खड्गपात्रेण पिण्डदानं विधीयते ।
राजतौदुम्बराभ्यां वा हस्तेनैवाथ वा पुनः ॥

खड्गस्य गण्डकस्य लालाटिकास्थिसम्भवं पात्रं खड्गपात्रं ताम्रम् । *राजदूर्वा अतिदीर्घदूर्वा । *स्फ्येनेति । पितृयज्ञे । *सकृदाच्छिन्नैः एकेन प्रयत्नेन छिन्नैः । सकृदाच्छिन्नान्युपमूल-

---

(१) 'लेखा' क०

(२) कंसान्तर्गतं नास्ति च० ।

च्छिन्नैर्द(१)र्भैरवस्तीर्य प्राचीनावीती रेखां त्रि*रुदकेनोपनयेच्छुन्धन्तां पितरः शुधन्तां पितामहाः शुन्धन्तां प्रपितामहा इति तस्यां पिण्डान्निपृणीया*त्पराचीनपाणिः पित्रे पितामहाय प्रपितामहायैतत्ते*सौ ये च त्वामत्रानु' इति । हेमाद्रौ पारस्करः--

कराभ्यामुल्लिखेत् स्फ्येन कुशैर्वापि महीं द्विजः ।

बह्वृचानां (२)करेणैव लेखा चाग्नेय्यभिमुखेति वृत्तिः । 'दक्षिणाप्राचीं वेदिमुद्धृत्य' इत्यापस्तम्बोक्तेश्च । देवलः--

आवाहयित्वा दर्भाग्रैस्तेषां स्थानानि कल्पयेत् ।
तेष्वासीनेषु पात्रेण प्रयच्छेत्सतिलोदकम् ॥

छिन्नानि भवन्तीति शतपथे । यत्समूलं तत्पितृणामिति तैत्तिरीये । ब्राह्मे तु लेखाकरणे मन्त्रोऽप्युक्तः–

निहन्मि सर्वं यदमेध्यमत्र हताश्च सर्वेऽसुरदानवा मया ।
रक्षांसि यक्षाश्च पिशाचसंघा हता मया यातुधानाश्च सर्वे ॥
एतेन मन्त्रेण सुसंयतात्मा दर्भेण वेदिं लिलिखेन्नरेन्द्र । इति ॥

*उदकेनेति । उदकं च सातिलं "तिलोन्मिश्रेणोदकेनासिच्य" इति वचनात् ।

*पराचीनपाणिः उत्तान एवाधरीकृतपितृतीर्थः पाणिर्येनेति विग्रहः ।

*असाविति । संबुध्यन्तपित्रादिनाम्ना । तथाचायमर्थः--हेतात एतत् पिण्डरूपमन्नं तुभ्यं येचान्ये त्वामनु यान्ति तेभ्यश्चेति । ये इत्यत्र नोहः । अनुयायिनो यदि स्त्रीणां स्त्रिय एव तदोहः स्यात् । यदि पुमांस एव यदि वा पुमांसः स्त्रियश्च तदा नोहः "पुमान् स्त्रिया" [पा०सू०१-२-१४७] इत्येकशेषात् । "पुंवन्मिथुने" इत्याचार्येणोक्तेश्च । तस्मादनुयायिनः

---

(१) 'दर्भैः' नास्ति क०   (२) 'एकेन करेण लेखा' क०

पराचीनेन निम्नपितृतीर्थेन । वायवीये—

*मधुसर्पिस्तिलयुतांस्त्रीन्पिण्डान्निर्वपेद् बुधः।

त्रिस्थलीसेतौ--

तिलमन्नं च पानीयं धूपं दीपं पयस्तथा।
मधु सर्पिः खण्डयुक्तं पिण्डमष्टाङ्गमुच्यते ॥

याज्ञवल्क्यः—

*सर्वमन्नमुपादाय सतिलं दक्षिणामुखः।
*उच्छिष्टसन्निधौ पिण्डान् दद्याद्वै पितृयज्ञवत् ॥

केचित् पिण्डेषु माषान् वर्जयन्ति,

माषाः श्राद्धेषु वै ग्राह्या वर्ज्याश्चैवाग्निपिण्डयोः।
ब्राह्मणेषु यथा मद्यं तथा माषोऽग्निपिण्डयोः ॥

इति स्मृति(१)सारात्।

माषान् सर्वत्र वै दद्यात् पिण्डेऽग्नौ च विवर्जयेत्।

इति स्मृतेश्च। अत्र मूलं चिन्त्यम्। हेमाद्रावपि सर्वशब्दस्य प्रकृतार्थत्वात्सर्वान्नग्रहणमुक्तम्। *अत्र शेषपुमांसः स्त्रियश्चेति पूर्वमुक्तम्। *माध्विति। नात्र मध्वादित्रयनियमः—

सर्वस्मात् प्रकृतादन्नात् पिण्डान् मधुतिलान्वितान्।

इति बृहस्पतिना मधुतिलयोरेवोक्तेः। कलौ च मधु वर्ज्यं "श्राद्धे मांसं तथा मधु" इति कलिवर्ज्येषूक्तेरिति उक्तम्। तिलमात्रं तु आवश्यकमित्याह-*सर्वमिति। *उच्छिष्टेति। उच्छिष्टसंनिधिश्च हारीतेन लक्षितः—

विप्राणामासनस्थानादग्रतस्त्रिष्वरत्निषु।
उच्छिष्टसंनिधानं तन्नोच्छिष्टासनसंनिधौ ॥ इति।

व्याममात्रादि च प्रागुक्तम्। पिण्डदानं शेषान्नप्रतिपत्तिः। शेषान्नलोपे पिण्डदानं न कार्यमिति मतमुत्थापयति-*अत्रेति।

---

(१) 'स्मृतिसागरात्' क०

मन्नमनुज्ञाप्य सर्वमेकत्रोद्धृत्योच्छिष्टसमीपे दर्भेषु त्रींस्त्रीन् पिण्डान् दद्यात्' इति गोभिलसूत्रे ।

सर्वस्मात्प्रकृतादन्नात्, पिण्डान्मधुतिलान्वितान् ।

इति च शेषनियमात्तदभावे पिण्डनिवृत्तिः प्रा(१)प्नोतीति मैथिलवाचस्पती । तन्न, *तुषोपवापव*त्परप्रयुक्तद्र(२)व्यवत्त्वेप्यर्थकर्मत्वाद्गुणानुरोधेन प्रधा(३)नत्यागाच्च शेषलोपेऽपि द्रव्यान्तरेण कार्यम् । अतो नेयं प्रतिपत्तिः, किन्तु प्रधानमित्युक्तं प्राक् । *अन्यथा सपिण्डीकरणादौ संयोजनादेः प्रधानस्य लोपापत्तेरिति दिक् ॥

अथ पिण्डप्रमाणम् । हेमाद्रावङ्गिराः—

कपित्थाबिल्वमात्रान्वा पिण्डान् दद्याद्विधानतः ।
कुक्कुटाण्डप्रमाणान्वामलकैर्बदरैः समान् ॥ इति ।

तत्रैव धूम्रः—

*कपित्थस्य प्रमाणेन पिण्डान् दद्यात्समाहितः ।
तत्समं विकिरं दद्यात् पिण्डान्ते तु षडङ्गुले ॥

*तुषेति । यद्यपि यथा "पुरोडाशकपालेन तुषानुपवपति" "कपालेषु श्रपयति" इति च श्रुतं । तत्र पुरोडाश्रशपणवत् तुषोपवापोऽपि कपालस्य प्रयोजकः स्यात्, तृतीयादर्शनात् इति प्राप्ते पुरोडाशार्थं कपालमिति व्युत्पत्त्या पुरोडाशप्रयुक्तं कपालं तुषोपवापे चोद्यते नच प्रयुक्ते पुनः प्रयुक्तिः सम्भवतीति परप्रयुक्तत्वात्तुषोपवापे कपालं प्रयोजकमिति कपाललोपे द्रव्यान्तरेण तुषोपवापः कार्यस्तद्वदित्यर्थः । *परेति । पिण्डदानस्य विप्रभोजनार्थद्रव्यवत्त्वेऽपीत्यर्थः । तुष्यतुदुर्जनन्यायेन दूषणान्तरमाह—*अन्यथेति । प्रधानस्यापि पिण्डदानस्य शेषासत्त्वे लोपापगमे इत्यर्थः । *कपित्थस्येति । त-

---

(१) 'प्राप्नोतीति' नास्ति क०
(२) 'द्रव्यत्वेप्य' क० (३) 'प्रधानात्यागाच्च' क०

*अन्त्येष्टिपद्धतौ भट्टास्तु--

एकोद्दिष्टे सपिण्डे तु कपित्थं तु विधीयते ।
नारिकेलप्रमाणं तु प्रत्यब्दे मासिके तथा ॥
तीर्थे दर्शे च संप्राप्ते कुक्कुटाण्डप्रमाणतः ।
महालये गयाश्राद्धे कुर्यादामलकोपमम् ॥

इत्याहुः । कालिकायामाचार्यः—

यत्र स्युर्बहवः पिण्डास्तत्र बिल्वफलोपमाः ।
यत्र चैको भवेत्पिण्डस्तत्र खर्जूरसन्निभः ॥
प्रेतपिण्डस्तु दैर्घ्येण द्वादशाङ्गुल उच्यते ॥ इति ।

वायवीये--

पत्नी पिण्डांस्तु गृह्णीयात् त्रिवर्गस्य सहायिनी ।

हेमाद्रौ लौगाक्षिः--

महालये गयायां च प्रेतश्राद्धे दशाहिके ।
पिण्डशब्दप्रयोगः स्यादन्नमन्यत्र कीर्तयेत् ॥

दभावे बिल्वमात्रान् । *अन्त्येष्टिरिति ।

आर्द्रामलकमात्रांस्तु पिण्डान् कुर्वीत पार्वणे ।
एकोद्दिष्टे बिल्वमात्रं पिण्डमेकं तु कारयेत् ॥
नवश्राद्धे स्थूलतरं तस्मादपि तु निर्वपेत् ।
तस्मादपि स्थूलतरमाशौचे प्रतिवासरम् ॥

इत्यादौ आर्द्रामलकमात्रानेव पार्वणे इति न नियमः, किन्त्वामलकमात्रान् पार्वण एवेति; अतोऽधिकपरिमाणपिण्डाचारो न विरुध्यते इति मयूखकृतः। मैत्रायणीये त्रयाणां यथोक्तपरिमाणाधिक्यमुक्तं पितामहस्य नाम्ना स्थवीयांसं प्रपितामहस्य नाम्ना स्थविष्ठमिति । आवाहनादिपिण्डदानान्तं कर्मोक्त्वाऽऽह

याज्ञवल्क्यः--

मातामहानामप्येवं दद्यादाचमने ततः ।

शाट्यायनिः—

असावेतत्त इत्युक्त्वा तदन्ते च स्वधा नमः ।

असावित्यत्र संबन्धरूपगोत्रादिविशिष्टं पित्रादिनामसंबुद्ध्यन्तमुक्त्वा पुनश्चतुर्थ्यन्तं तदन्तेऽयं पिण्ड इदमन्नं वा स्वधा नमो न ममेति वदेदिति हेमाद्रिः । पित्रादीनामज्ञाने त्वापस्तम्बः—‘यदि नामानि न विन्द्यात्स्वधापितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं दद्यात्, स्वधापितृभ्योऽन्तरिक्षसद्भ्य इति द्वितीयम्, स्वधापितृभ्यो दिविषद्भ्य इति तृतीयम् । एवं मातामहेषु मातृषु च’ । बह्वृचानां तूक्तं *प्राक् । कलिकायां स्मृतिः—

*यावदेवोच्चरेन्मन्त्रं तावत्प्राणं निरोधयेत् ।

येषां तु गृह्योक्ते दर्शे मातुः श्राद्धं पृथगुक्तं तेषां *पितृभ्यः पश्चिमे मातृभ्यस्तत्पश्चिमे मातामहेभ्यः पिण्डादि

एवमित्युक्तवक्ष्यमाणपदार्थातिदेशः । पितृमातामहपार्वणयोश्चैकप्रयोगविधिपरिग्रहात्सहाक्रियमाणयोर्मिथः प्रत्यासत्त्यनुग्रहाय पदार्थानामेवानुसमयो न काण्डयोः । *प्रागिति । नामान्यविद्वांस्तत्रापि(१)तामहप्रपितामहेति । *यावदेवेति(२)‘यथाक्रमम्’ इत्युक्त्या मातामहादिलाभः । मन्त्रपाठः एकश्वासेन कार्य इत्यर्थः । *पितृभ्य इति । “पिण्डात् पश्चिमेन तत्पत्नीनां किञ्चिदन्तर्धाय” इति शाङ्खायनसूत्रात् “पूर्वभागे पितृवर्गार्थम्” पश्चाद्भागे मातृवर्गार्थम्” इति आपस्तम्बगृह्यात् “स्त्रीपिण्डा इह पश्चिमाः स्युः” इति भाष्यार्थसङ्ग्रहाच्च । एतच्चान्ये न मन्यन्ते । प्रागुपक्रमे प्रदक्षिणोपचारः स्यात् । तथा च “पितॄणामप्रदक्षिणोपचारः” इति परिभाषाविरोधः । तस्माद्बौधायनेन ब्राह्मणोपवेशने पश्चिमोपक्रमत्वमुक्तमिति पिण्डपङ्क्तीनामपि पश्चिमोपक्रमत्वं युक्तम् “अ-

---

(१) ‘पितामहप्रपितामहप्रपितामहेति’ ङ० च० ।

(२) ‘यावदेवेति । यथाक्रममति । यथा’ ङ० च ।

देयमिति सांख्यायनः । अस्मिन्पक्षे तत्पश्चिमे मातामहीभ्योऽपि दद्यादिति हेमाद्रिः । पूर्वासु पितृभ्यो दद्यादपरासु स्त्रीभ्यः' इति सूत्राच्च । एवं यत्र तीर्थमहालयादौ

केचिदिच्छन्ति नारीणां पृथक्श्राद्धं महर्षयः ।

इति चतुर्विंशतिमतात्,

पित्रादिनवदैवत्यं तथा द्वादशदैवतम् ।

इत्याग्निपुराणाच्च मातॄणां पृथगुक्तम् । यत्र वा—

आचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य एव च ।
तत्पत्नीभ्यश्च सर्वाभ्यस्तथैव च जलाञ्जलीन् ॥
पिण्डांस्तेभ्यः सदा दद्यात्पृथग्भाद्रपदे नरः ।
तीर्थेषु चैव सर्वेषु माघमासे मघासु च ॥

इति चतुर्विंशतिमते,

णुरपि विशेषोऽध्यवसायकरः" इति न्यायात् । तस्मात् प्रधानद्वयमपि प्रत्यगुपक्रमा प्रागपवर्गा पित्र्यब्राह्मणसंस्था पिण्डसंस्था चेति समानं दक्षिणोत्तरदिगपवर्गा च वैश्वदेविकद्विजसंस्थेति बौधायनसूत्रार्थः । शाङ्खायनापस्तम्बादिवाक्यानि च तत्तच्छाखीयविषयाणि । यत्तु—

पूर्वभागस्य दर्भेषु पितृपिण्डान् विनिक्षिपेत् ।
पश्चात्स्तृतेषु दर्भेषु मातृपिण्डान् विनिक्षिपेत् ॥ इति,

तदापस्तम्बपरमिति । अन्ये तु "पिण्डदानमप्रदक्षिणमुपचारः" इति सूत्रादुपक्रमं दक्षिणसंस्थं न तु दक्षिणोपक्रमं उत्तरसंस्थं मानाभावात्,

मध्यमं च तृतीयं च मध्यदेशाग्रदेशयोः ।
मातामहादिप्रभृति एतेषामेव वामतः ॥

इति कातीयात् । एवञ्च पित्रादीनां सम्बोध्यत्वे स्वसंमुखत्वं ततो मातामहादीनां दक्षिणभागस्थत्वे स्वसंमुखत्वं पित्रादिवाम-

दौहित्रपुत्रदाराश्च ये कनिष्ठाः सहोदराः ।
निःसन्ताना मृता ये च तेभ्योऽप्यत्र प्रदीयते ॥

इति भविष्ये एकोद्दिष्टान्युक्तानि, तत्रापि तत्पश्चिमे पिण्डदानं ज्ञेयम् । येषां न पृथक्तैः सपत्नीका पित्रादयो वाच्याः;

अन्वष्टकागयामातृश्राद्धं चैव मृतेऽहनि ।
एकोद्दिष्टं तथा मुक्त्वा स्त्रीषु नान्यत् पृथग्भवेत् ॥

इति शाङ्खोक्तेश्च ।

मनुः--

तेषु दर्भेषु तं हस्तं निमृजेल्लेपभागिनम् ।

हस्तलेपाभावेऽपि हस्ते निमृज्यादेवेति मेधातिथिः ।

विष्णुः--'अत्र पितरो मादयध्वमिति दर्भमूले करावघ-

भागत्वं च निर्वहति । स्वदक्षिणभागस्यैव स्वसंमुखवामभागत्वसम्भवात् । नतु पिण्डत्रापकवामभागत्वम् "एतेषामेव वामतः" इति बहुत्वचनविरोधात् कर्तुरेकत्वादित्याहुः । एतेन—

पिण्डस्य पश्चिमे भागे मातुः पिण्डो यथाक्रमम्
मातामहस्य तत्पूर्वे आत्मपत्न्यास्तदुत्तरे ॥
पितृमातृद्वयोर्मध्ये मातुलाः सहभार्यकाः ।
पुंपिण्डान्वामतः स्त्रीणां शेषं दक्षिणतो न्यसेत् ॥ इति,

तद्दम्भमात्रं, निर्मूलत्वात् । स्त्रीविषये वृद्धयाज्ञवल्क्यः-

जीवे भर्तरि वामाङ्गे मृते भर्तरि दक्षिणे ।

यत्तु—

श्राद्धे सदैव वामाङ्गे पत्नीनामुदकं हरेत् ।

तदापस्तम्बादिपरं, तेषां पित्रादिपिण्डपश्चिम एव पत्नीपिण्डविधानात् । स्मृत्यन्तरे--

वृद्धिश्राद्धं तु नारीणां दक्षिणाङ्गे सदा भवेत् । इति ।

तत्र कर्ता प्राङ्मुखः कर्म च प्रदक्षिणमिति चानुकूलमिति दिक् ।

र्पणम् ।' कालिकायां सुमन्तुः--

एकोद्दिष्टेषु वर्षासु दर्भलेपो न विद्यते ।
सपिण्डीकरणादौ तु लेपः सर्वत्र शस्यते ॥

मनुः--

आचम्योदक् परावृत्य त्रिरायम्य शनैरसून् ।
षडृतूंश्च नमस्कुर्यात् पितॄनेव च *मन्त्रवत् ॥
उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः ॥

त्रिः प्राणायामं कृत्वेति मेधातिथिः । अमन्त्रं प्राणान्निरुध्येति कर्काद्याः । मन्त्रवत्–'वसन्ताय नमः' 'नमो वः पितरः' इत्याद्यैः । शेषं पूर्वावनयनशेषम् । आश्वलायनः--'निपृताननुमन्त्रयेतात्र पितरो मादयध्वं यथाभागमावृषायध्वमिति *सव्यावृदुदङ्ङावृत्य यथाशक्ति प्राणानासित्वाऽभिपर्यावृत्याऽमीमदन्त पितरो यथाभागमावृषायीषतेति चरोः प्राणभक्षं भक्षयेन्नित्यं निनयनम्' इति । नित्यग्रहणं शेषाभावेऽपि कुर्यादित्यर्थः । शौनकः-

---

षट्त्रिंशन्मते--

सव्यं जानु निपात्यैव भूमौ पिण्डान् प्रयत्नतः ।
निर्वपेत् पितृतीर्थेन स्वधाकारमुदाहरन् ॥

मरीचिः—

पात्राणां खड्गपात्रेण पिण्डदानं विधीयते ।
राजतौदुम्बराभ्यां वा हस्तेनैवाथ वा पुनः ॥

उदुम्बरं ताम्रम् । तत्र सव्यपाणिसंयोजनं पिण्डान् निदध्यात् सव्येन पाणिना दक्षिणं पाणिमुपसंयोज्येति । *मन्त्रवदिति । षडृतून् मन्त्रवन्नमस्कुर्यात् पितॄनेव नमस्कुर्यादिति शेषमुदकं चेति च योजना । *सव्येति । सव्यभागावर्तनेनोदङ्मुखा भूत्वा यथाशक्ति प्राणं निरुध्य पुनस्तथैव पर्यावर्तेदित्यर्थः ।

*अथैषामत्र पितर इत्याद्येनानुमन्त्रणम् ।
अमीमदन्तेत्याद्येन मन्त्रेणाप्यनुमन्त्र्य तान् ॥
पिण्डशिष्टचरोरन्नं किंचिदाघ्राय तत्त्यजेत् ।
प्रक्षाल्याचम्य शुन्धन्तामित्याद्यैरेव पूर्ववत् ।
मन्त्रैः पिण्डेषु पानीयं निषिञ्चेत् पितृतीर्थतः ॥

व्याघ्रः—

अद्भिः प्रक्षाल्य तत्पात्रं प्रतिपिण्डं तु पूर्ववत् ।
कृत्वावनेजनं कुर्यात्पिण्डपात्रमधोमुखम् ॥

एतत्कातीयादीनाम् ।

आचार्यः—

ततः सम्यग् द्विराचम्य नीवीं विस्रस्य वाग्यतः ।

आश्वलायनः—'असावभ्यङ्क्ष्वासावङ्क्ष्वेति पिण्डेष्वभ्यञ्जनाञ्जने *वासो दद्या*द्दशामू*र्णास्तुकां वा पञ्चाशद्वर्षताया ऊर्ध्वं स्वं लोमैतद्वः पितरो वासो मानोतोऽन्यत् पितरो युङ्ग्ध्वम्' इति । श्राद्धचिंतामणौ ब्राह्मे—

एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् ।
अमुकामुकगोत्रैतत्तुभ्यं वासः पठेद् बुधः ॥

इदं कातीयानाम्, 'एतद्व इति सूत्राणि प्रतिपिण्डम्' इति तत्सूत्रात् । हेमाद्रौ ब्राह्मे—

श्रेष्ठमाहुस्त्रैककुदमञ्जनं नित्यमेव हि ।
तैलं कृष्णतिलेभ्यश्च दद्यादभ्यञ्जनं हि(१)तम् ॥

त्रैककुदं सुरमा इति प्रसिद्धम् । अञ्जनप्राथम्यमाप-

त्रिः प्राणायामस्तु कातीयादिपरो नतु बह्वृचपरः । निपृतानिति सूत्रार्थमाह—*अथेति ।*वास इति । एतदन्यतमम् एषामन्यतमम् पिण्डेषु दद्यात् । *दशा वस्त्रान्तप्रदेशः । *ऊर्णास्तुका अविलोमानि । पञ्चाशद्वर्षोर्ध्वं जीवन् स्वमेव लोम ।

---

(१) 'हि तत्' क० ञ० ।

स्तम्बादिविषयम्। तत्रैव व्याघ्रः—

*गन्धपुष्पाणि धूपं च दीपं च विनिवेदयेत्।

देवलः—

दक्षिणां सर्वभोगांश्च प्रतिपिण्डं प्रदापयेत्।
भक्ष्याण्यपूपानिक्षूंश्च व्यञ्जनान्यशनानि च॥

तत्रैव शङ्खः—

यत्किञ्चित् पच्यते गेहे भक्ष्यं भोज्यमगर्हितम्।
अनिवेद्य न भोक्तव्यं पिण्डमूले कथञ्चन॥

एतत्सव्येनेति केचित्। *युक्तं त्वपसव्येन। मनुः—

*अवजिघ्रेच्च तान् पिण्डान् यथान्युप्तान् समाहितः।

ततः 'नमो वः पितर इषे' इत्यादिनोपस्थानम्। मात्स्ये-

अथाचान्तेषु चाचम्य वारि दद्यात्सकृत्सकृत्।
तिलपुष्पाक्षतान् पश्चादक्षय्योदकमेव च॥

अत्र दैवे सव्यं पित्र्ये त्वपसव्यमिति कर्कः। *परिभाषोक्तवचनात्सव्यमिति युक्तम्। अत्र शिवा आपः सन्तु। सौमनस्यमस्त्वित्यादिप्रयोगो ज्ञेयः। मात्स्ये—

दत्त्वाशीः प्रतिगृह्णीयाद् द्विजेभ्यः प्राङ्मुखो बुधः।
अघोराः पितरः सन्तु सन्त्वित्युक्ते पुनर्द्विजैः॥
गोत्रं तथा वर्धतां नस्तथेत्युक्तः स तैः पुनः।
दातारो नोऽभिवर्धन्तामन्नं चैवेत्युदीरयेत॥
स्वस्तिवाचनकं कुर्यात्पिण्डानुद्धृत्य भक्तितः॥

मन्त्रस्तु सर्वत्रापि सकृदेवेति वृत्तिः। *गन्धपुष्पाणीति पिण्डपूजा। *युक्तं त्विति। पित्रुद्देशेन क्रियमाणत्वात्। युक्तं तु सव्येन निवेदयेदित्युक्त्या पितॄणां देवभावेनापि पूज्यत्वात्। *अवजिघ्रेदिति पिण्डाघ्राणम्। आश्वलायनानां तु पिण्डाशिष्टचरोराघ्राणं नतु पिण्डाघ्राणमिति प्रागुक्तम्। *परिभाषा "सूक्तस्तो-

स्वस्तिवाचनात्प्राक्पात्रचालनं कार्यम् । हेमाद्रौ बृहस्पतिः—

भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः ।
तदन्नमसुरैर्भुक्तं निराशैः पितृभिर्गतैः ॥

जातूकर्ण्यः—

पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योऽथ वा सुतः ।
न स्त्रीभिर्न च बालेन नासजात्या कथञ्चन(१) ॥

याज्ञवल्क्यः—

*स्वस्तिवाच्यं ततः कुर्यादक्षय्योदकमेव च ।

तत्रैव वृद्धशातातपः—

पितॄणां नामगोत्रेण करे देयं तिलोदकम् ।
प्रत्येकं पितृतीर्थेन अक्षय्यमिदमस्त्विति ॥

अत्र षष्ठी प्रागुक्ता । तत्रैव नागरखण्डे—

उत्तानमर्घ्यपात्रं तु कृत्वा (२)दद्याच्च दक्षिणाम् ।
हिरण्यं देवतानां च पितॄणां रजतं तथा ॥

बृहस्पतिः—

तस्मात् पणं काकिणीं वा फलं पुष्पमथापि वा ।
प्रदद्याद्दक्षिणां यज्ञे तथा स सफलो भवेत् ॥

*अत्र पित्रुद्देशेन दक्षिणादाने अपसव्यं विप्रोद्देशो(३)न

त्रजपम्" इति वाक्यम् । *स्वस्तिवाच्यमिति । स्वस्तीति ब्रूतेति ब्राह्मणान् स्वस्ति वाचयेत् । तैः स्वस्तीत्युक्ते अक्षय्यमस्त्विति ब्रूतेति ब्राह्मणहस्ते उदकं दद्यात् । तेचाक्षय्यमस्त्विति ब्रूयुरित्यर्थः । *अत्रेति "हिरण्यं विश्वेभ्यो देवेभ्यः रजतं पितृभ्यः अपसव्यं तत्रापि" इति पारस्करोक्तेः । तत्रापि पित्रुद्देश्य-

---

(१) एतदग्रे 'जातूकर्ण्यः-द्विजभुक्तावशिष्टं तु शुचिभूमौ निखानयेदिति । श्वमार्जारादिदुःसत्त्वस्पर्शो श्राद्धं विनश्यति' इति अधिकं क० ।
(२) 'दत्त्वा' ग० ।   (३) 'विप्रोद्देशे तु' क० छ० ।

सव्यमिति माधवः। कालिकायामाचार्यः—

दद्याद्यज्ञोपवीत्येव *ताम्बूलं *दक्षिणां तथा।

अत्रिः—

वदेच्च तांस्ततो विप्रान् पित्रादिभ्यः स्वधोच्यताम्।

कदक्षिणादानेऽपि।

अपसव्यं कर्म सर्वं दक्षिणादानवर्जितम्।

इति जमदग्निवाक्यं तु—

आचान्तेभ्यो द्विजेभ्यस्तु प्रदद्यादथ दक्षिणाम्।

इति विप्रोद्देश्यकदक्षिणादानपरम्। सर्वत्रापि उद्देश्यत्वे चतुर्थी। दक्षिणादाने क्रममाह देवलः—

दक्षिणां पितृविप्रेभ्यो दद्यात्पूर्वं ततो द्वयोः। इति।

द्वयोः। वैश्वदेविकविप्रयोः। दक्षिणा च विप्रगुणानुसारेण विषमापि देया,

एकपङ्क्त्युपविष्टानां विप्राणां श्राद्धकर्मणि।
भक्ष्यं भोज्यं समं देयं दक्षिणा त्वनुसारतः॥

इत्युक्तेः। अत्र श्राद्धकर्मणीत्यविवक्षितम्। तेनान्यत्रापि वैषम्यसिद्धिः। अत्र संख्याविशेषो नास्ति,

कृत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत्।

इति याज्ञवल्क्यात्। स्वधावाचनोत्तरमाह याज्ञवल्क्यः—

ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिञ्चेत्ततो जलम्।
विश्वेदेवाश्च प्रीयन्तां विप्रैश्चोक्त इदं जपेत्।

*ताम्बूलमिति। ताम्बूले यज्ञोपवीत्येवेत्येवकारेण पित्र्ये प्राचीनावीतव्यवच्छेदः। *दक्षिणामिति विप्रोद्देश्यकत्वे। *विसर्जयेदिति।

यस्मिंस्ते संस्रवाः पूर्वं पितृपात्रे निवेशिताः।
पितृपात्रं तदुत्तानं कृत्वा विप्रान् विसर्जयेत्॥

गोभिलः--'अघोराः पितरः सन्त्वित्युक्ते स्वधां वाचयिष्य इति पृच्छति पितृभ्यः स्वधोच्यतामित्युक्तेऽस्तु स्वधेत्युच्यमाने धारां दद्यादूर्जं वहन्ती' इति । आपस्तम्बेन तु 'पुत्रान् पौत्रानभितर्पयन्ती' इत्यपि परिषेचने मन्त्र उक्तः ।

आश्वलायनः'--अथैतान् प्रवाहयेत् । परेतन पितरः सोम्यासो गम्भीरेभिः पथिभिः पूर्विणोभिः । दत्त्वायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववीरं नियच्छत ॥' इति । मात्स्ये--

वाजे वाजे इति जपन् कुशाग्रेण विसर्जयेत् ।

प्रचेताः--

स्वास्तिवाच्यं ततः कृत्वा पितृपूर्वं *विसर्जयेत् ।

आश्वलायनः-'अन्नं प्रकीर्योपवीतियों स्वधोच्यतामिति विसृजेदस्तु स्वधेति वा ।' ब्रह्मवैवर्ते-

आमावाजेति मन्त्रं तु पठित्वा च प्रदक्षिणाम् ।
द्वारोपान्ते ततः कृत्वा संयतः प्रविशेद् गृहम् ॥
प्राञ्जलिश्च ततः प्राह तान् विप्रान् सत्यवादिनः ।
दातारो नोऽभिवर्धन्तामन्नं च न इ(१)तीव हि ॥
एवमस्त्विति ते तं च कथयन्ति समाहिताः ॥

एतन्मण्डलदेशे कार्यमिति हेमाद्रिः । मनुः-

दातारो नोऽभिवर्धन्तां वेदाः संततिरेव च ।
श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्तु ॥ इति ।

बौधायनः—

अन्नं च नो बहुभवेदतिथींश्च लभेमहि ।
याचितारश्च नः सन्तु मा च याचिष्म कंचन ॥ इति ।

अत्र 'दातारो वोऽभिवर्धन्तां-लभध्वं याचिद्वम्'

---

(१) 'दाति बहिति' ग० ।

इत्याद्यूहेन पठित्वा विप्रैः प्रतिवचनं कार्यमिति सुदर्शनभाष्ये । 'स्वादुषंसदः०' इति 'ब्राह्मणासः पितरः०' इति च मन्त्रद्वयं पठन्ति । शौनकः–

ब्राह्मणानथ निर्यातान् परीत्य त्रिःप्रदक्षिणम् ।
सस्त्रीकः स्वजनैः सार्धं प्रणमेद्रचिताञ्जलिः ॥
कनिष्ठप्रथमा ज्येष्ठचरमाः स्युः प्रदक्षिणे ॥

हेमाद्रौ बृहस्पतिः--

अद्य मे सफलं जन्म भवत्पादाब्जवन्दनात् ।
अद्य मे वंशजाः सर्वे याता वोऽनुग्रहाद्दिवम् ॥
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः ।
तत्क्लेशजातं चित्तात्तु विस्मृत्य क्षन्तुमर्हथ ॥

प्रचेताः--

विसृजेद्भक्तिसंयुक्तः सीमान्तं चाप्यनुव्रजेत् । इति ॥

अथ पिण्डप्रतिपत्तिः । हेमाद्रौ ब्रह्माण्डे-

पिण्डमग्नौ सदा दद्याद्भोगार्थी प्रथमं नरः ।
*पत्न्यै प्रजार्थी दद्याद्वै मध्यमं मन्त्रपूर्वकम् ॥
उत्तमां गतिमान्विच्छन् गोषु नित्यं प्रयच्छति ।
आ(१)ज्ञां प्रज्ञां यशः कीर्तिमप्सु पिण्डं प्रवेशयेत् ॥
प्रार्थयन् दीर्घमायुष्यं वायसेभ्यः प्रयच्छति ।
आकाशं गमयेदप्सु स्थितो वा दक्षिणामुखः ॥

आश्वलायनः–'वीरं मे दत्त पितर इति पिण्डानां मध्यमं पत्नीं प्राशयेत् । 'आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् । यथायमरपा असत्' इति भर्त्रा *दत्तस्या-

---

इति याज्ञवल्क्योक्तेर्न्युब्जं पात्रमुत्तानं कृत्वा "वाजे वाजे" इति मन्त्रेण पितृपूर्वं विसर्जयेदित्याखण्डलार्थः । *पत्न्यै इति । इदं च केवलकाम्यम् । *दत्तस्येति । दानममन्त्रकम् ।

---

(१) 'प्रज्ञां प्रजां यशः' क० ।

द्येनादानं *द्वितीयेन प्राशनम्। आपस्तम्बस्तु दाने मन्त्रमाह-'अपां त्वौषधीनां रसं प्राशयामि भूतकृतं गर्भं धत्स्व' इति मध्यमं पत्न्यै प्रयच्छति' इति। प्राशनेऽपि 'यथेह पुरुषो असत्' इति तदीयः पाठोऽन्येषां तत्तच्छाखायां ज्ञेयः। तत्रैव शङ्खः-

पत्नी वा मध्यमं पिण्डमश्नीयादार्तवान्विता।

कालिकायां छागलेयः-

*प्राची(१)नावीतिमामन्त्र्य पत्नीः पिण्डो विभज्यते।
प्रतिपत्त्यस्य मन्त्रस्य कर्तव्यावृत्तिरत्र तु॥

माधवीये विष्णुधर्मे--

तीर्थश्राद्धे सदा पिण्डान् क्षिपेत्तीर्थे समाहितः।

याज्ञवल्क्यः—

पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा।

बृहस्पतिः—

*अन्यदेशगता पत्नी रोगिणी गर्भिणी तथा।
तदा तं जीर्णवृषभश्छागो वा भोक्तुमर्हति॥

आदानं तु समन्त्रं "वीरं मे दत्त पितरः" इति मन्त्रः। *द्वितीयेन "आधत्त पितरो गर्भम्" इत्यनेन। षट्प्रयोगे पिण्डानां मध्यमयोर्द्वयोः प्राशनम्। *प्राचीनावीतमिति। अनेकभार्यस्तु प्राचीनावीतं पत्नीपिण्डं विभज्य प्रतिपत्ति मन्त्रावृत्तिं कृत्वा यथासंख्यं भागान् कृत्वा क्रमेणैकैकं भागं प्राशयेदित्यर्थः। *अन्येति।

छागलेयः--

अक्षता गुर्विणी वन्ध्या गतरक्ता रजस्वला।
नाश्नीयान्मध्यमं पिण्डं जारिणी च प्रसूतिका॥

---

(१) 'प्राचीनावीतिनामन्त्र्य' ग०।

अथ पिण्डोपघाते हेमाद्रौ प्रायश्चित्तकाण्डे देवलः—

श्वसृगालखरैः पिण्डः स्पृष्टो भिन्नः प्रमादतः ।
कर्तुरायुष्यनाशः स्यात्प्रेतस्तं नोपसर्पति ॥

जातूकर्ण्यः पूर्वश्लोकान्ते—

तद्दोषपरिहारार्थं प्राजापत्यं प्रकल्पयेत् ।
पुनः स्नात्वा तदा कर्ता पिण्डं कुर्याद्यथाविधि ॥

काकस्पर्शे तु न दोषः, पिण्डोपघातं प्रक्रम्य—

धनस्य च विनाशः स्यात् काकस्पर्शादिकं विना ।

इति तत्रैव श्लोकगौतमोक्तेः । स्मृतिदर्पणे अत्रिः—

मार्जारमूषकस्पर्शे पिण्डे च *छिदलीकृते ।
पुनः पिण्डाः प्रदातव्यास्तेन पाकेन तत्क्षणात् ॥

बौधायनः—

श्वचाण्डालादिभिः स्पृष्टः पिण्डो यद्युपहन्यते ।
प्राजापत्यं चरित्वाऽथ पुनः पिण्डं समाचरेत् ॥

बोपदेवोऽप्येवमाह (१)अथ *दिनान्तरे तु प्राजापत्यमात्रम् । शेषप्रतिपत्तित्वेन पिण्डावृत्तौ मानाभावादिति मैथिलाः । तन्न, सपिण्डीकरणादौ शेषनाशे संयोजनादिलोपापत्तेः । तेन वचनाद्धमन इवात्रापि तन्मात्रपिण्डदानावृत्तिः । अत एव 'न च नक्तं श्राद्धं कुर्वीतार(२)ब्धे चाऽऽभोजनसमापनात्' इत्यापस्तम्बसूत्रम् । रात्रौ भोजनमात्रं पूर्वेद्युः कार्यम् । श्राद्धसमाप्तिस्तु परदिने एव । समाप्तिपर्यन्तं कर्तुरुपवासश्चेति हरदत्तेन व्याख्यातम् । तस्मात् पाकान्तरेण पिण्डदानमात्रं कार्यम् ।

अक्षता अजातरजस्का । अत्राननुकूलाऽपि बोध्या । *छिदलीकृते भिन्ने । *दिनान्तरे त्विति । अनुपदमेतत्स्पष्टम् ।

---

(१) 'अथ' नास्ति क० छ० (२) 'रब्धे वा' ग०

अथ पिण्डनिषिद्धकालः । स च प्रायेण *महालयादिनिर्णये पूर्वमुक्तः । हेमाद्रौ (१)बृहत्पराशरः—

*युगादिषु मघायां च विषुवत्ययने तथा ।
भरणीषु च कुर्वीत पिण्डनिर्वपणं नहि ॥

स्मृतिरत्नावल्याम्—

पुत्रे जाते व्यतीपाते ग्रहणे चन्द्रसूर्ययोः ।
श्राद्धं कुर्यात् प्रयत्नेन पिण्डनिर्वपणादृते ॥

तत्रैव कात्यायनः—

*वृद्धेरनन्तरं चैव यावन्मासः समाप्यते ।
*तावत् पिण्डान्नैव दद्यान्न कुर्यात्तिलतर्पणम् ॥

बौधायनः—

संस्कारेषु तथाऽन्येषु मासं मासार्धमेव च ।

तथा—

*भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ।

---

*महालयादीति । आदिना—

यदा च श्रोत्रियोऽभ्येति गृहं वेदविदग्निचित् ।
तेनैकेनापि कर्त्तव्यं पिण्डनिर्वपणादृते ॥

इति पुराणादिसङ्ग्रहः । हविःसम्पत्तावपि न पिण्डदानं, द्रव्यब्राह्मणसंपत्त्योः समस्वभावत्वात् । *युगादिष्विति । एतेन—

तीर्थे संवत्सरे प्रेते पितृयागे महालये ।
पिण्डदानं प्रकुर्वीत युगादिभरणीमघे ॥

इति व्याख्यातं युगादौ सत्यपि तीर्थादौ पिण्डदानं कार्यमित्यर्थात् तिथिवारप्रयुक्तो य इत्यस्य वक्ष्यमाणत्वात् । *वृद्धेरिति । वृद्धिश्च विवाहादिवृद्धिभिन्ना, अग्रिमवचनात् । *तावत पिण्डानिति । वार्षिकादिषु । *भानाविति । एतच्च श्राद्धनिषेधार्थ-

---

(१) 'वृद्धपराशरः' क० छ०

त्रिस्थलीसेतौ कार्ष्णाजिनिः—

*विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।

उत्तरार्धं प्राग्वत् ।

वृद्धिमात्रे तथान्यत्र पिण्डदाननिराक्रिया ।
कृता गर्गादिभिर्मुख्यैर्मासमेकं तु कर्मणाम् ॥

हेमाद्रौ ज्योतिःपराशरः—

विवाहे विहिते मासांस्त्यजेयुर्द्वादशैव हि ।
सपिण्डाः पिण्डनिर्वापं मौञ्जीबन्धे षडेव हि ॥

तत्रैव—

महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
यस्य कस्यापि मर्त्यस्य सपिण्डीकरणे तथा ॥
*कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वापणं सदा ॥ इति।

मातापित्रोरिति क्षयाहविशेषणं *हविरुभयत्ववदविवक्षितम् । तेन भ्रातृपितृव्यादिवार्षिकेऽपि पिण्डदानं कार्यमिति केचित् । सपिण्डीकरणं नवश्राद्धषोडशश्राद्धोपलक्षणार्थमिति निर्णयामृते उक्तम् ।

मिति वाजपेयी । *विवाहेति । विवाहाद्यनन्तरं तीर्थयात्रा तच्छ्राद्धाङ्गपिण्डदानं च कार्यमिति वक्ष्यते । *कृतोद्वाहोऽपीति । आंपनोपनयनादिग्रहः । पिण्डनिषेधे स्वधावाचनं न कार्यं,

"पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते ।
स्वधावाचनलोपोऽत्र" इति वचनात् । *हविरिति । "यस्योभयं हविरार्तिमार्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेत्" इत्यत्र हविर्विशेषणोभयत्वाविवक्षया एकैकहविर्नाशेऽपि तत्सिद्धिवदित्यर्थः । "यस्योभावग्नी अनुगतौ स्याताम्" इतिवदिहापि मातापित्रोरिति विवक्षितत्वान्नेतरवार्षिके पिण्डदानप्रसङ्ग इत्यरुचिः ।

क्षयाहे विशेषः सङ्ग्रहे--

मातापित्रोराब्दिके तु विवाहादिषु सर्वदा ।
तिलैः पिण्डाः प्रदातव्या अन्यश्राद्धे विवर्जयेत् ॥

अत्र मूलं चिन्त्यम् । रामकौतुके--

*नन्दाश्वकामरव्यारभृग्वग्निपितृकालभे ।
गण्डे वैधृतिपाते च पिण्डास्त्याज्याः सुतेप्सुभिः ॥

विश्वरूपनिबन्धे--

तिथिवारप्रयुक्तो यो दोषो वै समुदाहृतः ।
स श्राद्धे तन्निमित्ते स्यान्नान्यश्राद्धे कदाचन ॥

अन्यत्तूक्तं प्राक् । उच्छिष्टोद्वासनमाह हेमाद्रौ वसिष्ठः—

श्राद्धे नोद्वासनीयानि उच्छिष्टान्यादिनक्षयात् ।
श्च्योतन्ते वै सुधाधारास्ताः पिबन्त्यकृतोदकाः ॥

व्यासः--

उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविः ।

इदं गृहान्तरसत्त्वे । एकगृहे तु मनुः--

उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ।
ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः ॥

*बलिं वैश्वदेवादि नित्यकर्मेति मेधातिथिः । ब्रह्माण्डे-

*शूद्राय चानुपेताय श्राद्धोच्छिष्टं न दापयेत् ।

*नन्दाश्वेति । एवञ्जातीयाः पिण्डदानकालविशेषनिषेधाः अतीतश्राद्धप्रेतकृत्यसकृन्महालयादिगोचराः इति पूर्वोत्तरग्रन्थे स्पष्टम् ।

*बलिमिति—

निर्वर्त्य प्रणिपत्याथ पर्युक्ष्याग्निं समन्त्रवत् ।
वैश्वदेवं प्रकुर्वीत नैत्यकं बलिमेव च ॥

इति वचनात् । (*(१)शूद्राय चेति । अग्रे निखननोक्त्या

---

(१) धनुश्चिह्नान्तर्गतं नास्ति च० पुस्तकेऽग्रे वर्तते ।

तथा—

*कामं दद्याच्च सर्वं तु शिष्याय च सुताय च ।

भोक्तुरिति शेषः । जातूकर्ण्यः—

*द्विजभुक्तावशिष्टं तु शुचि भूमौ निखानयेत् ।

अथ वैश्वदेवादि । अत्र मामकः श्लोकः—

*श्राद्धेऽनग्निककर्तृकेऽग्निकरणात्पश्चाज्जुहोतिर्बलि-
स्त्वन्ते स्यादथवा भवेद्विकिरतः पश्चात् पृथक्त्वे पचेः
श्राद्धान्ते त्वथवा महालयविधावूर्ध्वं भुजः स्यात्क्षये
त्वन्तेऽमासु च मध्यतः शुभविधावादौ तथा साग्निके ॥

अस्यार्थः—*साग्नेः पृथक्पाकेन सर्वत्रादौ वैश्वदेवः,

*पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च *साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥
पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च ।

इदमाधिकदोषार्थम् । अनुपेते विशेषमाह—*काममिति । शिष्यसुतौ चानुपेतौ बोध्यौ । तदिच्छायां दोषाल्पत्वार्थं कामपदम्) *द्विजभुक्तेति ।

खनित्वा निक्षिपेद्भूमावन्यथा स्पर्शसंभवात् ।
निषिद्धं स्पर्शनं तेषां तस्मात् खननमुत्तमम् ॥

इति प्रचेतसोवचनात् । सायं मार्जनेऽपि खननमेव । *श्राद्धे इति । अग्निकरणात्पश्चाज्जुहोतीति अग्नौकरणानन्तरं वैश्वदेव इत्यर्थः । अन्ते बलिः भूतबलिः स्यात् अथवा विकिरितः पश्चाद्भवेदिति, परन्तु पचेः पाकस्य पृथक्त्वे इत्यन्वयः । सूचीकटाहन्यायेन प्रथमतः “आदौ तथा साग्निके” इत्यस्यार्थमाह—*साग्नेरिति । *पक्षान्तामिति । एतच्च वाक्यमेकादिनप्रसक्तानामन्वाधानादीनां क्रमाकाङ्क्षायां तन्मात्रं विधत्ते नतु कमपि पदार्थम् । तेन कदाचित्पिण्डपितृयज्ञस्य सद्यस्कालीनदर्शयागपक्षेऽन्वाधानस्य चोत्तरादिनकर्त्तव्यत्वेऽपि न दोषः । *साग्निक इति । पक्षान्तापिण्डापितृयज्ञयोर्म-

*वैश्वदेवं न पित्रर्थं न *दार्शं वैश्वदेविकम् ॥

इति लौगाक्षिस्मृतेः । अत्र साग्निक आहिताग्निरिति हेमाद्रिः ।

श्राद्धात् प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः ।
*एकादशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयते ॥

इति हेमाद्रौ शालङ्कायनोक्तेश्च । तत्रैव परिशिष्टे--

संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च ।
अग्रतो वैश्वदेवः स्यात्पश्चादेकादशेऽहनि ॥

स्मार्ताग्निमतां तद्रहितानां चाऽग्नौकरणोत्तरं विकिरोत्तरं वा होममात्रं *पृथक्पाकेन । *भूतयज्ञादि तु श्राद्धान्त एव। अत्र *मूलं हेमाद्रिचन्द्रिकादौ स्पष्टम् । *सर्वेषां श्राद्धान्ते

ध्यविधानादेव वैश्वदेवस्य साग्निककर्त्तव्यत्वे सिद्धे साग्निकग्रहणस्यौपासनाग्निमतो निवृत्त्यर्थत्वादिति भावः । अत्र श्रौतस्मार्त्ताग्निमतोरुभयोरप्यविशेषेण वैश्वदेवकर्त्तृत्वावगमात् साग्निकपदमनुवादकं न तु स्मार्त्ताग्निमन्निवर्त्तकम् । अन्यथा श्रौताग्निमन्निवर्त्तकतया वैपरीत्यस्यापि सुवचत्वादित्यरुचिः । *वैश्वदेवमिति । भूतयज्ञोपलक्षणम् । *दार्शमिति सर्वश्राद्धपरम् । अत एव सर्वत्रेत्युक्तम् । साग्निकस्य क्वचिच्छ्राद्धे पश्चाद्वैश्वदेवमाह—*एकादशाहिकमिति । पश्चादिति च स्मार्ताग्निमतामिति हेमाद्रिमते । *पृथक्पाकेनेति,

पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः ।
आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥

इति पैठीनसिवचनात् । श्राद्धोत्तरं श्राद्धशेषस्यापि योग्यत्वादेतस्य पिण्डदानात्प्राक् वैश्वदेवानुष्ठानपरत्वात् । *भूतयज्ञादीति । साग्नेरप्ययं शेष इत्यग्रे व्यक्तीभविष्यति । *मूलमि-

वा तत्पाकेन वैश्वदेवनित्यश्राद्धादीति तृतीयः ।

*श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः ।
कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथा ॥

ति । आद्यः पक्षो ब्रह्माण्डे—

वैश्वदेवाहुतीरग्नावर्वाग् ब्राह्मणभोजनात् ।
जुहुयाद्भूतयज्ञादि श्राद्धं कृत्वा तु तत्स्मृतम् ॥ इति ।

अर्वाग्ब्राह्मणभोजनादित्युक्त्याऽग्नौकरणोत्तरत्वं लभ्यते । साग्नेरपि भूतयज्ञोऽन्ते एवाविशेषात् । द्वितीयो भविष्ये—

पितॄन् संतर्प्य विधिवद्बलिं दद्याद्विधानतः ।
वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनम् ॥ इति ।

बलिश्च तत्रैवोक्तः—

ये अग्निदग्धा मन्त्रेण भूमौ यान्निक्षिपेद्बुधः ।
जानीहि तं बलिं वीर श्राद्धकर्मणि सर्वदा ॥ इति ।

एतेन विकिरानन्तर्यं लभ्यते । नचेदं पक्षद्वयमविशेषात्साग्न्यनग्न्युभयपरमस्त्विति वाच्यं,

वैश्वदेवमकृत्वैव श्राद्धं कुर्यादनाग्निकः ।
लौकिकाग्नौ हुते शेषः पितॄणां नोपतिष्ठते ॥

इति वासिष्ठेनाऽनग्निकस्य श्राद्धात्पूर्वं वैश्वदेवनिषेधात्तस्य श्राद्धमध्ये वैश्वदेवासिद्धेः । आदौ मध्ये वा वैश्वदेवपक्षे पृथक्पाक एव "पित्रर्थं निर्वपेत् पाकम्" इति वचनात्,

गृह्याग्निशिशुदेवेभ्यो यतये ब्रह्मचारिणे ।
पितृपाको न दातव्यो यावत्पिण्डान्न निर्वपेत् ॥

इति स्मृत्यन्तराच्च । *सर्वेषां स्मार्त्ताग्निमतां तद्रहितानां चेति वर्तते, न त्वाहिताग्नीनां तेषामादौ तदुक्तेः । *श्राद्धमिति । इदं निरग्निपरम्,

यदा श्राद्धं पितुः कश्चित्कर्त्तुमिच्छत्यनाग्निमान् ।
वैश्वदेवं तदा कुर्यान्निवृत्ते श्राद्धकर्मणि ॥

इति पैठीनसिस्मृतेः । ततः—श्राद्धशेषात् ।

श्राद्धाहि श्राद्धशेषेण वैश्वदेवं समाचरेत् ।

इति चतुर्विंशतिमताच्च । *एवं वैश्वदेवकालत्रयस्य आशङ्क्य (१)सांख्यायनपरिशिष्टमुदाहृत्यैव व्यवस्थोक्ता-

*आदौ वृद्धौ क्षये चा*न्ते दर्शे मध्ये महालये ।
*एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयते ॥

इति बहुस्मृत्युक्तत्वात्सर्वेषां श्राद्धान्ते एवेति मेधातिथिस्मृतिरत्नावल्यादयो बहवः ।

*बोपदेवस्तु वृत्तिकारेण विसर्जनान्तं श्राद्धमुक्त्वा 'उच्छेषणं तु' इति पूर्वोक्तमनुवाक्योदाहरणाद्बह्वृचानां

इति वचनात् । एवं वैश्वदेवे साग्न्यनग्न्युभयोरपि अधिकारः । विधवास्त्रीबालयोस्तु तत्कारयितृत्वमेव "स्त्री बालश्च कारयेत्" इति स्मृत्यर्थसारात् । "न स्त्री जुहुयान्नानुपेतः" इत्यापस्तम्बनिषेधात्, बालं प्रकृत्य "न त्वेनमग्निहवनबलिहरणयोर्नियुञ्ज्यात्" इति गौतमनिषेधाच्च । भिन्नपाकेन स्नातकवानप्रस्थयोरपि तदधिकारः--

स्नातकेनापि तत्कार्यं पृथक्पाको भवेद्यदि ।

इति शौनकोक्तेः, वानप्रस्थानुपक्रम्य--

तेषां होमक्रियाधर्मः पञ्चयज्ञो विशेषतः ।

इति भारतात् । केचिन्मतमाह--*एवमिति । *आदौ अग्नौकरणानन्तरम् । *अन्ते श्राद्धसमाप्त्यनन्तरम् । दर्शमहालययोर्मध्ये विकिरोत्तरम् । *एकोद्दिष्टे । महैकोद्दिष्टे अन्नशेषं ब्राह्मणाधीनं कृत्वा पश्चात्पृथक्पाकेन वैश्वदेवः;

एकोद्दिष्टेऽन्नशेषं तु ब्राह्मणेभ्यः समुत्सृजेत् ।

इति देवलोक्तेरित्यर्थः । "आदौ वृद्धौ" इति तु तादृशाचा-

---

(१) 'शाखायन' क० छ०

श्राद्धान्ते एव, मध्यपक्षस्त्वन्यशाखापर इत्याह । हेमाद्रिस्तु वृद्धावप्यन्ते एव वैश्वदेवमाह । कातीयानां तु श्रौतस्मार्ताग्निमतामादावेकेनैव (१)पाकेनेति कर्कः । *अन्येषां मते तैत्तिरीयाणां तु साग्निकानां सर्वत्रादौ वैश्वदेवः । पञ्चयज्ञाश्च अन्ते वेति सुदर्शनभाष्ये उक्तम् । अस्य पक्षद्वयस्य पूर्ववद्व्यवस्था । हेमाद्रौ मार्कण्डेयः—

ततो नित्यक्रियां कुर्याद्भोजयेच्च ततोऽतिथीन् ।
ततस्तदन्नं भुञ्जीत सह भृत्यादिभिर्नरः ॥

ततः श्राद्धशेषात् । नित्यक्रियां नित्यश्राद्धम् । तत्र-'पृथक्पाकेन नैत्यकम्' इति तेनैवोक्तेः पाकैक्ये विकल्पः ॥

*अथ नित्यश्राद्धम् । हेमाद्रौ व्यासः--

रपरामित्याह-*बोपदेवस्त्विति । *अन्येषां कातीयानाम् । समाहितान् अतिथीन् । भृत्यादिभिरित्यादिना स्वगोत्रजादिग्रहः,

भृत्यवर्गयुतो भुङ्क्ते कव्यशेषं स्वगोत्रजैः ।
आसायं श्राद्धशालायां द्विजोच्छिष्टं न मार्जयेत् ॥

इति प्रचेतोवाक्यात् ।

*अथ नित्यश्राद्धमिति ।

श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा ।

इति कात्यायनेन पितृयज्ञो द्वेधा उक्तः-नित्यश्राद्धरूपः बलिहरणरूपश्चेति । तत्र नारायणवृत्तौ अशक्तौ पित्र्यबलिहरणेन नित्यश्राद्धसिद्धिरिति पक्षान्तरमुक्तम् । तथाच वैश्वदेवहोमबलिहरणनित्यश्राद्धादिरूपमित्यर्थः । तदाह मनुः—

पयोमूलफलैर्वापि पितृभ्यस्तृप्तिमाहरन् ।
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ॥

एतच्च पञ्चमहायज्ञान्तर्गतम् ,

---

(१) 'पाकेन' नास्ति क०

*एकमप्याशयेद्विप्रं षण्णामप्यन्वहं गृही ।

*अपीत्यनुकल्पः । प्रचेताः--

नामन्त्रणं न होमं च नाह्वानं न विसर्जनम् ।
न पिण्डदानं विकिरं न दद्यादत्र दक्षिणाम् ॥

अत्र--

निर्दिश्य भोजयित्वा तु किञ्चिद्दत्वा विसर्जयेत् ।

इति तेनैवोक्तेर्दक्षिणाविकल्पः । यत्तु--

नित्यश्राद्धं दैवहीनं नियमादिविवर्जितम् ।
दक्षिणारहितं चैव दातृभोक्तृव्रतोज्झितम् ॥

इति काशीखण्डे । तद्विप्राभावपरमिति पृथ्वीचन्द्रः । भविष्ये--

आवाहनं स्वधाकारं पिण्डाग्नौकरणादिकम् ।
ब्रह्मचर्यादिनियमा विश्वेदेवा न चैव हि ॥
दातॄणामथ भोक्तॄणां नियमो न च विद्यते ॥

एकमप्याशयेद्विप्रं पितृयज्ञार्थसिद्धये ।

इति कातीयात् । एकस्यापि विप्रस्य भोजनपर्याप्तान्नालाभे तु कात्यायनः-

अदैवं नास्ति चेदन्नं भोक्ता भोज्यमथापि वा ।
अभ्युद्धृत्य यथाशक्त्या किञ्चिदत्र यथाविधि ॥
पितृभ्य इदमित्युक्त्वा स्वधाकारमुदाहरेत् ।

इदं च ब्राह्मणाय देयम्,

उद्धृत्य वा यथाशक्ति किञ्चिदन्नं समाहितः ।
वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥

इति कौर्मात् । अधिकमनुपदमग्रे । इदं च षड्दैवत्यमित्याह-*एकमपीति । *अपीति । षट् द्वौ वा मुख्यः कल्पः । तच्च

स्वभोज्यान्नेनैव कार्यम्,

एतद्दिवाऽसंभवे रात्रावपि कार्यम्,

दिवोदितानि कर्माणि प्रमादादकृतानि वै।
यामिन्याः प्रहरं यावत्तावत् कर्माणि कारयेत् ॥

इति ब्रह्मनारदीयोक्तेः।

रात्रौ प्रहरपर्यन्तं दिवाकृत्यानि कारयेत्।
ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषतः॥

इति पृथ्वीचन्द्रधृतसंग्रहोक्तेश्च। न च दार्शिकाब्दिकाद्यपि रात्रौ स्यादिति वाच्यम्, इष्टापत्तेः। (त(१)स्य तिथिसम्बन्धित्वात्।

संध्यारात्रौ न कर्तव्यं श्राद्धं खलु विचक्षणैः।

इति वैष्णवाद्यै रात्रौ निषेधात्। अत एवाल्पद्वादश्यां—

उषःकाले द्वयं कुर्यात् प्रातर्माध्याह्निकं तदा।

इत्याद्यैर्वाक्यैस्त्रयोदशीश्राद्धं नोपकृष्यते भिन्नविषयत्वादित्युक्तं मदनरत्ने। नित्यं त्वपकृष्यते, अन्वहमित्युक्तेस्तिथिसर्वाधिकाभावात्। यथा च सुदर्शनभाष्ये—'परपक्षे पित्र्याणीति नियमेऽपि नित्यश्राद्धत्वे संवत्सरमित्यत्यन्तसंयोगे द्वितीयाबलाच्छुक्लपक्षेऽपि इत्युक्तम्। तथा रात्रावपि।) तथाच माधवेन प्रतिपत्प्रकरणे स्पष्ट·

मध्यान्हे वेदविदुषे दक्षिणापिण्डवर्जितम्।
नित्यश्राद्धं ततो दद्याद् भुङ्क्ते यत्स्वयमेव हि॥

इति ब्रह्माण्डात्। एतेन तैलादेरप्यनुज्ञा भवति।

अथ नित्यश्राद्धप्रयोगः—देशकालौ संकीर्त्य अस्मत्पितृपितामहप्रपितामहानां गोत्रादीनां सपत्नीकानाम् अस्मन्मातामहमातुःपितामहमातुःप्रपितामहानां गोत्रादीनां सपत्नीकानां च नित्य·

---

(१) कंसान्तर्गतो नास्ति क०

मुक्तम् । वयं चाग्रे वक्ष्यामः । *अस्य दिनेऽकरणे लोप एव । 'रात्रौ श्राद्धं न कुर्वीत' इति निषेधादिति पृ(१)थ्वीचन्द्रोदयः । पात्राभावे कौर्मे--

*उद्धृत्य वा यथाशक्ति किञ्चिदन्नं प्रकल्पयेत् ।

तत्प्रतिपत्तिमाह विष्णुः--'भिक्षुकाभावेऽन्नं गोभ्यो दद्यादग्नौ वा प्रक्षिपेत्' इति । हेमाद्रौ नागरखण्डे--

*नित्यश्राद्धं न कुर्वीत प्रसङ्गाद्यत्र सिद्ध्यति ।
श्राद्धान्तरे कृतेऽन्यत्र नित्यत्वात्तन्न हापयेत् ॥

षड्दैवते पृथङ् नेत्यर्थः ।

मात्स्ये--

*ततस्तु वैश्वदेवान्ते सभृत्यसुतबान्धवः ।
भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितम् ॥

श्राद्धं करिष्ये इति संकल्प्य विप्रमुदङ्मुखमुपवेश्य क्षणादि संपूज्य पात्रमभिघार्यान्नं परिविष्य पृथ्वी ते पात्रमित्यादिब्रह्मार्पणान्तं कृत्वा भोजयित्वा विसर्जयेदिति । देवलः--

अघृतं भोजयेद्विप्रं स्वे गृहे सति सर्पिषि ।
परत्र निरयं घोरं गृहस्थः प्रतिपद्यते ॥
मृष्टमन्नं स्वयं भुङ्क्ते पश्चात्कदशनं लघु ।

उत्तरार्धं तदेव । मतान्तरमाह-*अस्येति । नित्यश्राद्धस्येत्यर्थः । एतन्मते दार्शिकस्य लोपः । आब्दिकं तु अन्तरितं कार्यमिति विशेषः । *उद्धृत्य वेति । व्याख्यातम् । *नित्यश्राद्धमिति । दर्शश्राद्धादिस्थले । आब्दिकादौ तु पृथगेव, देवताभेदात् । आदौ वाऽन्ते वा वैश्वदेवः । तत्र वैश्वदेवशेषेण न भोजनं किन्तु श्राद्धशेषेणैवेत्याह-*ततस्त्विति ।

प्रदक्षिणमनुव्रज्य भुञ्जीत पितृसेवितम् ।

इति याज्ञवल्क्याच्च । नचात्र रागप्राप्तभोजनमनूद्य श्राद्ध-

---

(१) 'पृथ्वीचन्द्रः' क० छ०

*सर्वं पर्वनिषिद्धं मांसमाषाद्यपीत्यर्थः । एवं कृष्णैकादश्यादौ गृहिणोऽपि भोजनम्, अस्य वैधत्वेन निषेधाप्रवृत्तेः । एवं ग्रहणवेधेऽपि । यच्चनाहिताग्नेरमाषमांसं व्रतयेदित्युक्तं, तद्धेयमेव श्रौतत्वेन तस्य बलवत्त्वात् । देवलः—

श्राद्धं कृत्वा तु यो मर्त्यो न भुङ्क्तेऽथ कदाचन ।
देवा हव्यं न गृह्णन्ति कव्यानि पितरस्तथा ॥

शेषो विधेयः । भोजनस्य रागतो नित्यमप्राप्तेर्नित्यवच्छ्रवणविरोधात् । अतः प्रकरणाच्छ्राद्धाङ्गत्वेन भोजनक्रियैव विधेया "पयोव्रतं ब्राह्मणस्य"इतिवत् । अन्यथा तत्रापि व्रतानुवादेन पय एव विधीयेत । इदं च भोजनं यद्यपि पितृसेवितमिति द्वितीयाश्रुतेः प्रतिपत्तिकर्मतया प्रतिपाद्याभावे न्यायाल्लुप्येत तथापि श्राद्धदिने उपवासे दोषश्रवणात् पुनः पक्त्वापि अदृष्टार्थं भोजनं कार्यमेव । स्विष्टकृद्याग इव शेषनाशे आज्येन, "यस्य सर्वाणि हवींषि नश्येयुरपहरेयुर्वा आज्येनैता देवताः परिसंख्याय यजेत"इति वचनात् । श्राद्धदिने उपवासे दोषं वक्ष्यति—"श्राद्धं कृत्वा तु यो मर्त्यः" इत्यादि । एतदेव ग्रन्थकृत्संमतं "गृहिणोऽपि भोजनम्" इत्यभिधानात् । नच यतिश्राद्धशेषभोजनं तदर्थः 'अस्य वैधत्वेन'इति हेतुपन्यासासंगतेः । *सर्वमिति । नियम एवायं न परिसंख्या, त्रैदोष्यात् । तेन पितृभ्यो यन्न दत्तं तन्न भुञ्जीतेति नार्थः किन्तु पितृभ्यो दत्तं भुञ्जीतैवेति ।

यत्किञ्चित्पच्यते गेहे भक्ष्यं भोज्यमगर्हितम् ।
अनिवेद्य न भोक्तव्यं पिण्डमूले कथञ्चन ॥

इति वाक्यं तु पिण्डेभ्यो निवेदनावश्यकत्वार्थम् । नियमाधीनैव चार्थत इतरानिवृत्तिः ।

भक्ष्यादिकं न भोक्तव्यं पितृभ्यो यदवेदितम् ।

*शिवरात्र्येकादश्यादौ त्ववघ्राणमेवेत्युक्तं प्राक् । *यत्र तूपवासो नावश्यकस्तत्रैकभक्तमयाचितं वा कार्यमिति हेमाद्रिः । जातूकर्ण्यः—

*अहन्येव तु भोक्तव्यं कृते श्राद्धे द्विजन्मभिः ।
अन्यथा ह्यासुरं श्राद्धं *परपाके च सेविते ॥

श्राद्धशेषभोजनस्य क्वचिन्निषेधमाह—हेमाद्रौ प्रायश्चित्तकाण्डे मार्कण्डेयः—

पित्रादीनामथाऽन्येषां श्राद्धशेषान्नभोजनम् ।
व्रतिनां विधवानां च यतीनां च विगर्हितम् ॥

अन्ये भिन्नगोत्राः । व्रतिनो ब्रह्मचारिणः ।

श्राद्धावशिष्टभोक्तारस्ते वै निरयगामिनः ।
सगोत्राणां सकुल्यानां ज्ञातीनां च न दोषकृत् ॥

इत्यादि तु नियमविधिशेषः । चातुर्मास्यक्षीरदध्यादिव्रते च क्षीरादि भोक्तव्यं । यथा रागप्राप्तमाषादिः पर्वनिषिद्धः तथैव तादृशः क्षीरादिस्तत्र काम्यं तु तद्धेयमेव बलवत्त्वात् । *शिवरात्रीति ।

उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् ।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥

इत्युक्तवचनात् । नित्यत्वं न विवक्षितम्, अनुवाद्यविशेषणत्वात् । तेन काम्योपवासेऽप्याघ्राणमेव । एतच्चाघ्राणं भोजनस्थानापन्नं । तेन न पिण्डशेषाघ्राणेन सिद्धिः । आघ्राणेन निर्वाहाभावे त्वाह—*यत्र त्विति । एकभक्तमयाचितं चेदं श्राद्धशेषेणैव तद्धर्मकम् । तदभावे तु पुनः पाकेन हविष्यस्यैवेति द्रष्टव्यम् । *अहन्येवेति । सूर्ये विद्यमाने एवेत्यर्थः । क्षुदभावेऽपि किञ्चिद्भोक्तव्यमिति विधानात् । *परपाके इति ।

श्राद्धं कृत्वा परगृहे यो भुङ्क्ते मदविह्वलः ।
पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः ॥

इति तत्रैवोक्तेः। तत्रैव जाबालिः—

विप्रस्त्वन्यगृहे श्राद्धशिष्टान्नं भोजनं चरेत।
प्राजापत्यं विशुद्धिः स्या*ज्ज्ञातिगोत्रे न दोषकृत्॥

यतीनां वपनं लक्षं प्रणवजपश्चेति तत्रैवोक्तम्। अस्यापवादमाह स एव--

श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः।
ज्येष्ठभ्रातुश्च पुत्रस्य ब्रह्मनिष्ठस्य योगिनः।
एतेषां श्राद्धशिष्टान्नं भुक्त्वा दोषो न विद्यते।
इति केचित्प्रशंसन्ति मुनयस्तदसांप्रतम्॥

*विशेषान्तरं तत्रैव ज्ञेयम्। हेमाद्रौ जाबालिः—

ताम्बूलं दन्तकाष्ठं च स्नेहस्नानमभोजनम्।
रत्यौषधपरान्नानि श्राद्धकर्ता विवर्जयेत्॥

पृथ्वीचन्द्रोदये आचार्यः--

न शूद्रं भोजयेत्तस्मिन् गृहे यत्नेन तद्दिने।
श्राद्धशेषं *न शूद्रेभ्यः प्रदद्यादखिलेष्वपि॥

इति शातातपात्। *ज्ञातिगोत्रे इति।

निवृत्ते पितृमेधे तु दीपं प्रच्छाद्य पाणिना।
आचम्य पाणी प्रक्षाल्य ज्ञातीन् शेषेण भोजयेत्॥

इति देवलोक्तेः। दीपनिर्वापणं भट्टादयो न लिखन्ति। अन्ये तु-

अश्रीमध्रपखण्डाश्च तथाऽन्ये दीर्घरोगिणः।

अश्रीः अकिञ्चनः।

बन्दीमागधसूताश्च तौर्यत्रिकविदस्तथा।
अलब्धभागाः श्राद्धेषु नाशयन्ति महद्यशः॥
तस्मात्तेऽपि च भर्त्तव्याः सकलं च विभज्य वै॥

इत्याहुः। तदेतद्वचनप्रामाण्ये वणिक्परम्। *विशेषान्तरं श्राद्धदिने ब्रह्मचर्यादि पत्न्यादेः श्राद्धशेषभोजनं वा। *न शूद्रेति।

इति कमलाकरभट्टकृते निर्णयसिन्धौ पार्वणश्राद्धम् ।

*अथानुकल्पः । तत्र *विप्रालाभे--

भोजयेदथवाप्येकं ब्राह्मणं पङ्क्तिपावनम् ।
*दैवे कृत्वा तु नैवेद्यं पश्चात्तस्य तु निर्वपेत् ॥

इति शङ्खोक्तेरेको विप्रः *पूर्वमुक्तः । *विप्राभावे *द-

अखिलेषु सर्वजातीयेष्वित्युपादानात्संकरलाभः । तत्र प्रायश्चित्तं तत्तारतम्यं चान्यतो बोध्यम् । एवञ्च रजकादेः श्राद्धशेषदानपाण्डित्यं महासाहसमित्यलम् ।

*अथानुकल्प इति ॥ मुख्याशक्तावनुकल्पोऽनुष्ठेयः,

यथा कथञ्चिन्नित्यानि कुर्यादिन्दुक्षयादिषु ।
पात्रद्रव्याद्यसंपत्तौ सोऽपि मुख्यफलं लभेत् ॥

इति शातातपोक्तेः । यथाकथञ्चित् अङ्गहान्यापि यावज्जीवं कर्त्तव्यतया विहितानि दर्शपूर्णमासादीनि पितृयज्ञश्राद्धादीनि च । पात्रम् उक्तलक्षणो ब्राह्मणः । द्रव्यं मुन्यन्नादि ।

श्राद्धानुकल्पं यः कुर्यात् जात्यवस्थाद्यपेक्षया ।
श्रद्धावान् सोऽप्यवाप्नोति मुख्यश्राद्धफलं नरः ॥

इति भविष्याच्च । जातिः शूद्रत्वादिः, तामपेक्ष्य मन्त्ररूपाङ्गहीनमनुकल्पम् । अवस्था अनुपनीतत्वम् । तत्र परतो मन्त्रपाठनादिमदनुकल्पम् । विप्रादेस्तु समन्त्रमविहिताप्रतिषिद्धद्रव्याद्यनुकल्पम् । आदिना प्रवासादि । तत्र परगोत्रविधवादिपाकेनापि अनुकल्पः । मुख्यानुष्ठानशक्तस्य तु मनुः—

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते ।
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ इति ॥

*विप्रालाभे अनेकविप्रालाभे । *दैवे इति । तत्प्रकारो "दैवे कृत्वातु नैवेद्यम्" इत्यादिना पूर्वमुक्तः । *पूर्वम्,

एकेनापि हि विप्रेण षट्पिण्डश्राद्धमाचरेत् ।

---

(१) 'अथानुकल्पाः' ग०

र्भबटुः,

निधाय वा दर्भबटूना*सनेषु समाहितः।
*प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत् ॥

इति देवलोक्तेः। *अशक्तावामश्राद्धम्—

आपद्य*नग्नौ तीर्थे च प्रवासे पुत्रजन्मनि।
आमश्राद्धं प्रकुर्वीत भार्यारजसि संक्रमे ॥

इति कात्यायनोक्तेः। पृथ्वीचन्द्रोदये जमदग्निः—

यावत्स्यान्नाग्निसंयुक्त उत्सन्नाग्निरथापि वा।

इत्यादिना। *विप्राभावे एकस्यापि विप्रस्याभावे। *दर्भबटुरिति।

अलाभे ब्राह्मणस्यैव कौशः कार्यो बटुः प्रिये।
एवमप्याचरेच्छ्राद्धं षट्दैवत्यं समाहितः ॥
विभक्तिं कारयेद्यस्तु पितृहा स प्रजायते ॥

इति प्रभासखण्डात्। बटुः लघुमनुष्यचञ्चा। तल्लाभार्थं कौश इति। "चञ्चा तृणमयः पुमान्"इति कोशः। तं बटुं कुशमयं विप्रत्वेन प्रकल्प्य श्राद्धं कुर्यात् नतु विभक्तिं श्राद्धविच्छेदमित्यर्थः। आसनेषु ब्राह्मणोपवेशनोचितेषु। *प्रैषेति। श्राद्धं करिष्ये इत्यारभ्य श्राद्धं संपन्नमित्यादिप्रैषान् कुरुष्वेत्यारभ्य सुसंपन्नमित्यादि अनुप्रैषांश्च स्वयमेव वदेदित्यर्थः। एवं संकल्पितान्नप्रतिपत्तिमाह देवलः—

पात्राभावे परं कृत्वा पितृयज्ञाविधिं नरः।
निर्दिश्याप्यन्नमुद्धृत्य यत्र पात्रं ततो गतिः ॥
पात्राभावे क्षिपेदग्नौ गवे दद्यात्तथाप्सु वा।
नतु प्राप्तस्य लोपोऽस्ति पैतृकस्य विशेषतः ॥ इति।

*अशक्तौ पाकश्राद्धासंभवे। *अनग्नौ अनग्नित्वे भावप्रधाननिर्देशात्। अनग्नित्वं च न पाकाद्यर्थलौकिकाग्न्यभावः तस्यापत्पदेन ग्रहणादेतद्वैयर्थ्यात्; किन्तु श्रौतस्मार्त्ताग्न्यभावः। त-

*आमश्राद्धं तदा कुर्याद्धस्तेग्नौकरणं भवेत् ॥

कौर्मे--

अनग्निरधनो वापि तथैव व्यसनान्वितः ।
आमश्राद्धं द्विजः कुर्याद् वृषलस्तु सदैव हि ॥

*आहिताग्नौ प्रवासस्थे तत्पत्नी गृहे दर्शमृत्विगादिना कारयेत्,

अमावास्यादि नियतं प्रोषिते धर्मचारिणी ।
पत्यौ तु कारयेन्नित्यमन्येनाप्यृत्विगादिना ॥

इति लघुहारीतोक्तेरिति पृथ्वीचन्द्रोदयः । आदिपदमाब्दिकादिसर्वपार्वणपरमिति शूलपाणिः । सुमन्तुः--

पाकाभावेऽधिकारः स्याद्विप्रादीनां नराधिप ।
अपत्नीनां महाबाहो विदेशगमनादिभिः ।
सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः ॥

दाह-यावत्स्यान्नाग्निसंयुक्त इत्यादि । देशान्तरस्थत्वादिनाऽग्न्यभावोऽपि द्रष्टव्यः । *आमश्राद्धमिति । अयं मयूखेऽपि पाठः । विवेचने च हेमश्राद्धमिति पाठः । तथाचापरिग्रहनाशदेशान्तरस्थत्वादिना श्रौतस्मार्त्तान्यतराग्न्यभावे आमेनैव हेम्नैव वा श्राद्धमित्यर्थः । *पुत्रजन्मनीति । नच पुत्रोत्पत्तौ हेमनियममाहेत्याग्रिमग्रन्थविरोधः आमस्य विहितप्रतिषिद्धत्वेन विकल्पितत्वात् । नचामेन कल्याणान्याभिकाङ्क्षयान्निति निषेधात् तस्य पुत्रोत्पत्तावमुख्यत्वाद्वा । अधनत्वं चोपलक्षणम् ,

न भवेद्यस्य सामग्री दारा वा गृहमेव वा ।
आमश्राद्धं स कुर्वीत बालो वृद्धश्च यो भवेत् ॥

इति पारिजाते जमदग्निवाक्यात् । पाकसाधनसामग्र्यभावः पत्न्यभावः पाकयोग्यस्थानाभावः पाकशक्त्यभावश्च क्रमेणार्थः । तत्रान्त्यः पत्न्यभावपर्यवसन्नः । *आहिताग्नाविति । एतच्च पत्न्याः कर्त्तृत्वमेकाकिप्रवासे श्राद्धासंभवं निश्चित्येति बो-

प्रचेताः—

स्त्री शूद्रः *श्वपचश्चैव जातकर्मणि चाप्यथ।
आमश्राद्धं सदा कुर्याद्विधिना पार्वणेन तु॥

स्वयं पचतीति श्वपचः। विष्णूशनसौ—

आत्मनो देशकालाभ्यां विप्लवे समुपस्थिते।
आपद्यनग्नौ तीर्थे च प्रवासे पत्न्यसंभवे॥
चन्द्रसूर्यग्रहे चैव दद्यादामं विशेषतः।
न पक्वं भोजयेद्विद्वान् सच्छूद्रोऽपि कदाचन॥
भोजयन् प्रत्यवायी स्यान्न च तस्य फलं लभेत्॥

अत्र प्रवासतीर्थ*ग्रहणादावामहेमश्राद्धमेव, पाकश्राद्धं तु न भवत्येवेति हेमाद्रिरत्नावल्यादयः। अपरार्के

ध्यम्। *श्वपचः अपत्नीकः। *ग्रहणादाविति। आदिना संक्रमादिपरिग्रहः। पत्न्याग्निसान्निधानेपि पाकासंभवेऽपि च। तथाच प्रवासग्रहणयोः आदिपदग्राह्यपुत्रजन्मसंक्रमापद्भार्यारजोदर्शनपत्न्यभावेषु साग्निकोऽप्यामेनैवेत्यर्थ इति मयूखः। तीर्थपदं न दृश्यते। विवेचने तु पत्न्यभावे तद्रजोदोषे ग्रहणतीर्थसंक्रमादिषु च पत्न्यग्निसन्निधानेपि पाकसंभवेपि आममेव मुख्यं, हेम गौणं, पुत्रजन्मनि तु विपरीतमिति विवेक इत्युक्तम्। तीर्थे तु तीर्थजलसमीपे आमेन हेम्ना वा। गृहादौ त्वन्नेनैव,

सदैव हि जलान्ते तु आमश्राद्धं विधीयते।
गृहाद्दशगुणं पुण्यं भवेत्तीर्थे निवापकृत्॥

इति स्मरणात्। वस्तुतस्तु—

तीर्थे श्राद्धं प्रकुर्वीरन् पक्वान्नेन विशेषतः।
आमान्नेन हिरण्येन कन्दमूलफलैरपि।
एषामाभावे कुर्याच्च श्रद्धयाऽपि जलेन च॥

विज्ञानेश्वरादयस्तु—

*पाकाभावे द्विजातीनामामश्राद्धं विधीयते ।

इति सुमन्तूक्तेः साग्निकैर्निरग्निकैश्च प्रवासादौ सर्वत्र पाकाभावे आमादिना कार्यम्, पाकसंभवे त्वन्नेनैवेत्याहुः । *अत एव पाकश्राद्धमुक्त्वा—

एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु कर्मसु ।
भार्याविरहितोऽप्येतत् प्रवासस्थोऽपि नित्यशः ॥

इति सुमन्तुवचनादुभयमपीति । *पाकाभावे इति । "आपद्यनग्नौ तीर्थे च"इति पूर्वोक्तः "संक्रमेऽन्नद्विजाभावे"इति वक्ष्यमाणश्चैतस्यैव प्रपञ्चः । ग्रहणपुत्रजन्मनोः द्विजाभावे च पक्वान्नभोक्त्रसंभवकृतः, पत्न्यभावतद्रजोदर्शनएकाकिप्रवासतीर्थप्राप्त्यादिषु पक्त्रभावकृतः, आपदन्नाभावादिषु पाकाभावकृतः पाकाभावः । एतदर्थमेव च--

आत्मनो देशकालाभ्यां विप्लवे समुपस्थिते ।
आमश्राद्धं द्विजैः कार्यं शूद्राणां तु सदैव हि ॥

इत्युशनोवाक्यं,

पाकाभावेऽधिकारः स्याद्विप्रादीनां नराधिप ।
अपत्नीनां महाबाहो विदेशगमनादिभिः ॥
सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः ॥

इति सुमंतुवाक्यं च ग्रन्थकृद्भिरुक्तम् । विदेशगमनादिभिः पाकाभावे इत्यन्वयः । अपत्नीनामिति हेतुगर्भविशेषणादपत्नीकत्वप्रयुक्तः पाकाभावोऽभिप्रेतः । आत्मन इति तु आपदः पञ्च । एवञ्चैवंजातीयकेषु पाकश्राद्धासंभवद्वारकमेव द्विजान्प्रति आमहेमश्राद्धविधानं, संक्रमाग्न्यभावयोस्तु तदसंभवात्स्वतन्त्रं तदिति । शूद्रस्य पाकसम्भवेऽपि न पाकश्राद्धं किन्तु आममेव "शूद्रः कुर्यात्सदैव हि""न पक्वं भोजयेद्विद्वान्"इत्यादिवचनैरिति । *अत

इति मात्स्ये निरग्नेरपि पाकेनोक्तमिति शूलपाणिकल्पतरू । *एतच्छन्दः श्राद्धमात्रपर इत्यन्ये ।

*एकोद्दिष्टं तु कर्तव्यं पाकेनैव सदा स्वयम् ।

इति लघुहारीतीयमपि साग्नेरेव । निरग्ने*र्महैकोद्दिष्टमप्यामेन । *शूद्रस्य तु दशाहपिण्डाद्यामेनेति एवेति । अन्यथा निरग्नेरामादेः प्रतिपदोक्तत्वात् पाकः कथं प्राप्नुयात् ? *एतादिति । हेमाद्रिरत्नावल्यादिमताभिप्रायेण । *एकोद्दिष्टं त्विति ।

अभावे पाकपात्राणां तदहः समुपोषणम् ।

इत्युत्तरार्धम् । एतद्वचनं च मासिकानां स्वकालाकरणनिमित्तोपवासरूपप्रायश्चितविधायकम् । न ह्ययं मासिकेषु पाकविधिः किन्तु अनुवादः(१) । यद्वा निरग्नेरनुकल्पतयाऽमादिसंभवात्साग्नेरेवेत्युक्तम् । *महैकोद्दिष्टमपीति । अपिरामेनेत्यनन्तरं बोध्यः । होतव्यमनलेऽथवेति गोभिलीयस्य विप्राभावपरतया तत्परत्वे आमस्यापि सुकरत्वात् । *शूद्रस्य त्विति । कर्त्तव्यानि,

एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते ।
मासेऽन्यस्मिन्तिथौ तस्मिन् श्राद्धं कुर्यात्प्रयत्नतः ॥

इति देवलवाक्यात् ।

मासिकं चोदकुम्भं च यद्यदन्तरितं भवेत् ।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते ॥

इति वाक्याच्च । नचोपवासरूपप्रायश्चित्तमात्रेण तत्सिद्धिरस्त्विति वाच्यं,

यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश ।
पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥

इति तिथितत्त्वे वचनात् । निरग्नीनां च तत्र पाकस्याप्रा-

---

(१) इतोऽग्रे 'ततश्च तत्रोत्तरकाले' इत्यधिकं रु० ।

हलायुधः ।*उत्सन्नाग्नीनां त्वामश्राद्धमेव, पूर्वोक्तजमदग्निवाक्यात् । मरीचिः—

*श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् ।
अमावास्यादिनियतं *माससंवत्सरादृते ॥

स्मृतिदर्पणे—

मृताहं च सपिण्डं च*गयाश्राद्धं महालयम् ।
आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ॥

हेमाद्रौ व्यासः—

आमं ददतु कौन्तेय दद्यादामं *चतुर्गुणम् ।
द्विगुणं त्रिगुणं वापि नत्वेकगुणमर्पयेत् ॥
सिद्धान्ने तु विधिर्यः स्यादामश्राद्धेऽप्यसौ विधिः ।
आवाहनादि सर्वं स्यात्पिण्डदानं च भारत ॥
दद्याद्यच्च द्विजातिभ्यः शृतं वाऽशृतमेव वा ।
तेनाग्नौकरणं कुर्यात् पिण्डांस्तेनैव निर्वपेत् ॥

प(१)क्षान्तरमाह स एव—

आमं ददद्धि कौन्तेय तदामं द्विगुणं चरेत् ।
त्रिगुणं चतुर्गुणं वापि न त्वेकगुणमर्पयेत् ॥

प्तेस्तत्परत्वासंभवात्साग्नेरेवेति हेमाद्र्यादिमतेन, नत्वपरार्कादिमतेनेति स्मर्त्तव्यम् । 'सदा चैव तु शूद्राणाम्' इति सदापदोपादानफलम् । *उत्सन्नाग्नीनामिति । निराग्निकतयाऽऽमश्राद्धसिद्धेः पुनरुपादानं तन्नियमार्थमिति भावः । *श्राद्धविघ्ने । भार्यारजोदर्शनादिना आपदादिना वा पाकश्राद्धासंभवे(२) । *मासेति । मासिकं सांवत्सरिकं च पाकेनैवेत्यर्थः । *गयाश्राद्धमिति । सर्वगयाश्राद्धासंभवे ततो वटश्राद्धमिति याथजूकाः । *चतुर्गु-

---

(१) 'पक्षान्तरमाह' नास्ति क० छ०
(२) इतोऽग्रे 'इति यावत्' इत्यधिकं ङ० ।

स्मृत्यर्थसारे सममप्युक्तम् । (१) (विष्णुपुराणे वाराहे च—

असमर्थोऽन्नदानस्य धान्यमाशं स्वशक्तितः ।
प्रदद्यात्तु द्विजातिभ्यः स्वल्पाल्पामपि दक्षिणाम् ॥

अत्र शक्तित इत्यस्मात् *सममलाभः । अश्यत इत्या*शम् ।) षट्त्रिंशन्मते—

आमश्राद्धं यदा कुर्यात् पिण्डदानं कथं भवेत् ।
*गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ॥
पिण्डान् दद्याद्यथालाभं तिलैः सह विमत्सरः ॥

पृथ्वीचन्द्रोदये व्यासः—

आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदः सदा ।
हस्तेऽग्नौकरणं कुर्याद् ब्राह्मणस्य विधानतः ॥

एतत्साग्नेः । *निरग्नेः सदा तत्सत्त्वात् । यत्तु—

आमेन पिण्डं दद्याच्चेद्विप्रान् पाकेन भोजयेत् ।

णमिति । चातुर्गुण्यादि पुरुषाहारापेक्षया । *सममलाभ इति । स्मृत्यर्थसारमनुरुध्य । वस्तुतस्तु इदं पक्षान्तरमेव विधत्ते । अन्यथा प्रोक्तचातुर्गुण्यादिपक्षाणां शक्त्यैव व्यवस्थापनात्तदनुवादवैयर्थ्यप्रसङ्गात् । अन्नदानस्यासमर्थ इत्यस्य द्विगुणधान्यदानेऽसमर्थ इत्यर्थः । *आशमिति । तस्य तद्धान्यं तद्दिने स्वगृहे पक्त्वा भोक्तव्यमिति कर्मव्युत्पत्त्या सूच्यते । वर्त्तमानसामीप्यस्यापि व्यञ्जनात्, नतु कार्यान्तरे विनियोक्तव्यम् । अनुपदं चैतत्स्फुटम् । *गृहपाकादिति । यद्यपि आमश्राद्धे शृतं वाऽशृतमित्युपक्रम्य पिण्डांस्तेनैव निर्वपेदित्युक्तं तथापि आमात्साधनान्तरविधिरयम् । प्रधानभूताद् गृहपकादोदनादुद्धृतेन तदेकदेशेनेत्यर्थः । एषां च पक्षाणां यथालाभं व्यवस्था । *निरग्नेरिति । उ(२)क्तश्च—

---

(१) धनुश्चिन्हान्तर्गतं नास्ति ग०

(२) पाणिहोम इत्यर्थः ।

पक्केन कुरुते पिण्डमामान्नं यः प्रयच्छति ॥
तावुभौ मनुजौ प्रोक्तौ नरकार्हौ न संशयः ॥ इति,

त*द्दर्शादिपरम् ।*देशाचाराद्व्यवस्थेति युक्तम् । मरीचिः-

आवाहने स्वधाकारे मन्त्रा ऊह्या विसर्जने ।
अन्यकर्मण्यनूह्याः स्युरामश्राद्धविधिः स्मृतः ॥

आवाहने 'हविषे अत्तवे' इत्यत्र 'स्वीकर्तवे' इत्यूहः । स्वधाकारे 'नमो वः पितर इषे' इत्यत्र इषेपदस्थाने *'आमद्रव्याय' इत्यूहः । विसर्जने 'वाजेवाजे' इत्यत्र

यावत्स्यान्नाग्निसंयुक्त उत्सन्नाग्निरथापि वा ।
आमश्राद्धं तदा कुर्याद्धस्तेऽग्नौकरणं भवेत् ॥

इत्यामश्राद्धेऽपि पाणिहोमः । अयं चानुवादः ।

अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् ।

इतिपाणिहोमेन पाकश्राद्धस्यापि संभवेनाग्न्यधिकरणकस्याग्नौकरणस्यासम्भ(१)वेऽप्यबाधात् । अन्यथाऽधिकाराभावे श्राद्धस्यैवाप्राप्तेः । तत्रामादिसाधनविधिरपि दुःस्थितः स्यात् । अत एव सदापदोपादानम् । एवञ्चापेक्षितविधानानुरोधेन व्यासवाक्यं साग्निपरं निरग्निपरत्वे वैयर्थ्यादित्यर्थः । *दर्शादीति । तत्रैकजातीयद्रव्येणैव प्रधानद्वयं कार्यमित्याशयेनेदम् । तदेतद्बहवो न मन्यन्ते ।

दद्याद्यच्च द्विजातिभ्यः शृतं वाऽशृतमेव वा ।
हस्तेऽग्नौकरणं कुर्यात्पिण्डांस्तेनैव निर्वपेत् ॥

इति वचनान्तरसंवादात्साधनान्तरविधिरनवस्थितःस्यादत आह-*देशाचारादिति । *आमद्रव्यायेति । द्रव्यपदं संपातायातम् । आमायेत्येव विवक्षितम् । अत्रोक्तं विवेचने-तर्प्येते लृडन्तम् । पारिजातमते-प्रतिगृहीतान्नभोजनोत्तरमेव पितृतृप्तौ मानाभावात्प्रार्थनायामर्थतो भविष्यत्ताया अपि लाभमालोच्य

---

(१) 'भवे बाधात्' छ० ।

'तृप्तास्थ'इति स्थाने'तर्पयत'*'तृप्यत' इति वोहः। यद्यपि "तस्मादृचं नोहेत्' 'इति ऋच्यूहो निषिद्धः तथापि *वचनाद्भवति।

*तृप्तिप्रश्नोऽवगाहश्च जुषप्रश्नो यथासुखम्।
आमश्राद्धे भवेन्नैतदपोशानं च पञ्चमम्॥

अयं चानुवादः *खलेवाल्यां छेदनादीनामिवा*र्थाभावाल्लोपासिद्धेः।

धर्मप्रदीपे तु—

आमं चतुर्गुणं दद्यादथवा द्विगुणं तथा।
हेम चाष्टगुणं तद्वदामे हैमेऽप्यसौ विधिः॥

तत्र लोट् न्याय्य इत्याह*तृप्यतेति। इषे इत्येतदाशास्यान्नप्रतिपादकमेव नतु प्रदेयान्नप्रतिपादकम्। तथा चामेऽपि नासमेवतार्थमिति न तत्रोहो युक्तः; किन्तु स्वधा-पित्र्यहविर्दानं, तत्करणं स्वधाकारः, तदङ्गमन्त्रः, इदमन्नमित्यादिः। तत्र एकब्राह्मणभोजनपर्याप्तान्ननिष्पादनसमर्थधान्यचतुर्गुणमिदं धान्यमिति इदमन्नमित्यत्रेदमाममिति वोहः, चतुर्गुणमित्यन्तस्य वैयर्थ्यात्। अन्यथा पाकश्राद्धे एकब्राह्मणभोजनपर्याप्तमन्नमित्यपि स्यादिति स्वधाकार इत्यस्यार्थ इति। अन्यकर्मणि विष्णो हव्यं रक्षस्वेत्यादौ अनूहः। *वचनादिति। "तस्मादृचं नोहेत्" इति सामान्यश्रुतिरपि बाध्यते इति भावः। नव्यास्तु न्यायप्राप्तबाधकत्वेनोपपन्नस्यास्य वाक्यस्य न श्रौतनिषेधबाधकत्वम्। अतोऽनृङ्मन्त्रेष्वेवोह इत्याहुः। अत्र भोजनसंबद्धान् पदार्थान् निवर्त्तयति—*तृप्तिप्रश्न इति। तृप्तिप्रश्नः तृप्ता स्थेति। अवगाहो द्विजाङ्गुष्ठनिवेशनम्। जुषप्रश्नः यथासुखं जुषध्वमिति। यथाविधि प्राणाहुत्यादिविधि(?)*खलेवाल्यामिति। खलेवाली यू(१)प इति वचनात्। *अर्थाभावात्।

---

(१) 'यज्ञे पशुबन्धनार्थम्' इत्यादि।

आमे हैमे तथा नित्ये नान्दीश्राद्धे तथैव च ।
व्यतीपातादिके श्राद्धे नियमा(१)न् परिवर्जयेत् ॥
गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ।
पिण्डदानं प्रकुर्वीत आमे हैमे कृते सति ॥
आमश्राद्धे च वृद्धौ च प्रेतश्राद्धे तथैव च ।
विकिरं नैव कुर्वीत मुनिः कात्यायनोऽब्रवीत् ॥
आमश्राद्धमनङ्गुष्ठमग्नौकरणवर्जितम् ।
तृप्तिप्रश्नविहीनं तु कर्तव्यं मानवैर्ध्रुवम् ॥
आवाहनाग्नौकरणं विकिरं पात्रपूरणम् ।
तृप्तिप्रश्नं न कुर्वीत आमे हैमे कदाचन ॥

इत्युक्तम् । *एतच्च—

आवाहनं भवेत्कार्यमर्घ्यदानं तथैव च ।

इति हेमाद्रौ भविष्यादिविरोधाच्चिन्त्यम्, शाखान्तरविषयं वास्तु । *विकिरोऽप्यामेनेति हेमाद्रिः । शूद्रस्य तु तत्रैवोक्तम्-

अग्नौकरणमन्त्रश्च नमस्कारो विधीयते ।

अग्नये कव्यवाहनाय नमः, सोमाय पितृमते नमः,इ(२)त्थं मन्त्रः । मात्स्ये–

मन्त्रवर्ज्यं हि शूद्रस्य सर्वमेव विधीयते ।
एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धं च सर्वदा ॥
नमस्कारेण मन्त्रेण कुर्यादामान्नवद् बुधः ॥

तच्च पूर्वाह्णे कार्यम्,

तत्र छेदनादिकरणे स्वरूपहानिप्रसङ्गात् । कृष्णलावघातवदित्यन्ये । अर्थाभावात् वितुषीकरणरूपद्वारासम्भवात् । *एतच्चेति । आमश्राद्धसामान्याभिप्रायकम् । *विकिरोऽपीति । उपपादयिष्यते ।

---

(१) ब्रह्मचर्यादीन् । (२) 'इत्ययं' क० छ० ।

*आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं च मध्यतः ।

---

*आमश्राद्धं त्विति । इदमत्रावधेयं-यथाऽऽमश्राद्धं त्वित्यादि तथैव—

पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणम् ।
एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम् ॥
शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षापराह्णे तु रौहिणं तु न लङ्घयेत् ॥

इति सावनदिनभागविधयः । नन्वेवं निषेधा नोपपद्येरन्—तत्र तावन्मनुः—

रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा ।
संध्ययोरुभयोश्चैव सूर्ये चैवातिरोहिते ॥

"नातिमंध्यासमीपतः" इति च । संध्या च खण्डरात्रिमण्डलोपलम्भयोग्यकालः मुख्यैव, न तु—

सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ।
उदयात्प्राक्तनी संध्या घटिकात्रयमिष्यते ॥

इति परिभाषिता, तस्या रात्र्यन्तर्गतत्वेन तन्निषेधेनैव निषेधसिद्धेः । स्कान्दे—

उपसंध्यं न कुर्वीत पितृपूजां कथञ्चन ।
स काल आसुरः प्रोक्तः श्राद्धं तत्र विवर्जयेत् ॥

मात्स्ये—

सायान्हस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु ॥

बौधायनः—

चतुर्थप्रहरे प्राप्ते यः श्राद्धं कुरुते नरः ।
आसुरं तद्भवेच्छ्राद्धं दाता च नरकं व्रजेत् ॥

हारीतः—

दिवसस्याष्टमे भागे मन्दीभूते दिवाकरे ।
आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते ॥ इति ।

एते च न निषेधाः । तथात्वे शास्त्रीयप्राप्त्यपेक्षत्वेन तस्याश्चात्यन्तबाधाभावेन विकल्पापत्तेः "नानुयाजेषु" इत्यादिवत्; किन्तु पर्युदासाः । अत्र षष्टिनाड्यवच्छिन्नामावास्यादिविधिशेषतया पर्युदासत्वं रात्र्यादीतरामावास्यायामिति शूलपाणिः । तदसत् , पर्युदासो हि नञ्संबद्धतदितरसमस्तसमुदायिघटितसमुदायविषयस्य सामान्यविधेः तादितरसमुदायिमात्रसङ्कोचने न दोषः । नहि रात्रिसन्ध्यादयस्तिथिरूपसमुदायघटकाः क्षणानामेवैकचन्द्रकलाप्रवेशनिर्गमफलकानां तद्घटकत्वात् । भवन्ति तु ते अहोरात्ररूपसावनदिवसात्मकसमुदायघटकाः, तथैव व्यवहारात् । तथाहि यावता क्षणसमुदायेन रवेरेकमुदयाचलसंयोगमारभ्यापर उदयाचलसंयोगो भवति तावान् समुदायः सावनदिनत्वेन व्यवह्रियते । एवं रवेरुदयाचलसंयोगमारभ्यास्ताचलसंयोगः अस्ताचलसंयोगमारभ्य वोदयाचलसंयोगः यावता क्षणसमुदायेन भवति स समुदायः तदवान्तरसमुदायभूतः क्रमेणाहस्त्वेन रात्रित्वेन च । एवं संध्याप्रातःसंगवादयोऽपि अहोरात्रसमुदायित्वेनैव नतु तिथिसमुदायित्वेन मध्याह्नापराह्णादयश्च सावनदिनस्यैव भागाः, तत्रत्याहःशब्दस्य तद्वचनत्वात् । मुहूर्त्ता अपि तथा,

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।

इत्यादेरन्यत्रानुपपत्तेः । तस्माद्रात्रिसन्ध्यादिभिन्नेऽमावास्यादिभागे इति नार्थः किन्तु रात्रिसन्ध्यादिभिन्ने दिनभागे इत्येव । नच सावनदिनविधेरदर्शनात्क पर्युदास इति वाच्यम्, अमावास्यादिकालविधीनामेव सावनविधित्वात् । यथा हि केवलस्य वसन्तादेर्निमित्तत्वश्रवणमजीवतोऽनुष्ठानासंभवाद्वसन्तावच्छिन्नजीवन-

परं, तथा केवलस्यामावास्यादेरङ्गत्वश्रवणमहोरात्रं विहाय कर्मकरणाशक्तेस्तद्वदहोरात्रपरम्, अमावास्यावत्यहोरात्रे श्राद्धं कुर्यादिति। अत एव सङ्कल्पवाक्ये सर्वकर्मसु अद्येति सावनदिनस्याधिकरणत्वेनोल्लेखः।

अद्य सोमार्कग्रहणसंक्रांत्यादौ सुतीर्थके।

इत्यादिदानसङ्कल्पवाक्ये "अद्य कृष्णाष्टमीं प्राप्य" इत्यादिजन्माष्टमीव्रतसङ्कल्पवाक्ये च। अथवा यथा "दीक्षितो न ददाति" इति निषेधस्य यद्यावज्जीवं दानहोमादीनि कुर्यात्तद्दीक्षितो नेत्यर्थः। तथा यदमावास्यादिमदहोरात्रे श्राद्धं कुर्यात्तद्रात्र्यादौ नेत्यर्थादेते निषेधा एव। एवमेव—

रात्रौ स्नानं न कुर्वीत तथा दानं च रात्रिषु।
पञ्चयज्ञविधाने च न कुर्यान्मृत्युजन्मनोः॥

इत्यादयो निषेधा व्याख्येयाः। एते च पर्युदासा निषेधा वा प्राप्तिमपेक्षन्ते। प्राप्तिश्च सत्यपि अमावास्यादिसामान्यविधौ न श्राद्धे रात्र्यादेः किन्तु आमश्राद्धादिभेदेन पूर्वाह्णादेरेव।

आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु मध्यतः।
पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकम्॥
पूर्वाह्णे दैविकं श्राद्धमपराह्णे तु पार्वणम्।
एकोद्दिष्टं तु मध्यान्हे प्रातर्वृद्धिनिमित्तकम्॥

इत्यादिवचनादिति चेत्? प्रातःसंध्यातत्समीपनिषेधस्तावत् प्रातर्वृद्धिनिमित्तकमित्येतत्प्राप्तपुत्रजन्मातिरिक्तविवाहादिनिमित्तकवृद्धिश्राद्धे। प्रातःसन्ध्यासमीपं च प्रथमो मुहूर्त्तः। स एवाचिरोदितपदेनोच्यते, "सूर्योदयमुहुर्त्ते च" इति शातातपोक्तेः। सायंसन्ध्यातत्समीपसायाह्नादिनिषेधश्च पार्वणे, तस्यापराह्णकालत्वात्। अपराह्णस्य द्वेधा त्रेधा वा विभागे रात्रिपर्यन्तत्वात्,

यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते।
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते॥ इति।

पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकम् ॥

"वासरस्य तृतीयेंऽशे" इति वचनाभ्यामपराह्णत्वाविशेषाच्च तादृशस्यापि तस्य पार्वणाङ्गत्वप्रतीतेः । चतुर्थप्रहरसायाह्नदिनाष्टमभागान्त्यमुहूर्त्तानां च तारतम्येन वर्ज्यत्वम् । अथवा चतुर्थप्रहरनिषेधोऽल्पान्तरत्वात्सायाह्नपरः । नन्वेवं प्रातःसायमादिनिषेधविषये लब्धेऽपि रात्रिनिषेधः केतिचेत् ? अत्र केचित्–ग्रहणपुत्रजन्मादिनिमित्तके श्राद्धे सः । तथाच रात्रौ तच्छ्राद्धस्य विकल्पः;

राहुदर्शनसङ्क्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च ॥

इति वाक्ये आदिपदेन श्राद्धोपादानेन रात्रौ प्राप्तत्वात्प्राप्तिसापेक्षस्य निषेधस्य परिशेषात्तद्विषयत्वेन समानविषयत्वात् । विवाहे च दानस्यैवान्वयो न श्राद्धस्य "प्रातर्वृद्धिनिमित्तकम्" इति तन्निमित्तकश्राद्धस्य प्रातःकरणात्तत्र रात्रिविधानानुपपत्तेः । यदा रात्रौ विवाहे प्रातर्वृद्धिश्राद्धं न कृतं तदा रात्रौ कार्यमिति तु शूलपाणिरित्याहुः । तदसत्, एवमपि दर्शश्राद्धं प्रकृत्य "रात्रौ श्राद्धं न कुर्वीत" इति मानवनिषेधस्य कृष्णपक्षश्राद्धं प्रकृत्य "न नक्तं श्राद्धं कुर्वीत" इति निषेधस्य चागतेः, ग्रहणादिश्राद्धविषयत्वासंभवात् । वस्तुतस्तु तीर्थश्राद्धविषयोऽयं रात्रिनिषेधः । ननु महाभारते—

भुक्तो वाप्यथवाऽभुक्तो रात्रावहनि खेचर ।
न कालनियमो ह्यस्ति गङ्गां प्राप्य सरिद्वराम् ॥

देवीपुराणे–

काले वाऽप्यथवाऽकाले तीर्थे श्राद्धं सदा नरैः ।
प्राप्तैरेव च कर्त्तव्यं पितृणां चैव तर्पणम् ॥
पिण्डदानं च तच्छस्तं पितॄणां चैव वल्लभम् ।
विलम्बो न च कर्त्तव्यो न च विघ्नं समाचरेत् ॥

काशीखण्डे-

अकालेऽप्यथवा काले तीर्थे श्राद्धं च तर्पणम् ।
अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् ॥

इति च रात्रावपि तीर्थश्राद्धविधानान्न रात्रिनिषेधस्तद्विषय इति चेत्? न, सर्वेषामेतेषां वाशब्दापिशब्दश्रवणाद् 'गुरुं वा बालवृद्धं वा' इत्यादिवत् स्वार्थतात्पर्यरहितानां--

रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम् ।

इतिवचनप्राप्तप्रातःसायाह्नादिप्रतिप्रसवार्थत्वात् । तथाचायमर्थः-प्रातःकाले तीर्थं प्राप्तैर्न कुतपापराह्णरूपः प्रारम्भप्रधानकालः प्रतीक्ष्यः सायाह्ने प्राप्तैश्च मुख्यकालापगमान्न श्राद्धं हेयं, किन्तु येन केनचित्प्रकारेण रात्रेः प्राक्कार्यम् । अत एव केचन शिष्टा रात्रिभोजनोत्तरकालादौ तीर्थं प्राप्ता अपि तच्छ्राद्धं न कुर्वन्ति । एवं मुख्यकालं या(१)वदस्यापि द्रव्यपात्रसम्पत्तावपि बोध्यम् । तत्रापि--

तीर्थद्रव्योपपत्तौ च न कालमवधारयेत् ।

इति मुख्यकालप्रतीक्षानिषेधमुखेन प्रातःसायान्हादेरेव प्रतिप्रसवात् । एवमेव प्रारब्धे श्राद्धे दैवमानुषप्रतिबन्धादसमाप्ते यदि रविरस्तमियात्तदा प्रारब्धत्वाद्रात्रावपि तत्समाप्तौ प्राप्तायां "नच नक्तं श्राद्धं कुर्वीत" इति निषेधः सङ्कच्छते । तत्र सामिकृतमेव स्थापयित्वा परेद्युः शेषं समाप्यं, तदुत्तरमेव च यजमानभोजनं, नतु पूर्वदिने इति, "प्रारब्धे चाभोजनमापरिसमापनात्" इत्युत्तरगौतमसूत्रात् । वस्तुतस्तु अपराह्णविधिर्न तन्नियमार्थः "मासि मास्यपरपक्षस्यापराह्णः श्रेयान्" इत्यापस्तम्बादेः;

दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितम् ।
अपराह्णे पितॄणां तु तत्र दानं प्रशस्यते ॥

इति शातातपादेश्च प्राशस्त्यार्थत्वात् । एवञ्च "अपराह्णे

---

[१] 'यावदस्थायिद्रव्य' ङ।

पितृक्रिया" इत्यादीनां प्राशस्त्यास्पृष्टवचसामपि प्राशस्त्यपरत्वमेव, पूर्ववाक्यैकवाक्यत्वात् । याच--

उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।

इत्यादिः सायाह्नस्य पित्र्यकालत्वोक्तिः साऽपराह्णे श्राद्धासम्भवे सायाह्ने कर्तव्यत्वार्था नतु सङ्गवादाविति । एवमेकोद्दिष्टादौ मध्याह्नादिविधयोऽपि प्राशस्त्यपरा एव;

अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा ।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः ॥
मध्याह्ने सर्वदा यस्मान्मन्दीभवति भास्करः ।
तस्मादनन्तफलदस्तत्रारम्भो विशिष्यते ॥

इति मात्स्यादिवचनात् । तस्मात्कुतपापराह्णादीनां प्राशस्त्यमात्रपरत्वेन श्राद्धार्थत्वेनानियमितत्वात्सर्वश्राद्धे सर्ववेलानां प्रसक्तौ युक्त एव रात्रिसन्ध्यादेर्निषेधः । तथा--

प्रातःकाले तु न श्राद्धं प्रकुर्वीत द्विजोत्तमः ।
नैमित्तिकेषु श्राद्धेषु न कालनियमः स्मृतः ॥

इत्यादिप्रातःकालविहितवृद्धिश्राद्धेतरस्मिन्ननैमित्तिकसर्वश्राद्धे प्रातःकालस्य निषेधः । तथाच रात्रिसन्ध्याद्वयतदन्तिकप्रातःसायाह्नेतरतन्मध्यवर्त्तिमुहूर्त्तनवकमनैमित्तिकश्राद्धकालः । तत्र कुतपादिमुहूर्त्तपञ्चकं पार्वणेऽतिप्रशस्तम् "ऊर्ध्वं मुहूर्त्तात्" इत्याद्युक्तेः । एकोद्दिष्टे च मध्याह्ने प्रथमं गान्धर्वं हित्वा परौ मुहूर्त्तौ, "आरभ्य कुतपे श्राद्धम्" इत्याद्युक्तेः । संगवस्तु तत्र न विहितो न निषिद्ध इति बोध्यम् । तदेवं निषेधमुखेन श्राद्धवेला दर्शिता सा रात्रिसंध्यादिभिन्नोऽहर्भागः । विधिमुखेन तावत् सा च "पूर्वाह्णे दैविकं श्राद्धम्" इत्यादिना बोध्या । तत्र पूर्वाह्णः संगवः, प्रातःकालनिषेधात् । अतएव च "आमश्राद्धं तु पूर्वाह्णे" इत्यत्रापि स एव;

कालात् प्रातस्तनादूर्ध्वं त्रिमुहूर्त्ता तु या तिथिः ।
आमश्राद्धं तदा कुर्याद्द्विमुहूर्त्ताऽपि वा भवेत् ॥

इति व्याघ्रपादोक्तेश्च । द्विजकर्तृकामश्राद्धे एवायं कालः, शूद्रकर्तृके त्वपराह्ण इत्यादि ग्रन्थ एव स्पष्टम् । प्रातर्वृद्धिनिमित्तकमिति च पुत्रजन्मातिरिक्तवृद्धिपरम् । पुत्रजन्मरूपवृद्धिनिमित्तकं तु तदनन्तरमेव कार्यम्, नैमित्तिकानां निमित्तानन्तर्यस्यैव प्राप्तेः ।

पूर्वाह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्तिकम् ।

इत्याद्युक्तेः । सन्ध्यारात्र्यादिनिषेधोऽपीह ग्रहणादौ च न प्रवर्त्तते । एवं पूर्वप्रवृत्ताशौचे सत्यपि भर्तृमरणे तत्पत्नीनामनुमरणमपि भवति । "भर्त्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वा" इति सतिसप्तम्या नैमित्तिकत्वावगमात्, भर्तृसंस्कारप्रयुक्ततच्चित्युपजीवित्वेन निरवकाशत्वाच्च । रजस्वलायास्तु तन्न भवति । अशुचित्वादेव सर्वनित्यकाम्यकर्मनिषेधसिद्धेः नच किञ्चित्तदाचरेत्" इति पुनर्निषेधेन किञ्चिच्छब्दवशेन नैमित्तिकानामपि कर्मणां क्रोडीकारात् । सूतिकायाश्चोदक्यासमानधर्मत्वं बोध्यं, रजस्वलात्वात् । एवमादि सकलं विवेचनग्रन्थादवगन्तव्यम् । आमश्राद्धमिति च हेमश्राद्धस्याप्युपलक्षणं, तस्यापि पूर्वाह्ण एव कर्त्तव्यत्वात् । एवञ्चात्रापि तृप्तिप्रश्न इत्यादयः पञ्च निवर्त्तन्ते । तीर्थनिमित्तकाऽऽमहेमश्राद्धयोस्त्वर्घ्यादयोऽपि, तीर्थनिमित्तकपाकश्राद्धवत्,

अर्घ्यमावाहनं चैव द्विजाङ्गुष्ठनिवेशनम् ।
तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥

इत्यग्रिमवचनात् । एवञ्च धर्मप्रदीपे—विकिरावाहनादिनिषेधः तीर्थनिमित्तकामहेमाभिप्रायः । प्रवासादिनिमित्तके तत्र तस्य कर्त्तव्यत्वात् । विकिरोऽप्यामेनेति हेमाद्र्युक्तेस्तत्परत्वात् । आमातिरिक्तमोदनादिकं पिण्डदाने एव "पिण्डान् दद्यात्" इति पिण्डदानमात्रवचनात् । विकिरादौ त्वाममेव,

इति हारीतोक्तेः । एतद् *द्विजविषयम् । *शूद्रकर्तृकं त्वपराह्ण एव,

मध्याह्नात्परतो यस्तु कुतपः समुदाहृतः ।
आमश्राद्धं तु तत्रैव पितॄणां दत्तमक्षयम् ॥

इति सुमन्तूक्तेरित्यपरार्के हेमाद्रौ चोक्तम् ।

तदभावे हेमश्राद्धमाह हेमाद्रौ मरीचिः--

*आमान्नस्याप्यभावे तु श्राद्धं कुर्वीत बुद्धिमान् ।
*धान्याच्चतुर्गुणेनैव हिरण्येन सुरोचिषा ॥

धर्मः--

आमं तु द्विगुणं प्रोक्तं हेम तद्वच्चतुर्गुणम् ।

स्मृत्यर्थसारे-'हिरण्यमष्टगुणं चतुर्गुणं समं वा दद्यात् ।' हेमाद्रौ भविष्ये-

*अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि ।

आमश्राद्धप्रदः पिण्डास्तथाऽग्नौकरणं च यत् ।
तद्द्यात्तत्र तेनैव यत्किञ्चिच्छ्राद्धिकं भवेत् ॥

इति प्रचेतसा यत्किञ्चित्पदेन विकिरादेरभिधानात् । *द्विजेति । पाकासम्भवे हि आमश्राद्धं द्विजानां, तत्र पश्चात्पाकेन भोजनसत्त्वात् । *शूद्रेति । तस्य नित्यप्राप्ततया पूर्वाह्णवैयर्थ्यमिति भावः । एतच्च मतं दूषयित्वा शूद्रस्यापि पूर्वाह्ण एवामश्राद्धं निर्धारितं विवेचने । *आमान्नस्यापीति । पुत्रजन्मातिरिक्तेषु पक्वान्नाभावे आमं तदभावे हेम इति आमहेम्नोरष्टदोषग्रस्तो विकल्पः । *धान्यात् एकैकब्राह्मणतृप्तिपर्याप्तान्नसिद्धिसमर्थादामात् । आमं हि अन्ततो द्विगुणं चतुर्गुणमष्टगुणमिति मुख्यः कल्पः । धर्मवाक्यं तदनुकल्पः । अत्यन्ताशक्तौ सममिति विवेकः । चतुर्गुणत्वादिकं तावद्धान्यलाभपर्याप्तत्वम् । वस्तुतस्तु धर्मवचनेन हेम्न आमद्वैगुण्यस्यैव प्राप्तेरामत्रैगुण्यादौ हेम्नस्तद्द्वैगुण्यं द्रष्टव्यम् । *अन्नाभावे इति । पुत्रजन्मानुरोधेनैव हेमपदोपादानम् । आम-

हेमश्राद्धं सग्रहे च तथा स्त्रीशूद्रयोरपि ॥

षट्त्रिंशन्मते तुर्यपादे-*'वर्जयित्वा *क्षयेऽहनि' इति पाठः ।*'यस्य भार्या रजस्वला' इति व्यासपाठः । पुत्रोत्पत्तौ तु*हेमनियममाह संवर्तः-

पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान् ।
न पक्वेन न चामेन कल्याणान्यभिकामयन् ॥

भविष्ये--

*गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ।
पिण्डदानं प्रकुर्वीत हेमश्राद्धे कृते सति ॥
*शूद्रस्तु गृहपाकेन त(१)त्पिण्डान्निर्वपेत्तथा ।

पदानुपादानं च । अन्यत्र त्वामासम्भव एव हेमश्राद्धमित्युक्तम् । तथा च सग्रहपदात्तत्कालापतिते वेधकाले ग्रहणकाले वा ग्रहणश्राद्धातिरिक्तम् दर्शादिश्राद्धमामादिनैव कार्यमित्यर्थः । एतेन—

संक्रमेऽन्नद्विजाभावे प्रवासे पुत्रजन्मनि ।
हेमश्राद्धं सग्रहे च द्विजः शूद्रः सदा चरेत् ॥

इति वचनान्तरमपि आमासम्भव एवेति न हेमश्राद्धस्य पुत्रजन्मातिरिक्ते मुख्यत्वभ्रमः कार्यः । *वर्जयित्वेति । सग्रहे इत्यनुवृत्तेः सग्रहे । *क्षयेऽहनीति । अनेन वेधादिकाले क्षयाहश्राद्धं हेम्ना न कार्यं किन्त्वामेनैवेत्यर्थः । *यस्येति । भार्यायां रजस्वलायामाब्दिकं दार्शं वा श्राद्धं हेम्नैवेत्यर्थः । एतच्च--

क्षयाहं तु परित्यज्य रौरवं नरकं व्रजेत् ।

इति मतेन । पञ्चमादिने तद्वादिनस्तु एतन्न पठन्ति । *हेमनियमं हेमश्राद्धस्य मुख्यत्वं, नचामेनेति तु हेमसम्भवाभिप्रायम् । हेमश्राद्धे पिण्डदानं नास्तीति भ्रमं वारयति-*गृहपाकादिति । *शूद्रास्त्विति । "स्त्रीशूद्राश्च सधर्माणः" इति वचनात् । स्त्रीशू

---

(१) 'न पिण्डा' ग० ।

*सक्तु मूलं फलं तस्य पायसं वा भवेत्स्मृतम् ॥

हेमश्राद्धे पिण्डदानं नेति दिवोदासः । स्मृत्यर्थसारे तु विकल्प उक्तस्तदाशयं न विद्मः । षट्त्रिंशन्मते-

*नामन्त्रणाग्नौकरणे विकिरो नैव दीयते ।
*तृप्तिप्रश्नोऽपि नैवात्र कर्तव्यः केनचिद्भवेत् ॥

अत्र मरीचिना आमाभावे हेमविधानेन स्थानापत्त्या धर्मप्राप्तेः पूर्ववन्मन्त्रोहः पूर्वाह्णकालता च ज्ञेयेति दिक् । पूर्वोक्तधर्मप्रदीपोक्तेश्च ।

व्यासः—

हिरण्यमामं श्राद्धीयं लब्धं य*त्क्षत्रियादितः ।
यथेष्टं विनियोज्यं स्याद् भुञ्जीयाद्ब्राह्मणात्स्वयम् ॥

विप्रलब्धं भुञ्जीयात् । क्षत्रियादिलब्धे तु यथेष्टविनियोगः । *तेनापि श्राद्धवैश्वदेवादि न कार्यम् । देवोद्देशेन त्यक्तस्य देवतान्तराय त्यागायोगादिति देवयाज्ञिकः । शूद्रलब्धे तूक्तं तत्रैव षट्त्रिंशन्मते—

*आमं शूद्रस्य यत्किंचिच्छ्राद्धिकं प्रतिगृह्यते ।
तत्सर्वं भोजनायालं नित्यनैमित्तिके न च ॥ इति ।

द्रकर्तृकमामादिसाधनकं सर्वं श्राद्धमोदनपायसादिसाधनकपिण्डकमित्यर्थः । आमाभावे हेमविधानेनामस्यापि लाभात् । *सक्त्विति । पिण्डनिर्वपणार्थमिति शेषः । *नामन्त्रणेति । तीर्थनिमित्तके हेमश्राद्धे । अन्यनिमित्तके तु तत्र हेमाद्रिमते आमेन विकिरः कार्यः । *तृप्तिप्रश्न इति । भोजनसम्बन्धियावन्निवृत्तेरुपलक्षकम् । *क्षत्रियादित इति । आदिना वैश्यग्रहः । मूर्धावसिक्तग्रह इति केचित् । सामान्यतो यथेष्टविनियोज्यत्वोक्तावपि विशेषमाह—*तेनापीति । *आममिति । शूद्राल्लब्धस्यामस्य स्वीये परकीये वा भोजन एव विनियोगः न तु यथेष्टं, नापि वि-

शुद्धितत्त्वेऽङ्गिराः—

शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि।
निवृत्तेन न भोक्तव्यं शूद्रान्नं तदपि स्मृतम्॥
शूद्राद्विप्रगृहेष्वन्नं प्रविष्टं तु सदा शुचि॥

पराशरः—

तावद्भवति शूद्रान्नं यावन्न *स्पृशति द्विजः।
द्विजातिकरसंस्पृष्टं सर्वं तन्न विरुध्यते॥

विष्णुपुराणे—

संप्रोक्षयित्वा गृह्णीयाच्छूद्रान्नं गृहमागतम्।

अङ्गिराः—

*पात्रान्तरगतं ग्राह्यं दुग्धं स्वगृहमागतम्।

सपिण्डश्राद्धाशक्तावाह हेमाद्रौ संवर्तः---

समग्रं यस्तु शक्नोति कर्तुं नैवेह पार्वणम्।
अपि संकल्पविधिना काले तस्य विधीयते॥
पात्रे भोज्यस्य चान्नस्य त्यागः *संकल्प उच्यते॥

मलब्धवत्स्वभोजने एवेत्यर्थः। हिरण्यं तु शूद्रलब्धं नित्यादावपि विनियोज्यम्—

हिरण्यं तत्पुनः श्राद्धे गृहीतं नैव दुष्यति।
तेन नित्यक्रियाः कार्या हिरण्यं नान्नमुच्यते॥

इति षट्त्रिंशन्मतात्। तथा च शूद्रलब्धं हिरण्यं भोजने नित्यक्रियादौ लौकिकेऽलौकिके वा दक्षिणादौ नित्यनैमित्तिके वा विनियोज्यमिति फलितम्। *स्पृशति प्रतिगृह्णाति। *पात्रान्तरेति। तत्पाकश्च शूद्रगृहे न कार्यः,

शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मन आगतम्।
पक्वं विप्रगृहे भुक्तं भोज्यं तं मनुरब्रवीत्॥

इतिपराशरमाधवीयस्मरणात्। गोरसं क्षीरादि, स्नेहं तैलादि। *संकल्प उच्यते इति।

व्यासः—

*सांकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् ।
नावाहनाग्नौकरणे पिण्डांश्चैव न *दापयेत् ॥

*पात्रमर्घ्यस्य । समन्त्रकावाहनस्य निषेधः । *तूष्णीं तु भवत्येवेति हेमाद्रिः । स्मृ(१)त्यर्थसारे—'विकिरं तु न दातव्यम्' इति तृतीयपादे पाठः । स्मृत्यन्तरे—

त्यजेदावाहनं चार्घ्यमग्नौकरणमेव च ।
पिण्डांश्च विकिराक्षय्ये श्राद्धे सांकल्पसंज्ञके ॥

हेमाद्रौ वृद्धशातातपस्तु—

पिण्डनिर्वापरहितं यत्तु श्राद्धं विधीयते ॥
तावन्मात्रेण संबद्धं सांकल्पं श्राद्धमुच्यते ।

इति वाक्यशेषात्साङ्गोपाङ्गासमर्थस्य संकल्प्यान्नदानमात्रं सांकल्पश्राद्धमित्यर्थः । संकल्पश्राद्धे यदङ्गं वा प्रधानं वा न कर्त्तव्यं तदाह—*सांकल्पं त्विति । *दापयेदिति । णिच् न विवक्षितः । *पात्रमिति । अर्घ्यो न देय इति भावः । *तूष्णीं त्विति । अमन्त्रकावाहनाकरणे देवताया असंनिधानप्रसङ्गेन श्राद्धानिष्पत्तिप्रसङ्गात् । नवीनास्तु पितृविग्रहः(?) स्वीकार्यः । अन्यथा धर्माधर्मफलभोगानुपपत्तेः । एवं तत्तृप्तिरपि श्राद्धफलत्वेन स्वीकार्या देवताधिकरणे देवतातृप्तेर्निराकरणेऽपि रात्रिसत्रन्यायेन पितृतृप्तित्वेन तस्या दुर्वारत्वात् । नत्वागमनरूपं तत्सांनिध्यं मानाभावात् । यत्तु—

आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च ।
प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः ॥

इति प्रसादफलदातृत्वं तदपि नोपेयते आर्थवादिकत्वात् । तस्मात्सांनिध्यफलदातृत्वयोरनुपगमादमन्त्रकावाहनं वृथैवेत्याहुः ।

---

(१) 'स्मृत्यन्तरे' क० छ०

स्वधावाचनलोपोऽत्र *विकिरस्तु न लुप्यते ॥

इत्याह । पृथ्वीचन्द्रोदये वसिष्ठः—

आवाहनं स्वधाशब्दं पिण्डाग्नौकरणं तथा ॥
विकिरं *(१)चार्घ्यदानं च सांकल्पे षड् विवर्जयेत् ॥

विकिरे विकल्पः । स्मृत्यन्तरे—

अङ्गानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात् ।
स तदा वाचयेद्विप्रान् संकल्पात्सिद्धिरस्त्विति ॥

छागलेयः—

*पिण्डो यत्र निवर्तेत मघादिषु कथंचन ।
सांकल्पं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः ॥

कार्ष्णाजिनिः—

*मौञ्जीबन्धाद्वत्सरार्धं वत्सरं पाणिपीडनात् ।
पिण्डान् सपिण्डा नो दद्युः प्रेतपिण्डं विनात्र तु ॥

*विकिरस्तु न लुप्यत इति । अत्र 'विकिरस्तु विलुप्यते' इति पाठेन विकिरविकल्पं दूषयित्वा —

अक्षय्यदक्षिणास्वस्तिसौमनस्यं यथा(व)स्थितम् ।

इति पाठेन अक्षय्यविवर्जनस्मृतेर्विगानमिच्छन्ति नव्याः । *अर्घ्यदानमिति । पिण्डदानं चेति पाठे पिण्ड उच्छिष्टपिण्डः । पिण्डदानस्य पृथगुपादानात् । पितृयज्ञः श्राद्धम् । अशक्ताधिकारिके संकल्पश्राद्धे अस्य श्राद्धस्य संकल्पात्सिद्धिरस्त्विति भवन्तो ब्रुवन्त्विति यजमानेनोक्ते संकल्पात्सकलासिद्धिरस्त्विति ब्राह्मणा ब्रूयुरित्यर्थः । अग्नौकरणादिसंपादनसमर्थस्यापि कदाचित्सांकल्पिकश्राद्धं दर्शयति—*पिण्ड इति । *मौञ्जीबन्धादिति । उपलक्षणम्;

यावन्मासः समाप्येत तावत्पिण्डांश्च वर्जयेत् ।
वृद्धावनन्तरं प्राज्ञस्तथैव तिलतर्पणम् ॥

---

(१) 'पिण्डदानं' क० ग०

अस्यापवादः पित्रोराब्दिकादौ पूर्वमुक्तः । *त्यक्ताग्नेरपि सांकल्पमुक्तं षट्त्रिंशन्मते—

अनग्निको यदा विप्र उत्सन्नाग्निस्तथैव च ।
तथा *वृद्धिषु सर्वासु संकल्पश्राद्धमाचरेत् ॥

अशक्तौ पृथ्वीचन्द्रोदये बृहन्नारदीये—

द्रव्याभावे द्विजाभावे अन्नमात्रं तु *पाचयेत् ।
पैतृकेन तु सूक्तेन होमं कुर्याद्विचक्षणः ॥

देवलः—

*पिण्डमात्रं प्रदातव्यमभावे द्रव्यविप्रयोः ।
श्राद्धीयाहनि संप्राप्ते भवेन्निरशनोऽपि वा ॥

इति स्मरणात् । *त्यक्ताग्नेरिति ।

त्यक्ताग्नेः पार्वणं नैव नैकोद्दिष्टं सपिण्डनम् ।
अत्यक्ताग्नेस्तु पिण्डोक्तिस्तस्मात्संकल्प्य भोजयेत् ।

इति यमेन संकल्पश्राद्धे त्यक्ताग्निरूपकर्तृविशेषनियमनात् । *वृद्धिष्विति । साग्निकस्यापि संकल्पविधिना वृद्धिश्राद्धं पुनर्विधानात् । द्रव्याभावे ब्राह्मणभोजनपर्याप्तपक्वान्नामान्यतरा(?)भावे । द्विजाभावे श्राद्धयोग्यद्विजाभावे । एष एव 'अभावे द्रव्यविप्रयोः' इत्यस्यार्थः । *पाचयेदिति । णिच् भार्याभिप्रायेण । पैतृकं सूक्तम् "उदीरतामवर उत्परास" इत्यष्टर्चम् । होमं चतुःकृत्वः कुर्यात् । एतच्च महैकोद्दिष्ट एव "होतव्यमनलेऽथवा" इति गौभिलीयैकवाक्यत्वात् । अन्यत्र त्वाह—*पिण्डमात्रमिति । आमहेमश्राद्धाशक्तौ—

सक्तुभिः पिण्डदानं च संयावैः पायसेन वा ।
कर्त्तव्यमृषिभिः प्रोक्तं पिण्याकेनेङ्गुदेन वा ॥

गुडेन वेति वा पाठः । इदं च देवीपुराणे पिण्डसाधनद्रव्या-

वृद्धवसिष्ठः—

किञ्चिद्दद्यादशक्तस्तु *उदकुम्भादिकं द्विजे ।
*तृणानि वा गवे दद्यात् पिण्डान्वाप्यथ निर्वपेत् ॥
*तिलदर्भैः पितॄन्वापि तर्पयेत्स्नानपूर्वकम् ॥

हेमाद्रौ भविष्ये—

अग्निना वा दहेत् *कक्षं श्राद्धकाले समागते ।
तस्मिन्वोपवसेदह्नि जपेद्वा श्राद्धसंहिताम् ॥

श्राद्धसंहिता समन्त्रश्राद्धसंकल्पः । विष्णुवराहपुराणयोः—

असमर्थोऽन्नदानस्य (१)धान्यमामं स्वशक्तितः ।

शक्तपरम् । *उदकुम्भादिकमिति । आदिना—

अपि मूलैः फलैर्वापि तथाप्युदकतर्पणैः ।
अविद्यमाने कुर्वीत नतु प्राप्तं विलङ्घयेत् ।

इति हारीतोक्तं फलादिदानम्;

निवासमेव वा दद्यात् पिण्डं वाप्यथ निर्वपेत् ॥

इति भविष्योक्तं निवासदानं च ग्राह्यम् । *तृणानीति गोभोजनपर्याप्तानि तृणानि दद्यात्;

यतः कुतश्चित्संप्राप्य गोभ्यो वापि गवाह्निकम् ।

इति पितृवचनात् । नापि स्वयं छेत्तव्यानि "यतः कुतश्चित्" इत्युक्तेः । *तिलदर्भैरिति । तिलसंख्यापि—

तिलैः सप्ताष्टभिर्वापि समवेतं जलाञ्जलिम् ।
भक्तिनम्रः समुद्दिश्य भुव्यस्माकं प्रदास्यति ॥

इति पितृवचनात् । तदसंभवे तिलान्वापीति तिलदानम्,

तत्राप्यसामर्थ्ययुक्तः कराग्रावस्थितांस्तिलान् ।
प्रणिपत्य द्विजाग्र्याय कस्मैचिदुपदास्यति ॥

इति वचनात् । *कक्षं गिरिदरीति श्राद्धसारः । अत्र पि-

---

(१) 'धान्यमाशं' छ० 'धान्यं मांसं' ग०

प्रदास्यति तिलान्वापि स्वल्पां वापि च दक्षिणाम् ॥
सर्वाभावे वनं गत्वा कक्षामूलप्रदर्शकः ।
*पूर्वादिलोकपालानामिदमुच्चैः पठिष्यति ॥
न मेऽस्ति वित्तं न धनं न चान्नं
श्राद्धोपयोगि स्वपितॄन्नतोऽस्मि ।
तृप्यन्तु भक्त्या पितरौ मयैतौ
भुजौ कृतौ वर्त्मनि मारुतस्य ॥
इत्येतत् पितृभिर्गीतं भावाभावप्रयोजनम् ।
यः करोति कृतं तेन श्राद्धं भवति भारत ॥

प्रभासखण्डे—

गत्वारण्यममानुष्यमूर्ध्वबाहुर्विरौत्यदः ।
निरन्नो निर्धनो देवाः पितरो माऽनृणं कृथाः ॥
न मेऽस्ति वित्तं न धनं न भार्या
श्राद्धं कथं वः पितरः करोमि ।
वनं प्रविश्येह तु तन्मयोच्चै-
र्भुजौ कृतौ वर्त्मनि मारुतस्य ॥
श्राद्धर्णमेतद्भवतां प्रदत्तं
मह्यं दयध्वं पितृदेवताद्याः ।
आख्याय चोत्क्षिप्य भुजौ ततो वै
दिवा च रात्रिं समुपोष्य तिष्ठेत् ॥
भवेत्स वै तेन कृतेन तेषा—
मृणेन मुक्तः पितृदेवतानाम् ॥

इत्यनुकल्पः ॥

अथ श्राद्धभोजने प्रायश्चित्तम् । *दर्शे षट् प्राणा-

न्ये प्राचीनावीतित्वादयो धर्मा द्रष्टव्याः । *पूर्वादीति । सूर्यादीति पाठान्तरेपि अयमेवार्थः । *दर्शे इत्यादि ।

यामाः । वृद्धौ त्रयः । *संस्कारेषु जातकर्मादिचूडान्तेषु सांतपनम् *आद्ये चान्द्रं वा । अन्यसंस्कारेषूपवासः । *सीमन्ते चान्द्रमिति विज्ञानेश्वरः । *आपदि नवश्राद्धैकादशाहेषु भोजनं कार्यः । द्वादशाहे ऊनमासे च पादोनः । द्विमासे त्रिपक्षे ऊनषष्ठोऽनाब्दयोश्चार्धकृ-

भरद्वाजः—

भुङ्क्ते चेत्पार्वणश्राद्धे प्राणायामान्षडाचरेत् ।
उपवासस्त्रिमासादिवत्सरान्तं प्रकीर्तितः ॥
प्राणायामत्रयं वृद्धावहोरात्रं सपिण्डने ।
असरूपे स्मृतं नक्तं व्रतपारणके तथा ॥
द्विगुणं क्षत्रियस्यैतत्त्रिगुणं वैश्यभोजने ।
साक्षाच्चतुर्गुणं ह्येतत्स्मृतं शूद्रस्य भोजने ॥ इति ।

तत्र त्रिमासादीत्यापद्विषयमिति मयूखः । *संस्कारेष्विति ।

भरद्वाजः—

निवृत्तचूडहोमे तु प्राङ् नामकरणात्तथा ।
चरेत्सान्तपनं भुक्त्वा जातकर्मणि चैव हि ॥
अतोन्येषु तु भुक्त्वाऽन्नं संस्कारेषु द्विजोत्तमः ।
नियोगादुपवासेन शुद्ध्यते निन्द्यभोजने ॥ इति ।

(सं(१)स्काराङ्गश्राद्धभोजने इत्यर्थो मिताक्षरासंमतः । व्यासः ।) *आद्ये इति । बौधायनः—

ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा ।
जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥ इति ।

सान्तपनं त्वशक्तपरमिति भावः । ब्रह्मौदने आधानाङ्गभूते सोमसाहचर्यात् । *सीमन्ते इति । सान्तपनवाक्यस्य "ब्रह्मौदने च सोमे च" इति बौधायनवाक्येन बाधात् । *आपदीति ।

---

(१) कंसान्तर्गतं नास्ति छ०

च्छ्रः । त्रिमासाद्याब्दिकान्तेषु सपिण्डने च पादकृच्छ्र उपवासो वा .। गुरुद्रव्यार्थभोजनेऽर्धम् । जपशीले तदर्धम् । अनापदि तूनमासान्तेषु चान्द्रं कार्यं वा । द्विमासादौ पादोनम् । त्रिमासादावर्धकार्यः । आब्दिके पादोनकार्यः । पुनराब्दिके एकाहः । *क्षत्रियादिश्राद्धेषु द्वित्रिचतुर्गुणानि ज्ञेयानि । *चण्डालसर्पश्वादिहतपतितक्लीबादिनवश्राद्धे चान्द्रम् । आद्यमासिकान्ते चान्द्रं पराकश्च । द्वादशाहादौ पराकः । द्विमा-

---

विष्णुः—

प्राजापत्यनवश्राद्धे पादोनं चाद्यमासिके ।
त्रैपक्षिक तदर्धं तु पञ्चगव्यं द्विमासिके ॥ इति ।

इदं चापद्विषयम् । अनापदि तु—

चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके ।

मिश्रके मासिके ।

एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते ।

इति हारीतोक्तं द्रष्टव्यम् । मिश्रकमेकादशाहम् । नवश्राद्धमित्येतदाद्यनवश्राद्धपरम् । प्राजापत्यं तु मिश्रके इत्येतदाद्यमासिकपरम् । द्वितीयनवश्राद्धादिषु चतुर्विंशतिमते—

प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासिके ।
त्रैपक्षिके तदर्धं स्यात्पादौ द्वौ मासिके ततः ॥
पादोनं कृच्छ्रमुद्दिष्टं षण्मासे च तथाब्दिके ।
त्रिरात्रं चान्यमासेषु प्रत्यब्दं चेदहः स्मृतम् ॥ इति ।

*क्षत्रियादीति । प्रमाणमुक्तम् । यत्तु मिताक्षरायां पराशरमाधवीये च—

चान्द्रायणं नवश्राद्धे पराको मासिके स्मृतः ।
त्रैपाक्षिके सान्तपनं कृच्छ्रं मासद्वये स्मृतम् ।

सादावतिकृच्छ्रः । त्रिमासादौ कायः । आब्दिके पादः । अभ्यासे सर्वं द्विगुणम् । आमहेमसंकल्पश्राद्धेषु तत्तदर्धानि । यतिर्ब्रह्मचारी चोक्तं प्रायश्चित्तं कृत्वा त्रीनुपवासान् प्राणायामान्घृताशनं चाधिकं कृत्वा व्रतशेषं

क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतम् ।
वैश्यस्यार्धाधिकं प्रोक्तं क्षत्रियात्तु मनीषिभिः ॥
शूद्रस्य तु नवश्राद्धे चरेच्चान्द्रायणद्वयम् ।
सार्धचान्द्रायणं मासे त्रिपक्षे त्वैन्दवं स्मृतम् ॥
मासद्वये पराकः स्यादूर्ध्वं सान्तपनं स्मृतम् ॥ इति,

तत्प्रकारान्तरं बोध्यम् । *चण्डालेति ।

चान्द्रायणं नवश्राद्धे पराको मासिके स्मृतः ।
पक्षत्रयेऽतिकृच्छ्रं स्यात्षण्मासे कृच्छ्रमेव तु ॥
आब्दिके पादकृच्छ्रं स्यादेकाहः पुनराब्दिके ।
अत ऊर्ध्वं न दोषः स्याच्छङ्खस्य वचनं यथा ॥

इति शङ्खवचनं तस्य चण्डालादिहताविषयत्वेन स्तेनपतितक्लीबाद्यपाङ्क्तेयविषयत्वेन च माधवविज्ञानेश्वरादिभिर्व्याख्यानात् । अत्र मासिकमाद्यं, द्वितीयादिषु प्रायश्चित्ततारतम्यं कल्प्यम् । षण्मासे इत्यत्रोनषाण्मासम् । आब्दिके इत्यत्रोनाब्दिकं च बोध्यम् । न दोष इति पूर्ववदिति शेषः ।

चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥
पतनानाशकैश्चैव विषोद्बन्धादिभिस्तथा ।
भुक्त्वैषां षोडशश्राद्धे कुर्यादिन्दुव्रतं द्विजः ॥ इति ।

तथा—

अपाङ्क्तेयान्नमुद्दिश्य श्राद्धमेकादशेऽहनि ।
ब्राह्मणस्तत्र भुक्त्वाऽन्नं शिशुचान्द्रायणं चरेत् ॥

समापयेत् । अनापदि द्विगुणम् । *दर्शादौ दशगायत्रीमन्त्रिता आपः पिबेत् षट्प्राणायामा वा । संस्कारेषु चौले कृच्छ्रः । सीमन्ते चान्द्रम् । अन्येषूपवास इति दिक् । *अत्र माधवमिताक्षरादौ क्वचिद्विरोधो विषयभेदात्परिहार्यः । एकादशाहे चान्द्रं पुनःसंस्कारश्चेति प्रायश्चित्तकाण्डे हेमाद्रिः । यत्तूशनाः—

दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः । इति,
तदनुक्तप्रायश्चितश्राद्धपरमिति विज्ञानेश्वरः ॥

आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुद्ध्यति ।
संकल्पितेऽथ भुक्त्वा तु त्रिरात्रं क्षपणं भवेत् ॥

इति भरद्वाजेन गुरुप्रायश्चित्ताभिधानात् । आमश्राद्धे इत्येतन्नवश्राद्धे । ब्रह्मचारिणस्तु बृहद्यमः--

मासिकादिषु योऽश्नीयादसमाप्तव्रतो द्विजः ।
त्रिरात्रमुपवासोऽस्य प्रायश्चित्तं विधीयते ॥
प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुद्ध्यति ॥ इति ।

इदमज्ञानविषयम् । ज्ञाने तु—

मधु मांसं च योऽश्नीयाच्छ्राद्धं सूतकमेव वा ।
प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत् ॥ इति ।

आमश्राद्धे तु सर्वत्रार्धम्,

आमश्राद्धे भवेदर्धं प्राजापत्यादि सर्वदा ।

इति षट्त्रिंशन्मते विशेषाभिधानात् । आपस्तम्बः—

याजकान्नं नवश्राद्धं सङ्ग्रहे चैव भोजनम् ।
स्त्रीणां प्रथमगर्भे च द्विजश्चान्द्रायणं चरेत् ॥ इति ।

स्त्रीणां सङ्ग्रहो विवाहः । *दर्शादाविति । "दशकृत्वः पिबेदापः" इत्यग्रिमवचनात् । अत्र स्वोक्तप्रकारे मिताक्षरामाधवयोर्विरोधं स्वयमेव परिहरति—*अत्रेति । *मिताक्षरादाविति ।

अथ क्षयाहश्राद्धम् । *तत्स्वरूपमाह हेमाद्रौ व्यासः—

*मासपक्षतिथिस्पृष्टे यो यस्मिन् म्रियतेऽहनि ।
प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुः ॥

नारदीये—

*पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ।

अत्र चान्द्रं मानं ज्ञेयम्,

आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ।

आदिना निबन्धान्तरग्रहः । तेन गुरुद्व्यादावित्यादिषु प्रमाणं तद्विरोधपरिहारादि च पारिजातमदनरत्नादिषु बोध्यमिति । *तत्स्वरूपं क्षयाहस्वरूपम् । *मासेति । यो यस्मिन्नहनि म्रियते तस्य तथाभूतं तं प्रत्यब्दं क्षयाहं विदुरित्यन्वयः । अहनि अहोरात्रे तथाभूतं तत्सजातीयम् । मासपक्षतिथिस्पृष्टे इति विशेषणवशेन तथाभूतमित्यनेन मरणाधिकरणतिथिसाजात्यं लभ्यते । तच्च तन्मासतत्पक्षगतत्वेन प्रतिपत्त्वादिना च । एवञ्च तद्रूपेण मरणाधिकरणतिथिसाजात्यवत्तिथिमादाय तादृशतिथिमदहोरात्रं क्षयाहः वत्सरान्ततिथेश्च मृतिसम्बन्धाभावात्तदुत्तरवत्सराद्यतिथिरेव तादृशी । सांवत्सरिकश्राद्धाधिकरणाहोरात्रस्य तत्तिथ्या स्पर्शः । शास्त्रतः श्राद्धयोग्यत्वेन निर्णीतया मरणाधिकरणाहोरात्रस्य तत्तिथिस्पर्शो न त्रिमुहुर्त्तादिः किन्तु मरणकाले इत्याह—*पारणे इति । तस्माद्वर्षान्ते भवं वार्षिकमिति व्युत्पत्त्या वत्सरान्तं जाते मृततिथिमदहोरात्रं लभ्यते । एवञ्च क्षयाहश्राद्धस्य द्वितीयादिसंवत्सराद्यमृतितिथिसम्बन्धेनैवोत्पन्नत्वात्प्रथमसंवत्सराद्यायां मरणतिथौ न प्राप्तिरिति माधवानुयायिनः । वर्षे वर्षादौ भवं वार्षिकमिति व्युत्पत्त्या मासे मासादौ भवं मासिकमितिवत्प्रथमादिमासवर्षाद्यतिथिषु आब्दिकाद्यधिकरणत्वं प्रतीयते । आद्यवर्षीयप्रथमतिथेरेव मरणाधिकरणत्वात्सा द्वितीयादिवर्षीयप्रथमतिथिरेव च त-

त्सदृशीति तद्वदहोरात्रं तथा भूतं क्षयाह इति शूलपाण्यादयः। एतदभिप्रेत्यैव "आद्यमेकादशेऽहनि" इति याज्ञवल्क्यवाक्यं आद्यपदमाद्यमासिकाद्याब्दिकयोः प्राप्त्यर्थमिति भट्टनारायणभट्टादयः।

चक्रवत् परिवर्त्तेत सूर्यः कालवशाद्यतः।
अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिन्हितम्॥

इति लघुराहीतम्। अस्यार्थः—यतः सूर्यः कालवशात्कदाचिच्चक्रवन्मन्दादिगत्या परिवर्त्तेत गच्छेदत्तः सांवत्सरं श्राद्धम् मासचिन्हितमेव कार्यम्। एतदुक्तं भवति—चान्द्रमासश्च शुक्लादिश्चान्द्रः। तथाहि, अस्ति तावद्यादिवार्षिकं श्राद्धं यत्पक्षगतायां यस्यां तिथौ निधनं तद्राशिस्थे सूर्ये तत्पक्षगतायां तस्यां तिथौ सौरमानेन क्रियते तदा यदि कदाचित्सूर्यस्तुलादिमेषान्तं तीव्रं गच्छन् तां तिथिं न गच्छेत् तदा तल्लोपप्रसङ्गः, तद्राशिसूर्ये तत्तिथेरभावात्। यदि वा कदाचिन्मेषादितुलान्तं मन्दं गच्छन् तां तिथिं द्विः स्पृशेत् तदा तत्कालावच्छिन्नजीवनस्य निमित्तस्य सत्त्वादावृत्तिः स्यात्। गुणभूतकालानुरोधेन प्रधानावृत्तेरन्याय्यत्वे तु श्राद्धस्याविनिगमः स्यात्। अतो मासो ग्राह्य इति। स च--

इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः।
अग्नीषोमौ स्मृतौ मध्ये समाप्तौ पितृसोमकौ॥

इति लक्षितः शुक्लादिश्चान्द्रः तद्ग्रहणे तु न लोपादिप्रसक्तिः। एवञ्च हेतुवशादेतादृशरीत्यैव यत्र लोपादिप्रसक्तिस्तादृशं मासिकमपि जन्मतिथ्यादिकर्तव्यं सांवत्सारिकवदेव कार्यमित्यपि लभ्यते। मासमासान्यचिन्हितत्वभ्रमं वारयति स एव—

मासचिन्हं तु कर्तव्यं पौषमाघाद्यमेव हि।
यतस्तत्र विधानेन स मासः परिकीर्तितः॥ इति।

यन्मासचिन्हं कर्म सांवत्सरिकादि कर्त्तव्यं तन्माघाद्यं पौषादि-

इति (१)गर्गोक्तेः । *मलमासमृतस्य तु सौरम् ,
मलमासमृतानां तु सौरं मानं *समाश्रयेत् ।
इति हेमाद्रावुक्तेः । एतन्मृतमासस्यैवाधिक्ये ज्ञेयम् ।

विशेषचिन्हितम् कार्यम् । चैत्रादिति वक्तव्ये पौषमाघेत्युक्तिः । सौरयोस्तयोः सर्वथा पुष्यमघायोगासम्भवाभिप्रायेण । आद्यपदेनाश्विनग्रहः । क्रमेण कन्याधनुर्मकरस्थे सूर्ये सत्याश्विनपौषमाघपौर्णमासीषु अश्विनीपुष्यमघानक्षत्राणि न सन्त्येव पौर्णमास्यन्ते सूर्याच्चन्द्रमसः सप्तमराशिस्थत्वनियमात् । सूर्याचन्द्रमसोः परो विप्रकर्षः पौर्णमासीति सिद्धान्तात् । स च सप्तमराशिस्थत्व एव ; उभयतः परिगणने सप्तमराशेरेव विप्रकृष्टत्वात् इति तेषु विप्रकृष्टत्वव्याघात एव । तथा माघे मकरस्थे सूर्ये मकरात्सप्तमराशिः कर्कः तत्स्थत्वं पूर्णिमायां चन्द्रस्यापेक्षितं मघायोगे तु सिंहराशिगतत्वाच्चन्द्रस्य सूर्यादष्टमराशिस्थत्वमायाति, तच्च बाधितमेवेति । एवमन्यत्रापि । मेषवृषमिथुनकर्कसिंहतुलावृश्चिककुम्भमीनस्थे च कदाचित्तत्तत्पौर्णमासीषु तत्तन्मासनक्षत्रयोगः सम्भवतीति तत्तद्राशिस्थसूर्याच्चन्द्रमसः सप्तमराशिस्थत्वसम्भवान्न सौरे विप्रकृष्टत्वव्याघातः । यद्यपि चान्द्रपौर्णमासीष्वपि न नियमेन तत्तन्नक्षत्रयोगस्तथापि तद्योग्यतया योगनिमित्तो व्यपदेशः । पाकमकुर्वत्यपि सूपकारे पाचकव्यपदेशवत् । नन्वेवं —

यस्मिन् राशौ गते सूर्ये विपत्तिं यान्ति मानवाः ।
तेभ्यस्तत्रैव कर्त्तव्या पिण्डदानोदकक्रिया ॥

इत्यादीनां का गतिरित्यत्राह—*मलमासमृतस्य त्विति । *समाश्रयेदिति ।

स एव दिवसस्त(२)स्य श्राद्धपिण्डोदकादिषु ।

इत्युत्तरार्धम् । (य(३)स्मिन् राशावित्येतत्,

---

(१)'गार्ग्योक्तेः' क० छ० (२)'तत्र' च०। (३)धनुश्चिन्हान्तर्गतं नास्ति च०।

ब्राह्मे—

प्रतिसंवत्सरं कार्यं मातापित्रोः*मृतेहनि ।
पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥

अपुत्रस्येति भ्रात्राऽप्यन्वयः । ज्येष्ठस्येति कनिष्ठस्या*नावश्यकत्वार्थम् । मदनरत्ने भविष्ये—

प्रतिसम्वत्सरश्राद्धे नाधिमासं विवर्जयेत् ।
स एव दिवसस्तस्य श्राद्धपिण्डोदकादिषु ॥

इत्येतच्च मलमासमृतस्य यदा स एव मलमासस्तदा मलमासे तस्मिन्कर्त्तव्यताप्रतिपादकं, पूर्वोक्तदूषणगणग्रासात् ।

वर्षे वर्षे तु यच्छ्राद्धं मृताहे तन्मलिम्लुचे ।
कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र तु ॥

इति शातातपेनैव तेषां विषयदानात् ।) तथाच मलमासमृतस्य प्रथमाब्दिकं यन्नामके मलमासे मृतस्तन्नामके द्वितीयाब्दाद्ये शुक्लपक्षादिके मासि मृतपक्षीयमृततिथौ कार्यम् । यथा ज्येष्ठे मलमासे सति तत्र कृष्णपक्षमृतस्याषाढकृष्णपक्षे प्रथमाब्दिकं तस्यामान्तमानेन ज्येष्ठकृष्णत्वात् । एवं द्वितीयाब्दादावपि । ज्येष्ठशुद्धमृतस्य तु ज्येष्ठशुद्ध एव तस्यामान्तमानेनापि ज्येष्ठत्वादिति । अत्राधिमासमृतस्य द्वितीयाद्यब्दे तु न सौरविधिः । प्रथमाब्दिकं प्रकृत्यैव एतदभिधानाद्धेमाद्रिप्रभृतिभिरपि तन्मात्रविषयत्वप्रदर्शनात् । एवञ्चात्राधिकान्तरे सौरविधानात् । द्वितीयाब्दादौ सौरः कुतो न भवतीति तु न शङ्क्यम्, अधिकान्तरे सौरविधानवशादेव द्वितीयाब्दादौ चान्द्रासिद्धेरिति । अत्र शुद्धमासे मृतस्य प्रथमाब्दिकं मलमास एव । द्वितीयाद्याब्दिकं शुद्ध एव नाधिके नाप्युभयोरिति ग्रन्थ एवोक्तं मलमासे । *मृतेऽहनीति । मरणाधिकरणातिथिसजातीयायां तिथावित्यर्थः, वत्सरान्तरातिथेर्मृतिसम्बन्धाभावात् । साजात्यं च प्राग्वत् तन्मासतत्पक्षगतत्वेन प्रतिपत्त्वादिना च । प्रतिसंवत्सरमिति वीप्साश्रवणात्प्रतिसांवत्सरिकं नित्यम् । *अनात्र-

सर्वेषामेव श्राद्धानां *श्रेष्ठं सांवत्सरं मतम् ।

तथा—

भोजको यस्तु वै श्राद्धं न करोति खगाधिप ।
मातापितृभ्यां सततं वर्षे वर्षे मृतेऽहनि ॥
स याति नरकं घोरं तामिस्रं नाम नामतः ॥

तच्च नानास्मृतिष्वेकोद्दिष्टं पार्वणं चोक्तम् । आद्यमाह यमः—

सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः ।
मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनि ॥

व्यासः—

एकोद्दिष्टं तु कर्तव्यं पित्रोश्चैव मृतेऽहनि ।
एकोद्दिष्टं परित्यज्य पार्वणं कुरुते नरः ॥
अकृतं तद्विजानीयाद्भवेच्च पितृघातकः ॥

अन्त्यमाह शातातपः—

सपिण्डीकरणं कृत्वा कुर्यात् पार्वणवत्सदा ।

इयकत्वार्थमिति,

न पुत्रस्य पिता कुर्यान्नानुजस्य तथाऽग्रजः ।
अपि स्नेहेन कुर्यातां सपिण्डीकरणं विना ॥

इति पूर्वमुक्तेः । अत्र पित्रग्रजाभ्यां पुत्रानुजयोः सपिण्डीकरणं न कार्यमिति प्रतीयते नतु सर्वथेति । अन्येन तयोस्तदपि कारणीयम् । सांवत्सरादिकं तु पित्रग्रजाभ्यां तयोः स्वयमपि कार्यम् । नतु नित्यं, 'स्नेहेन' इत्युक्तत्वात् । स्नेहः मृताभ्युदयकामना । *श्रेष्ठं श्रेयःकारकम् । एतेन तदकरणे श्रेयोहानेः सूचनान्नरकप्राप्तिः सूच्यते इति नित्यत्वसिद्धिः । भोजकं श्राद्धमिति योजना तद्वशादामहेमाद्यनुकल्पनिवृत्तिः ।

अन्नेनैवाब्दिकं कुर्याद्धेम्ना नामेन न क्वचित् ।

प्रतिसंवत्सरं श्राद्धं (१)छागलेयोदितो विधिः ॥
यः सपिण्डीकृतं प्रेतं पृथक्पिण्डे नियोजयेत् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥

अत्रौ*रसक्षेत्रजयोः पार्वणं दत्तकादीनामेकोद्दिष्टमित्येकः पक्षः । *साग्नेः पार्वणं निरग्नेरेकोद्दिष्टमित्यपरः । *तद्दूषणं मिताक्षरादौ ज्ञेयम् । कल्पतरुस्तु

'इति वचनाच्च । *औरसेति ।

औरसक्षेत्रजौ पुत्रौ विधिना पार्वणेन तु ।
प्रत्यब्दमितरे कुर्युरेकोद्दिष्टं सुता दश ॥

इति जाबालवचनात् । *साग्नेरिति ।

वर्षे वर्षे पितुः कुर्यात्पार्वणं चाग्निमान्द्विजः ।
पित्रोरनग्निमान्धीमानेकोद्दिष्टं मृताहनि ॥

इति सुमन्तूक्तेः । *तद्दूषणमिति । आद्यपक्षो नियुक्तः । औरसस्यापि——

एकोद्दिष्टं तु कर्त्तव्यमौरसेन मृतेऽहनि ।
सपिण्डीकरणादूर्ध्वं मातापित्रोर्न पार्वणम् ॥

इति पैठीनसिना एकोद्दिष्टोक्तेः "प्रत्यब्दम्" इति जातूकर्ण्यवाक्यस्य क्षयाहातिरिक्ताक्षय्यतृतीयामाघीवैशाखादिश्राद्धपरत्वेन सुयोज्यत्वादाब्दिकपरत्वाभावाच्च । यत्तु—

पितुर्गतस्य देवत्वमौरसस्य त्रिपौरुषम् ।
सर्वत्रानेकगोत्राणामेकस्यैव मृतेऽहनि ॥ इति,

तदपि व्यवस्थापकं किन्तु औरसेन पितुः पार्वणं कार्यं भिन्नगोत्राणां मातुलादीनां त्वेकोद्दिष्टमित्यर्थकम् । अन्त्योपि न युक्तः,

अनग्नयश्च ये विप्रा ये च साग्नय एव च ।
तेषां सपिण्डनादूर्ध्वमेकोद्दिष्टं न पार्वणम् ॥

---

(१) 'छागलेनो' ग.

*'साग्न्योरौरसक्षेत्रजयोः पार्वणम्। निरग्निकयोस्त्वेकोद्दिष्टम्' इत्याह। अपरार्केऽप्येवम्। *दत्तकादयो दश पुत्रास्तु साग्नयो निरग्नयश्चैकोद्दिष्टमेव कुर्युः;

प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ।
कुर्यातामितरे कुर्युरेकोद्दिष्टं सुता दश॥

इति जातूकर्ण्योक्तेः। यदा तु दत्तकस्य पिता दर्शे महालये वा मृतस्तत्र पार्वणैकोद्दिष्टयोर्विकल्पः। वस्तुतस्तु सर्वेषां *पार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्पः। स च *देशाचाराद्व्यवस्थित इति सर्वनिबन्धसिद्धान्तः। अत एव पृथ्वीचन्द्रोदये वृद्धपराशरः--

मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनि।

इत्युक्त्वाह--

देशधर्मं समाश्रित्य वंशधर्मं तथा परे।

इति पार्वणनिषेधादिति। *साग्न्योरिति। "औरसक्षेत्रजौ पुत्रौ" इति जाबालस्य--

यत्र यत्र प्रदातव्यं सपिण्डीकरणात् परम्।
पार्वणेन विधानेन देयमग्निमता सदा॥

इति मात्स्ये विशेषणात्। "प्रत्यब्दं पार्वणेनैव" इति प्रकृतयोरौरसक्षेत्रजयोरनग्नित्वे एकोद्दिष्टं विदधता सुमन्तुना तयोः साग्नित्वे पार्वणस्य परिशेषादेव सिद्धेश्च। नन्वेवमेतन्मते इतरपुत्राणां कथमित्यत्राह-*दत्तकादय इति। *पार्वणेति।

अमावास्याक्षयो यस्य प्रेतपक्षेऽथवा पुनः।
पार्वणं तस्य कर्त्तव्यं नैकोद्दिष्टं कदाचन॥

इत्यग्रिमस्य समूलत्वे पार्वणं निर्मूलत्वे एकोद्दिष्टमित्यर्थः। *देशाचारादिति।

येनास्य पितरो याता येन याताः पितामहाः।
तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यति॥

सूरयः श्राद्धमिच्छन्ति पार्वणं च (१)क्षयाहन्यपि ॥ इति
तच्च केवलपितॄणां, न सपत्नीकानामिति हेमाद्रिः ।
अत्र मातामहा न कार्याः;

कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥

इति कात्यायनोक्तेः । कर्षूसमन्वितं सपिण्डनम् । यै-रेकोद्दिष्टं क्रियते तेषामपि क्वचित् पार्वणमेव ।

अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः ।
पार्वणं तस्य कर्तव्यं नैकोद्दिष्टं कदाचन ॥

इति शङ्खोक्तेः । एवं संन्यासिनोऽपि ।

एकोद्दिष्टं यतेर्नास्ति त्रिदण्डग्रहणादिह ।
सपिण्डीकरणाभावात् पार्वणं तस्य सर्वदा ॥

इति प्रचेतसोक्तेः । वायवीये—

संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि ।
महालये तु यच्छ्राद्धं द्वादश्यां पार्वणं हि तत् ॥

पृथ्वीचन्द्रोदये वृद्धपराशरः--

संग्रामे संस्थितानां च प्रेतपक्षे शशिक्षये ।
तेषां पार्वणमेवोक्तं क्षयाहेऽपि च सत्तमैः ॥

चन्द्रक्षयानाशकसंयुगेषु यः प्रेतपक्षे मृतवान् सपिण्डः ।
सपिण्डितानामपि चाब्दिकानि भवन्ति तेषामिह पार्वणानि ।

तथा--

*भ्रातुर्ज्येष्ठस्य कुर्वीत ज्येष्ठो भ्रातानुजस्य च ।
दैवहीनं तु तत्कुर्यादिति धर्मविदब्रवीत् ॥

इति वचनाद्वंशपरम्परायाताचारव्यवस्थितेरिति भावः। *भ्रातुरिति । अत्रानुजस्य सांवत्सरिके उक्तं प्राक् । प्राञ्चस्तु-

---

(१) 'क्षयेहनि' क.

दैवहीनमेकोद्दिष्टम् । ज्येष्ठो भ्राताऽनाद्यगर्भजः । तथा च तत्रैव शातातपः—

अनाद्यगर्भज्येष्ठोऽपि भ्राता सद्भिर्निगद्यते ।
ऋते सपिण्डनात्तस्य (१)न वै पार्वणमाचरेत् ॥

आद्यगर्भे तु पार्वणमेकोद्दिष्टं वेत्यर्थः । मातुस्तु हेमाद्रौ कात्यायनः—

प्रत्यब्दं यो यथा कुर्यात् पुत्रः पित्रे सदा द्विजः ।
तथैव मातुः कर्तव्यं पार्वणं चान्यदेव वा ॥

*यत्तु तेनैवोक्तम्—

सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।
पितृव्यभ्रातृमातॄणामेकोद्दिष्टं सदैव तु ॥ इति ।

तत्सापत्नमातृपरम् । यत्तु वृद्धपराशरः—

अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् ।
स एवा(२)स्य तु कुर्वीत पिण्डदानादिकक्रियाम् ॥
पार्वणं तेन कार्यं स्यात्पुत्रवद् भ्रातृजेन तु ।
पितृस्थाने तु तं कृत्वा शेषं पूर्ववदुच्चरेत् ॥ इति,

तत्पितृवद्देशाचारवद्व्यवस्थितमिति पृथ्वीचन्द्रः । *श्राद्धदीपकलिकायां चतुर्विंशतिमते तु—

प्रतिसम्वत्सरं कार्यं मातापित्रोर्मृतेऽहनि ।
पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥

इति मानवे एवकाराज्ज्येष्ठस्यैव कार्यं न कनिष्ठस्य । "ज्येष्ठो भ्राताऽनुजस्य च" इति च देशाचारव्यवस्थितमित्याहुः । *यच्चेति । पितृव्यभ्रात्रित्यत्र योग्यतया पितृव्यादिपदस्यापुत्रपितृव्यादिपरत्वेन तेषामेकोद्दिष्टनियमे सतीति शेषः । दाक्षिणात्यानुष्ठानपक्षमाह—*श्राद्धदीपेत्यादि इत्युक्तमित्यन्तेन । अपुत्र-

---

(१) 'नैव' क. छ. (२) 'स एव तस्य कुर्वीत' क. छ.

पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्वणं भवेत् ।
एकोद्दिष्टं कनिष्ठानां दंपत्योः पार्वणं मिथः ॥
अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः ।
मातामहस्य तत्पत्न्याः श्राद्धं पार्वणवद्भवेत् ॥

इत्युक्तं, तत्पत्न्याः कर्तृत्वेऽपि पार्वणमेव;

सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाममन्त्रकम् ।
सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च ॥

इति लौगाक्षिस्मृतेः ।

तत्र पत्न्यपि कुर्वीत सापिण्ड्यं पार्वणं तथा ।

इति सुमन्तूक्तेश्चेति निर्णयामृते उक्तम् ।
अन्ये त्वेतत्पाक्षिकपार्वणपरमाहुः । अत एव—

भर्तुः श्राद्धं तु या नारी मोहात्पार्वणमाचरेत् ।
न तेन तृप्यते भर्ता कृत्वा तु नरकं व्रजेत् ॥

स्येति अग्रजन्मन इति च पितृव्यभ्रात्रोरुभयोरेवान्वेति । तेन कनिष्ठयोस्तयोरेकोद्दिष्टं कार्यम् । इदं तु बोध्यं—मातापितृमातामहभिन्नानां दर्शश्राद्धादि न कार्यं विशेषवचनाभावात् पितृव्यभ्रात्रित्यादिजातूकर्ण्यादिवचनानां च क्षयाहे प्रकृत्यैव पाठादितरेषां तत्रैवोपसंहारात् । तीर्थमहालयादिश्राद्धे तु विशेषवचनादेव भवतः । पत्न्यास्तु दर्शेऽप्यधिकारः;

अपुत्रा पुत्रवत्पत्नी पुत्रकर्म समाचरेत् ।

इति वाक्यात् । पुत्रवदिति वतिना श्राद्धक्रियातौल्ये उक्ते तत्कर्तृकश्राद्धवदेव देवता लभ्यते परन्तु तत्पित्रादीनां भर्तृत्वादिनैव तन्मातामहानां च पितृत्वादिनैवोद्देश्यत्वं यं प्रति येन रूपेण सम्बन्धिता तं प्रति तेनैव रूपेणोद्देश्यत्वात् । तथाच "स्वभर्तृप्रभृतित्रिभ्यः" इत्यादिवाक्यमेतदर्थप्रकाशकम् । प्रत्याब्दिकादौ तु तन्मातामहानामसत्त्वादेव स्वपितृत्वादिनाप्यप्राप्तौ सर्वकालमित्येतद्दर्शा-

इति वचनं क्षयाहे पाक्षिकैकोद्दिष्टप्रशंसार्थं न पार्वणनिषेधार्थमित्युक्तं त्रिस्थलीसेतौ भट्टचरणैः । 'स्वभर्तृप्रभृति त्रिभ्यः' इत्यनेन विरोधाच्च ।

अपुत्राणां (१)त्वाह हेमाद्रावापस्तम्बः--

अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये ।
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम् ॥
मित्रबन्धुसपिण्डेभ्यः स्त्रीकुमारिभ्य एव च ।
दद्याद्वै मासिकं श्राद्धं सांवत्सर*मतोऽन्यथा ॥

पारिजाते तु अन्यथा पार्वणमित्युक्त्वा सर्वत्र पार्वणमित्युक्तम् । एकोद्दिष्टवाक्यानि तु तीर्थमहालयपराणीत्युक्तम् । पृथ्वीचन्द्रोदये वृद्धगार्ग्यः--

मातुः सहोदरा या च पितुः सहभवा च या ।
तयोश्च नैव कुर्वीत पार्वणं पिण्डनाद्दते ॥

प्रचेताः--

सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं विधीयते ।
अपुत्राणां च सर्वेषामपत्नीनां तथैव च ॥

अपत्नीनां ब्रह्मचार्यादीनाम् । मार्कण्डेयपुराणे--

*प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः ।

दिपरम् यत्तु यत्र तथैव चेत्यस्य त्रिभ्य एवेत्यर्थेऽपि अपुत्रकपितुरेवेदं पार्वणविधानमिति । तन्न, अपुत्रत्वाश्रवणात् । महालयतीर्थादौ तु श्वश्रूपार्वणमपि तस्याः कृताकृतमिति नवदैवत्यं मातृपार्वणेन द्वादशदैवत्यमप्याहुः । स्वमातामहपार्वणेन पञ्चदशदैवत्यमिति चाहुः । स्वमातामहीपार्वणेनाष्टादशदैवत्यमपि केचित् । एतत्सर्वमपुत्रविषयमिति नव्याः । पित्रादौ जीवति तु द्वारलोपात्पार्वणलोप एवेति प्रपञ्चितं प्राक् । *अतोऽन्यथा पार्वणादन्यथा । एकोद्दिष्टमिति यावत् । *प्रतिसंवत्सरमिति । यथान्यायमे-

---

(१) 'ततः' ग. (२) 'चाह' ग.

मृताहनि यथान्यायं *नृणां यद्वदिहोदितम् ॥

नृणामिति दृष्टान्ताद्गोविप्रहतपाखण्ड्यादीनां सपिण्डानामभावेऽपि सांवत्सरमेकोद्दिष्टं कार्यमेवेति शूलपाणिः । अत्रिवृद्धवसिष्ठौ--

सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते ।
भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ॥
पितृव्यगुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् ॥

यत्तु जातूकर्ण्यः--

पितृव्यभ्रातृमातॄणामपुत्राणां तथैव च ।
मातामहस्यासुतस्य श्राद्धादि पितृवद्भवेत् ॥ इति,

तदावश्यकत्वार्थं नतु पार्वणार्थमिति हेमाद्रिः । युक्तं त्वेवम् ।

मातुः पितरमारभ्य त्रयो मातामहाः स्मृताः ।
तेषां तु पितृवच्छ्राद्धं कुर्युर्दुहितृसूनवः ॥

इति पुलस्त्योक्तेर्मातामहस्य पार्वणमेव । तत्साहचर्यात् पितृव्यादौ तथा ।

पितृव्यभ्रातृमातॄणामेकोद्दिष्टं (१)च पार्वणम् ।

इति क्षयाहोक्तोपक्रमे पुलस्त्योक्तेश्च विकल्पः । केचित्त्वापस्तम्बादिवाक्यानि--

व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता ।

इत्यस्य पितृव्यादिपरत्वादकृतसपिण्डनपितृव्यादि·

कोद्दिष्टं कार्यमित्यन्वयान्मातुर्यथाचारमेकोद्दिष्टम् इतरासां च तन्मात्रं लभ्यते । *नृणामिति । अत्र यथाचारमेकोद्दिष्टमन्येषां तु तन्मात्रमिति रीतिरुक्तैव ।

इति क्षयाहश्राद्धम् ।

---

(१) 'न' ग०

पराणीत्याहुः। माता सपत्नमाता। एकोद्दिष्टं तु कनिष्ठपरमिति। पृथ्वीचन्द्रोदयेऽप्येवम्। विशेषस्त्वधिकारिनिर्णये प्रागुक्तः। केचित् पुत्रान्तराभावेऽपि पि(२)तामहवार्षिकमप्यावश्यकम्,

पुत्राभावे च तत्पुत्रः पत्नी माता तथा पिता।
वित्ताभावेऽपि सच्छिष्यः कुर्यात्तस्यौर्ध्वदेहिकम्॥

इति मार्कण्डेयपुराणादित्याहुः। तन्न,

पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम्।

इति कातीये विशेषोक्तेः॥

अथ क्षयाहद्वैधे निर्णयः। तत्रैकोद्दिष्टं *मध्याह्ने कार्यम्। मध्याह्नश्च पञ्चधा विभक्ते दिने तृतीयभाग इति माधवः।

आमश्राद्धं तु पूर्वाह्णे एकोद्दिष्टं तु (३)मध्यमे।
पार्वणं चापराह्णे तु *प्रातर्वृद्धिनिमित्तकम्॥

इति हारीतोक्तौ प्रातःशब्दसाहचर्यात्। *तत्रापि

*मध्यान्हे इति। यस्त्वपराह्णः पितृणामित्यपराह्णः यश्च पित्र्यं चास्तमिते रवौ इति सामान्यः योऽपि च—

दैवे कार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः।
पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः॥

इतिवृद्धयाज्ञवल्क्योक्तेरस्तमयः स सर्वोऽपि "एकोद्दिष्टं तु मध्यतः" इत्यतिप्रतिपदोक्तेन मध्याह्नेनापोद्यत इति भावः। *प्रातरिति। प्रातःकालश्च त्रेधादिपक्षेषु नेति। अनायत्या पञ्चधाभागः सिद्ध्यति। एवञ्चात्र पूर्वाह्णः द्वितीयभागः। सायाह्नस्त्वर्थतो लभ्यते। कुतपः अष्टमो मुहूर्त्तः। आरम्भसमाप्तिकालौ दर्शयति—*तत्रापीति। *कुतपप्रथमे इति। कुतपाद्यन्तभागयोरि-

---

(१) 'मातामह' क० (२) 'मध्यतः' क० छ०

कुतपादिषु मुहूर्तद्वितये ज्ञेयम्;

प्रारभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत् ॥

इति गौतमोक्तेरेतत्परत्वात् । रौहिणो नवमो मुहूर्तः । मैथिलाः श्राद्धकौमुदी चैवम् । अन्यथा--

ऊर्ध्वं मुहूर्तात् कुतपाद्यन्मुहूर्तचतुष्टयम् ।
मुहूर्तपञ्चकं ह्येतत्स्वधाभवनमिष्यते ॥

इत्यादिविरोधात् । दीपिकापि "एकोद्दिष्टमुपक्रमेत कुतपे" इति । माधवीये व्यासोऽपि--

*कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् ।
आवर्तनसमीपे वा तत्रैव नियतात्मवान् ॥

तेन कुतपादिरौहिणान्तो मुख्यः कालः ।

पृथ्वीचन्द्रोदयेऽप्येवम् । *दिनद्वये तद्व्याप्तौ (१)अंशेन समव्याप्तौ च पूर्वा । *विषमव्याप्तावाधिक्येन निर्णयः । अव्याप्तौ पूर्वैव, परविद्धाया निषेधात् । (२)स च वक्ष्यते । पूर्वदिने ग्रहणे रौहिणलङ्घनापत्तेः परैवेति गौडाः । शुक्लकृष्णवशात्खर्वदर्पाद्यैर्वा व्यवस्थेत्यन्ये । *तन्न, परविद्धानिषेधप्राबल्यात् । अत्र मूलं कालमाधवीये ज्ञेयम् ।

च्छयोपक्रमकालत्वविकल्पः । *दिनद्वये इति । अस्तमयवचनानुग्रहात् । *विषमेति ।

अल्पापराह्णे त्याज्या स्याद्ग्राह्या सा चाधिका भवेत् ।

इति दर्शश्राद्धोक्तन्यायात् अत्रापि आधिक्येन निर्णय इत्यर्थः । मतद्वयमपि दूषयति-*तन्नेति । शुक्लादिवाक्यं पूर्वोत्तरयोस्तिथ्योः शास्त्रेण प्राप्तिसाम्ये पुरुषेच्छानिवारणार्थमिति निर्णीतम् ।

---

(१) 'अंशेन' नास्ति ग० (२) 'सा च पूर्वदिने रौहिण' ग०

पार्वणं त्वपराह्णे कार्यं *पूर्वोक्तवचनात् ।

मध्याह्नव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत् ।
अपराह्णव्यापिनी या पार्वणे सा तिथिर्भवेत् ॥

इति पृथ्वीचन्द्रोदये वृद्धगौतमोक्तेश्च । पूर्वेद्युरेव परेद्युरेव वाऽपराह्णव्याप्तौ सैव ग्राह्या । दिनद्वये तद्व्याप्तौ तदस्पर्शेऽशतः समव्याप्तौ (१)वा पूर्वैव । विषमव्याप्तौ त्वधिका ग्राह्या,

ह्यपराह्णव्यापिनी स्यादाब्दिकस्य यदा तिथिः ।
महती यत्र तद्वृद्धिं प्रशंसन्ति महर्षयः ॥

नह्यत्र प्राप्तिसाम्यसंभवः, परविद्धानिषेधस्मरणात् । एतेन खर्वदर्पादिवाक्यसंचारोऽप्यपास्तः तस्य शुक्लादिवाक्यसमानार्थत्वात् । खर्वदर्पादिवाक्यं च न कर्मकालं बाधितुमलं "ह्रासवृद्धी न कारणम्" इत्युक्तेः । युग्मवाक्यं पित्र्यविषयमिति भावः । *पूर्वोक्तेति । यस्तु—

चतुर्थप्रहरे प्राप्ते यः श्राद्धं कुरुते नरः ।
आसुरं तद्भवेच्छ्राद्धं दाता तु नरकं व्रजेत् ॥

इति निषेधः स नापराह्णभागान्तर्भावेण, किन्तु सायाह्नभागान्तर्भावेणेति । ननु—

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षापराह्णे तु रौहिणं तु न लङ्घयेत् ॥

इति मार्कण्डेयोक्तपूर्वाह्णस्य का गतिरिति चेत् ? देवोद्देशेन क्रियमाणं श्राद्धं शुक्लं फलकामानामुत्साहहेतुतया चित्तप्रसादहेतुत्वात् । पित्रुद्देशेन क्रियमाणं कृष्णं पितृमरणादिस्मारकतया चित्तकालुष्यकारित्वात् । तथाच तादृशस्य शुक्लादेः पक्ष इत्यर्थः । रौहिणमिति चैकोद्दिष्टविषयम् ।

---

(१) 'वा' नास्ति क०

इति मरीचिस्मृतेः ।

*दर्शं च पूर्णमासं च पितुः सांवत्सरं दिनम् ।
(पू(१)र्वविद्धमकुर्वाणो नरकं प्रतिपद्यते ॥

इत्यपरार्के नारदोक्तेः ॥

द्व्य(२)हे तु व्यापिनी चेत्स्यान्मृताहस्य यदा तिथिः)
पूर्वविद्धा प्रकर्तव्या *त्रिमुहूर्ता भवेद्यदि ॥

इति सुमन्तूक्तेः ।

पूर्वस्यां निर्वपेत् पिण्डानित्याङ्गिरसभाषितम् ।

मध्याह्नव्यापिनी ग्राह्या तिथिः पूर्वाऽथवा परा ।
तत्र कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

इति त्वेकभक्तविषयमिति भावः । कुतपस्य पार्वणप्रारम्भकालत्वेऽपि "पित्रर्थे चापराह्णिकी" इति भविष्योक्तेरपराह्णव्याप्तिमात्रं दर्शितम् । उद्देशक्रमप्रातिलोम्येन नियामकमाह—द्व्यपराह्णेति । *दर्शं चेति । अंशतः समव्याप्तिपक्षे "द्व्यहे तु" इति वचनोपन्यासो न संगच्छते । अपराह्णस्पर्शसाम्येऽपि कुतपकालव्याप्तेराधिक्यादित्याशङ्कावारणायेदं परेद्युः कुतपकालव्याप्तेः सत्त्वेऽपि——

प्रायः प्रातरुपोष्या हि तिथिर्दैवफलेप्सुभिः ।
मूलं हि पितृतृप्त्यर्थं पैत्रं चोक्तं महर्षिभिः ॥ इति,
यस्यामस्तं रविर्याति पितरस्तामुपासते ।
स पितृभ्यो यतो दत्तो ह्यपराह्णः स्वयंभुवा ॥

इति तिथिमूलत्वास्तमयव्याप्तिरूपाभ्यां गुणाभ्यां पूर्वैवेत्यभिप्रायेणायं निषेध इति भावः । *त्रिमुहूर्त्तेति । इदं च दिनद्वये तदस्पर्शे "न द्व्यहे" इतिवचनश्रुतस्य त्रिमुहूर्त्तत्वस्य दार्ष्टान्तिकतयोपयुज्यते । नन्वपराह्णवेलायामसत्त्वे कर्मकालव्याप्तिराहित्यादनुपादे-

---

(१) धनुश्चिन्हान्तर्गतं नास्ति क० २०७॥ (२) 'द्व्यहेऽप्यव्यापिनी' ग०

इति हेमाद्रौ पाठः। तत्रैव वृद्धमनुः—

न ह्यहर्व्यापिनी चेत्स्यान्मृताहस्य च या तिथिः।
पूर्वविद्धैव कर्तव्या *त्रिमुहूर्ता च या भवेत्॥

मदनरत्नेऽप्येवम्। यत्तु (१)कार्ष्णाजिनिव्यासौ—

अहोऽस्तमयवेलायां कलामात्रा यदा तिथिः।
सैव प्रत्याब्दिके ज्ञेया नापरा पुत्रहानिदा॥

इति त्रिमुहूर्तस्तुतिः। पूर्वेद्युः सायं त्रिमुहूर्ताभावे तु परैव;

त्रिमुहूर्ता न चेत् ग्राह्या परैव कुतपे हि सा।

इति कालादर्शे गोभिलोक्तेः। कालादर्शेऽपि—

प्रत्याब्दिकेऽप्येवमेव तिथिर्ग्राह्यापराह्णिकी।
उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः॥
समत्वे पूर्वविद्धैव ह्यतथात्वेऽपि सा यदि।
त्रिमुहूर्ता भवेत्सायं सर्वेष्टोऽयं विनिर्णयः॥

अन्यत्रापि—

सायंतन्यपरत्र चेन्मृततिथिः सैवाब्दिके मासिके
ग्राह्या सा ह्यपराह्णयोर्यदि तदा यत्राधिका सा मता।
तुल्या चेदुभयापराह्णसमये पूर्वा न चेत्तु द्वये
पूर्वैव त्रिमुहूर्तगास्तसमये नो चेत्परैवोचिता॥

माधवपृथ्वीचन्द्रौ तु-'दिनद्वयेऽपराह्णव्याप्तौ *अंशतः

यत्त्वामित्यत्राह-*त्रिमुहूर्त्ता चेति। अनेन-

पित्र्येऽस्तमयवेलायां स्पृष्टा पूर्णा निगद्यते।

इत्यापाद्य साकल्यमपि उक्तं भवति *अंशत इति। इयं च त्रेधा-पूर्वेद्युरपराह्णस्य द्वितीयघटिकामारभ्य प्रवृत्ता परेद्युः तिथिवृद्धा पञ्चघटिका एका। पूर्वेद्युः चरमघटिकामारभ्य प्रवृत्ता परेद्युस्ति-

---

(१) 'कार्ष्णाजिन' क० छ०

समव्याप्तौ च क्षये पूर्वा वृद्धौ परा', *'खर्वदर्पौ परौ पूज्यौ' इत्युक्तेः ।

अपराह्णद्वयव्यापिन्यतीं(१)तस्य च या तिथिः ।
क्षये पूर्वा च कर्तव्या वृद्धौ कार्या तथोत्तरा ॥

इति बौधायनोक्तेः ।

क्षयाहस्य तिथिया तु अपराह्णद्वये यदि ।
पूर्वा क्षये तु कर्तव्या वृद्धौ कार्या तथोत्तरा ॥

इति बृहन्नारदीयाच्चेत्याहुः । वृद्धिक्षयौ चा*त्र परतिथेर्न तु ग्राह्यतिथेः, तस्याः क्षयेऽपराह्णद्वयव्याप्तेरसंभवात् । तदाह माधवः—

न ग्राह्यतिथिगौ वृद्धिक्षयावूर्ध्वतिथेस्तु तौ ॥ इति ।

*यत्तु पृथ्वीचन्द्रः--पूर्वोक्तवचनेषु यत्र सायाह्नास्तसमययोगिनी तिथिरुक्ता तत्रापराह्णव्यापिनी ज्ञेया;

सायाह्नस्त्रिमूहूर्तः स्यात्तत्र श्राद्धं न कारयेत् ।

थिक्षयेणैकघटिका द्वितीया । पूर्वापराह्णस्य चरमघटीत्रये सति परापराह्णस्याद्यघटीत्रये सती चेति तृतीया । *खर्वेति । अत्र ग्राह्यतिथिगतौ वृद्धिक्षयौ ग्राह्यौ । *अत्र दिनद्वये अपराह्णव्याप्तावित्यत्र । ननु यत्र परतिथेरपराह्णे स्वल्पः क्षयः तत्र कथं पूर्वा ग्राह्या तिथेर्ज्योतिःशास्त्रप्रक्रिययाऽपराह्णद्वयव्यापित्वात्? सत्यं, "तिथ्यादौ तु भवेद्यावान्" इति वचनात् । तिथिनक्षत्रयोगेषु क्षीयमाणेषु स क्षयो यावद्घटीमितः तेभ्यः पूर्वेषु तिथ्यादिषु ज्योतिःशास्त्रेणाऽदृष्टोऽपि ग्राह्यः । एवं वृद्धावपि इत्यर्थः । तथाच परतिथेरपराह्णे यावान्क्षयः तावतः ग्राह्यतिथौ योजनेन परस्याः कृत्स्नापराह्णव्यापित्वात्पूर्वेति । स्वकर्म्मणीत्यस्य स्वं ग्राह्यतिथिः तद्विहितं यत्कर्म तस्मिन्निमित्तभूते इत्यर्थः । *यत्त्विति । दिनद्वये अपराह्णास्पर्शे परे-

---

(१) 'तस्य यदा तिथिः' क० छ०

इति मात्स्यादौ सायाह्ननिषेधात् । यच्च 'त्रिमुहूर्तादिग्रहणं तच्छ्राद्धाहापराह्णरूपत्रिमुहूर्तपरम्' इत्याह । त*द्धेमाद्रिमदनरत्नकालादर्शादिग्रन्थविरोधा*ल्लक्षणापत्तेश्च चिन्त्यम् । तस्मात्पूर्वोक्तमेव साधु । यदा विघ्नवशाद्दिने सांवत्सरश्राद्धं न कृतं तदा *रात्रावपि कार्यम्,

मृताहं समतिक्रम्य चण्डालेष्वभिजायते ।

इति मरीचिना मृताहातिक्रमे दोषोक्तेः; "न च नक्तं श्राद्धं कुर्वीतारब्धे वाऽऽभोजनसमापनम्" इत्यापस्तम्बेन *गौणकालोक्तेश्चेति माधवः । *आरब्धे श्राद्धे विघ्नवशाद्रा(१)त्रिपाते भोजनसमाप्त्यन्तं रात्रौ कार्यम् । शेषसमाप्तिः परदिन एवेति हरदत्तः । ग्रहणदिने वार्षिकप्राप्तौ तद्दिने एवान्नेनामेन हेम्ना वा कुर्यात् नोत्तरदिने

त्याशयेनेदम् । *हेमाद्रीति । एतैः तादृशविषये पूर्वाग्राह्यत्वाभिधानात् । नन्वत्र हेमाद्र्यादिमतस्य सम्यक्त्वे किं विनिगमकमित्यत्राह—*लक्षणेति । सायान्हादिपदानामपराह्णे लक्षणापत्तेरित्यर्थः । हेमाद्र्यादीनां तु त्रिमुहूर्तसायान्हव्यापिन्यामस्तमययोगः संभवतीति न तदापत्तिः । *रात्रावपीति । "दिवोदितानि कर्म्माणि" इति पूर्वोक्तवचनात् । *गौणेति । स्वकालादुत्तरो हि कालः गौणकालः । स च प्रकृते सायान्हः तदुत्तरश्च तत्र केनापि निमित्तेनापराह्णातिक्रमे सायान्हो ग्राह्यः;

स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं यथाविधि ।

इति व्यासोक्तेः । तत्राप्यसंभवे तु न श्राद्धलोपः कार्यः । "नच नक्तम्" इति तदुत्तरकालमभिमेत्यापस्तम्बेनोक्तेरित्यर्थः । नन्वत्र पिण्डसंकल्पस्य पूर्वकृतत्वात् आभोजनसमापनमित्युक्त्या तल्लोपापत्तिरित्यत आह—*आरब्धे इति । तत्र कर्ता उपवासं कु-

---

(१) 'रात्रिभागे पाते' ग०

इत्युक्तं प्राक् ग्रहणनिर्णये । तच्च प्रथमाब्दिकं त्रयोदशे मलमासे कार्यमन्यथा न;

प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया सुतैः ।
क्वचित्त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरम् ॥

इति लघुहारीतोक्तेः । इदम(१)न्त्याधिमासपरम् । द्वादशे त्रयोदशे वातीत इत्यर्थः । तेन यत्र द्वादशमासिकं शुद्धमासे भवति तत्र त्रयोदशेऽधिके एवाद्याब्दिकं कार्यम् । यत्राधिकमध्ये द्वादशं मासिकं तत्र तस्य द्विरावृत्तिं कृत्वा चतुर्दशे शुद्धे एव प्रथमाब्दिकमिति नि(२)ष्कर्षः । माधवीये हेमाद्रौ चैवम् । द्वि(३)तीयादिकं तु शुद्धमासे एव नाधिके, नाप्युभयोः । मलमासमृतानां तु यदा स एवाधिकः स्यात्तदा तत्रैव कार्यमन्यथा शुद्ध एवेति प्रागुक्तम् ।

दर्शे वार्षिकं चेत्तदा पूर्वं वार्षिकं कृत्वा ततः पिण्डपितृयज्ञो दर्शश्राद्धं चेति निर्णयदीपे क्रम उक्तः । स्मृतिसारेऽपि--

दर्शे क्षयाहे सम्प्राप्ते कथं कुर्वन्ति याज्ञिकाः ।
आदौ क्षयाहं निर्वर्त्य पश्चाद्दर्शो विधीयते ॥ इति ।

युक्तं त्वेवम्, तद्वचने मूलाभावात् ।

पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ।

र्यात् । ततः परदिने एकोद्दिष्टे मध्यान्हे पार्वणे तु अपराह्णे पिण्डदानादिशेषं समापयेत्कालबाधस्यान्याय्यत्वात् । परदिने प्रातर्माध्याह्निकं नित्यकृत्यं यथासंभवं कर्तुर्भवत्येव, तत्त्यागे मानाभावात् । "नहि कर्मणि कर्मान्तरारम्भः" इत्यस्यैवंविधविषयेऽप्रवृत्तेरुक्तत्वात् । के-

---

(१) 'अन्त्यादिकमास' ग० (२) 'निष्कर्षः' नास्ति ग०
(३) 'द्वितीयाब्दिकं' ग०

इति दर्शश्राद्धे पिण्डपितृयज्ञानन्तर्यात्तस्याब्दिकेऽप्यतिदेशात्प्रा(१)प्तेः 'पितृयज्ञानन्तरं वार्षिकं ततो दर्शश्राद्धम्' इति व्यतिषङ्गस्तु न भ(२)वति तस्या*र्थिकत्वात्। कालादर्शेऽपि—

निमित्ताऽनि यतिश्चात्र पूर्वानुष्ठानकारणम्।

इति सर्वान्प्रत्यैकरूप्याभावात्क्षयाहनिमित्तस्यानियतत्वम्। देवजानीयेप्येवम्। एवं मासिकादिष्वपि ज्ञेयम्,

प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि।

इति सर्वातिदेशात्। मृताहे वृषोत्सर्ग उक्तो हेमाद्रौ विष्णुधर्मे—

अयनद्वितये चैव मृताहे बान्धवस्य च।
उत्सृजेन्नीलवृषभं कौमुद्याः समुपागमे ॥

कौमुदी कार्तिकी ॥

अथ (३)शुद्धश्राद्धम्। दिवोदासीये—

सपिण्डीकरणादूर्ध्वं *यावदब्दत्रयं भवेत्।
तावदेव न भोक्तव्यं क्षयेऽहनि कदाचन ॥

वर्षान्तसापिण्डनेप्येतत्तुल्यम् ;

चित्तु ननु सायान्हवत्प्रातःसंगवावपि कुतो न गौणकालौ ? मैवं, कुतपमुहूर्ते एव तदुपक्रमात्। तत्पूर्वयोश्च गान्धर्वरौहिणयोः कुतपत्वं तु छत्रिन्यायेनैव—

मध्यान्हस्त्रिमुहूर्तस्तु यदा चलति भास्करः।
स कालः कुतपो नाम पितॄणां दत्तमक्षयम् ॥

इति कुतपत्वेन व्यवहारात्। एवमपि ततः प्राक् प्राप्तेरसंभवाच्चेति रीत्या स्वकालादुत्तरत्वं दूषयति—*आर्थिकत्वादिति। उपपादितं चैतदधस्ताद्ग्रन्थे एव। *यावदब्देति यावच्छब्दो मर्या-

---

(१) 'प्राप्तेः पिण्डपितृ' क० 'प्राप्ते पितृ' ग०
(२) 'भवत्येव' ग० (३) 'शुद्धि' क०छ०

मृताहनि तु सम्प्राप्ते यावदब्दचतुष्टयम् ।
*बहिः श्राद्धं प्रकुर्वीत न कुर्याच्छ्राद्धभोजनम् ॥
प्रथमेऽस्थीनि मज्जा च द्वितीये मांसभक्षणम् ।
तृतीये रुधिरं प्रोक्तं श्राद्धं शुद्धं चतुर्थकम् ॥

इति श्राद्धकारिकोक्तेः (१)शुद्धं किञ्चिदिति ज्ञेयम् । स्मृत्यन्तरे—

*सप्तत्रिंशच्च यो मासान् श्राद्धे भुङ्क्ते तमोहतः ।
स पङ्क्तिदूषितः पापः प्रेताशी च भवेत्तु सः ॥

तत्र प्रथमेऽब्दे वर्षान्तसपिण्डनपक्षे मृताहात्पूर्वेऽह्नि सपिण्डनमब्दपूर्तिश्राद्धं च कृत्वा परेद्युर्वार्षिकं कुर्यादिति स्मृत्यर्थसारे उक्तम् । (२)कालकाण्डे हेमाद्रिस्तु मृताहे सपिण्डीकरणेनैव वार्षिकसिद्धिः;

पूर्णे संवत्सरे पिण्डः षोडशः परिकीर्तितः ।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥

इति वचनादित्याह । इदमेव युक्तम् ॥

अथ क्षयाहाज्ञाने मरीचिः—

श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि ।
एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः ॥

इत्युक्तेः *शुक्लैकादश्यामपि । बृहस्पतिः—

न ज्ञायते मृताहश्चे*त्प्रमीते प्रोषिते सति ।
मासश्चेत्प्रतिविज्ञात*स्तद्दर्शे स्यादथाब्दिकम् ॥

दायाम् । *बहिः गृहादिति वर्तते । कुतः किञ्चिदित्यत्राह—*सप्तत्रिंशच्चेति । सप्तत्रिंशत्तममासस्य चतुर्थवर्षाद्यत्वात् । *शुक्लैकादश्यामपीति । शुक्लपक्षे ज्ञाते शुक्लैकादश्येव ग्राह्या । पक्षस्याप्य-

---

(१) 'शुद्धं किञ्चिदिति ज्ञेयम्' नास्ति क०
(२) 'कालकाण्डे' नास्ति ग०

*दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ।
प्रस्थानमासदिवसौ ग्राह्यौ *पूर्वोक्तया दिशा ॥

मदनरत्ने भविष्ये—

*मृताहं यो न जानाति मानवो विनतात्मज ।
तेन कार्यममावास्यां श्राद्धं सांवत्सरं सदा ॥
दिनमेव तु जानाति मासं नैव तु यो नरः ।
मार्गशीर्षेऽ(१)थवा भाद्रे माघे वा तद्दिनं भवेत् ॥

निर्णयामृते तु—

यदा मासो न विज्ञातो विज्ञातं दिनमेव तु ।
तदा चाषाढके मासि माघे वा तद्दिनं भवेत् ॥

इति बृहस्पतिस्मृतेराषाढोऽप्युक्तः । कालादर्शेऽपि—

मासाज्ञाने दिनज्ञाने कार्यमाषाढमाघयोः ।

इत्युक्तम् । हेमाद्रौ प्रभासखण्डे—

मृताहं यो न जानाति मासं वापि *कथञ्चन ।
तेन कार्यममावास्यां श्राद्धं माघेऽथ मार्गके ॥

ज्ञाने तु साऽनुकल्प इति भावः । *प्रमीते प्रोषिते सतीति । मृततिथ्यज्ञानकारणे इत्यर्थः । *तद्दर्शे इति । तन्मासकृष्णशुक्लैकादश्योर्वा श्राद्धविधेरिति मरीचिवचनात् ।*दिनेति । मरणसम्बन्धिनोस्तिथिमासयोरुभयोरेवाज्ञाने प्रस्थानोत्तरमेव यस्य जीवनवार्ता न ज्ञाता तन्मृताहश्राद्धे प्रस्थानदिनमासौ ग्राह्यावित्यर्थः । *पूर्वोक्तयेति । प्रस्थानस्यापि मासज्ञाने तद्दिनाज्ञाने तन्मासीयामावास्यादिषु मासाज्ञाने दिनज्ञाने च मार्गशीर्षादिषु प्रस्थानतिथावित्यर्थः । शुक्लपक्षतदज्ञानयोः पूर्ववत् । यदा मरणतच्छ्रवणप्रस्थानानां त्रयाणामपि दिनमासयोरज्ञानं तदाऽऽह—*मृताहमिति । 'मृतस्याहः' इति पाठान्तरम् । स एवार्थः । *कथञ्चनेति । मरणादिना केनापि

---

(१) 'तथा' ग.

भविष्ये—

*मृतवार्ताश्रुतेर्ग्राह्यौ तौ पूर्वोक्तक्रमेण तु।

पूर्वोक्तेति प्रस्थानदिनाज्ञाने *मासज्ञाने च *तद्दर्शे मासाज्ञाने दिनज्ञाने च मार्गादाविति व*च्छ्रवणादिनेऽपि ज्ञेयमित्यर्थः। श्रवणादिनमासाज्ञाने माघमार्गदर्शे कार्यं पूर्वोक्तप्रभासखण्डात्। अतोऽत्र लोप इति शूलपाण्युक्तं हेयम्। तिथितत्त्वे यमः—

गतस्य न भवेद्वार्ता याव*द्द्वादशवार्षिकी।
प्रेतावधारणं तस्य कर्तव्यं सुतबान्धवैः॥
यन्मासि यदहर्यातस्तन्मासि तदहःक्रिया।
दिनाज्ञाने कुहूस्तस्य आषाढस्याथवा कुहूः॥

चिह्नेनेत्यर्थः। यदा प्रस्थानस्यापि दिनमासयोरज्ञानं यस्य वा प्रस्थानोत्तरं बहुकालं जीवनवार्ता श्रुतैव पश्चात्तन्मरणं ज्ञातं नतु तद्दिनमासौ तत्राह—*मृतेति। तत्र मरणश्रवणसम्बन्धिनौ दिनमासौ ग्राह्यौ इत्यर्थः। *मासज्ञाने मरणश्रवणसम्बन्धिमासमात्रस्मरणे। *तद्दर्शे तद्दर्शादिषु तेन क्रमेण कृष्णशुक्लैकादश्योरपि लाभः। *श्रवणादिनेपीति। मरणश्रवणसम्बन्धिदिनमात्रस्मरणे मार्गशीर्षादेस्तद्दिने इत्यर्थः। शुक्लपक्षतदज्ञानयोः प्राग्वत्। *द्वादशवार्षिकीति। पञ्चदशवार्षिक्युपलक्षणमेतत्। अज्ञातदेशगतस्य जीवनमरणान्यतरानिर्धारणात्पञ्चदशवर्षादीनि प्रतीक्ष्य पश्चात्प्रतिकृतदाहाद्यौर्ध्वदेहिकं कृतं तत्र दाहतिथावेवाह्निकं कार्यमित्यर्थः। पञ्चदशवर्षप्रतीक्षा पितृविषया। द्वादशवर्षप्रतीक्षा तदितरविषया,

पितरि प्रोषिते यस्य न वार्ता नैव चागतिः।
ऊर्द्ध्वं पञ्चदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम्॥
कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः॥

इत्यग्रिमजातूकर्ण्यवाक्ये पितरीत्युक्तेः।

अथ श्राद्धविघ्ने निर्णयः । तत्र विप्रस्य निमन्त्रणोत्तरं सूतके मृतके चाशौचाभावः,

निमन्त्रितेषु विप्रेषु *प्रारब्धे श्राद्धकर्मणि ।
निमन्त्रणाद्धि विप्रस्य स्वाध्यायाद्विरतस्य च ॥
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥

इति ब्राह्मोक्तेः । कर्तुस्तु विष्णुराह—

व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

श्राद्धे प्रारम्भस्तेनैवोक्तः—

प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥ इति ;

माधवीये ब्राह्मेऽपि—

श्राद्धादौ पितृयज्ञे च कन्यादाने च नो भवेत् ।

मिताक्षरायां स्मृत्यन्तरे सद्यःशौचं प्रकृत्य—

यज्ञे सम्भृतसम्भारे विवाहे श्राद्धकर्मणि । इति ।

तिथितत्त्वादिगौडग्रन्थास्तु *निमन्त्रणोत्तरं कर्तुर्भोक्तुश्च नाशौचम् ;

निमन्त्रणोत्तरं श्राद्धे प्रारम्भः स्यादिति स्मृतिः ।

इति विष्णूक्तेः । यत्तु 'श्राद्धे पाकपरिक्रिया' इति, तद्दर्शश्राद्धविषयमित्याहुः । दातृगृहे मरणादौ ब्राह्मे

यस्य न श्रूयते वार्ता यावद्द्वादशवत्सरम् ।
कुशपुत्रकदाहेन तस्य स्यादवधारणा ॥

इत्यादेः पित्रतिरिक्तविषयकत्वात् । प्रतिकृतिदाहानन्तरं पित्रादेरागमने तु वक्ष्यति *प्रारब्धे इति । सतिसप्तमी । *निमन्त्रणोत्तरमिति । तच्च यदि पूर्वेद्युः रात्रौ क्रियते तदोभयोस्तदन-

उक्तम्—

*भोजनार्धे तु संभुक्ते विप्रैर्दातुर्विपद्यते ।

गृहे इति शेषः ।

यदा कश्चित्तदोच्छिष्टं शेषं त्यक्त्वा समाहिताः ।
आचम्य परकीयेन जलेन शुचयो द्विजाः ॥इति ।

अस्य श्राद्धविषयत्वं हेमाद्रिणोक्तम् । पृथ्वीचन्द्रोदयेप्येवम् । मम तु प्रतिभाति–इदं विवाहादिविषयं नतु श्राद्धविषयं, तत्पदाभावात् । 'विवाहोत्सवयज्ञेषु' इत्युपक्रम्य—

भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः ॥

इति षट्त्रिंशन्मतैकवाक्यत्वात् ।

*निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि ।

इति पूर्वोक्तविरोधाच्च । श्राद्धे तु यद्यपि विष्णुना पाकोत्तरमाशौचाभाव उक्तस्तथापि *कर्तुरेव सः । भोक्तुर्दोषोऽस्त्येव,

अपि दातृग्रहीत्रोश्च सूतके मृतके तथा ।
अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कथञ्चन ॥
विज्ञाते भोक्तुरेव स्यात्प्रायश्चित्तादिकं क्रमात् ॥

इति माधवीये ब्राह्मोक्तेः । *आदिशब्देनाशौचमु-

न्तरमाशौचं नास्तीत्यर्थः । एवं सद्योनिमन्त्रणेऽपि द्रष्टव्यम् । *भोजनार्धेति । भोजनम् अन्नम् । अर्धशब्दस्योत्तरनिर्देशादत्र खण्डमात्रमर्थो नतु समांशः । कश्चिदित्युक्त्याऽसपिण्डोऽपि । *निमन्त्रितेष्वति । एतद्वाक्येन निमन्त्रणोत्तरं विप्रस्याशौचाभावोक्तेः । *कर्त्तुरेवेति । एवकारेण गौडग्रन्थेऽप्यरुचिः स्फोटिता । *आदिशब्देनेति श्राद्धादिष्वित्यादिशब्देनेत्यर्थः । अविज्ञातो-

च्यते । तच्चाह विष्णुः—'ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तं कुर्यात्' इति । यत्तु—

देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ।

इति ब्राह्मं, तत् श्राद्धकालीनस्य निषेधकं न तदुत्तरकालीनस्य । शुद्धिदीपस्तु निमन्त्रितेष्वित्यामश्राद्धपरम्, भोजनार्धे त्वित्यादि त्वन्नश्राद्धपरमित्याह ।

*प्रा(१)यश्चित्तं त्वाह मार्कण्डेयः—

भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः ।

एतत्कामतः । अभ्यासे शङ्खः—

ब्राह्मणस्य तथा भुक्त्वा मासमेकं व्रती भवेत् । इति ।

अज्ञानात्तु छागलेयः—

एकाहं च त्र्यहं पञ्चसप्तरात्रमभोजनम् ।
ततः शुचिर्भवेद्विप्रः पञ्चगव्यं पिबेन्नरः ॥

इति वर्णक्रमेणेदम् । अभ्यासे तु द्वैगुण्यमित्यादि मिताक्षरामाधवीयादौ ज्ञेयम् । मिताक्षरामाधवादौ तु श्राद्धे कर्तुर्भोक्तुश्च सर्वथा दोषाभाव उक्तः । आशौचमध्ये श्राद्धदिनप्राप्तौ तु माधवीये कालादर्शे च ऋष्य-

त्तराशौचमध्ये पूर्वाशौचीयैकादशाहिकैकोद्दिष्टादिकरणेऽपि न पुनरावृत्तिरित्यग्रे स्पष्टम् । *प्रायश्चित्तादिकमिति । आदिना तदीयाऽऽशौचपरिग्रहः । *देये इति । देय इत्येतन्मृताहातिरिक्तव्यावृत्त्यर्थम्,

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च ।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तते ॥

---

(१) अत्र यद्यपि टीकायां 'प्रायश्चित्तादिकम्' इति प्रतीकं दृश्यते तथापि सर्वादर्शपुस्तकानुसारी आदिशब्दरहित एव पाठोऽस्माभिः स्थापितः ।

भृङ्गः—

*दैवे पितॄणां श्राद्धे तु आशौचं जायते यदा ।
आशौचे तु व्यतिक्रान्ते तेभ्यः श्राद्धं प्रदीयते ॥

श्राद्धचिन्तामणौ ज्योतिषे—

प्रतिसांवत्सरं श्राद्धमाशौचात्पतितं च यत् ।
मलमासेऽपि तत्कार्यमिति भागुरिभाषितम् ॥

आशौचान्त्यदिनत्वेन निमित्तत्वादित्यर्थः । एतन्मा(१)सिकाब्दिकपरं न दार्शिकादौ । अत एव सुदर्शनभाष्ये अपरपक्षे पित्र्याणीति नियमात् कृष्णपक्षश्राद्धलोपे प्रायश्चित्तमेव नतु गौणकाले करणम् । तच्चोपवासः,

वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥

इति मनूक्तेरित्युक्तम् । आशौचे तु प्रायश्चित्तमपि न मुख्यकाले अनधिकारात् ।

आशौचान्तेऽसंभवे तु व्यासः—

*श्राद्धविघ्ने समुत्पन्ने त्वन्तरा मृतसूतके ।

इति शङ्खोक्तेस्तेषामदेयत्वात् । मृताहश्राद्धं तु विघ्नमात्रे कार्यमेव,

श्राद्धविघ्ने समुत्पन्ने मृताहेऽविदिते तथा ।
एकादश्यां प्रकुर्वीत कृष्णपक्षे विशेषतः ॥

इति लघुहारीतात् । मृताहे इत्यस्य समुत्पन्ने इत्यत्राप्यन्वयः, तथापदसद्भावात् । तथाचाऽऽशौचानन्तरदिने प्रमादाकरणे तदुत्तरामायां तत्रापि कथञ्चिदसम्भवे कृष्णायामेकादश्यां तत्राप्यसम्भवे शुक्लायां तस्यां कार्यमिति । एवं सूतकान्तरितं मासिकमपि आशौचानन्तरदिने एव । तत्राप्यन्तरितं तदमावास्यायां कार्यम् । तदाह—*श्राद्धविघ्ने इति ।

---

(१) 'मासिकादिपरं ग०

अमावास्यां प्रकुर्याद्वै शुद्धावेके मनीषिणः ॥

*मासिके चाब्दिके त्वह्नीति च । अह्नि मृतसूतके संप्राप्ते इत्यन्वयः । हेमाद्रौ षट्त्रिंशन्मतेऽपि—

*मासिके चाब्दिके त्वह्नि संप्राप्ते मृतसूतके ।
वदन्ति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणाः ।

गोभिलः--

देये प्रत्याब्दिके श्राद्धे अन्तरा मृतसूतके ।
आशौचानन्तरं कुर्यात्तन्मासेन्दुक्षये (१)तथा ॥

मरीचिः--

श्राद्धविघ्ने समुत्पन्नेऽप्यविज्ञाते मृतेऽहनि ।
एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः ॥

विशेषत इत्युक्तेः शुक्लैकादश्यामपि । *आशौचेतरविघ्ने एतदिति माधवपृथ्वीचन्द्रौ । यत्त्वत्रिः—

तदहश्चेत्प्रदुष्येत केनचित्सूतकादिना ।
सूतकानन्तरं कुर्यात्पुनस्तदहरेव च ॥ इति,

*तत् पूर्वकालाभावे ज्ञेयम् । एत*दाब्दिकेतरश्राद्धप-

अनयोर्वाक्ययोराशौचविघ्नेऽमावास्याविधानात्तदनुकल्पभूता कृष्णैकादशी तदनुकल्पभूता शुक्लैकादशी च ग्राह्या । अत्रापि "शुद्धावेके" इत्युक्तेश्च । *आशौचेतरेति । पाकासम्भवादिना आब्दिकविघ्ने तु तदुत्तरामावास्यायां कृष्णैकादश्यां वा तत्कार्यम्,

आपन्नोऽप्याब्दिकं नैव कुर्यादामेन कर्हिचित् ।
अन्नेनेदममायां तु कृष्णे वा हरिवासरे ॥

इति कार्ष्णाजिनिवचनात् । इहापि शुक्लैकादशी ग्राह्या, कृष्णपक्षे विशेषत इति वचनात् । यत्तु तन्मासि कृष्णैकादश्यां कुर्यादिन्दुक्षयेऽपिवेति, तत्रामायामकरणे कृष्णैकादशी अनुकल्प इति बोध्यम् । *तदिति । पुनस्तदहरेव चेत्येतदित्यर्थः । पूर्वकालः शुक्लै-

---

(१) 'पिवा' छ०

रम् । यच्च देवलः--

एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते ।
मासेऽन्यस्मिंस्तिथौ तस्मिन्श्राद्धं कुर्यात्प्रयत्नतः ॥ इति ।

तदपि *मासिकपरमिति मदनरत्ने हेमाद्रौ च । इदमपि पूर्वकालासंभवे । व्याध्यादौ विस्मरणे चैवं ज्ञेयम् ।

अथ भार्यारजोदर्शने तत्र दार्शिकमानेन कार्यम्,
*श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् ।
अमावास्यादिनियतं *माससंवत्सरादृते ॥

कादश्यन्तः । *आब्दिकेतरश्राद्धं अनुमासिकम् अन्यश्राद्धस्य पुनःकर्त्तव्यत्वाभावात् मासिकश्राद्धस्योत्तरस्य स्वातन्त्र्येण कर्त्तव्यत्वाच्च । तथाच तत्र चत्वारः काला इति भावः । *मासिकपरमिति । वर्षान्तसपिण्डनपक्षादौ मासिकानामेकोद्दिष्टविधिनैव कर्तव्यत्वात् । केचित्तु 'पुनस्तदहरेव च' इत्यत्रिवाक्येनैतदेकवाक्यम् । तथाच यदैकोद्दिष्टविधिना वार्षिकं क्रियते तदा देवलवाक्यं तद्विधिना कर्तव्यानुमासिकपरम् । तत्रापि चत्वारः कालाः । यदा च पार्वणविधिना तदाऽत्र्यादिवाक्यानीति । यदि तु व्याध्यादिनाऽशक्तस्तदा पुत्रादिना तद्दिने एवान्नेनाब्दिकं कारणीयम् । अनुपादेयकालानुरोधेनोपादेयकर्तृप्रतिनिधेर्न्याय्यत्वात् । आपन्नोऽपीत्यादिवचनं तु न व्याध्याद्यापद्विषयं, तदाऽऽमेनापि दुष्करतया आमनिषेधवशेन तस्य पाकासम्भवरूपापद्विषयकत्वात् । प्रतिनिधिनाप्यसम्भवे तु अमावास्यादिषु सामान्यवचनादित्यलम् । *श्राद्धविघ्ने पत्नीरजोदर्शनादौ ।

अपत्नीकः प्रवासी च यस्य भार्या रजस्वला ।
सिद्धान्नेन न कुर्वीत आमं तस्य विधीयते ॥

इत्युशनोवाक्याच्च । *माससंवत्सरात् मासिकसांवत्सरिकात् । आमाभावे हेमश्राद्धमपि, अन्नाभावे द्विजाभावे इति

इति हेमाद्रौ हारीतोक्तेः । व्याघ्रपादोपि—

आर्तवे देशकालानां विप्लवे समुपस्थिते ।
आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि ॥ इति ।

दीपिकापि—दर्शे तु भार्यार्तवेप्यामश्राद्धविधिं प्रवासिविधुराद्याश्चाचरेयुर्द्विजाः । वस्तुतस्तु—

पाकाभावे द्विजातीनामामश्राद्धं विधीयते ।

इति सुमन्तूक्तेः पाककर्त्रन्तरसत्त्वेऽन्नेनान्यथाऽऽमेनेति युक्तम् ।

मासिकानि सपिण्डानि अमावास्या तथाब्दिकम् ।
अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वला ॥

इति कलिकायां वचनाच्च । *कालादर्शे तु स्त्रिया रजोदर्शने दर्शश्राद्धं पञ्चमेऽहनीति पक्षान्तरमुक्तम् । पारिजातेऽप्येवम् । एवं महालययुगादावपि ।

*आब्दिकं तु रजोदर्शनेऽपि तद्दिने एव कार्यम्,

पुष्पवत्स्वपि दारेषु विदेशस्थोऽप्यनाग्निकः ।
*अन्नेनैवाब्दिकं कुर्याद्धेम्ना वाऽऽमेन न क्वचित् ॥

इति माधवीये लौगाक्षिस्मृतेः । मरीचिरपि—

अ(१)नाग्निकः प्रवासी च यस्य भार्या रजस्वला ।
*आमश्राद्धं प्रकुर्वीत न तत्कुर्यान्मृतेऽहनि ॥

प्रागुक्तवाक्यात् । *कालादर्शे त्विति । तुना दर्शादिश्राद्धस्य नाब्दिकश्राद्धतुल्यता । आशौचमध्ये दर्शपाते सर्वसंमततल्लोपानुपपत्तेः तदनन्तरं सुकरत्वादित्यरुचिः सूचिता । *आब्दिकं त्विति । आब्दिकं तद्दिने वा रजोनिवृत्तौ पञ्चमादिने वा कार्यमिति मतद्वयम् । तत्र प्रथममतमेतत् । *अन्नेनैवेति । एतेन तद्दिन एवेति ज्ञायते । अन्यथा पुष्पवत्स्विति वैयर्थ्यात् । *आमश्राद्धमिति ।

---

(१) 'अनग्निश्च' क० छ० ।

कार्ष्णाजिनिः—

*आपन्नोप्याब्दिकं नैव कुर्यादामेन कुत्रचित् ।
अन्नेन *तद(१)मायां तु कृष्णे वा हरिवासरे ॥

प्रयोगपारिजाते—

रजस्वलायां भार्यायां क्षयाहं यः परित्यजेत् ।
स वै नरकमाप्नोति यावदाभूतसंप्लवम् ॥
मासिकानि *स(२)पिण्डानि अमावास्या तथाब्दिकम् ।
अन्नेनैव तु कर्तव्यं यस्य भार्या रजस्वला ॥

देवयाज्ञिकनिबन्धेऽपि—

भर्तुः श्राद्धं पञ्चमेऽह्नि कुर्याद्भार्या रजस्वला ।
पुत्रः पित्रोः प्रकुर्वीत मृताहनि *शुचिर्यतः ॥

कालादर्शेऽपि—

रजस्वलाङ्गनोऽनग्निर्विदेशस्थोऽथवाब्दिके ।
दर्शादाविव नामेन त्वन्नेन श्राद्धमाचरेत ॥

अन्यत्रापि—

विदेशको वा विगताग्निको वा रजस्वलायामपि धर्मपत्न्याम् ।
श्राद्धं मृताहे विदधीत पाकैर्नामेन हेम्ना नतु पञ्चमेऽह्नि ॥

एवं मासिकेऽपि । यत्तु मरीचिः—

आब्दिके समनुप्राप्ते यस्य भार्या रजस्वला ।

तदाब्दिकमामश्राद्धं न कुर्यादित्यर्थः । किन्त्वन्नेनैवेत्याशयः । *आपन्नोऽपीति । भार्यारजोदर्शनादिना पाकाभाव आपत् । *तदमायान्त्विति । कालान्तरविधानात्पञ्चमाहोरूपकालाविधानाच्च । *सपिण्डानीति । सपिण्डनसहितानीत्यर्थः । *शुचिर्यत इति । भार्याचेद्रजस्वला तदापि स्वयं शुचिरेवेत्यर्थः । श्लो-

---

(१) 'तदमायां वा' ग० ।

(२) यद्यप्यत्र सर्वपुस्तकेषु 'सपिण्डं च' इति पाठो दृश्यते तथा प्ययं टीकानुरोधेन स्थापित इत्यवधेयम् ।

पञ्चमेऽहनि तच्छ्राद्धं न तत्कुर्यान्मृतेऽहनि ॥

माधवीये-

श्राद्धं तदा न कर्तव्यं कर्तव्यं पञ्चमेऽहनि ।

इत्युत्तरार्धं, तदपुत्रस्त्रीकर्तृकश्राद्धविषयम्;

अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके ।
रजस्वला भवेत्सा तु कुर्यात्तत्पञ्चमेऽहनि ॥

इति श्लोकगौतमोक्तेः ।

दैवं कर्माणि(१)पित्र्ये च पञ्चमेऽहनि शुध्यति ।

इति प्रभासखण्डाच्च । नन्वशुचित्वादेव तत्र पञ्चमेऽहन्यर्थात् श्राद्धं प्राप्तमिति वचनं व्यर्थम् ? मैवम्,

गर्भिणीसूतिकादिश्च कुमारी वा(२)ऽथ रोगिणी ।
यदा शुद्धा तदाऽन्येन कारयेत्प्रयता स्वयम् ॥

इति हेमाद्रौ भविष्योक्तेः । 'अनुपनीतस्त्रीशूद्राश्च श्राद्धमृत्विजा कारयेयुः स्वयं वाऽमन्त्रकं कुर्युः' इति स्मृत्यर्थसाराच्च ।*अन्यद्वारा करणनिवृत्त्यर्थत्वात्तस्य, *त्वदुक्तदिशा आशौचानन्तरं श्राद्धकर्तव्यताऽवेदकवाक्यवैयर्थ्याच्च । अतः प्रा(३)गुक्तमरीच्युक्तेः पत्नी पञ्चमेऽहनीति युक्तम् । यत्तु-

सप्ताहात्पितृदेवानां भवेद्योग्या व्रतार्चने । इति,

त*द्रजोनिवृत्तिपरमिति हेमाद्रिभिन्नसर्वनिबन्धसिद्धान्तः ।

*गौतमवाक्यस्य वैयर्थ्यमाशङ्क्याह-*अन्येति । प्रतिनिधिद्वारा करणनिवृत्त्यर्थत्वानुपगमे बाधकमाह-*त्वदुक्तेति । अस्माकं तु तादृशकरणनिवृत्त्यर्थकतया न वैयर्थ्यमित्यर्थः । *रज इति । पञ्चमेऽहनीत्यपि रजोनिवृत्तिपरमेव,

---

(१) 'पित्र्ये वा' ग० । (२) 'वाऽन्य' ग० ।
(३) 'प्रागुक्तमरीच्युक्तेः' नास्ति छ० ।

*हेमाद्रिस्तु श्राद्धादौ स्त्रिया सहैवाधिकारात्तस्यां रजोदुष्टायां तन्निवृत्तेरेकभार्येण पञ्चमेऽहनि कार्यं *प्रागुक्तमरीच्युक्तेः । भार्यान्तरसत्त्वे तु *पुष्पवत्स्वपीति वचनात्तद्दिने एवेत्याह । दीपिकापि—"भार्यतौ सति पञ्चमे च दिवसे स्याद्धार्षिकं मासिकं पक्वान्नैर्बहुभार्यकस्त्वधिकृते पत्न्यन्तरे तिष्ठति । कुर्यात्तद्दिनयं स्वमुख्यादिवसे' इति । तच्चिन्त्यम्, सहाधिकारः सहत्वश्रुत्या वा एकफलभाक्त्वेन वा पाककर्तृत्वेन वा ? नाद्यः, *तदभावात् । "पाणिग्रहणाद्धि सहत्वं कर्मसु" इत्यस्या*ग्निसाध्यक-

---

साध्वाचारा न तावत्स्यात्स्नातापि स्त्री रजस्वला ।
यावत्प्रवर्तमानं हि रजो नैव निवर्तते ॥

इति वचनात् । द्वितीयं पक्षमाह—*हेमाद्रिस्त्विति । *प्रागुक्तेति ।

आब्दिके समनुप्राप्ते यस्य भार्या रजस्वला ।
पञ्चमेऽहनि तच्छ्राद्धं न तत्कुर्यान्मृतेऽहनि ॥

इति मरीचिः । यथा "न गिरागिरेति ब्रूयादैरं कृत्वोद्गेयम्" इत्यत्र गिरागिरेति निषिध्य गिरापदकार्ये इरापदं विधीयते निषेधस्त्वनुवादः "शत्रुवदादेशः" इति न्यायात् । तथा मृताहं निषिध्य पञ्चममहो विधीयते । मृताहनिषेधस्त्वनुवादः । यस्य मृतस्य भार्या रजस्वलेत्यर्थे वाक्यवैयर्थ्यात् । नच प्रतिनिधिद्वारा करणनिवृत्त्यर्थत्वेन सार्थक्यं सुवचम् । प्रतिनिधिद्वारा व्रतादेरपि आरम्भाभावेन तत्रानुवर्तनवदिहापि प्रथमतः कदाचिदनुवृत्तिरेव प्रसज्येत । एवञ्च तत्र प्रथमाब्दिकस्य पञ्चमेऽहनि सिद्धौ तद्वदेव तदन्यस्यापि तत्रैव सिद्धेः प्रतिनिधिना करणस्याप्रसक्तेस्तन्निवृत्त्यर्थकत्वासम्भवात् । *पुष्पवत्स्वपीति । रजोदर्शनेऽप्यनेनाब्दिकस्य कर्तव्यत्वमुच्यते । तच्च भार्यान्तरसत्त्वेनोपपाद्यमिति भावः । *तदभावात् । सहत्वश्रुत्यभावात् । *अग्निसाध्येति । आहवनीयत्वादि-

र्मविषयत्वात्। *आह्निकस्य च निरग्नेरपि पाकेनैवोक्तेः स्मार्ताग्निसाध्यत्वानियमात् *'तामपरुध्य' इतिव(१)त 'पुष्पवत्स्वपि' इति पूर्वोक्तवचनसत्त्वाच्च। कथं च भार्यान्तरसत्त्वेऽधिकारः 'ज्येष्ठया न विनेतरा' इति नियमात्। ज्येष्ठापरत्वे च तेनैव सिद्धेर्वचनवैयर्थ्यात्। न द्वितीयः, अविभक्तभ्रातृष्वेकस्याऽशुचित्वेऽन्यस्यानधिकारापत्तेः। न तृतीयः, प्रवासनिर्दशसूतिकारोगिण्यादिष्वप्यकरणापत्तेः।

कामनायां यो दम्पत्योरधिकारः स एव सहाधिकारः। क्लृप्तपतिविद्यामात्रादेव कर्मनिर्वाहे तस्या अक्लृप्तविद्याकल्पनानुपगमलाघवात्। तदकामनायान्तु न सहाधिकारः। न चैवमाज्यावेक्षणादौ तस्या अप्रवृत्त्यापत्तिः। भर्त्तृमात्राधिकारिके तत्र ऋत्विजामिव तस्यास्तत्र केवलकर्तृत्वोपगमात्। एवमाहवनीयादिसाध्येषु दर्शपूर्णमासादिष्वपि पत्न्याः फलकामनायामेवाधिकारः, इतरथा च पतिमात्रस्यैवेति। न चैवं भर्त्तुरकामनायां स्त्रिया अधिकारापत्तिः। अपूर्वविद्याकल्पनागौरवात्। प्रकृते च कामनासत्त्वेपि भर्त्तुः पित्रादि श्राद्धे पत्न्या नाधिकारः।

प्रतिसम्वत्सरं कार्यं मातापित्रोर्मृतेऽहनि।
पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि॥

इति वाक्यं ससंबन्धिकपितृमात्रादिपदगर्भवचसां तां प्रति प्रवर्त्तयितुमशक्यत्वात्। कामनाविरहे तु सुतराम्। एवञ्च पत्नीसाहित्यं गलितमेव। "पाणिग्रहणात्" इति वाक्यं च सिद्धदर्शपूर्णमासादिसहाधिकारानुवादकमेव, नत्वपूर्वतद्बोधकं, मानाभावादिति भावः। नन्वौपासनेनैवान्नसिद्धेः श्राद्धस्याप्यग्निसाध्यत्वमत आह-*आह्निकस्येति। *तामपरुध्येति। तामनालम्भुकां

---

(१) 'वत् 'पुष्पवत्स्वपि' इति' नास्ति ग०।

आरभेत नवैः पात्रैरन्नारम्भं च बान्धवैः ।

इति देवलोक्तावात्मनेपदात्स्वस्य बान्धवानां च पाककर्तृत्वोक्त्या विरोधाच्च ।

अ(१)थ--

ततस्तानि पपाचाशु सीता जनकनन्दिनी ।

इति पाद्मादिलिङ्गात्प्राशस्त्यं भार्यापाकस्योच्यते । न तत्कस्याप्यनिष्टम् । तेनैतद्वचनं युक्त्याद्यभावात् पूर्वोक्तवचोविरोधाच्च यत्किंचिदेव । यदपि-

श्राद्धीयाहनि संप्राप्ते यस्य भार्या रजस्वला ।
श्राद्धं तत्र न कर्तव्यं कर्तव्यं पञ्चमेऽहनि ॥

इति श्लोकगौतमपाठोऽन्यथा दर्शितः । माधवीये च तद्वशात्पक्षान्तरमुक्तम् । तेनापि नाभिप्रेतार्थसिद्धिः, यस्य प्रेतस्येत्यर्थात् । तेनात्र हेमाद्रिर्बभ्रामेति *बहुवक्तव्येऽपि नोच्यते ॥

अथान्वारोहणे निर्णयः । लौगाक्षिः-

*मृताहनि *समासेन पिण्डनिर्वपणं पृथक् ।

गृहान्तरे संस्थाप्य प्रारब्धश्रौतं निर्वाह्यं तथाऽऽब्दिकश्राद्धमपि निर्वाह्यमित्यर्थः । *बहुवक्तव्येऽपीति । तच्च विवेचनादौ स्पष्टम् । विस्तरभीत्याऽस्माभिरपि न लिख्यते । अत्र यथासंप्रदायं व्यवस्थेति रहस्यम् । तस्मात्—

मृताहन्याब्दिकं केचित्पञ्चमेऽह्नि तथा परे ।
मतद्वयं प्रमाणत्वाल्लोकैराद्रियतेऽधुना ॥

*मृताहनीति । यत्र पत्नी भर्तृचित्यामन्वारूढा तत्र भर्तुः तस्याश्च तिथिभेदेन मरणे तत्तत्तिथौ तस्य तस्याश्च पृथगेव वार्षिकं यदा च तिथ्यैक्यं तदा यद्यप्येकदेशकालकर्तृकत्वेन गृह्यमाणाविशेष-

---

(१) 'अथ' नास्ति ग० ।

नवश्राद्धं च दम्पत्योरन्वारोहण एव तु ॥

समासेन तन्त्रेण द्विपितृकश्राद्धवद्द्वयोरेकः पिण्डो विप्रश्च । *पिण्डशब्दः श्राद्धपरः । (१)नवश्राद्धं पृथगिति हेमाद्रिपृथ्वीचन्द्रौ । *अत्र मृताहनीत्ये*कत्वात् दिनभेदे दिनैक्ये वा मृततिथेरेकत्वे *कालैक्यं कर्त्रैक्यं पाकैक्यं च ।

*एकाचित्यधिरोहे तु तिथिरेकैव जायते ।

त्वाद्देवताभेदेन पृथक्क्रियमाणयोरपि प्रधानयोरङ्गानां च तन्त्रं प्राप्नोति, तथाऽपि "एककाले गतासूनां बहूनाम्" इत्युत्तरवाक्याद्दैवादेकतिथौ मृतानामितरेषामिव पाकमात्रतन्त्रतोक्तेः पृथगेव दम्पत्योः श्राद्धं प्राप्नोति । तत्र तद्बाधेन प्रकारविशेषोऽनेन विधीयते । *समासेनेति । यथा द्विपितृकः पितृद्वयोद्देशेन एकं पिण्डं ददाति "एकपिण्डे द्वावुपलक्षयेत्" इति वचनात् । तथा दम्पत्योः स्त्रियोऽन्वारोहणे द्वयोद्देशेनैकं पिण्डं दद्यात् । अत एव ब्राह्मणोऽप्येक एव द्वयोरित्यर्थः । मृततिथेरेकत्वे तन्त्रवदेवं नवश्राद्धस्यापि प्राग्वत्तन्त्रे प्राप्ते पार्थक्यमात्रं विधीयत इति भावः । *पिण्डशब्दः पिण्डनिर्वपणशब्दः । नच तस्य पिण्डश्राद्धं तत्समास एवार्थोऽस्तु, नवश्राद्धमिति श्राद्धपदसमभिव्याहारेणास्यापि तत्परत्वात् । नन्वेवं तिथिभेदेऽपि समासप्रसङ्गो वाचनिकत्वादत आह—*अत्रेत्यादि पृथगेवेत्यन्तम् । *एकत्वादिति । एकतिथिमृताहश्राद्धत्वमुद्देश्यतावच्छेदकं, तिथिभेद एकाहाप्राप्तेः साहित्यविधानायोगात् । तदवच्छिन्ने च समासो विधीयते । तस्याहोरात्रभेदे बाधापत्त्या अहपदं तिथिपरं स्वीकार्यम् । *कालैक्यमिति । समासविधानमनायत्या प्रधानं तन्त्रार्थम् । तच्च कर्तृभेदे पाकभेदे वा न सम्भवति । अतस्तदैक्यमप्युक्तम् । *एकाचितीति । उक्तरीत्या

---

(१) 'न च श्राद्धं' ग०

एकपाकेन पिण्डैक्ये द्वयोर्गृह्णीत नामनी ॥

इति स्मृत्यन्तराच्च । अन्त्येष्टिपद्धतौ भट्टैरप्युदाहृतम्—

अन्वारोहे तु नारीणां पत्युश्चैकोदकक्रिया ।
पिण्डदानक्रिया तद्वच्छ्राद्धं प्रत्याब्दिकं तथा ॥
नवश्राद्धानि सर्वाणि सपिण्डीकरणं पृथक् ।
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥ इति ।

तिथिभेदे तु वार्षिकं पृथगेव । *तथा वार्षिके समासविधानादन्यत्र सर्वत्र पृथक्त्वे प्राप्ते नवश्राद्धमेव पृथगिति *परिसंख्यया *ऽन्यत्र पृथगुक्तेष्वपि वार्षिकषोडशश्राद्धतीर्थसापिण्डानान्वष्टक्यादिषु समास एवेति मदनपारिजातनिर्णयामृतादयः । अतः समासविधिबलात् ज्येष्ठपुत्रस्य कर्तृत्वे सपत्नमातुरन्वारोहणे तत्पुत्रे सत्यपि तद्वार्षिकादिकमविभक्तः सापत्नपुत्र एव ज्येष्ठः कुर्यान्नौरसः । वक्ष्यमाणपृथ्वीचन्द्रादिमते तु औरस एव मातुः पृथक्कुर्यात् । एवं बह्वीष्वपि मातृषु ज्ञेयम् । त्रिस्थलीसेतौ पितामहचरणैरप्येव*मुक्तम् । यत्तु गार्ग्यः—

एकचित्यां समारूढौ दंपती निधनं गतौ ।

भिन्नतिथावन्वारूढापरत्वासम्भवात् । समानकालकर्तृककर्मणामङ्गतन्त्रस्य वक्ष्यमाणरीत्या सिद्धत्वात् । प्रधानतन्त्रं समासपदार्थः । तत्र संवादमाह । अत्र मृताहनीत्युक्तेः समासविधानमाब्दिकमात्रविषयमिति मतं निरसितुं मृताहनि समासविधाने षोडशश्राद्धादौ समासो न विहितः स्यादिति तत्र तं प्रापयितुं चाह—*तथेति । *परिसंख्ययेति । अस्य वार्षिकेत्यादिनाऽन्वयः । *अन्यत्रेति । नवश्राद्धभिन्ने पृथक्त्वेऽपीत्यर्थः । एकदिने नवश्राद्धभिन्ने वार्षिकादौ समास एवेत्यर्थः । *एवमुक्तमिति । औरस एव मातुराब्दिकं पृथक्कुर्यात् सपत्नीपुत्रे तन्निरूपितपुत्रत्वाभावात्,

*पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथक् ॥

ओदनं पिण्डः । त*न्नवश्राद्धविषयम् । यत्तु भृगुः—

*या समारोहणं कुर्याद्भर्तुश्चित्यां पतिव्रता ।
तां मृताहनि संप्राप्ते पृथक्पिण्डे नियोजयेत् ॥
प्रत्यब्दं च नवश्राद्धं युगपत्तु (१)समापयेत् ॥

तद्येषां वार्षिक*मेकोद्दिष्टमुक्तं तद्विषयम् । *प्रत्यब्दं

मातुः पितुः प्रकुर्वीत संस्थितस्यौरसः सुतः ।

इति वाक्यात् । एतन्मते ज्येष्ठेन पितुरेव केवलं पितामहादिभिः सपिण्डनं कार्यं कनिष्ठेन तु मातुः पितृसपिण्डनादिने दिनान्तरे वा पृथक्सपिण्डनं कार्यम् । तच्चोभयथाऽपि पितृसपिण्डनोत्तरमेव, पितृभावापन्नसंयोजनसम्भवे प्रेतभावापन्नसंयोजने मानाभावात् । तच्च पित्रैकेनैव पित्रादित्रयेणेति मतद्वयम् । *पृथक् श्राद्धमिति । समासविधानेन विरोध इत्यभिमानः । *नवश्राद्धेति । पृथक् नवश्राद्धमिति लौगाक्षिवाक्यात् । *या समारोहणमिति । पृथक्पिण्डोक्त्या विरोध इत्यभिमानः । *एकोद्दिष्टमिति । एकोद्दिष्टे समासविधानाभावात् । मृताहनि प्रत्यब्दं चेत्यस्य पौनरुक्त्यमाशङ्क्याह—*प्रत्यब्दमिति । तथाच एकोद्दिष्टमाचरतां प्रत्यब्दं मृताहनि पृथक् द्वयोः पिण्ड इत्यर्थः । वस्तुतस्तु लौगाक्षिणैव दम्पत्योः समासो विधीयते विधेयस्य समासस्यानेकापेक्षत्वाद्दम्पत्योरिति तद्विशेषणं विवक्षितमेव । नवश्राद्धं च पृथक् । चस्त्वर्थे । नवश्राद्धं त्वन्वारोहणे पृथगेव कुर्यात् । पृथक्त्वं च पूर्वोक्तसमासविपर्यय एवेति प्रधानमात्रभेदः । अङ्गानां च तन्त्रमित्येव । तदभिप्रायेण नवश्राद्धं च युगपत्तु समापयेदिति । समाप्तिग्रहणमुपक्रमस्याप्युपलक्षणम् । उपक्रमयौगपद्यं विना समाप्तियौगपद्यासम्भवात् । नच मृताहश्राद्धमात्रे समासे विहिते नव-

---

(१) 'समाचरेत्' ग०

च मृताहनीत्यन्वयः । नवश्राद्धं युगपदिति *दर्शे वर्गद्वयवदेकतन्त्रेण पृथगित्यर्थमाह हेमाद्रिः । *एतन्मृततिथिभेदविषयमिति पृथ्वीचन्द्रनिर्णयामृताद्याः । देवयाज्ञिकोप्येवम् । *पराशरमाधवस्तु-*'गार्ग्यभृग्वादिवचना*ल्लौगाक्षिवाक्ये समासेन *पाकादितन्त्रैक्येन दर्शे

श्राद्धे तत्प्राप्त्यभावेन तद्विपर्ययात्मकं पृथक्त्वं कथं विधीयते इति वाच्यं, तस्यानुवादत्वात् । अत एव नवश्राद्धग्रहणमवयवपिण्डषोडशश्राद्धादीनामुपलक्षणमिति । तदेतदभिप्रेत्याह--*दर्शे इति । एकतन्त्रेणोपक्रमसमाप्त्योर्यौगपद्येन प्रधानं पृथगित्यर्थः । *एतत् पृथक्पिण्डे नियोजनम् । मृततिथ्येकत्वे तु एक एव पिण्ड इति स्मर्त्तव्यम् । *पराशरमाधवस्तु इति । पक्षान्तरमिति शेषादिति । पक्षान्तरमाहेत्यर्थः । *गार्ग्येति ।

एकचित्यां समारूढौ दम्पती निधनं गतौ ।
पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक् पृथक् ॥

इति गार्ग्यम् ।

एककाले गतासूनां बहूनामथवा द्वयोः ।
तन्त्रेण श्रपणं कृत्वा कुर्याच्छ्राद्धं पृथक् पृथक् ॥

इति भृगुः । आदिना--

एकचित्यां समारूढौ म्रियेते दम्पती यदि ।
तन्त्रेण श्रपणं कुर्यात्पृथक्पिण्डं समापयेत् ॥

इत्यादिपरिग्रहः । प्रथमे ओदनमोदनपिण्डाः । तृतीये श्राद्धं ब्राह्मणभोजनम् । तेन ब्राह्मणभोजनपिण्डदानात्मकं प्रधानमात्रं भेदेन कार्यम् । अङ्गानां तु दर्शादौ पितृमातामहपार्वणद्वयवत्तन्त्रमित्यर्थः । अत्र पक्षे लौगाक्षिवाक्यैकवाक्यतामप्याह-*लौगाक्षिवाक्ये इति । अयमर्थः-"पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत", इति वाक्यद्वये विधेयकालग-

वर्गद्वयवत्पृथक्श्राद्धं (१)कुर्यात् नवश्राद्धं च तथा इत्याह।

*पृथ्वीचन्द्रचन्द्रिकादयस्तु–'द्वयोरेकपिण्डदानं लौगाक्षिवचनं चा*पद्विषयम् । पृथक्पिण्डदानं तु मुख्यः कल्पः' । तदाह वृद्धपराशरः—

आरुह्य भर्तुश्चितिमङ्गना या प्राप्नोति मृत्युं खलु सत्त्वयुक्ता।
एकादशाहे तु तयोर्विधेयं श्राद्धं पृथक् स्वर्गमपेक्ष्य सद्भिः॥

तैकवचनस्योपादेयगतसाहित्यस्य च विवक्षितत्वात्तृतीयान्तेन साङ्गभावनोपादानादेकस्यां पौर्णमास्यामेकस्याममावास्यायां च साङ्गानां सहितानां त्रयाणां प्रधानानां विधानेऽपि स्वरूपतः प्रधाने साहित्यासम्भवादङ्गे तत्पर्यवसानवदिहापि लौगाक्षिणा विहितः समासः प्रधानेऽसम्भवन् अङ्गे पाकादौ पर्यवस्यति । यत्र प्रधानानां प्रयोगप्रांशुभावभङ्गकल्पने विशेषतो नियामकमुपलभ्यते, तत्रैव केवलाङ्गतन्त्रोपगमात् । प्रकृते च गार्ग्यादिवचनसत्त्वे एव लौगाक्षिवाक्यसत्त्वात् । अत एव चित्रासौर्यादावङ्गतन्त्रमपि न, प्रधानभेदेन प्रयोगप्रांशुभावस्योभयत्रापि भङ्गात् । संक्रान्तियुगादिमन्वादिव्यतीपातश्राद्धेषु तु अङ्गानां च तन्त्रमेव भिन्नप्रयोगविधिपरिगृहीतत्वेऽपि अगृह्यमाणविशेषात् । यत्राङ्गानां बहुत्वाल्पत्वकृतविशेषग्रहणं तत्र महताऽल्पस्य प्रसङ्गसिद्धिः । यथाऽमाश्राद्धेन संक्रान्तियुगादिव्यतीपातश्राद्धानाम् । सङ्कल्पवाक्ये च तन्त्रस्थले तन्त्रिणां सर्वेषामुल्लेखः, प्रसङ्गे तु तन्त्रिणोऽमाश्राद्धस्यैव न तु प्रसङ्गिनः संक्रान्त्यादिश्राद्धस्येत्यलं प्रसक्तानुप्रसङ्गेन । *पाकादीति । आदिना विश्वेदेवादिग्रहः । पृथक्श्राद्धं ब्राह्मणपिण्डयोर्भेदः । एतन्मते च प्रधानसमासपक्षो नास्ति । ये तु पुनः पक्षद्वयं वदन्ति तदनुसारेणाह—*पृथ्वीचन्द्रेत्यादि । प्रधानसमासपक्षानुपगमे लौगाक्ष्युक्तं नवश्राद्धपार्थक्यं न सङ्गच्छते,

---

(१) 'कुर्यात्' नास्ति क० छ० ।

एकत्वमिच्छन्ति मतिप्रहीणा एकादशाहादिषु ये नृनार्योः ।
ते स्वर्गमार्गं विनिहत्य कुर्युः स्त्रीसत्वघातान्नरकाधिवासम् ॥
भर्त्रा सह मृता या तु नाकलोकमभीप्सती ।
साहँच्छ्राद्‌ध्वं पृथक्पिण्डान् नैकत्वं तु स्मृतं तयोः ॥
पृथगेव हि कर्तव्यं श्राद्धमेकादशाहिकम् ।
यानि श्राद्धानि सर्वाणि तान्युक्तानि पृथक्पृथक् ॥ इति ।
विश्वादर्शेऽपि—

मातुर्गयाष्टकावृद्धिमृताहेषु महालये ।
श्राद्धं कुर्यात्पृथग्दैवं तन्त्रं चानुगतावपि ॥
एकचित्यां समारुह्य मृतयोरेकबर्हिषि ।
पित्रोः पिण्डात्पृथग्दद्यात्पिण्डं स्वापत्सु तत्सुतः ॥

इत्यग्निस्मृतेरित्याहुः । यत्तु षट्त्रिंशन्मते—

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।
न पृथक् पिण्डदानं तु तस्मात्पत्नीषु विद्यते ॥ इति,

तद्दर्शादिपरम् । चन्द्रप्रकाशेऽपि--

एकचित्यां समारूढौ दंपती प्रमृतौ यदि ।
पृथक् श्राद्धं प्रकुर्वीत पत्युरेव क्षयेऽहनि ॥
*मृतानामपि भृत्यानां भार्याणां पतिना सह ।
*पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः ॥
तन्त्रेण श्रपणं कृत्वा श्राद्धं स्वामिक्षयेऽहनि ।
तृतीयस्य ततः कुर्यात्संनिपातेष्वयं क्रमः ॥ इति ।

सहगमने सर्वत्र श्राद्धार्थमेकपाक इत्याह मदन"

तस्य सहजतः सिद्धत्वादिति । तत्पक्षमुपेत्येदम् । *आपद्विषयमिति । नवश्राद्धं युगपत्समापयेदिति चापत्परमेवेति बोध्यम् । प्रसङ्गादाह-*मृतानामपीति । *पूर्वकस्येति ।

एककाले गतासूनां बहूनामथवा द्वयोः ।

रत्ने प्रचेताः—

एकचित्यां समारूढौ म्रियेते दम्पती यदि ।
तन्त्रेण श्रपणं कुर्यात्पृथक् पिण्डं (१)समावपेत् ॥

पृथ्वीचन्द्रोदयेऽप्येवम् । अत्र भर्तुराशौचमध्येऽन्यदिने (२)ऽनुगमनेन स्त्रीमरणे पतिमरणदिनगणनयाशौचपिण्डदानैकादशाहादि कार्यम् । नात्र पक्षिणीवृद्धिः,

मृतं पतिमनुव्रज्य पत्नी चेदनलं गता ।
न तत्र पक्षिणी कार्या पैतृकादेव शुद्ध्यति ॥
पुत्रोऽन्यो वाग्निदस्तस्यास्तावदेवाशुचिस्तयोः ।
नवश्राद्धं सपिण्डं च युगपत्तु समापयेत् ॥

इति षडशीतिमतात् ।

यदा नारी विशेदग्निं प्रियस्य प्रियवाञ्छया ।
तदाशौचं विधातव्यं भर्त्राशौचक्रमेण हि ॥

इति लघुहारीतोक्तेश्च । भर्त्राशौचोत्तरमन्वारोहणे तु त्र्यहमाशौचम् ।

ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रतः ॥

इति ब्राह्मोक्तेरिति पृथ्वीचन्द्रापरार्कौ । एतदन्वारोहणे एव नत्वेकचितौ । ऋग्वेदवादः 'इमा नारीरविधवाः' इत्यादिः । एतत्सवर्णापरमित्यन्ये ।

स्मार्तगौडास्तु—

देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम् ।

तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्पृथक् पृथक् ॥

इति पूर्वश्लोकः । इदं च भृगोर्वाक्यद्वयम् । अन्येषामपि एककाले मृतानां सांवत्सरिकाणां क्रमस्य प्रयोगभेदाख्यस्य पृथ-

---

(१) 'समाचरेत्' क० छ० । (२) 'ऽनुगमनेन' नास्ति ग० ।

इत्युपक्रम्य, ब्राह्मे–'त्र्यहाशौचे तु निर्वृत्ते' इत्युक्तेर्भर्त्राशौचोत्तरमन्वारोहणे त्र्यहः, सहगमने तु पूर्णं दशाहादि । पिण्डास्तु दशापि सहैव । तथाच जनकशूलपाणिशुद्धितत्त्वधृतव्यासः–

संस्थितं पतिमालिङ्ग्य प्रविशेद्या हुताशनम् ।
तस्याः पिण्डादिकं ज्ञेयं क्रमशः पतिपिण्डवत् ॥
अन्विता पिण्डदानं तु यथा भर्तुर्दिनेदिने ।
त(१)दन्वारोहिणी यस्मात्तस्मात्सा नात्मघातिनी ॥

इति विष्णूक्तेश्च । पृथक्चितौ तु भर्त्राशौचमध्ये तदूर्ध्वं वा सत्यां त्र्यहेण दशपिण्डाः,

अन्वितायाः प्रदातव्या दशपिण्डास्त्र्यहेण तु ।
स्वाम्याशौचे व्यतीते तु तस्याः श्राद्धं प्रदीयते ॥

इति तत्रैव पैठीनसिस्मृतेः । भर्त्राशौचोत्तरं मृतौ तु चतुर्थेऽह्नि श्राद्धम् । शूलपाणिना त्विदमग्निपुराणीयत्वेनोक्तम्–युद्धहतस्य सद्यःशौचे त्वन्वारोहणे त्रिरात्रम् । एकचितौ तु 'संस्थितं पतिम्' इति प्रागुक्तव्यासोक्तेः सद्यःशौचमित्याहुः । अन्यसपिण्डाशौचमध्ये वि(२)देशमृतान्वारोहणं त्वनाशङ्क्यमेव, शुचिताया अङ्गत्वात् । अन्ये तु रजोवत्याः सूतिकायाश्चानुगमननिषेधादितराशौचस्यानिषेधः । अन्यथा प्रत्यक्षभर्तृमरणे का गतिरित्याहुः । तन्मूलवचनं विना चिन्त्यमेव । स्मृत्यर्थसारेऽपि–'सहगमने सर्वत्र श्राद्धपिण्डादौ पाकैक्यं का(३)लैक्यं कर्त्रैक्यं चेति' । या तु पतिमुद्दिश्याऽन्यकालेऽन्यतिथावन्वारूढा तस्याः श्राद्धं तत्क्षयतिथौ कार्यं न भर्तृतिथौ,

---

(१) 'तदर्थारोहिणी' क० ।   (२) 'विदेवमृत' नास्ति क० छ ।
(३) 'कालैक्यं' नास्ति क० ।

पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ।

इति स्कान्दात्, 'तिथिरेकैव जायते' इत्यादिवचनाच्चेतिमदनरत्नपारिजातपृथ्वीचन्द्रादयः । अन्ये तु तस्याः पतिमरणेन मृतप्रायत्वात्,

सहाग्रतः पृष्ठतो वा तद्भक्त्या म्रियते यदि ।
तस्याः श्राद्धं प्रदातव्यं पृथक् पत्युः क्षयेऽहनि ॥

इति स्मृत्यन्तरात् ।

अग्रतः पृष्ठतो वापि तद्भक्त्या म्रियते यदि ।
तस्याः श्राद्धं सुतैः कार्यं पत्युरेव क्षयेऽहनि ॥

इति पुराणसमुच्चयाच्च भर्तृतिथावेवेत्याहुः । अत्र *मूलं चिन्त्यम् । अत्र विशेषो हेमाद्रौ स्मृत्यन्तरे—

माता मङ्गलसूत्रेण म्रियते यदि तद्दिने ।
उद्दिश्य विप्रपङ्क्तौ तां भोजयेच्च सुवासिनीम् ॥

अथ श्राद्धसंपाते निर्णयः । अत्र पित्रोर्मृततिथ्येक-

कत्वस्यैवाहत्यविधानं पाकमात्रं तन्त्रमित्यर्थः । *मूलमिति । अत्र वदन्ति—लौगाक्षिणा सामान्यतस्तिथिभेदे तदभेदे वाऽन्वारोहणे सति दम्पत्योर्मृततिथिनिमित्तके श्राद्धे समासो विधीयते, अविशेषप्रवृत्तस्यैकतिथिगतानुगमनमात्रविषयत्वरूपसङ्कोचे मानाभावात्, लघुभूतमृताहश्राद्धत्वरूपोद्देश्यतावच्छेदकसम्भवे गुरुभूतैकदिनमृताहश्राद्धत्वरूपस्य तस्यायुक्तत्वाच्च । यत्तु भिन्नतिथिनिमित्तकयोरेकाहाप्राप्तेर्न साहित्यं विधातुमर्हमिति । तन्न, अभ्युदितेष्टौ सह श्रपयतीति सहत्वमात्रविधानादर्थादप्राप्तं दध्यंशे श्रपणमिवेहापि साहित्यविधानात्तदन्यथाऽनुपपत्त्याऽर्थादेककालत्वमाक्षेपात् । नन्वेवं विनिगमनाविरहात् पत्नीमृताह एव भर्त्तुः श्राद्धं स्यात् तावताऽप्येककालत्वाऽबाधात् ? मैवम्, अन्वारूढाया भर्तृमरणसमानकालीनमरणप्रतिपादकार्थनिश्चयात् । "यस्य न श्रूयते" इत्या-

त्वे *मरणक्रमेण दर्शे वर्गद्वयवत्तन्त्रेण श्राद्धं कुर्यात् । पौर्वापर्याज्ञाने तु पितृपूर्वकं कुर्यादिति हेमाद्रिः । माधवादयस्तु—

पित्रोः श्राद्धे समं प्राप्ते नवे *पर्युषितेऽपि वा ।
पितृपूर्वं सुतः कुर्याद*न्यत्रासंनियोगतः ॥

इति कार्ष्णाजिनिस्मृतेः । सर्वत्र पितृपूर्वं भिन्नप्रयोगमाहुः । पार्वणैकोद्दिष्टयोः संपाते माधवीये जाबालिः—

*यद्येकत्र भवेयातामेकोद्दिष्टं च पार्वणम् ।
पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत् ॥

गृहदाहादिना युगपन्मरणे भृगुः—

एककाले गतासूनां बहूनामथवा द्वयोः ।
तन्त्रेण श्रपणं कृत्वा कुर्याच्छ्राद्धं पृथक्पृथक् ।
पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः ।
तृतीयस्य ततः कुर्यात्संनिपातेष्वयं क्रमः ॥

ऋष्यशृङ्गः—

भवेद्यदि सपिण्डानां युगपन्मरणं तदा ।
संबन्धासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत् ॥

गारुडे—

एकेनैव तु पाकेन श्राद्धानि कुरुतेऽत्र हि ।
विकिरं त्वेकतः कुर्यात् पिण्डान् दद्यात्पृथक्पृथक् ॥

अत्रानुगमने च दाहसपिण्डनादौ विशेषं वक्ष्यामः । अत्रिः—

दौ दाहदिने आहार्यमरणनिश्चयवद्भर्तृमृताहे अर्थवादेभ्य आहार्यमरणनिश्चयाद्वा "शंय्वन्ता प्रायणीया सन्तिष्ठते" इत्यादौ प्रथमोपस्थितेराद्यशंयुवाकान्तत्ववद्भर्तृमृताहे अर्थात्तिथेः प्राथम्यात्तत्रैव साहित्यस्यौचित्याद्वेत्यन्यत्र विस्तर इति । *मरणक्रमेणेति । "पूर्वकस्य मृतस्यादौ" इत्युत्तरवचनात् । *पर्युषिते चिरन्तने । *अन्यत्र मातापितृभिन्ने । *यद्येकत्रेति । यद्यपि एकोद्दिष्टकालात्पार्वण-

बहूनामथवा द्वाभ्यां श्राद्धं चेत्स्यात्समेऽहनि ।
तन्त्रेण श्रपणं कृत्वा पृथक् श्राद्धानि कारयेत् ॥

पुलस्त्यः--

महालये गयाश्राद्धे गतासूनां क्षयेऽहनि ।
तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात् पृथक्पृथक् ॥

*इदं च पृथक्पाकेन भिन्नश्राद्धाशक्तौ(१) । पृथक्पाकेन संबन्धासत्त्या श्राद्धभेदस्तु मुख्यः पक्षः,

एकत्रैव दिने श्राद्धद्वयं प्राप्तं यदा तदा ।
चरेदेव पुरा वर्षात् पितुर्मातुश्च तत्सुतः ॥
एकस्मिन्यः करोत्यह्नि द्वयोः श्राद्धं यदा द्विजः ।
तदा पूर्वमृतस्यादौ कृत्वा स्नात्वा यथाविधि ॥
पश्चात् पश्चान्मृतस्यैव पृथक्पाकैः समाचरेत् ।
नैकस्मिन् दिवसे श्राद्धं त्रयाणां कुत्रचिद्द्विजः ॥
एकः कुर्यात्तथा प्राप्ते अन्यो भ्राता समाचरेत् ।
भ्रातर्यविद्यमाने तु तत्परेऽह्नि समाचरेत् ॥
अन्यथा श्राद्धहन्ता स्याच्छ्राद्धसंकरकृद्भवेत् ॥

इत्याश्वलायनोक्तेरिति पृथ्वीचन्द्रः ।

कात्यायनः—

*द्वे बहूनि निमित्तानि जायेरन्नेकवासरे ।
नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात् ॥

जाबालिः—

श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने ।
नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयम् ॥

कालः परस्तथापि एतद्वचनादेवैकोद्दिष्टं परं कार्यमित्यर्थः । *इदं चेति । पृथ्वीचन्द्रमतम् । आश्वलायनस्मृतेर्विगीतत्वात्पाकाभेदो-

---

(१) इतउत्तरं 'श्राद्धे सपिण्डसम्प्राप्ते पिण्डहीने तु वै यदा । श्राद्धं कृत्वा सपिण्डं तु पिण्डहीनमथाचरेत् ॥ सपिण्डं पिण्डसहितमित्यर्थः' इत्यधिकं क पुस्तके ।

कालादर्शे-

*नित्यदार्शिकयोश्चोदकुम्भमासिकयोरपि ।
दार्शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः ॥
दार्शिकस्य च मन्वादेः संपाते श्राद्धकर्मणः ।
प्रसङ्गादितरस्यापि सिद्धेरुत्तरमाचरेत् ॥

अस्य देवताभेदेऽपवादमाह स एव-

नित्यस्य चोदकुम्भस्य नित्यमासिकयोरपि ।
(द(१)र्शस्य चोदकुम्भस्य दर्शमासिकयोरपि ॥)
नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि ।
युगाद्याब्दिकयोश्चैव मन्वाद्याब्दिकयोस्तथा ॥
प्रत्याब्दिकस्य चालभ्ययोगेषु विहितस्य च ।

पगमाच्चारुचिः । *द्वे बहूनीति व्याख्यातम् । *नित्येति । अत्र युगादिमन्वादिश्राद्धाभ्यां दर्शश्राद्धस्य प्रसङ्गसिद्धिरयुक्तैव दार्शिकस्य बहुलविधानेन तेनैव युगादिश्राद्धसिद्धेर्युक्तत्वात् । यत्र त्वान्वष्टक्यादौ नवदैवत्येन केवलपित्रादीनां देवतात्वं तत्रान्वष्टक्यादिना मासिकाब्दिकयोः प्रसङ्गसिद्धिः । एवं सपिण्डकेन दार्शिकेन तदभावाङ्गकस्य संक्रान्त्यादिश्राद्धस्य यद्यपि न प्रसङ्गः सम्भवति विरोधात्, तथापि पिण्डदानस्यापि पर्युदासेन तदभावस्य सक्रान्त्यादावङ्गत्वाभावेनाविरोधात् । नच प्रकृतौ पिण्डदानं प्राप्तम् ।

अयनद्वितये श्राद्धविषुवाद्वितये तथा ।
संक्रान्तिषु च सर्वासु पिण्डनिर्वपणादृते ॥

इति विकृतौ तन्निवृत्तिरिति संनिधानाभावात्तदेकवाक्यत्वाभावेन पर्युदासाभावात् "न तौ पशौ करोति" इति निषेधाङ्गीकारे तु विकल्पापत्तिरिति वाच्यं, पिण्डदानप्राधान्यस्य प्रतिपादितत्वात्सं-

---

(१) इदमर्धं नास्ति क० छ० ।

सम्पाते *देवताभेदाच्छ्राद्धयुग्मं समाचरेत् ॥
निमित्तानियतिश्चात्र पूर्वानुष्ठानकारणम् ।
पित्रोस्तु पितृपूर्वत्वं सर्वत्र श्राद्धकर्मणि ॥

माधवीये स्मृतिसङ्ग्रहे—

काम्यतन्त्रेण नित्यस्य तन्त्रं श्राद्धस्य सिध्यति ।

अथ श्राद्धाङ्गतर्पणम् । पारिजाते पृथ्वीचन्द्रोदये च गर्गः—

पूर्वं तिलोदकं कृत्वा अमाश्राद्धं तु *कारयेत् ।
प्रत्यब्दे न भवेत्पूर्वं परेऽहनि तिलोदकम् ॥
पक्षश्राद्धे *हिरण्ये च अनुव्रज्य तिलोदकम् ।

नच नित्यतर्पणस्यैवायं परेद्युरुत्कर्षः, नतु श्राद्धाङ्गतर्पणमस्तीति वाच्यम्,

यस्तर्पयति तान् विप्रः श्राद्धं कृत्वा परेऽहनि ।
पितरस्तेन तृप्यन्ति न चेत्कुप्यन्ति वै भृशम् ॥

क्रान्तौ श्राद्धं कार्यमिति विधिनैव तत्प्राप्तेः सन्निधाने पर्युदासोपपत्तेः। *देवताभेदात् । उदकुम्भमासिकाब्दिकेष्वपत्नीकाः पित्रादयः अन्यत्र सपत्नीका इति देवताभेदः, नित्यदार्शिकयोः षड्दैवत्यत्वान्मासिकैकोद्दिष्टयोरेकोद्दिष्टत्वाद्देवताभेदः, नित्यदार्शिकयुगादिमन्वादिप्रभृतीनामलभ्ययोगनिमित्तानां षड्दैवत्यत्वात्प्रत्याब्दिकस्य त्रिदैवत्यत्वादेकोद्दिष्टत्वाद्वा देवताभेदः, अतस्तत्र तन्त्रप्रसङ्गौ नेत्यर्थः । *कारयेदिति । णिजविवक्षितः । कुर्यादित्यर्थः "एतयाऽन्नाद्यकामं याजयेत्" इतिवत् । *हिरण्ये हिरण्यश्राद्धे। अत्र चत्वारि वाक्यानि । प्रथमवाक्ये च तिलोदकविशिष्टममाश्राद्धं विधीयते । नत्वमाश्राद्धे तर्पणोत्तरकालः । तद्विधिश्च "पुरस्तादुपसदां प्रवर्ग्येण चरन्ति" इत्यादीनामेव दृष्टः, स्वतन्त्राणां वा "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यादीनां च । न च कस्यचित्प्रधानस्यान्याङ्गोत्तरकालता दृष्टा। न च "एतया पुनराधेयसंमि-

इति गर्गेण *फल(१)निन्दार्थवादाभ्यामङ्गत्वेनोक्तेः । श्राद्धप्रक्रमाद्वार्षिकम् । बृहन्नारदीयेप्याब्दिकं प्रक्रम्य-

परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् ।
तस्य ते पितरः क्रुद्धाः शापं दत्त्वा व्रजन्ति हि ॥

*पितृशब्दश्च श्राद्धेज्यवर्गपरः । तेन तर्पणस्य

तयेष्ट्या इष्ट्वाऽग्निहोत्रं जुहोति'' इत्यत्र अग्निहोत्रस्य ज्योतिष्टोमाङ्गभूतोदवसानीयोत्तरकालता दृष्टेति वाच्यं, तत्रावभृथोत्तरं दीक्षोन्मोके अग्निहोत्रे प्राप्ते उदवसानीयोत्तरत्वमवधिमात्रं समर्प्यते नतु तदुत्तरकालोऽङ्गम् । अन्यथा कदाचिदुदवसानीयायामकृतायामनुपादेयकालस्यात्याज्यत्वादग्निहोत्रानुष्ठानप्रसङ्गात् । नच काम्यदृष्टचरमप्यत्रैवाङ्गीक्रियते इति वाच्यं, तथा सति दूरस्थश्राद्धानुवादेन कालस्य विधातुमशक्तेः प्रकरणान्तरेणामावास्या श्राद्धं भिद्येत, गर्गस्मृतावमास्याश्राद्धविध्यदर्शनात् । तत्सत्त्वे वा तस्य प्रयोगविधित्वात् । अतो गर्गस्मृतावमावास्याश्राद्धमात्रं विधीयते इति स्वीकार्यम् । किञ्च श्राद्धविध्यभावे कालमात्रविधानोपगमे वृद्धिश्राद्धे सपिण्डे चेत्याद्यपवादासङ्गतिः, प्राप्त्यभावेन निषेधाप्रवृत्तेः, निषेधस्य प्राप्तिपूर्वकत्वादिति । तस्य प्रकृतित्वेन प्रत्यब्दे प्राप्ते तिलोदके परेऽहनीति कालमात्रविधिः "आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति" इतिवत् "प्रत्यब्दे न भवेत्पूर्वम्" इति त्वनुवादः । एवमग्रेऽपि । *फलेति । नह्यन्यप्रकरणेऽन्यस्य फलं निन्दा वा सम्भवति युज्यते वेति भावः । ननु अनङ्गं तर्पणं कुतः कर्त्तव्यं किञ्च पितृशब्दः जनकपुरुषपरो जनकपरो वेति भ्रात्रादिवार्षिके तद्-

---

(१) यथा पशुपुरोडाशयोर्दैवतैक्यं तथैव श्राद्धतर्पणयोरपीति भावः । तद्वत् । तथा 'सूक्तवाकाय प्रस्तरं प्रहरति' इति विशेषतः कथितानामग्न्यादीनामेव सूक्तवाकत्वेन सामान्यतः कथनात्सूक्तवाकायेति चतुर्थ्यैष्टदेवतात्वावगमाच्च यथा प्रस्तरप्रहरणस्येष्टदेवतासंस्कारकत्वं तद्वद्दृष्टपित्रादीनामपि संस्कारतयाङ्गत्वमिति ज्ञेयम् ।

*पशुपुरोडाशयागवत् *प्रस्तरप्रहरणवच्चेष्टदेवतासंस्कारकता। *तेनाब्दिकादिने नित्यं स्वपित्रादितर्पणं कार्यमेव, श्राद्धाङ्गभूतस्यैव परेद्युरुक्तेः। तदुक्तम्—

प्रत्यब्दाङ्गं तिलं (१)दद्या*न्निषेधेऽपि परेऽहनि।
वर्गैकस्य वचो येषामन्येषां तु विवर्जयेत्॥

क्वचिद्विशेषमाह गर्गः—

कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्।
पितॄणां प्रत्यहं कार्यं निषिद्धाहेऽपि तर्पणम्॥

तर्पणं तिलतर्पणम्, निषिद्धाहेऽपीत्युक्तेः।

सकृन्महालये स्वः स्यादष्टकास्वन्त एव हि।

अत्र सप्तमीनिर्देशात् आङ्गिता स्फुटैव। तत्र जयान् जुहुयात् मन्द्रं प्रापणीयायां मन्द्रं प्रातःसवने इत्यादिवत्। अस्यापवादो बृहन्नारदीये—

वृद्धिश्राद्धे (२)सपिण्ड्यां च प्रेतश्राद्धेऽनुमासिके।

नुपपत्तिरत आह-*पितृशब्दश्चेति। *पशुरिवेति। यद्दैवत्यः पशुस्तद्दैवत्यः पुरोडाश इतिवच्छ्राद्धं यद्दैवत्यं तद्दैवत्यमेव तर्पणमित्यर्थः। ननु तत्र विशिष्य देवताभिधानात्तथेत्यतः सामान्यविशेषभावेन देवताभिधाने एकदैवत्ये दृष्टान्तमाह-*प्रस्तरेति। "सूक्तवाकाय प्रस्तरं प्रहरति" इति विशिष्याभिहितानामेवाग्न्यादीनां सूक्तवाकत्वेन सामान्येनाभिधानाच्चतुर्थ्या इष्टदेवतात्वलाभात् प्रस्तरप्रहरणस्येष्टदेवतासंस्कारकतावत्तर्पणस्यापि इष्टानां पित्रादीनां देवतानामेव संस्कारतयाऽङ्गत्वमित्यर्थः। *तेनेति। नित्यतर्पणस्योत्कर्षाभावेनेत्यर्थः।

पित्रोः क्षयाहे संप्राप्ते यः कुर्यान्नित्यतर्पणम्।
आसुरं तर्पणं प्रोक्तं तत्तोयं रुधिरं भवेत्॥

इति तु तिलतर्पणपरमिति भावः। *निषेधेऽपीति। भानौ भौमे त्रयोदश्यामित्यादिर्निषेधः पूर्वोक्तः।

---

(१) 'दद्यान्निषिद्धेऽपि' ग०   (२) 'सपिण्डे च' क० छ०

संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥

तदयमर्थः-दर्शे विप्रनिमन्त्रणोत्तरं *पाकारम्भोत्तरं वा श्राद्धप्रयोगस्यारब्धत्वात् ब्रह्मयज्ञोत्तरं नित्यतर्पणेनैव श्राद्धाङ्गतर्पणस्य *तन्त्रेण *प्रसङ्गेन वा सिद्धिः । *ततः पूर्वं वैश्वदेवोत्तरं वा ब्रह्मयज्ञकरणे श्राद्धाङ्गतर्पणं *पृथक्कार्यम् । पित्रोर्वार्षिके तु नित्यतर्पणं तिलवर्ज्यं कार्यम्,

*नैव श्राद्धदिने कुर्यात्तिलैस्तु पितृतर्पणम् ।

न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ।

इति लौगाक्षिनिषेधादिरपि मात्राद्याब्दिकेऽपोद्यते इति भावः । कृष्णपदं चाधिकदोषार्थं, तिलमात्रतर्पणस्य प्राप्तेः तन्मात्रनिषेधस्य न्याय्यत्वात् । *पाकारम्भोत्तरमिति त्वभ्युपगमवादः । यत्र ह्यारम्भः श्रूयते तत्र परिभाषासार्थक्याय "श्राद्धे पाकपरिक्रिया" इति प्रवर्त्तते । इह हि आरम्भ एव न श्रूयते इति । *तन्त्रेणेति । अङ्गानां प्रधानानां च विशेषाग्रहे तन्त्रम् । यत्र पित्रादयस्त्रयः मातामहादयस्त्रय एव च मृता नेतरे तत्र तन्त्रम् । यत्रेतरेऽपि मृतास्तत्राह-*प्रसङ्गेनेति । श्राद्धस्य द्व्यहकालत्वे नि(१)त्यतर्पणस्य तत्र मध्यपातित्वात्तेनैव प्रसङ्गसिद्धिः । सद्यस्कालत्वेऽपि एवमेव । अन्याङ्गैरन्याङ्गस्य प्रसङ्गसिद्धेः पशुपुरोडाशादौ दृष्टत्वात् । *ततः पूर्वं निमन्त्रणात्पूर्वम् । *पृथक्कार्यमिति । नित्यस्य प्रयोगानन्तःपातित्वात् । वस्तुतस्तु आरम्भणीयाबृहस्पतिसवादेः क्त्वाप्रत्ययवशात्प्रयोगाबहिर्भूताङ्गत्ववदिहापि क्त्वाप्रत्ययसत्त्वात्प्रयोगबहिर्भूतेन नित्यतर्पणेनैव दार्शिकतर्पणसिद्धिरिति । यत्र च रविवारादौ तिलरहितं तर्पणं तन्त्रप्रसङ्गयोरभावात्पुनः सतिलं तर्पणं कार्यम् । वार्षिकादौ च तन्त्रप्रसङ्गयोरुभयोरप्यभावात्पृथगेव तत्कार्यमिति । *नैवेति । अत्र पूर्वार्धमुत्तरार्धस्तावकं, तावतैव पूर्वेऽह्नि ति-

---

(१) 'तिलतर्पणस्य' च० ।

श्राद्धं कृत्वाऽपराह्णे च तर्पणं तु तिलैः सह ॥

इति वचनात् ।

सप्तम्यां भानुवारे च मातापित्रोर्मृतेऽहनि ।
तिलैर्यस्तर्पणं कुर्यात्स भवेत् पितृघातकः ॥

इति स्मृतिरत्नावल्यां वृद्धमनूक्तेश्च । अत्र नित्यतर्पणे तिलमात्रनिषेधो नतु तर्पणस्य, तिलैरित्यस्य वैयर्थ्यापत्तेः । यत्तु कातीयम्—

उपरागे *पितुः श्राद्धे पातेऽमायां च संक्रमे ।
निषिद्धेऽपि हि सर्वत्र तिलैस्तर्पणमाचरेत् ॥ इति,

तत् परेद्युः श्राद्धाङ्गतर्पणविषयमिति केचित् । श्राद्धाशक्तस्य तत्स्थानापन्नतर्पणविषयमिति युक्तम् । सकृन्महालये परेद्युस्तर्पणम् । अष्टकासु तु *सप्तम्यष्टमीश्राद्धयोरन्ते तदैव वर्गद्वयस्य । अन्वष्टक्ये तु मातृवर्गस्यापि । *तीर्थश्राद्धे दर्शवत् । *(३)माघ्यावर्षादिष्वष्टकावदन्ते । अनेकश्राद्धसंपाते तु यदि तत्प्रसङ्गासिद्धिस्तदा तदीयमेव तर्पणम् । तन्त्रत्वे तु श्राद्धसमसंख्यत्वे आदावन्ते वा । विषमसंख्यायां बह्वनुरोध इति । तस्माच्छ्राद्धाङ्गतर्पणं सिद्धम् ।

*तद्विधिः संग्रहे—

स्नात्वा तीरं समागत्य उपविश्य कुशासने ।
तर्पयेत पितॄन् सर्वान् स्नात्वा वस्त्रं च धारयेत् ॥

लपर्युदाससिद्धेः । *पितुरिति मातुरुपलक्षणम् । *सप्तमीति । सप्तम्यन्वष्टक्ययोः स्वातन्त्र्यमते अष्टकाङ्गत्वमते तु दर्शविकृतित्वे पूर्वमेव तर्पणम् । तदभावे तर्पणं नैव कार्यम् । *तीर्थेति दर्शविकृतित्वात् । *माघ्यावर्षेति । अष्टकाविकृतित्वात् ।

---

(३) 'मघान्वष्टकादिष्वष्टका' ग०

तर्पणोत्तरं*नित्यस्नानं कृत्वेत्यर्थः ।

अपसव्यं ततः कृत्वा सव्यं जान्वाच्य भूतले ।
नामगोत्रस्वधाकारैर्द्वितीयान्तेन तर्पयेत् ॥

अत्र वस्वादिरूपतोक्ता स्मृत्यर्थसारे—

वसुरुद्रादितिसुतान् श्राद्धार्थे तर्पयेत् पितॄन् ।

तच्च बह्वृचानां *दक्षिणेनैव, (१)'दक्षिणं प्रतीया-

*तद्विधिरिति । परेद्युरित्यादि । *नित्यस्नानमिति । अत्राद्यं स्नानममन्त्रकम् । द्वितीयं तु नित्यस्नानम् । तथाचादौ तूष्णीं स्नात्वा कुशेषूपविश्य श्राद्धाङ्गं तर्पणं कृत्वा पश्चान्नित्यस्नानं कृत्वा वस्त्रधारणादि कुर्यादित्यर्थः । एवञ्चेदं संध्यामकृत्वैव कार्यम् । बहवस्तु तथैवानुतिष्ठन्ति । मयूखकृतस्तु श्राद्धाङ्गतर्पणं संध्यां कृत्वैव कार्यं तां विनाऽन्यकर्मणि अनधिकारात्, "सन्ध्याहीनोऽशुचिर्नित्यम्" इति दक्षोक्तेः । नच तर्पणान्तं श्राद्धप्रयोगानुवृत्तेः कथं सन्ध्यानुष्ठानम् ? एवं सति श्राद्धानन्तरं सायंसन्ध्याननुष्ठानप्रसङ्गात् । तर्पणोत्तरं च पुनः स्नानं कार्यं सङ्ग्रहवाक्ये स्नात्वेति पुनर्ग्रहणात् । तच्चानायत्याऽदृष्टार्थम् । अत्र च स्नानसन्ध्यादीनां सर्वकर्मार्थत्वेनोपवेशनस्य सामान्यतश्च प्राप्तेरदग्धदहनन्यायेन कुशास्तरणं तर्पणोत्तरस्नानं च विधीयत इति प्राहुः । *दक्षिणेनैवेति ।

अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ।
सव्योत्तराभ्यां पाणिभ्यामथवा तर्पणं भवेत् ॥

इति वचनात् । अत्र पूर्वार्धं बह्वृचपरं, सौत्रं दक्षिणपाणिमालम्ब्यान्वारम्भमात्रविधाने लाघवात् । उत्तरार्धं तु तदन्यपरम् ।

---

(१) 'अनादेशे दक्षिणं प्रतीयात्' ग०

दनादेशो' इति सूत्रात् । अत्र *प्रत्यञ्जलि मन्त्रावृत्तिः ।

---

*प्रत्यञ्जलीति । अञ्जलिसङ्ख्यायां शङ्खः—

एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः ।
अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम् ॥

पैठीनसिः—

तिलोदकाञ्जलींस्त्रींस्त्रीनुच्चैरुच्चैर्विनिक्षिपेत् ।

पित्रञ्जलिभ्यः पितामहाञ्जलयः किञ्चिदुच्चैः ततोऽपि प्रपितामहाञ्जलयः । एवं मातृवर्गे मातामहवर्गे चेत्यर्थः । शालङ्कायनः-

मातृमुख्यास्तु यास्तिस्रस्तासां दद्याज्जलाञ्जलीन् ।
त्रींस्त्रीन्दद्यादथान्यासां स्त्रीणामेकैकमञ्जलिम् ॥

काशीखण्डे —

सपत्न्याचार्यपत्नीनां द्वौद्वौ दद्याज्जलाञ्जली ।

सपत्नी सापत्नमाता । आचार्यस्य पत्नी चेत्यर्थः । व्यासः-

मातॄर्मातामहांस्तद्वत्त्रींस्त्रीनेव त्रिभिस्त्रिभिः ।
मातामहाश्च येऽप्यन्ये गोत्रिणो दातृवर्जिताः ॥
तानेकाञ्जलिदानेन प्रत्येकं च पृथक् पृथक् ॥ इति ।

मातामहीनामञ्जलित्रयमेकाञ्जलिर्वेति विकल्पः,

मातामह्यादिसर्वासामेकैकं तु जलाञ्जलिम् ।
दद्यात्तीर्थे विशेषेण धर्मं परममास्थितः ॥

इति गारुडात् । अन्ये तु मातामह्यादीत्यतद्गुणसंविज्ञानबहुव्रीहिणा मातामह्यादिभिन्नानामेकाञ्जलिः, मातामह्यादीनां तु त्रय एवेत्याहुः । विरूपैकशेषस्य प्रमाणान्तरं विना असम्भवान्मातामह्यादीनामेक एवाञ्जलिरिति तु ग्रन्थकारानुयायिनः । अथवा मातामहस्य द्वावञ्जली,

द्वौद्वौ मातामहानां च मातुलानां सकृत्तथा ।

इति हेमाद्रौ ब्रह्माण्डात् । इतरेषां तु ब्रह्माण्डे-

*निर्वापवत्तत्संध्यार्घ्यदानवच्च द्रव्यभेदात् । *अवघातवेदिप्रोक्षणादौ तु द्रव्यैकत्वान्न मन्त्रावृत्तिः । केचित्तु

गुर्वाचार्यश्वशुराणां सुहृत्संबन्धिनां सकृत् ।

नित्यतर्पणे यद्यपि सर्वे एवैते तथापि श्राद्धाङ्गतर्पणे यद्दैवत्यं श्राद्धं तद्दैवत्यमेवेत्युक्तम् । दक्षः—

प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मनुष्यांस्तर्प्येत पितॄन् दक्षिणतस्तथा ॥

बौधायनः—“अनुतीर्थमप उपसिञ्चति देवानां दैवेन ऋषीणामार्षेण पितॄणां पित्र्येण मनुष्याणां प्राजापत्येन” इति ।

प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत्ततः ।

इति विष्णुपुराणाच्च ।

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥

इति कोशः ।

कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा ॥
अपसव्यं ततः कृत्वा सव्यं जान्वाच्य भूतले ।
नामगोत्रस्वधाकारैर्द्वितीयान्तेन तर्पयेत् ॥ इति ।

प्रकृते च पैत्रः सर्वो विधिर्ग्राह्यः दैवार्षमानुषस्तु द्वारलोपादेव निवर्त्तते । ननु तर्पणमेकं कर्म तत्र करणस्य मन्त्रस्य कुत आवृत्तिरित्यत्राह—*निर्वापेति । नन्वेककर्मणि मन्त्रावृत्त्यङ्गीकारे अवघातादौ तदावृत्तिः स्यादित्यत आह—*अवघातेति । अवहता एव व्रीहयः पुनरवहन्यन्ते प्रोक्षितैव वेदी पुनः प्रोक्ष्यते इति न द्रव्यभेद इत्यर्थः । अत्र वदन्ति—निर्वापे संध्यार्घ्यदाने च मन्त्रस्य द्रव्यसंस्कारकत्वादावृत्तिः “निरुप्तं प्रोक्षति” इति वचनात् ।

कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम् ।

*परिव्याणमन्त्रव*त्क्रियमाणानुवादित्वेन करणत्वाभावात्सकृदिच्छन्ति । तन्न, तत्र यूपद्रव्यैक्यात् परिवीरसीतिकरणीभूतमन्त्रान्तरसत्त्वादन्यतरेण व्यवधानापत्योभयोः करणत्वायोगात् कर्त्रभेदेन विकल्पायोगाच्च क्रियमाणानुवादित्वं नत्वत्र तथेति बौधायनादिवचनात् करणत्वमेव । तेनावृत्तिरेव युक्ता । एवं नित्येपि । यत्तु संग्रहे नाम्ना पठन्ति—

पित्रोः क्षयाहे संप्राप्ते यः कुर्यान्नित्यतर्पणम् ।
आसुरं तद्भवेच्छ्राद्धं तत्तोयं रुधिरं भवेत् ॥
सर्वदा तर्पणं कुर्याद्ब्रह्मयज्ञपुरःसरम् ।
मृताहे नैव कर्तव्यं कृतं चेन्निष्फलं भवेत् ॥

तत्समूलत्वे *सति तिलविषयम् । यच्च पठति

इति व्यासवचनाच्च । नचेह तथा यतो नात्र द्वितीययाऽञ्जलयः संस्कार्याः । धात्वर्थकर्मतया सक्तून् जुहोतीतिवद्द्वितीयोपपत्तेः । नापि मन्त्रोऽञ्जलिसंस्कारः । "मन्त्रैश्च देयमुदकम्" इत्यादिस्मृत्या तृतीयया दानक्रियाङ्गस्यैवोक्तेरञ्जल्यङ्गत्वे मानाभावात् । नापि तर्पणभेदः । द्विस्त्रिरिति क्रियाभ्यावृत्तौ सुज्विधानात्संख्यायाः कर्मसामानाधिकरण्याभावेन भेदकत्वाभावात् । यथा "त्रिः प्रोक्षति" इत्यादौ त्रिरावृत्तिविशिष्टकर्म एकमेव तद्वत् । नच त्रीनित्येकशेषादेकस्मिन्निनयने त्रयाणां मन्त्राणां करणत्वापत्तिः । पशुसोमाधिकरणन्यायेन प्रथमं यागैक्येऽवगते तत्र त्रयाणां मन्त्राणां करणत्वासम्भवादेकैकनिनयने एकैकमन्त्रस्य करणत्वोपगमात् । तस्मादञ्जल्यावृत्तावपि न मन्त्रावृत्तिरिति । *परिव्याणमन्त्रः "युवा सुवासाः" इति मन्त्रः । *क्रियमाणं यूपैकादशिन्यादौ परिव्याणम् । युगपदित्ययं होतृमन्त्रः । "परिवीरसि परित्वा दैवीर्विशो व्ययंतां परीमः रायस्पोषो यजमानं मनुष्या" इति अध्वर्युमन्त्रः । *सति

कपिलः--

मन्वादिषु युगाद्यासु दर्शसंक्रमणेषु च ।
पौर्णमास्यां व्यतीपाते दद्यात् पूर्वं तिलोदकम् ॥
अर्धोदये गजच्छाये *ष(१)ष्ठ्यां चैव महालये ।
भरण्यां च मघाश्राद्धे तदन्ते तर्पणं विदुः ॥

शौनकः—

मातापित्रोर्मृताहे च परेऽहनि तिलोदकम् ।
कारु(२)ण्यश्राद्धविषये सद्यो दद्यात्तिलोदकम् ॥

एतन्निर्मूलम् ॥

अथ तिलतर्पणनिषेधः । गार्ग्यः--

*भानौ भौमे त्रयोदश्यां (३)नन्दाभृगुमघासु च ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥

स्मृत्यर्थसारे--

विवाहव्रतचूडासु वर्षमर्धं तदर्धकम् ।

अर्धं तदेव ।

वृद्धौ सत्यां च तन्मासि नेत्याहुस्तिलतर्पणम् ।

तिलेति । "सप्तम्यां भानुवारे च" इत्युक्तेः । *षष्ठी कपिलाषष्ठी । अत्रोत्प्रेक्षन्ते-"पूर्वं तिलोदकम्" इत्यादिवाक्यानां निर्मूलत्वे एषामपि निर्मूलत्वमेव । समूलत्वे तु तथात्वमिति । ननु उपरागे पितुः श्राद्धे इत्यादौ निषिद्धेपीत्युक्तेर्निषेधं बाधित्वा तिलतर्पणं स्यात् न सकृन्महालयादावित्याशङ्क्य—

तिथिवारसमायोगान्निषेधोऽयमुदाहृतः ।
ऋषिभिस्तर्पणे नित्ये निमित्तेन तु बाधिते ॥

इति वचनान्नैमित्तिकप्राबल्याच्च निषेधबाध इति वक्तुं निषेधाना-

---

(१) 'षष्ठीषु च महा' ग० (२) 'कारुण्याच्छ्राद्ध' ग०

(३) 'नन्दासु च मघासु च' क०

हेमाद्रौ मरीचिः--

सप्तम्यां रविवारे च *गृहे *जन्मदिने तथा ।
निशासंध्यासु पुत्रार्थी न कुर्यात्तिलतर्पणम् ॥

यत्तु संग्रहे--

नन्दायां भार्गवदिने कृत्तिकासु मघासु च ।
भरण्यां भानुवारे च गजच्छायाह्वये तथा ॥
अयनद्वितये चैव मन्वादिषु युगादिषु ।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम् ॥ इति,

*तच्चिन्त्यम् ।

पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः ।

*इत्यादिविरोधात् । अत्रापवादः पृथ्वीचन्द्रोदये-

इ-*मानाविति । *गृहे इति । अयं निषेधः पृथक्कृतिलपरः,

यद्युद्धृतं निषिञ्चेत्तु तिलान्संमिश्रयेज्जले ।
अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः ॥

इति बौधायनदर्शनात् । *जन्मदिने इति । जन्मनक्षत्रोपलक्षणम् । *तच्चिन्त्यमिति । युगादिनिषेधश्चिन्त्य इत्यर्थः । इदं मन्वाद्युपलक्षणम् ,

आसु तोयमपि स्नात्वा तिलदर्भविमिश्रितम् ।
पितॄनुद्दिश्य यो दद्यात्स गतिं परमां लभेत् ॥

इति मन्वादीन्प्रकृत्य नागरखण्डोक्तेः । *इत्यादीति । आदिना—

मन्वाद्यासु युगाद्यासु प्रदत्तः सतिलोऽञ्जलिः ।
सहस्रवार्षिकीं तृप्तिं पितॄणामावहेत्सदा ॥

इति कालादर्शग्रहः । अत्रेदं बोध्यं–पानीयमपीत्यपिना श्राद्धं ग्राह्यम् ,

श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदन्ति ।

तीर्थे *तिथिविशेषे च गयायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम्॥

स्मृत्यर्थसारेऽपि--

तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदा। इति।

गोभिलः--

तिलाभावे *निषिद्धाहे सुवर्णरजतान्वितम्।
तदभावे निषिञ्चेत्तु दर्भमन्त्रेण वा पुनः॥

पतितस्य तिलोदकं वक्ष्यामः॥

अथ वृद्धिश्राद्धम्। *तन्निमित्तं पृथ्वीचन्द्रोदये ब्राह्मे--

*जन्मन्यथो*पनयने विवाहे पुत्रकस्य च।

इति वाक्यशेषात्। तथाच श्राद्धाशक्तस्य तत्स्थानापन्नतर्पणे तिलो विधीयते, नतु नैत्यके। तन्त्रप्रसङ्गयोरभावादेव नैत्यकान्नैमित्तिकस्य पृथगनुष्ठानमपि शक्तं प्रति तु अङ्गभूतायामञ्जलौ मन्वादिषु युगाद्यास्विति कपिलवाक्याद्दर्शविकृतित्वाद्वा सतिलत्वम्। एवं मन्वादिष्वपि, “आसु तोयमपि” इत्यपिशब्दात्। *तिथिविशेषे महालयाष्टकादौ। नच त्रयोदश्यादीनां कुतो न ग्रहः सजातीयेष्वेव विशेषोपादानात्। निषिध्यमानत्वेन साजात्यात्। तीर्थपदादेव गङ्गाप्राप्तेर्गङ्गायामिति सर्वदा तिलप्राप्त्यर्थः। *निषिद्धाहे इति। निषिद्धाहे वा इत्यर्थः।

उपरागे पितुः श्राद्धे पातेऽमायां च संक्रमे।
निषिद्धाहेऽपि सर्वत्र तिलैस्तर्पणमाचरेत्॥
यावन्मासः समाप्येत तावत् पिण्डांश्च वर्जयेत्।
वृद्धावनन्तरं प्राज्ञस्तथैव तिलतर्पणम्॥ इति।

*तन्निमित्तं वृद्धिश्राद्धनिमित्तम्। वृद्धिः पुत्रजन्मेत्याह—*जन्मनीति। पुत्रजन्मनिमित्तकं मुख्यं, कर्माङ्गं तु गौणम्। तच्च नान्दीश्राद्धं तदुभयमपि तदिति केचित्। कर्माङ्गं वृद्धिवत्कृतमिति वृद्ध्यतिदेशात् तत् तदुभयमनुक्रामति जन्मनीति। *उपनय-

पितॄन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्वकम् ॥
*वेदव्रतेषु चाधानयज्ञपुंसवनेषु च।
*नवान्नभोजने *स्नाने ऊढायाः प्रथमार्तवे ॥
देवारामतडागादिप्रतिष्ठासु*त्सवेषु च।
राजाभिषेके बालान्नभोजने वृद्धिसंज्ञकान् ॥
वनस्थाद्याश्रमं गच्छन् पूर्वेद्युः सद्य एव वा।
पितॄन्पूर्वोक्तविधिना तर्पयेत्कर्मसिद्धये ॥

(१)आदिपदात् संन्यासः। विष्णुपुराणे--
यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः।

ने इति। तदन्तापत्यसंस्काराणामुपलक्षणं वेदव्रतस्नानविवाहानामभिधानात्। आधानयज्ञेति श्रौतकर्मणां पुंसवेत्यादि सौत्राणां स्त्रीसंस्काराणां देवारामेत्यादि पौराणानां महादानतडागाद्युत्सर्गव्रतदेवादिप्रतिष्ठानाम्। *वेदव्रतानि महानाम्न्यादीनि। *नवान्नभोजने प्रथमाग्रयणे। *स्नानं समावर्त्तनम्। *उत्सवेष्विति। ग्रहशान्तिविनायकस्नपनादीनां मनुयाज्ञवल्क्यादिस्मृत्युक्तानाम्। नचैवमाचारप्राप्ते फलादिनाऽन्तर्वत्नीकुक्षिमरणादौ विवाहाद्यङ्गहरिद्राचन्दनादौ वा एतत्करणापत्तिः, “तस्य ब्राह्मण्यश्च वृद्धा जीवपत्न्यो यद्यदुपदिशेयुस्तत्तत्कुर्युरिति” “अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान्विवाहे प्रतीयात्” इति सूत्रानुमतत्वादिति वाच्यम्,

कर्मण्यथाभ्युदयिके माङ्गल्ये चातिशोभने।

इति ब्रह्माण्डे ऽतिशोभने इति विशेषणेन तद्व्यावर्त्तनात्। आभ्युदयिकं स्वाभ्युदयार्थं क्रियमाणं राज्याभिषेकग्रहशान्त्यादिमहादानादि। अत एव प्रायश्चित्ते न वृद्धिश्राद्धं तस्य पापनाशार्थत्वेनाऽनाभ्युदयिकत्वात्। माङ्गल्यं गर्भाधानादिनामकर्मादि। नच

---

(१) ‘आदिपदात् संन्यासः’ नास्ति ग०

पु(१)त्रोत्पत्तौ *वृषोत्सर्गे वृद्धिश्राद्धं समाचरेत् ॥

तत्रैव--

नामकर्मणि बालानां चूडाकर्मादिके तथा ।

इत्युक्तेर्निष्क्रमान्नप्राशनयोर्न श्राद्धमिति मैथिलाः । तन्न, पूर्वोक्तविरोधात् 'नानिष्ट्वा' इति निषेधात् ।

सुतोत्पत्तौ तथा श्रा(२)द्धमन्नप्राशनिके तथा ।

इति राजमार्तण्डाच्च । यत्तु छन्दोगपरिशिष्टम्—

सूर्येन्द्वोः कर्मणी ये च तयोः श्राद्धं न विद्यते । इति,

तत्तेषामेवेति कल्पतरुः । बह्वृचकारिकायाम्—

मात्स्ये—

नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेत् ।

कर्मप्रदीपे—

अनिष्ट्वा तु पितॄन् श्राद्धे न कुर्यात्कर्म वैदिकम् ।

इत्यादिसामान्यवचनैर्विवाहादिषु श्राद्धसिद्धेस्तेषां पुनर्वचनमुपसंहारार्थं, तेन विशेषवाक्योपात्तेतरकर्मसु न वृद्धिश्राद्धमुचितमिति वाच्यम् , तथा सति सामान्यवाक्यवैयर्थ्यापत्तेः । यत्र हि शाखान्तरगतत्वेन वा द्वारविशेषसम्बन्धप्रमाणेन वा सामान्यवाक्यमपि सार्थकं भवति तत्रैवोपसंहारो यथा "पुरोडाशं चतुर्धा करोति आग्नेयं चतुर्धा करोति" इत्यादौ । अनारभ्याधीतसाप्तदश्यवाक्यादौ च; नत्विह स्मृतिपुराणादीनां सर्वान्प्रति प्रभागत्वेन शाखान्तरन्यायाभावात् साक्षात्कर्माङ्गत्वेन तस्य चोभयत्रापि नाल्पीयत्वेन साप्तदश्यन्यायाभावाच्च । तस्मात् केषुचित्पुनर्वचनं सामान्यवाक्यस्य प्रपञ्चमात्रं तेष्वत्यावश्यकत्वार्थं वा । अत एवाग्निहोत्रहोमवैश्वदेवादिषु केषांचिद्वृद्धिश्राद्धाचरणं केषाञ्चित्तु नेति ।

*वृषोत्सर्गः काम्यः नतु प्रेतत्वनिवृत्त्यर्थः, तस्य श्राद्धत्वात् ।

---

(१) 'पुत्रजन्मवृषो' क० छ० (२) 'श्राद्धे अन्न' ग०

स्यादाभ्युदयिकं श्राद्धं वृद्धिपूर्तेषु कर्मसु ।
पुंसः सवनसीमन्तचौलोपनयनेष्विह ॥
विवाहे चानलाधेयप्रभृतिश्रौतक(१)र्मसु ।
इदं श्राद्धं प्रकुर्वन्ति द्विजा वृद्धिनिमित्तकम् ॥
अन्यैः षोडशसंस्कारश्रावण्यादिष्वपीष्यते ।
वाप्याद्युद्यापनादौ तु कुर्युः पूर्तनिमित्तकम् ॥

बोपदेवकालादर्शौ—

सीमन्तव्रतचौलनामकरणान्नप्राशनोपायन-
स्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च ।
*पुंसूत्यावसथप्रवेशन*सुताद्यास्यावलोकाश्रम-
स्वीकारक्षितिपाभिषेकदयिताद्यर्तौ च नान्दीमुखम् ॥

यत्तु कामधेनौ —

*पुंसूतिः पुसवनं तनयोत्पत्तेः पृथगभिधानात् । *सुताद्यास्यावलोकेति ।

सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने ॥

इति विष्णुपुराणात् । परन्तु अत्र तद्योग्यतासंपादकं जन्म ग्राह्यम् । सुताद्यास्यावलोकेति च प्रसवाद्यागतेन पित्रादिना जातकर्म चेत्क्रियते तदा जन्मनिमित्तकं श्राद्धमपि कार्यमित्येतद्वक्तुम् । आस्यावलोकेति निमित्तान्तरं प्रदर्शितमित्येतावन्मात्रम् । अत्र पुत्रजनने केवलं नैमित्तिकं जन्मनीत्याद्युक्तेः तत्र कर्माङ्गनिषेधात् । एवञ्च तत्रैकमेव श्राद्धं “कर्माङ्गं वृद्धिवत्कृतम्” इति जातकर्माङ्गश्राद्धमनुक्त्वैव जन्मनिमित्तकश्राद्धदृष्टान्ताभिधानात् ।

वृद्धिश्राद्धं तु कर्त्तव्यं जातकर्मादिकेषु वै ।

इति हेमाद्रिस्थवचनेऽतद्गुणसंविज्ञानो बहुव्रीहिर्वा निमित्तकर्मणोः पदादिभ्यां समाहारो वा कर्त्तव्योष्वित्ति पदाध्याहारो वा बोध्यः।

---

(१) ‘कर्मणी’ ग०

*जलाशयप्रतिष्ठायां वृषोत्सर्गादिकर्मसु।
वत्सराभ्यन्तरे पित्रोर्वृषस्योत्सर्गकर्मणि॥
वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समाचरेत्॥ इति।

तत्र जलाशये वृद्धिश्राद्धस्य निषेधो न तु कर्माङ्गस्येति केचित्।

*अन्ये त्वस्य निर्मूलतामाहुः। श्राद्धकौमुद्यां निर्णयामृते च मात्स्ये—

*अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके।
पुंसवे च निषेके च नववेश्मप्रवेशने॥
देववृक्षजलादीनां प्रतिष्ठायां विशेषतः।
तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्तितम्॥

इदं चावश्यकम्,

वृद्धौ न तर्पिता ये वै पितरो गृहमेधिभिः।
तद्धीनमफलं ज्ञेयमासुरो विधिरेव सः॥

इति शातातपोक्तेः। अत्र श्राद्धत्रयं स एवाह—

*मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम्।
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्॥

तत्कालमाह पृथ्वीचन्द्रोदये गार्ग्यः—

मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकम्।
मातामहं चोत्तरेद्युर्वृद्धौ श्राद्धत्रयं स्मृतम्॥

((१)अशक्तौ वृद्धशातातपः—

*जलाशय इति प्रतिष्ठापदं प्रतितिष्ठतीति व्युत्पत्त्या स्थैर्यविशेषार्थकम्। स्वमतमाह-*अन्ये त्विति। अन्यथा काम्यवृषोत्सर्गादावपि त्यागः स्यात्। तदेव स्पष्टयति-*अन्नप्राशे चेत्यादिना। *मातृश्राद्धमिति मातृपूर्वकत्वेन पितृपूर्वकत्वव्यावृत्तिः।

---

(१) कंसान्तर्गतं नास्ति ग०

पूर्वाह्णे मातृकं श्राद्धं मध्याह्ने पैतृकं तथा ।
ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम् ॥)

अत्राप्यशक्तौ स एव—

पृथक्दिनेष्वशक्तश्चेदेकस्मिन् पूर्ववासरे ।
श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तान्त्रिकम् ॥ इति ।

वृद्धमनुरपि—

अलाभे भिन्नकालानां नान्दीश्राद्धत्रयं बुधः ।
पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मातृपूर्वकम् ॥

अत्र 'महत्सु पूर्वेद्युस्तदहरल्पेषु' इति गृह्यपरिशिष्टाद्व्यवस्था ज्ञेया । तच्च प्रातरेव,

पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकम् ।

इति शातातपोक्तेः । अत्र प्रातःशब्दः सार्धप्रहरपरः,

प्रहरोऽप्यर्धसंयुक्तः प्रातरित्यभिधीयते ।

इति गार्ग्योक्तेरिति पृथ्वीचन्द्रः । इदं च पुत्रजन्मातिरिक्तविषयम् । तदाहात्रिः—

माता पितामही चैव सा पूज्या प्रपितामही ।
पित्रादयस्त्रयश्चैव मातुः पित्रादयस्तथा ॥
एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैः ॥ इति ।

मात्स्ये—

उत्सवानन्दसन्ताने यज्ञोद्वाहादिमङ्गले ।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ॥
ततो मातामहाः पूज्या विश्वेदेवास्तथैव च ॥ इति ।

उत्सवः प्रागुक्तः । आनन्दो यज्ञादिः । सन्तानोऽपत्यसंस्कारः । बहुवचनेन तदाद्यत्रयाणां ग्रहः । मात्रादयश्च मनुष्यपितरः प्राधान्येनोद्दिश्याः ।

ऊर्ध्ववक्त्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ।

पूर्वाह्णे वै भवेद्वृद्धिर्विना जन्मनिमित्तकम् ।
पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुधः॥ इति,

*एतदनियतनिमित्तपरम्,

नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकम् ।
तेषामनियतत्वे तु तदानन्तर्यमिष्यते ॥

इति लौगाक्षिस्मृतेः । आधानाङ्गं नान्दीश्राद्धं त्वपराह्ण एव,

आमश्राद्धं तु पूर्वाह्णे सिद्धान्नेन तु मध्यतः ।
पार्वणं चाऽपराह्णे तु वृद्धिश्राद्धं तथाग्निकम् ॥

इति निर्णयामृते गालवोक्तेः ।

नान्दीमुखाह्वयं प्रातराब्दिकं त्वपराह्णतः ।

इति विष्णूक्तेश्च । *इदं च मातृपितृमातामहादिक्रमेण नवदैवत्यं कार्यम् । *तत्र मातामहाः सपत्नीकाः । 'वृद्धप्रमातामहप्रमातामहमातामहानां सपत्नीकानाम्' इति पृथ्वीचन्द्रोदये गारुडे गद्यरूपेण पाठात् । हेमाद्रौ शङ्खः—

नान्दीमुखे सत्यवसू सङ्कीर्त्यौ वैश्वदेविके ।

वृद्धपराशरः—

नान्दीमुखेभ्यो'देवेभ्यः प्रदक्षिणकुशासनम् ।

इति नान्दीमुखा दिव्यपितरस्तु अभेदेनोद्देश्यस्वरूपे बोध्याः । कर्माङ्गाभ्युदयिकेऽप्येत एव देवताः,

निषेककाले सोमे च सीमन्तोन्नयने तथा ॥
ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत्कृतम् ।

इति वचनेन गर्भाधानादिकर्माङ्गश्राद्धे वृद्धिश्राद्धदेवताद्यनिर्देशात् । *एतदिति । तेन शान्तिविशेषादिग्रहः । अत्र द्वादशदैवत्यपक्षो न समञ्जस इत्याशयेनाह—*इदं चेति *तत्रेति । यद्यपि—

स्वभर्तृपिण्डमात्राभ्यस्तृप्तिरासां यतः स्मृता ।

पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति स्मृ(१)तिः ॥

यत्तु वृद्धवसिष्ठः--

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम् ।
नाम सङ्कीर्तयेद्विद्वानन्यत्र पितृपूर्वकम् ॥

यच्च स्मृत्यर्थसारे--

वृद्धमुख्यास्तु पितरो वृद्धिश्राद्धेषु भुञ्जते । इति ।

यच्च गारुडे व्युत्क्रमप्रतिपादनं तच्च शाखान्तरविषयम्, 'पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः' इति बह्वृचपरिशिष्टे कात्यायनेन चानुलोम्याम्नानात् । पृथ्वीचन्द्रोदयेऽप्येवम् । यत्तु केचिद्वृद्धिपदं पित्रादिषु प्रयुञ्जते । तन्न,

अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम् ।
अनाम्नामतिलार्थैश्च नान्दीश्राद्धं तु सव्यवत् ॥

इति पृथ्वीचन्द्रोदये सङ्ग्रहोक्तेः । न च निषेधादेव विधिः कल्प्यत इति वाच्यम्, प्रौष्ठपदीश्राद्धे प्रपितामहात्परेषां वृद्धपित्रादीनां देवतात्वान्नान्दीश्राद्धत्वसामान्येनेहापि तत्प्राप्तौ निषेधात् । गोत्रनामादिनिषेधस्तु--

शुभार्थी प्रथमान्तेन वृद्धौ सङ्कल्पमाचरेत् ।

इत्युपक्रम्य 'अनस्मद्वृद्धशब्दानाम्' इत्युक्तेः सङ्कल्पश्राद्धपरः, 'सपिण्डके तु सर्वं भवति' इति प्रयोगपारिजातात् ।

गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यं प्रदापयेत् ।

इति छन्दोगपरिशिष्टे तद्विधानात् । यत्तु ब्राह्मे--

पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ॥

---

(१) 'स्थितिः' क०

तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः ।
ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ॥ इति,

यच्च मार्कण्डेयपुराणे--

ये स्युः पितामहादूर्ध्वं ते तु नान्दीमुखा स्मृताः। इति,

तज्जीवत्पित्रादित्रिककर्तृकवृद्धिश्राद्धविषयम् । तेन तस्येदमावश्यकम् । यत्तु विष्णुः–'पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यात्' इति, तद्दर्शादिविषयमिति कल्पतरुः । मदनपारिजातेऽप्येवम् । हेमाद्रिस्तु–

नान्दीमुखानां श्राद्धं तु कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्तव्यं वराहवचनं यथा ॥

इति प्रौष्ठपदीश्राद्धैकवाक्यत्वात्तत्रैव पूर्वेषां देवतात्वमित्याह । अत्र सत्यवसू विश्वेदेवावित्युक्तं प्राक् । यत्तु शातातपः--

मातुः श्राद्धं तु युग्मैः स्याददैवं प्राङ्मुखैः पृथक् । इति ।

तद्भिन्नप्रयोगमातृश्राद्धपरम् । यच्च मार्कण्डेयपुराणे–

विश्वेदेवविहीनं तु केचिदिच्छन्ति मानवाः । इति,

तद्भिन्नप्रयोगमातृश्राद्धभिन्नश्राद्धद्वये विश्वेदेवविकल्पार्थम् । प्रयोगैक्ये तु देवनियमः इति हेमाद्रिः ।

एतच्च मातृपूजापूर्वकं कार्यम्,

अकृत्वा मातृयागं तु यः श्राद्धे परिवेषयेत् ।
तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः ॥

इति शातातपोक्तेः । कौर्मेऽपि--

पुष्पैर्धूपैः सनैवेद्यैर्गन्धाद्यैर्भूषणैरपि ।
पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं बुधः ॥ इति ।

छन्दोगपरिशिष्टे--

कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः ।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः ॥

प्रतिमासु च शुद्धासु लिखिता वा पटादिषु ।
अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः ॥
कुड्यलग्नां वसोर्धारां सप्तधारां घृतेन तु ।
कारयेत्पञ्चधारां वा नातिनीचां नचोच्छ्रिताम् ॥
आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः ।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ॥

अत्र सर्वेष्विति ग्रहणात्ग्रहयज्ञतद्विकारेष्वपि नित्यं श्राद्धम् ।

नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किञ्चित्समाचरेत् ।

इति शातातपोक्तेश्च । इयं च वसोर्धारा नच्छाखीयानां नियता, अन्येषां त्वनियता, *'बह्वल्पं वा स्वगृह्यो-

---

इति परिभाषाप्राप्तं सपत्नीकत्वं तथापि—

माता पितामही चैव संपूज्या प्रपितामही ।
पित्रादयस्त्रयश्चैव मातुः पित्रादयस्त्रयः ॥
एते नवार्चनीयाः स्युः पितरोऽभ्युदये द्विजैः ॥

इति मात्स्येऽपि द्वादशदैवत्यविधाने न बाधप्रसङ्गवारकतया गारुडोक्तिः । *बह्वल्पं चेति ।

बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥

इत्यर्थः । येषां कल्पसूत्रे यावदितिकर्तव्यताकं कर्मोक्तं तेषां तावदेव । प्रधानस्य स्वसूत्राङ्गकलापेनैवाकाङ्क्षाशान्तेरितरस्मृत्याद्युक्ततदन्वयो नेत्यर्थः ।

स्वकं कर्म परित्यज्य यदन्यत्कुरुते नरः ।
अज्ञानादथवा लोभात्स तेन पतितो भवेत् ॥

इति वचनात्स्वगृह्योक्तं बह्वल्पं वा यादृशं तत्तादृशमेवानुष्ठेयं नतु शास्त्रान्तरमपेक्ष्यान्यथापि कर्तव्यम् । येषां तु गृह्ये स्मृत्यन्तरो-

क्तम्' इत्युक्तेः : *करणे त्वभ्युदयः, 'यन्नाम्नातं स्वशाखायाम्' इत्युक्तेः । आयुष्याणि 'आनो भद्राः' इत्यादीनि । *षड्भ्य इति मात्रादित्रिकोपलक्षणमिति

त्तस्य कस्यचिदङ्गस्य निषेधः तत्र तन्निषेधद्वारा तत्स्मृत्युक्तान्याङ्गस्याभिमतत्वबोधनात्तदनुष्ठेयम्,

आत्मतन्त्रेषु यन्नोक्तं तद्ग्राह्यं पारतन्त्रिकम् ।
विशेषाः खलु सामान्या वेदोक्ता वेदवादिभिः ॥

इति वचनात् । यस्य शास्त्रेऽनुक्ता विशेषास्ते खलु निश्चितं सामान्याः साधारणा इत्यर्थः । अत एव लौगाक्षिः--

ऊनो वाप्यतिरिक्तो वा यः स्वशाखोदितो विधिः ।
तेन सन्तनुयाद्यज्ञं न कुर्यात्पारतन्त्रकम् ॥

यज्ञपदमुपलक्षणम् । अत एवोक्तं--

स्वशाखाविधिमुत्सृज्य त्वन्यस्य विधिमाचरेत् ।
अप्रमाणमृषिं कृत्वा त्वन्धे तमसि मज्जति ॥
स्वकं कर्म परित्यज्य यदन्यत्कुरुते नरः ।
अज्ञानादथवा लोभात्स तेन पतितो भवेत् ॥ इति ।
ऋक्शाखी नैव कुर्वीत स्वकीयं परशाखया ।
प्रमादाद्यदि कुर्वीत पुनः संस्कारमर्हति ॥
यत्र नास्ति स्वशाखा चेदृक्शाखोक्तं समाचरेत् ।
पुनर्नार्हति संस्कारमन्यथाऽर्हति चेत् पुनः ॥
यजुःशाखाविधानेन यदि बह्वृचकर्म च ।
कृतं चापि हि तत्कर्म पुनः कुर्याद्यथाविधि ॥
ऋक्शाखाविधिना कर्म यदि स्यादन्यशाखिनाम् ।
न तत्कर्म पुनः कुर्यादिति यज्ञविदां मतम् ॥ इति ।

*करणे त्विति । उपयाचिताभिप्रायम् । *षड्भ्य इति । तथाच नवदैवत्यमेव तेनोक्तं भवति । परन्तु लक्षणां विनैव षट्-

पृथ्वीचन्द्रोदयः । *छन्दोगानां षड्दैवत्य*मन्येषां नवदैवत्यमित्याशार्कः । *मम तु मतं कोकिलमतानुसारिणां मातृमातामहप्रमातामहा इति मात्रा सहैव मातामहश्राद्धकरणात् तद्विषयमिदं षड्भ्य इति ।

मातरस्तत्रैवोक्ताः—

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥
धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह ।
गणेशेनाधिका ह्येता वृद्धौ पूज्याश्चतुर्दश ॥

मातरो लोकमातर इति सर्वाविशेषणम् । तेन चतुर्दशत्वम् । यदा षोडशेति पाठस्तदा देवतान्तरम् । चन्द्रिकायां चतुर्विंशतिमते त्वन्या उक्ताः—

तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा ।
इत्येता मातरः प्रोक्ताः पितुर्मातुः स्वसाष्टमी ॥

आसां जीवने प्रत्यक्षं पूजनम् । मृतानां त्वक्षतपुञ्जेषु इति हेमाद्रिः ।

त्वस्य छन्दोगादिपरत्वसम्भवादुक्तव्याख्यानैयर्थ्यमरुचिः । *छन्दोगानामिति । गोभिलसूत्रे पार्वणद्वयाम्नानात् । कातीयानामप्येवमिति केचित् । *अन्येषामिति । "महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च । नवदैवतमत्रेष्टम्" इति वचनात् । अत्र—

महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
ज्ञेयं द्वादशदैवत्यं तीर्थे प्रोष्ठे मघासु च ॥

इति वचनाद्यथासम्प्रदायं पक्षत्रयमिति मयूखः । तद्रक्ष्यति- अत्र द्वादशदैवतस्येति । *मम त्विति । एकेनैव पार्वणेन मातृमातामहयोश्चारितार्थ्यान्न षट्त्वानुपपत्तिरिति भावः ।

*ब्रह्माण्याद्यास्तथा सप्त दुर्गाक्षेत्रगणाधिपान् ।
वृद्ध्यादौ पूजयित्वा तु पश्चान्नान्दीमुखान् पितॄन् ॥
मातृपूर्वान् पितॄन् पूज्य ततो मातामहानपि ।
मातामहीस्ततः केचिद्युग्मा भोज्या द्विजातयः॥इति।

अत्र द्वादशदैवतस्य देशाचाराद्व्यवस्था । ब्रह्माण्याद्याः—

*ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ॥

इत्यपरार्के उक्ताः । अत्र चौलादीनां यौगपद्ये तन्त्रोक्ता छन्दोगपरिशिष्टे—

*गणशः क्रियमाणानां मातृभ्यः पूजनं सकृत् ।
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु ॥

मातृभ्यः इति षष्ठ्यर्थे चतुर्थी । गणशः

---

*ब्रह्माणीति । ब्रह्माणमानयति जीवयति इति व्युत्पत्तेः । तेन "इन्द्रवरुण" सूत्रे ब्रह्मपदादानुगविधानेऽपि न दोषः । *ब्राह्मीति । वसोर्धारायां पूज्या एता इति याज्ञिकाः । *गणश इति । एकस्य शिशोः नामकर्मान्नप्राशनचौलोपनयनानि यदा एकस्मिन् काले क्रियन्ते तदा वृद्धिश्राद्धं तन्त्रेणैव कार्यमित्यर्थः । यत्र यत्र श्राद्धं भवेत्तत्र मातरः पूज्या इति च । केचित्तु अनेकेषां पुत्राणां कन्यानां वा सजातीयविजातीयानेकोपनयनोद्वाहादिसंस्कारे देशकालकर्त्रैक्याद्वृद्धिश्राद्धं तन्त्रेणेति वदन्ति । तन्न, योगसिद्ध्यधिकरणविरोधात् । तत्र हि सर्वफलार्थतया ज्ञातस्यापि ज्योतिष्टोमादेरेकस्मात्प्रयोगादेकमेव फलं नानेकानि फलानि, एकया सामग्र्या एकमेव कार्यं जायते इति नियमात् । तथाच तद्वदिहापि उपनयनविवाहादिजन्यपरमापूर्वाणामनेकतत्तत्संस्कार्यनिष्ठत्वेन तदङ्गाभ्युदयिकश्राद्धजन्यानामङ्गापूर्वाणामपि तन्निष्ठताऽपेक्षिता । नच सा सम्भवति उक्तनियमभङ्गापातात् । अतस्तत्र पृथगेव

*एकानेकपुत्राणां संस्कारेष्वेकदिने एकदेशकालकर्त्रैक्यादित्यर्थः । तथा—

*असकृद्यानि कर्माणि क्रियेरन् कर्मकारिभिः ।
प्रतिप्रयोगं नैव स्युर्मातरः सगणाधिपाः ॥

*कर्मावृत्तावपि कुत्र श्राद्धं कार्यं (१)क्व च नेत्युक्तं तत्रैव—

*आधाने होमयोश्चैव वैश्वदेवे तथैव च ।
बलिकर्मणि दर्शे च पूर्णमासे तथैव च ॥
नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः ।
एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक् ॥

वृद्धिश्राद्धमिति । *एकानेकेति । एकस्य अपत्यादेरनेकेषु नामकर्मादिसंस्कारेषु एकदिने एकेन कर्त्रा क्रियमाणेषु देशकालकर्त्रैक्याद्वृद्धिश्राद्धं सकृन्मातृणां पूजा च सकृदित्येकोऽन्वयः । एवमनेकस्यापत्यादेः जातकर्मादि संस्कारे प्रतिस्वमङ्गापूर्वोत्पत्तये संस्कार्याणां भेदेन संस्काराणां भेदेऽपि तत्र श्राद्धमेकमेवेत्यपर इति । तत्रानेकपदं दर्शितकेचिन्मतानुरोधि । नच तत्र निर्भरः कार्यः, योगसिद्ध्यधिकरणविरोधप्रसङ्गात् । न च कर्मनाशाजलस्पर्शादिना यत्रानेकपुत्रादेः पुनरुपनयनं तत्परताऽनेकपदस्य युज्यते तस्य प्रायश्चित्तत्वेन श्राद्धस्यैवाभावात् प्रधानावृत्त्या प्राप्तायानान्दीश्राद्धावृत्तेरपवादमाह—*असकृदिति । "मातरः श्राद्धमेव च" इति पाठः । असकृत्पुनःपुनरित्यर्थः । प्रतिदिनं प्रतिमासं प्रत्यब्दं चेति यावत् । *कर्मावृत्तावपीति । अयमर्थः एवं तर्हि ज्योतिष्टोमादिषु प्रतिप्रयोगं श्राद्धं न स्यात् "असकृद्यानि" इति सामान्यत एवाभिधानात् । अतः कुत्र कार्यं कुत्र न कार्यमिति संदेह इति । *आधाने

---

(१) 'कुत्र नेत्युक्तं' क० छ० ।

एतेषु प्रतिप्रयोगं नावर्तते किन्त्वादौ। एतद्भिन्ने सोमयागादौ तु प्रतिप्रयोगमावर्तत एव श्राद्धमित्यर्थः। क्वचिदादावपि निषेधमाह स एव—

*नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते।
न सोष्यन्ती*जातकर्मप्रोषितागतकर्मसु॥
विवाहादिः कर्मगणो य उक्तो
गर्भाधानं शुश्रुमो यस्य चान्ते।
विवाहादावेकमेवात्र कुर्या-
च्छ्राद्धं नादौ कर्मणः कर्मणः स्यात्॥

सोष्यन्त्या आसन्नप्रसवायाः 'सोष्यन्तीमभ्युक्ष्य' इत्युक्तं कर्म। *कात्यायनोक्तस्य श्राद्धस्य पाकप्राधान्यात्तस्य च—

जातश्राद्धे न दद्यात्तु पक्वान्नं ब्राह्मणेष्वपि।

इति निषे(१)धान्न जातकर्मणि नान्दीश्राद्धमित्या-

इति। नवयज्ञः आग्रयणेष्टिः। होमादिपदं च अग्निहोत्रहोमवैश्वदेवादौ ये वृद्धिश्राद्धमनुतिष्ठन्ति तत्परमित्युक्तं प्राक्। नारायणस्तु होमादिनवयज्ञपर्यन्तेषु न पृथक् श्राद्धं किन्तु आधाने कृतमेकमेव श्राद्धमुपकरोतीत्याह। *नाष्टकास्विति। इदं च वचनं नित्यानुवादो न निषेधः प्राप्त्यभावादित्याहुः। गोभिलीयानां होममात्रमष्टका नतु श्राद्धमिति तत्र निषेधार्थमष्टकापदम्। श्राद्धपदं च प्रमीतपितृगतफलार्थकं कर्म। अन्यथा पितृयज्ञे तत्प्रसङ्गात्। एवञ्च पृथगष्टकानिषेधो न व्यर्थ इति परे। सुतसंस्कारकर्मतया जातकर्माङ्गं श्राद्धं प्राप्तं निषेधति—*जातकर्मेति। आशार्कमतमाह—*कात्यायनोक्तस्येति। एतन्मते कर्माङ्गं नान्दीश्राद्धम्। तथाच तल्लोपेऽपि न प्रधानलोपः। वृद्धिवदिति दृष्टान्तासामञ्ज-

---

(१) 'निषेधान्न जातकर्मणि नान्दीश्राद्धम। आमान्नेन वा कार्यमित्याशार्कः। गौडास्तु' क० छ०।

शार्कः। आमान्नेन वा कार्यमित्यपि तेनैवोक्तम्। *गौडास्तु जातकर्मण्येव निषेधः। पुत्रजन्मनिमित्तकं तु कार्यमेव 'जन्मन्यथोपनयने' इत्युक्तेः।

*नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयात्मकम्।
पुत्रजन्मनि तत्कार्यं जातकर्म समं नरैः॥

इति मार्कण्डेयपुराणाच्चेत्याहुः। हारलतायां श्राद्धविवेके चैवम्। *एतेन जातकर्मणि कालान्तरे श्राद्धनिषेधो न (१)पुत्रजन्मदिने इतिवाचस्पतिमतं परास्तम्। *अथ 'निषेककाले' इति वचनात् गर्भाधाने न निषेधः(२)। प्रोषितेति 'प्रोष्येत्य गृहानुपतिष्ठते पुत्रं दृष्ट्वा जपति' इति विहितं कर्म। विवाहादिः गर्भाधानान्तो यो गृहप्रवेशधृ(३)तिहोमचतुर्थीकर्मादिः कर्मसमूह उक्तः सूत्रकारेण, तत्रापि प्रतिकर्म नेत्यर्थः। अन्येऽपि हलाभियोगादयोऽपवादविषयास्तत्रैव ज्ञेयाः। अप्रचारान्नोच्यन्ते।

स्यं जातकर्मनिषेधवैयर्थ्यं चेत्यरुचिः। स्वमतमाह—*गौडास्त्विति। *नैमित्तिकमिति। अत्र नैमित्तिकजातकर्मपदाभ्यां पुत्रजन्मनिमित्तकमेव श्राद्धं नतु जातकर्माङ्गं, "न सोष्यन्ती जातकर्म" इति निषेधात्। *एतेनेति। सुताद्यास्यावलोकेत्यत्र निरूपिततत्त्वमेतत्। अत्र गर्भाधानं श्रुश्रुमो यस्य चान्ते इत्यत्र गर्भाधानेऽपि निषेध इति भ्रमं वारयति—*(४)अत्रेति।

---

(१) 'पुत्र' नास्ति क० छ०।

(२) यद्यपि गपुस्तके इतउत्तरं 'निषेककाले सोमे च सीमन्तोन्नयने तथा। ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं विधिवत्कृतम्॥ इति पारस्करः, इत्याधिकं दृश्यते, तथापि क० छ० पुस्तकयोरनुपलम्भाट्टीकायां तदुपलम्भाच्च मूले उपेक्षितम्।

(३) 'धृतिहोम' नास्ति ग०।

(४) अत्र मूलानुरोधेन 'अथेति' इति प्रतीकमावश्यकम्।

अथात्राधिकारिणः । विष्णुपुराणे—

जातस्य जातकर्मादि क्रिया(१)काण्डमशेषतः ।
पिता *पुत्रस्य कुर्वीत श्राद्धं चाभ्युदयात्मकम् ॥

अत्र केचित् जीवत्पितुः साग्नेरेव वृद्धिश्राद्धेऽधिकारः नतु निरग्नेः,

न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः ।
येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः ॥
पितामहेप्येवमेव कुर्याज्जीवति साग्निकः ।
साग्निकोऽपि न कुर्वीत जीवति प्रपितामहे ॥

इति चन्द्रिकायां सुमन्तूक्तेरित्याहुः । प्रयोगपारिजातेऽप्यनाहिताग्निर्न (२)कुर्यादिति यद्व्याख्यातं, तन्न,

अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्मणि ।
येभ्य एव पिता दद्यात्तानेवोद्दिश्य तर्पयेत् ॥

इति हारीतोक्तेः । सौमन्तवं तु वृद्धिश्राद्धभिन्नश्राद्ध(३)परमित्युक्तं मदनरत्ने । (४)श्राद्धपदं पिण्डपितृयज्ञपरमिति पृथ्वीचन्द्रोदयः । निर्णयामृते तु हारीतीयेऽनग्निकोऽनाहिताग्निरभिप्रेतः । पूर्ववचने तु साग्निकः औ-

---

निषेककाले सोमे च सीमन्तोन्नयने तथा ।
ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवत्कृतम् ॥

इति पारस्करः । *पुत्रस्येति । पुंस्त्वमविवक्षितमनुवाद्यगतत्वात् । आभ्युदयिकं भवति तच्च समन्त्रकं, मन्त्रबाधे मानाभावात् । "तूष्णीमेताः क्रियाः स्त्रीणाम्" इति याज्ञवल्क्ये तु जातकर्मादिसंस्कारेषु मन्त्रबाधार्थम् 'एता' इत्यनेन प्रक्रान्ततया तेषामेव परामर्शात् । यदि हि "अप्स्ववभृथेन चरन्ति" इति तृतीयान्तेन साङ्गभावनामुक्त्वा तस्या तूष्णीत्वं विधीयते तदा स्यादपि

---

(१) 'काण्डविशेषतः' क० । (२) 'कुर्यादितीदं' क० छ०
(३) 'पर' नास्ति क० । (४) 'श्राद्धपदं' नास्ति क० छ० ।

ताग्निः स्मार्ताग्निश्चोच्यते । तेनोभयाग्निहीनस्य नेत्युक्तम् । *तन्न, *पूर्वोक्तदिशा गतिसम्भवेऽनाग्निपदस्य स्मार्ताग्निपरत्वे मानाभावात् । वक्ष्यमाण*नित्यानित्यसंयोगविरोधात् ।

*पितरो जनकस्येज्या यावद्व्रतमनाहितम् ।
समाहितव्रतः पश्चात्स्वान्यजेत पितामहान् ॥

इति पृथ्वीचन्द्रोदये यमवचोविरोधाच्च । अपरार्कोऽपि-
*'समावर्तने ब्रह्मचारी स्वयमेव नान्दीश्राद्धं कुर्यात्' इत्याह । अतः पूर्वमेव साधु । बोपदेवोप्येवमाह । यत्तु मतं जीवत्पितुः पुत्रनामकर्मादौ न वृद्धिश्राद्धं, हारीतीये-*जन्मादावित्यादिशब्देन तत्प्राप्तावपि--

उद्वाहे पुत्रजनने पि(१)त्र्येष्ट्यां सौमिके मखे ।
तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः ॥ इति ।

अङ्गमात्रबाधः इह तु यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या इत्यत्रेष्टीनामिव क्रियाणां प्रथमान्तपदोपात्तत्वात्प्रधाने एव तूष्णींत्वविधिनाङ्गेऽपीति । तेन कन्याया जातकर्मादौ वृद्धिश्राद्धं समन्त्रमेवेति । मतद्वयं दूषयति—*तन्नेति । *पूर्वोक्तदिशा वृद्धिश्राद्धभिन्नश्राद्धपरतया । *नित्येति । जातकर्मादिकं कुर्यादिति नित्यसंस्कारादिकमनित्येन वृद्धिश्राद्धेन कुर्यादित्यर्थपर्यवसानात् । *पितर इति । उत्तरार्धेन जीवत्पितृकस्योपनयनोत्तरं विवाहमनुरुध्यैव वृत्तिश्राद्धाधिकारलाभात् । उभयाग्निहीनस्य नेत्यत्र व्यभिचारमप्याह—*समावर्त्तने इति । पित्र्येष्टिश्चातुर्मास्ये सौमिके मखे तृतीयसवने पुरोडाशखण्डैः पिण्डदानम् । *जन्मादाविति । अयं भावः । उद्वाह इति वाक्ये षट्पदं न षट्स्वेवेति परिसंख्यार्थं, त्रैदोष्यात् ।

---

(१) 'पुत्रेष्ट्यां' क० ।

मैत्रायणीयपरिशिष्टे–'उद्वाह एव तस्योपसंहारात् । एवं यत्र (१)संस्कारादिपदं तदप्युद्वाहादिपरमेव' इति । तन्न, उद्वाहपदस्य स्वविवाहपरत्वस्यापि सम्भवात् । पुत्रविवाहपरत्वे मानाभावात् ।

(ना(२)मकर्माणि बालानां चूडाकर्मादिके तथा ।

इत्यादिभिर्नित्यश्राद्धस्य चौलाद्यङ्गत्वावगतौ नित्यानित्यसंयोगविरोधाच्च ।) अतो जन्मादाविति सर्वसंस्कारसंग्रहः । तथा कात्यायनः—

स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ।
पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात् ॥

आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि ।

इत्यादिवचनान्तरविरोधाच्च । किन्तु उपलक्षणम् । तत्रोद्वाहपदं स्वद्वितीयोद्वाहपरं पुत्रजनन इति संस्कारसामान्योपलक्षणम् । पित्र्येष्ट्यामिति द्वयं उद्वाहादिचतुष्टयं वा यत्र प्रधाने जीवत्पितृकस्याधिकारस्तत्र तदङ्गपित्र्यस्योपलक्षणं, साजात्यात् । तेनाग्न्याधानरुद्रानुष्ठाननववेश्मप्रवेशाश्रमान्तरस्वीकारतडागारामकूपाद्युत्सर्गतुलापुरुषादिमहादानदर्शपूर्णमासादिषु जीवत्पितृकस्य नान्दीश्राद्धाधिकारः । उत्तरार्धे तु तीर्थे ब्राह्मण आयात इत्येताभ्यां स्वतन्त्रं श्राद्धमुपलक्ष्यते । तदेव चान्वष्टक्यं गयाप्राप्तौ सत्यामिति वचनोक्तमात्रान्वष्टक्यादित्रयमेव । नचैवमुक्तत्रयमात्रोपलक्षणे अहरहः श्राद्धसंक्रान्तियुगादिमन्वादिग्रहणादिश्राद्धादौ जीवत्पितृकस्याधिकाराभावे—

दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ॥

इतिदर्शापरपाक्षिकश्राद्धयोः प्राप्त्यभावान्निषेधानुपपत्तिरिति वा-

---

(१) 'यत्र तु' ग० । (२) धनुश्चिन्हान्तर्गतं नास्ति क० छ० ।

सुतानां चौलादिसंस्कारेषु पिता स्वपितृभ्यः पिण्डान् श्राद्धं *'पिण्डदोंऽशहरश्चैषाम्' इति दर्शनात् ओद्वहनाद्विवाहपर्यन्तं दद्यात्। विवाहश्च प्रथमः,

*नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः।
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम्॥

च्यम्। तीर्थे इत्यनेन प्राप्तस्य गयाश्राद्धस्यैवायं निषेधः वाक्यान्तरेण गयाप्राप्तौ सत्यां मातृश्राद्धमात्रस्य विधानात्तत्र दर्शश्राद्धापरपक्षश्राद्धे दृष्टान्त इति। तेन गयाश्राद्धेतरतीर्थश्राद्धं ब्राह्मणपदस्य द्रव्योपलक्षणत्वात् द्रव्यब्राह्मणप्राप्तिश्राद्धद्वयं मात्रान्वष्टक्यादिश्राद्धत्रयं चेति षट्सु स्वतन्त्रश्राद्धेषु जीवत्पितृकस्याधिकार इति। अथवा—

सपितुः पितृकृत्येषु अधिकारो न विद्यते।

इति श्राद्धे सामान्यतो जीवत्पितृकस्याधिकारो निराकृतः। तत्र उद्वाहे पुत्रजनने इत्यनेन विवाहादिषु तीर्थादौ च जीवत्पितृकः कर्त्ता विधीयते। तत्र पुत्रजनने इत्यनेन पुत्रजन्मनिमित्तकश्राद्धे विहितः स कर्त्ता आधानाद्यङ्गभूते आभ्युदयिके अतिदेशेन लभ्यते। अतिदेशश्च निषेककाले सोमेचेत्यादिः प्राक् पारस्करेणोक्तः। तत्र सोमग्रहणमाधानाग्निहोत्रादीनां सर्वेषामुपलक्षणम्। एवञ्च जीवत्पितृकेण नान्दीश्राद्धं विनैवाधानादि कार्यमिति न भ्रमितव्यमिति। पिण्डपदस्य श्राद्धपरत्वे सम्वादमाह-*पिण्डद इति। स्त्रीणामपि पूर्त्तमहादाने कन्योद्वाहादिप्रधानेऽधिकारात्तदङ्गे नान्दीश्राद्धेऽप्यधिकारः स्पष्ट एव। तत्र जीवद्भर्तृकाया अजीवद्भर्तृकाया वा पूर्त्तमहादानादिषु पुरुषस्येव स्वीयान्येव मातृपितृपार्वणानि। भर्तृसन्निधानेन जीवद्भर्तृकायाः कन्योद्वाहे भर्त्तुरेव मात्रादिपार्वणत्रयम्। मृतभर्तृकायास्तु स्वीयमात्रादि पार्वणत्रयं, संस्कार्यपितृमातामहपार्वणद्वयं वा। *नान्दीश्राद्धमिति। यदि तु पिता देशान्तरं गतः मृतो वा पितामहादिश्च नास्ति तदा स्वयमेव नान्दीश्राद्धं

इति स्मृतेः । तस्य पितुरभावे *तत्क्रमात्—

असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः ॥

इति यः कर्तृक्रमस्तेन क्रमेण *ज्येष्ठभ्रात्रादिर्दद्यादिति चन्द्रिकादयः । *हेमाद्रिस्तु तस्य पितुरभावे यः पितृव्यमातुलादिः संस्कुर्यात्स तत्क्रमात्संस्कार्यपितृक्रमाद्दद्यान्न तु स्वपितृभ्य इति व्याचख्यौ ।

*समावर्तनस्यापि विवाहप्राचीनसुतसंस्कारत्वात् पितैव नान्दीश्राद्धं कुर्यात् । तदभावे ज्येष्ठभ्रात्रादिः । तदभावे स्वयमेव कुर्यात, उपनयनेन कर्माधिकारस्य जातत्वात् । एवमाद्यविवाहेऽपीति पृथ्वीचन्द्रोदयचन्द्रिकादयः । मदनरत्नेऽप्येवम् । यदा तु पितरि संन्यस्ते प्रोषिते पतिते वा धर्मार्थं तत्पुत्रमन्यः संस्कुर्यात्तदा संस्कार्यपितुः पित्रादिभ्यो दद्यात्,

*पितरो जनकस्येज्या यावद्व्रतमनाहितम् ।

कुर्यात्, उपनयनेन कर्माधिकारस्य जातत्वात् । अत्र पूर्वार्धोक्तं पितुर्नान्दीश्राद्धं न विधेयं वाक्यभेदापत्तेः । किन्तु स्वद्वितीयादिविवाहे नान्दीश्राद्धं कुर्यादित्येक एव विधिरिति । *तत्क्रमादिति । “पिता पितामहो भ्राता” इत्यादिवचनात्पितामहादिः स्वपितृभ्य एव नान्दीश्राद्धं कुर्यादित्यर्थः । विवाहे पितामहानन्तरमुपनयने तु पितृव्यानन्तरं भ्राता । तत्र पूर्वसंस्कृतत्वं विशेषणम् । तेन ज्येष्ठत्वं लभ्यते इत्याह—*ज्येष्ठेति । एतेन यत्र ज्येष्ठा कन्या कनिष्ठो भ्राता तत्र कथञ्चिद्भ्रातुरुपनयनं कृत्वा पश्चात्तत्कन्यादानं न भवतीति सूचितम् । हेमाद्रिमतमाह—*हेमाद्रिस्तु इति । पृथ्वीचन्द्रमतमाह—*समावर्त्तनस्येति । अत्राद्यविवाहे पित्राद्यभावेऽस्तु स्वस्याधिकारः । समावर्त्तने तु सत्यपि पितरि स्वस्यैवाधिकारः “समावर्त्यमाने” इति सूत्रादित्यरुचिः । पितरीत्यादेरा-

समाहितव्रतः पश्चात्स्वान्यजेत पितामहान् ॥

इति पृथ्वीचन्द्रोदये यमोक्तेः। जीवत्पितृकस्य *विशेषमाह कात्यायनः--

*वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥ इति।

यत्तु बह्वृचपरिशिष्टे--जीवत्पिता सुतसंस्कारेषु मातृमातामहयोः कुर्यात् तस्यां जीवन्त्यां मातामहस्यैव इति, तत् *तच्छाखीयानामेवेति दिक्। स्मृतितत्त्वादिगौडग्रन्थेषु तु जीवन्मातृकः पितामह्यादिभ्यो वृद्धौ दद्यात्,

---

इत्यवचनेनोक्ताधिकारिणोऽसत्त्वे इत्यर्थः। *पितर इति। जीवत्पितृके एव स्वरसत एतत्प्रवृत्तेः। एवञ्च मृतापितृकस्य बालस्य यत्रान्येन संस्कारः क्रियते तत्र संस्कार्यपित्रादिभ्य एवेत्यर्थसिद्धम्। *विशेषं देवताविशेषम्। *वृद्धाविति। अनेकनिमित्तसमावेशे वाक्यभेदापत्तेर्वृद्धितीर्थपदे जीवत्पितृकाधिकारिकश्राद्धमात्रोपलक्षके। तानि च श्राद्धानि प्राक् प्रपञ्चितानि 'उद्वाहे पुत्रजनने' इति अग्रे पुनः प्रपञ्चनीयानि च। उक्तरीत्या तेषु "मात्रोरर्धमन्तर्वेदि मिनोत्यर्थं बहिर्वेदि" इत्यादिवज्जीवत्पितृकाधिकारसमर्थनात्। तेषां देवताकाङ्क्षासत्त्वात् जीवत्सन्यस्तपितृकस्य तु दर्शश्राद्धादावप्यधिकारः उत्तरार्धेन च पितृदेवता एवैत्वं प्रतिदेवतात्वेनोच्यते। एवञ्च जीवत्पितृकस्य मातरि मातामहे च मृतेऽपि न स्वमातृमातामहपार्वणयोः प्राप्तिः, किन्तु पितुरेव। पितामहेऽपि जीवति तन्निरूपिता एव देवताः पौत्रस्य पितृनिरूपितत्वसम्बन्धेन एतद्वचनादेव प्राप्तेः। पिता हि पितृजीवनेन पितामहादिभ्यो ददाति अतः पुत्रोऽपि तानेव दद्यादित्यर्थस्य सम्भवात्। "अत्र ह्येवावपन्ति" इतिवदेवकारेण शब्दतस्तासां परिसंख्यातत्वात्। *तच्छाखीयानामेवेति। आश्वलायनानामेव गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्माद्यपत्य-

जीवन्तमपि दद्याद्वा प्रेताद्यान्नोदके द्विजः ।

इति कात्यायनोक्तेः,

जीवे तस्मिन्सुताः कुर्युः पितामह्या सहैव तु ।
तस्यां चैव तु जीवत्यां तस्याः श्वश्र्वेति निश्चयः ॥

इति हारीतोक्तेश्चेत्युक्तम् । तस्मिन् *भर्तरि । दाक्षिणात्यास्तु पूर्वोक्तस्य सपिण्डीकरणादिविषयत्वात्

*जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेत् ।

इति वचनात्तद्वर्गस्य लोप एवेत्याहुः । यत्तु चन्द्रिकायां पारस्करः--

निषेककाले सोमे च सीमन्तोन्नयने तथा ।
ज्ञेयं पुंसवने श्राद्धं कर्माङ्गं वृद्धिवच्च तत् ॥ इति ।

संस्कारेषु अयं प्रतिप्रसव इति भावः । अत्र स्वमातृपार्वणं कृत्वा पितुः पितृपार्वणं कुर्यान्मातृमातामहयोरन्यतरजीवने तु पितृनिरूपितः स वर्ग इज्यः । उभयोर्जीवने तु वर्गत्रयमपि पितृनिरूपितमेव, दाक्षिणात्यास्त्विति मतान्तरं तु अनुपदं वक्तव्यम् । तस्मिन्निति विवृणोति—*भर्त्तरीति । अत्र सपिण्डीकरणविधीनां वृद्धौ प्रवर्त्तनमयुक्तं प्रकरणहानिप्रसङ्गादिति अरुचिः । *जीवेत्त्विति ।

पितृवर्गे मातृवर्गे तथा मातामहस्य च ।

इति पूर्वार्धम् । पूर्वोक्तपरिशिष्टे एवकारोपादानादिति भावः । अत्र एवकारमालोच्य स्वीयमातृमातामहपार्वणे एव भवतो न पितृपार्वणमित्यर्थकरणमनुचितम्, अग्निहोत्रे मान्त्रवर्णिकाग्निसूर्ययोः पृष्ठभागेन प्रजापतिविधाविव मातृमातामहयोः,

पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।

इति पितृप्राप्तेर्मातामहाप्राप्तावुपजीव्यत्वेन तद्बाधायोगान्मानाभावाच्च । एवकारादेश्च पितुर्मात्रादिमात्रपरिसंख्यानार्थत्वादित्य-

तत्र गर्भाधानादौ कर्माङ्गं, *जातकर्मादावुक्तं तु वृद्धिश्राद्धं पृथगेव वृद्धिवदित्युक्तेः । गौडनिबन्धे मात्स्ये-

*अन्नप्राशे च सीमन्ते पुत्रोत्पत्तिनिमित्तके ।
पुंसवे च निषेके च नववेश्मप्रवेशने ॥
देव(१)व्रते जलादीनां प्रतिष्ठायां तथैव च ।
तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धं प्रकीर्तितम् ॥

*अत्र भूतनिमित्तानां वृद्धित्वम्, भाविनिमित्तानामङ्गत्वम् । वृद्धिशब्दस्तद्धर्मातिदेशार्थ इति गौडाः । *अन्ये तु निषेकादौ कर्माङ्गवृद्धिश्राद्धयोः समुच्चयमाहुः । नान्दीश्राद्धसंज्ञा तूभयानुगता ॥

अथेतिकर्तव्यता । पृथ्वीचन्द्रोदये वृद्धपराशरः—

मालत्याः शतपत्र्या वा मल्लिकाकुब्जयोरपि ।
केतक्याः पाटलाया वा देया माला न लोहिता ॥

श्राद्धे मालानिषेधस्यायमपवादः । तथा--

सुवेषभूषणैस्तत्र सालङ्कारैस्तथा नरैः ।
कुङ्कुमाद्यनुलिप्ताङ्गैर्भाव्यं तु ब्राह्मणैः सह ॥
स्त्रियोऽपि स्युस्तथाभूता गीतनृत्यादिहर्षिताः ॥

हेमाद्रौ ब्रह्माण्डे--

कुशस्थाने च दूर्वाः स्युर्मङ्गलस्याभिवृद्धये ।

रुचिः । *जातकर्मादावििति । जातकर्मणि वृद्धिश्राद्धनिषेधाज्जातकर्मण आदिः तत्पूर्वमित्यर्थः । *अन्नप्राशे चेति । पुत्रोत्पत्तिनिमित्तकं वृद्धिश्राद्धम् । अन्यत्र तद्वत् यथा गङ्गायां मत्स्यः गङ्गायां घोषः इति गङ्गापदवदेकमेव शाक्तं भाक्तं च बोध्यम् । प्रकारान्तरमाह--*अत्रेति । *अन्ये त्विति । समुच्चयो व्यर्थ

---

(१) 'वेदव्रतजलादीनां' छ० ।

कुशा अपि वक्ष्यन्ते । छन्दोगपरिशिष्टे—

*प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा ।

*उभयतः दैवे पित्र्ये च । *वैश्वदेवौ द्वौ विप्रौ, पित्रादीनामेकैकस्य द्वौद्वाविति विंशतिः । *त्रिके वा द्वावित्यष्टौ विप्राः । अत्र विप्रालाभे स्त्रियोऽपि भोज्या इत्याहा(१)परार्के वृद्धवसिष्ठः—

मातृश्राद्धे तु विप्राणामलाभे पूजयेदपि ।
पतिपुत्रान्विता भव्या योषितोऽष्टौ कुलोद्भवाः ॥

*मातृत्रिके चतस्रः मातामहीत्रिके चेत्यष्टाविति हेमाद्रिः । अत्र *पित्र्ये प्राङ्मुखा विप्राः । पाद्ये पित्र्ये चइत्यरुचिः । *प्रातरिति ।

उपविश्य कुशान्दद्यादृजुनैव हि पातितान् ।

इत्युत्तरार्धम् । *उभयतः प्राङ्मुखानुदङ्मुखांश्चेत्यन्ये । *वैश्वदेवे द्वाविति ।

एकैकस्य तु वर्गस्य द्वौ द्वौ विप्रौ समर्चयेत् ।
वैश्वदेवे तथा द्वौ च न प्रसज्येत विस्तरे ॥

इति छागलेयवाक्यात् । वर्गस्येत्यस्य वर्गस्थस्येत्यर्थात् । वर्गस्येतियथाश्रुतेऽप्याह—*त्रिके वेति ।

पूर्वाह्णे भोजयेद्विप्रानष्टौ सर्वं प्रदक्षिणम् ।

इति भविष्यात् ।

तथाच नवमं विप्रं चतुरस्रे खगेश्वर ।

इति भविष्यं तत्र चतुरस्रं पाद्यस्य मण्डलम् अतः तेन पाद्यं ग्राह्यम् । तत्र क्रियमाणे योऽतिथिरागच्छेत्तं नवमं भोजयेदित्यर्थः । *मातृत्रिके इति । द्वादशदैवत्यपरम् । मातामहीश्राद्धस्य मातृश्राद्धत्वं कथमित्यरुचिः । चतस्रः प्राङ्मुख्यः चतस्र उदङ्मुख्य इति युक्तम् । *पित्र्ये इति ।

---

(१) 'इत्याहाशार्के वृद्ध' क० छ० ।

तुरस्रं मण्डलमिति जयन्तः । हेमाद्रौ ब्राह्मे--

विप्रान् प्रदक्षिणावर्तं प्राङ्मुखानुपवेशयेत् ।

छन्दोगपरिशिष्टे--

गोत्रनामभिरामन्त्र्य पितृभ्योऽर्घ्यं प्रदापयेत् ।
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते ॥
*ज्येष्ठोत्तरकरान्युग्मान्कराग्राग्रपवित्रकान् ।
कृत्वार्घ्यं सम्प्रदातव्यं नैकैकस्यात्र दीयते ॥

पित्रादेर्द्वौद्वौ विप्रौ तयोर्दक्षिणहस्तौ संयोज्य प्रथमोपवेशितविप्रकरोपरि तन्त्रेण द्वयोरर्घ्यं दद्यादित्यर्थः । बह्वृचकारिकायां तु--

दत्तार्घ्यादे(१)कदेशः स्यादर्घ्यदानं प्रतिद्विजम् ।
आवृत्तिरपि मन्त्रस्य प्रतिब्राह्मणमिष्यते ॥
प्रतिद्विजं पृथक्कुर्यान्निवीत्यर्घ्यानुमन्त्रणम् ॥

इत्युक्तम् ।

मधुमध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम् ।
गायत्र्यनन्तरं स्तोत्रं मधुमन्त्रविवर्जितम् ॥
न चाश्नंस्तु जपेदत्र कदाचित्पितृसूक्तकम् ॥

प्राङ्मुखांश्चतुरश्चैव चतरश्च उदङ्मुखान् ।

इति भविष्यात् । छान्दोग्ये चत्वार्येवार्घ्यपात्राण्याभ्युदायिके इति । *ज्येष्ठेति । युग्ममध्ये ज्येष्ठकरो द्वितीयविप्रकरस्योत्तरो येषु ते तथा । कराग्रे अग्रं पवित्रस्य येषु । कात्यायनः—

सदा परिचरेद्भक्त्या पितृनप्यत्र देववत् ।
निपातो नहि सव्यस्य जानुनो विद्यते क्वचित् ॥

पाद्मे—

तिलार्थस्तु यवैः कार्यः सव्येनैवानुपूर्वशः ।

---

(१) 'देकदेशात्स्या' ग० ।

तथा—

संपन्नमिति तृप्ताःस्थप्रश्नस्थाने विधीयते ।
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् ॥
अक्षय्योदकदानं च अर्घ्यदानवदिष्यते ।
षष्ठ्यैव नियतं कुर्यान्न चतुर्थ्या कदाचन ॥

चन्द्रोदये ब्राह्मे—

*पठेच्छकुनिसूक्तं तु स्वस्तिसूक्तं शुभं तथा ।
नान्दीमुखान् पितॄन् भक्त्या साञ्जलिश्च *समाह्वयेत् ॥

तथा--

शाल्यन्नं दधिमध्वक्तं बदराणि यवांस्तथा ।
मिश्रीकृत्वा तु चतुरः पिण्डान्श्रीफलसन्निभान् ॥
दद्यान्नान्दीमुखेभ्यश्च पितृभ्यो विधिपूर्वकम् ।
*द्राक्षामलकमूलानि यवांश्च विनियोजयेत् ॥

*पठेदिति ।

अन्य एव जपः कार्यः सोमसामादिकः शुभः ।

ब्रह्माण्डे--

स्वाहाशब्दं प्रयुञ्जीत स्वधास्थाने च बुद्धिमान् ।
वृद्धिश्राद्धे सदा सव्यं यज्ञसूत्रं च कारयेत् ॥
कुशस्थाने च दूर्वाः स्युर्मङ्गलस्याभिवृद्धये ।
प्राङ्मुखो देवतीर्थेन वृद्धौ परिचरेत् पितॄन् ॥
सव्येनैवोपवीतेन क्षिप्रं देशविमार्जनम् ॥

आसायं न प्रतीक्ष्यमित्यर्थः । *समाह्वयेदिति ।

पठेत्पवित्रं मन्त्रं तु विश्वेदेवास आगता ।

इति उत्तरार्धम् । *द्राक्षेति । पिण्डेभ्यो निवेदयेत्यर्थः ।
(१)*पात्राणीति । "तानि सोपपात्राणि" इति परिशिष्टम् ।

---

(१) अस्य प्रतीकस्य मूलं नोपलभ्यते ।

तान्येव दक्षिणार्थं तु दद्याद्विप्रेषु सर्वदा ॥

तत्रैव चतुर्विंशतिमते--

द्वौ द्वौ चाभ्युदये पिण्डावेकैकस्मै विनिक्षिपेत् ।
एकं नाम्ना परं तूष्णीं दद्यात्पिण्डान्पृथक्पृथक् ॥

वसिष्ठः--

प्राङ्मुखो देवतीर्थेन (१)प्राक्कूलेषु कुशेषु च ।
दत्त्वा पिण्डान्न कुर्वीत पिण्डपात्रमधोमुखम् ॥

नान्दीमुखेभ्यः पितृभ्यः स्वाहेति वा पिण्डदानमन्त्र इति वृत्तिः। अत्र पिण्डाः कृताकृता इत्युक्तम् तत्रैव भविष्ये—

पिण्डनिर्वपणं कुर्यान्न वा कुर्याद्विचक्षणः ।
वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु ॥

छागलेयः—

अग्नौकरणमर्घ्यं वाऽवाहनं चावनेजनम् ।
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने विवर्तते ॥

तेनात्र भोजनस्यैव प्रधानत्वाद्यदि विप्रस्य वमनं तदा तस्यैव पार्वणस्य पुनरावृत्तिरिति सिद्धम्। अत्र सांकल्पे विशेषः प्रयोगपारिजाते संग्रहे—

शुभार्थी प्रथमान्तेन वृद्धौ सांकल्पमाचरेत् ।
न षष्ठया यदि वा कुर्यान्महादोषोऽभिजायते ॥

नामगोत्रादिनिषेधोऽप्यत्रैव नतु सापिण्डकश्राद्धे इति स एव ।

अत्रायं क्रमः। नान्दीश्राद्धे दैवे क्षणः क्रियताम् इति द्वौ युगपन्निमन्त्र्य ओंतथेति विप्राभ्यां युगपदुक्ते प्राप्नुतां भवन्तौ प्राप्नुवाव इति वैश्वदेववत् पित्र्ये च द्विवचनान्तेन विप्रद्वये प्रयोगं कुर्यात् । आहिताग्निस्तु

---

(१) 'प्राक्कुलेषु' क०।

हेमाद्रौ ब्राह्मे—

योऽग्नौ तु विद्यमानेऽपि वृद्धौ पिण्डान्न निर्वपेत् ।
पतन्ति पितरस्तस्य नरके स च पच्यते ॥

बह्वृचपरिशिष्टे–"द्वौ दर्भा प(१)वित्रे, पवित्राणि चत्वारि । शंनोदेवीत्यनुमन्त्रितासु यवानावपति–'यवोसि सोमदेवत्यो गोसवे देवनिर्मितः । प्रत्नवाद्भिः प्रत्तः पुष्ट्या नान्दीमुखान्पितॄनिमाँल्लोकान्प्रीणयाहिनः स्वाहेति स्वाहार्घ्याः इति पृच्छति । विश्वेदेवा इदं वो अर्घ्यं, नान्दीमुखाः पितर इति यथालिङ्गम*र्घ्यदानं गन्धादिदानं द्विर्द्विः । पाणौ *होमोऽग्नये कव्यवाहनाय स्वाहा, सोमाय पितृमते स्वाहेति । 'अतो देवा अवन्तु नः' इत्यङ्गुष्ठग्रहणम् । पावमानीः शंवतीरैन्द्रीरप्रतिरथं च श्रावयेन्मधुवाता ऋचःस्थाने उपास्मै गायतेति पञ्च मधुमतीः श्रावयेदक्षन्नमीमदन्तेति च षष्ठीं भुक्तशेषेणैकैकस्य द्वौ द्वौ पिण्डौ दद्यात्" इति । चन्द्रिकायां वृद्धवसिष्ठः–

पितृप्रश्ने तु *संपन्नं दैवे रुचितमित्यपि ।

सहायभूतपात्रान्तरसहितानीत्यर्थः । *अर्घ्यदानमिति । पितरः प्रीयन्तामिति अपां प्रतिग्रहणम् । एवमुत्तरयोरपि पितामहप्रपितामहयोः । सर्वं द्विर्द्विरिति परिशिष्टशेषः । गन्धादीनि एकैकत्र द्विर्द्विर्देयमित्यर्थः । *होमः अग्नौकरणहोमः । तथा पृषदाज्यमिश्र ओदनो हविः सर्वत्र तस्य अर्धं द्वे द्वे आहुतीर्जुहुयात्सर्वत्रान्नकार्ये । दधिमिश्रमाज्यं पृषदाज्यम् ।

भविष्ये—

पृषदाज्येन संयुक्तं दद्यादोदनमादितः ।
पायसं च तथा मध्यं मोदकादिरसोत्तरम् ॥
मधुरं भोजनं दद्यान्नचाम्लं परिवेषयेत् ॥

---

(१) 'पवित्रे' नास्ति ग० ।

दधिकर्कन्धुमिश्राश्च पिण्डाः कार्या यथाक्रमम् ॥

कात्यायनः–'त्यमूषुवाजिनम्' इति विप्रांश्च विसर्जयेत् । *'नान्दीमुखाः पितरः प्रीयन्ताम्' इत्यक्षय्यस्थाने स्वधां वाचयिष्य इत्यस्य स्थाने 'नान्दीमुखान् पितॄन् वाचयिष्ये' इति, न स्वधां प्रयुञ्जीतेति । अत्र साग्निरनग्निर्वा आदौ वैश्वदेवं कुर्यात् ।

---

*सम्पन्नमिति । पित्र्ये शातातपः—

प्रदद्यात्प्राङ्मुखः पिण्डान्वृद्धौ नाम्ना स बाह्यतः ।
स कर्त्ता बाह्यतो भोजनशालाया बहिः नतूच्छिष्टसमीपे ।
प्राङ्मुखांस्त्वथ दर्भांस्तु दद्यात्क्षीरावसेचनम् ॥

मार्कण्डेये—

नान्दीमुखानां कुर्वीत प्राज्ञः पिण्डोदकक्रियाम् ।
प्राजापत्येन तीर्थेन यच्च किञ्चित्प्रजायते ॥

पिण्डाधिकारे ब्राह्मे—

अर्घ्यं पुष्पं च धूपं च प्रशस्तमनुलेपनम् ।
वासः साध्वहतं शुद्धं देयं च सदशं समम् ॥
अथाक्षय्योदकस्थाने दत्त्वा क्षीरयवादिकम् ।
नान्दीमुखेभ्यश्चाक्षय्यमिदमस्त्विति सञ्जपेत् ॥

*नान्दीमुखा इति ।

नान्दीमुखाश्च पितरः प्रीयन्तामिति वाचयेत् ।
विश्वेदेवाश्च प्रीयन्तामिति दाताऽब्रवीदिमान् ॥
प्रीताभवन्तु ते तं च वदेयुर्मधुराक्षरम् ।
प्रीयन्तामिति च ब्रूयात्पिण्डान्स्वाहेति च क्षिपेत् ॥

दातार इति प्रार्थनातः प्राक् प्रार्थनाश्लोको भविष्ये—

माता पितामही चैव तथैव प्रपितामही ।
पिता पितामहश्चैव तथैव प्रपितामहः ॥

आदौ वृद्धौ क्षये चान्ते द(१)र्शे मध्ये महालये ।
एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयते ॥

इत्याशार्के शाङ्खायनपरिशिष्टात् । हेमाद्रौ तु—

शेषमन्नमनुज्ञाप्य वैश्वदेवक्रियां ततः ।
श्राद्धाह्नि श्राद्धशेषेण वैश्वदेवं समाचरेत् ॥

इति चतुर्विंशतिमतान्नान्दीश्राद्धेऽप्यन्ते वैश्वदेव उक्तः । *बह्वृचानामपि वृत्त्यालोचनात्तथैव । पूर्वोक्तं तु येषां परिशिष्टं तद्विषयमन्यविषयं वा ज्ञेयम् । अत्र श्राद्धाङ्गतर्पणं नेत्युक्तं प्राक् ।

इति निर्णयसिन्धौ वृद्धिश्राद्धम् ॥

अथ *जीवत्पितृकश्राद्धम् । तत्रानेकपक्षा दृश्यन्ते । *जीवन्तं पितरं भोजयित्वा परयोः श्राद्धं कुर्यादित्येकः । होमान्तमेव कुर्यादित्यन्यः,

होमान्तः पितृयज्ञः स्याज्जीवे पितरि जानतः ।
पितरं भोजयित्वा वा पिण्डौ निपृणुयात् परौ ॥

मातामहस्तत्पिता च प्रमातामहकादयः ।
एते भवन्तु मे प्रीताः प्रयच्छन्तु च मङ्गलम् ॥

पाद्मे—

एवं शूद्रोऽपि सामान्यं वृद्धिश्राद्धं च सर्वदा ।
नमस्कारेण मन्त्रेण कुर्यादेवादितो बुधः ॥

बह्वृचानामन्ते वैश्वदेवमाह—*बह्वृचानामिति । मृतोद्देश्यकद्रव्यत्यागः श्राद्धम् । अन्यत्र कुण्डपाय्याग्निहोत्रपदवत्तत्पदं गौणमिति मनसिकृत्वाऽऽह—*जीवत्पितृकश्राद्धमिति । *जीवन्तामिति । पितृयज्ञे चत्वारः पक्षाः । तत्र होमान्तमनारम्भो वेति कात्यायनोक्तं पक्षद्वयम् ।

---

(१) 'चान्ते मध्ये श्राद्धे तु पार्वणे' क०छ० ।

इति यज्ञपार्श्वोक्तेः । 'यदि जीवात्पिता न दद्यादाहोमात्कृत्वा विरमेत्' इत्यापस्तम्बोक्तेश्च । 'जीवतां पिण्डानग्नौ हुत्वा परेभ्यो देयम्' इत्यपरः, 'जुहुयाज्जीवेभ्यः' इत्याश्वलायनोक्तेः । जीवतामजीवतां च पिण्डदानमितीतरः 'जीवतामजीवतां वा देयमेवेति हिरण्यकेतुः' इति निगमात् ।

तस्माज्जीवत्पिता कुर्याद्द्वाभ्यामेव न संशयः ।

इति भविष्योक्तेर्द्वाभ्यामेवेत्यन्यः । एते पक्षाः कलौ निषिद्धाः,

प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत् ।
पिण्डनिर्वपणं चापि महापातकसंमितम् ॥

इति पृथ्वीचन्द्रोदये भविष्योक्तेः । चन्द्रिकाप्येवम् । तस्मात् पितरि जीवति श्राद्धानारम्भ एवेत्येकः पक्षः ।

सपितुः पितृकृत्येषु अधिकारो न विद्यते ।

इति कात्यायनोक्तेः ।

जीवे पितरि वै पुत्रः श्राद्धकालं विवर्जयेत् ।

इति हारीतोक्तेश्च । पितुः पित्रादिभ्यो दद्यादिति सिद्धान्तः,

म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् ।

इति मनूक्तेः ।

पितुः पितृभ्यो वा दद्यात्सपितेत्यपरा श्रुतिः ।

इति कात्यायनोक्तेश्च । अयं बहुसंमतः पक्षः । अन्ये शाखाभेदेन ज्ञेयाः । एवं जीवन्मातामहेनाप्यूहेन कार्यं ।

पितरं भोजयित्वा वा पिण्डौ निपृणुयात्परौ ।
येभ्यः पिण्डान् पिता दद्यात्तेभ्यः पुत्रोऽपि वा ददेत् ॥

इति परिशिष्टोक्तं पक्षद्वयम् । तत्र यानि श्राद्धानि पिण्डपि-

*मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ।
*मन्त्रोहेन यथान्यायं शेषाणां मन्त्रवर्जितम् ॥

इति विष्णूक्तेः ।

*एवं मात्रादिकस्यापि तथा मातामहादिके ।

इति पृथ्वीचन्द्रोदयेऽग्निपुराणाच्च । *पितरि जीवति तु स्वमातरि मृतायामपि पितुरेव मातृमातामहयोः कुर्यात् । येभ्य एव पिता दद्यात् इति वक्ष्यमाणवचनात् इति पितामहचरणाः । मदनरत्ने तु–जीवत्पिता स्वमातृमातामहयोर्दद्यात् इत्युक्तम् । कालादर्शेऽप्येवम् । *मृते तु पितरि जीवन्मातृकः पितामह्यादिभ्यो वृद्धौ दद्यात् इति स्मृतितत्त्वादिगौडग्रन्थाः । *दाक्षिणात्यास्तु—

पितृवर्गे मातृवर्गे तथा मातामहस्य च ।
जीवेत्तु यदि वर्गाद्यस्तं वर्गं तु परित्यजेत् ॥

इति वचनात्तद्वर्गत्याग एवेत्याहुः ।

*एवं पतितसंन्यस्तपितृकादेरपि ज्ञेयम्,

वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते *सति ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥

इति षट्त्रिंशन्मतात् । संन्यस्ते जीवतीत्यर्थः । मृते-

तृपक्षकल्पने तेषु एतत्पक्षचतुष्टयमित्याशयेनेदम् । *मातामहानामप्येवमिति । मातामहादीनामेकद्वित्रिषु जीवत्सु एवं पितृपार्वणवदित्यर्थः । *मन्त्रोहः व्याख्यातः । मात्रादिष्वेवमित्याह—*एवमिति । *पितरि जीवति त्विति आश्वलायनान्यपरम् आश्वलायनादीनामपत्यसंस्कारेतरपरं च । अपत्यसंस्कारे तु जीवत्पिता सुतसंस्कारेषु इत्यादि । *मृते त्विति मतान्तरं न दाक्षिणात्येषूपयुक्तम् । *दाक्षिणात्यास्त्विति । प्राग्वत् । *एवमिति सर्वश्राद्धपरम् । *सति जीवति । *मृतेऽपीति । सतीत्यस्य वैय-

तु संन्यस्ते तदाद्येव देयम् । *मृतेऽपि परेभ्य एवेति गौडाः । कात्यायनोऽपि—

*ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते ।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ ॥

अयं च संन्यस्तपित्रादेरविशेषात्सर्व*श्राद्धेऽधिकारः । *एतत्त्रिदण्डिपरम् । एकादशाहपार्वणवार्षिकाद्यपि तस्यैव,

अहन्येकादशे प्राप्ते पार्वणं तु विधीयते ।

इत्युक्त्वा—

त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ॥

इत्युशनसा विशेषोक्तेः । *ब्राह्मणादिहते इत्यादिनिषेधस्त्वेकदण्डादिपरः । अतः परमहंसानां वार्षिकादिकमपि न कार्यमिति शूलपाणिश्राद्धतत्त्वादयो गौडग्रन्थाः । इदमेव तु युक्तम् । यत्तु हेमाद्रौ कौण्डिन्यः—

*दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च ॥ इति,

त*त्संन्यस्तपित्राद्यतिरिक्तविषयम् । मैत्रायणीय-

श्चर्यापत्तिररुचिः । *ब्राह्मणादीति । दर्पादिना गोब्राह्मणाद्यभिभवार्थं प्रवृत्तस्तैर्हतः स आत्मघातित्वात्सम्वत्सरं यावदसंस्कार्यः तावत्तत्पुत्रस्य पुत्रजन्मतीर्थप्राप्त्यादौ । व्युत्क्रमादिति च व्युत्क्रममृतसपिण्डनाभावपक्षे । *श्राद्ध इति । एवं नित्यतर्पणादावपि । शूलपाण्यादिमतमाह—*एतदिति । सङ्गवर्जिते इत्येतादित्यर्थः । *ब्राह्मणादीति ।

ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते ।
व्युत्क्रमाच्च मृते नैव कार्यं श्राद्धादि किञ्चन ॥

इति निषेधस्तु इत्यर्थः । *दर्शश्राद्धमिति । *संन्यस्त-

परिशिष्टे--

*उद्वाहे *पुत्रजनने पैत्र्येष्ट्यां सौमिके मखे ।
तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः ॥

तत्रैव--

महानदीषु सर्वासु तीर्थेषु च गयामृते ।
जीवत्पितापि कुर्वीत श्राद्धं पार्वणधर्मान्वित् ॥

गयामृते इति मातृव्यतिरिक्तविषयम्,

अन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि ।
मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति ॥

इति तत्रैवोक्तेः । गयाप्राप्तौ प्रासङ्गिक्याम्,

गयां प्रसङ्गतो *गत्वा मातुः श्राद्धं समाचरेत् ।

इति वचनात् । तेन मृतमातृको गयायां तत्पार्वणमात्रं कुर्यात् । तज्जीवने तु तीर्थश्राद्धमपि नेति कालादर्शस्मृतिदर्पणादयः । अन्ये तु (१)गत्वा श्राद्धं नेति निषेधार्थः । *सामान्यतः प्राप्तं तीर्थश्राद्धं भवत्येव गयायामित्याहुः ।

पित्रादीति । वस्तुतस्तु प्रतिनिधीभूयैतानि न कुर्यादित्यर्थः । अन्यथाऽधिकाराभावेनाप्राप्तेर्निषेधे वैयर्थ्यापातात् । एवमग्रेऽपीति । *उद्वाहे स्वस्य द्वितीयादिविवाहे प्रथमविवाहे तु "नान्दीश्राद्धं पिता कुर्यात्" इत्युक्तम् । *पुत्रजनन इति । जीवत्पितृकाधिकारिककर्माङ्गाभ्युदयिकमात्रोपलक्षणमेतत् । व्याख्यातं चेदं प्राक् । *गत्वेति । तदुद्देश्यकवैधयात्रापूर्वकमित्यर्थः । *सामान्यत इति । अवैधगमने तु पितुर्देवता उद्दिश्य श्राद्धस्य कर्त्तव्यत्वान्मृतमातृकेन पितृपत्नीत्वेन तामुद्दिश्य दत्त्वा मातृत्वेनापि दद्यादित्यर्थः । वस्तुतस्तु गयायामिति पर्युदस्तं जीवत्पितृकस्य मृतायां मातरि तदुद्देश्यकमेव

---

(१) 'गया' क० ।

*(१)यदा तु पितुः प्रतिनिधित्वेन गयां याति, तदा यजमानस्य पितृपितामहप्रपितामहा इत्येव श्राद्धम्। तत्र स्वमातुः पितृपत्नीत्वेनैकोद्दिष्टं कृत्वा मातृत्वेन पुनः पार्वणं कुर्यादिति त्रिस्थलीसेतौ। तच्च फल्गुविष्णुपदाक्षय्यवटेष्वेवेति केचित्। आद्यन्ते एवेत्यन्ये। मध्यमान्ते इत्यपरे। सङ्कोचहेत्वभावात्तत्रत्यसर्वश्राद्धानि मातुः कार्याणीति युक्तं प्रतिभाति। यत्तु मदनपारिजाते--

*न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः।
येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः॥

इति सुमन्तूक्तेः साग्नेरेव जीवत्पितृकस्य तीर्थादिश्राद्धमुक्तम्। साग्नेरपि मैत्रायणीयशाखीयस्यैव नान्येषाम् 'षडेते जीवतः पितुः' इति तत्परिशिष्ट एवोक्तेरिति रत्नावलीदिवोदासाद्याः। तदयुक्तं, *सौमन्तवं पिण्डपितृयज्ञविषयं संन्यस्तपित्राद्यतिरिक्तविषयं वेति पृथ्वीचन्द्रोदयोक्तेः। *वृद्धौ तीर्थे चेत्यादेः साधारण्ये-

प्रतिप्रसूयते वाक्ये तथैव श्रवणात्। पर्युदासवाक्ये च यात्रानुपादानात् तत्पूर्वकश्राद्धपर्युदासे मानाभावात्। "गयां प्रसङ्गतो गत्वा" इति च पित्राद्युद्देश्यकयात्रायां जीवत्पितृकं प्रत्यप्राप्तेरनुवादकमेवेति। स्वयंसुत इत्यत्र स्वयंफलमाह—*यदेति। *सौमन्तवमिति। सौमन्तवं च न सामान्यतोऽनाहिताग्नेः श्राद्धनिषेधकं मात्रादिवार्षिकाद्यकरणापत्तेः। तस्मादग्निसाध्येषु आन्वष्टक्यादिषु साग्निको जीवत्पितृकः पिण्डपितृयज्ञकल्पं विना श्राद्धं न कुर्यादित्यर्थकमिति पिण्डपितृयज्ञपदं च आरब्धपिण्डपितृयज्ञलाभार्थम्, अनुष्ठितप्रकृतेरेव विकृतावधिकारात्। *वृद्धाविति। अयं भावः—

जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाखिलम्।

---

(१) 'यदाऽपि' क० छ०।

ना*स्यापि *तथात्वाच्च । तथा निरग्नेरपि नान्दीश्राद्धमुक्तं प्राक् । एवं *पितामहजीवनेऽपि ज्ञेयम् । *विशेषः पितृकृतजीवत्पितृकानिर्णये ज्ञेयः ।

सपितुः पितृकृत्येषु अधिकारो न विद्यते ॥

इत्यादिवचनैर्जीवत्पितृकस्य श्राद्धं निषिद्धमेव । एवञ्च जीवत्संन्यासिपतितपितृकयोरपि निषेधप्रवृत्तेः श्राद्धेऽनधिकारात्तत्र देवताविधानं नोपपद्येतेत्यतः सर्वेऽप्यमावास्यादिश्राद्धविधयः जीवद्जीवत्पितृकसाधारणा एव स्वीकार्याः । तत्र जीवति पितरि दर्शश्राद्धादिकं पित्रादिपार्वणदेवताभावादभ्युदितेष्टावुपांशुयाजवल्लुप्यते । एतस्यैव जीवत्पिता नैव कुर्यादित्यादि सपितुः पितृकृत्येऽष्वित्यादि चानुवादकम् । वैधदेवताप्राप्तौ पुनः प्रवर्त्तन्ते इति क्रमेण जीवदजीवत्पितृकसाधारण्यमिति । *अस्यापि सौमन्तवस्यापि । *तथात्वात् जीवदजीवत्पितृकसाधारण्यात् । तथाच जीवदजीवत्पितृकः साग्निकः पिण्डपितृयज्ञकल्पेन श्राद्धं कुर्यात् । निषेधस्त्वनुवादः । तत्राजीवत्पितृकस्य देवतांशे कथन्ताविरहान्मृतपितृके "येभ्य एव" इति देवतोक्तिः । *पितामहेति । पितृपितामहयोर्जीवने इत्यर्थः । *विशेषः अपसव्यनिषेधादिः । अथवा नन्वेवं तेषां पितामहप्रपितामहवृद्धप्रपितामहत्वेन देवतात्वं स्यादित्यत्राह–विशेष इति । तत्र पितुः पितृपितामहप्रपितामहत्वेनैव;

म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् ।
पितुः स नाम संकीर्त्य कीर्तयेत्प्रपितामहम् ॥

इति मनूक्तेः । अत्राद्यन्तग्रहणेन पितृपितामहत्वेनैव पितामहादीनां जीवत्पितृकं प्रति देवतात्वं तेषु च पितृत्वादेः स्वप्रतियोगिकत्वाभावात्पितृप्रतियोगिकत्वाच्च सम्बन्धघटकत्वेन पिता निर्देष्टव्यः । तथाच जीवत्पितृकैः श्राद्धतर्पणादौ पितुः पितृपितामहप्रपितामहानामित्येव प्रयोगः कार्य इति । पितृपिता-

अथ पितामहे जीवति मृते च पितरि यद्यपि---

पितामहो वा तच्छ्राद्धे भुञ्जीतेत्यब्रवीन्मनुः ।

इति मनुना जीवतः पितामहस्य भोजनमुक्तं तथापि प्रत्यक्षार्चनस्य पूर्वं निषिद्धत्वात् पितामहं विहाय पितृप्रपितामहवृद्धप्रपितामहेभ्यो देयम्,

पिता यस्य निवृत्तः स्याज्जीवेच्चापि पितामहः ।
पितुः स नाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् ॥

इति मनूक्तेः । अयमेव सर्वसंमतः पक्षः । यत्तु छन्दोगपरिशिष्टे—

पितामहे म्रियमाणे पितुः प्रेतस्य निर्वपेत् ।
पितुस्तस्य च वृत्तस्य जीवेच्चेत्प्रपितामहः ॥

इति एकपुरुषं द्विपुरुषं वा पार्वणमाह तत्तीर्थपितृयज्ञपरम् । वृद्धौ पूर्वोक्तमेव । एवं पूर्वयोर्मृतयोः प्रपितामहे जीवति पितृमात्रे मृते परयोर्जीवतोश्च वृद्धप्रपितामहादिभ्यो ज्ञेयम् ।

जीवन्तमपि दद्याद्वा प्रेतायान्नोदकं द्विजः ।

इति कात्यायनोक्तेश्च । एतत्सर्वं मनसिकृत्वाऽऽह हेमाद्रौ विष्णुः—'पितरि जीवति यः श्राद्धं कुर्याद्येषां पिता

महग्रहणं चोपलक्षणं पूर्वेषामिति सामान्यत उपादानात् । तेन पितुर्मातृपितामहीप्रपितामहीनामिति पितुर्मातामहमातृपितामहमातृप्रपितामहानामिति पितुः पत्न्या इति पितुर्भ्रातुरित्यादिरेव प्रयोग इति । एवं स्वाधिकारिकं यन्मातृमातामहपितृव्यादिवार्षिकश्राद्धं तत्र मातृत्वादिनैव देवतात्वं "मातुः श्राद्धं सुतः स्यात्" "कुर्यान्मातामहश्राद्धम्" "अपुत्रस्य पितृव्यस्य" इत्यादितः तथैव प्रत्ययात् । पित्राधिकारिकं चेत्तत्प्रेरितः करोति तदा अमुकस्य यजमानस्य पितृमातृपत्नीभ्रातॄणामित्यादिः प्रयोगः । अधिकं तत्रैव

कुर्यात्तेषां, पितरि पितामहे च जीवति येषां पितामहः पितरि पितामहे प्रपितामहे च जीवति नैव कुर्यात् । यस्य पिता प्रेतः स्यात्स पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् । यस्य पितामहः प्रेतः स्यात्स तस्मै पिण्डं निधाय प्रपितामहात्पराभ्यां दद्यात् । यस्य पिता पितामहश्च प्रेतौ स्यातां स ताभ्यां पिण्डौ दत्त्वा पितामहपितामहाय दद्यात्' ।

मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ।
मन्त्रोहेन यथान्यायं शेषाणां मन्त्रवर्जितम् ॥ इति ।

अत्र पितृव*न्मातामहे जीवति तत्पित्रादिभ्यः । यथा तत्र त्रिषु जीवत्सु नैव कुर्यात्तथात्रापीत्यादि सर्वमतिदेश्यम् । *एवं मातृजीवनेऽपीति शूलपाणिकालादर्शौ । तन्न, "येभ्य एव" इत्यादौ यच्छब्दादेर्व्यक्तिविशेषवाचित्वेन *तदप्रसङ्गादिति दिक् । *उत्तरार्धं व्या-

द्रष्टव्यम् । *मातामहे जीवतीति । मातामहादीनामेकद्वित्रिषु जीवत्सु एवं पितृपार्वणवदित्यर्थः । *एवमिति । मात्रादिष्वप्येवं न्यायसाम्यादित्यर्थः । न च—

मातामहानामप्येवं श्राद्धं कुर्याद्विचक्षणः ।

इत्यत्र मातामहे जीवति च शब्दान्मातरि च जीवत्यां मातृपितामहप्रपितामहादिभ्यो देयमिति वाच्यम्, एवंशब्देन अतिदेशवाक्यस्य येभ्य एव पिता दद्यातेभ्यो दद्यादित्यादिसाक्षाद्विधायकवचनैर्बाधात् । तत्तु मृतपितृकपरम् । आदिना जीवन्मातृपि(१)तृकः पितुः (पि(२)तृमात्रादिभ्यो दत्त्वा स्वमातामहेभ्यो दद्यात् । तथा जीवत्पितृमातामहकः पितुः) पितृमातामहादिभ्यो दत्त्वा स्वमात्रादिभ्यो दद्यादित्यस्य ग्रहः । *तदप्रसङ्गादिति । स्वीयमातृमा-

---

(१) 'पितृ' नास्ति घ०
(२) धनुश्चिन्हान्तर्गतं नास्ति घ०

ख्यातं प्राक्। यत्त्वत्र विज्ञानेश्वरेणोक्तं 'पित्रे पिण्डं निधायेति पितुरेकोद्दिष्टविधिना श्राद्धं कृत्वा प्रपितामहादिभ्यः पार्वणं कुर्यात्'। तद्व्युत्क्रममृतसपिण्डीकरणाभावपक्षे सपिण्डीकरणस्थानापन्नं ज्ञेयम्,

व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिण्डता।

इति वचनात्। *दर्शादौ तु पितुरेकोद्दिष्टमेव कार्यम् 'न जीवन्तमतिददाति' इति श्रुतेः।

जीवेत्पितामहो यस्य पिता चान्तरितो भवेत्।
पितुरेकस्य दातव्यमेवमाहुर्मनीषिणः॥

इति यज्ञपार्श्वोक्तेः(१)।

पितामहे जीवति वै पितर्यैव समापयेत्॥

इति हारीतोक्तेश्च। शिष्टास्तु—

व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिण्डता।

तामहादिभ्यो दानाप्रसङ्गादित्यर्थः। लक्षणायां मानाभावादिति भावः। मृतमातृकादिरपि पितुरेव पितृमातृमातामहादिभ्य एव दद्यादिति दिगर्थः। *उत्तरार्धे "मन्त्रोहेन यथान्यायम्" इत्याद्यर्धम्। नहीदमूहं विधत्ते न्यायप्राप्तानुवादत्वात्। अत एव च यथान्यायमिति। मातामहपार्व्वणस्य "मातामहानामप्येवम्" इत्यनेनातिदेशेन प्राप्तौ अपूर्वप्रयुक्तत्वात् मन्त्राणां क्वचिदूहो भवति क्वचिन्न। तत्र शुन्धन्तां मातामहा इत्याद्यूहः शुन्धन्तां पितर इत्यादिवाक्ये पितृपदस्य जनकपरतया मातामहादौ बाधितार्थकत्वात्। "एतद्वः पितरो वासः" इत्यादौ न पितृपदस्य सपिण्डनान्तश्राद्धजन्यपितृत्वावच्छिन्नार्थकतया तादृशार्थाबाधादिति। *दर्शादा-

---

(१) अत्र—सत्यव्रतः जीवत्पितामहविषये—'पितामहे स्थिते यस्य पिता यदि विपद्यते। द्वौ पिण्डावेकनामानावेकश्च प्रपितामहे॥ द्वौ पिण्डौ पितृनाम्नैव दद्याज्जीवत्पितामहः। प्रपितामहस्य चैवैकं पितुः प्रत्याब्दिकादिषु॥' इत्यधिकं केषुचित्पुस्तकेषु।

यदि माता यदि पिता भर्ता नैष विधिः स्मृतः ॥

इति माधवीये स्कान्दोक्तेर्व्युत्क्रममृतसपिण्डीकरणाभावः पितृव्यादिविषय इत्याहुः । एष विधिर्निषेधरूपः ।

त्रिषु जीवत्सु विष्णुराह—'त्रिषु जीवत्सु नैव कुर्यात्' इति एतद्दर्शादिविषयम् । नान्दीश्राद्धं तु परेभ्यस्त्रिभ्यो भवत्येवेति कल्पतरुः । पृथ्वीचन्द्रोदयस्तु—

दद्यात्त्रिभ्यः परेभ्यस्तु जीवेच्चेत्त्रितयं यदि ।

इति मनूक्तेः सर्वत्र विकल्पः । स च देशाचाराद्व्यवतिष्ठत इत्याह । सुदर्शनभाष्ये तु मासिकश्राद्धं जीवत्पित्रादिना व्युत्क्रममृतपित्रादिना च कार्यमेवेत्युक्तम् । मदनरत्ने क्रतुः—

*अष्टकादिषु संक्रान्तौ मन्वादिषु युगादिषु ।
चन्द्रसूर्यग्रहे पाते स्वेच्छया (१)लभ्ययोगतः ॥
जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाखिलम् ॥

अन्ये विशेषाः श्रीपितृकृतजीवत्पितृकनिर्णये, मत्कृतत्रिस्थलीसेतौ च ज्ञेयाः ॥

इति निर्णयसिन्धौ (२)जीवत्पितृकादिश्राद्धम् ॥

अथ विभक्ताविभक्तनिर्णयः । पृथ्वीचन्द्रोदये मरीचिः—

बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः ।
सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम् ॥
द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥

विति । 'व्युत्क्रममृतसापिण्डनाभावपक्षे' इत्यनुवर्त्तते । *अष्टकादिष्विति । मातिनिद्धं न कार्यमित्येवम्परमिदम् । अन्यथा

---

(१) 'पूज्ययोगतः' क० छ० । (२) 'जीवत्पित्रादिश्राद्धम्' क० छ० ।

ज्येष्ठस्य कर्तृत्वेऽपि सर्वे फलभागिन इत्यर्थः। तेन ये ब्रह्मचर्यादिनियमास्ते फलितसंस्कारत्वात्सर्वैः कार्याः। एवं संसृष्टिनामपि तुल्यत्वात्। मिताक्षरायां नारदः—

*भ्रातृणामविभक्तानामेको धर्मः प्रवर्तते।
विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथक्॥

बृहस्पतिरपि—

*एकपाकेन वसतां पितृदेवद्विजार्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे॥

अत्र यद्यप्यविशेषश्रवणात् ब्रह्मयज्ञसंध्यादिष्वप्यविभक्तानां पृथङ्निषेधः प्राप्नोति, तथापि द्रव्यसाध्यश्राद्धवैश्वदेवादिष्वेव सः। द्रव्यस्यानेकस्वामिकत्वेनैकस्य व्ययेऽनधिकारात्। यानि तु द्रव्यासाध्यानि मन्त्रजपोपवाससंध्याब्रह्मयज्ञपारायणादीनि नित्यनैमित्तिककाम्यानि तेषु

प्राप्त्यभावेन निषेधायोगादिति भावः। *भ्रातृणामिति। अविवक्षितम्, अविभक्तानामित्येतावन्मात्रं विवक्षितम्। तेन पितृपितामहपुत्रपौत्रादिष्वविभक्तेषु सपिण्डेष्वेक एव धर्म इत्यर्थः। अनेन च देशकालकर्त्रादीनामैक्ये कर्मणस्तन्त्रं न बाध्यते एकप्रयोगकत्वेन न्यायेनैव तत्प्राप्तेः, किन्त्वविभक्तकर्तृभेदे, वचनात्। तेन श्रौतस्मार्ताग्निसाध्यास्तावद्धर्मा अविभक्तानां पृथगेवेति आवहनीयत्वावसथ्यादीनां ससम्बन्धिकत्वेन भेदात्। एवं पितृभ्रातृपुत्रादीनाममावास्यादौ श्राद्धादि पृथगेव देवताभेदात्। भ्रातॄणां तु निरग्निकानां तन्त्रेणैव देवतैक्यात्। प्रवासादिना देशभेदे तु भिद्यन्ते। एवं साग्निकानामग्निसाध्यान्यपि भिद्यन्ते। गृहस्थस्य देवतापूजादि वैश्वदेवादि चैकमेवेत्याह—*एकपाकेनेति। एतच्च

पृथगेवाधिकारः, द्रव्यव्ययाभावेऽनुमत्यनपेक्षणात् । 'द्रव्येण चाविभक्तेन' इत्यस्याविषयत्वात् ।

पृथगप्येकपाकानां ब्रह्मयज्ञो द्विजातिनाम् ।
अग्निहोत्रं सुरार्चा च संध्या नित्यं भवेत्तथा ॥

इति प्रयोगपारिजाते आश्वलायनस्मृतेश्च । *अग्निहोत्रशब्दोऽग्निसाध्यश्रौतस्मार्तनित्यकर्मपरः तेष्वप्यन्यानुमत्यैवाधिकारेण न्यायसाम्यात् । *पितृश्राद्धादिषु तुल्यफलेषु नित्येष्वनुमतिं विनाप्येकस्याधिकारः,

एकोऽपि स्थावरे कुर्याद्दानाधमनविक्रयम् ।
आपत्काले कुटुम्बार्थे धर्मार्थे च विशेषतः ॥

इति वचनात् । धर्मार्थेऽवश्यकर्तव्ये पितृश्राद्धादाविति विज्ञानेश्वरः । केचित्त्वविभक्तानामपि पृथक्पाकत्वे देशान्तरे च दार्शिकाब्दिकयोः पृथक्त्वमाहुः,

भ्रातृणामविभक्तानां पृथक्पाको भवेद्यदि ।
वैश्वदेवादिकं श्राद्धं कुर्युस्ते वै पृथक् पृथक् ॥

इति हारीतोक्तेः ।

अविभक्तेन पुत्रेण पितृमेधो मृताहनि ।
देशान्तरे पृथक्कार्यो दर्शश्राद्धं तथैव च ॥

इति यमोक्तेश्चेति । तत्र मूलं चिन्त्यम् । तदयमर्थः । पञ्चमहायज्ञमध्ये देवभूतपितृमनुष्ययज्ञानन्यानुमत्या ज्येष्ठ एव कुर्यात् ।

होमाग्रदानरहितं न भोक्तव्यं कदाचन ।
अविभक्तेषु संसृष्टेष्वेकेनापि कृतं कृतम् ॥

इति व्यासोक्तेश्च । यस्य तु ज्येष्ठेनाकृते वैश्वदेवेऽन्नं सिद्ध्येत्तेन तूष्णीमग्नौ किंचित्क्षिप्त्वा भोक्तव्यम् । यस्य

निरग्निकपरम् । न्यूनतां परिहर्तुमाह—*अग्निहोत्र शब्द इति ।

त्वेषामग्रतोऽन्नं सिद्ध्येत्स नियुक्तमग्नौ कृत्वाग्रं ब्राह्मणाय दत्त्वा भुञ्जीतेत्यविभक्ताधिकारे पृथ्वीचन्द्रोदये गोभिलोक्तेः ।

आश्वलायनस्तु पाकपार्थक्ये पृथक्त्वं तदेकत्वेऽपृथक्त्वमाह--

वसतामेकपाकेन विभक्तानामपि प्रभुः ।
एकस्तु चतुरो यज्ञान् कुर्याद्वागयज्ञपूर्वकान् ॥
अविभक्ता विभक्ता वा पृथक्पाका द्विजातयः ।
कुर्युः पृथक्पृथग्यज्ञान् भोजनात् प्राग्दिने दिने ॥ इति ।

ब्रह्मयज्ञसंध्यास्नानतर्पणादि तूक्तहेतोः पृथगेव । देवपूजा तूक्तवचनद्वयादेकत्र पृथग्वा । दर्शग्रहणश्राद्धादि त्वेकस्यैव । तीर्थश्राद्धाद्यपि युगपत्सर्वेषामविभक्तानां प्राप्तावेकस्य । भेदेन प्राप्तौ भिन्नम् । गयाश्राद्धेऽप्येवम्,

एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः ।
तेषां तु समवेतानां यद्येकोपि गयां व्रजेत् ॥
तारिताः स्मो वयं तेन स याति परमां गतिम् ॥

इति हेमाद्रौ कौर्मोक्तेः । काम्येऽपि दानहोमादावन्यानुमत्यैवाधिकारः । *द्रव्यासाध्यजपादौ तां विनापि । अपरार्के पैठीनसिः—

विभक्तैस्तु पृथक्कार्यं प्रतिसांवत्सरादिकम् ।
*एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम् ॥

सांवत्सरात्पूर्वाणि मासिकान्येकत्रैव । तदाह लघु

---

*पितृश्राद्धादिषु आदिना मातृश्राद्धादिग्रहः । *द्रव्येति । काम्ये इत्यनुवर्त्तते । *एकेनैवेति । तत्रापि ज्येष्ठ एव कुर्यात्,

एकेनैव तु कार्याणि संविभक्तधनेष्वपि ।

हारीतः—

सपिण्डीकरणान्तानि यानि श्राद्धानि षोडश ।
पृथङ् नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् ॥

सपिण्डनं मासिकोपलक्षणम्,

अर्वाक्संवत्सराज्ज्येष्ठः श्राद्धं कुर्यात्समेत्य तु ।
ऊर्ध्वं सपिण्डीकरणात् सर्वे कुर्युः पृथक्पृथक् ॥

इति व्यासोक्तेः । उशनाः—

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश ।
एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥
मघात्रयोदशीश्राद्धं त्वविभक्तानामपि पृथगित्यु-

इति वचनात् । सपत्नानां भ्रातॄणां तु ज्येष्ठे सत्यपि स्वस्वमातृवार्षिकमान्वष्टक्यं स्वस्वमातामहवार्षिकं च भवत्येव मुख्यपुत्रत्वान्मुख्यदौहित्रत्वाच्च । मुख्याभावे तु सपत्नीपुत्रेषु ज्येष्ठ एव कुर्यात् । एवमविभक्तेषु भ्रातृषु कस्यचिदेव सुतसंस्कारः स्वद्वितीयाद्युद्वाहो वा तदा स एव वृद्धिश्राद्धं कुर्यात्, तस्य तन्मात्रकर्तव्यत्वात् । तीर्थे यदा एक एव गच्छति तदा स एव तीर्थश्राद्धं कुर्यात्, तीर्थप्राप्तेर्निमित्तस्य जातत्वात् नैमित्तिकस्यावश्यकत्वात् । इह च सर्वेषां गमने ज्येष्ठ एव कुर्यात् "एकेनैव" इत्यस्य इहापि अविशेषात् । यदि पित्रा सह पुत्रास्तीर्थं गतास्तदा पुत्राणां न पृथक् तीर्थश्राद्धं पित्रधीनत्वेनास्वातन्त्र्यात् । पितुरशक्त्यादिना प्रतिबन्धे तु तत्प्रतिनिधित्वेन भवत्येव । यदि तु पिता तीर्थेऽस्ति पुत्रश्च गतः तदा स्वातन्त्र्येण निमित्तस्य जातत्वात्कालभेदेन तदुपजीवनासम्भवात्पृथक् तीर्थश्राद्धं कुर्यादेव । एवमेव ज्येष्ठभ्रातरि तीर्थगते कनिष्ठस्य तत्र गमने श्राद्धप्राप्तिर्द्रष्टव्या । विभक्तानां तु परस्परेण सह पित्रा वा सह तीर्थगते पितरि तीर्थस्थे वा तीर्थगमने प्रागुक्तवचनात्पृथगेव तीर्थश्राद्धं । संन्यस्तादिपितृकाणां त्वविभागे ज्येष्ठेनैव, विभागे

क्तं प्राक् । यत्तु वृद्धवसिष्ठः—

मासिकं च वृषोत्सर्गं सपिण्डीकरणं तथा ।
ज्येष्ठेनैव प्रकर्तव्यमाब्दिकं प्रथमं तथा ॥ इति ।

तन्निर्मूलम् । बह्वृचपरिशिष्टे 'नवश्राद्धं सह दद्युः' इति ॥

अथ तीर्थश्राद्धम् । *तत्र यद्यप्यस्मत्पितामहकृतात्रिस्थलीसेतुरेव जागर्ति, तथापि किञ्चिदुच्यते । तत्र यात्रायां—

सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि संयतः ।
*प्रायश्चित्ती व्रजेत्तीर्थं पत्नीविरहितोऽपि वा ॥
यज्ञेष्वनधिकारी वा यश्च वा मन्त्रसाधकः ॥

इति कौर्मादिवचनात्साग्नेः *सपत्नीकस्यैवाधिकारः । भारते—

*ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम ।
न वियोनिं व्रजन्त्येते स्नानात्तीर्थे महात्मनः ॥

तु सर्वैः कार्याणीति प्राग्वत् । एवं विभागाविभागयोर्निर्णयस्तर्पणेऽपि द्रष्टव्यः । मात्राद्यौर्ध्वदेहिके तु वक्ष्यति । यात्रायामधिकारिण आह-*तत्रेति । *प्रायश्चित्तीति । यात्रायां प्रायश्चित्तार्थं गमने अपत्नीकस्याप्यधिकार इत्यर्थः । *सपत्नीकस्येति । पत्नी च पातिव्रत्यादियुक्तैव,

पुसां गुणवतीं भार्यां यो वा त्यक्त्वा प्रयाति हि ।
तस्य पुण्यफलं सर्वं वृथा भवति नान्यथा ॥

इति धर्मोक्तेः । गुणवतीमित्युक्तेरपतिव्रतायास्त्यागे न दोषः। एवञ्च साग्नेरिति अतन्त्रम् । निरग्नेरपि संग्रहस्यावश्यकत्वात् । *ब्राह्मण इति । चातुर्वण्यस्याधिकारः । यत्तु—

जपस्तपस्तीर्थयात्राप्रव्रज्यामन्त्रसाधनम् ।

स्कान्दे विधवाधर्मेषु—

स्नानं दानं तीर्थयात्रां विष्णुनामग्रहं मुहुः ।

*एतत् पुत्राद्यनुमत्यैव । सधवायाः पत्या *सहैवेति प्रागुक्तम् । काशीखण्डे—

*मातुः पितुः क्षेप्तुमनास्तथास्थि
सुतस्तु कुर्यात्खलु तीर्थयात्राम् ।

देवताराधनं चेति स्त्रीशूद्रपतनानि षट् ॥

इति मानवं तत्पतिसेवादीनायास्त्रियाः विप्राद्यसेवकस्य शूद्रस्य च निषेधकम् । एवं निरन्तरतीर्थयात्राया अपि तदुभयस्य निषेधः,

निरन्तरं तीर्थसेवा संन्यासो मन्त्रसाधनम् ।
देवताराधनं ध्यानं तेषां पापावहं परम् ॥

इति शातातपोक्तेः । तेषां शूद्राणाम् । अत्रापि विप्रसेवोच्छेदे तात्पर्यं बोध्यम् । भर्तृसेवोच्छेदे तु स्त्रियोपि वा "स्त्रीशूद्राश्च सधर्माणः" इत्युक्तेः । *एतदिति ।

वाल्ययौवनवत्या वा वृद्धया वापि योषिता ।
न स्वातन्त्र्येण कर्तव्यं किञ्चित्कार्यं गृहेष्वपि ॥

इति मनूक्तेः ।

रक्षेत्कन्यां पिता, विन्नां पतिः, पुत्रास्तु वार्धके ।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः ॥

इति योग्युक्तेश्च । *सहैवेति ।

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
पतिसंसेवनादेता लोकानिष्टान्व्रजन्ति हि ॥

इति वचनात् । यज्ञपदस्य तीर्थोपलक्षणत्वात् । *मातुरिति । तीर्थे मात्राद्यस्थिक्षेपकामस्य सर्वस्याप्यधिकारः । प्रसङ्गेन तीर्थप्राप्तौ तु शङ्खः—

तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् ।

तद्विधिः स्कान्दे—

*तीर्थयात्रां चिकीर्षुः प्राग्विधायोपोषणं गृहे ।
गणेशं च पितॄन् विप्रान् साधून् शक्त्या प्रपूज्य च ॥
कृतपारणको हृष्टो गच्छेन्नियमधृक् पुनः ।
*आगत्याऽभ्यर्च्य च पितॄन् यथोक्तफलभाग्भवेत् ।

*उपवासात्प्राग् मुण्डनं च कार्यम्,

प्रयागे तीर्थयात्रायां पितृमातृवियोगतः ।
कचानां वपनं कुर्याद्यथा न विकचो भवेत् ॥

स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु ॥

प्रसङ्गेन वाणिज्यराजसेवादिप्रसङ्गेन । पैठीनसिः--

अर्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ।
षोडशांशं स लभते यः परार्थेन गच्छति ॥

प्रसङ्गेन तदुद्दिश्य तीर्थान्तरप्रसङ्गेन । परार्थेन वेतनं गृहीत्वा । परान्नेनेतिपाठे परान्नं भुञ्जान इत्यर्थः ।*तीर्थयात्रामिति । यात्रामुहूर्तदिनात् प्रपूर्वदिने एकभुक्तहविष्यभोजनब्रह्मचर्यादिनियमाः कार्याः, नियमधृगित्युक्तेः । तदुत्तरादिने मुण्डनं कृत्वा उपवासं संकल्प्य कुर्यात् । ततः परादिने प्रातर्नित्यकृत्यानन्तरं गणेशेष्टदेवते संपूज्य घृतश्राद्धं विधाय यथाशक्ति वस्त्रालङ्कारादिभिर्ब्राह्मणान्संपूज्य यात्रासंकल्पं कृत्वा कार्पटीवेषेण मुहूर्त्तसमये गणेशनमस्कारादि कृत्वा ग्रामान्निर्गम्य क्रोशाभ्यन्तरस्थं वासग्रामं प्रदक्षिणीकृत्य गत्वा श्राद्धशेषघृतेन पारणं कुर्यात् । तदुत्तरादिनादौ स्नानादि विधाय गच्छेदित्यर्थः । उपवासासामर्थ्ये तु “नक्तं हविष्यान्नमनोदनं वा” इत्यादि तत्प्रातिनिधिः कार्यः । एतदेवानुपदं दर्शयिष्यति उपवासादित्यादिना । *आगत्येति । तीर्थयात्रां कृत्वा गृहागतेन पुनः श्राद्धं कार्यमित्यर्थः । नियमानां सेतौ विस्तरः ।

इति विष्णूक्तेः । प्रायश्चित्तार्थयात्रायां गङ्गायां चैतदित्येके । केचित्तु हेमाद्रौ भारते—

केशश्मश्रुनखादीनां वपनं नैव शस्यते ।
अतो न कार्यं वपनं *गयाश्राद्धार्थिना सदा ॥
ये भारतेऽस्मिन् पितृकर्मतत्पराः
संधार्य केशानतिभक्तिभाविताः ।
ऋणक्षयार्थं पितृतीर्थमागता-
स्तेषामृणं संक्षयमेष्यति ध्रुवम् ॥

इति निषधात् गयायात्राङ्गं वपनं न कार्यमित्याहुः । वस्तुतस्तु—'गयाधिकरणकस्यैवायं निषेधो नतु यात्राङ्गस्य 'श्राद्धार्थिना' इत्युक्तेः । 'विशालं विरजं गयाम्' इत्यनेनैकवाक्यत्वाच्च । *श्राद्धं च षड्नवद्वादशदैवतं वा घृतेन कार्यम् ,

गच्छेद्देशान्तरं यस्तु श्राद्धं कुर्यात्स सर्पिषा ।

इति विष्णुपुराणात् । यात्राङ्गवृद्धिश्राद्धोक्तेश्च ।

श्राद्धं च पारणादिने एव ।

उपोष्य रजनीमेकां प्रातः श्राद्धं विधाय च ।
गणेशं ब्राह्मणान्नत्वा भुक्त्वा प्रस्थितवान् सुधीः ॥

---

*उपवासादिति । उपवाससंकल्पादित्यर्थः । तेन पूर्वदिने तद्दिन एव वा मुण्डने न क्षतिः । एके इत्यरुचिः । सा च तीर्थयात्रायामिति सामान्यत उपादानात् । यद्यपि "उद्यतस्तु गयां गन्तुम्" इत्यग्रिमवाक्ये गयापदं श्रूयते तथापि तस्य प्रकृताभिप्रायकतया इतरोपलक्षणत्वात् । अत एव कार्पटीवेषोऽपि सर्वयात्रासु शिष्टसंमत इति । *गयाश्राद्धार्थिनेति । अन्यथा गयायात्रार्थिनेति ब्रूयात् । "गणेशं च" इति चकारादिष्टदेवतासंग्रहः । "पितॄन्" इति । घृतश्राद्धपरम् । तत्र देवता आह–*श्राद्धं चेति ।

इति स्कान्द*लिङ्गात् । गौडनिबन्धे गौतमः—

तीर्थयात्रासमारम्भे तीर्थात्प्रत्यागमेऽपि च ।
वृद्धिश्राद्धं प्रकुर्वीत *बहुसर्पिःसमन्वितम् ॥

*वृद्धिपदं तद्धर्मार्थम् । श्राद्धोत्तरं यात्रासंकल्प इति भट्टाः । वायवीये—

उद्यतस्तु गयां गन्तुं श्राद्धं कृत्वा विधानतः ।
विधाय कार्पटीवेषं ग्रामं गत्वा प्रदक्षिणम् ॥
ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनम् ॥

*घृतस्य *भोजनम् । तच्च क्रोशमध्ये, *श्राद्धोत्तरं क्रोशगमननिषेधात् ।

ततः प्रतिदिनं गच्छेत्प्रतिग्रहविवर्जितः ।

---

*लिङ्गादिति । अनेनार्थवादेन पूर्वदिने उपोष्य द्वितीयेऽह्नि श्राद्धं कृत्वा गणेशादीन् नत्वा पारणां कृत्वा प्रस्थानं कुर्यादिति विधिर्लभ्यते इत्यर्थः । *बहुसर्पिरिति । सर्पिर्मुख्यद्रव्यकमिति भट्टाः । "तीर्थात्प्रत्यागमेऽपिच" इत्यनेन तीर्थात्प्रत्यावृत्तः ग्रामान्तरे कृतोपवासः परेऽन्हि ग्रहानिष्टदेवतां च संपूज्य घृतेन पार्वणं श्राद्धं कृत्वा ब्राह्मणान्संपूज्य स्वग्रामं प्रदक्षिणीकृत्य कार्पटीवेषं बहिरेव त्यक्त्वा गृहं प्रविश्य श्राद्धशेषघृतेन पारणां कुर्यादिति सूच्यते । वस्तुतस्तु "आगत्याभ्यर्च्य च" इति वचनात् गृहमागत्य श्राद्धं कार्यं नतु सकलप्रास्थानिकधर्म इति बोध्यम् । आभ्युदयिकश्राद्धवारणाय *वृद्धीति । एवञ्च यात्राङ्गवृद्धिश्राद्धोक्तेश्चेत्यत्र निर्भरो न कार्यः । कार्पटीवेषः काषायवेषः । गमनमात्रे इत्येके । सदैवेत्यन्ये । *घृतस्येति । घृतस्यैवेत्यर्थः, तस्य मुख्यद्रव्यत्वात् । *भोजनमिति । एतदेव पारणम् । *श्राद्धोत्तरमिति ।

श्राद्धं कृत्वा न गच्छेत अध्वनि क्रोशपूरणे ।

गयायामे*वैतन्नान्यत्रेति *केचित् । हेमाद्रिस्तु 'गयायां श्राद्धदिने एव प्रस्थानम् । तीर्थान्तरे तु श्राद्धोत्तरदिने' इत्याह । प्रभासखण्डे—

यश्चान्यं कारयेच्छक्त्या तीर्थयात्रां नरेश्वरः ।
स्वकीयद्रव्ययानाभ्यां तस्य पुण्यं *चतुर्गुणम् ॥

*यात्रामध्ये आशौचे रजसि वा शुद्धिपर्यन्तं स्थित्वा तदन्ते गच्छेत् । *मार्गवैषम्ये त्वदोषः । यात्रामध्ये तीर्थान्तरप्राप्तौ श्राद्धादि कार्यमेव । वाणिज्याद्यर्थं गतेन तु मुण्डनोपवासादि न कार्यमिति प्रयोगसेतौ भट्टाः । वस्तुतस्तु तत्रापि मुण्डनोपवासश्राद्धादि कार्यम् ,

अर्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति ।

इति निषेधादित्यर्थः । *एतदिति । कार्पटीवेषधारणमित्यर्थः । गयामुपक्रम्यैव तद्विधानादिति भावः ! *केचिदिति । स्वमते गयाशब्दस्य प्रकृतपरतया सर्वतीर्थयात्रायामेतदिति सूचितम् । *चतुर्गुणमिति । स्वयं गच्छन्नन्यं गमयेत्तत्रेदम् । एवमेव—

नेता च त्वमृषीन् यस्मात्तेन तेऽष्टगुणं फलम् ।

इति भारतवचनात् । *यात्रामध्ये इति ।

दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुद्ध्यति ।

इत्युक्तेः । यात्राया दैवकर्मत्वात्पञ्चमेऽहनि रजोनिवृत्तौ सत्यामित्युक्तम् ।

तीर्थे गच्छन् चरेत्सन्ध्यास्तिस्र एकत्र मानवः ।
नास्नातो नाशुचिर्गच्छेन्न भुक्तो नच सूतकी ॥

इति पुराणाच्च । *मार्गेति ।

विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि ।
न तत्र सूतकं तद्वत्कर्मयज्ञादि कारयेत् ॥

इति पैठीनसिवाक्यस्य मार्गवैषम्यादिना गत्यन्तराभावपर-

इति ब्राह्मोक्तेः । स्कान्दे—

द्विर्भोजनं तृतीयांशं हरेत्तीर्थफलस्य च ।
वाणिज्यं त्र्यंशस्तथा भागान् हन्ति सर्वं प्रतिग्रहः ॥
*यानमर्धं चतुर्थांशं छत्रोपानहमेव च ।

इत्युत्तरार्धपाठान्तरम् ।

त्वात् । यद्यपि रजसि तथा प्राचीनग्रन्थेषु नोक्तं तथा गत्यन्तराभावे सूतकित्वादित्याशयः । *यानमिति । साक्षात्स्वशरीरव्यापारासाध्यबुद्धिपूर्वकदेशान्तरप्राप्तिसाधनं यानम् । तत्र—

गोयाने गोवधः प्रोक्तो हययाने तु निष्फलम् ।
नरयाने तदर्धं स्यात्पद्भ्यां तच्च चतुर्गुणम् ॥

चतुर्गुणं चतुष्पादं पूर्णमिति यावत् । कृते चतुर्गुणो धर्म इतिवत् । गोभिलः—

गोभिर्युक्तेन यानेन तीर्थयात्रां करोति यः ।
स याति नरकं घोरं यावद्रोमसंख्यया ॥

अश्वरथयानमपि हययानमेव । तीर्थयात्रा पद्भ्यामेव कार्या,

तीर्थानुगमनं पद्भ्यां तपः परमिहोच्यते ।
तदेव कृत्वा यानेन स्नानमात्रफलं लभेत् ॥

इति प्रभासखण्डात् । अशक्तस्य तु गोभिलः—

असमर्थस्तु यानेन तीर्थयात्रां समाचरन् ।
तदुक्तं फलमाप्नोति स्वशक्त्या धर्ममाचरन् ॥

कौर्मे—

नरयानं चाश्वतरीहयादिसहितो रथः ।
तीर्थयात्रास्वशक्तानां यानदोषकरं नहि ॥

नौकापि यानमेव, परन्तु यत्र नावा विना गमनं दुर्घटं शङ्खोद्धारगङ्गासागरादौ मार्गस्थनदीपरतीरे च तत्र न दोषः अन्यत्र दोष एवेति स्पष्टं सेतौ । एवं यात्राकालशुद्धिः "नीचस्थे वक्रसंस्थे"

अत्र नदीषु विशेषः—

*मार्गेऽन्तरा नदीप्राप्तौ स्नानादि परपारतः ।
अर्वागेव सरस्वत्या एष मार्गगतो विधिः ॥

इत्यादिना ग्रन्थ एव सेतौ चोक्ता । क्वचिच्च गुरुमौढ्यादेर्न दोषः—

गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये ।
सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ।

वायवीये—

गयायां सर्वकालेषु पिण्डं दद्याद्विधानतः ।
अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपि बृहस्पतौ ।

तथा—

अधिमासे च जन्मर्क्षे अस्ते च गुरुशुक्रयोः ।
तीर्थयात्रा न कर्तव्या गयां गोदावरीं विना ॥

यदि तीर्थयात्रायै चलितः परावर्त्तते तदा गारुडे—

तीर्थं चलित्वा यः कोपि पुनरायाति च गृहे ।
अनुज्ञातः शुभैर्विप्रैः प्रायश्चित्तं समाचरेत् ॥

संकल्पबाधनिमित्तकं प्रायश्चित्तं ब्राह्मणानुज्ञया चरेदित्यर्थः ।

यदा तीर्थं प्रति चलितः तीर्थमप्राप्यैव मृतस्तदोक्तं गारुडे—

यस्तीर्थसंमुखो भूत्वा व्रजन्ननशने कृते ।
चेन्म्रियेदन्तराले तु ऋषीणां मण्डलं व्रजेत् ॥ इति ॥

चकाराध्याहारात् अनशने मासोपवासादिव्रते च कृते इत्यर्थः । तथाचोभयत्राप्यन्तरालमरणे ऋषिलोकप्राप्तिरित्यर्थः । *मार्गे इति । मार्गं गच्छतः सरस्वतीभिन्ननदीप्राप्तौ परतीरे स्नानादिकार्यं तीर्थरूपनिमित्तसत्त्वात् । सरस्वत्यास्तु अर्वाक् तीरे एवेत्यर्थः । यत्र सरस्वतीभिन्ननद्यामर्वाक् तीर्थविशेषः सरस्वत्यास्तु परपारे तत्र क्रमेण प्रागपरास्मिंश्च स्नानादि कार्यं, तत्रापि तीर्थक-

यत्तु—

पितॄनतर्पयित्वा तु नदीस्तरति यो नरः।
तस्यासृक्पानकामास्ते भवन्ति भृशदुःखिताः॥ इति,

तत्सरस्वतीपरम्। शङ्खः—

तीर्थं प्राप्यानुषङ्गेण स्नानं तीर्थे समाचरेत्।
स्नानजं फलमाप्नोति तीर्थयात्राकृतं न तु॥

स एव—'न स्रवन्तीमतिक्रामेदनवासिच्य'। *तीर्थप्राप्तौ तु प्रभासखण्डे—

*यानानि तु परित्यज्य भाव्यं पादचरैर्नरैः।
लुठित्वा लोठनीं तत्र कृत्वा कार्पटिकाकृतिम्॥

कृत्वेऽति गृहान्निर्गमसमये करणे इदम्।

*प्रथमं *चालयेत्तीर्थं प्रणवेन जलं शुचि।
अवगाह्य ततः स्नायाद्यथावन्मन्त्रयोगतः॥

पनिमित्तस्य सत्त्वात्। *तीर्थप्राप्ताविति। तीर्थप्राप्तिदिनकृत्यम्। *यानानीति। यानारूढः सोपानत्को वा यदि तदा तीर्थप्राप्तिदिने यानोपानहौ परित्यज्य यावान्मार्गो गन्तुं शक्यस्तावन्मार्गं पादचारेण गच्छेत्तीर्थे दृष्टे साष्टाङ्गं प्रणमेत्। साष्टाङ्गप्रणामस्तु—

पद्भ्यां कराभ्यां जानुभ्यां शिरसा चोरसा तथा।
मनसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग उच्यते॥

इति लक्षितः। अत्र शिरोवगुण्ठनकञ्चुकादिमाल्यशस्त्रादि त्याज्यम्, आचारात्। ततः 'अमुकतीर्थाय नमः' इति पुष्पाक्षतफलादियुक्तमञ्जलिं दद्यात्। यथाशक्ति फलवस्त्रहिरण्यादि चोपायनं स्थापयेत्। "रिक्तपाणिर्न पश्येत्तु' इत्युक्तेः। *प्रथमामिति। *चालयेत् स्पृशेत्। प्रणवेन तीर्थं स्पृष्ट्वा यथावन्मन्त्रयोगतः अवगाह्य सचैलं स्नायादित्यर्थः। मन्त्राश्च स्नाने प्रसिद्धा

*मन्त्रश्च प्रभासखण्डे--

ॐनमोऽस्तु देवदेवाय शितिकण्ठाय दण्डिने ।
रुद्राय चापहस्ताय चक्रिणे वेधसे नमः ॥
सरस्वती च सावित्री वेदमाता गरीयसी ।
सन्निधात्री भवत्वत्र तीर्थे पापप्रणाशिनी ॥ इति ।

मन्त्रवत्स्नानं च वपनोत्तरं कार्यम् ,

पूर्वमावाहनं तीर्थे मुण्डनं तदनन्तरम् ।
ततः स्नानादिकं कुर्यात्पश्चाच्छ्राद्धं समाचरेत् ॥

इत्युक्तेः । यत्तु--

गत्वा स्नानं प्रकुर्वीत वपनं तदनन्तरम् । इति,

तन्मुसलस्नानपरम् । काशिखण्डे--

तीर्थोपवासः कर्तव्यः शिरसो मुण्डनं तथा ।

उपवासे तत्रैवोक्तम्--

यदह्नि तीर्थप्राप्तिः स्यात्तदह्नः पूर्ववासरे ।
उपवासः प्रकर्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् ॥

अत्र--

उपवासं ततः कुर्यात्तस्मिन्नहनि सुव्रतः ।

एव ग्राह्याः । तत्र प्रथमतः तीर्थप्रार्थना कार्या । तत्र मन्त्रमाह-*मन्त्रश्चेति ।

सर्वेषामेव तीर्थानां मन्त्र एष उदाहृतः ।
इत्युच्चार्य नमस्कृत्वा स्नानं कुर्याद्यथाविधि ॥

इति वचने "इत्युच्चार्य नमस्कृत्य" इत्युक्त्या मन्त्रस्य तीर्थप्रार्थनाङ्गत्वप्रतीतेः । अथवा--

सागरस्वननिर्घोषदण्डहस्तासुरान्तक ।
जगत्स्रष्टर्जगन्मर्दिन्नमामि त्वां सुरेश्वर ॥
तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ इति ।

इति प्राप्तिदिनेषूपवासोक्तेर्विकल्पः । मुण्डने तु स्कान्ददेवलौ--

मुण्डनं चोपवासश्च सर्वतीर्थेष्वयं विधिः ।
वर्जयित्वा कुरुक्षेत्रं विशालं *विरजं गयाम् ॥

विरजं *लोणारम् ।*प्रसिद्धमहातीर्थपरः सर्वतीर्थशब्दः॥

अत्रापि--

इमं मन्त्रं समुच्चार्य तीर्थस्नानं समाचरेत् ।
अन्यथा तत्फलस्यार्थं तीर्थेशो हरति ध्रुवम् ॥

इत्युक्तेः प्रार्थनामन्त्रयोश्च विकल्पः । सचैलस्नानेति पाठः । तथाच प्रथमं प्रणवेन जलं स्पृशेत् ततः सचैलममन्त्रं स्नायात् ततो वपनं कृत्वा समन्त्रं स्नायात् इति सिद्धम् । *विरजम् । उत्कलदेशे,

आक्रान्तं दैत्यजठरं धर्मेण विरजाद्रिणा ।
नाभिकूपसमीपे तु देवी तु विरजा स्थिता ॥

इति वायवीये तत्र गयासुरनाभौ धर्मराजेन विरजाद्रिस्थापनोक्तेः । दक्षिणदेशस्थमप्याह—*लोणारमिति ।

एवं कृते विधानेऽस्मिन्विरजे विरजो भवेत् ।

इति आदित्यपुराणे तस्य विरजत्वोक्तेः । केचित्तु "नैमिषं पुष्करं गयाम्"इति पठन्ति । ननु सर्वेषां तीर्थानां ज्ञानमिदानीन्तनानां कथमित्यत्राह—*प्रसिद्धेति । महत्पदं च यत्र काश्यादौ अन्यानि प्रविष्टानि तीर्थानि तत्र तदकरणार्थम् । मात्स्ये अग्नितीर्थादीनि बहून्युक्त्वा—

अन्ये च बहवस्तीर्थाः सर्वपापहराः शुभाः ।
तेषु स्नात्वा दिवं यान्ति ये मृतास्तेऽपुनर्भवाः ॥
एवं कुरुष्व कौन्तेय सर्वतीर्थाभिषेचनम् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥

इति सर्वशब्दस्य प्रकृतसकलतीर्थपरत्वात् । एतच्च मुण्डनं निषेधेऽपि कार्यम् । निषेधाश्च—

अत्र विशेषः स्मृत्यन्तरे—

ऊर्ध्वमब्दाद्वृद्धिमासोनात्पुनस्तीर्थं व्रजेद्यदि ।
मुण्डनं चोपवासं च ततो *यत्नेन कारयेत् ॥
तदा तद्वपनं शस्तं प्रायश्चित्तमृते द्विज ॥

इति वा पाठः ।

प्रयागे प्रतियात्रं तु *योजनत्रय इष्यते ।

रव्यारसौरिवारेषु रात्रौ पाते व्रतेऽहनि ।
श्राद्धाहः प्रतिपद्रिक्ताभद्राः क्षौरेषु वर्जयेत् ॥
षष्ठ्यमापूर्णिमापातचतुर्दश्यष्टमीषु च ।
नक्षत्रे तु न कुर्वीत यस्मिन्जातो भवेन्नरः ॥
न प्रौष्ठपदयोः कार्यं नैवाग्नेये तु भारत ।
दारुणेषु तु सर्वेषु दुष्टतारां विवर्जयेत् ॥
कुम्भे कर्कटके चैव कन्यायां कार्मुके रवौ ।
रोमखण्डं गृहस्थस्य पितॄन् प्राशयते यमः ॥
विवाहमौञ्जीचूडासु वर्षमर्धं तदर्धकम् ।
अन्तर्वत्न्यां च जायायां नेष्यते केशवापनम् ॥

इत्यादयः । तदपवादश्च—

क्षौरं नैमित्तिकं का(१)र्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके ॥

अत्र वपनं करिष्ये इति सङ्कल्पः,

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
केशानाश्रित्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम् ॥

इति मन्त्रलिङ्गात् । *यत्नेनेति । फलेच्छायां तु अन्तरापि कार्यं न त्वावश्यकमित्यर्थः । तदा तद्वयं शस्तमिति वा तृतीयपा(२)दपाठः । *योजनत्रय इति । योजनत्रयाधिकदेशादागतेनैव

---

(१) 'प्राप्तं' घ०

(२) 'पाद' नास्ति ङ

क्षौरं कृत्वा तु विधिवत्ततः स्नायात्सितासिते ॥

(त(१)था च बृहस्पतिः--

क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम् ।
पित्रादिमृतिदीक्षासु प्रायश्चित्तेऽथ तीर्थके ॥

अपरार्के स्कान्दे--

उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः ।
*केशश्मश्रुलोमनखान्यु*दक्संस्थानि वापयेत् ॥

इदं प्रयागे सधवानामपि समूलं भवतीति भट्टाः ।

सर्वान् केशान् समुद्धृत्य छेदयेदङ्गुलिद्वयम् ।
एवमेव हि नारीणां शस्यते वपनक्रिया ॥ इति ।

तच्चाकृतचूडानां न कार्यमिति केचित् । तत्त्वं तु नैमित्तिकत्वात् पित्रादिमृतिवत्कार्यमेवेति । तदपि प्रया-

कार्यं नतु तन्मध्यवर्त्तिना,

नैव संवत्सरे कुर्यात्प्रयागे वपनद्वयम् ।

इति तन्निषेधात् । विधिवत्स्नात्वेत्यन्वयः । तत्र त्रिस्थलीसेतौ प्रायश्चित्तं नोक्तम्, इदानीन्तनास्तु वपनात्प्राक् तत्संकल्पयन्ति,

प्रायश्चित्तं यथाशक्त्या द्वादशाब्दार्धमर्धकम् ।
आदौ गोमिथुनं दद्यात्प्रायश्चित्तं चतुर्विधम् ॥

इति वचनं च पठन्ति तत्सर्वमनुमन्यामहे तीर्थगामिनो हितत्वात् । *केशेति पाठक्रमात् केशश्मश्रुक्रमेण वपनं कार्यमित्येके क्षणमपि म्लेच्छाचारप्रसङ्गवारणार्थं श्मश्रुकूर्चयोरादौ वपनं कार्यं ततः केशानामित्यन्ये । *उदक्संस्थानीति ।

दक्षिणं कर्णमारभ्य धर्मार्थं पापसञ्चये ।
शिखाद्यं नवसंस्कारे शिखाद्यन्तं शिरो वपेत् ॥

---

(१) कंसान्तर्गतं नास्ति क० छ०

गे नित्यं नान्यत्र । तच्च *यतिभिस्तीर्थेऽपि ऋतुसंधिष्वेव कार्यं नान्यदा,

कक्षोपस्थशिखावर्जमृतुसंधिषु वापयेत् ।

इति स्मृतेः । इदं जीवत्पितृकेणापि तीर्थे कार्यम् । न च 'मुण्डनं पिण्डदानं च' इति दक्षवचनेन निषेधः,

विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं विना ।
यो वापयति लोमानि स पुत्रः पितृघातकः ॥

इति स्मृत्या तत्संकोचात् । तदपि प्रयागे प्रतियात्रम्, अन्यतीर्थे आद्ययात्रायामेवेति शिष्टाः । *ततः स्नानम् ।

इति स्मृतेः । धर्मार्थे तीर्थादिवपने दक्षिणकर्णादि उदक्संस्थं वपेत् । पापसञ्चयनिमित्तके शिखामादीकृत्याधस्तादुदक्संस्थं सर्वतो वपेत् । नवसंस्कारे चूडाकरणे दक्षिणकर्णात् शिखान्तं शिखामारभ्य वामकर्णान्तं च वपेदित्यर्थः । *यतिभिरिति । ऋतुसंधिष्वेवेति परिसंख्यानात् यत्यादीनां तु सशिखम्,

यतिः शूद्रश्च विधवा सशिखं वपनं चरेत् ।

इति स्मृतेः । *ततः स्नानमिति ।

पृथिव्यां सर्वतीर्थेषु स्नात्वा पुण्येषु च द्विजाः ।
मुच्यते पातकैः सर्वैः समस्तैरपि पूरुषः ॥

इति कौर्मात् ।

नाव्रतो नाकृतात्मा च नाशुचिर्न च तस्करः ।
स्नाति तीर्थेषु कौरव्य नच वक्रमतिर्नरः ॥

इत्यादिकं तु अकृतादेस्तीर्थस्नानेऽनधिकारार्थम् । विपरीतप्रवाहादौ तु तीर्थस्नानं न कार्यम्,

प्रत्यावृत्तोदके स्नानं वर्ज्यं नद्यां द्विजातिभिः ।

इति स्मृतेः ।

अग्राह्यास्त्वागता ह्यापो नद्याः प्रथमवेगजाः ।

परार्थे तु मार्कण्डेयपुराणे —

मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् ।
यमुद्दिश्य निमज्जेत अष्टमांशं लभेत्ततः ॥

प्रक्षोभिताश्च केनापि तथा तीर्थाद्विनिर्गताः ॥

इति च स्मृतेः । गङ्गायां तु न निषेधः,

प्रतिस्रोतो रजो योगो रथ्याजलनिवेशनम् ।
गङ्गायां न प्रदुष्यन्ति सा हि ब्रह्मद्रवः स्वयम् ॥

इत्युक्तेः । किञ्च—

शाल्मलीतिन्तिणीनिम्बकरञ्जाश्च हरीतकी ।

बिभीतकीति वा पाठः ।

कोविदारकपित्थार्कबदर्येरण्डशिग्रवः ।
शेलुश्च खादिरश्चैषां स्नानं छायासु वर्जयेत् ॥

रात्रौ सन्ध्यादौ च स्नाननिषेधः आकस्मिकतीर्थप्राप्तौ न प्रवर्त्तते, नैमित्तिकत्वात् ;

रात्रौ स्नानं न कुर्वीत होमं दानं च रात्रिषु ।
नैमित्तिकं च कुर्वीत स्नानं दानं च रात्रिषु ॥

इति शातातपोक्तेः । रात्रौ तीर्थे स्नानं महानिशायां न कार्यमिति केचित् । अत्राकस्मिकतीर्थस्नानं रात्रौ न कार्यमेव । आकस्मिकतीर्थस्नानमशौचेऽपि कार्यम्,

विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि ।
न तत्र सूतकं तद्वत्कर्मयज्ञादि कारयेत् ॥

इति पैठिनसिवाक्यात् । प्रासङ्गिकतीर्थस्नानं तु मलमासेऽपि कार्यम्, "तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः कार्याणि मलमासेऽपि" इति यमोक्तेः । प्रवाहाभिमुखः स्नानं कुर्यात्,

प्रवाहाभिमुखो मज्जेद्यत्रापः प्रवहन्ति वै ।
स्थावरेषु च सर्वेषु आदित्याभिमुखः स्थितः ॥

पैठीनसिः—

*प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत् ।
मज्जयेच्च यमुद्दिश्य सोऽष्टभागफलं लभेत ॥

ततस्तर्पणश्राद्धे । पृथ्वीचन्द्रोदये ब्रह्मदेवीपुराणकाशीखण्डादिषु—

*अकालेऽप्यथ वा *काले तीर्थे श्राद्धं च *तर्पणम् ।
अविलम्बेन कर्तव्यं नैव विघ्नं समाचरेत् ॥

इति जाबालिवाक्यात् । *कुशप्रतिकृति कुशग्रन्थिम् तत्र मज्जने मन्त्रः——

कुशोऽसि कुशपुत्रोऽसि ब्रह्मणा निर्मितः स्वयम् । त्वयि स्नाते च स स्नातो यस्येदं ग्रन्थिबन्धनम् ॥ इति ।

प्रतिपुरुषं ग्रन्थिभेदः । इदं परार्थस्नानं प्रतिकृतिस्नापनं च जीवतामेव । अजीवतां तु तर्पणश्राद्धादीनि बोध्यम् । *अकाले रात्र्यादौ कृतभोजनादिनाऽपि । *काले अपराह्णादौ भोजनादिराहित्ये च प्राप्ततीर्थत्वस्याधिकारिविशेषणत्वात् ग्रहणादिवत्सर्वास्ववस्थासु श्राद्धं कार्यमिति भावः । काले इति तु दृष्टान्तः । *तर्पणमिति ।

स्नानाङ्गं तर्पणं कृत्वा पश्चाद्देवर्षितर्पणम् ।
कृत्वाऽऽनुपूर्व्यात्स्वपितॄन्तीर्थोदैस्तर्पयेत्ततः ॥

इति पठन्ति । तत एकं तिलाञ्जलिं दद्यात् । तत्र मन्त्रः—

देवासुरास्तथा नागा यक्षगन्धर्वराक्षसाः ।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥
जलेचरा भूमिलया वाय्वाधाराश्च जन्तवः ।
तृप्तिमेतेन यान्त्वाशु मद्दत्तेनाम्बुनाऽखिलाः ॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥

मात्स्ये—'पितॄणां चैव तर्पणम्' इति तुर्यपादः । तत्र देवता महालयनिर्णये प्रागुक्ताः । शङ्खदेवलौ—

तीर्थद्रव्योपपत्तौ च न कालमवधारयेत् ।
पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं समाचरेत् ॥

हारीतः—

दिवा वा यदि वा रात्रौ भुक्तो वोपोषितोऽपि वा ।
न कालनियमस्तत्र गङ्गां प्राप्य सरिद्वराम् ॥

येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमाखिला यान्तु ये चास्मत्तोऽभिकाङ्क्षिणः ॥
यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ।
इदमक्षय्यमेवास्तु मया दत्तं तिलोदकम् ॥ इति ।

यद्वा—

आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृ(१)बान्धवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम् ॥ इति ॥

यद्वा विस्तृततर्पणासम्भवे सङ्क्षेपेण तर्पणं कार्यम् । तत्र मन्त्रः—

आब्रह्मस्तम्बपर्यन्तं जगत्स्थावरजङ्गमम् ।
मया दत्तेन तोयेन तृप्तिं यातु परां गतिम् ॥ इति ।
आब्रह्मस्तम्बपर्यन्तं जगत्तृप्यत्विति ब्रुवन् ।
जलाञ्जलित्रयं दद्यात्कुर्वन् सङ्क्षेपतर्पणम् ॥

इत्युक्तेः प्रत्यञ्जलि मन्त्रावृत्तिः । तिलतर्पणनिषेधश्चापि तीर्थे न प्रवर्त्तते "तीर्थे तिथिविशेषे च" इति प्रोक्तवाक्यात् । विधवयापि प्रत्यहं तीर्थे तर्पणं कार्यम् ,

तर्पणं प्रत्यहं कार्यं भर्त्तुः कुशतिलोदकैः ।

---

[१] 'मानवाः' घ०

भारते—

*भुक्तो वाऽप्यथ वाऽभुक्तो रात्रौ वा यदि वा दिवा।
पर्वकालेऽथ वाऽकाले शुचिर्वाऽप्यथ वाऽशुचिः॥
यदैव दृश्यते तत्र (१)नदी त्रिपथगा प्रिय।
प्रमाणं दर्शनं तस्मान्न कालस्तत्र कारणम्॥

अशौचेऽपि कार्यम्,

विवाहदुर्गयज्ञेषु यात्रायां तीर्थकर्मणि।
न तत्र सूतकं तद्वत्कर्मयज्ञादि कारयेत्॥

इति पैठीनसिस्मृतेः। *तदानीमकरणे त्वाशौचान्ते एव कुर्यात्। प्रभासखण्डे—

*न वारं न च नक्षत्रं न कालस्तत्र कारणम्।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम्॥

इति स्कान्दे विधवाधर्मेषूक्तेः। संन्यासिना तु न तर्पणं कार्यम्,

न कुर्यात्सूतकं भिक्षुः श्राद्धपिण्डोदकक्रियाम्।

इति वाक्यात्। *भुक्त इति। अङ्गारपर्णं प्रत्यर्जुनवाक्यम्। *तदानीमिति।

तदहश्चेत् प्रदुष्येत केनाचित्सूतकादिना।
सूतकानन्तरं कार्यं पुनस्तदहरेव च॥

इति वाक्यस्य नैमित्तिके इहापि प्रवृत्तेः। नतु अमावास्यादिश्राद्धवल्लोपः निमित्ते सति नैमित्तिकानुष्ठानस्यासति प्रतिबन्धे कार्यत्वात्। यदा तु अकृतश्राद्ध एव निर्याति तदा तीर्थरूपदेशाभावात्तल्लोपः। तत्रापि बुद्ध्या त्यागे प्रत्यवायः। न त्वन्यथा त्यागे। रात्रिसंध्ययोरपि तीर्थप्राप्तौ निषेधं बाधित्वा स्नानमुण्डनोपवासतीर्थश्राद्धानि कार्याणि नैमित्तिकत्वेन तेषां साम्यात्। *न वारमिति। तीर्थश्राद्धादावुक्ते सर्वत्र तिथिवारनक्षत्रादिनिषेधा

---

(१) 'नदी च त्रिपथा क० छ०।

यदैव दृश्यते तीर्थं तदा पर्वसहस्रकम् ॥

मलमासेऽपि कार्यम्,

नित्यनैमित्तिकं कुर्यात्प्रयतः सन्मलिम्लुचे ।
तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव च ॥

इति बृहस्पतिस्मृतेः ।

एतच्चाशौचे प्रकृतभोजनस्य रात्रौ वा स्नानश्राद्धादिकमाकस्मिकतीर्थप्राप्तावा*महेमश्राद्धविषयं ग्रहणादिवत् नतु बुद्धिपूर्वमाशौचादौ तीर्थप्राप्तिः कार्या । मलमासे तु *मासद्वये तीर्थश्राद्धं कार्यमिति चन्द्रिकायां देवीपुराणे--

श्राद्धं च तत्र कर्तव्यमर्घ्यावाहनवर्जितम् ।

न प्रवर्त्तन्ते इत्यर्थः । ते च पूर्वमुक्ता एव । यथा—"नन्दायां भार्गवदिने" "प्राजापत्ये च पौष्णे च" "नक्षत्रे च न कुर्वीत" "भानौ भौमे त्रयोदश्यां" "नन्दाश्च कामरव्यार" "रात्रौ श्राद्धं न कुर्वीत" "उपसन्ध्यं न कुर्वीत" "विवाहे व्रतचूडासु वर्षमर्धम्" इत्यादयः ।

वृद्धिमात्रे तथाऽन्यत्र पिण्डदाननिराक्रिया ।
कृता गर्गादिभिर्मुख्यैर्मासमेकं तु कर्मिणाम् ॥

इत्यादयः पिण्डदाननिषेधा अपि तीर्थश्राद्धे न प्रवर्त्तन्ते । *आमेति । तावतैव वचनचारितार्थ्यात् न तु पाकोऽपि कार्यः, मानाभावात् । पाकश्राद्धं तु रात्रिसन्ध्ययोर्भुक्तवतश्च परदिने एव । तत्र आशौचे तु आशौचापगमे तदानीमपि तीर्थसम्बन्धसत्त्वादित्यर्थः । *मासद्वये इति । विलम्बनिषेधान्मलमासे कालशुद्ध्या फलाधिक्याच्च ।

मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च ।

इति वाक्याच्च । नचेदमुभयत्र तीर्थप्राप्तिपरम्, एतद्व्यतिरेके-

हेमाद्रौ—

अर्घ्यमावाहनं चैव द्विजाङ्गुष्ठनिवेशनम् ।
तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥

भविष्ये—

आवाहनं विसृष्टिश्च तत्र तेषां न विद्यते ।
आवाहनं न तीर्थे स्यान्नार्घ्यदानं तथा भवेत् ॥
आहूताः पितरस्तीर्थे कृतार्घ्याः सन्ति वै यतः ॥

अग्नौकरणं च नेति रत्नावल्याम् । अत्र षड्दैवते श्राद्धेऽपि मात्रादीनां पिण्डमात्रं देयम्,

हविःशेषं ततो मुष्टिमादायैकैकमादृतः ।
क्रमशः पितृपत्नीनां पिण्डनिर्वपणं चरेत् ॥

इति तीर्थोपक्रमे देवलोक्तेरिति पृथ्वीचन्द्रः । ततः सामान्यपिण्डं दद्यात्,

ततः पिण्डमुपादाय हविषः संस्कृतस्य च ।
ज्ञातिवर्गस्य सर्वस्य सामान्यं पिण्डमुत्सृजेत ॥

इति तेनैवोक्तेः । पाद्मे—

तीर्थश्राद्धं प्रकुर्वीत पक्वान्नेन विशेषतः ।
आमान्नेन हिरण्येन कन्दमूलफलैरपि ॥

पिण्डद्रव्याणि देवीपुराणे हेमाद्रौ ब्राह्मे च—

सक्तुभिः पिण्डदानं च संयावैः पायसेन वा ।
कर्तव्यमृषिभिः प्रोक्तं पिण्याकेन गुडेन वा ॥

पिण्डानां तीर्थे प्रक्षेप एव नान्या प्रतिपत्तिरित्युक्तं प्राक् । एतच्च विधवयाऽपुत्रया कार्यं न सपुत्रयेत्युक्तं प्राक् ।

सपुत्रया न कर्तव्यं भर्तुः श्राद्धं कदाचन ।

इति स्मृतेश्च । अनुपनीतेनापि कार्यम्,

एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु ।

णैव तदा श्राद्धसिद्धेः तैर्थिकपदानर्थक्यापत्तेः । देवीपुराणे—

तीर्थेषु ब्राह्मणं नैव परीक्षेत कदाचन ।

पातित्यादिदोषयुक्तस्तु हेय एव । तथा—

अर्घ्यमावाहनं चैव द्विजाङ्गुष्ठनिवेशनम् ।
तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ॥

अग्नौकरणं विसर्जनं च न कार्यम् । इदं च तीर्थनिमित्तकश्राद्धे एव नतु तीर्थाधिकरणकश्राद्धे इति बोद्धव्यम् । देवलः—

नचात्र श्येनगृध्रादिपक्षिणः प्रतिषेधयेत् ।
तद्रूपास्तत्र पितरः समायान्तीति वैदिकम् ॥
आमश्राद्धं यदा कुर्यात्पिण्डदानं कथं भवेत् ।
गृहपाकात्समुद्धृत्य सक्तुभिः पायसेन वा ॥

पिण्डदानं भवतीति शेषः । आमगृहपाकसक्तुपायसानां यथालाभं व्यवस्था । आमश्राद्धे तृप्तिप्रश्नादिनिषेधः मन्त्रोहश्च पूर्वमुक्तः । सर्वश्राद्धाशक्तौ पिण्डदानमात्रं कार्यमित्युक्तं प्राक् । यत्तु—

नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कुत्रचित् । इति ।

तदेकनिमित्तकश्राद्धपरम्,

द्विबहूनि निमित्तानि जायेरन्नेकवासरे ।
नैमित्तिकानि कार्याणि निमित्तोत्पत्त्यनुक्रमात् ॥

इत्युक्तेः । उपवासमुण्डने तु सकृदेव व्यापकतीर्थे एव तद्विधानात् । यत्र तु व्याप्यतीर्थे श्राद्धकरणाद्व्यापकतीर्थेऽपि सिद्धिस्तत्र न श्राद्धावृत्तिः किन्तु तन्त्रमिति । यथा गङ्गावेणीप्रयागनिमित्तकानाम् । यथा वा गङ्गामणिकर्णिकाकाशीनिमित्तकानाम् । अथ श्राद्धसंपाततीर्थप्राप्तिदिने वार्षिकं भिन्नमेव कार्यं देवताभेदात् । तीर्थश्राद्धं प्रथमतः कार्यं विलम्बासहत्वान्नैमित्तिकत्वाच्च । दार्शिकयुगादिमन्वादिसंक्रान्त्यादिश्राद्धानि तु पाकेन तीर्थश्राद्धकरणे पृथक् न कार्याणि, आमादिना तीर्थश्राद्धे तु पृथक् कार्याणि । एवमेव नित्यश्राद्धमपि यदि तीर्थश्राद्धं पाकेन तदा न पृथक् । आ-

इति पाद्मे तीर्थश्राद्धमुपक्रम्योक्तेः । एतच्च जीवत्पितृकेणापि कार्यमित्युक्तं प्राक् । यतिना तु न कार्यम्,

न कुर्यात्सूतकं भिक्षुः श्राद्धपिण्डोदकक्रियाम् ।
त्यक्तं संन्यासयोगेन गृहधर्मादिकं व्रतम् ॥
गोत्रादिचरणं सर्वं पितृमातृकुलं धनम् ॥

इति स्मृतेः । गयायां तूक्तं वायवीये—

दण्डं प्रदर्शयेद्भिक्षुर्गयायां गत्वा न पिण्डदः ।
दण्डं स्पृष्ट्वा विष्णुपदे पितृभिः सह मुच्यते ॥
गयायां धर्मपृष्ठे च कूपे यूपे वटे तथा ।
दण्डं प्रदर्शयन् भिक्षुः पितृभिः सह मुच्यते ॥

कृत्यरत्ने प्रभासखण्डे—

तीर्थे चेत्प्रतिगृह्णाति ब्राह्मणो वृत्तिदुर्लभः ।
दशांशमर्जितं दद्यादेवं कुर्वन्न हीयते ॥ इति ।

*विशेषान्तराणि भट्टकृतत्रिस्थलीसेतौ ज्ञेयानीति दिक् ॥

इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ
तीर्थश्राद्धविधिः समाप्तः ।

इति श्राद्धप्रकरणं द्वितीयम् ।

मादिना चेद् तदा पृथक् । दर्शश्राद्धादेर्भार्यारजोदर्शनादिनिमित्तेनामपक्षे आमहेमतीर्थश्राद्धेन सिद्धिः । अत्र तीर्थश्राद्धेऽधिकारिणो देवताश्चोक्ताः । अत्र मृतमातृकस्य जीवत्पितृकस्य गयादौ पित्रनुज्ञया याने मातुर्यजमानपत्नीत्वेन, अननुज्ञया याने तु पितृपत्नीत्वेन दानमित्यादिकं सूचयति—*विशेषान्तराणीति । दिगर्थस्तु पुराणान्तरे—

काशीवासं कर्त्तुकामो यदि स्याद्दूरस्थोऽपि ब्राह्मणं धर्मनिष्ठम् ।
नानावस्त्रं भक्ष्यभोज्यादि दत्त्वा श्रद्धायुक्तः सर्वदा वासयीत ॥
वाराणस्यां वासयन् ब्राह्मणाग्र्यं द्वयोश्छिन्द्याद्दुष्टसंसारबन्धम् ।
तस्मात्तत्र स्थापनीयः प्रयत्नाद्विप्रो राजन् दूरगेनापि मुक्त्यै ॥
वर्षाशनं तु यो दद्यात्काश्यां सीदत्कुटुम्बिने ।
यावन्त्यब्दानि तावन्ति युगानि दिवि पूज्यते ॥
वस्तुः कोटिगुणं पुण्यं काश्यां वासयितुर्ध्रुवम् ।
आत्मानं तारयेद्यत्नात्तौ द्वौ वामयिता यतः ॥ इत्यादि ।

रत्नमालायां तीर्थश्राद्धप्रकरणं समाप्तम् ॥

श्रीः ।

अथ आशौचप्रकरणम् ।

नारायणात्मजश्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेनाशौचं निर्णीयतेऽधुना ॥ १ ॥

मरीचिः—

*आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥

बृह(१)त्पराशरः—

गर्भस्रावे तु नैरुक्ता रात्रयो माससंमिताः ।
स्रावं गर्भस्य विद्वांसो मासादर्वाक्चतुर्थकात् ॥
पातमूर्ध्वं वदन्त्येके तत्राधिकं तु सूतकम् ।
स्रावे *मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्जनम् ।
पाते मातुर्यथामासं *सपिण्डानां दिनत्रयम् ॥

श्रीगणेशाय नमः ।

*आचतुर्थादिति ।

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।
अत ऊर्ध्वं तु नारीणां स्रवः प्रसव उच्यते ॥

इति स्मृतौ संज्ञिनोऽपि निर्देशो बोध्यः । *मातुरिति सावधारणम् । *सपिण्डानामिति यत्नगर्भपातपरं, जारजगर्भस्य पूर्णप्रसवे बीजिक्षेत्रिणोः सान्निध्यसान्निधिभ्यां त्रिरात्रैकरात्रव्यवस्थायाः सपिण्डानामेकाहस्नानव्यवस्थायाश्चाग्रे सत्त्वेन तदपूर्णनिर्गमे तेषामाशौचाभावस्यैवौचित्यात् । ननु मरीच्यादिस्मृ-

---

(१) धनुश्चिन्हान्तर्गतं नास्ति क० छ०

*अत्र सर्वत्र मूलं मि(१)ताक्षरायां ज्ञेयम् । अत्र मासत्रये त्रिरात्रं स्यादित्यनुवादः, रजस्वलात्वेनैव तत्सिद्धेः । यद्यप्यनेन चतुर्थमासेऽपि त्रिरात्रं प्राप्नोति तथापि—

*षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥

इत्यादिपुराणात् ,

*रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ।

*इति मनूक्तेः;

*गर्भस्रावे यथामासमचिरेतूत्तमे त्रयः ।

इति मरीच्युक्तेश्चतूरात्रं ज्ञेयम् । अचिरे त्रिमासमध्ये । *उत्तमे ब्राह्मणे । अत्र सपिण्डानां स्नानम्; सद्यःशौचं सपिण्डानां गर्भस्य पतने सति ।

त्यनुपलम्भात् कथमेतदित्यत आह—*अत्र सर्वत्रेति । *षण्मासेति । नचेदं मात्राविषयं निरवकाशेन "स्रावे मातुस्त्रिरात्रं स्यात्" इत्यनेन बाधादिति वाच्यं 'माससमैः' इति विशेषणानन्यथासिद्धाद्दिवसैरिति बहुवचनाच्चतुष्ट्वादित्रयस्य शोधकतावच्छेदकत्वावगमेन त्रिरात्राशौचस्यैव मासत्रयविषयत्वात् । *रात्रिभिरिति । आशौचप्रकरणस्थरात्रिदिनशब्दावहोरात्रलक्षकौ । नचाद्यमासमात्रं द्वितीयमासमात्रं तदुभयमेव वा तद्विषयोऽस्त्वित्यत आह—*गर्भेति । "गर्भसमा रात्रयः संस्रवे गर्भस्य त्र्यहं वा" इति वासिष्ठं तु अचिरशब्दैकवाक्यतया त्र्यहपदं वा मासत्रयविषयमिति व्यवस्थया षण्मासपरम् । *उत्तम इति ।

राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव तु ।
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता ॥

---

(१) 'मिताक्षरादौ' क० छ०

इति तत्रैवोक्तेः। *एतदाचतुर्थमासात्, पाते त्रिदिनस्योक्तेः। अकारणाया: शुद्धेरसम्भवात्सद्यःपदं स्नानपरम्। एवमग्रेऽपि। 'गर्भस्रावे स्नानमात्रं पुरुषस्य' इति वृद्धवसिष्ठोक्तेः। पुरुषस्येति सपिण्डोपलक्षणं *पूर्वोक्तवचनात्। *आचतुर्थमासं सपिण्डानां न स्नानं, किन्तु पुंस एव। पाते त्रिदिनं निर्गुणपरम्। गुणवतस्तु—

अजातदन्ते तनये शिशौ गर्भच्युते तथा।
सपिण्डानां तु सर्वेषामेकरात्रमशौचकम्॥

इति यमोक्तेरेकाहमिति मदनपारिजातः।

इति शेषमारीचात्। वस्तुतस्तु गर्भनाशप्रयुक्तमाशौचं सर्ववर्णेषु समं मारीचं तु विगीतत्वान्नादरणीयम्। अन्यथा त्रिषु मासेषु क्रमेण चतुःपञ्चाष्टदिनानि चतुर्थमासे तु माससंख्यानि चत्वारि दिनानि इत्यनौचित्यापत्तेः। पतनं स्रावो नतु पात इत्याह-*एतादिति। आचतुर्थेति मर्यादायामाङ्। "पाते मातुर्यथामासम्" इति पातशब्दस्य चतुर्थमासप्रभृति गर्भस्रावपरत्वात्। *पूर्वोक्तेति। नच पूर्वोक्ते मारीचे सपिण्डपदं पुरुषोपलक्षणमस्त्विति वाच्यं, तत्र सपिण्डाशौचवर्जनं त्रिरात्रनिषेध एव स्नानादात्राधिकाशौचे स्पष्टः। एवञ्च पाते येषां त्रिरात्रं तेषां स्रावे स्नानमित्यर्थलाभात् पुरुषपदेनैकवाक्यत्वं सद्यःशौचं सपिण्डानामिति बहुवचनाच्चेत्यर्थः। पुरुषपदस्य सपिण्डाशौचवर्जनमित्यत्र विशेषकत्वं वदतां मतमाह-*आचतुर्थमिति। अत्र पुरुषपदेन स्त्रीणां पातिभिन्नसपिण्डानां वा व्यावर्तनमप्युक्तं सम्बन्धसाम्यात्। पुंसः स्नानस्य तदितरेषां तन्निवृत्तेश्च विधौ वाक्यभेदप्रसङ्गाच्च। एवं जारजपूर्णगर्भनिर्गमो गर्भच्युतिस्तत्र पित्रन्यसपिण्डानां सन्निधावेकरात्रपरतया यमोक्त्युपपत्तेर्गुणवत्परत्वं न युक्तमित्यस्वरसः। अत ऊर्ध्व-

*सप्तममासादि दशाहम् । *एतत्सर्ववर्णविषयम्,
*तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च ।

इति व्याघ्रोक्तेः । पराशरः—

*जाते विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥

संवर्तः—

जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ।
माता शुद्ध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ॥

पुत्रपदात्कन्योत्पत्तौ न पितुः स्नानमिति हारलतायाम् । तन्न, पुत्रपदस्य 'पौत्री मातामहस्तेन' इति कन्यायामपि प्रयोगात् । यच्च तत्रैवोक्तम्—

सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः ।
कृत्वा सचैलं स्नानं तु शुद्धो भवति तत्क्षणात् ॥

मित्यादि विवृणोति-*सप्तमेति । दशाहमिति विप्रपरम् । षण्मासाभ्यन्तरे इति श्लोकानन्तरम्--

अत ऊर्ध्वं स्वजात्युक्तं तासामाशौचमिष्यते ।

इत्यादिपुराणात् । *एतादिति । अविकलाङ्गकस्य जीवतो गर्भस्य निर्गमः प्रसवः लोके तत्रैव तद्व्यवहारात् । स च सप्तमप्रभृतीति तत्पूर्वतनमित्यर्थः । *तुल्यमिति । गर्भग्रहणमारभ्याऽऽप्रसवं प्रसवमारभ्यौपनयनं च वयः । मर्यादायामाङ् । तत्पुरस्कृत्य यदाशौचमुक्तं "स्रावे मातुस्त्रिरात्रं स्यात्" इत्यादि "आदन्तजननात्सद्यः" इत्यादि च तत् सर्वेषां वर्णानां मातामहाद्याशौचवत्तुल्यम् अविशिष्टं तद्वाक्येषु वर्णविशेषानुपादानात् । दशाहादावतिक्रान्ते च यदाशौचं त्र्यहादि तदपि सर्वेषां वर्णानामविशिष्टमित्यर्थः । प्रसवनिमित्तकाशौचं तु वर्णभेदाद्भिन्नमित्याह-*जाते इति । प्रसवे इत्यर्थः ।

इत्यादिपुराणान्मुखदर्शनोत्तरमेव पितुः स्नानमिति । तन्न, विदेशे मुखदर्शनावध्यस्पृश्यतापत्तेः । मुखदर्शनोत्तरं पुनःस्नानार्थमिदमिति स्मार्तगौडाः । तन्न, मूलैक्येन ज्ञानमात्रपरत्वात् । *इदं सर्ववर्णसमम्,

सूतिका सर्ववर्णेषु दशरात्रेण शुध्यति ।
*ऋतौ च न पृथक् शौचं सर्ववर्णेष्वयं विधिः ॥

इति हारलतायां प्रचेतसोक्तेः । यत्तु ब्राह्मे—

ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः ।
गतैः शूद्रा च संस्पृश्या त्रयोदशभिरेव च ॥ इति ।

प्रयोगपारिजाते पारस्करः—

द्विजातेः सूतिका या स्यात्सा दशाहेन शुद्ध्यति ।
त्रयोदशेऽह्नि संप्राप्ते शूद्रा शुध्यत्यसंशयम् ॥ इति,

त(१)दसच्छूद्रापरम् ।

अङ्गिराः—

सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते ।
संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ॥
नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति ।
रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते ॥

संसर्गो मैथुनम् । स्पर्श इत्यन्ये । "मातुरेव सूतकम्, तां स्पृशतश्च" इति हारलतायां सुमन्तूक्तेरिति । तन्न,

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
जननस्यैवमेव स्यान्निपुणां शुद्धिमिच्छताम् ॥

इति स्मृतौ दशाहपदं विप्रपरम् । *इदं सूतिकाया दशाहास्पृश्यत्वं "माता शुद्ध्येद्दशाहेन" इत्यभिहितं, तदग्रे कर्मानधिकारमात्रमिति भावः । *ऋताविति चतुर्थेऽह्नि तत्प्रयुक्तस्नानादिवार-

---

(१) 'तदस्पृश्यत्वपरम्' ग० ।

संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ।

इति स्नानमात्रोक्तेः सीमन्तवचनस्य स्नानपर्यन्तमस्पृश्यत्वमात्रबोधकत्वात्। एवकारो बालस्पृश्यत्वार्थः। माधवस्तु--

*यस्तैः सहासपिण्डोऽपि प्रकुर्याच्छयनासनम् ।
बान्धवो वा परो वापि स दशाहेन शुध्यति ॥

इति बृहस्पतिस्मृतेः। शयनासनादिरूपं संसर्गमाह पराशरः--

*यदि पत्न्यां प्रसूतायां द्विजः संपर्कमृच्छति ।
सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित् ॥

पितृवत्सापत्नमातुः प्राक्स्नानादस्पृश्यत्वम् । सूतिकास्पर्शे तु *यावदाशौचम्,

अन्यास्तु मातरस्तद्वत्तद्गृहं न व्रजन्ति च ।

इति ब्राह्मोक्तेरिति शुद्धितत्त्वादयः । तन्न, *तद्गेहं गत्वा सूतिकां यदि न स्पृशन्ति तदा स्पृश्याः, अन्यथा न इति तस्यार्थः ।

कर्मानधिकारमाह पैठीनसिः--सूतिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीम् । *इद-

---

णार्थम्। *यस्तैरिति प्रसवे कर्माधिकारस्य मरणे तत्सहितस्पृश्यत्वस्य च निषेधपरम् । मैथुनिनो दशाहमस्पृश्यत्वमाह-*यदीति । ऋच्छति प्राप्नोति। असंपर्केऽपि सूतकप्राप्तेः सूतकपदमस्पृश्यत्वार्थम् । तद्विदित्यतिदेशः स्नानावध्यस्पृश्यत्वार्थः । *यावदाशौचमिति । स्नानमित्यादिः । एतश्चाह—*तद्गेहमिति । केचित्तु सूतिकास्पर्शे गार्भनिर्गमनौपयिकतदीयरजःस्पर्शे तद्गेहमिति तद्रजःस्पर्शनिषेधार्थम् । अन्यथा अविशेषेण पत्युरपि तद्गेहव्रजनमात्रेणास्पृश्यत्वापातादित्याहुः । दशश्लोकी-

माशौचोत्तरम् । अन्यथा *शूद्र्याः सपिण्डानामाशौचे

कारमतमाह-*इदमिति । *शूद्र्या इति । पुत्रप्रसवे शूद्र्या विंशतिरात्रं सपिण्डानां तु मासमित्यनौचित्यं स्यादित्यर्थः । *विधीति । विंशतिशब्देनैव जननप्रभृति विंशतिरात्रविधानं प्राप्तं दशाहकर्मानधिकारमनूद्याप्राप्तसदशाहो विधातव्यः । एवमेव मासपदेन मासविधाने प्राप्तदशाहमनूद्य विंशतिरात्रो विधेय इति विरोध इत्यर्थः । इदं तु बोध्यम्-अत्र त्रिंशच्छ्लोकीकारमतमेव सम्यक् विंशतिरात्रपदेन प्राप्ताप्राप्तविवेकेन विधानेन विध्यनुवादवैरूप्यस्यादोषत्वात् । अन्यथा दशपेयाधिकरणभङ्गापत्तेः । तत्र हि-"दश दशैकैकं चमसममनुप्रसर्पन्ति शतं ब्राह्मणाः सोमाय भक्षयन्ति" इत्यत्र पूर्ववाक्येन चमसोद्देशेन भक्षणकर्तृपरिच्छेदशतसंख्या विधीयते । तथाच चमसेषु प्रतिप्रधानमावृत्त्या शतसंख्या सिध्यति । तत्र चमसेषु अतिदेशतः कर्तृपरिच्छेदकत्वेन ब्राह्मण्यस्य च प्राप्तेरेककर्माङ्गत्वाज्जातिसंख्ययोरन्योन्यानियमे सिद्धे उत्तरवाक्येन शतानुवादेन ब्राह्मण्यविधौ कर्तृनवतौ प्राप्तं ब्राह्मण्यमनूद्य यजमानचमसे राजन्यजातिबाधाय तद् विधीयते इति तद्वैरूप्याङ्गीकारः । किञ्च विधेरुद्देश्यनिष्ठानुवादेन विरोधो नानुवादमात्रेण यथा "वषट्कर्त्तुः प्रथमभक्षः" इत्यत्र भक्षानुवादेन प्राथम्यविधौ । किञ्च यत्रैकेनैव पदेन स्वार्थ एकं प्रत्युद्दिश्यतेऽन्यं च प्रत्युपादीयते तत्र वैरूप्यम् । यथा "वाजपेयेन स्वाराज्यकामो यजेत" इत्यत्र स्वाराज्यार्थं यागमनूद्य वाजपेयरूपगुणविधिपक्षे । नचेह तथा, दशाहोत्तरादिनेऽनधिकारमात्रबोधनात्, द्वादशाहीनस्येत्यादावतिदेशतोऽधिकोपसद्विधिवत् । वस्तुतस्त्वस्पृश्यत्वकर्मानधिकाराभ्यामाशौचं द्वेधा । तत्र यथाऽद्ये जननदिनं पूर्वावधिरुत्तरावधिर्दशमदिनं, तथैव द्वितीये प्राप्तौ पैठीनसिवाक्येन पुत्रजननादावुत्तरावधिदशमादिदिनबाधेन विंशतितमादिदिनं विधीयते । अन्यथा पतितादिष्विव

तदभावः स्याद्वि*ध्यनुवादविरोधश्च । एतच्च सोमयागादि*श्रौतभिन्नपरम् । 'प्रजातायाश्च दशरात्रादूर्ध्वं स्नानादि' इति कात्यायनोक्तेः । व्यासः--

*प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ।
त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि ॥

पुत्रशब्दोऽपत्यमात्रपरः । ब्राह्मे--

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् ।
आयान्ति तस्मात्तदहः पुण्यं षष्ठं च सर्वदा ॥

जनने *विशेषः प्रागुक्तः ।

अत्र प्रयोगपारिजातः-पुंप्रसवे दशाहः, स्त्र्यपत्ये तु त्र्यहः,

पुंजन्मनि सपिण्डानां दशाहाच्छुद्धिरिष्यते ।

पूर्वोत्तरावधिविशिष्टापूर्वकर्मानधिकारविधाने महागौरवापत्तेः । यथाऽवभृथस्य दीक्षोन्मोचनार्थत्वाद् "दीक्षितो न जुहोति" इत्यग्निहोत्रानधिकारेऽवभृथावधिके प्राप्ते "एतया पुनराधेयसंमितयेष्ट्या इष्ट्वाऽग्निहोत्रं जुहोति" इत्यनेनाग्निहोत्रानधिकारे प्राप्तपूर्वावधिबाधेनोदवसानीयारूपावध्यन्तरं विधीयते । एवमिहापि । उक्तं रघुनाथभट्टैरपि दशरात्रादिना सूत्याशौचस्य स्पर्शप्रतिबन्धकत्वशक्तिनाशेऽपि कर्माधिकारप्रतिबन्धकत्वशक्तिर्विंशतिरात्रादौ विद्यते इति । तस्माज्जननप्रभृत्येवायं कर्मानधिकारः । इदं च वाक्यं त्रिवर्ण एव न शूद्रे प्रवर्तते, तत्र मासं कर्मानधिकारसिद्धेरिति । एतेन युक्तं शूद्र्याः सपिण्डानामाशौचे तदभावः स्यादिति तत्प्रयुक्तमिति । *श्रौतेति । अर्धाधानिनामपि विच्छिन्नं स्मार्तादि तत्र नोत्पद्यते इति सूचनार्थम् । *प्रथमे इति । दानपूजादिषु स्मृतिपुराणसदाचारप्राप्तेषु वृद्धिश्राद्धादौ च योग्यत्वार्थम् ।

त्र्यहादेकोदकानां च एकाहं सूतकं *क्वचित् ॥

*स्त्रीजन्मनि सपिण्डानां सोदकानां त्र्यहाच्छुचिः ।
स्त्रीषु त्रिपुरुषं ज्ञेयं सपिण्डत्वं द्विजोत्तमाः ।

इत्यग्निस्मृतेरित्याह । मेधातिथिरपि—'अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते' इति वासिष्ठमुक्त्वा "आशौच एवैतत्, विवाहे तु अवधिर्दर्शित एव" इत्याह । अन्ये तु त्रिपुरुषसापिण्ड्यस्य कानीनक(१)न्यापरत्वमाहुः ।

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम् ।
*प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः प्रजापतिः ॥

इति कौर्मविरोधाच्च। *अत्रेदं तत्त्वम्—'पञ्चमात्सप्तमाद्धीमान्यः कन्यामुद्वहेद् द्विजः। गुरुतल्पी स विज्ञेयः' इत्यादिविरोधात्त्रिपुरुषं प्रकरणान्मरणाशौचपरम्, वासिष्ठे तदग्रे उदकदानोक्तेः । तेन कन्याप्रसवेऽपि साप्तपौरुषं दशरात्रमेव । न च कन्यापु(२)त्रकृतं प्रसवे बलाबलं क्वाप्युक्तम् । अग्निस्मृतिस्त्वनुकल्पो विगीता चे(३)ति सर्वसिद्धान्तः । अन्यथा त्रिपुरुषसपिण्डानामष्टमादिसोदकानां च त्र्यहसाम्यायोगात् । चतुर्थादिसप्तमान्तानां च किमपि न स्यात । (ते(४)न कन्याप्रसवे दशाह एव ।) *किञ्च स्त्रीजन्मोद्देशेन त्रिपुरुषं सापिड्यं तेषां च त्रिरा-

*विशेषः षष्ठीपूजनादिः । *क्वचित् । आपत्तौ । *स्त्रीजन्मनि आशौचे, तत्सामान्ये विवाहोपादनात् । कानीनकन्याप्रसवपरत्वे बीजमाह—*प्रत्तानामिति । पुंप्रसवे इति शेषः । चकारः संपातायातः । वासिष्ठस्य मरणाशौचमात्रपरतां सिद्धान्तयिष्यन् स्त्रीजनने त्रिपुरुषसापिण्ड्यं त्र्यहं च दूषयति—*अत्रेति । *कि-

---

(१) 'कन्या' नास्ति क० ।
(२) 'पुत्रकसम्प्रसवे' छ० ।
(३) 'वेति' ग०
(४) धनुश्चिन्हान्तर्गतं नास्ति क० छ० ।

त्रमित्यनेकार्थविधिः कथं स्यात् वाक्यभेदापत्तेः । *न च चतुर्थादीनां सोदकत्वं क्वापि सिद्धम् । तेन त्रिपुरुषं चतुर्थादीनां च स्त्रीजन्मनि सोदकत्वं विधाय पुनस्तेषां त्रिरात्राशौचविधौ विध्यनुवादविरोधो वाक्यभेदद्वयं चेत्यसंवादार्थाग्निस्मृति*र्हेया ।

अथ मृताशौचं । हारीतः—*जातमृते मृतजाते वा सपिण्डानां दशाहम् दशाहम् । इति स्वाशौचपरम् । *जातमृते नालच्छेदोर्ध्वम् ,

*यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् ।
छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते ॥

इति जैमिन्युक्तेः 'नाड्यां छिन्नायामाशौचम्' इति हारीतोक्तेश्च । एतन्मृताशौचपरमेव । जननाशौचं तु नालच्छेदोत्कर्षेऽपि जननाद्येव । मृतजाते नालच्छेदाभा-

---

श्चेति । अभ्युच्चयमात्रं स्त्रीजन्मनि स्त्रीष्विति पदाभ्यां पृथगुद्देशसम्भवात् । सिंहगुहावलोकनन्यायेन पूर्वोक्ते दोषोद्धारं शङ्कते—*नचेति । *हेयेति । इदमुपलक्षणं । स्त्रीजन्मनीत्यस्य कानीनकन्यापरत्वानुपगमे सापिण्ड्यस्य तत्परत्वमनुचितं, तत्परत्वोपगमे तत्प्रायपाठात् पुंजन्मनीत्यत्र कानीनपुत्रपरत्वापात्तिः । कन्यापुत्रभेदेन जननाशौचभेदे मानाभावादिति तृतीयदूषणमपि बोध्यम् । *जातमृतेति सप्तममासप्रभृति सूतिपरम् । *जातमृते नालच्छेदोर्ध्वमिति । जीवत उत्पन्नस्य नालच्छेदोर्ध्वमरणे इत्यर्थः । *यावदिति । अग्रिमबृहन्मनुवचनादत्र शिशुमृतौ पूर्णमिति पदयोरध्याहारः । तथाच यावन्नालच्छेदः तावच्छिशुमृतौ न पूर्णं प्रसवाशौचं, नालच्छेदोर्ध्वं तन्मरणे तु तत्सम्पूर्णमित्यर्थः । एवञ्च नालच्छेदोत्कर्षेऽपि प्रसवोत्तरमेव तदाशौचप्रवृत्तिः । जातकर्मादेस्तात्कालिकशुध्यैव कर्तव्यता । तथाच पुत्रोत्पत्तिनि-

वात् षष्ठीपूजाद्युत्कर्षापत्तेश्च । तेन *नाडीछेदात्प्राङ् मातुः स्पर्शे न दोष इति शुद्धितत्त्वोक्तिः परास्ता । नाभिच्छेदनात्प्राङ्मृतौ तु बृहन्मनुः—

*जीवन्जातो यदि ततो मृतः सूतक एव तु ।
सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकम् ॥

इदं च प्रसवाशौचमेव, शावनिमित्तं स्नानमात्रम् । 'प्राङ्नामकरणा*त्सद्यःशौचम्' इति शङ्खोक्तेः ।

अत्र कश्चिदाह—'नामकरणमाशौचान्तकालोपलक्षणम्' । 'आशौचव्यपगमे नामधेयम्' इति विष्णूक्तेः,

आशौचे च व्यतिक्रान्ते नामकर्म विधीयते ।

इति मनूक्तेश्च नाम्नो नियतकालत्वात् । न च—

नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत् ।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ॥

इति मनूक्तेरनियतकालत्वम् । दशम्यामतीतायां विप्रः । द्वादश्यामतीतायां क्षत्रियः । *वैश्यः षोडशे । शूद्र एकत्रिंशे इत्यपि ज्ञेयम् । *पुण्य इत्याद्यनुकल्पः ।

मित्तकस्नानेऽपि न सन्ध्यादि नवा नाडीच्छेदात्प्राग् मातुः स्पर्श इति । अत एव पूर्णमित्यध्याहारानभिज्ञ इति मतं निरस्यति—*नाडीति । एतन्मृते मृतजाते नालच्छेदाभावेपि न दशाहस्य लोपः । तस्य विशिष्यविधानादिति स नोक्तः । *जीवान्निति । ततः नालच्छेदात् प्राक् । जीवन् जातो नालच्छेदात् प्राक् सूतक एव मृतस्तदा पित्रादीनां त्रिरात्रमिति परिसंख्यायाः जननप्रयुक्ताधिकाशौचनिवृत्तिपर्यवसायित्वेन नालच्छेदात् प्राक् पञ्चमादिनादौ मृते चतुर्थदिनादावनुवृत्तस्यापि सूतकस्य निवृत्तिः । *सद्य इति मृतपरं, सूतौ दशाहादिसत्त्वात् । पूरयति-*वैश्य इति । स्वस्वाशौचान्ते नाम कुर्यादित्यर्थः । *पुण्य इति । अनुकल्पेन

*तेन *नाम्नः कालोपलक्षणम् । एवं दन्तजननेऽपि 'दन्तजन्म सप्तमे मासि' इत्युपनिषदि नियतकालत्वात् । चौले तु न कालोपलक्षणम् ,

प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात् ।

इति मनूक्तेः,

ततः संवत्सरे पूर्णे चूडाकर्म विधीयते ।
द्वितीये वा तृतीये वा कर्तव्यं स्मृतिदर्शनात् ॥

इति यमोक्तेश्च *तस्यानियतकालत्वादिति । तन्मन्दम्, चौलवन्नामदन्तजननयोरपि स्वरूपेण निमित्तत्वोपपत्तेस्तद्विशिष्टकालानुवादे वाक्यभेदात् सप्तममासादर्वाग्दन्तजनने तदभावप्रसङ्गाच्च । यस्तूपनिषद्दर्शनेन निर्णयं कुर्यात्स नूनं 'शतायुः पुरुषः' इति श्रुतेरर्वाक् पितृमरणे तदन्त्यकर्मापि त्यजेत् । ननु कालानुपलक्षणे नामोत्कर्षे तदभावे वा स्नानमात्राच्छुद्धिः स्यात् । ततः किम् ? अस्तु । अत एवोक्तं 'आदन्तजननात्सद्यः' इति । सा च विष्णुवचनाद्दाहाभावविषयेति वक्ष्यामः । त्रिवर्षादावपि स्यादिति चेत् ? न, दाहदन्तादिनिमित्तैर्विशेषा-

---

मुख्यकल्पनैयत्यभङ्ग इति भावः । ननु रात्रिविशेषेण दशमीद्वादशीशब्दावहोरात्रपराविति वचनबलादाशौचमध्येऽपि जातकर्मवन्नामकर्मोपपत्तौ अध्याहारोपलक्षणत्वयोर्मानाभाव इत्यत आह—*तेनेति । विष्णुमनुवचनेनाध्याहारादिप्रमाणेनेत्यर्थः । *नाम्नः कालः आशौचान्तकालः । अपूर्णे इति च्छेदः । एतेन संवत्सरे पूर्णे इत्यतो द्वितीयलाभः । नच द्वितीयेति व्यर्थं, तत्रापि पूर्णे इत्यनुषङ्गात् । नच तृतीये इत्यर्थकं स्यात् अस्य तृतीयवर्षचरमावयवपरत्वात् पूर्वस्य तदाद्यावयवपरत्वादिति व्याख्यानाभासो नादेयः । *तस्येति । प्रथमाब्दात्रापि चूडाकरणस्योक्तत्वात् ।

शौचैः पूर्वस्य बाधात्। तदुक्तम्—

पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सिध्यति। इति।

“जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे(१)वा” इति परिशिष्टे—

द्वादश्यामपरे रात्र्यां मासे पूर्णे तथापरे।
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः॥

इति भविष्ये च नाम्नः कालानियमाच्च। नच प्राथम्याद्दशरात्रेऽतीते इति मुख्यः कालः अन्यस्त्वनुकल्प इति वाच्यम्, चौलेऽपि तथापत्तेः। न च दन्तजननकालानुपलक्षणे सदन्तजातमृतस्य दाहैकाहप्रसङ्गः, दशाहेन बाधात्। नामकरणोत्तरमेव दाहप्रवृत्तेः;

दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः।
शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते॥

इति बृहन्मनूक्तेश्च। आशौचं दाहोपलक्षणम्, सूतकवदिति पारस्करोक्तेः। यत्तु विष्णुः—

अनिवृत्ते दशाहे तु पञ्चत्वं यदि गच्छति।
सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रिया॥ इति,

तदपि प्रेताशौचनिषेधार्थं नतु *सद्यस्त्वपरं, वाक्यभेदात्। किञ्च—नामकालात्प्राङ्मृतस्य स्नानम्, तदुत्तरं त्वेकाहादि। नामकाले त्वेकादशाहे मृतस्य न किमपि

---

*सद्यस्त्वपरं सूतिकाशौचनिवृत्तिपरम्। इदं तु बोध्यं—तन्मन्दामित्याग्रहमात्रम्। नहि नामादिविशिष्टकालोऽनूद्यते येन वाक्यभेदः स्यात्। किन्त्वाशौचान्तकालः तत्राप्याशौचान्तत्वं न विशेषणम् उद्देश्यतावच्छेदकावलीढ एव विधेयान्वयस्य सकलशास्त्रकृत्संमतत्वात्। सकलमासादिति त्विष्टापत्तिग्रस्तम्। श्रुतिस्तु पुरुषत्वसा-

---

(१) ‘च’ ग०

स्यात् । अथ शङ्कवचने ल्यब्लोपे पञ्चमी; तदा प्रागिति नोपपद्यते, 'नाम्नि वापि कृते सति' इति मन्वादिविरोधात् । कृतनाम्न इति माधवमिताक्षरादिविरोधाच्च न कालोपलक्षणं क्वापीति दिक् ।

नामोत्तरे दन्तोत्पत्तेः प्राग्दाहे सत्यहः,
अदन्तजाते तनये शिशौ गर्भच्युते तथा ।
सपिण्डानां तु सर्वेषामहोरात्रमशौचकम् ॥

मानाधिकरण्येन शतायुष्ट्वरूपं सिद्धार्थमनुवदति । यद्वा दशरथादेर्दीर्घतरायुर्वचनप्रामाण्येन "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" इत्यादिवत्संख्यापूर्वपदकसमासेन च शतपदादेः तात्पर्यविषयताऽनन्तादिभूयः संख्यार्थकतया बहुवर्षजीवनयोग्यः यथाश्रुत एव वा शतवर्षजीवनयोग्यः पुरुष इत्यर्थः, अतः आयुर्ह्रासकारि निषिद्धं कर्म तेन न कार्यमित्येवंपरा । एवं नन्वित्यादिशङ्कायामिष्टापत्तिरपि न युक्ता यस्याशौचान्ते नाम तस्य "आदन्तजननात्सद्यः" इत्येतद्दाहाभावं विधते, यस्य तु तत्र न तस्य तत्र तदनुवाद इति वैषम्यात् । चौलेऽपीत्यप्यसङ्गतमेव "चूडा कार्या यथाकुलम्" इत्यादिभि सर्वचूडाकरणानां कुलधर्मप्राप्तत्वेन निर्देशात् । दशाहेनेत्यप्यशुद्धमेव अबाधेनैवोपपत्तौ बाधस्यान्याय्यत्वात् । "दशाहाभ्यन्तरे" इति वाक्ये आशौचपदं न दाहोपलक्षणं प्रयोजनाभावात् । किन्तु पूर्णाशौचानिषेधमात्रं सद्यःशौचस्योक्तत्वात् । "अन्तः सूतके चेदोत्थानादाशौचं सूतकवत्" इति पारस्करवाक्ये सूतिकाया उत्थानादादशाहमिति यावत् । शिशूपरमनिमित्तकोदकदानरहितमिति मिताक्षराऽपि सामान्यविधिप्राप्ततन्निषेधपरा प्रत्युत सदन्तजातमरणनिमित्तकदाहादिना बाध्येत । किञ्चेत्यादिकमपि फल्गु । अनिवृत्ते दशाहे त्विति वैष्णवस्यैव वचोभङ्ग्याऽऽशौचान्तकालोपलक्षणपरत्वात् मन्वादेश्च

इति यमोक्तेः। दाहाभावे तु स्नानमात्रम्। *'अदन्तजाते प्रेते सद्य एव नास्याग्निसंस्कारः' इति विष्णुना दाहाभावे तदुक्तेः। 'आदन्तजननात्सद्यः' इति याज्ञवल्कीयाच्च। दाहविकल्पं चाह लौगाक्षिः—

*तूष्णीमेवोदकं कुर्या*त्तूष्णीं संस्कारमेव च।
सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयम्॥

अन्यत्राकृतचूडे। *अत्र चूडाकरणं तृतीयवर्षरूपकालोपलक्षणार्थमिति मेधातिथिहरदत्तौ। मनुरपि—

*नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया।
जातदन्तस्य वा कुर्युर्नाम्नि वापि कृते सति॥ इति।

उदकं दाहोपलक्षणम्। *दन्तोत्पत्त्यनन्तरं प्राक्त्रिवर्षा-

विरोधः। नामकरणकालस्य वाक्यलक्षणापक्षे पदलक्षणापक्षे वा विवक्षितत्वात्। प्रत्युत आदन्तजननात्सद्य इत्यत्र यावता कालेन दन्तानामुत्पत्तिः तस्मिन् काले इति मिताक्षरायां कालानुपलक्षणे कालपदोपादानवैरस्यापत्तिः। एवञ्चेदृशाप्रामाणिकसिद्धान्तानुरोधेन नामोत्तरदन्तोत्पत्तेरित्यादिग्रन्थः अशौचान्तकालमारभ्य सप्तममासादित्यादिरीत्या व्याख्येय इति शिवम्। यमयाज्ञवल्क्ययोर्व्यवस्थापेक्षायामाह—*अदन्तेति। 'नास्य' इति निषेधसाहचर्यात्सद्यः शौचस्यादाहविषयत्वे इतरस्य दाहविषयत्वमिति भावः। *तूष्णीमेवेति। उदकदानमन्त्रं विनेत्यर्थः। *तूष्णीं विशेषविहितयमसूक्तादिजपं विनेति शेषः। कृतायां चूडायां वर्षत्रयात् प्रागपि दाहादि नियतमित्यर्थः। कृतचूडत्वं त्रिवर्षत्वमिति मतमाह—*अत्रेति। चूडायाः कालोपलक्षणत्वनिराकरणं चूडाया अप्यत्रिवर्षे दाहाद्यनैयत्यापत्तिश्चास्वरसः। *नात्रीति। अकृतायामपि चूडायां त्रिवर्षादूर्ध्वं दाहादि नियतमित्यर्थः। वि-

न्तान्मृतेऽहः। *दन्तजातेप्य*कृतचूडे त्वहोरात्रेण शुद्धिः इति विष्णूक्तेः। त्रिवर्षोर्ध्वं कृतचूडेऽकृतचूडे वा प्रागुपनयनात्त्र्यहः,

*यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः।
तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेत्॥

इत्यङ्गिरसोक्तेः। (अ(१)कृतायामपि चूडायां त्रिवर्षोर्ध्वं दाहादि नियतम्। नात्रिवर्षस्येति वचनात्। कृतायां वर्षत्रयात्प्रागपि तूष्णीमेव)। *अत्र जातदन्तत्वमुद्देश्यविशेषणत्वादविवक्षितम्। दाहयित्वेत्यप्यनुवादः,

ज्ञानेश्वरमतमाह—*दन्तेति। *दन्तजाते सप्तममासादूर्ध्वम्। *अकृतचूडे पूर्णात्रिवर्षाकृतचूडे,

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी।

इत्याङ्गिरोवचनात्। एतेन "आचूडान्नैशिकी स्मृता" इत्यादौ चूडाशब्दस्य कालोपलक्षणत्वात्तृतीयवर्षरूपतत्काललाभात्सप्तममासादूर्ध्वं वर्षद्वयाभ्यन्तरे एकाह इति प्रत्युक्तम्। तथाप्युक्तवाक्यात्तदन्तस्यैवावधित्वात्, चूडाशब्दस्य कालानुपलक्षणतया यथाश्रुतस्यैव सम्भवाच्च। यदपि चूडायाः प्रथमवर्षादिकालत्वेऽपि विप्रे न्यूने इत्यादिभिः तृतीयवर्षात्पूर्वमहोरात्रोक्तेः तदेकवाक्यतयाऽऽचूडादित्यादावपि तृतीयवर्ष एव ग्राह्य इति। तदपि न, क्षणन्यूनात्रिवर्षस्य त्रिवर्षत्वासम्भवात्। एतन्मतेऽस्य दाहेऽप्येकाह एवेति। *यद्यपीति। अङ्गिरःस्मरणं त्रिवर्षोर्ध्वं योजितम्। नचाकृतचूडपदात् त्रिवर्षोर्ध्वस्य कथं लाभः। नात्रिवर्षस्येति मनुवशात्तस्य त्रिवर्षाधिकाकृतचूडपरत्वात् कृतचूडे तु तूष्णीमेवेत्युक्तं। प्रथमवर्षादावित्यादि च वक्ष्यति। नन्वेतस्य जातदन्तत्वदाहयोर्निसत्वात्तद्द्वयं व्यर्थं तत्राह—*अत्रेति। एतेनास्य त्रिवर्षा-

---

(१) कंसान्तर्गतं नास्ति क० छ०

उभयविधौ वाक्यभेदात् । *त्रिवर्षात्प्राक् चूडाभावेऽग्निदाने त्र्यहस्तदभावे विष्णूक्तेरेकाह इति माधवः । यत्तु कश्चिदाह-अत्र त्रिवर्षविषयादस्मादेवार्थात् त्रिवर्षोर्ध्वमपि तत्सिद्धिः । वि(१)ज्ञानेश्वरोक्तेश्च त्रिवर्षोर्ध्वमकृतचूडाविषयत्वं चिन्त्यम्, जात(२)दन्तपदवैयर्थ्यादिति । तत्तुच्छम्, दाहस्याविधेयत्वात् ।

नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता ।

इति मनूक्तेः त्रिवर्षोर्ध्वमेकाहापत्तेरर्थात् त्र्यहासिद्धेः । त्वयाप्यग्रे तथाङ्गीकारात्पदवैयर्थ्यस्य साम्याद्वाक्यार्थाज्ञानाच्चेत्यलं मिताक्षरार्थानभिज्ञदूषणेन । प्रथमवर्षादौ कृतचूडस्य सदा त्र्यहः,

निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते ।

इति मनूक्तेः । एतत्सर्वं प्रागुक्तं सपिण्डानाम् ।

मातापित्रोस्तु दशाहोर्ध्वं मृते सर्वत्र त्रिरात्रम्, 'बालानाम*जातदन्तानां त्रिरात्रेण शुद्धिः' इति कश्य-

त्रिवर्षोभयपरत्वे त्र्यहप्रयोजकतया दाहो विवक्षितः । त्रिवर्षे तु तस्य नित्यत्वात्स न तथेति वैरूप्यं प्रत्युक्तम् । स्वसंमतं मतमाह—*त्रिवर्षादिति । ऊनद्विवर्षे प्रेते गर्भस्य पतने वा सपिण्डानां त्रिरात्रमिति वासिष्ठत्रिरात्रस्य विष्णूक्तैकरात्रस्य च व्यवस्थापकं यद्यपीत्याद्यं जातदन्तपदवैयर्थ्यभियाऽत्रिवर्षविषयं, नतु त्रिवर्षोर्ध्वमकृतचूडविषयम् ।

नृणामकृतचूडानां विशुद्धिर्नैशिकी स्मृतिः ।

इति मानवमपि न त्रिवर्षोर्ध्वपरं तत्र अहस्यार्थतः सिद्धेः । ऊनद्विवर्षग्रहणं तु तस्य निखननपक्षमुख्यत्वाद्दाहाभावेन त्रिरात्रप्राप्तौ तद्विधिद्वारा तस्यापि पाक्षिकदाहविधिप्राप्त्यर्थमिति न

---

(१) 'विज्ञानेश्वरोक्तं च' ग० (२) 'दन्त' नास्ति क० छ०

पोक्तेः।

*बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम्।

इति मनूक्तेश्च। शुद्धितत्त्वादयो गौडास्तु--

अजातदन्तमरणे पित्रोरेकाहमिष्यते।
दन्तजाते त्रिरात्रं स्याद्यदि स्यातां तु निर्गुणौ॥

इति कौर्मात्काश्यपं शूद्रपरम्।

अनूढानां तु कन्यानां तथा वै शूद्रजन्मनाम्।

इति त्र्यहानुवृत्तौ शङ्खोक्तेः।

त्रिरात्रं तु भवेच्छूद्रे षण्मासेऽपि शिशौ मृते।

इति मात्स्यसूक्ताच्च। दन्तजाते शूद्रे तु पञ्चाहः। यथाहाङ्गिराः—

शूद्रे त्रिवर्षान्न्यूने तु मृते शुद्धिस्तु पञ्चभिः।
अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते॥
षड्वर्षान्तमतीतो यः शूद्रः संम्रियते यदि।
मासिकं तु भवेच्छौचमित्याङ्गिरसभाषितम्॥ इति।

यत्तु 'अनूढभार्यः शूद्रस्तु' इति शङ्खोक्तं मासाशौचं, तत्सगुणशूद्रपरम्। निर्गुणे त्वनूढभार्ये शूद्रे त्रिवर्षोर्ध्वं द्वादशाहः। षडब्दोर्ध्वं मासः। षडब्दात्प्रागपि कृतोद्वाहे मास इत्याहुः। (१)एतत् 'तुल्यं वयसि सर्वेषाम्' इति विरोधाच्छिष्टविगानाच्चादर्तव्यमिति विज्ञानेश्वरादयः। दाक्षिणात्यानां तथैव। अन्यदेशे प्रागुक्तमिति *गौडाः। एवं कन्यास्वपि। *तास्वप्यजातदन्तासु पि-

तद्विरोधः। *अजातदन्तानामिति। अजातदन्ताद्युक्तस्यैवायमपवादो नतु नाम्नः प्रागुक्तस्येत्येतल्लाभाय। *बैजिकेति। गार्भिकोपलक्षणं जनकत्वरूपादिति यावत्। *गौडा इति वि-

---

(१) 'एतत्सर्वम्' क०

त्रोरेकरात्रमिति माधवः। यत्तु विज्ञानेश्वरेणोक्तम्—

*ऊनद्विवर्ष उभयोः *सूतकं मातुरेव हि।

इति याज्ञवल्क्योक्तेः *"गर्भस्थे प्रेते मातुर्दशाहं, जाते उभयोः, कृते नाम्नि सोदराणां च" इति पैङ्गयोक्तेश्च पित्रोः सोदराणां च दशाहमस्पृश्यत्वमिति। *तन्नेदानीं प्रचरति। अत एव स्मृत्यर्थसारे तन्नादृतम्। कन्यासु चौलात्प्राङ्मृतौ स्नानम्,

अचूडायां तु कन्यायां सद्यः शौचं विधीयते।

इत्यापस्तम्बोक्तेः। इदं त्रिपुरुषमध्ये,

*अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायते,

इति वसिष्ठोक्तेः। इदं वाग्दानोत्तरमिति गौडाः। तन्न,

अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं साप्तपौरुषम्।

इति वचनात्।

गीतवचनार्थे देशव्यवस्थायां मानाभावोऽस्वरसः। स्वस्वपारम्पर्यागताचारात्तथोक्तमिति चेत्तथाऽपि न क्षतिः। दाक्षिणात्याचारस्य भवतामपि सम्मतत्वात्। *तास्वपीति। नेदानीं प्रचरति बालानामित्यादौ सामान्येन ग्रहणात्। *उनद्विवर्ष इति। नेदं पूर्णत्रिवर्षव्यावृत्त्यर्थं तत्राशौचस्य सुतरां तावत्त्वात्। अन्यथाऽनौचित्यात्। *सूतकं जननाशौचं दृष्टान्तः।

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते।

इत्युपक्रमात्। इदं च पित्रोर्जननादूर्ध्वं सोदराणां तु नामकरणादित्याह—*गर्भस्थे इति। *तन्नेति। जन्माशौचकाले सद्यःशौचादेस्तदूर्ध्वं त्रिरात्रादेश्च प्रतिपादकैरुक्तवाक्यैर्विरोधात्। वाग्दानमपि द्विवर्षरूपकालोपलक्षणं प्रथमवर्षकृतचूडायामपि सद्यःशौचप्रसङ्गात्। तथा च यदाकदाचित् क्रियमाणचूडापर्यन्तं सद्यःशौचमित्यर्थः। *अप्रत्तानामिति भेदे षष्ठी। तथा च पितृ-

*चौलोत्तरं वाग्दानात्पूर्वं तास्वेकाहः,
अविशेषेण वर्णानामर्वाक्संस्कारकर्मणः ।
त्रिरात्रातु भवेच्छुद्धिः कन्यास्वह्ना विधीयते ॥

इत्यङ्गिरसा *त्रिरात्रविषयेऽहोविधानात् ।

(अ(१)हस्त्वदत्तकन्यासु बालेषु च विशोधनम् ।

पितामहप्रपितामहैः सहाविवाहितायाश्चतुर्थ्याः सापिण्ड्यं । कन्यामपेक्ष्य पञ्चमे वृद्धप्रपितामहे सापिण्ड्यनिवृत्तेः तन्मरणे सापिण्ड्यप्रयुक्तमाशौचं तत्सन्ततेर्नास्तीति भावः । गोविन्दार्णवादौ शुद्धिसंस्कारग्रन्थादौ स्फुटमेत(२)त् । *चौलोत्तरमिति। अकृतचूडायास्त्रिवर्षोत्तरं चेति शेषः । *त्रिरात्रेति । यत्र पुमपत्ये त्रिरात्रं तत्र कन्यास्वहोरात्रम् । यथा चौलोत्तरं त्रिवर्षोर्ध्वं चेत्यर्थः । यत्तु शुद्धिविवेके उक्तम्--

आजन्मनस्तु चूडान्तं यत्र कन्या विपद्यते ।
सद्यःशौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥
ततो वाग्दानपर्यन्तं यावदेकाहमेव च ॥

इति ब्राह्मे चूडा तदुपलक्षितः तृतीयवर्षोन्ते यस्येति व्युत्पत्तेर्द्वितीयवर्षसमाप्ति सद्य इति । तन्न, विज्ञानेश्वरेण तृतीयवर्षसमाप्तिपर्यन्तं कन्यामृतौ सद्यः शौचोक्तेः चूडान्तशब्दस्य तृतीयवर्षान्तार्थकत्वात् । नच विज्ञानेश्वरमतमेव कुतो नासङ्गतमिति वाच्यं, यतः "विप्रे न्यूनात्रिवर्षे" इति "यद्यप्यकृतचूडो वै" इति "अविशेषेण वर्णानाम्" इति च त्रीण्याङ्गिरोवचांसि । तत्राद्येन तृतीयवर्षसमाप्तिपर्यन्तं पुमपत्यमृतावेकाहो विधीयते । द्वितीयेन तु वर्षत्रयादूर्ध्वं चूडोत्कर्षेऽपि त्रिरात्रम् । उभयत्र श्रुतमपि पुंस्त्वमनुवाद्यगतत्वादविवक्षितम् । अन्यथा त्रिवर्षादूर्ध्वं कन्याया दाहो न

---

(१) कंसान्तर्गतं नास्ति ग०

(२) तत्सन्तानेऽन्य.स्मिन्नविवाह्यत्वाशौचादिधर्म्मा न भवन्ति इति।

इति याज्ञवल्कीयाच्च ।) *अतः शूद्रस्योपनयनस्थानीय*विवाहात्पूर्वं त्रिरात्रम् । विवाहोत्कर्षे तु षोडशाब्दमध्ये त्रिरात्रमेवेत्यपरार्काद्याः । *शूद्रे निर्गुणे त्र्यब्दोर्ध्वं पञ्चाहं, षडब्दोर्ध्वं विवाहाभावे द्वादशाहमिति गौडाः । *सगुणानां षोडशाब्दोर्ध्वं तु विवाहाभावेऽपि पूर्णाशौचं वक्ष्यते । तदुत्तरं प्राग्विवाहाद्भर्तृकुले पितृकुले च *सप्तपुरुषावधि त्रिरात्रम्,

अवारिपूर्वं प्रत्ता तु या नैव प्रतिपादिता ।
असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतम् ॥

इति मरीच्युक्तेः । रत्नाकरे शुद्धितत्त्वे च शङ्खः—

पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता ।

स्यात् । एवञ्चापत्यमात्रे आद्येन वाक्येन त्रिवर्षान्तमेकाहे तदूर्ध्वं द्वितीयेन त्रिरात्रे च सिद्धे तृतीयेन एकस्मृतितया पुंसस्त्र्यहविध्ययोगात् त्र्यहमनूद्यैवोपनयनाविवाहरूपसंस्कारद्वयात्मकमुत्तरावधिमालम्ब्य चतुर्थपादेन कन्यायां त्रिरात्रापवादेनैकाहो विधीयते । अपवाद्यापवादयोः समानविषयत्वाच्च कन्यायास्त्रिवर्षोर्ध्वं मृतावेकाहः सिद्ध्यति । त्रिवर्षान्तं च ब्रह्मपुराणोक्तं सद्यस्त्वमिति विज्ञानेश्वरमतं सम्यगिति । द्विजानामित्युपेक्ष्य वर्णानामित्युक्तेः फलमाह-*अत इति । *विवाहेति । संस्कारकर्मत्वध्युक्तेः "अनूढभार्य" इत्यग्रिमवाक्येऽनूढभार्यत्वरूपविशेषणसाफल्यार्थं च । षोडशात्प्राक् विवाहे सम्पूर्णमिति स्वाभिप्रायोऽत्रास्वरसः । *शूद्रे इति । "शूद्रे त्रिवर्षन्यूने तु मृते" इति त्र्यहपरम् "शुद्धिस्तु पञ्चभिः । अत ऊर्ध्वं मृते शूद्रे" इति च्छेदः । विवाह इत्यादि यदीत्यन्तो । विवाहे तु मासिकमिति पूर्वोक्ताङ्गिरोवाक्यार्थः । अपरार्कादिविरोधोऽत्रास्वरसः । *सगुणानामिति गौडमते । स्वमते सगुणनिर्गुणभेदेनाशौचभेदाभावात् । *सप्तेति । "अप्रत्तानाम्" इति प्रागुक्तसा-

तस्यां मृतायां *नाशौचं कदाचिदपि शाम्यति ॥

यावज्जीवमाशौचमिति वाचस्पतिमिश्राः ।

अथानुपनीते किञ्चिदुच्यते । *नाम्नः पूर्वं खननमेव । *तदूर्ध्वं वर्षत्रयात्पूर्वं चौलाभावे*ग्न्युदकदानविकल्पः,

*नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया ।
जातदन्तस्य वा कुर्युर्नाम्नि वापि कृते सति ॥

इति मनूक्तेः । उदकक्रिया साहचर्याद्दाहोपलक्षणम् । खनने तु नान्यदौर्ध्वदेहिकम् ,

*ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः ।

पिण्ड्यवचनात् । *नाशौचामिति । तन्मरणनिमित्तकप्रायश्चित्तं विनेति भावः । *नाम्नः पूर्वं प्रसवाशौचमध्ये । एवकारेणाप्युदकदानादिनिवृत्तिः । *तदूर्ध्वम् आशौचोत्तरदिनमारभ्य वर्षत्रयात्पूर्वं वर्षत्रयसमाप्तिपर्यन्तम् । *अग्नीति । अग्निपदं पिण्डदानाद्युपलक्षणम् । *नात्रीति । यत्त्वप्रविष्टत्रिवर्षोऽत्र त्रिवर्षः ऊनद्विवर्ष इति यावदिति । तन्न, त्रिवर्षशब्दस्य भूतत्रिवर्षपरत्वात् । *ऊनद्विवर्ष इति । अथ सकलस्मृतिषूनद्विवर्षग्रहणं सामान्यप्राप्तदाहापवादार्थमिति चेत् ? मनुना त्रिवर्षसमाप्त्यन्तं विकल्पेन दाहोक्तेः तदितरस्यैव तस्यापि पाक्षिकखननासिद्धेः । मैवम्, ऊनद्विवर्षस्य तदितरस्य च सत्यपि पक्षद्वये उनद्विवर्षस्य खननपक्षो मुख्यः । तदितरस्य तु दाहपक्ष इति विशेषेणाभिधानार्थं तदुक्तेः ।

अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते ।
अतिमोहाभिभूतैस्तु देशसाधर्म्यमार्दवात् ॥
आशौचं ब्राह्मणानां तु त्रिरात्रं तत्र विद्यते ॥

इति ब्राह्मे ऊनद्विवर्षदाहस्यानुकल्पत्वं स्फुटमेव एवं मानवेऽपि जातदन्ताह एवानुकल्पः । कृतनामदाहस्तु अत्यन्तानुकल्प

इति याज्ञवल्क्योक्तेः । *उदकमन्त्यकर्मपरमित्यपरार्कः । यमः—

ऊनद्विवार्षिकं प्रेतं *घृताक्तं निखनेद् भुवि ।
*यमगाथां गायमानो *यमसूक्तमनुस्मरन् ॥

माधवीये ब्राह्मेऽपि—

स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोऽथ वा ।
अजातदन्तो मासैर्वा मृतः षड्भिर्गतैर्बहिः ॥
वस्त्राद्यैर्भूषितं कृत्वा निःक्षिपेत्तं तु *काष्ठवत् ।
खनित्वा शनकै*र्भूमौ सद्यः शौचं विधीयते ॥

इति सूचनार्थमेव तयोः पृथगुपादानम् अन्यथा जातदन्तस्य वेत्यस्यानर्थक्यापत्तेः । एवञ्च पूर्णत्रिवर्षस्यापि तृतीयवर्षसमाप्तिपर्यन्तमनुकल्पतया खननपक्षोऽप्यस्तीति अभिप्रायेण तदूर्ध्वं वर्षत्रयात् पूर्वमित्युक्तम् । *उदकपदमिति । अरण्ये निक्षिपेत्काष्ठवदिति दृष्टान्ताभिधानात् । *घृताक्तमिति । खननयोग्यमात्रविषयम्,

घृततैलसमायुक्तं कृत्वा वै देहशोधनम् ।
तेनाभ्युक्ष्य गुरुं ज्ञाप्य नयेत्तं (१)पैतृकं वनम् ॥

इति वराहस्य दाहविषयत्वात् । *यमगाथा यमदेवत्या गाथेति मिताक्षरा । *यमसूक्तम् ये ईयिवांसमिति दाशतय्यां षोडशर्चम् । गाथासूक्तजपश्च दाहेऽपि,

यमसूक्तं तथा गाथां जपद्भिर्लौकिकाग्निना ।
स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् ॥

इति योगीश्वरस्मृतेः । *काष्ठवदिति । यथाऽरण्ये काष्ठं त्यक्त्वा तद्विषये उदासीनो भवति, तथा खातायां भूमौ तं निक्षिप्य श्राद्धाद्यौर्ध्वदेहिके उदासीनो भवेदिति और्ध्वदेहिकनि-

---

(१) श्मशानमित्यर्थः ।

अलङ्करणमपि वक्ष्यते । *कृतचूडस्य तु त्रिवर्षात्प्रागूर्ध्वं वाग्न्युदकदानं नियतम् । *यत्तु वसिष्ठः—'ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रम्' इति त*त्प्रथमाब्दचूडापरम् । *वर्षत्रयादूर्ध्वमकृतचूडस्यापि नियतम् । वर्षत्रयोर्ध्वमुपनयनात्पूर्वं च तूष्णीमग्न्युदकदानम् ।

तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च ।

इति पूर्वोक्तलौगाक्षिस्मृतेः पिण्डदानमपि कार्यम् । 'असंस्कृतानां भूमौ पिण्डं दद्यात्संस्कृतानां कुशेषु' इति प्रचेतसोक्तेः 'उदकदानं *सपिण्डैः कृतचूडस्य' इति गौतमोक्तेः उदकग्रहणमौर्ध्वदैहिकपरमिति हरदत्तः ।

द्वादशाद्वत्सरादर्वाक् पौगण्डमरणे सति ।

षेधः सूच्यते । *भूमाविति । ग्रामाद्बहिः श्मशानादन्यत्रास्थ्यादिराहित्येन शुद्धायां भूमावित्यर्थः । *कृतचूडस्येति । चूडायां कृतायां त्रिवर्षात् प्रागपि दाहादि नियतं, "तूष्णीमेव" इति वचनात् । अत्र प्रथमाब्दकृतचूडे दाहादिनियमेऽपि आशौचमेकाहमेव नचैवम् "आचूडान्नैशिकी स्मृता" इत्यनेन विरोधः,

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी ।

इति वचनान्तरवशात्तत्र चूडाशब्दस्य तृतीयवर्षपरत्वादिति । रुद्रधरोक्तं खण्डयितुं तदपवादमाह—*यत्त्विति । *प्रथमाब्देति । त्रिरात्रैकरात्रयोः सचूडाचूडदाहपरत्वात् । आचूडादिति चूडाशब्दस्योक्तार्थे प्रमाणाभावादिति भावः । *वर्षत्रयादिति । अकृतायां चूडायां त्रिवर्षादूर्ध्वं दाहादिनियतं "नात्रि" इति वचनादित्यर्थः । वर्षत्रयोर्ध्वमिति चकारश्च संपातायातः, ततः प्रागपि दाहादेः कर्त्तव्यत्वात् । तूष्णीं यमसूक्तादि जपेत् मन्त्रवर्जम् । *सपिण्डैरिति । पिण्डदानादावधिकारी उक्तः । केषांचिन्मत-

सपिण्डीकरणं न (१)स्यान्नैकोद्दिष्टानि कारयेत् ॥
इति हरदत्तधृतदेवलोक्तेश्च । मरीचिरपि—
प्रेतपिण्डं बहिर्दद्याद्दर्भमन्त्रविवर्जितम् । इति ।
एतदनुपनीतपरमिति विज्ञानेश्वरः ।

*अत्र चूडैव पूर्वावधिः *पूर्ववाक्येषु तद्ग्रहणात् । *उदकग्रहणस्योऽ*पलक्षणत्वाद्दाहः पूर्वावधिरिति केचित् । द्वादशाब्दत्सरादित्यनुपनीतद्विजानूढशूद्राविषयम् । *त्र्यहाशौचे पिण्डदानविधिमाह पारस्करः—

प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥
त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादि क्षालयेत्ततः ॥ इति ।

अत्र देवयाज्ञिकनिबन्धे विशेषः—

शिशुरादन्तजननाद्बालः स्याद्यावदाशिखः ।
कथ्यते सर्वशास्त्रेषु कुमारो मौञ्जिबन्धनात् ॥
आपञ्चवर्षात्कौमारं पौगण्डो नवहायनः ॥

तथा—

गर्भे नष्टे क्रिया नास्ति *दुग्धं देयं शिशौ मृते ।
*परं च पायसं क्षीरं दद्याद्बालविपत्तितः ॥

माह-*अत्रेति । *पूर्ववाक्येषु लौगाक्ष्यादिवाक्येषु अग्न्यौर्ध्वदेहिकपरत्वेन व्याख्यातोदकपदवद्गौतमादिवाक्येषु च । चूडाकर्माणि सम्प्राप्ते इत्यग्रिमवाक्योपलक्षणमेतत् । वाजपेयिमतमाह—*उदकेति । *उपलक्षणत्वात् प्रायश उदकदानस्य दाहसाहचर्येण दाहोपलक्षणत्वात् । *त्र्यहाशौचे इति । एकाहाशौचे च न पिण्डदानमिति भावः । *दुग्धमिति । दन्तजननादर्वाक् । चौलादर्वागाह-*परं चेति । वक्ष्यमाणं वस्त्रदानं चात्रैव ।

---

(१) 'स्यादेको' न०

*एकादशं द्वादशाहं वृषोत्सर्गविधिं विना ॥

तथा—

यत्र प्रमीयते बालस्तत्र (१)प्रायः प्रदीयते ।
किञ्चित्समानवयसां संस्कृत्यान्नं यथाविधि ॥
भक्ष्यं भोज्यं च दातव्यं *तथा च सुखभक्षिका ।
तद्वस्त्राणि प्रदेयानि सोपानत्कानि तत्समे ॥
*कुमाराणां च बालानां भोजनं वस्त्रवेष्टनम् ।
यच्चोपजीवते बालस्तत्तद्विप्राय दीयते ॥

तथा—

*भूमिनिक्षेपणं बाले आवर्षद्वयमाशिखम् ।
ततः परं खगश्रेष्ठ देहदाहो यथाविधि ॥

अचूडेऽप्यूर्ध्वं खनननिवृत्त्यर्थमावर्षद्वयमिति । प्रागपि कृतचूडस्य तन्निवृत्त्यर्थमाशिखमिति । तथा—

चूडाकर्मणि सञ्जाते विपत्तिस्तु यदा भवेत् ।
सूतकान्ते प्रकर्तव्यं वृषस्योत्सर्जनं (२)तदा ॥
तत्र दाहः प्रकर्तव्य उदकं तत्र निश्चितम् ।
श्राद्धानि षोडशापि स्युः सपिण्डीकरणं विना ॥

इदं पञ्चवर्षोत्तरम्,

जन्मतः पञ्चवर्षाणि भुङ्क्ते दत्तमसंस्कृतम् ।

एतद् दुग्धं च सवयोभ्यः, समानवयसामित्यस्येहापि सम्बन्धात् । *एकादशेति ।

महादानविहीनं च कुमारे कृत्यमाचरेत् ।

इति उत्तरार्धम् । यद्यपि कुमारो मौञ्जिबन्धनादित्युक्तं तथापि पञ्चवर्षाधिके पूर्ववचसां न प्रवृत्तिरित्याह-*तथेति । बालपदं कुमारस्याप्युपलक्षणम् । अत एवाह-*कुमाराणां चेत्यादि ।

---

(१) 'दीपः' क० (२) 'तथा' ग०

पञ्चवर्षाधिके बाले विपत्तिर्यदि जायते ॥
वृषोत्सर्गादिकं कर्म कर्तव्यमुदकं ततः ।
अहन्यहनि सम्प्राप्ते कुर्यात् श्राद्धानि षोडश ॥
पायसेन गुडेनैव पिण्डं दद्याद्यथाक्रमम् ।
उदकुम्भप्रदानं च पददानानि यानि च ॥
दीपदानानि यत्किञ्चित्पञ्चवर्षाधिके सदा ।
कर्तव्यं तु खगश्रेष्ठ व्रतार्वाक् प्रेततृप्तये ॥
स्वाहाकारेणैव कार्याण्येकोद्दिष्टानि षोडश ।
ऋजुदर्भैस्तिलैः शुक्लैः प्राचीनावीतिना तथा ॥

इति तत्रैवोक्तेः । *अत्र मूलं चिन्त्यम् । वार्षिकादि तु न भवत्येव । (१)सपिण्डनाभावे पितृत्वायोगा*द्वचनाभावाच्च ।

दिवोदासीये---

अव्रते निधनं प्राप्ते विप्रादौ शूद्रजातिवत् ।
क्रियाः सर्वाः समुद्दिष्टाः सपिण्डीकरणं विना ।
उदकं पिण्डदानं च कृतचूडे विधीयते ॥ इति ।

स्त्रीणां तूद्वाहात्प्रागुदकपिण्डदानविकल्पः 'स्त्रीणां चैके *ऽप्रत्तानाम्' इति गौतमोक्तेः । 'स्त्रीशूद्राश्च सधर्माणः' इति वचनात् शूद्रेऽप्येवम् । एतद्वयोनिमित्तमा-

---

खननादिव्यवस्थामाह-*भूमीति । *अत्र मूलं चिन्त्यमिति । अयं पाठः पूर्वोत्तरग्रन्थपर्यालोचनया, भूयसां देवयाज्ञिकोक्तप्रकाराणां वचनान्तरैर्लाभात् । यदि तत्पाठे आग्रहः तदा केषाञ्चित् प्रायः आचारलोपपरत्वेन व्याख्येयः । ननु पतिषु सपिण्डनाभावेऽपि पितृत्वं दृष्टमत आह-*वचनेति । तत्र सन्यासिनोराब्दिकादीनि वचनसत्त्वादिति भावः । *अप्रत्तानाम् ।

---

(१) 'सपिण्डत्वाभावे' क० छ०

शौचं सर्ववर्णसमम्,

तुल्यं (१)वयसि सर्वेषामतिक्रान्ते तथैव च ।

इति व्याघ्रपादोक्तेः । यानि तु—

निर्वृत्तचूडके विप्रे त्रिराच्छुद्धिरिष्य(२)ते ।
निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरुच्यते ॥
शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥
षड्वर्षान्तमतीते तु शूद्रे मासमशौचकम् ।

इत्याङ्गिरसादीनि, तानि शिष्टविगानान्नादर्तव्यानीति विज्ञानेश्वरमदनपारिजातादयः । तेनैतद्दशाच्छूद्राणां व्यवस्था प्रागुक्ता हेयैव । 'तुल्ये वयसि सर्वेषाम्' इति दाक्षिणात्यपरम् । अन्यदेशो कौर्मोक्ता व्यवस्थेति शुद्धितत्त्वे ॥

अथ जात्याशौचम् । तच्च *द्विजपुंसामुपनयनोर्ध्वं प्रवर्तते,

त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ।
क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु ॥
त्रिंशद्दिनानि शूद्रस्य तदर्धं *न्यायवर्तिनः ॥

इति याज्ञवल्क्योक्तेः । यत्तु स एव—

त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते ।

अविवाहितानाम् । *द्विजपुंसामिति । द्विजस्त्रीणां विवाहोर्ध्वमित्यग्रे स्पष्टम् । *न्यायवर्तिनः द्विजशुश्रूषादिस्वधर्ममनुतिष्ठतः ।

---

(१) वयोऽवस्थानिमित्तकं यदाशौचम 'आदन्तजन्मनः सद्यः' इत्यादिविहितं तत्सर्वेषां ब्राह्मणादीनां तुल्यविशिष्टम् । अतिक्रान्ते दशाहादिके च त्र्यहादि यदाशौचे तदपि सर्वेषामाविशिष्टमिति विज्ञानेश्वरः ।

(२) 'रिष्यते इति निवृत्ते' ग०

इत्याह । *तत्र दशाहे त्रिरात्रमस्पृश्यत्वम् । एकदिनोत्पन्ने आशौचद्वये दशाहमस्पृश्यत्वम्,

मरणं यदि तुल्यं स्यान्मरणेन कथञ्चन ।
अस्पृश्यं तु भवेद्गोत्रं सर्वमेव सबान्धवम् ॥

इत्याङ्गिरसोक्तेः । दशाहाशौचपरत्वे 'दशरात्रमतः परम्' इत्यनेन पौनरुक्त्यापत्तेरिति शुद्धिविवेकादयः । तन्न, *स्मृतिभेदात् । त्रिरात्रं दशरात्रं वेति विकल्पायोगाच्च । यस्तु *पुत्राणां वेदानध्याप्य वृत्तिं विदधाति तत्राहाश्वलायनः—'द्वादशरात्रं महागुरुषु दानाध्ययने वर्जयेरन्' इति । अत्र यावदुक्तनिषेधो वा*ऽस्पृश्यत्वमात्रं वा नतु कर्मानधिकारः । एकादशाहान्ते वैश्वदेवोक्तेः ।

एकादशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयते । इति ।

*शुद्धितत्त्वे तु—त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिताचार्यश्च इति विष्णूक्तेः पित्रादयो *महागुरवः । भर्ताप्युक्तो रामायणे—

शुद्धिविवेकादिमतमाह—*तत्रेति । *स्मृतिभेदादिति । क्व पौनरुक्त्यमित्यर्थः । *पुत्राणामिति । एतेन—

पुत्रानुत्पाद्य वेदार्थं ग्राहयित्वा यथाविधि ।
वृत्तिं च यो विदधते कथ्यते स महागुरुः ॥

इति स्मृत्यन्तरोक्तमहागुरुलक्षणं संगृहीतम् । दानं वेदस्य, अध्यापनमिति यावत् । प्रेतोद्देश्यं विना विहितं वा । अध्ययनमध्यापनोपलक्षणम् । *अस्पृश्यत्वमात्रं वेति । न तूत्तरीयस्मृत्या तत् द्वादशाहसपिण्डनेऽपि द्वादशादिन एतदनुवृत्तेः । बहुवचनं सङ्गमयति—*शुद्धीति । आचार्यः—

उपनीय ददद्वेदमाचार्यः स उदाहृतः ।

पतिर्बन्धुर्गतिर्भर्ता दैवतं गुरुरेव च ।

शातातपः—

पतिरेको गुरुः स्त्रीणां *सर्वस्याभ्यागतो गुरुः ।

एकपद*मूढानां पितृमातृनिषेधार्थम् ।

*सोदकानां त्रिरात्रम्, त्र्यहात्तूदकदायिनः इति मनूक्तेः । अग्निपुराणे—

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु निवर्तेत चतुर्दशे ॥
जन्मनामस्मृतेर्वै*के तत्परं गोत्रमुच्यते ॥

बृहस्पतिः—

दशाहेन सपिण्डास्तु शुद्ध्यन्ति प्रेतसूतके ।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शुद्ध्यन्ति गोत्रजाः ॥

इत्युक्तः । *महागुरव इति । उक्ता इति शेषः । *सर्वस्येति न द्वादशरात्रनिमित्तघटकम्, अभ्यागतमरणे आशौचस्यैवाभावात् । *ऊढानामिति तासां कार्यान्तरे पित्रोर्गुरुत्वेऽपि न द्वादशरात्रे । अत्र—"त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते । ऊनद्विवर्ष उभयोः" इति याज्ञवल्क्यो विशेषितः । अथ वाऽव्यवस्थितविकल्पत्वाद्दशरात्रस्य सपिण्डपरत्वार्थं त्रिरात्रविषयमाह—*सोदकानामिति । *एके इति ।

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
समानोदकभावस्तु जन्मनाम्नोरवेदने ॥

इति मानवे मते अनादरार्थम् सगोत्राणामेकाहस्य वक्ष्यमाणतया चतुर्दशपुरुषानन्तरस्यैव सोदकत्वेन ग्राह्यत्वात् इदं च पूर्णप्रसवे उपनीतमरणे च, सपिण्डानां दशाहतुल्यकक्षत्वेनोक्तेः । अर्वाक् तु स्नानमात्रम् । इदं च "स्नात्वा शुध्यन्ति गोत्रजाः" इति अर्वाक् योज्यम् । उपनयनवतामेव चेदाव्रतादेशादितिपूर्वावधिस्त-

*स्त्रीशूद्रयोस्तु विवाहोर्ध्वं जात्याशौचम्--

*वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः ॥

इत्युक्तेः, *'दत्तानां भर्तुरेव हि । स्वजात्युक्तमशौचं स्यान्मृतके जातके तथा' इति माधवीये ब्राह्माच्च । शूद्रस्य विवाहाभावेऽपि षोडशवर्षोर्ध्वं मासः,

अनूढभार्यः शूद्रस्तु षोडशाब्दत्सरात्परम् ।
मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि बान्धवाः ॥
शुद्धिं समधिगच्छन्ति नात्र कार्या विचारणा ॥

इत्यपरार्के शङ्खोक्तेः । *निर्णयामृतमदनपारिजातादौ त्वन्यथोक्तम् । हारीतः—

आ मौञ्जीबन्धनाद्विप्रः क्षत्रियश्चाधनुर्ग्रहात् ।
आ(१)प्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रद्वयग्रहात् ॥

धनुःप्रतोदावष्टमेऽब्दे द्वादशे वस्त्रद्वयमिति । मेधातिथिस्तु-त्रिरात्रमाव्रतादेशात् इत्यत्र व्रतं कालोपलक्षणार्थम् । स च कालः स्वकीयः सर्वेषां चाष्टमवर्षरूपः । तेन चतुर्णामपि वर्णानामुपनयनाभावेऽप्यष्टमादूर्ध्वं पूर्णमेवाशौचम् । तथापि 'प्रागष्टमाच्छिशवः प्रोक्ताः' इति स्मृत्यन्तरादूर्ध्वं सम्पूर्णमर्वाक् त्रिरात्रम् । येपि 'आषोडशाद्भवेद्बालः' इत्याहुस्तेषामप्यष्टमादूर्ध्वम् शूद्रे मास एव,

---

दा स्त्रीशूद्रयोः कथमित्यत आह-*स्त्रीशूद्रयोरिति । *वैवाहिक इति । उपनीतपुरुषाधिकारिकेषु विवाहितानामेवाधिकार इत्यर्थः । विशेषमप्याह--*दत्तानामिति । *निर्णयामृतेति । योगीश्वरवचनविरोधोऽत्रास्वरसः । उपनयनस्य कालोपलक्षणत्वे अष्टमादिवर्षात् प्रागुपनयने जात्याशौचं न प्रवर्ततेति मनसिकृत्य

---

(१) प्रतोदग्रहणं कृषिकर्मनियुक्तानडुहां शिक्षार्थं, तेन तत्कार्यक्षमत्वावधीति ज्ञेयम् ।

उर्ध्वमष्टभ्यो वर्षेभ्यः शुद्धिः शूद्रस्य मासिकी ।

इति वचनादित्याह । हारलताशुद्धितत्त्वादिगौडग्रन्थेऽप्युक्तम्–अनुपनीतो विप्र इत्युक्त्वा—

म्रियते यत्र तत्र स्यादाशौचं त्र्यहमेव हि ।
द्विजन्मनामयं कालस्त्रयाणां तु षडाब्दिकः ॥

इत्यादिपुराणोक्तेरुपनयनकालोपलक्षणम् षडब्दपदं मासत्रयाधिकपरम्, 'गर्भाष्टमेऽष्टमे वाब्दे' इत्युक्तेः । यत्तु जाबालः—

व्रतचूडाद्द्विजानां च प्रतीतिषु यथाक्रमम् ।
दशाहे त्र्यह एकाहे शुद्ध्यन्त्यपि हि निर्गुणा ॥ इति

द्विजा दन्ताः । इदं प्रतीतिष्वित्युक्तेः पञ्चाब्दोपनीतपरमिति । *तदेतन्नाद्रियन्ते वृद्धाः ।

यानि तु पराशरः—

एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः ॥

केवलवेदः केवलश्रौताग्नेरप्युपलक्षणम् । *अयं सङ्कोचो होमाध्ययनपर एव न तु संध्यादाविति हारलतायाम् । अङ्गिराः—

सर्वेषामेव वर्णानां सूतके मृतके तथा ।
दशाहाच्छुद्धिरेतेषामिति शातातपोऽब्रवीत् ॥

देवलः—

आशुच्यं दशरात्रं तु सर्वेषामपरे विदुः ।
निधने प्रसवे चैव पश्यन्तः कर्मणः क्षयम् ॥

अत्यन्तोत्कृष्टस्य कर्महानौ पीडावतो विप्रप(१)रिच-

मेधातिथ्यादीन् दूषयति–*तदेतन्नेति । *अयमिति । यद्य-

---

(१) 'परिचर्यापरं शूद्रे दश' क० छ०

र्यापरशूद्रस्य दशरात्रमिति हारलतायाम् । दक्षः—

सद्यःशौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ।
षट्दशद्वादशाहश्च पक्षो मासस्तथैव च ॥
मरणान्तं तथा चान्यद्दशपक्षास्तु सूतके ॥

मिताक्षरायां स्मृत्यन्तरे—

*चतुर्थे दशरात्रं स्यात्षण्णिशाः पुंसि पञ्चमे ।
षष्ठे चतुरहाच्छुद्धिः (१)सप्तमे तु दिनत्रयम् ॥
अष्टमे दिनमेकं स्यान्नवमे यामकद्वयम् ।
दशमे स्नानमात्रेण चैतद्गौणं तु सूतकम् ॥

*इत्यादीनि, तान्या*पदनापद्गुणवदगुणवद्विषयाणि *दे(२)शाचारभेदाद्वा ज्ञेयानि । *सद्यःशौचादिषडहान्ताः पक्षा यायावरादिपराः । अत्र मरणान्तं जननादिनिमित्ताद्भिन्नम् ।

पि 'यानि' इत्यनेनैवान्वयादसङ्गतमेतत् तथापि परमतत्वेन स्वानभिमतत्वलाभान्नासङ्गतिः । एवमग्रेऽपि । *चतुर्थे इति । विप्रपरम् । *इत्यादीनीति ।

क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः ।
तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात् ॥
एकादशाहाद्राजन्यो वैश्यो द्वादशभिस्तथा ।
शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके ॥ इति,

"पञ्चदशरात्रेण वैश्यः" इति वासिष्ठं चादिशब्दार्थः । *आपदिति । वर्णानामुच्चावचाशौचप्रतिपादकानामिदम् । *देशेति । वर्णानां दशाहाशौचपक्षप्रतिपादकाङ्गिरोवचनादिपरम् । *सद्य इति । यायावरः याजनाध्यापनप्रतिग्रहत्रिकहीनः । तस्य सद्यःशौचम् । शालीनाद्यध्यापनमात्रवृत्तिकस्यैकाहः ।

---

(१) 'सप्तमं त्वहरेव तु इत्यादीनि' क० छ० (२) 'देशान्तर' ग० २१९॥

(अ(१)स्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु ।

इत्युक्तत्वान्मधुपर्कपरत्वालम्भवत) *शिष्टविगानान्नादर्तव्यानीति विज्ञानेश्वरः ।

याजनाध्यापनवृत्तिकस्य त्र्यहः । याजनाध्यापनप्रतिग्रहरूपात्रिवृत्तिकस्य चतुरहः । प्रतिग्रहान्तैस्त्रिभिः कृषिवाणिज्यपाशुपाल्यैश्च त्रिभिः षड्वृत्तिकस्य षडह इत्यर्थः । विज्ञानेश्वरमतमाह–*शिष्टेति । वर्णानां संस्कारोर्ध्वमुक्ताऽशौचकल्पप्रतिपादकानि दशाहाशौचप्रतिपादकानि चेत्यर्थः । यानि तु "एकाहाद्ब्राह्मणः शुद्ध्येत्" इत्यादीनि तानि अग्निवेदसाध्याग्निहोत्राद्यध्ययनादिकर्मपराणि यावत्यबाधिते अनुपपत्तिर्न शाम्यति तावद्बाधनीयमिति न्यायेन बाध्याकाङ्क्षायाम् "अग्निवेदसमान्वितः" इतिवाक्यशेषात् "प्रत्यूहेन्नाग्निषु क्रियाः" इत्यादिदर्शनात्कार्यान्वयस्य ज्यायस्त्वाच्च नतु सर्वथा शुद्धिपराणि,

दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते ।

इत्यादेरपि बाधापत्तेः । एवञ्चायं सङ्कोचो होमाध्ययनपर एव नतु सन्ध्यादाविति हारलताऽपि सङ्गच्छते । स्वाध्यायविषये सद्यःशौचविधानमपि बहुवेदस्य—

ब्रह्मोदनकृताग्नावाश्चेन्न सूतकम् (?) ।

इत्यादीन्यपि ज्ञेयानि । यत्तु यानि "आपद्यपि च कष्टायां सद्यःशौचम्" इत्यादीनि तानि सद्यःशौचं विनाऽऽर्त्युपशमराहित्यपराणि । तेनाश्वस्तनिकस्य मातृपित्रादिकुटुम्बभरेण सद्यः शुद्धिः । यस्त्र्यैकाहपर्याप्तसञ्चितधान्यस्तस्यैकाहः । यश्चतुरहार्थसञ्चयो स कुम्भीधान्यस्तस्य चतुरहः कुसूलधान्यकस्य तु दशाहः । अत एव——

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
अर्वाक सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च ॥

---

(१) कंसान्तर्गतं नास्ति क० छ०

*अस्नात्वा चाप्यहुत्वा च अदत्त्वाऽश्नंस्तथा द्विजः ।
एवंविधस्य विप्रस्य सर्वदा सूतकं भवेत् ॥

इति दक्षोक्त्या--

अन्यपूर्वा यस्य गेहे भार्या स्यात्तस्य नित्यशः ।
आशौचं सर्वकार्येषु देहे भवति सर्वदा ॥

इति ब्राह्मादिवशाद्व्यवस्थेत्यपरार्कमदनपारिजातादयः ।

*माधवस्तु--

वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा ।

इति कलिवर्ज्येषूक्तेः--

दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्वाणः कलौ भवति किल्बिषी ॥

इति मानवस्य—

कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥

इति चतुर्विधगृहस्थाभिप्रायकत्वं तेनोक्तम् । षडहस्तु तन्मते शिष्टविगीतः षष्ठमासपातपरो वेति । तत्कलौ नोपयुज्यते । *अस्नात्वा चेति ।

हीनवर्णा तु या नारी प्रमादात् प्रसवं व्रजेत् ।
प्रसवे मरणे तज्जमाशौचं नोपशाम्यति ॥

इति शङ्खवचनम् ।

व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा ।
क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः ॥
व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः ।
श्राद्धत्यागविहीनस्य भस्मान्तं सूतकं भवेत् ॥

इति स्मृत्यन्तरं च द्रष्टव्यम् । सिद्धान्तमाह-*माधवास्तिव-

इति हारीतोक्तेश्च *न्यूनाशौचपक्षा युगान्त(१)रविषयाः । *मरणान्तादिपक्षास्तु निन्दार्थवादः । अन्यथा--

*नामधारकविप्रस्तु दशाहं सूतकी भवेत् ।

इति विरोधः स्यादित्याह । यत्तु देवलः--

*दशाहादित्रिभागेन कृते सञ्चयने क्रमात् ।
अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनः ।

इति पूर्णाशौचे स्पृश्यतामाह । यच्चानुपनीतातिक्रान्ताशौचे त्रिरात्रादौ तेनैवोक्तम्--

स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः । इति ।

ति । *न्यूनेति । दक्षस्मृत्युक्तदशपक्षेषु ग्रन्थार्थतो विजानातीत्यादि ।

व्रतर्त्विग्दीक्षितानां च बाले देशान्तरे तथा ।
व्रतिनां सत्त्रिणां चैव सद्यः शौचं विधीयते ॥
एकाहाद्ब्राह्मणः शुद्ध्येद्योऽग्निवेदसमन्वितः ।
हीने हीनतरे चापि त्र्यहश्चतुरहस्तथा ॥
तथा हीनतमे चैव षडहः परिकीर्तितः । इति ।

तदुपक्रमव्यवस्थाप्रकारा इत्यर्थः । *मरणान्तादीति । "अस्नात्वा च" इत्यादिनोक्ताः । तत्र प्रायश्चित्तगुरुत्वं कल्प्यम्, नतु तत्पर्यन्तमप्याशौचम् । नामधारकमाह व्यासः—

ब्रह्मबीजसमुत्पन्नो मन्त्रसंस्कारवर्जितः ।
जातिमात्रोपजीवी च स भवेन्नामधारकः ॥
गर्भाधानादिभिर्युक्तस्तथोपनयनेन च ।
न कर्मविन्न चाधीते स भवेन्नामधारकः ॥

*दशाहादीति आशौचकालाद्यतृतीयभागापगमसंचयना-

---

(१) इदं च 'कलौ पाराशरस्मृतिः' इति कालमुद्दिश्यैव प्रवृत्तायाः पराशरस्मृतेर्युगान्तरपरत्वं वदन्तस्तु स्वीयप्रतिभाभारक्रान्तचेतस एवेति व्याख्यातारः ।

तदपि युगान्तरेषु,

अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव च।

इति माधवीये (१)कलौ तन्निषेधात्। यत्तु हारलतायाम्—

चतुर्थेऽहनि कर्तव्यः संस्पर्शो ब्राह्मणस्य तु।

इति प्रचेतसोक्तेस्त्र्यहैकाहाशौचेऽपि चतुर्थाह एवाङ्गस्पर्श इति। तन्न, देवलादिवचनस्य दशाहगोचरत्वात्। *ये तु वर्णसङ्करजा मूर्धावसिक्ताद्यास्तेषामाशौचवि-

---

नुष्ठानयोर्मिलितयोरेव स्पर्शप्रतिबन्धशक्त्यपनायकत्वं न त्वेकस्येत्यर्थः। *ये त्वित्यादि। “ब्राह्मणात्क्षत्रियायामुत्पन्नः क्षत्रियः, क्षत्रियाद्वैश्यायामुत्पन्नो वैश्यः, वैश्याच्छूद्रायामुत्पन्नः शूद्रः” इति स्मृत्या मूर्धावसिक्तादीनां क्षत्रियत्वादिधर्मातिदेशात् सजातीयसपिण्डेषु मृतेषु प्रसूतेषु वा क्षत्रियादिजात्याशौचम्। ब्राह्मणादेस्तु विजातीयेषु मूर्धावसिक्तादिषु अनन्तरे षडहः, एकान्तरे त्र्यहः, द्व्यन्तरे एकाहः—

एकाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु।
षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु॥

इति हारीतवचनात्। यत्तु बौधायनं—

क्षत्रविट्शूद्रजातीया यस्य विप्रस्य बान्धवाः।
तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते॥

इति स्वजात्याशौचं, तत्स्वधर्महीनजातिमात्रपरम्। मूर्धावसिक्तादेर्ब्राह्मणादिषु तु जातमृते जात्याशौचमाह विष्णुः—“ब्राह्म-

---

(१) कलिवर्ज्येष्वपि सन्यासाग्निहोत्रयोस्त्वाचरणम्। स्मार्तस्याप्यङ्गस्पर्शस्यानाचरणम्। शुद्धिविवेकादिषु स्पर्शस्याप्याचरणम्। अत्र कारणं तु केवल स्वस्वाग्रह एव। तस्माद्यत्र कृते श्रुतिस्मृतिसम्वादेन निषेधस्तन्नाचरणीयम्, मधुपर्केऽपि गवालम्भे ‘न हिंस्यात्सर्वा भूतानि’ इति श्रुतिसम्वादादिति।

शेषः *कलौ नोपयुक्त इति नोच्यते । *प्रतिलोमजानां नाशौचम् । मलापकर्षणार्थं तु स्नानमात्रमिति विज्ञानेश्वरः । माधवस्तु—

शौचाशौचे प्रकुर्वीरन् शू(१)द्रवर्णस्य सङ्कराः ।

इति ब्रह्मोक्तेः *शूद्रवदाह । हारलताऽप्येवम् ।

*दत्तक्रीतकृत्रिमादिपुत्रेषु *अहीनवर्णगासु स्त्रीषु च सपिण्डत्वेऽपि प्रसवे मरणे च *पूर्वापरपित्रोः *भर्त्रोश्च त्रिरात्रमेव न दशाहादि,

*अनौरसेषु पुत्रेषु जातेषु च मृतेषु च ।
*परपूर्वासु भार्यासु प्रसूतासु मृतासु च ॥

इति त्रिरात्रानुवृत्तौ विष्णूक्तेः । सपिण्डानां त्वेकाहः,

परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च ।
भर्तृपित्रोस्त्रिरात्रं स्यादेकाहस्तु सपिण्डतः ॥

इति माधवीये हारीतोक्तेः ।

सूतके मृतके चैव त्रिरात्रं परपूर्वयोः ।

णस्य क्षत्रियविट्शूद्रेषु षडाहत्रिरात्रैकरात्रैः क्षत्रियस्य विट्शूद्रेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे सपिण्डे षड्रात्रैः शुद्धिः । हीनवर्णानां तूत्कृष्टसपिण्डेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिः" इति । *कलाविति । हीनोत्तमवर्णविवाहस्य कलिवर्ज्यत्वात् । *प्रतीति । प्रतिलोमाः सूतादयः "प्रतिलोमा धर्महीनाः" इति स्मरणात् । *शूद्रवदिति । यस्मिन्निमित्ते शूद्रस्य यदाशौचं सूतादीनां तत्र तदित्यर्थः । *दत्तः स्वयं दत्तः । *अहीनः प्रतिलोमभिन्नः । *पूर्वापरपित्रोः । बीजिक्षेत्रिणोः । *भर्त्रोः पूर्वापरभर्त्रोः । *अनौरसेष्विति । "औरसो धर्मपत्नीजः" इति परिभाषितः । बीजिनोऽपि ग्रहः । *परपूर्वास्विति । यद्यप्येतावता

---

(१) शूद्रवद्धर्षसङ्कराः' क० छ०

एकाहस्तु *सपिण्डानां त्रिरात्रं यत्र वै *पितुः ॥

इति मरीच्युक्तेश्च । शङ्खः—

अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।
परपूर्वासु च स्त्रीषु त्रिरात्राच्छुद्धिरिष्यते ॥

परपूर्वा पुनर्भूः । इदं *सवर्णासु । हीनवर्णासु तु शङ्खलिखितौ—

परपूर्वासु भार्यासु पुत्रेषु *कृतकेषु च ।
नानध्यायो भवेत्तस्य नाशौचं नोदकक्रिया ॥

ब्राह्मेपि—

आशौचं तु त्रिरात्रं स्यात्समवर्णेषु निश्चितम् ।

यत्तु षडशीतौ—

अन्यपूर्वावरुद्धासु त्रिदिनाच्छुद्धिरिष्यते ।
तास्वेवानन्यपूर्वासु पञ्चाहोभिर्विशुध्यति ॥ इति ।

तत्र पञ्चाहे मूलं चिन्त्यम् । यत्तु याज्ञवल्क्यः—

*अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च ।

इत्येकाहमाह । *तदसंनिधौ ज्ञेयम् । यदा पितुरेकाहस्तदा सपिण्डानां स्नानम्.

पूर्वपत्युस्त्रिरात्रं लभ्यते तथापि अग्रे "भार्यास्वन्यगतासु च ।" "अन्याश्रितेषु दारेषु" इत्यादौ अन्यगतत्वादिविशेषणात्तल्लाभः । *सपिण्डानाम् । पूर्वापरपित्रोः पूर्वापरभर्त्रोश्चेति वर्तते । परपूर्वयोर्भर्तृपित्रोरिति प्रकृतम् । *पितुरिति भर्त्रुपलक्षणम् । *सवर्णासु अहीनवर्णासु । *कृतकेषु—अशास्त्रीयेषु । "पाखण्ड्यनाश्रिताः स्तेनाः" इति योगीश्वरोऽपि बोध्यः । *अनौरसेषु क्षेत्रजदत्तकादिषु पुत्रेषु जातेषु मृतेषु वा तथा स्वभार्यास्वन्यं प्रतिलोमव्यतिरिक्तमाश्रितासु प्रसूतासु मृतासु वाऽहोरात्रमेव नतु सत्यपि सापिण्ड्ये दशरात्रमित्यर्थः । भार्यापुत्रशब्दयोः सम्बन्धिशब्द-

*अन्याश्रितेषु दारेषु परपत्नीसुतेषु च ।
गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पिता ॥

इति प्रजापत्युक्तेः । पितेति वोढुरुपलक्षणम्, तथोपक्रमात् । *यत्तु दत्तके *पालकप्रतियोगिकपुत्रत्वात्पूर्वपितुर्न त्रिरात्रम्, पूर्वसम्बन्धनिवृत्तेश्च न दशाहादीति कश्चित् । तन्न *जनकेऽपि--

---

त्वाद्यत्प्रतियोगिकं भार्यात्वं पुत्रत्वं च तस्यैवेदमाशौचं न सपिण्डानाम् । यमाश्रितास्तस्य यस्य च न पुत्रस्तस्य तु त्रिरात्रमेव। *नदसन्निधाविति । यस्य यदाशौचं तावत्कालमध्ये तच्छ्रोतास सन्निधिः । एवञ्च त्रिरात्रादौ प्रथमदिनश्रवणे पूर्णं, द्वितीयदिनादिश्रवणे तच्छेषः । चतुर्थदिनादौ तन्नास्त्येव । यथा वयोतिक्रान्तमातामहादिमृतिषु । इदं तु विदेशस्थेऽप्यस्तीत्यर्थः । *अन्याश्रितेति । अन्यं प्रतिलोमभिन्नम् । यद्यप्येकवाक्योपात्तत्वात् पित्रोस्त्रिरात्रपक्ष एव गोत्रिणां स्नानमिति प्रतीयते तथापि सपिण्डानां हारीतादिभिरेकाहस्यापि विधानात् मरीचिना सपिण्डानामेकाहस्य पित्रोस्त्रिरात्रविषयताभिधानाच्च परिशेषात् स्नानस्य पित्रोरेकाहविषयताऽवसीयते । गोत्रिणां स्नानविधानं समानोदकविषयमिति तु माधवः । वाजपेयिमतमुत्थापयति--*यत्त्विति । *पालकेति । पुत्राणामनौरसत्वविशेषणादिति भावः । *जनकेऽपीति । उपनीतदत्तकमरणेऽपीत्यभिप्रायः । मयूखकारास्तु दत्तकस्य मरणे जनकादेर्जनकादिमरणे दत्तकस्य नाशौचं प्रापकाभावात् । तथा हि--

गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥

इति मानवे गोत्ररिक्थस्वधापदैः जनकादीनां परस्परसम्बन्धप्रयुक्तं कार्यं लक्ष्यते "जातपुत्रः कृष्णकेशोऽग्नीनादधीत" इत्यत्रैव

बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम् ।

इति वाचनिकाशौचस्यानिवार्यत्वात् । *पितृमरणेऽपि दत्तकादीनां त्रिरात्रम् । शुद्धितत्वे ब्राह्मे—

दत्तकश्च स्वयं दत्तः कृत्रिमः क्रीत एव च ।

इत्युपक्रम्य—

सूतके मृतके चैव त्र्यहाशौचस्य भागिनः ।

इत्युक्तेः(१) । स्मृतिकौमुद्यां हारलता(२)यामप्येवम् । दत्तकस्य पुत्रपौत्राणां जनने मरणे वा *सपिण्डानामेकाहः 'बीजिनश्च' इति गौतमेन साप्तपौरुषसापिण्ड्योक्तेः सपिण्डानां चैकाहस्योक्तत्वात् । सपिण्डे तु (३)पुत्रीकृते दशाह एव । तत्राकाङ्क्षाभावात्सापिण्डत्वेन दशाहवयोवस्थाविशेषः । तेन लक्षितकार्यमात्रनिवृत्त्याऽऽशौचस्यापि निवृत्तिसिद्धेः । अन्यथा यावद्वचनं वाचनिकमिति न्यायेन दत्तकसोदरादीनां परस्परसम्बन्धानिवृत्त्या श्राद्धाशौचरिक्थग्रहणादौ परस्परमधिकारापत्तेरित्याहुः । नन्वेवं दत्तकमरणे पालकतत्पत्नीपुत्रान्तरादयः सर्वे कथं सापिण्ड्यादशाहमाचरन्ति त्रिरात्रैकरात्रयोरन्यतरस्यैव प्राप्तेः । सत्यम् , जनकस्य सपिण्डानां यत्रैकाहपक्षिण्यौ तत्र प्रतिग्रहीतृसापिण्डानां स्नानम् । जनकसपिण्डानां यत्र त्रिरात्रं तत्र प्रतिग्रहीतृसपिण्डानामेकाह इति मरीचिवचनार्थः । पालकपित्रोस्तु सान्निध्यसान्निधिभेदेन त्रिरात्रैकरात्रव्यवस्थाऽपि यत्र जनकयोर्नामकरणादूर्ध्वं प्रागुपनयनाद्बैजिकसम्बन्धात्त्रिरात्रमुक्तं तत्रैव । एवञ्चोपनीतदत्तकमरणे पालकपित्रोः सपिण्डानां चैकाहत्रिरात्रयोरप्राप्तेरौत्सर्गिकं दशाहादिकं दुर्वारमिति । *पित्रिति । *सापिण्डानामिति । अत्र च जनकेत्यादिः । दिगर्थस्तु कलौ नोपयो-

---

(१) अत्र दत्तौरसयोर्भ्रात्रोस्तत्पुत्रयोश्च' इदमधिकमेकस्मिन्पुस्तके गटिप्पण्याम । (२) 'यां चैवम्' क० छ०

(३) 'पुत्रीकृते सपिण्डदत्तौरसयोर्भ्रात्रोस्तत्पुत्रयोर्दशाह एव' क०छ०

प्राबल्याच्च। पूर्वापरयोर्भर्त्तृत्पन्नयोः पुत्रयोस्त्वाह माधवीये मरीचिः—

मातुरैक्याद्विपितृकौ भ्रातरावन्यगोत्रजौ।
एकाहं सूतके तत्र त्रिरात्रं मृतके तयोः॥

इति दिक्॥

ऊढकन्यानां तु विष्णुराह—'संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे, तत्प्रसवमरणे चेत् पितृगृहे स्यातां *तदेकरात्रं त्रिरात्रं च' इति। प्रसवे एकरात्रं मरणे त्रिरात्रमिति विज्ञानेश्वरापरार्कौ। माधवस्तु–प्रसवेपि त्रिरात्रं पित्रोः, एकरात्रं भ्रात्रादिबन्धुवर्गस्य,

दत्ता नारी पितुर्गेहे सूयेताथ म्रियेत वा।
तद्बन्धुवर्गस्त्वेकेन शुचिस्तज्जनकस्त्रिभिः॥

इति ब्राह्मोक्तेरित्याह। यत्तु कश्चिदाह—पक्षपदेन भ्रातरो गृह्यन्ते। वाक्यान्तरेण भगिनीमृतौ त्रिरात्रोक्तेरिति। तच्चिन्त्यम्, *तदभावादे*तद्विरोधाच्च। भ्रातुः *प्रसवे एकाहः। मृतौ त्रिरात्रमिति केचित्। युक्ता तु पक्षिणी,

परस्परमृतौ भ्रातृभगिन्योः पाक्षिणी भवेत्।

इति ब्राह्मात्। भ्रातृभिन्नानामेकाहः, वर्गोक्तेः। 'इतरेषां यथाविधि' इति वक्ष्यमाणवचनाच्च। यत्तु *प्रधानगृहे मृतौ पित्रोः पूर्णं भ्रातुस्त्र्यह इति कश्चित् स निर्मूलत्वात्, 'नाशौचं पितृपक्षे' इत्येतद्विरोधाच्च भ्रान्तः।

गः। अन्यगोचरावितिं पाठादाभीर्यादिषु स इति शिष्टाः। *तदेति। पितृपक्षे इति वर्तते। *तदभावात् वाक्यान्तरसत्त्वात्। *एतदिति। ब्राह्मेत्यर्थः। *प्रसवे भ्रातृगृहे प्रसवे। *प्रधानगृहे पितृवासवद्गृहे। अत्रेदं तत्त्वम्। पित्रोर्विज्ञानेश्वरेणोक्तमेव। पक्षद्वय-

दत्ता नारी पितुर्गेहे प्रधाने सूयते यदा।
म्रियते वा तदा तस्याः पिता शुध्येत्त्रिभिर्दिनैः॥

इति कल्पतरौ शुद्धितत्त्वे च। पतिगृहे प्रसवे तु पित्रादीनामाशौचं *नास्ति। मृतौ पित्रोस्त्रिरात्रमस्त्येव,

*प्रत्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च।
मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि॥

अ(१)दत्तासु पित्रोरेकरात्रम् इति माधवीये शङ्खकार्णाजिनिस्मृतेः 'बैजिकादभिसम्बन्धात्' इत्युक्तेश्च। स्मृत्यर्थसारेऽप्येवम्।

माधवस्तु *इदं त्रिरात्रं जातदन्तापरम्। दन्तोत्पत्तेः प्रागेकरात्रं पित्रोः,

सद्यस्त्वप्रौढकन्यायां प्रौढायां वासराच्छुचिः।
प्रदत्तायां त्रिरात्रेण दत्तायां पक्षिणी भवेत्॥

इति पुलस्त्योक्तेः। *अन्यत्र कन्यामृतौ पित्रोः पक्षि-

पदेन ग्राह्याणां भ्रातॄणां पितृगृहे वासे तत्र स्वगृहे च भगिन्याः प्रसवमरणयोः एकरात्रत्रिरात्रे। "तद्बन्धुवर्गस्त्वेकेन इति ब्राह्मवाक्यं च तद्भ्रातरः तज्जनकश्चोभौ प्रसवे एकेन मरणे त्रिभिः शुची इत्यर्थकमिति न विरोधः। पितृभ्रातृभिन्नानां तु नाशौचं प्रापकाभावात्। शुद्धितत्त्वे प्रसवे त्रिरात्रान्वयो निर्मूलः। विधिना एकरात्राभिधानात्। *नास्तीति। प्रापकाभावादिति शेषः। *प्रत्ता वाग्दत्ता असंस्कृता लक्षिता। इतरेषां भ्रातॄणां वक्ष्यमाणा पक्षिणीत्यर्थः। "गृहे यस्य मृतः कश्चित्" इत्यग्रिमाङ्गिरोवचनेन स्वगृहे मरणे एव त्रिरात्रस्य व्यवस्थापनात्। *इदमिति। अप्रत्तास्विति शेषः। प्रौढत्वं कृतचूडत्वम्। *अन्यत्रेति। स्वगृहादित्यादिः। "बैजिकादभिसम्बन्धात्"इत्यनेन विरोधादेकाहत्रिरात्रादेरप्रचाराच्चास्वरसः।

---

(१) 'अजातदन्तासु' ग०

णीत्याह। षडशीतावपि—

पितृगेहादतोऽन्यत्र यदि पुत्री प्रमीयते।
पक्षिणी तत्र पित्रोः स्यान्नान्येषामिति निश्चयः॥ इति।

ग्रामान्तरे इयमिति *स्मृत्यर्थसारे। भ्रातुस्तु *पाक्षिणी,

श्वशुरयोर्भगिन्यां च मातुलान्यां च मातुले।
पित्रोः स्वसरि तद्वच्च पाक्षिणीं क्षपयेन्निशाम्॥

इति वृद्धबृहस्पतिस्मृतेः। शुद्धितत्त्वे कौर्मे--

*आदन्तात्सोदरे सद्य आचूडादेकरात्रकम्।
आप्रदानात् त्रिरात्रं स्याद्दशरात्रमतः परम्॥

पित्रोर्मृतौ स्त्रीणां त्रिरात्रम्,

पित्रोरुपरमे स्त्रीणा*मूढानां तु कथं भवेत्।
त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान् यमः॥

इति माधवीये वृद्धमनूक्तेः। *इदं दशाहान्तः। ऊर्ध्वं तु पक्षिणी। भ्रातुर्भगिनीगृहे, तस्या वा तद्गृहे मृतौ त्रिरात्रम्। अन्यत्र तु पक्षिणीति षडशीतावुक्तम्। ब्राह्मेपि--

परस्परमृतौ भ्रातृभगिन्योः पाक्षिणी भवेत्।
मातुलाशौचवत्पुत्र्याः पितृव्याशौचमिष्यते॥ इति।

---

*स्मृत्यर्थेति। सन्निधौ कालशेषः। असन्निधौ सद्यः शुद्धिरित्यनेन विरोधोऽस्वरसः। *पाक्षिणीति। विषयो विवेचितः। *आदन्तादिति। आचूडादित्यन्तं विभागः। तत्राऽऽदन्तादित्यनुवादः। सोदरपदं सपिण्डोपलक्षणम्। एकरात्रमाप्रदानादिति वाग्दानपर्यन्तम्। त्रिरात्रं वाग्दानोत्तरं पितृभर्तृकुलयोः। दशरात्रं भर्तृकुले एव। *ऊढानामिति। अनूढानां पुत्रवदिति भावः। *इदमिति। अत्र पक्षिण्यौ निर्मूले एव। भ्रातुर्भगिनीगृहे मृतौ त्रिरात्रम्। गृहे यस्य मृतः कश्चिदसपिण्ड इत्यस्य विधायकत्वभ्रान्त्येत्यस्वर-

*शिष्टास्त्वस्य निर्मूलत्वात्पितृव्ये स्नानमात्रमाहुः।
त्रिंशच्छ्लोक्याम्--

*प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्य-
स्वस्त्रीयेषु त्रिरात्रं त्रिदिवसमशुचिः सोदकस्तूभयत्र।
पक्षि(१)ण्याशौचमृत्विग्दुहितृसुतसहाध्यायिबन्धुत्रयान्ते-
वासिश्वश्रूसुमित्रश्वशुरभागिनिकाभागिनेयप्रयाणे॥
मातामह्यां च पित्रोः स्वसरि च विरतौ मातुले मातुलान्यां
चाथो सद्योतिरेव स्वविषयनृपतौ ग्रामनाथे च नष्टे।
शिष्योपाध्यायबन्धुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषु स्वगृहपरमृतौ मातुले चैकरात्रम्॥
रात्रिं सब्रह्मचारिण्यथ तु कथमपि स्वल्पसम्बन्धयुक्ते
स्नानं वासोयुतं स्यादिदमपि सकलं सर्ववर्णेषु तुल्यम्॥ इति।

अत्र *मूलं मिताक्षरादौ स्पष्टम्। *दौहित्रभागिनेययोरुपनीतयोस्त्रिरात्रम्। अनुपनीतयोः पक्षिणी।

संस्थिते पक्षिणीं रात्रिं *दौहित्रे भगिनीसुते।
संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः॥

सः। सिद्धान्तमाह--*शिष्टास्त्विति। *प्रेतेष्विति। आचार्यत्वादिनिरूपकसम्बन्धिशिष्यादेरिदम्। उपनीयवेदाध्यापक आचार्यः। उभयत्रेति निवृत्तम्। *मूलमिति।

त्र्यहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत्।

इत्यादिकम्। *दौहित्रेति। तेन तयोः श्लोकभेदेन कथनसङ्गतिः। *दौहित्रे इति। तेन च पुंस्त्वाविवक्षया दौहित्र्यां भागिनेय्यां च स्नानमेव। एवं बन्धुत्रयेऽपीति वाच्यम्। अनुवाद्य-

---

(१) मातुलबन्धुत्रयादीनामेव पक्षिण्याद्याशौचम्। अन्यथा दन्तजननादेः पूर्वं सोदकमातुलादेर्मृतौ त्रिरात्रपक्षिण्यादि, तादृशस्य भ्रात्रादेः सद्य इत्यनौचित्यं स्यादिति मयूखे।

इति वृद्धमनूक्तेः । संस्कृते दाहेन । तेन दाहे त्रिरात्रं नान्यथेति गौडाः । तन्न, *विशेषवैयर्थ्यात् । *मातुलादौ सन्निधिविदेशाभ्यां पक्षिण्येकाहयोर्व्यवस्था । मनुः—

त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति ।
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः ॥
श्रोत्रिये स्वगृहे मृते त्रिरात्रम्,
*श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् ।

इति स्मृतेरिति माधवः । *ए(१)कग्रामीणे त्वेकाहः । *ऋत्वि(२)जि बह्वल्पकालश्रौतस्मार्तयाजनपरे त्रिरात्रैकरात्रे ज्ञेये । यद्यपि कर्म कुर्वत एष वाचकः शब्दो भवतीति शम्बराचार्यैः कर्ममध्ये ऋत्विक्त्वमुक्तं तथापि कर्मण्याशौचनिषेधात्तदुत्तरमेवैतज्ज्ञेयम् । गौडास्तु—

समानोदकानां त्र्यहो गोत्रजानामहः स्मृतम् ।

विशेषणस्य विवक्षितुमशक्यत्वात् । *विशेषेति । खननपक्षे दौहित्रभागिनेययोः दन्तजननात्प्रागपि पक्षिणी । तादृशस्य भ्रात्रादेः सद्यः । दाहपक्षे तयोः त्रिरात्रं भ्रात्रादेः सद्य इत्यनौचित्यापत्तेरित्यर्थः । *मातुलादाविति : मिताक्षरामतेन । *श्रोत्रियेत्विति । अस्खलितैकशाखाध्यायिनीत्यर्थः । "एकां शाखामधीत्य श्रोत्रियः" इति बौधायनोक्तेः । 'स्वगृहे' इत्यतन्त्रम् । उपसम्पन्नत्वं मैत्रीप्रातिवेश्यत्वादिना स्वाचारेण वा । *समानेति । असमानग्रामीणे तु श्रोत्रिये नाशौचम् । "एकाहं सब्रह्मचारिणि समानग्रामीणे च श्रोत्रिये" इत्याश्वलायनेन श्रोत्रियविशेषणोक्तेः । *ऋत्विजीति । प्रचेताः—

मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुद्ध्यति ।

---

(१) 'समानग्रामीणे' इति पाठोऽपेक्षितो टीकानुरोधात् ।
(२) 'ऋत्विक्षु' क० ग०

मातृबन्धौ गुरौ मित्रे मण्डलाधिपतौ तथा ॥

इति जाबालोक्तेर्मातृबन्धुष्वेकाहमाहुः । *शिष्ये स्वोपनीते त्र्यहः, 'शिष्यसतीर्थ्यब्रह्मचारिषु क्रमेण त्रिरात्रमहोरात्रमेकाहः' इति माधवीये बौधायनोक्तेः । अन्यत्र तु मनुः—

मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च । इति ।

बन्धुत्रयम्—आत्मपितृष्वसृमातृष्वसृमातुलपुत्राः, पितुःपितृष्वसृमातृष्वसृमातुलपुत्राः, मातुःपितृष्वसृमातृष्वसृमातुलपुत्राश्चेति विज्ञानेश्वरः । *अत्र पक्षिणी । पितृष्वस्रादिकन्यानामूढानां त्वेकाहः । 'तद्बन्धुवर्गस्त्वे-

---

मनुः—

मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च । इति ।

बह्वल्पकालयाजनं श्रौतस्मार्तयाजनं चेत्यर्थः । इदं याज्येऽपि ऋत्विक्शब्दस्य याज्योपलक्षणत्वात् । अन्यथा न्यूनतापत्तेः । एवञ्च त्रिरात्रपक्षिण्याविति पाठः । त्रिरात्रैकरात्रे इति तु केनचित्कालितः । एकोदराणामिति वचनं मिताक्षरायाम् । तत्र मातृबन्धुपदं बन्धुत्रयोपलक्षणम् । गुरुरुपाध्यायः । मित्रोऽल्पकालमैत्र्यः । श्लोके सहाध्यायी एकस्माद्गुरोर्बहुकालं सहवेदमधीयानः । "पक्षिणीमसपिण्डे योनिसम्बन्धे सहाध्यायिनि च" इति गौतमोक्तेः । योनिसम्बन्धान्मातुलीयमातृष्वस्रीयपैतृष्वस्रीयादयः । अन्तेवासी द्विविधः—स्वोपनीतोऽतादृशश्च । तत्राद्ये विशेषमाह—*शिष्ये इति । सतीर्थ्यः सहाध्यायी । अहोरात्रमिति पक्षिणीत्यर्थः । शिष्ये एकस्माद्गुरोः कृत्स्नं वेदमधीयाने शिष्यविद्यार्थ्यप्यत्रैव द्रष्टव्यः । *बान्धवेष्विति । आत्मबान्धवा मातृबान्धवाः पितृबान्धवाश्चोच्यन्ते । *अत्रेति । पुत्रेष्वित्यर्थः । ऊढात्वनिबन्धनाशौचभेदे मानाभावः, वचनस्यान्यार्थत्वादित्यस्वरसः । श्लोके श्वश्र्वित्यादि । श्वशुरयो-

केन' इति पूर्वोक्तब्राह्मात् । यत्तु षडशीत्याम्—

एवं पित्रोर्भगिन्यौ ये ये पितामहयोस्तथा ।
ये मातामहयोश्चैव भगिन्यौ तत्प्रजाश्च याः ॥
मातुलाः स्वस्य पित्रोश्च पत्न्यश्चैषां प्रजाश्च याः ।
भ्रा(१)तरश्चेति सर्वेषु पक्षिणी स्वगृहे त्र्यहम् ॥
एवं श्वशुरजामातृदौहित्रविपदि स्मृतम् ॥

यच्च यमः—

जामातरि मृते शुद्धिस्त्रिरात्रेणोभयोः स्मृता ।
पक्षिणी शालकानां स्यादिति शातातपोऽब्रवीत ॥ इति

तन्निर्मूलत्वान्मिताक्षरादिविरोधाच्चोपेक्ष्यम् ।

मदनपारिजाते विष्णुः—'असपिण्डे स्ववेश्मनि मृते एकरात्रम् ।' अत्र हरदत्तः—'अन्तःशवे च' इत्यापस्त-

भगिन्याश्चेत्यादि प्राग् लिखितम् ।

मातुले श्वशुरे मित्रे गुरौ गुर्वङ्गनासु च ।
आशौचं पक्षिणीं रात्रिं मृता मातामही यदि ॥

इति यमवचनञ्च । गुरुः केवलाध्यापकः । एवञ्च गुरुपत्न्यां मानवैकाहो व्यवस्थापनीयः । स्वविषयेत्यादि । मृतिकालीनेन सूर्यनक्षत्रान्यतरेण ज्योतिषा सह वर्तते तत्सज्योतिरिति । दिनमृते दिनं रात्रिमृते रात्रिः । तथाच मनुः—

प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः ।

वृद्धमनुश्च—

ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि ।
शिष्ये पञ्चत्वमापन्ने शुचिर्नक्षत्रदर्शनात् ॥ इति ।

शिष्येति । अहारित्यनुवृत्तौ—

गुर्वन्तेवास्यनूचानमातुलश्रोत्रियेष्विति ।

---

(१) 'पितरश्चेति' क० छ०

स्वसूत्रतः शवे ग्रामे धनुःशतादर्वागन्नमभोज्यम्। दीपमुदकुम्भं चोपनिधाय तु भुञ्जीत यदि 'समानवंशं न गृहमेव सूतिकायामित्याह। *प्रधानगृहमृतौ तु—

*गृहे यस्य मृतः कश्चिदसपिण्डः कथंचन।
तस्याप्यशौचं विज्ञेयं त्रिरात्रं नात्र संशयः॥

इत्याङ्गिरसोक्तमिति माधवः। एतेन—

त्रिरात्रमसपिण्डेषु स्वगृहे संस्थितेषु च।

इति योगीश्वरवचने गुरुरेकदेशाध्यापकः। अन्तेवासी एकदेशमध्यापितः। अनूचानोऽङ्गानां प्रवक्ता। मातुलग्रहणमात्ममातृपितृबान्धवानामुपलक्षणम्। ग्रन्थे विष्णुवचनविरोधवारणाय—*प्रधानेति। *गृहे यस्येति। वस्तुतस्त्वसपिण्डोऽत्र पूर्वत्र च जात्याशौचानर्हः। तत्र वैष्णवमेव विधायकम्। इदं तु यत्र त्रिरात्रस्य पक्षिण्यादिकल्पान्तरविकल्पस्तत्र व्यवस्थापकम्, लाघवात्। नतु स्वगृहे यत्किञ्चिदसपिण्डमरणेऽपूर्वत्रिरात्रविधायकम्, गौरवात्। तथाच यत्र त्रिरात्रादिकं नियमेनोक्तं तत्र स्वगृहेऽन्यगृहे वा तदेवाशौचम्। यत्र तु त्रिरात्रं पक्षिण्या एकाहेन वा विकल्पितं तत्र स्वगृहमृतावाङ्गिरोवचनात् त्रिरात्रम्। तदन्यत्र मृतौ तदन्यत्। एकाहपक्षिण्योर्विकल्पेऽप्येवम्। यत्र मातुलादौ त्रयविकल्पस्तत्र त्रिरात्रं प्राग्वत्, पक्षिणी तु मैत्र्यादियुक्ते न्यायवर्तिनि वा, मातुलादिमात्रे चैकाह इति। एवमाचार्योपाध्यायशिष्यसहाध्यायिष्वाशौचभागितदन्यगृहमरणमिव निवृत्ताध्ययनत्वानिवृत्ताध्ययनत्वाभ्यां सकलैकदेशाध्ययनेन च व्यवस्थेति। एवमेनास्वरसः।

रजकश्चर्मकारश्च नटो बुरुड एव च।
कैवर्तमेदभिल्लाश्च सप्तैतेऽन्त्यावसायिनः॥

इत्येतेऽन्त्यजाश्च। स्वगृहपरगृहमृत्याशौचप्रसङ्गाद्गृहशुद्धिमाह—

इति कौर्मं व्याख्यातम् । शुद्धितत्त्वे बृहन्मनुः—

*श्वशूद्रपतिताश्चान्त्या मृताश्चेद्द्विजमन्दिरे ।
शौचं तत्र प्रवक्ष्यामि मनुना भाषितं यथा ॥
दशरात्राच्छुनि मृते मासाच्छूद्रे भवेच्छुचिः ।
द्वाभ्यां तु पतिते गेहमन्त्ये मासचतुष्टयात् ॥
अत्यन्त्ये वर्जयेद्गेहमित्येवं मनुरब्रवीत् ॥

*अन्त्यो म्लेच्छः । अत्यन्त्यः श्वपाक इति वाचस्पतिः । तत्रैव यमः—

द्विजस्य मरणे वेश्म विशुध्यति दिनत्रयात् ।

संवर्तः—

*गृहशुद्धिं प्रवक्ष्यामि अन्तस्थशवदूषिते ।
प्रोत्सृज्य मृन्मयं भाण्डं सिद्धमन्नं तथैव च ॥
गोमयेनोपलिप्याथ छागेन घ्रा(१)पयेद् बुधः ।
ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिभिः ॥
सर्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयम् ॥

बृहद्विष्णुः—

ग्राममध्यगतो यावच्छवस्तिष्ठति कस्याचित ।
ग्रामस्य तावदाशौचं निर्गते शुचितामियात् ॥

गृहे पश्वादौ मृतेप्येवम् ।

यत्तु माधवीये प्रचेतसा मातृष्वस्रादिषु त्रिरात्रमुक्तम्-

मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरोः ।
मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यति ॥ इति ।

*श्वशूद्रेति । श्लोकेरात्रिमित्येकाहपरम् "एकाहं सब्रह्मचारिणि" इत्याश्वलायनोक्तेः। एकाचार्योपनीतः सब्रह्मचारी । मतान्तरमाह- *अन्त्य इति । *गृहशुद्धिमिति । उक्तकालानन्तरं द्रष्टव्या ।

---

(१) 'प्रापयेद्बुधः' क० छ० ।

गुरुराचार्यः। ऋत्विक् कुलागतः। तत्स्वगृहमृतौ ज्ञेयम्। श्वशुरयोरन्यत्र मृतावपि संनिधौ त्रिरात्रम्, असंनिधौ पक्षिणी, देशान्तरे एकरात्रम्, वक्ष्यमाणविष्णूक्तेरिति माधवगौडादयः। अन्यत्र तु मातृष्वस्रादिषु पक्षिणी,

पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम्।

इति वृद्धमनूक्तेः। यत्तु वृद्धमनुः—

भगिन्यां (१)संस्थितायां तु भ्रातर्यपि च (२)संस्थिते।
मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते॥
शालके तत्सुते चैव सद्यःस्नानेन शुध्यति॥ इति।

त*द्भ्रातृदौहित्रादौ देशान्तरे, शालकसुतजामात्रोः स्वदेशे ज्ञेयम्। शालके तु स्वदेशे एकाहः 'आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूश्वशुर्यसहाध्यायिशिष्येष्वेकरात्रम्' इति माधवीये विष्णूक्तेः। हरदत्तीये दशश्लोक्यामप्येवम्। श्वशुर्यः शालकः। देशान्तरे स्नानम्। श्वशुरयोर्देशान्तरे एकाहः। जाबालः—

एकोदकानां तु त्र्यहो गोत्रजानामहः स्मृतम्।

*सर्वत्र मूल्याभावेऽपि क्रियाकर्तुर्दशाहः,

गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरेत्।
प्रेताहारैः समं तत्र दशरात्रेण शुध्यति॥

इति मनूक्तेः। शिष्य इत्युपलक्षणम्,

निरन्वये सपिण्डे तु मृते सति दयान्वितः।

---

*-भ्रात्रिति। आदिना भगिनीभागिनेयग्रहः। मिताक्षरामते शालके आशौचं नास्त्येवेति माधवोक्त एकाहो न प्रचरति। आचार्यमातामहादयस्त्रिरात्रमाशौचमन्यस्मिन्नन्त्येष्टिकर्तरीत्याह—

(१) 'संस्कृतायां' ग० छ०। (२) 'संस्कृते' ग० छ०।

तदाशौचं पुरा चीर्त्वा कुर्यात्तु पितृवत्क्रियाम् ॥

इति माधवीये ब्राह्मोक्तेः। दिवोदासीये—

सगोत्रो वाऽसगोत्रो वा योऽग्निं दद्यात्सखे नरः।
सोऽपि कुर्यान्नवश्राद्धं शुद्ध्येच्च दशमेऽहनि ॥

यत्रैकविषये पक्षिण्येकाहादिपक्षद्वयमुक्तं, तत्र सन्निधिविदेशमैत्र्यादिकृता व्यवस्था।

त्रिंशच्छ्लोक्याम्—

वानप्रस्थे यतौ चोपरमति कुलजे षण्ढके(१)ऽप्लवः स्याद्योषिद्गोविप्रगुप्त्यै मृतवति तु दिनं युद्धविद्धे तु(२) सद्यः। अत्र *मूलमाकरे स्पष्टम्। युद्ध*मूर्ध्नि मृतस्य स्नानम्,

उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च।
सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः॥

इति मनूक्तेः। यज्ञोऽन्त्यकर्म। सर्वं तदैवेत्यर्थः।

यस्तु भारते राजधर्मेषु—

अशोच्यो हि हतः शूरः स्वर्गलोके महीयते।
नह्यन्नमुदकं तस्य न स्नानं नाप्यशौचकम् ॥

*सर्वत्रेति। *मूलमिति। "देशान्तरमृतं श्रुत्वा" इत्यादि पराशरस्मरणं वक्ष्यति। एतच्च स्नानमन्त्येष्टिकर्तृभिन्नस्य, उक्तवाक्यस्य जाताशौचमात्रापवादकत्वेन तत्करणनिमित्तकतदपवादासम्भवात्। यतेस्त्वौर्ध्वदेहिकाभावं वक्ष्यति। कुलजत्वमाशौचप्रयोजकसम्बन्धवत्त्वम्। एवं--

ब्राह्मणार्थं विपन्नानां योषितां गोग्रहेऽपि वा।
आहवेऽपि हतानां च एकरात्रमशौचकम् ॥

इति। *मूर्धा भूमिः। क्षत्रधर्मपदात् प्रेक्षकादेर्युद्धमध्यमरणे दशाहाद्येव। सद्यःशौचमित्याद्युपादानादन्त्येष्टिकर्तृपुत्रादेरपि ना-

---

(१) 'चाप्लवः' छ०। (२) 'च' क० छ०।

इति श्राद्धादिनिषेधः स पुत्राद्यभावपरः । अतएव तत्र कर्णादीनां श्राद्धमुक्तम्। अन्ये तु दशपिण्डनिषेधमाहुर्यतिवत् । यत्तु पराशरः—

आहवेऽपि हतानां च एकरात्रमशौचकम् । इति,

तत्*युद्धक्षतेन कालान्तरमृते ज्ञेयम् । 'असंनिधौ स्नानम्' इति माधवः । शुद्धितत्त्वे अग्निपुराणे—

*दंष्ट्रिभिः शृङ्गिभिर्वापि हता म्लेच्छैश्च तस्करैः ।
ये स्वाम्यर्थे हता यान्ति राजन्स्वर्गं न संशयः ॥
सर्वेषामेव वर्णानां क्षत्रियस्य विशेषतः ॥

यत्तु बृहस्पतिः—

डिम्बाहवे विद्युता च राज्ञां गोविप्रपालने ।
सद्यःशौचं मृतस्याहुस्त्र्यहं चान्ये महर्षयः ॥

तत्*च्छस्त्रं विना पराङ्मुखहते च त्रिरात्रम् । राज्ञा वध्ये हते सद्यःशौचम*न्यत्र त्रिरात्रम् । तथैव व्याघ्रः—

*क्षतेन म्रियते यस्तु तस्याशौचं भवेद् द्विधा ।
आसप्ताहात्त्रिरात्रं स्याद्दशरात्रमतः परम् ॥
*शस्त्राघाते त्र्यहादूर्ध्वं यदि कश्चित्प्रमीयते ।

धिकमाशौचम् । *युद्धक्षतेनेति । उद्यतैरित्यादिविशेषणैर्युद्धमूर्द्धलाभात् । हताः युद्धमूर्द्धनीति शेषः । *दंष्ट्रिभिरिति । सद्यःशौचं प्रकृत्य दंष्ट्र्याद्युपादानं तर्पणे तदभिभवार्थं प्रवृत्तस्य तैर्हनने । एवं "डिम्बाहवे विद्युता च" इत्यत्र । *शस्त्रं विनेति । शस्त्रप्रहारपीडितस्य युद्धे विरते रणाङ्गणाद्बहिर्मृते इत्यर्थः । *अन्यत्र अवध्यहते, प्रमादमृतानां त्रिरात्रस्याग्रेऽपि वाच्यत्वात् । *क्षतेनेति । युद्धजनितेन वक्ष्यमाणमृतदोषस्थलीयशृङ्गिदंष्ट्र्यादिजनितेन च क्षतेनेत्यर्थः । "दंष्ट्रिभिः शृङ्गिभिः" इति "डिम्बाहवे विद्युता च" इत्याद्येकयोगनिर्देशात् । *शस्त्राघाते युद्धे सद्य आशौ-

आशौचं प्राकृतं तस्य सर्ववर्णेषु नित्यशः ॥

शस्त्राघाते क्षतं विना। शवस्पर्शे तु हारीतः—'शवस्पृशो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात्, रात्रौ चेदादित्यस्य।' *यत्तु मनुः—√

अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः।
शवस्पृशो विशुद्ध्यन्ति त्र्यहात्तूदकदायिनः॥ इति।

अह्ना रात्र्या चेत्यहो(१)रात्रमुक्तम्। त्रिभिस्त्रिरात्रैरिति नवरात्रमेवं दशरात्रमित्यर्थः। तत्तदन्नाशने तद्गृहवासे*ऽनापदि च ज्ञेयम्,

*अ(२)नदन्नन्नमह्नैव न चेत्तेषां गृहे वसेत्।

चान्त्यकर्मणी। अवैधे तत्र सद्यो मृतौ सद्यः शौचं, त्र्यहमध्ये त्रिरात्रम्। अन्त्यकर्म अवैधात्मत्यागिन इव सम्वत्सरादूर्ध्वमग्रे स्फुटम्। शवस्पृष्टे ग्रामान्तरवाहिना। असपिण्डशवनिर्वाहे शवस्पृशः शववाहकाः न प्रविशेयुः। स्पर्शे तु—

शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुद्ध्यति।

इति देवलेन स्नानमात्रोक्तेः। तद्ग्रामवासिनान्त्वाह—*अथेति। *दशाह इति। निर्हरणीयजात्याशौचं दशाहादीत्यर्थः।

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्।
विशुद्ध्यति त्रिरात्रेण मातुराप्तांश्च बान्धवान्॥
यद्यन्नमत्ति तेषां तु दशाहेनैव शुद्ध्यति।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत्॥

इति मनुस्मरणस्य विज्ञानेश्वरेणैव व्यवस्थापनात्। बन्धुवदिति। स्नेहेनेत्यर्थः। अन्हा अहोरात्रेण। मनुस्मृतौ पुनरुक्तिमाशङ्कते—*यत्त्विति। *अनापदीति। आपदि त्रिरात्रमभि-

---

(१) 'रात्रमित्युक्तं' ग०।

(२) कंसान्तर्गतं पुस्तकान्तरस्थत्वेन टिप्पण्यां ग० पुस्तके निवेशितं दृश्यते।

इति तेनैवोक्तेः । अङ्गिराः--

*आशौचं यस्य संसर्गादापतेद्गृहमेधिनः ।
क्रियास्तस्य न लुप्यन्ते गृह्याणां च न तद्भवेत् ॥

*अथ निर्हाराद्याशौचम् । स्नेहेन सवर्णनिर्हारे तदन्नाशने तद्गृहवासे च *दशाहः । तदन्नानशने तद्गृह-

---

श्रौति तत्सकलग्रन्थविरुद्धम् । यद्गृहावासे तद्गृहावासाभावे—*अन्नदन्निति । तत्पुत्रादिस्वामिकान्नादने । अनेन तद्गृहवासइव तेन तत्र तद्गृहवासाभावे दशाहोक्तेर्न पुनरुक्तिशङ्केत्यर्थः । यद्यप्यग्रे "अथ निर्हाराशौचम्" इत्यादि "एकाहः" इत्यन्तः पाठस्तथाप्यार्थक्रमानुरोधेनेत्थं व्याख्यातम् । *आशौचं यस्येति । संसर्गाशौचं निर्हाराद्याशौचम् । तत्र निर्हारादिकर्तृसम्बन्धिनां भार्यापुत्रादीनां द्रव्याणां च नाशौचम् , किन्तु तस्यैव । तस्यापि नित्यकर्मलोपेत्यर्थः । अत्राशौचतया सामान्यप्राप्तस्य क्रियालोपस्य "क्रियास्तस्य न लुप्यन्ते" इत्यपवादः । संसर्गाशौचं च निर्हरणादिकर्तृभिन्नाप्रसक्तमेवेति "गृह्याणां च न तद्भवेत्" इत्यनुवादः । स च तेषां वैश्वदेवादिकर्तृत्वप्रतिपादनपरत्वेन सार्थकः । तथाच संसर्गाशौचिना पुत्रादिद्वारैव क्रियाः कार्या न साक्षात् "गृह्याणां च न तद्भवेत्" इति वाक्यशेषादिति फलितम् । नच श्रौतस्मार्ताग्निसाध्यकर्मविषयक एव "क्रियास्तस्य न लुप्यन्ते" इति प्रतिप्रसवः, यथा सापिण्डाशौचिनां "प्रत्यूहेन्नाग्निषु क्रियाः" इति मदनपारिजातोक्तं सम्यक् , सामान्यवचनैरेव तत्सिद्धेरेतद्वैयर्थ्यापत्तेः वैश्वदेवादिरूपाग्न्यनग्निसाध्यक्रियाविषयत्वात् । अथाशौचसामान्यप्राप्तस्य "प्रत्यूहेन्नाग्निषु क्रियाः" इत्यादेरेकाहाद्युच्यते । "विप्रो योऽग्निवेदसमन्वितः" इति वाक्येनाऽऽद्याहोरात्रेऽपवादात्तत्र क्रियालोपे प्राप्ते "क्रियास्तस्य न लुप्यन्ते" इत्यन्यद्वारैवाग्निसाध्यक्रियास्वेव प्रतिप्रसवोऽस्तु । नचैकाहादिति वाक्यस्य मेधातिथ्यादि-

निबन्धेषु दशाहादिसपिण्डाशौचप्रकरण एव लिखनात् निर्हरणाद्याशौचे न प्रवृत्तिः किन्तु "हावयेत् न तु हापयेत्" इत्येतत्सहितस्य "प्रत्यूहेन्नाग्निषु" इत्यस्यैव । ततश्चाग्निसाध्यकर्मसु प्रथमाहोरात्रेऽप्यधिकारासिद्धेः "क्रियास्तस्य" इति व्यर्थं सदाऽनग्निसाध्यक्रियास्वेवाधिकारं विदध्यादिति वाच्यम् । गुरूपाध्यायाद्याशौचे सपिण्डाशौचप्रकरणाधीनतया प्रत्यूहेन्नाग्निषु एकाहादित्ययोः संसर्गाशौचत्वाभावेन "क्रियास्तस्य" इत्यस्य च प्रवृत्तेस्तवाग्निसाध्यकर्मानुष्ठानस्यासिद्ध्यापत्तेः । मैवम्, यतः सूतके कर्मणां त्यागः । "सन्ध्याहीनां विधीयते" इति वाक्यस्य च सूतकप्रवृत्त्यनन्तरमेव सपिण्डाशौचे इव संसर्गाद्याशौचे गुर्वाद्याशौचे चाविशिष्टा प्रवृत्तिः । तन्मात्रं चोपजीव्यैव त्रिष्वप्याशौचेषु "प्रत्यूहेन्नाग्निषु क्रियाः" "एकाहाद्युच्यते" "हावयेन्न तु हापयेत्" इत्यादि प्रतिप्रसवस्यापि । एवं "क्रियास्तस्य न लुप्यन्ते" इत्यस्यापि एकाहादिष्वैतत्समकालमेव प्रवृत्तिर्नतु तदपवादत्वेनोत्तरकालम् यथा "न हिंस्यात्" इति निषेधो रागप्राप्तिमुपजीव्यैव "अग्नीषोमीयं पशुमालभेत" इत्येतत्समकालमेव प्रवर्तते नतु तदुत्तरकालम्, एवमिहापि । तथाच "क्रियास्तस्य न लुप्यन्ते" इत्यस्य निर्हरणाद्याशौचे अग्न्यनग्निसाध्यकर्मसु प्रवृत्तेः सिद्धिः । ननु सपिण्डाशौचप्रकरणाधीनानां प्रत्यूहेदित्यादीनां कथमन्याशौचे प्रवृत्तिरिति चेत्परिभाषारूपाणां तेषां प्रकरणेन सङ्कोचायोगात् । यदि चैकाहाद्युच्यते इत्येतदघसङ्कोचपरमेव,

त्र्यहात्केवलवेदस्तु द्विहीनो दशाभिर्दिनैः ।

इत्युत्तरार्धात् । सच कलौ न प्रवर्तते,

वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा ।

इति कलिवर्ज्यवचनात् । तदा क्रियास्तस्येत्यस्यैकाहादित्यपवादकताविरहेऽपि प्रत्यूहेदिति वचनं संसर्गाशौचभिन्ने एव प्रव-

वासे त्र्यहः । गृहावासेऽन्नाभक्षणे चैकाहः । *भृतिग्रहणेन निर्हारे *दाहे च तज्जात्याशौचम्,

यदि निर्हरति प्रेतं प्रलोभाक्रान्तमानसः ।
दशाहेन द्विजः शुद्ध्येद्द्वादशाहेन भूमिपः ॥
मासार्धेन (१)च वैश्यस्तु शूद्रो मासेन शुध्यति ॥

इति कौर्मोक्तेः । विजातीयनिर्हारे तु शवजातीयमाशौचम् । अत्र भृतिग्रहे द्विगुणम्,

अवरश्चेद्वरं वर्णं वरो वाप्यवरं यदि ।
वहेच्छवं तदाशौचं द्रव्यार्थे द्विगुणं भवेत् ॥

इति व्याघ्रोक्तेः। कौर्ममेतदिति गौडाः । दाहेप्येवम् । यत्तु ब्राह्मे—

योऽसवर्णं तु मूल्येन नीत्वा चैव दहेन्नरः ।
आशौचं तु भवेत्तस्य प्रेतजातिसमं नृप ॥ इति,

तदापदि ज्ञेयम् । सोदकनिर्हारे तु दशाह इति माधवः । अलङ्करणे तु शङ्खः—

*कृच्छ्रपादोऽसपिण्डस्य प्रेतालङ्करणे कृते ।

र्तवे । संसर्गाशौचे क्रियास्तस्येति विशेषोपादानात् । तस्मात्संसर्गाशौचे तदाशौचे श्रौतस्मार्ताग्निसाध्यकर्मानुष्ठानं संसर्गाशौचे तु अग्न्यनाग्निसाध्यकर्मणामन्यद्वाराऽनुष्ठानमिति । *भृतीति । तदन्नाशनाद्यभावेऽपीति शेषः । *दाहे दाहमात्रे । धर्मार्थदाहमात्रे पैठीनसिना निर्हरणतुल्यत्वोक्त्या अत्रापि तस्य तत्तुल्यत्वात् । एवञ्च विजातीयदाहादौ प्रायश्चित्तकृत एव निर्हरणाद्विशेषः । प्रायश्चित्तं स्वाशौचानुसारेण न्यूनाधिकमपि । *कृच्छ्रपाद इति । प्रायश्चित्तमिदमधिकं, स्पर्शाविनाभावेन स्पर्शाशौचस्यापवदितुम-

---

(१) 'तु' क० छ० ।

अज्ञानादुपवासः स्यादशक्तौ स्नानमिष्यते ॥

धर्मार्थम*नाथसवर्णहरणे क्रियाकरणे च द्विजस्या*नन्तयज्ञफलम् । 'स्नानं प्राणायामोऽग्निस्पर्शश्च' इति माधवीये । अग्निदेऽप्येवम्,

प्रेतसंस्पर्शसंस्कारैर्ब्राह्मणो नैव दुष्यति ।
वोढा चैवा*ऽग्निदाता च सद्यः स्नात्वा विशुद्ध्यति ॥

इत्यपरार्के वृद्धपराशरोक्तेः । *मातुलत्वादिसम्बन्धे त्रिरात्रम् *'असम्बन्धिद्विजान्वाहित्वा दहित्वा च सद्यः

शक्यत्वात् । दूरतोऽलङ्करणेष्वेतत् । स्नानं त्विहापि । अन्यथा "स्नानमिष्यते" इत्यस्योल्लङ्घनापत्तेः । निहारादिसंसृष्टालङ्करणे तु तत्र यदुक्तं तत्संयुक्तमिदं भवति । *अनाथं स्वसम्बन्धहीनम् । स्नेहाद्यभाजनमिति रघुनाथः । सवर्णपदमसवर्णोपलक्षणम् । *अनन्तेति ।

अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।
पदे पदे यज्ञफलमनुपूर्वं भजन्ति ते ॥
न तेषामशुभं किञ्चित्पापं वा शुभकर्मणाम् ।
जलावगाहनात्तेषां सद्यः शौचं विधीयते ॥
असगोत्रभवं ध्रुवप्रेतीभूतं द्विजोत्तमम् ।
वाहित्वा च दहित्वा च प्राणायामेन शुद्ध्यति ॥

इति पराशरस्मरणात् ।

यः कश्चिन्निर्हरेत् प्रेतमसपिण्डः कथञ्चन ।
स्नात्वा सचैलः स्पृष्ट्वाऽग्निं तस्मिन्नेवाह्नि वै शुचिः ॥

इत्यङ्गिरःस्मरणाच्च । वहित्वेत्यादाविट् छान्दसः । *अग्निदाता चेति । चकारेण सकलौर्ध्वदेहिकसङ्ग्रहः । *मातुलत्वादिसम्बन्धे इति । प्रामादिकं, स्नेहादिसम्बन्धे इत्यस्यौचित्यात् । *असम्बन्धीति । अस्यापि स्नेहादिकं विनाऽनाथे·

शौचम्, सम्बन्धे त्रिरात्रम्' इति पैठीनसिस्मृतेः। गौतममिताक्षरायां वृद्धात्रिः—

*सूतकाद्द्विगुणे शावं शावाद्द्विगुणमार्तवम्।
आर्तवाद्द्विगुणा सूतिस्ततोपि शवदाहकः॥

अत्र पूर्वेणोत्तरनिवृत्तिरित्यर्थः विष्णुः। *मृतं द्विजं न शूद्रेण हारयेन्न शूद्रं द्विजेन देवलः—

ब्रह्मचारी न कुर्वीत *शववाहादिकक्रियाम्।
यदि कुर्याच्चरेत्कृच्छ्रं पुनःसंस्कारमेव च॥

याज्ञवल्क्यः—

आचार्यपित्रुपाध्यायान्निर्हृत्याऽपि *व्रती व्रती।

अनुगमने तु सपिण्डे न दोषः,

त्यर्थः। *सूनकादिति। यद्यप्यनाथप्रेतान्त्येष्टिकर्तुरपि दशाहस्य न निवृत्तिरिति प्रतीयते तथापि पराशरपैठीनसिस्मृतौ 'दहित्वा' इत्युपादानात्सामान्यतोऽन्त्येष्टिकर्तर्येवेदम्। तथा च पराशरादिस्मृतेर्दुर्गममार्गादौ स्थातुमशक्येऽनाथप्रेतान्त्येष्टावुपपत्तेरन्यत्र तत्करणे धर्मपुत्राविशेषेण दशाह एव। ब्राह्मणद्विजोत्तमादिपदमुपलक्षणम्। शूद्रस्यैव निर्हारकर्तृत्वकर्मत्वयोर्निषेध इत्याह—*मृतमिति। एवञ्च—

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण निर्हरेत्।

इति मानवेषु विप्रपदं द्विजोपलक्षणम्, शूद्रसंस्पर्शदूषितेति सामान्यतो दोषस्मरणात्। अत एव स्वेषु तिष्ठत्स्वित्यविवक्षितम्। *शववाहादीति। आदिनाऽलङ्करणमेव ग्राह्यं न दाहादि; तत्र गुरुप्रायश्चित्तस्य वक्ष्यमाणत्वात्। *व्रतीति। ब्रह्मचारी व्रत्येव, न भग्नव्रत इत्यर्थः। निर्हरणाद्याशौचं तु तस्य भवत्येव।

विहितं हि सपिण्डानां प्रेत*निर्हरणादिकम् ।
तेषां करोति यः कश्चित्तस्याधिक्यं न विद्यते ॥

इति देवलोक्तेः ।

*दोषः स्यात्त्वसपिण्डस्य तत्रानाथक्रियां विना ।

इति हारीतोक्तेश्च । *समोत्कृष्टवर्णे तु माधवीये कण्वः—

अनुगम्य शवं बुद्ध्या स्नात्वा स्पृष्ट्वा हुताशनम् ।
सर्पिः प्राश्य पुनः स्नात्वा *प्राणायामैर्विशुध्यति ॥ इति ।

व्रताभङ्गफलमग्रे स्फुटम् । *निर्हरणादिकमिति । आदिनानुगमनरोदनदाहोदकदानादिग्रहः—*दोषः स्यादिति । अत्रापि विहितं हीति पूर्वार्धे द्रष्टव्यम् । एवञ्च—

अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव च ।
स्नात्वा सचैलः स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुद्ध्यति ॥

इति मानवे ज्ञातिर्मातृसपिण्डः न तु स्वसपिण्डः । एवं—

ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित् ।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाऽग्निं हुतभुक् शुचिः ॥

इति योगीश्वरोक्तौ ब्राह्मणशूद्रद्विजपदमुपलक्षणम् । अम्भसीति सप्तम्यानुद्धतत्वलाभः । यद्यपीदं सचैलस्नानादित्रयविधानं सामान्यपरमेव विशेषानुक्तेस्तथापि । किं सर्वत्र तस्येतरनिरपेक्षस्य शोधकत्वमुत तत्सापेक्षस्य ? नाद्यः, हीनानुयाने एकाहादिविरोधात् । नान्त्यः, अहीनवर्णे एकरात्राद्यसत्त्वात् । यदि हीने एकाहादेरधिकत्वेऽपि स्नानादित्रयमात्रस्य सर्ववर्णगामित्वे न बाधकम् । तदापि हीने एकाहाद्यनन्तरं स्नानादेः प्राप्त्या अहीने तदप्राप्त्या च विध्यनुवादवैरूप्यापत्तिः समोत्तमवर्णासपिण्डानुगमनमात्रपरत्वे तु नायं दोष इति ध्वनितम् । *समेति । समपिण्डेत्यादिः । *प्राणायामैः त्रिभिः त्रित्वस्य प्रथमोपस्थित-

हीनवर्णे तु *क्षत्रियेऽहः, वैश्ये पक्षिणी, शूद्रे त्रिरात्रम्, क्षत्रियस्य वैश्येऽहः, शूद्रे पक्षिणी, वैश्यस्य शूद्रेऽहः इति विज्ञानेश्वरः । *माधवस्तु—*विप्रस्य वैश्ये

त्वात् । यद्यपि विज्ञानेश्वरमते काण्वो विशेषो नास्ति तथापि प्रासङ्गिके तत्र मानवादिकं बुद्धिपूर्वे तु काण्वमिति व्यवस्थाव्यञ्जनाय काण्वमात्रोपादानम् । केचित्तु सर्वासपिण्डानुगमने स्नानादित्रयं कालनिरपेक्षं शोधकम् । तत्र समोत्तमानुगमने बुद्धिपूर्वे 'अनुगम्येच्छया' इत्यादि मनुनेच्छोपादानात् । हीनानुगमने तु प्रासङ्गिक एव तत् । बुद्धिपूर्वे तु तत्र एकाहाद्याशौचमेवेति मिताक्षरामतं परिष्कुर्वन्ति । इदं च घृतप्राशनं न भोजननिवर्तकम्, कृच्छ्रेष्वपाठेन कृच्छ्राद्यभावेन भोजनकार्याविघातकत्वात् । *क्षत्रिये इति । अहोरात्रं प्रक्रम्य वशिष्ठः—"शवानुगमने चैवम्" इति । पराशरः—

प्रेतीभूतं तु यः शूद्रं ब्राह्मणज्ञानदुर्लभः ।
अनुगच्छेन्नीयमानं स त्रिरात्रेण शुद्ध्यति ॥
त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुद्ध्यति ॥ इति ।

यद्यप्यत्रानन्तरे एकाहो वशिष्ठोक्तेः, द्व्यन्तरे त्रिरात्रम्, पराशरवचनात् । एकान्तरे तु विशेषवचनं नास्ति; तथाप्यनन्तरापेक्षयाऽपकृष्टत्वाद् द्व्यन्तरापेक्षयोत्कृष्टत्वाच्च एकान्तरानुगमनकालादधिका द्व्यन्तरानुगमनकालान्न्यूना पक्षिणी लभ्यते । अत्रास्वरसात्स्वमतमाह—*माधवस्त्विति । *विप्रस्येति ।

क्षत्रियं मृतमज्ञात्वा ब्राह्मणो योऽनुगच्छति ।
एकाहमशुचिर्भूत्वा पञ्चगव्येन शुद्ध्यति ॥

त्र्यहः, क्षत्रियस्य शूद्रेऽप्येवम्, *अन्यत् प्रागवत्। *स्नानाग्निस्पर्शघृताशनानि सर्वत्रेत्याह। हीनवर्णस्य *दाहौर्ध्वदेहिककरणे तु ब्राह्मे—

ब्राह्मणो हीनवर्णस्य न कुर्यादौर्ध्वदेहिकम्।
कामाल्लोभात्तथा मोहात्कृत्वा *तज्जातितां व्रजेत्॥

मनुः—

व्रात्यानां याजनं कृत्वा *परेषामन्त्यकर्म च।

इत्युक्त्वा "प्रेतीभूतं तु यः शूद्रम्" इत्यतः प्राक्—

शत्रं च वैश्यमज्ञानाद्ब्राह्मणो योऽनुगच्छति।
कृत्वाशौचं द्विरात्रं च प्राणायामान् षडाचरेत्॥

इति पराशरेणोक्तेः। अज्ञानं ज्ञानदौर्बल्यं मौर्ख्यं च शास्त्रार्थज्ञानराहित्यमिति यावत्। एवं त्र्यन्तरितत्वात् त्र्यहः। *अन्यदिति। ब्राह्मणस्य क्षत्रियानुगमने वैश्यस्य शूद्रानुगमने एकाहं विप्रस्य शूद्रानुगमने त्र्यहमित्यर्थः। *स्नानेति सचैलेत्यादिः। उपक्रमोपसंहाराभ्यां सचैलस्नानादेर्लाभादिति शेषः। *दाहेति। दाहे सर्वस्मिन्नौर्ध्वदेहिके चेत्यर्थः। "ब्राह्मणस्त्वन्यवर्णस्य" इति पाठे अन्यवर्णो हीनवर्णः। उत्तमवर्णप्राप्त्यापत्तेरिष्टत्वात्। ब्राह्मण इत्युपलक्षणम्। अधमजातिप्राप्तेरेव दोषत्वात्। और्ध्वदेहिकपदं केवलदाहोपलक्षणम्। *तज्जातितामिति। प्रायश्चित्ताकरणे तत्तुल्यतामित्यर्थः। तथाच हीनवर्णदाहादौ तत्तज्जातिप्रयुक्तमाशौचं प्रायश्चित्तं च तत्तदुक्तापेक्षया द्विगुणमिति फलितम्। यद्वक्ष्यति हीनेष्विति। कामादिहेतूक्तेर्धर्मार्थं द्विजैर्द्विजप्रेतदाहादिकरणे दोषो नेति गम्यते। स्पष्टं चेदं प्राक्। शूद्रस्य तु धर्मेणापि द्विजैर्दाहादि न कार्यम्। नापि शूद्रेण तेषामिति निर्हरणवदर्थासिद्धम्। स्नेहादिना समोत्कृष्टवर्णासपिण्डदाहादिकरणे त्वाह—*परेषामि-

अभिचारमहीनं च त्रिभिः *कृच्छ्रैर्व्यपोहति ॥
परेषां *सवर्णानां हीनेषु तद्द्विगुणत्रैगुण्यचातुर्गुण्यामूह्यम् ॥

अथ रोदने *समोत्तमवर्णयोः सञ्चयनात्पूर्वं सचैलस्नानमूर्ध्वमाचमनम्। *हीनवर्णेषु तु संचयनात्प्राक् सचैलमूर्ध्वं स्नानमात्रम्। विप्रस्य क्षत्रवैश्यविषये तु ब्राह्मे—

अस्थिसञ्चयने विप्रो रौति चेत्क्षत्रवैश्ययोः।
तदा स्नातः सचैलस्तु द्वितीयेऽहनि शुध्यति ॥
कृते तु सञ्चये विप्रः स्नानेनैव शुचिर्भवेत् ॥

ति। उत्सर्गस्य प्रागुक्तापवादमुक्तविषयत्वादस्य समोत्कृष्टपरत्वम्। *कृच्छ्रैरिति। गुरुलघूनां विजातीयानामेव प्राजापत्यसान्तपनादीनां ग्रहणं न तु त्रिःप्राजापत्यस्य, संख्यायाः पृथक्त्वनिवेशितत्वात्। आशौचे तु सगोत्रो वाऽसगोत्रो वा योऽग्निं दद्यादिति वक्ष्यति। भृग्वादिना दाहादावपि आशौचप्रायश्चित्ते द्विगुणे धर्मार्थं उक्तम्-*सवर्णेति। उत्कृष्टवर्णोऽपि बोध्यः। *समोत्तमवर्णयोरिति। ब्राह्मणेऽब्राह्मणादेरित्यर्थः। सचैलपदं सम्पातायातम्। *हीनवर्णेष्विति। क्षत्रिये क्षत्रियादेर्वैश्ये वैश्यादेः शूद्रे शूद्रस्य चेत्यर्थः।

मृतस्य यावदस्थीनि ब्राह्मणस्याहृतानि तु।
तावद्योऽबान्धवस्तत्र रौति तद्बान्धवैः सह ॥
तस्य स्नानाद्भवेच्छुद्धिस्ततस्त्वाचमनं स्मृतम्।

अबान्धवः असपिण्डः समहीनान्यतरवर्णः नतु ब्राह्मण एव मानाभावात्। ततः अस्थिसञ्चयनानन्तरम्,

सचैलं स्नानमन्येषामकृते चास्थिसञ्चये।
कृते तु केवलं स्नानं क्षत्रविट्शूद्रजन्मनाम् ॥

क्षत्रियस्य वैश्येप्ये*वम् । *शूद्रे तु सञ्चयनात्प्राक् विप्रस्य त्रिरात्रम् । *क्षत्रवैश्ययोर्द्विरात्रम् । ऊर्ध्वं तु द्विजानामेकाहः । शूद्रस्य शूद्रे स्पर्शं विना सञ्चयात्पूर्वमेकाहः । ऊर्ध्वं सज्योतिरिति माधवीये ज्ञेयम् । शुद्धितत्त्वे पारस्करस्तु—

अस्थिसञ्चयनादूर्ध्वं मासं याव*द् द्विजातयः ।
दिवसेनैव शुध्यन्ति वाससां क्षालनेन च ॥
*सजातेर्दिवसेनैव त्र्यहात्क्षत्रियवैश्ययोः ॥

इत्युक्तम् । सपिण्डानां रोदननिर्हारादावदोष इत्युक्तं प्राक् । विज्ञानेश्वरस्तु—

मृतस्य बान्धवैः सार्धं कृत्वा तु परिदेवनम् ।
वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्म च ॥

इति ब्राह्मादिति शेषः । क्षत्रविट्शूद्रजन्मनामन्येषामिति सम्बन्धः ।*एवमिति । तुल्यत्वादित्यभिप्रायः । *शूद्रे त्विति ।

अस्थिसञ्चयनादर्वाग् यदि विप्रोऽश्रु पातयेत् ।
मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुद्ध्यति ॥

इति पारस्करोक्तेः । *क्षत्रेत्यादि । अत्र प्रमादः–शुद्धितत्त्वे पारकरस्तु अस्थीत्यादि । तुर्ह्यर्थे अप्यर्थे च । एवञ्च इति हि पारस्कर इति योजयित्वा शुद्धितत्त्वेऽप्युक्तमिति योजनया शुद्धितत्त्वे पारस्करस्तु इत्युक्तमिति रचनाऽसङ्गतिः प्रत्युक्ता । तुरिति निपातेन कर्तृत्वाभिधानाद्वा पारस्करपदे प्रथमा । तथाच पारस्करेणोक्तमित्यर्थः । *द्विजातयः ब्राह्मणक्षत्रियवैश्याः । *सजातेरिति । अस्यायमर्थः–सजातेः शूद्रस्यास्थिसञ्चयनादर्वाक्स्पर्शं विनाऽनुगमने रोदने चाहोरात्रेण शुद्धिः । तत ऊर्ध्वं रात्रौ चेद्रात्र्या दिवसे चेदह्नेति । अन्ये तु सजातेरित्यस्थिसञ्चयनात्प्रा-

इति पारस्करोक्तेः सर्वत्रैकरात्र*माह ॥

अथाशौचान्नभक्षणे विष्णुः—*'ब्राह्मणादीनामशौचे यः सकृदेवान्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमे प्रायश्चित्तम्' इति । अज्ञाने त्वङ्गिराः—

अन्तर्दशाहे भुक्त्वान्नं सूतके मृतकेऽपि वा ।
अस्याशौचं भवेत्तावद्यावदन्नं व्रजत्यधः ॥

प्रायश्चित्तं त्व*मत्या विप्रस्य वर्णक्रमेणैकाहत्र्यहपञ्चाहसप्ताहोपवासाः, दश विंशतिः षष्टिः शतं च प्राणा-

---

कालिकाविषयम् । तेन तत्र सजातेः शूद्रस्य तद्गृहवासादावहोरात्रं च यथा प्रागुक्तं सचैलमित्याहुः । *आहेति । स्नानमात्रादिशोधकान्तविषयं परिहृत्याहोरात्रस्य व्यवस्थापनसम्भवात्सर्वत्रेत्यसङ्गतमित्यस्वरसः । *ब्राह्मणादीनामिति । बुद्धिपूर्वं तदन्नाशने । सकृदपीत्यर्थे एव । यदह्नि आश्रावितमारभ्य यावत्तेषामाशौचं शिष्टं तावदाशौचविधानान्निर्हृत्य तदन्नभोजने केषांचित्त्रिरात्रोक्तिरशुद्धैव । आपदि तु कामतोऽकामतो वा तदन्नभोजने—

यावत्तदन्नमश्नाति दुर्भिक्षोपहतो नरः ।
तावन्त्यहान्यशौची स्यात् प्रायश्चित्तं ततश्चरेत् ॥

इति कौर्मे बोध्यम् । *अमत्येति । सकृदिति शेषः ।

अज्ञानाद् भुञ्जते विप्राः सूतके मृतके तथा ।
एकाहं च त्र्यहं पञ्च सप्तरात्रमभोजनम् ॥

ततः शुचिर्भवेद्विप्रः पञ्चगव्यं पिबन्नरः ।

एकाहाशौचादि क्रमेण योज्यम् ।

प्राणायामशतं कृत्वा शुद्ध्यते शूद्रसूतके ।
वैश्ये षष्टिर्भवेद्राज्ञि विंशतिर्ब्राह्मणे दश ॥

यामाः पञ्चगव्याशनं च। *अभ्यासे द्विगुणम्। *आपदि तु प्राणायामशतं पञ्चशतमष्टसहस्रं गायत्रीजपश्च। मत्यापदि तु *सवर्णाशौचे त्रिरघमर्षणं गायत्र्यष्टसहस्रं च। क्षत्रियाशौचे उपवासः। वैश्याशौचे त्रिरात्रोपवासश्च। शूद्राशौचे कृच्छ्रः। क्षत्रवैश्ययोः पञ्चशतमष्टशतं गायत्रीजपः। उत्तमेषु शूद्रस्य सर्वत्र स्नानम्।

इति छागलेयस्मरणं द्रष्टव्यम्। *अभ्यासे इति। अमत्येति वर्तते। एतदेवेति शेषः। *आपदीति। अमत्येति वर्तते सकृदिति च।

अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपि वा।
प्रायश्चित्तं कथं तत्र चातुर्वर्ण्ये विधीयते॥

गायत्र्यष्टसहस्रेण शुद्धिः स्याच्छूद्रसूतके।
विशः पञ्चशतेनैव क्षत्रियस्य शतेन च॥

ब्राह्मणस्य तथा भुङ्क्ते प्राणायामेन शुद्ध्यति।

इति पराशरोक्तम्। *सवर्णाशौचे त्रिः इति। कामतः सवर्णस्याशौचे द्विजो भुक्त्वा स्रवन्तीमासाद्य तन्निमग्नः त्रिरघमर्षणं जप्त्वोत्तीर्य गायत्र्यष्टसहस्रं जपेत्। क्षत्रियाशौचे ब्राह्मणस्त्वेतदेव उपोषितः कृत्वा शुद्ध्यति वैश्याशौचे ब्राह्मणस्त्रिरात्रोपोषितश्च। ब्राह्मणाशौचे राजन्यः क्षत्रियाशौचे वैश्यः स्रवन्तीमासाद्य गायत्रीशतपञ्चकं जपेत्।

वैश्यश्च ब्राह्मणाशौचे गायत्र्यष्टशतं जपेत्।
शूद्राशौचे द्विजो भुक्त्वा प्राजापत्यव्रतं चरेत्॥

शूद्रश्च द्विजाशौचे स्नानमाचरेत्। शूद्राशौचे शूद्रः स्नात्वा पञ्चगव्यं पिबेदिति विध्युक्तम्। आपद्यभ्यासे त्वेतस्यैवावृत्तिः।

मत्यानापदि *विप्रस्य वर्णेषु सांतपनकृच्छ्रमहासांतपनचान्द्राणि । अभ्यासे तु मासिकद्वैमासिकत्रैमासिकषाण्मासिकानी*त्यादि माधवीयादौ ज्ञेयम् ॥

अथ दासस्य स्वदास्युत्पन्नस्य सपिण्डमृतौ *स्नानमात्रेण स्वामिकार्ये स्पृश्यत्वम् । भक्तदासस्य त्र्यहोर्ध्वम्,

सद्यःस्पृश्यो *गर्भदासो*भक्तदासस्त्र्यहा*च्छुचिः ।

इति स्मृत्यन्तरोक्तेः ।

---

*विप्रस्येति । सकृदन्नभोजने इति शेषः ।

भुक्त्वा तु ब्राह्मणाशौचे चरेत्सान्तपनं द्विजः ।
भुक्त्वा तु क्षत्रियाशौचे तथा कृच्छ्रो विधीयते ॥
वैश्याशौचे तथा भुक्त्वा महासान्तपनं चरेत् ।
शूद्रस्य च तथा भुक्त्वा द्विजश्चान्द्रायणं चरेत् ॥

इति मार्कण्डेयोक्तम् ।

शूद्रस्य सूतके भुक्त्वा षण्मासान् व्रतमाचरेत् ।
वैश्यस्य तु तथा भुक्त्वा त्रीन् मासान् व्रतमाचरेत् ॥
क्षत्रियस्य तथा भुक्त्वा द्वौ मासौ व्रतमाचरेत् ।
ब्राह्मणस्य तथा भुक्त्वा मासमेकं व्रती भवेत् ॥

इति शङ्खोक्तेः । *इत्यादीति । अत्र विष्णूक्तं विहाय सर्वं व्रतजातं ब्राह्मणस्यैव भोक्तुः क्षत्रियादेस्तु पादपादन्यूनं कल्प्यम् । आशौचस्पृष्टतत्स्वामिकासिद्धान्नभोक्तुस्त्विदं प्रायश्चित्तमाशौचिस्पृष्टभोजनानिमित्तकप्रायश्चित्तेन समुच्चीयते निमित्ताविनाभावासत्वात् । आशौच्यस्पृष्टभोक्तुस्तु केवलम् । अनुज्ञातव्यतिरिक्तासिद्धतदीयादनीयप्रतिग्रहे तु नाशौचं किन्तु व्रतमेवार्धक्लृप्त्या योज्यमिति व्युत्पादनायादिपदम् । *स्नानमात्रेणेति । सचैलेत्यादि । *गर्भदासः स्वदास्युत्पन्नदासः । *भक्तदासः

*मूल्यकर्मकराः शूद्रा दासीदासास्तथैव च ।
स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिताः ॥

इति शातातपोक्तेश्च । एतच्चा*नन्यसाध्ये तत्कार्यमात्रे । *अन्यत्र मासाद्याशौचमस्त्येव । एवं *दास्या अपि । सूतिकायास्तस्या अस्पृश्यत्वमपि मासमात्रम्,

दासी दासश्च सर्वो वै यस्य वर्णस्य यो भवेत् ।
तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकम् ॥

इत्यङ्गिरसोक्तेः । षडशीतावपि—

*स्वामिशौचेन दासाद्याः स्पृश्या मासात्तु कर्मसु ।
योग्याः स्युर्मासतो दासी सूती चेत्स्पृश्यतामियात् ॥

*दत्तदासादीनां स्वसपिण्डमरणादौ स्वाम्याशौच-

अन्नेनोपात्तदासः । *शुचिः स्वामिकार्ये स्पर्शार्ह इति । अत्र मानमाह—*मूल्येति । *अनन्यसाध्ये इति ।

दास्यो दासाश्च यत्कर्म कुर्वन्त्यपि च लीलया ।
तदन्यो न क्षमः कर्तुं तस्मात्ते शुचयः स्मृताः ॥

इत्यादिवचनादनन्यसाध्यावश्यकतत्तत्कार्ये स्पृश्यता पर्यवसानादित्यर्थः । ननु प्रकृते शूद्रत्वादिनिमित्तकस्य सपिण्डमरणे मासाद्याशौचस्य दासत्वादिनिमित्तकः सङ्कोच एवास्त्वित्याशङ्कां निराचष्टे-*अन्यत्रेति । अन्यसाध्ये अनावश्यके च तत्कार्ये इत्यर्थः । तथाचानन्यसाध्यावश्यककार्यमात्रे स्पृश्यता, अन्यत्र मासाद्याशौचमस्त्येवेति फलितम् । *दास्या इति । गर्भदास्याः सचैलस्नानमात्रात् भक्तदास्यास्तु त्र्यहात् स्पृश्यतेत्यर्थः । *स्वामीति दासादेः स्वामिशौचेन स्पृश्यत्वं, कर्मानाधिकारस्तु मासमित्यर्थः । दासो दत्तक्रीतादिः । शौचं स्वामिकार्यविशेषे स्पृश्यत्वमात्रं, न त्वाशौचसङ्कोच इत्याह—*दत्तदासादीनामिति ।

समसंख्यदिनोर्ध्वं सत्यपि मासाद्याशौचे स्वामिकार्यें स्पृश्यतेति हरदत्तः,

दासान्तेवासिभृतकाः शिष्याश्चैकत्रवासिनः ।
स्वामितुल्येन शौचेन शुध्यन्ति मृतसूतके ॥

इति बृहस्पतिस्मृतेः । दासाश्चात्र—

*गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अन्नाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोक्षितो महतश्चर्णाद्युद्धप्राप्तः पणे जितः ।
भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥

इति नारदोक्तेषु गर्भभक्तदासौ विना ज्ञेयाः । वडवा दासी तयाहृतस्तामुद्वाह्य दासो जात इत्यर्थः । अन्तेवास्यपि तेनैवोक्तः—

स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया ।
आचार्यस्य वसेदन्ते कृत्वा कालं सुनिश्चितम् ॥

शुद्ध्यन्ति स्पर्शार्हा भवन्ति । *गृहजात इति । गृहे स्वदास्यां जातः १, क्रीतो मूल्येन २, लब्धः प्रतिग्रहेण ३, दायादुपागतो विभागप्राप्तः ४, अन्नाकालभृतः दुर्भिक्षे दासत्वाय भरणाद्रक्षितः ५, स्वामिनाहितः धनग्रहणेनाधीनतां नीतः ६, ऋणमोचनेन दासत्वं प्राप्तः ७,युद्धे जित्वा गृहीतः ८, यदि वादे पराजितः स्यां तदा दासो भवेयमिति पणे जितः ९, तवाहं दास इति प्राप्तः १०, प्रव्रज्यावासितः संन्यासप्रच्युतः ११, कृतो वेतनादिना १२, भक्तदासः सर्वदा भक्तार्थमेव दास्यमुपगतः १३, वडवा दासी तयाऽऽहृतः तामुद्वाह्य जातो दासः १४, य आत्मानं विक्रीणीते स

आचार्यः शिक्षयेदेनं स्वगृहे दत्त*भोजनम् ॥ इति । शिष्य*स्तत्तुल्यो विद्यार्थी । दासादेः स्वामितत्सापिण्ड्यमरणे तु विष्णुः—'पत्नीनां दासानामानुलोम्येन स्वामितुल्यमाशौचम्, मृते स्वामिन्यात्मीयम्', इति । प्रतिलोमदासानामाशौचाभावः,

वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः ।

इति याज्ञवल्क्योक्तेः ।

*अथ *रात्रौ जनने मरणे वा—रात्रिं त्रिभागां कृत्वाऽद्यभागद्वये चेत्पूर्वं दिनम्, अन्त्ये तूत्तरमिति

आत्मविक्रेता १५ । *भोजनमिति ।

न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् ।
शिक्षयेत्तामसं दुष्टं य आचार्यं परित्यजेत् ॥
बलाद्वासयितव्यः स्याद्वधबन्धौ च सोऽर्हति ।
शिक्षितोऽपि कृतं कालमन्तेवासी समाचरेत् ॥
तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलम् ।
गृहीतशिल्पः समये कृत्वाचार्यं प्रदक्षिणम् ॥
शिक्षितश्चानुमान्यैनमन्तेवासी निवर्तते ॥

इति वचनशेषो द्रष्टव्यः ।

उत्तमस्त्वायुधी योऽत्र मध्यमस्तु कृषीवलः ।
अधमो भारवाही स्यादित्येवं त्रिविधो भृतः ॥

इति लक्षितो भृतकः । *तत्तुल्यः अन्तेवासितुल्याचरणः । रजोदर्शनपुत्रजन्मादेरुदयोत्तरमुत्पत्तौ तद्दिनप्रभृत्याशौचाहोरात्रगणनायां न कस्यापि विप्रतिपत्तिः । रात्रौ तस्योत्पत्तौ त्वाह—*अथेति । *रात्राविति ।

रात्रिं कुर्यात्त्रिभागां तु द्वौ भागौ पूर्व एव तु ।
उत्तरांशः प्रभातेन युज्यते ऋतुसूतके ॥

मिताक्षरायाम् । यत्तु *प्रागर्धरात्रात् प्राग्वा सूर्योदयात्पूर्वं दिनमित्युक्तं, तत्र देशाचारतो व्यवस्था । सर्वं (१)चाशौचमाहिताग्नेर्दाहं तद्भिन्नस्य मरणमारभ्य ज्ञेयम्,

अनग्निमत उत्क्रान्तेरा*शौचादि द्विजातिषु ।
दाहादग्निमतो विद्याद्विदेशस्थे मृते सति ॥

इति पैठीनसिस्मृतेः । *साग्निराहिताग्निः । 'आहिता-

इति कश्यपस्मरणात् । *प्रागिति ।

उदिते तु यदा सूर्ये नारीणां दृश्यते रजः ।
जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ॥
अर्धरात्रावधिः कालः सूतकादौ विधीयते ।
रात्रावेव समुत्पन्ने मृते रजसि सूतके ॥
पूर्वमेव दिन ग्राह्यं यावन्नोदयते रविः ।

इति च काश्यपं द्रष्टव्यम् । *आशौचादीति । आदिना तन्निमित्तकसन्ध्यावन्दनत्यागादेः त्रैपाक्षिकान्तप्रेतकर्मणश्च परिग्रहः । *साग्निरिति । यद्यपि विव्रीयमाणमत्राग्निमत्पदं तथापि--

अनग्निमत उत्क्रान्तेः साग्नेः संस्कारर्मणः ।
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथातिथि ॥

इति हारीतवचनस्थसाग्निपदस्येदं विवरणं द्रष्टव्यम् । अत्र साग्नेः संस्कारकर्मण इति श्रवणान्मृते आहिताग्नौ केनचित्प्रतिबन्धेन संस्कारविलम्बे आसंस्काराद्यथा नाशौचं तथा देशान्तरमृते तस्मिन्नपीत्यत्र पैठीनसिवाक्यस्यापेक्षितत्वम् । उभयोरपि सञ्चयनं संस्कारदिवसप्रभृति उभयोरपि मृताहो यथातिथीत्युक्त्या यत्राहिताग्नेर्विदेशमृतस्य संस्कारकर्म त्रिपक्षानन्तरं क्रियते तत्र दाहमारभ्य त्रैपक्षिकं कृत्वा तदुत्तरमासिकादिवसेऽतिक्रान्तानि मासिकानि कार्याणि दैवात्त्रिपक्षिकदिनमेवातिक्रान्तानां कालस्तदा तेन

---

(१) 'च' नास्ति क० छ० ।

ग्निश्चेत्प्रवसन्म्रियेत *पुनःसंस्कारं कृत्वा शववदाशौचम्' इति वसिष्ठ विशेषोक्तेः ।

दाहादेव तु कर्तव्यं यस्य वैतानिको विधिः ।

इति ब्राह्माच्च । *यत्तु–धूर्तस्वामिना रामाण्डारेण चोक्तम् 'आहिताग्नेरपि मरणाद्येव दशरात्रं 'दशाहं शावमाशौचम्' इति मरणनिमित्तत्वात्तस्य । यत्तु दाहादेव तस्याशौचमुक्तं तत्संस्कारनिमित्ताशौचं पृथगेव । तेन गृह्याग्नेः संस्काराङ्गं त्रिरात्रम् । श्रौताग्नेस्तु दशरात्रम् । मरणनिमित्तं तूभयोर्दशाहं दाहात्प्रागपीति ।, त*द्वचनाविरोधा*त्पूर्वस्यैवोत्कर्षा*न्मूलकल्पनालाघवाच्च चिन्त्यम् ।

अथातिक्रान्ताशौचम् । तत्रा*शौचमध्ये जननादौ ज्ञाते तच्छेषेण शुद्धिः,

*विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्'॥

इति मनूक्तेः । अत्र केचिदेतत्पुत्रातिरिक्तविषयम् ।

तेषां स्वातन्त्र्यं कार्यं क्रियमाणे संस्कारकर्मण्येकादशाहे क्षयाहप्राप्तौ आब्दिकस्यैकोद्दिष्टविधिना कर्तव्यतया प्रसङ्गासिद्धिरित्यादिकमूह्यम् । *पुनरिति । काष्ठवल्लौकिकाग्निदाहस्य संस्कारत्वं नास्तीति व्यञ्जनाय पुनरिति । वासिष्ठे पुनराशौचमिति योजनां वदतो मतमुत्थापयति--*यत्त्विति । *वचनेति । उक्तहारीतवचनेत्यर्थः । *पूर्वस्यैव मरणनिमित्तकस्यैव । *मूलेति । एकमेवाशौचं मरणनिमित्तकम्, आहिताग्नौ संस्कारकर्मारम्भेऽन्यत्र मरणोत्तरं प्रवर्तत इत्युपगमादित्यर्थः । *आशौचमध्ये आशौचाधिकरणदशाहादिमध्ये । *विगतं मृतम् "पितरौ चेत्" इति वचनमनिर्दशे न प्रवर्तते निर्दशप्रकरणपाठात् किन्तु "विगतम्"

तेषां त्वाशौचमध्ये श्रवणेऽपि तदाद्येव दशाहादि ।

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥

इत्यस्य सर्वापवादत्वादित्याहुः । *तन्न, ज्ञातमरणस्य *निमित्तत्वात्, *'अनग्निमत उत्क्रान्तेः' इत्यादिविरोधाच्च । स्मृत्यर्थसारेऽपि—'जनने मरणे वा प्रथमदिनादूर्ध्वं ज्ञाते पुत्रादीनां शेषेणैव शुद्धिः' इति । षडशीतावपरार्के चैवम् । दशाहादूर्ध्वं ज्ञाते तु वृद्धवासिष्ठः—

मासत्रये त्रिरात्रं स्यात्षण्मासे पक्षिणी तथा ।
अहस्तु नवमादर्वागूर्ध्वं *स्नानेन शुध्यति ॥

जनने त्वतिक्रान्ताशौचं नास्त्येव ।

इति मानवमेवेत्याशयेन दूषयति—*तन्नेति । *निमित्तत्वाद् आशौचानिमित्त(१)त्वात् । तथाच तस्य कालशेष एव शोधक इति भावः । मरणश्रवणस्य निमित्तत्वे बाधकमप्याह—*अनग्नीति । *स्नानेनेति उदकदानं च कार्यं "प्रेते दत्त्वोदकं शुचिः" इति वचनात् । नच—

संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुद्ध्यति ।

इति मनुना संवत्सरोर्ध्वं स्नानोक्तेः नवममासोर्ध्वं कथं स्नानमिति वाच्यम्, तस्य संवत्सरोर्ध्वं स्नानमपि नेति भ्रमनिवृत्त्यर्थत्वात् । यत्तु देवलनाम्ना पठ्यते—

आशौचान्ते व्यतिक्रान्ते बन्धुश्चेच्छ्रूयते मृतः ।
तस्य त्रिरात्रमाशौचं पक्षिणी चार्धवत्सरे ॥
ऊर्ध्वं संवत्सरार्धात्तु श्रूयते चेन्मृतः स्वके ।
भवेदेकाहमेवात्र तच्च सन्यासिनां न तु ॥ इति ।

---

(१) दशाहाभ्यन्तरे शेषैर्दिवसैः शुद्धिरिष्यते । पुत्राणां चैव सर्वेषां सपिण्डानां समानता ॥ इति शौनकोक्तेश्च ।

नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपि ।

इति देवलोक्तेः । पितुः स्नानं तत्रापि भवत्येव ।

निर्दशं ज्ञातिमरणं श्रुत्वा *पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥

इति मनूक्तेः । तच्चातिक्रान्ताशौचं दशाहादिजात्याशौचविषयम्, न त्वनुपनीतादिनिमित्तत्रिरात्रादौ ।

*उपनीते तु विषमं तस्मिन्नेवातिकालजम् ।

इति व्याघ्रोक्तेः । 'निर्दशं ज्ञातिमरणम्' *'अतिक्रान्ते दशाहे तु' इति मनूक्तेश्च । माधवीये देवलस्तु—

आ त्रिपक्षात्त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः ।
परमेकाहमा*वर्षादूर्ध्वं स्नातो विशुध्यति ॥

तत्रार्धवत्सरस्य प्रथमार्धे त्रिरात्रमुत्तरार्धे पक्षिणी नवममासान्तमहो द्रष्टव्यम् । *पुत्रस्येति करणात् जन्मनि सपिण्डानां नातिक्रान्ताशौचम् । अन्यथा श्रुत्वा जन्म च निर्दशमित्येव ब्रूयात् । पुत्रजन्मश्रवणे स्नानोक्तेरन्येषां स्नानमपि नास्ति । *उपनीते त्विति । उपनीते मृते तु विषमं ब्राह्मणदीनां दशाहादिकं तस्मिन्नेवोपनीते मृत एवातिकालजमतिक्रान्ताशौचं नतु वयोवस्थाशौचातिक्रमे इत्यर्थः । नन्वेवमप्याचार्यसोदकादिप्रायणेऽतिक्रान्ताशौचप्रसङ्गः । नचेष्टापत्तिः त्रिरात्राहोरात्राद्याशौचनिमित्ते मरणे त्रिरात्राद्यनन्तरं ज्ञातेऽपकर्षस्यौचित्येन त्रिरात्रादेरनौचित्यादित्याशङ्क्याह—*अतिक्रान्तेति ।

अतिक्रान्ते दशाहे तु पश्चाज्जानाति चेद्गृही ।
त्रिरात्रं सूतकं तत्र न तद्द्रव्यस्य कर्हिचित् ॥

इति मनुनाऽतिक्रान्तविधेर्दशाहादिजात्याशौचविषयत्वोक्तेर्नाचार्याद्याशौचविषयत्वमित्यर्थः । आचार्यादेस्त्रिरात्राशौचातिक्रमेऽपि स्नानोदकदानमावश्यकम् । *आवर्षादिति । आपादो-

इत्याह । तत्रापदनापद्विषयत्वेन व्यवस्था । इदं चैकदेशे ।

देशान्तरे तु*स्नानमात्रम् ।

देशान्तरमृतं श्रुत्वा क्लीबे वैखानसे यतौ ।
मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिणः ॥

इति पराशरोक्तेरिति विज्ञानेश्वरः । स्नानं वत्सरान्ते ।

अर्वाक्त्रिपक्षात्त्रिनिशं षण्मासाच्च*दिवानिशम् ।
अहः *संवत्सरादर्वाग्देशान्तरमृतेष्वपि ॥

नवर्षादित्यर्थः । अन्यथा आपद्यपि नवममासोर्ध्वमेकाहापत्तेः । *स्नानमात्रमिति । स्नानोदकदानमात्रमित्यर्थः । *दिवानिशमिति । दिवाशब्देनाहर्द्वयं गृह्यते, अग्रेऽहर्मात्रविधानात् । "षष्ठमासात्तु पक्षिणी ततः" इति देवलोक्तेश्च । *संवत्सरादिति । पादोनेत्यादिः । तेनैकदेशे नवमोर्ध्वं स्नानं देशान्तरे त्वेकाह इति नाऽनौचित्यम् । ननु आत्रिपक्षादिति सामान्यतो विहितत्रिरात्रादेर्देशान्तरमृते प्राप्तौ ।

भृग्वग्निमरणे चैव देशान्तरमृते तथा ।
बालप्रेते च संन्यस्ते सद्यः शौचं विधीयते ॥

इति पराशरवचनमपवादः । अर्वाक् त्रिपक्षादिति वैष्णवे च देशान्तरमृतेष्वपीत्युक्तावपि माधवमात्रलिखिततयाऽनाश्वास इति चेत् ? न, पराशरवचनस्यासपिण्डविषयत्वात् ।

बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ।
सवासा जलमाप्लुत्य सद्य एव विशुध्यति ॥

इति मनुवचनात् । यदि चात्र चकारयोः श्रवणादसपिण्डो देशान्तरस्थ इति नार्थः तदापि मानवं पाराशरीयं च देशान्तरपदस्य प्रोषितार्थकत्वे पादोनवर्षोर्ध्वमेव प्रवर्तते । यत्तु—

देशान्तरमृतः कश्चित्सगोत्रः श्रूयते यदि ।

इति विष्णूक्तेरिति माधवः । *इदं सपिण्डानां देशान्तरे स्नानं *सोदकानामिति युक्तम् । लक्षणं त्वाह बृहस्पतिः-

*महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।
वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥

न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेत् ॥

इति पराशरस्य वचनम् । तत्र सगोत्रशब्दः सपिण्डपरः । सोदकानामिव तदुत्तरासगोत्राणामप्यतिक्रान्ताशौचस्यैवाप्रसक्तेः । एतदपि च देशान्तरपदस्य प्रोषितार्थकत्वे पूर्ववदेव । एतेषु त्रिष्वपि देशान्तरपदस्य पारिभाषिकदेशान्तरपरत्वेऽपि पूर्ववन्नवममासोर्ध्वमेव प्रवृत्तिर्युज्यते, नतु ततः प्रागपि; तत्र अर्वाक्त्रिपक्षादित्यपवादात् । यत्तु तत्र माधवमात्रलेखनेनानाश्वास इति कथनं तन्न युज्यते विज्ञानेश्वरग्रन्थे तदलेखेन न्यूनताया दुर्वारत्वात् । देवलवचनस्य देशान्तरपरत्वसम्भवेनाऽऽपत्परताया अशुद्धत्वाच्च । यदपि तद्वचने देशान्तरपदं प्रोषितार्थकमिति व्याख्यातं तदपि परिभाषायाः प्रवृत्तिसम्भवे तत्परित्यागग्रस्तम् । तथाचोक्तम्-

त्रिपक्ष्यां त्रिदिनं पक्षिण्याषष्ठान्नवमावधि ।
एकाहस्तदनु स्नानं देशान्तरमृते स्मृतम् ॥
त्रिमास्यां त्रिदिनं पश्चाद्देशान्तरवदिष्यते ।

एकदेशे न तु स्नानमात्रं देशान्तरमृतावविशेषाद्दशाहोर्ध्वमिति सम्यज्ञतमिति । एतदभिप्रेत्यैव विज्ञानेश्वरमतं परित्यज्य माधवमतं गृण्हाति *इदमिति । *सोदकानामिति । मानवस्य पाराशरस्य च पारिभाषितदेशान्तरमृतासपिण्डपरत्वादिति भावः । *महेति । महानद्यन्तराविशिष्टवाग्भेदो वा गिरिव्यवधानविशिष्टवाग्भेदो वार्थः वाकारैकवाक्यात् । एते च पक्षा देशभेदेन व्यवस्थिताः । शुद्धिविवेके तु षष्टियोजनान्तरत्वं तदभ्यन्तरे-

देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैवच ॥ इति ।

एतत्सर्वं मातापितृभिन्नविषयम् । तयोस्तु 'पितरौ चेत्' इति पूर्वपैठीनसिवाक्यात्सदा पूर्णमेव*दशाहादि। स्मृत्यर्थसारेऽपि–'मातापितृमरणे दूरदेशेऽपि संवत्सरोर्ध्वमपि पुत्रो दशाहादिकं पूर्णमाशौचं कुर्यात् । स्त्री(१) पुंसयोः परस्परं सपत्नीषु चैवम्' इति । शुद्धितत्त्वादयो गौडास्तु–

ऊर्ध्वं संवत्सरादाद्याद्बन्धुश्चेच्छ्रूयते मृतः ।
भवेदेकाहमेवात्र तच्च संन्यासिनां न तु ॥

इति देवलोक्तेः पित्रोरब्दमध्ये त्रिरात्रमूर्ध्वमेकाहः । बन्धुर्माता पिता भर्ता च । पूर्वोक्तदशाहस्तु कलिङ्गादिदेशपर इत्याहुः । ते बन्धुपदस्य पुत्रादिपरत्वे मानाभा-

---

ऽपि भाषाभेदगिरिमहानदीव्यवधानानि चेति पक्षद्वयमेव निष्कृष्योक्तम् । त्रिंशदन्ये इति पक्षस्तु संमतः । तदर्थश्च प्रत्यहं योजनत्रयगमनेनाशौचकालमध्ये मरणं यद्देशे ज्ञातुं शक्यं स मृतजीवतोः सदेशः सान्निधिरिति यावत् । अन्यो विदेश इति । दशाहाद्युत्तरं यदा कदाचिद्यत्र क्वापि देशे मातापितृमरणे ज्ञाते इति शेषः । *दशाहादीति । वचने दशाहशब्दस्य जात्याशौचपरत्वादेति भा-

---

(१) धर्मार्णवे पैठीनसिः–देशान्तरमृतौ भर्तुर्दशाहाच्च बहिःश्रुतम् । सम्पूर्णं सूतकं भार्याकुर्यादपि पतिस्तथा॥ इति । तत्रैव गोभिलोऽपि–दूरदेशे मृतो भर्ता भार्या च म्रियतेऽथवा। सूतकानन्तरं श्रुत्वा दशाहं सूतकं पुनः ॥ इति । शुद्धिप्रकाशे–दूरस्था निधनं भर्तुर्दशाहाच्छ्रूयते बहिः । भार्या कुर्यादघं पूर्णं पत्न्याशौचं पतिस्था ॥ मातापित्रोर्यथाऽऽशौचं दशाहं क्रियते सुतैः । अनेकेऽब्देऽपि दम्पत्योस्तथैवस्यात्परस्परम् ॥ इति । धर्मप्रवृत्तौ–पत्न्या अपि तथाशौचं भवेदेवं विनिश्चितम् । पत्न्या अपि भवेद्भर्तुरित्येवं मनुरब्रवीत् । इति च ।

वाद्युपेक्षयाः । सापत्नमातुस्तु दक्षः—

पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः ।
*संवत्सरे व्यतीतेऽपि त्रिरात्रमशुचिर्भवेत् ॥

'हीनवर्णमातृषु सपत्नीषु चैवम्' इति स्मृत्यर्थसारे । केचित्—

पितुः पत्न्यां प्रमीतायामौरसे तनये तथा ।

इति ब्राह्मोक्तेस्त्वौरसेऽपीदमाहुः । षडशीतावप्येवम् । एतत्सर्ववर्णतुल्यम् ।

तुल्यं वयसि सर्वेषामतिक्रान्ते तथैव च ।

इति व्याघ्रोक्तेः ।

अथाशौचसंपाते उच्यते । तत्र शावे शावं, सूतके सूतकम् । शावे सूतकं, सूतके शावं वा । तत्राप्युत्तरं कालतः पूर्वेण समं न्यूनमधिकं चेति द्वादश भेदाः । यदैकदिने समं न्यूनमधिकं वाऽशौचद्वयं तत्र तन्त्रेणान्यसिद्धिः, द्वयोरेककालत्वात् । यदा तु द्वितीयादिदिनेषूत्तरं सजातीयं शावे जननं वा समकालं (१)न्यूनकालं वा परं स्यात्तदा षट्सु पक्षेषु*(२)पूर्वशेषेण शुद्धिः ।

अन्तरा जन्ममरणे शेषाहोभिर्विशुध्यति ।

इति याज्ञवल्क्योक्तेः । अन्तरा ज्ञाते इत्यर्थः, ज्ञातस्यैव जननादेर्निमित्तत्वात् । पूर्वाशौचोत्तरं तन्मध्यो-

वः । दूरदेशेऽपि संवत्सरोर्ध्वमपि इत्यपिभ्यां सदेशसंवत्सरपूर्वकालपरिग्रहः । *संवत्सरे इति । आशौचकालोत्तरं यदा कदाचिद्यत्र क्वचिद्देशे सपत्नमातृमरणे ज्ञाते देशकालाविशेषेण त्रिरात्रमित्यर्थः । देशकालाविशेषेण पुत्रे त्रिरात्रमयुक्तमित्यस्वरसः । *पूर्वशेषेण पूर्वाशौचकालशेषेण नवदिनादिरूपेणैवाशुद्धिनिवृ-

---

(१) 'न्यूनकालं' नास्ति क० । (२) 'पूर्वेणसिद्धिः' क० ।

त्पन्ने ज्ञाते तूत्तरमेव कार्यम्। शुद्धितत्त्वेऽप्युक्तं-पूर्वाशौचान्तरुत्पन्नं समानं लघु वा निमित्तं तत्कालादुपरि श्रुतं स्वाशौचहेतुरेव। अज्ञातं तु न।

अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कथंचन।

इत्यस्याशौचसांकर्येऽपि प्रवृत्तेः। तेनाज्ञानाद्वृषोत्सर्गादौ कृते पश्चात् (१)ज्ञातेऽपि नावृत्तिरिति। माधवीये धर्मोऽपि—

जनने जननं चेत्स्यान्मरणे मरणं तथा।
पूर्वशेषेण शुद्धिः स्यादुत्तराशौचवर्जनम्॥

अत्र केचित्—

अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी।
तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम्॥

इति *मनुपराशराद्यैर्दशाहग्रहणात्पूर्णाशौचे एव पूर्वशेषेण शुद्धिः। *त्र्यहाद्यल्पाशौचसंपाते तूत्तरेणैव शुद्धिरित्याहुः। हरदत्तोऽप्येवमाह। गौडा अप्येवम्। तन्न, *याज्ञवल्क्यादिवशेन *दशाहस्य तुल्यकालाशौचोपलक्षणत्वात्।

समानाशौचसंपाते प्रथमेन समापयेत्।
असमानं द्वितीयेन धर्मराजवचो यथा॥

त्तिः। *मनुपराशराद्यैरिति। आद्यपदेन।

पुनः पाते दशाहात् प्राक् पूर्वेण सह गच्छति।

इत्याद्यग्निपदेवलवचने 'दशरात्रेष्वयं विधिः'इत्यादिग्रहः। *त्र्यहादीति। आदिना पक्षिण्यादेः सम्पातपरिग्रहः। *याज्ञवल्क्यादिवशेन "अन्तरा जन्ममरणे" इति योगीश्वरवचनैकमूलकल्पनानुरोधेन। *दशाहस्येति। देवलादिवचने दशरात्रश-

---

(१) 'ज्ञानेऽपि' क० 'तज्ज्ञानेऽपि' छ०।

इति माधवीये शङ्खोक्तेः । अपरार्कमिताक्षरादिविरोधाच्च ।

यदा तु सूतके शावं समं न्यूनमधिकं वा तदा न पूर्वशेषाच्छुद्धिः । तदाहाङ्गिराः—

सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकम् ।
तत्राधिकृत्यं मृतकं शौचं कुर्यान्न सूतकम् ॥

षट्त्रिंशन्मते—

शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ।
शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ॥

चतुर्विंशतिमतेऽपि—

मृतेन शुध्यते जातं न मृतं जातकेन तु ।

अतो यदा दशाहजननमध्ये तदन्ते वा त्र्यहादि शावं तदा पूर्वेण शुद्धावपि तन्निमित्तमस्पृश्यत्वं भवत्येव ।

मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् ।

इति कौर्माच्च । गौतमव्याख्यायां वृद्धात्रिरपि—

सूतकाद्द्विगुणं शावं शावाद्द्विगुणमार्तवम् ।
आर्तवाद्द्विगुणा सूतिस्ततोऽपि शवदाहकः ॥

अत्र पूर्वपूर्वेण नोत्तरोत्तरनिवृत्तिरस्पृश्यत्वाधिक्यादित्यर्थः । षडशीतावपि—

स्वभाववहुसूतिस्तु न्यूनशावविशोधिनी । इति ।

ब्दस्येत्यपि द्रष्टव्यम् । तुल्यकालेति न विवक्षितम् । किन्त्वाशौचमात्रम् । अन्यथा त्रिरात्राशौचमध्ये दशरात्रपाते प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायापवादकपूर्वशेषशुद्धेरप्रसक्त्यापत्तेः । न चेष्टापत्तिः, तथा सति तदपवादकानाम् "अघवृद्धिमदाशौचम्" इत्यादीनामप्यप्रवृत्त्या तेषामानर्थक्यप्रसङ्गात् । एवञ्च योगीश्वरवाक्यस्य मनु-

*रात्रिशेषादौ वर्धितद्वित्रिदिनैरागन्तुकैः सूतेर्बहुत्वं न स्वभावेन । अतस्तत्र न्यूनशावस्यापि न पूर्वेण शुद्धिरिति वक्तुं स्वभावेत्युक्तम् । ब्राह्मेऽपि—

नागन्तुकैरथाहोभिराशौचमपनुद्यते ।
न च पातनिमित्तेन शावस्यान्यस्य शोधनम् ॥ इति ।

एवं नव पक्षाः । यदा तु त्र्यहाद्यल्पाशौचमध्ये सजातीयं विजातीयं वा दीर्घकालमुत्तरं, (१)तदाप्युत्तरं पूर्णं कार्यं न पूर्वेण शुद्धिः ।

स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ।
न पूर्वेण विशुद्धिः स्यात् स्वकालेनैव शुध्यति ॥

इत्युशनसोक्तेः । तेन त्र्यहादिशावमध्ये दशाहादिसूतकेऽपि न पूर्वेण शुद्धिरित्यपरार्कः । शावनिमित्तमस्पृश्यत्वं च भवत्येव । शुद्धिविवेके तु-'शावेन शुध्यते सूतिः' इति प्रागुक्तेस्तत्राप्युत्तराशौचनिवृत्तिरुक्ता । तन्न, *उत्तरस्य कालाधिक्येन बलवत्त्वात् । माधवीये यमोऽपि—

*अघवृद्धिमदाशौचं पश्चिमेन समापयेत् ।
यथा त्रिरात्रे प्रक्रान्ते दशाहं प्रविशेद्यदि ॥
आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यति ॥ इति ।

हारीतोऽपि—

पराशरदेवलवाक्यादिनोपसंहार इत्यपि न । एवञ्च तुल्यकालेति स्वरूपकथनमात्रं बोध्यम् । *रात्रिशेषादाविति । अन्येतु मते अहोरात्रादिशेषादाविति सिद्धान्तः । *उत्तरस्येति । "शावेन शुद्ध्यते सूतिः" इत्यादेर्विजातीयसमकालाशौचसन्निपाते शावेन शुद्धिरित्यर्थान्न विरोधः । ननु स्वल्पशावेन दीर्घसूत्याशौचनिवृत्तौ

---

(१) 'तदाप्युत्तरं' नास्ति क० ।

गुरुणा लघु शुध्येत्तु लघुना नैव तद् गुरु। इति।

गुरुत्वं लघुत्वं च कालकृतमेव, पूर्वानुरोधात्। एतच्च हरदत्तेन स्पष्टमुक्तम्। मिताक्षरायामप्येवम्। यत्तु—

*अघानां यौगपद्ये तु ज्ञेया शुद्धिर्गरीयसी।
मरणोत्पत्तियोगे तु गरीयो मरणं भवेत्॥

इति हारीतकौर्मादि। *तत्रास्पृश्यत्वाभिप्रायं शावस्य गुरुत्वं ज्ञेयम्।

*क्वचिदल्पकालेनापि दीर्घकालाशौचनिवृत्तिमाह देवलः—

*परतः परतोऽशुद्धिरघवृद्धौ विधीयते।
स्याच्चेत्पञ्चतमादह्नः पूर्वेणैवात्र शिध्यते॥

अस्यार्थः *अघवृद्धौ दीर्घाशौचे *परतोऽशुद्धिः पर-

कुतो न तत्तात्पर्यम्। तत्राह—*अघमवृद्धिमादिति। *अघानामिति। पूर्वार्द्धमपोह्य समकालमसमकालं वा मरणं गरीय इत्युत्तरार्द्धेन लघुशावेन दीर्घसूत्याशौचनिवृत्तिसिद्धिरित्यभिमानं निरस्यति। *तत्रेति। उत्तरस्य स्वरूपनिवृत्तिस्वीकारे उशनोवाक्यविरोधः। किञ्च अघानामित्यत्र समकालीनविजातीययोः सन्निपाते शावेन शुद्धेरुत्तरार्धार्थतया समजातीयविजातीयविषमाशौचपाते गुरुणा शुद्धिरूपपूर्वार्धापवादासम्भवः। अघानामित्यस्योक्तार्थत्वेन दशाहसूत्याशौचनवमाहोरात्रे त्र्यहशावपाते पूर्वेणैव शुद्धिः "न सूतिः शावशोधनी" इत्यस्य समानाधिकयोः प्रवृत्तेरुक्तेः। अनेनैव न्यायेन त्र्यहसूतकोपान्ते पक्षिण्येकाहशावपातेपूर्वशेषेण शुद्धिर्द्रष्टव्या। माधवमत आह—*क्वचिदिति। *परत इति। सार्वविभक्तिकस्तसिः। तेन क्वचित्सप्तम्यर्थे षष्ठ्यर्थे तृतीयार्थे च। *अघेति। स्वल्पपूर्वाशौचात् परतस्तन्मध्ये इत्यादिः। *परतः

माशौचम् । *यदि पूर्वाशौचमुत्तरस्य पञ्चमदिनात्परतोऽनुवर्तते तदा पूर्वेणैव शुद्धिः । *पूर्वस्योत्तराशौचार्धाधिककालव्यापित्वे पूर्वशेषाच्छुद्धिरित्यर्थः । यथा षष्ठे मासे गर्भपातनिमित्तषडहाशौचमध्ये दशाहपाते पूर्वेणोत्तरनिवृत्तिः । यथा वा त्र्यहमध्ये स्रावपातनिमित्तचतुरहपञ्चाहयो*रिति कश्चित् । *तन्न, *दशाहावधि

परेण । एवमुशनोवाक्यार्थमनूद्यापोदितस्य "स्याच्चेत्" इत्यादेरर्थमाह–*यदीति । पञ्चशब्दस्याशौचार्धोपलक्षणतामाह–*पूर्वस्येति । चतुरहान्तर्विदेशस्थमरणे श्रुते शेषशुद्ध्या तत्पञ्चदिनाधिकमाशौचम् । तत्र दशाहपाते पूर्वेण शुद्धिरित्याद्यपि द्रष्टव्यम् । एवं क्षत्रियाद्याशौचेपि योज्यम् । *इति कश्चिदिति । अत्रेतीति कश्चिदिति च्छेदः । एतेनात्र किं दूषणीयम् । न तावदुशनोवाक्यस्य प्रामाणिकत्वं, तस्य विज्ञानेश्वरेण लिखनात् । नापि देवलवाक्यस्य तथात्वं, मिताक्षरायां तदलेखने शङ्कररघुनाथप्रभृतिभिः सकलनव्यैस्तत्परिग्रहात् । तस्योशनोवाक्यार्थापवादत्वेन दोषयोरलग्नकत्वाच्चेति प्रत्युक्तम् । तस्मात् यदित्यध्याहारेण यत्कश्चिदित्यनेन शुद्धिविवेकोक्तदेवलवाक्यार्थोऽध्याहृतयच्छब्दार्थतया ग्रन्थकृदभिमतः स चैषः । चतुर्धाविभक्तपूर्वप्रवृत्ताशौचभागद्वयात्तु परतः अघवृद्धौ सजातीयसम्पूर्णाशौचान्तरपाते परतः परेणातीतेन शुद्धिर्नतु पूर्वेण । पञ्चतमादह्नः पूर्वेणाद्यभागद्वयमध्ये तादृशाशौचान्तरपाते तु पूर्वेणैवाशौचेनातीतेन निवृत्तिरिति ।

आद्यं भागद्वयं यावत्सूतकस्य तु सूतके ।
द्वितीये पतिते त्वाद्यात्सूतकाच्छुद्धिरिष्यते ॥
अत ऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतः ।
एवमेव विचार्यं स्यान्मृतके मृतकान्तरे ॥

इति ब्रह्मपुराणात् । आदशाहाद्यशौचभागद्वयमध्ये सजा-

पूर्वशेषशुद्ध्यावेदकवाक्याविरोधात् । *षष्ठादिदिने पूर्णाशौचमन्त्यरात्रौ तु द्व्यह इत्यनौचित्याच्च । *अस्मद्गुरवस्तु पञ्चतमादह्न आ(१)शौचं ततो न्यूनं त्र्यहादि चेत्स्यादस्मिन्विषये (२)पूर्वेणैवाशुद्धिः शिष्यते । दशाहादिरात्रिशेषे त्र्यहादिपाते त्र्यहाद्यल्पाशौचानां परस्परं रात्रिशेषे संपाते च न द्व्यहादिवृद्धिरित्यर्थमाहुः ।

क्वाचितीयसम्पूर्णद्वितीयाशौचपाते पूर्वाशौचापगमेन शुद्धिः । तदुपर्युपान्त्यद्वि[दि]नपर्यन्तं तत्पाते द्वितीयापगमेन अन्त्यतद्दिने तदनन्तरदिनद्वयेन तद्दिनरात्र्यन्तयामे तदनन्तरत्र्यहेण ।

रात्रिशेषे त्र्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात् ।

इति वचनादिति व्यवस्थेति । तन्निरस्यति—*तन्नेति । *दशाहेति । "अथ यदि दशरात्राः संनिपतेयुराद्यं दशरात्रमाशौचमानवमात्" इति बौधायनवाक्यस्थेनाऽऽनवमादित्यनेन विरोधादित्यर्थः । *षष्ठादीति । षष्ठसप्तमाष्टमनवमदिनेष्वाशौचान्तरपाते दशमादिनोत्तरपञ्चषट्सप्ताष्टादिनेषु तदनुवृत्तिः दशमादिनतद्रात्र्यन्त्ययामयोस्तत्पाते तु द्वित्रिदिनयोरेव तदनुवृत्तिरित्यनौचित्यादित्यर्थः । ब्रह्मपुराणवाक्यार्थस्य प्रदर्शनीयतया न तद्विरोध इति भावः । मिताक्षरायां देवलवाक्यस्यालिखनेन विज्ञानेश्वरमते तादृशविषयाभावादस्तु तस्यानाकरत्वम् । वस्तुतस्तु तदलेखमात्रेण तस्यानाकरत्वं न वक्तुं शक्यं, माधवेन तल्लिखनात् । शङ्करप्रभृतिभिरन्यैः पूर्वाशौचस्योत्तराशौचाधाधिककालव्यापित्व इत्यर्थकत्वेन ग्रन्थकृता च परिग्रहाच्च । अत एव विज्ञानेश्वरानुयायिनोऽन्येपि तत् परिगृह्णन्त्येव । परेत्वर्थान्तरं वर्णयन्तीत्याह—*अस्मद्गुरवस्त्विति । अत्र पञ्चपदस्य नाञ्जस्यं चतुर्थादित्युक्तावपि तादृशार्थलाभादित्यस्वरसः । सूर्योदयात् प्राचीनः

---

(१) 'आपततो न्यूनं' क०छ० । (२) पूर्वेणैव शुद्धिः' क० ।

पूर्वशेषेण शुद्धेरपवादमाह गौतमः—'रात्रिशेषे सति द्वाभ्यां, प्रभाते तिसृभिः' इति। *प्रभातेऽन्त्ययामे।

रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात्।

इति शातातपोक्तेः। इदं शावान्ते सूतकपाते सजातीयं वा तुल्यम्। *अत्र केचित्। रात्रिशब्दोऽहोरात्रपरः। 'अहःशेषे द्वाभ्यां प्रभाते तिसृभिः' इति शङ्खलिखितोक्तेः। 'अथ यदि दशरात्राः संनिपतेयुराद्यं दशरात्रमाशौचमानवमाद्दिवसादत ऊर्ध्वं द्विरात्रेण व्युष्टायां त्रिरात्रेण' इति बौधायनोक्तेः।

पुनःपाते दशाहात्प्राक् पूर्वेण सह गच्छति।
दशमेऽह्नि पतेद्यस्याहर्द्वयात्स विशुध्यति॥
प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिः।

इति देवलोक्तेश्च। नवमदशमशब्दौ चोपान्त्यान्त्यादिपरौ। तेन क्षत्रियादावपि तथेत्याहुः। माधवीयेऽप्येवम्।

*अन्येत्वाहुः—

अन्तर्दशाहे स्यातां चेत्पुनर्मरणजन्मनी।

प्राची प्रकाशकालः प्रभातो न ग्राह्य इत्याह—*प्रभाते इति। स्वसंमतं मतमाह—*अत्र केचिदिति। *अन्ये त्विति अस्वरससूचनाय। वाचस्पतेरनाकरोत्वोक्तिः प्रामादिकी। विज्ञानेश्वरमाधवादिभिः प्रोक्तवचनानामलिखनात्। रात्रिमात्रावशिष्टे इति मिताक्षरास्थरात्रिपदं च कथं भाषणम्? एवं हि विज्ञानेश्वरपङ्क्तिः—"रात्रिमात्रावशिष्टे पूर्वाशौचे यद्याशौचान्तरं सन्निपतेत्तर्हि पूर्वाशौचं समाप्यानन्तरं द्वाभ्यां रात्रिभ्यां शुद्धिः प्रभाते पुनस्तथा रात्रेः पश्चिमे यामे तिसृभी रात्रिभिः न पुनस्तच्छेषमात्रेण"। शातातपेनाप्युक्तम्—

रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे शुचिस्त्र्यहात्। इति।

तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् ॥

इति मनुपराशराद्यैर्दशमादिनेनोत्तरस्य शुद्धेरुक्तत्वाद्विरोधः स्पष्ट एव । विरोधे च 'यद्वै किंचन मनुरवदत्तद्भेषजम्', 'कलौ पाराशरस्मृतिः' इत्यनेन पूर्ववचसां बाधः। अतएव वाचस्पतिना तेषामनाकरत्वमुक्तम् । साकरत्वेऽपि जातिमात्रविप्रादिविषयं देशान्तराविषयं युगान्तराविषयं वास्तु । तेन गौतमीये रात्रिशब्दो नाहोरात्रपरः 'रात्रिमात्रावशिष्टे' इति मिताक्षरोक्तेश्च न कुकुविकृतेरिवान्यथा व्याख्या युक्ता । माधवस्तु 'अनिर्गतदशाहम्' इति पूर्वस्वग्रन्थविरोधादुपेक्ष्य इति । अस्मत्पितृचरणास्तु बौधायनीये–'आनवमाद्दिवसात्' इति द्वितीयाशौचस्य नवमं दिनं प्रथमस्य दशममेवाहुः। *द्व्यहादिवृद्धेः पूर्वशेषापवादत्वात् । *तस्य च न्यायतो द्वितीयदिनादेव प्रवृत्तेः अत ऊर्ध्वमिति दशमरात्रिपरम । शङ्खलिखितोक्तौ देवलोक्तौ चाहःशेषे दशमेऽह्नि चातीते रात्रौ पतेदित्यर्थः, दशम्यां पिता नाम कुर्यादितिवत् । तेन न मन्वाद्यैर्विरोधो नापि मिताक्षराद्यैरित्याहुः* । अपरार्के निर्णयामृतस्वरसोऽप्येवम् । यत्तु तत्रैव ब्राह्म-

---

शातातपीयाहःपदेन रात्रिं कथमालक्षीत कथं वा रात्रिपदेन तत्राहोरात्रलाभः । अथ दिने आशौचसत्त्वे मण्डूकप्लुतिभयेन तावन्मात्रस्य प्रकरणादहोरात्रार्थकत्वमुपेयते तावतैव विशेषप्रतिपत्तेर्व्याख्यानं कुर्म इति दशाहदशरात्रादिव्यवहारस्याहोरात्रगर्भार्थकतया प्रथमरात्रिशब्दस्य प्राकरणिकतदर्थकत्वेनैव विशेषप्रतिपत्तेस्तादृशार्थे व्याख्यानानपेक्षणादिति । नचैवंविधाविषये द्विरात्रादिवृद्धिप्रसङ्गः "अत ऊर्ध्वं द्विरात्रेण" इत्यनुपदमुक्तेरित्यत आह–*द्व्यहादीति । *तस्य द्वितीयाशौचस्य । *आहुरिति । अने-

आद्यं भागद्वयं यावत्सूतकस्य तु (१)सूतकम्।
द्वितीयं पतति त्वाद्यात्सूतकाच्छुद्धिरिष्यते ॥
अत ऊर्ध्वं द्वितीयात्तु सूतकान्ताच्छुचिः स्मृतः।
एवमेव विचार्यं स्यान्मृतके (२)मृतकान्तरम् ॥
मृतकस्यान्तरे यत्र सूतकं प्रतिपद्यते।
सूतकस्यान्तरे वाथ मृतकं यत्र विद्यते ॥
मृतकान्ते भवेत्तत्र शुद्धिर्वर्णेषु सर्वशः ॥ इति।

नाऽऽनवमाद्दिवसादित्यस्योक्तव्याख्यानेन यत्र द्वितीयाशौचं तृतीयादिदिने तत्राष्टदिनाद्युपलक्षणत्वं वाच्यं तादृशव्याख्याने प्रयोजनाभावश्चेत्यस्वरसः सूचितः। वस्तुतस्तु आनवमाद्दिवसादित्याङोऽभिविध्यर्थकतया नवमपदे दशमलक्षणायाश्चाप्राकरणिकतया अत ऊर्ध्वमित्यतः शब्देन दशमदिनमेव लभ्यते न तु रात्रिः। शङ्खलिखितोक्तौ देवलोक्तौ चातीते इति पूरणं निर्बीजं "दशम्यां पिता" इत्यादौ दशम्या नामकरणाङ्गशुचित्वकल्पनभयेन तत्पूरणात्। मिताक्षरास्थरात्रिपदस्य यथाश्रुतार्थसंरक्षणभयं भवादृशस्यौद्दण्ड्याद्यतिशयमेवाविष्कुर्यात्। तस्याहोरात्रार्थकत्ववादिनां तु आर्षवचसामनायासारब्धयथाश्रुतार्थसंरक्षणम्। अपरार्कादिसर्वग्रन्थेष्वपि रात्रिपदमहोरात्रार्थकमेवेति सिद्धान्तः। मयूखकृतस्तु आशौचान्त्यरात्रावेवाशौचान्तरपाते त्र्यहवृद्धिः, रात्रिशेष इत्यत्र लक्षणायां मानाभावात्। परिभाषा तु त्रिरात्रदशाहादिपरा। अन्यथा दशाहादिविधिना रात्रावाशौचाभावेन पञ्चयज्ञाद्यनुष्ठानप्रसङ्गात्। तत्र "संध्यां पञ्चमहायज्ञान्" इत्यारब्धप्रवृत्तेः "दशाहं शावमाशौचं" "दशरात्रमतः परम्" इत्यादेः समानार्थकस्य दर्शनाच्चेत्याहुः। अत्र सर्वत्रापि पूर्वप्रवृत्ताशौचशेष एवोत्तराशौचा-

---

(१) 'सूतके। द्वितीये पतिते' क० छ०।
(२) 'मृतकान्तरे' क० छ०।

अस्यार्थ*स्तत्रैवोक्तः । पूर्वाशौचचरमाहोरात्रस्य दिनरूपे आद्यभागद्वयेऽन्याशौचपाते पूर्वेण शुद्धिः । भागद्वयोर्ध्वं रात्रौ सूतकान्तरे द्वितीयात्पूर्वाभिन्नात्सूतकान्ताद् द्व्यहादिरूपाच्छुद्धिरिति । *अपरार्के त्वाशौचकालं (१) त्रेधा विभज्य निर्गुणविषयत्वेनेदमुक्तम् । अस्य वचनस्य *निर्मूलत्वोक्तिर*ज्ञोक्तिरेव । अतः पूर्वाशौचा*न्त्यरात्रावन्याशौचेऽहोरात्रद्वयमाधिकं रात्रेरन्त्ययामे तु दिनत्रयमिति भट्टचरणोपदिष्टः पन्थाः ।

पादको नतु ज्ञातस्तज्ज्ञानं वा । *तत्रैवोक्त इति । वस्तुतस्तु अन्तरा पतितसूतकस्य चतुर्द्धा विभक्तस्य आद्यभागद्वयमर्द्धं यावत्पर्यन्तं तदाधिककालाव्यापिनि लघुनि पूर्वप्रवृत्तसूतके द्वितीये पतिते आद्यात् सूतकस्य तु सूतके इत्यत्र प्रथमनिर्दिष्टादन्तःपातिसूतकादेव शुद्धिर्नतु पूर्वात् । अतः अर्धादूर्ध्वं तदधिककालव्यापिनि लघुन्यपि सूतके तदधिके द्वितीये पतिते द्वितीयात्तत्रैव चरमनिर्दिष्टात्सूतकादेव शुद्धिः । एवं शावाशौचेऽपीति तदर्थः । तदेव "परतः परतोऽशुद्धिः" इति पूर्वोक्तदेवलवाक्यसमानार्थमेतदिति । *अपरार्के त्विति । अस्वरसः । स च आशौचकालस्य चतुर्धा विभागस्य स्फुटतरस्य परित्यागोऽनुचितः । तदुपगमेऽप्यर्थसाम्राज्यादिति । *निर्मूलोक्तिरिति । "आनवमाद्दिवसात्" इति बौधायनवाक्ये "दशमेऽह्नि पतेद्यस्य" इति देवलवाक्ये च नवमदशमशब्दयोरुपान्त्यान्त्यादिनोपलक्षणतया एतद्वाक्यस्य चरमाहोत्रविषयत्वस्य वाक्यात् प्रकरणाद्वा लाभाभावे तद्विरोधादिति भावः । *अज्ञोक्तिरिति । चरमाहोरात्रस्योक्तव्याख्यानलब्धत्वादिति शेषः । *अन्त्यरात्राविति । अन्त्याहोरात्र इत्यर्थः, भट्टचरणैरप्युपसंहारात् । तैः स्वग्रन्थे अन्त्याहोरात्रस्यैवोक्त-

---

(१) 'त्रिधा' क० छ० ।

*एतत्संपूर्णाशौचसंपाते एव । *रात्रिशेषे *त्रिरात्रादिसंपाते तु पूर्वशेषेणैव शुद्धिः । द्विरात्रादिवृद्धेः पूर्ववाक्यैर्दशाहविषयत्वादपवादाभावे शेषशुद्धेरेव सामान्यतः प्रवृत्तेः । षडशीतौ तु *(१)दशाहान्ते त्र्यहपातेऽपि द्वित्रिदिनवृद्धिरुक्ता ।

रात्रिशेषे यदाशौचं पूर्वानधिकमापतेत् ।
ऊर्ध्वं दिनद्वयं पूर्वाद्यामशेषे दिनत्रयम् ॥ इति ।

अनधिकं समं न्यूनं वा । तत्तुच्छम् । *निर्मूलत्वाद्*न्ते पक्षिण्यादिपातेऽपि द्विरात्रादिवृद्ध्यापत्तेश्च ।

त्वात् । अत्र चरमाहोरात्रमध्ये द्व्यहत्र्यहव्यवस्था । सामान्यतः शावान्ते सूतकपाते सजातीयेत्युक्तं तत्र विशेषमाह—*एतदिति । *रात्रिशेषे इति । अहोरात्रशेष इत्यर्थः । *त्रिरात्रादिति । सम्पूर्णान्तःपातिनि असम्पूर्णान्तःपातिनि वा असंपूर्णे इति फलितम् । सजातीये सजातीयपाते शावे विजातीयपाते इति चेहाप्यस्ति । *दशाहाद्यन्ते इति । आदिना त्र्यहपरिग्रहः । *निर्मूलत्वादिति । "अन्तरा जन्ममरणे" इति पूर्वशेषशुद्ध्यावेदकवाक्ये विशेषानुपादानात् दशाहे त्र्यहादौ वा त्र्यहादिपाते प्रवृत्तिर्निष्प्रत्यूहा । एवं बौधायनादिवाक्ये क्षत्रियादिसम्पूर्णाशौचोपलक्षणतया दशरात्रादिपदस्यावश्यकतया लाघवेनाशौचमात्रोपलक्षणत्वे निष्प्रत्यूहं तद्विरोधान्निर्मूलत्वं दुर्वारमित्यर्थः । अत्र लघ्वन्तः पातिदीर्घसूसन्तःपातिशावस्थले द्वित्रिदिनवृद्धिस्तु प्रमाणान्तरादेवेति भावः । *अन्ते इति । इदं चात्र तत्त्वम्—यत्राशौचस्यान्त्याहोरात्रेऽन्त्ययामे वा त्र्यहं पतितं तत्र पूर्वशेषेण शुद्धौ प्राप्तायां रात्रिशेष इति प्रवर्तते इत्युपेयम् । नच तत्र पूर्वशेषशुद्धिरेव न प्रसज्यते अहोभिरिति बहुवचनोपादानादिति

---

(१) 'दशाहाद्यन्ते' इति टीकानुसारी पाठः ।

*पूर्वाशौचान्तर्वर्धितद्वित्रिदिनमध्येऽधिकाशौचान्तरपाते

वाच्यं, बहुत्वस्याविवक्षणात् । अन्यथा "रात्रिशेषे" इति गौतमीयादेस्तदपवादत्वभङ्गः स्यात् । यत्र तु अहोरात्रशेषे वा पक्षिण्येकाहयोः पातः तत्रोत्सर्गस्य पूर्वशेषे शुद्धिविधेः प्राप्तावपि तदपवादो द्व्यहत्र्यहविधिर्न प्रवर्तते । रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिरित्यस्यापूर्वविधित्वापत्तेः । नह्ययमपूर्वविधिः किन्तु प्रतिप्रसवः । कथमिति चेत् ? यत्र हि अहोरात्रशेषे यामशेषे वा दशाहादि प्राप्तं तत्र तन्मध्यगं द्व्यहत्र्यहोभयं प्राप्तमेव । शेषाहशुद्धिविधिबलाच्च तद्बाधे प्राप्ते द्व्यहत्र्यहविधिर्द्व्यहत्र्यहोज्जीवने न प्रतिप्रसवः । एवं यत्राहोरात्रशेषे त्र्यहाशौचपातस्तत्रापि शेषशुद्धिविधिना बाधितत्र्यहोज्जीवनेन नप्रातिप्रसव एव । यत्र तु यामशेषे त्र्यहाशौचपातस्तत्र येषां रात्रेर्द्वेधा विभागेन पूर्वार्धं येषां वा रात्रित्रेधाविभागेनाद्यभागं पूर्वाहः शेषस्तेषां पूर्वाशौचापेक्षया अधिकत्र्यहप्राप्तेस्तस्य शेषाहोभिरित्यपवादप्राप्तौ यामशेष इति प्रतिसवः । येषां तु "यस्याहस्तस्य शर्वरी" इति पक्षः तेषामधिकत्र्यहस्याप्राप्तत्वान्न प्रतिसवः, किन्तु पूर्वशेषेणैव शुद्धिः । ग्रन्थकारोऽप्येतदभिप्रेत्यैव पूर्वशेषशुद्धिमुक्तवान् । तस्मात्पक्षिण्येकाहयोरहोरात्रशेषे वा प्राप्तौ न द्व्यहत्र्यहवृद्धिः किन्तु पूर्वशेषशुद्धिरेवेति । ननु सम्पूर्णाशौचान्त्याहोरात्रद्व्यहत्र्यहमध्ये संपूर्णविजातीयाशौचपाते पूर्वेणैव शुद्धिः सम्पूर्णे एवाशौचे आशौचान्तरपाते "अन्तरा जन्ममरणे" इत्यादिप्राप्तायाः शेषशुद्धेः रात्रिशेष इत्यपवादः । तथाच तत्र पूर्वशेषमात्रेणाहोरात्रादिशेषेण न शुद्धिः किन्तु द्व्यहत्र्यहयुक्तपूर्वशेषेणैवेत्यर्थः । ततश्च पूर्वाशौचस्य द्वादशरात्रत्रयोदशरात्ररूपेण महत्त्वात्तत्र जायमानं तृतीयाशौचं पूर्वेण गच्छतीति न तृतीयाशौचं सर्वं कार्यमिति तत्राह—*पूर्वाशौचेति ।

तु वर्धितस्या*ल्पत्वाद*धिकेनैव शुद्धिः । नच वर्धितस्य पूर्वशेषत्वं शङ्कनीयम् *रात्रिशेषे पूर्वशेषशुद्ध्यपवादे नैमित्तिकावृत्तिन्यायोज्जीवनात् । अपवादाभावे उत्सर्गस्य प्राप्तेः ।

अपवादान्तरमाह शङ्खः—

मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।
*पितुः शेषेण शुद्धिः स्यान्मातुः कार्या तु पक्षिणी ॥

---

*अल्पत्वादिति । अयं भावः—अन्तरेत्यादिविधिना । न पूर्वाशौचे कश्चिद्गुणो विधीयते, किन्तु प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायेन द्वितीये संपूर्णे प्राप्ते तत्र ह्रासरूपो गुणः । तद्विधौ पूर्वाशौचमध्ये उत्तराशौचस्य यानि नवाष्टसप्तषडादिदिनानि तैरेवोत्तराशौचापगमो भवति । तदपवादश्च रात्रिशेष इत्यादि । तेन च द्व्यहत्र्यहवर्धितपूर्वाशौचान्त्याहोरात्रादिरूपह्रासविशेषरूपो गुणः तद्वशादहोरात्रादिशेषे पूर्वाशौचान्तर्गतोत्तराशौचकालमात्रेण न शुद्धिरिति । *अधिकेनैवेति । "अघवृद्धिमदाशौचम्" इत्याद्युक्तेरिति शेषः । अथात्र द्व्यहत्र्यहयोरन्त्यदिनेऽन्त्ययामे वा तृतीयासंपूर्णाशौचपाते रात्रिशेष इति वाक्यं प्राप्नोत्येवेति चेत् ? सत्यं, यत्र पूर्वशेषशुद्धिविधायकवाक्येन द्वितीयाशौचह्रासो विधीयते तत्रैव तदपवादत्वेन द्व्यहत्र्यहरूपह्रासविशेषस्तेन विधीयते । ततश्च यद्विहितं द्व्यहस्तत्पूर्वदशमाहोरात्रसहितं त्र्यहात्मकं, यच्च विहितं त्र्यहस्तद्यामाधिकं तदुभयमप्यल्पं तत्र द्वितीयाशौचह्रासासम्भवाद्रात्रिशेषे इति ह्रासविशेषोऽपि न प्रवर्तते इति तृतीयं संपूर्णाशौचं कार्यम् । एवञ्च तत्र त्र्यहपक्षिण्यादेः पूर्वेणैव निवृत्तिरिति आभासशङ्का निरस्यति—*रात्रिशेषे अहोरात्रशेषे रात्रिशेषे इति वचनरूपे इति शेषः । आवर्त्यमानं च नैमित्तिकं प्रकृते ह्रासविशेषरूपमित्याशयः ।*पितुः शेषेण पितृमरणनिमित्तकाशौचस्य शे-

पादत्रयं स्पष्टम् । तुर्यस्य त्वयमर्थः–पित्राशौचमध्ये मातृमृतौ पित्राशौचान्ते मातुः पक्षिणीमधिकां कुर्यादिति । (१)तत्राशुद्धावित्युक्तेरात्महादेः पितुराशौचाभावान्मातृमरणे न पक्षिणी, किन्तु पूर्णमेवाशौचम् । *इयं च पक्षिणी तृतीयादिदिनपरा, नाद्यादिनद्वये प्रतिनिमित्तनैमित्तिकावृत्तिन्यायापवाद(२)पूर्वशेषापवादत्वादिति पितृचरणाः । *सपिण्डाद्याशौचेन मातापित्रोराशौचापगमो नास्त्येव । एवं*भर्तुरपि । इयं च *पक्षिणी

षे(३)ण । *इयं चेति । यद्यप्याद्यदिने प्रतिनिमित्तं नैमित्तिकावृत्तिफलाभावादाशौचद्वयस्य कथञ्चिद् युगपदेव शुद्धिस्तथापि द्वितीयदिने मातृमृतौ पक्षिणी अधिका भवत्येवेति अस्वरसः । *सपिण्डादीति । यद्यपि नेदं वाचनिकं तथापि मात्राशौचेनापि न पित्राशौचनिवृत्तिः किमुतान्येन । पित्राशौचेनापि केवलेन न मात्राशौचनिवृत्तिः किमुतान्येनेत्यर्थसिद्धम् । *भर्तुरपीति । मातापितृवद्भर्तुरपि महागुरुत्वादिति भावः । सपत्नमात्राशौचं पत्न्याशौचं च पूर्वाशौचेन निवर्तते, "प्रेतस्य सुतान्" इत्यत्र मुख्यगौणग्रहेऽपि सपत्नीपत्नीपुत्रग्रहणासम्भवात् । *पक्षिणीति । अधिकपक्षिणीमध्ये सपिण्डाशौचान्तरपाते कथमिति चेत् ? इत्थम् , यत्र पित्राशौचद्वितीयाहे मात्राशौचं तन्मध्ये तृतीयं दशाहं तत्र पूर्वण शुद्धिः पूर्वस्य महत्त्वात् । यदा तु तृतीयाद्यहोरात्राणि मात्राशौचं तत्र तृतीयं दशाहं तत्र न पूर्वेण शुद्धिः पूर्वस्य लघुत्वात् "अघवृद्धिमद्" इति वचनात् । "परतः परतः" इति देवलवाक्यस्वीकर्तॄणां तु तत्र पूर्वेणैव शुद्धिः । ननु पित्राशौचे दशमाहोरात्रादौ मातृमरणे द्व्यहत्र्यहाभ्यां किं पक्षि-

---

(१) 'अत्रा' ग० । (२) पूर्वशेषापवाद' नास्ति ग० ।

(३) मात्राशौचपरिच्छेदकदिनोत्तरमपेक्षितदिनेष्वनुवर्तनेन शुद्धिर्न तु मात्राशौचशेषेणेत्यर्थः ।

दशमदिनात्पूर्वं मातृमरणे ज्ञेया । *दशम्यां रात्रौ तत्प्रभाते वा मातृमरणे द्व्यहत्र्यहसमुच्चिता पक्षिणीति कश्चित् । तन्न, *संख्यान्तरोपजननापत्त्या त्र्यहादिश्रुतिबाधापत्तेः । अत एवैका दयां षड् देया इत्यादौ श्रुतसंख्याबाधापत्तेः समुच्चयो निरस्तो द्वादशे । *गुरुणि लघोरन्तर्गतेः 'गुरुणा लघु शुद्ध्येत' इत्युक्तेश्च । *(१)मातुरन्वारोहणे तु न पक्षिणी ।

णी बाध्यते तौ वा पक्षिण्या बाध्येते इत्याशङ्क्याह-*दशम्यामिति । अयं भावः प्रकृते सामान्यविशेषन्यायेन न बाध्यबाधभावः, यतः द्व्यहत्र्यहयोर्दशमाहोरात्रतदन्त्ययामयोः प्रवृत्त्या विशेषरूपत्वं मातापितृविषयप्रवृत्त्या विशेषरूपत्वं दशमाहोरात्रादितत्पूर्वं च प्रवृत्त्या सामान्यरूपत्वमिति । अत एव न सावकाशनिरवकाशन्यायेनापि नच विकल्पः, त्रयोदशाहादावयं शुद्धोऽशुद्धश्चेति वस्तुनि विकल्पायोगात् । नच नवमदिनं यावत् पक्षिणी दशमदिनादौ द्व्यहादीति व्यवस्थाऽस्तु इति वाच्यं, मातापितृविषये दशमाहोरात्रादावपि पक्षिण्येव तद्भिन्नविषये द्व्यहादीत्यपि व्यवस्था संभवेन विनिगमकाभावात् । तस्मादुभयोर्नित्यप्रवृत्त्या समुच्चय इत्यर्थः । *संख्यान्तरेति । तथा सति कस्यापि संख्याया अनुष्ठितत्वं न स्यादिति भावः । तर्हि किं कार्यमित्यत आह—*गुरुणीति । पितृदशाहे आनवमं पक्षिणीसत्त्वेपि अन्त्यदिनतदन्त्ययामयोः द्व्यहत्र्यहावेवानुष्ठेयौ, ताभ्यामेव पक्षिण्याः प्रसङ्गासिद्धेः । यथा महालयतदन्तर्गतान्वष्टकाश्राद्धयोः सहानुष्ठाने बहुदैवत्यपिण्डदानेनान्वष्टकासम्बन्धिपिण्डदानसिद्धिस्तद्वदित्यर्थः । एतेन पितृदशमाहोरात्रादौ मातृमृतौ पक्षिणी सापिण्डान्तरमृतौ द्व्यहादीत्यनौचित्यं प्रत्युक्तम् । *मातुरिति । एवञ्च दशमेऽप्यहनि अनाहि-

---

(१) 'मातुरन्वारोहणे तु न पक्षिणी' नास्ति ग० ।

यदा नारी विशेदग्निं प्रियस्य प्रियवाञ्छया ।
तदाशौचं विधातव्यं भर्त्राशौचक्रमेण हि ॥

इति पृथ्वीचन्द्रोदये लघुहारीतोक्तेः । तत्रैव षडशीतिमतेऽपि—

मृतं पतिमनुव्रज्य पत्नी चेदनलं गता ।
न तत्र पक्षिणी कार्या पैतृकादेव शुद्ध्यति ।
पुत्रोऽन्योवाग्निदस्तस्यास्तावदेवाशुचिस्तयोः ।
नवश्राद्धं (१)सपिण्डं च युगपत्तु समापयेत् ॥

गृहीताशौचानां पुत्राणां पितुः संस्कारे मातुः सपिण्डस्य वा मरणे नायं निर्णयः, अतिक्रान्तकालाद्विद्यमाननिमित्तस्य च बलवत्त्वात् । द्वादशवर्षोत्तरं संस्काराशौचमध्ये सपिण्डमरणेऽप्येवम् । यत्तु अपरार्के ब्राह्मे-

ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रवत् ॥इति,

त*द्भर्तुराशौचोत्तरमन्वारोहणे त्रिरात्राशौचपरमिति पृथ्वीचन्द्रः । *ब्राह्मणादेः क्षत्रियाद्यनुगमनेऽल्पाशौचपरमित्यपरार्कः । शुद्धितत्त्वादयो गौडास्तु—भर्त्रशौचोत्तरमन्वारोहणे त्रिरात्रम् । सहगमने तु सम्पूर्णम् । युद्धहतस्य सद्यःशौचेऽन्वारोहणे ब्राह्मोक्तेस्त्रिरात्रत्वात् । भर्तुरपि *त्र्यहेण पिण्डदानम् । एकचितौ

ताग्नेः प्रोषितमृतस्य संस्कारेऽन्वारोहणे न पक्षिणी किन्तु यथायथं द्व्यहत्र्यहाविति । *भर्तुरिति । विप्रेतरपरं, विप्रायाः पृथक्चितिनिषेधात् । प्रतिषेधशास्त्रेऽपि विप्राया इव तदनुक्रामिक्षत्रियादेरपि स्वस्वाशौचं युक्तमित्यस्वरसः । *ब्राह्मणादेरिति । क्षत्रियादेः पृथक्चितिरेव । अन्त्येष्टिकर्ताऽप्यन्यः । *त्र्यहेणेति ।

---

(१) 'च पिण्डं च क० छ०

तु सद्यःशौचमित्याहुः*। *अन्यत्प्रागुक्तम्।
पूर्वशेषेण शुद्धेरपवादान्तरमुक्तं षडशीत्याम्—

पूर्वाशौचेन या शुद्धिः सुतके मृतके च सा।
सूतिकामग्निदं हित्वा प्रेतस्य च सुतानपि॥

निर्णयामृते स्मृतिसङ्ग्रहेऽपि—

इयं विशुद्धिरुदिता सुतिकामग्निदं विना।

इदं मूल्येन दाहकरणे *मातुलादिसम्बन्धेन दाहमात्रकरणे तु त्रिरात्रमेवेत्युक्तं प्राक्। वृद्धात्रिः—

सूतिकाद्द्विगुणं शावं शावाद्द्विगुणमार्तवम्।
आर्तवाद्द्विगुणा सूतिस्ततोऽपि शवदाहकः॥

तथाशौचसम्पाते न शावजननिमित्तकार्यप्रतिबन्धः।

आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्।
कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति।

इति प्रजापतिस्मृतेः। आशौचे तु द्विविधेऽपि शातातपः—

अन्तर्दशाहे जननात्पश्चात्स्यान्मरणं यदि।
प्रेतमुद्दिश्य कर्तव्यं पिण्डदानं यथाविधि॥
प्रारब्धे प्रेतपिण्डे तु मध्ये चेज्जननं भवेत्।
तथैवाशौचपिण्डांस्तु शेषान्दद्याद्यथाविधि।
मातुः पक्षिणीमध्ये पितुरेकादशाहं च कुर्यात्।
आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि।

इति स्मृतेः। *केचित्त्विदं क्षत्रियादिपरम्, विप्रा-

"युगपत्तु समापयेत्" इति वचनात्। *आहुरिति। अस्वरसः। युद्धहते पृथक्चितौ स्त्रियां जात्याशौचम्, एकचितौ तु ऽप्यनुरोधात्तदित्यौचित्यात्। *अन्यदिति। संस्काराशौचमध्ये रात्रिशेषादौ मात्रादिमृतौ इति मयूखाशयः। *मातुलादिसम्बन्धेनेति। इदं तु चिन्त्यं, पैठीनासिवाक्यविषये अ-

देस्त्वाशौचान्तर एकादशाहश्राद्धं नेत्याहुः । अत एव विज्ञानेश्वरेण—

दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत् ।

इति शुचित्वं महैकोद्दिष्टाङ्गविप्रनिमन्त्रणपरमिति वदता तत्र शुद्धेरङ्गत्वं दर्शितम् । एवं वृषोत्सर्गश्राद्धादावपि । देवयाज्ञिकेन त्वाशौचान्तरेऽपि भवत्येवेत्युक्तम् ॥

अथाशौचापवादः । स च पञ्चधा । कर्तृतः कर्मतः द्रव्यतः मृतदोषतः विधानाच्च । आद्यो ब्रह्मचारियत्यादिषु ।

नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
*नाशौचं कीर्तितं सद्भिः पतिते च तथा मृते ॥

नाथमेते धर्मपुत्राविशेषेण दशाह इति निर्धारितत्वात् । *केचित्विति । विशेषो दर्शयिष्यते । *नाशौचमिति । आशौचं सपिण्डसोदकदौहित्रभागिनेयत्वाद्यनापाद्यानिमित्तकमेव ग्राह्यं, तस्यैव द्राग् बुद्धिस्थत्वात्; न तु दाहनिर्हाराद्यापाद्यानिमित्तकम् । किञ्च यथा सत्र्यादिषु अनापाद्यानिमित्तकाशौच एव निषेधः । तत्र तस्य तत्तत्कर्माधिकारप्रतिपादनार्थत्वात् । आपाद्यनिमित्तके तत्र तदधिकारस्य ।

आशौचं यस्य संसर्गादापतेद् गृहमेधिनः ।
क्रियास्तस्य न लुप्यन्ते गृह्याणां च न तद्भवेत् ॥

इति वचनसिद्धितयाऽऽनर्थक्यापत्तेः । तथा प्रकृतेपि तन्निषेधश्च सर्वकर्मविषयः । "न राज्ञां राजकर्माणि" इतिवद्विशेषोपस्थापकपदाभावात् । सत्र्यादिषु तु तत्तकर्मविषय इति स्फुटी भविष्यति । ननु—

सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ।
आपद्यपि च कष्टायां सद्यः शौचं विधीयते ॥

इति योगीश्वरेण सद्यःशौचमुक्तम् । तथाच यत्यादे

इति कौर्मोक्तेः । *तुर्यपादे 'शावे वापि तथैव च' इति देवलपाठः । आशौचमन्त्यकर्मोपलक्षणम्,

ब्रह्मचारी न कुर्वीत शववाहादिकाः क्रियाः ।
यदि कुर्याच्चरेत्कृच्छ्रं पुनःसंस्कारमेव च ॥

इति देवलोक्तेः । एत*त्पित्राद्यतिरिक्तविषयम्,

*आचार्यं स्वमुपाध्यायं मातरं पितरं गुरुम् ।
निर्हृत्य तु व्रती प्रेतं *न व्रतेन वियुज्यते ॥

इति मनूक्तेः । (हा(१)रीतः-

मातापित्रोस्तु यत्प्रोक्तं व्रतचारी तु पुत्रकः ।
व्रतस्थोऽपि हि कुर्वीत पिण्डदानोदकक्रियाम् ॥
भवत्यशौचं नैवास्य नैवाग्निस्तस्य लुप्यते ।
स्वाध्यायं च प्रकुर्वीत पूर्ववद्विधिदर्शितम् ॥

संवर्तः—

अन्यगोत्रोपसम्बन्धः प्रेतस्याग्निं ददाति यः ।
पिण्डं चोदकदानं च स दशाहं समाचरेत् ॥)

सपिण्डजननादौ स्नानकालावच्छिन्नमाशौचं दुर्वारमित्याशङ्कायामाह-*तुर्यपादे इति ।

नाशौचं सूतके प्रोक्तं शावे वापि तथैव च ।

इति उत्तरार्धे इत्यर्थः । एतद्वचनवशादेतद्विषये योगीश्वरवाक्यस्थसद्यःशौचपदमाशौचाभावपरमिति सकलनिबन्धकारसंमतम् । अत एव यत्यादीनां सपिण्डमरणादौ न स्नानाद्यनुष्ठानं दृश्यते । ब्रह्मचारिणां तु शवस्पर्शानुगमनादिनिमित्तकमेव तत् । *पित्रादीति । अधिकार्यन्तरासत्त्वे । *आचार्यमिति । उपनयनपूर्वकं कृत्स्नवेदाध्यापक आचार्यः । मन्त्रब्राह्मणयोरध्यापक उपाध्यायः । तदन्यतराध्यापको गुरुः । *न व्रतेनेति । त-

---

(१) कंसान्तर्गतो ग्रन्थो नास्ति क० छ० ।

*निर्हरणमन्त्यकर्मपरम् । एवं मातामहस्य,

यथा व्रतस्थोऽपि सुतः पितुः कुर्यात् *क्रियां नृप ।
तथा मातामहस्यापि दौहित्रः कर्तुमर्हति ॥

इत्यपरार्के भविष्योक्तेः ।

मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकम् ।
कुर्वन्मातामहस्यापि व्रती न भ्रश्यते व्रतात् ॥

इति कालादर्शाच्च । तत्रान्त्यकर्मनिमित्तमस्पृश्यत्वं दशाहमस्त्येव,

सगोत्रो वाऽसगोत्रो वा योऽग्निं दद्यात्सखे नरः ।
सोऽपि कुर्यान्नवश्राद्धं शुध्येत्तु दशमेऽहनि ॥

इति दिवोदासोक्तवचनात् । अतएव 'ब्रह्मचारिणः *शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मातापित्रोर्गुरोश्च' इति गौतमीये व्रतनिवृत्तेरेव पर्युदासो नाशौचस्य ॥

सन्ध्यादिकर्मलोपस्तु नास्ति,

न त्यजेत्सूतके कर्म ब्रह्मचारी (१)स्वकं क्वचित् ।

इति छन्दोगपरिशिष्टात्;

पित्रोर्गुरोर्विपत्तौ तु ब्रह्मचार्यपि यः सुतः ।
सव्रतश्चापि कुर्वीत अग्निपिण्डोदकक्रियाम् ॥

थाच भ्रष्टब्रह्मचर्यसन्धानार्थं पुनरुपनयनं प्रत्यवायपरिहारार्थं प्रायश्चित्तं च मातापित्राचार्योपाध्यायमातामहेषु न भवतीत्यर्थः । *निर्हरणमिति । शवकर्मिण इत्यग्रे वचनात् । *क्रियाम् । अन्त्यकर्म । *शवकर्मिण इति । यो यस्याग्निदाता स तज्जातीयमाशौचं न कुर्यादित्यर्थः । एवञ्च ब्रह्मचारिणः अनापाद्यनिमित्तकाशौचानिषेधेऽपि निर्हरणौर्ध्वदेहिकक्रियाद्यापाद्यनिमित्तकतन्निषेधाभावात् पित्रादेरन्त्येष्टिकरणे तदन्नानशनेऽपि ब्रह्मचारिणस्तन्नि-

---

(१) 'स्वयं' क० छ।

तेनाशौचं न कर्तव्यं सन्ध्या चैव न लुप्यते ।
अग्निकार्यं च कर्तव्यं सायं प्रातश्च नित्यशः ॥

इति चन्द्रिकायां संवर्तोक्तेश्च । *अत्र कर्मानधिकारूपाशौचनिषेध एव । अपरार्कमाधवादयस्तु एकाहमाशौचमाहुः—

आचार्यं वाप्युपाध्यायं गुरुं वा पितरं च वा ।
मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनम् ॥
कृत्वा पतति नो तस्मात्प्रेतान्नं तत्र भक्षयेत् ।
अन्यत्र भोजनं कुर्यान्न च तैः सह संवसेत् ॥
एकाहमशुचिर्भूत्वा द्वितीयेऽहनि शुध्यति ॥

इति *ब्राह्मोक्तेः । *तदन्नभोजने तु प्रायश्चित्तं पुनरुपनयनमाशौचं च ।

दिवोदासादयस्तु ब्राह्मोक्तेः प्रथमेऽह्नि संध्यादिलोपः,

ब्रह्मचारी यदा कुर्यात्पिण्डनिर्वपणं पितुः ।
तावत्कालमशौचं स्यात्पुनः स्नात्वा विशुद्ध्यति ॥

इति प्रजापतिवचनात् द्वितीयाहादौ पिण्डदानकाले

मित्तं पूर्णाशौचमात्रम् इतरस्य सपिण्डस्यासपिण्डस्य वा तत्करणे तु पूर्णाशौचं प्रायश्चित्तं पुनरुपनयनं चेति त्रयम्। *अत्रेति । और्ध्वदेहिकानुष्ठानपृष्ठलग्नस्यास्पृश्यत्वस्य निषेधायोगात्। "संध्या च" इत्यादितद्विवरणाच्च। *ब्राह्मोक्तेरिति। 'दग्ध्वा' इत्यस्य सकलौर्ध्वदेहिकपरत्वादित्यभिमानः । वस्तुतः एकाहः पित्रादेर्दाहमात्रकरणविषयः । *तदन्नेति । चवाशब्दएतदाशौचं कृच्छ्रत्रयप्रायश्चित्तं पुनरुपनयनं चेत्यर्थः । एतच्च पित्रादेरौर्ध्वदेहिकेऽपि,

संकटान्नं च नाश्नीयान्न च तैः सह संवसेत् ।

इति स्मरणात् । एवं निर्हरणे दाहमात्रे च पततीत्युक्तेः इतराशौचकल्पने मानाभाव इत्यस्वरसः । सिद्धान्ते प्रजापतिवा-

एवास्पृश्यत्वमात्रं नान्यदित्याहुः । *दशाहमस्पृश्यत्वेपि कर्माङ्गस्नानविधानार्थमेतदिति युक्तम् । अन्त्यकर्माकरणे तु ब्रह्मचारिणः पित्रादिमरणेऽप्याशौचाभाव एव । सोऽपि ब्रह्मचर्यकाल एव समावर्तनोत्तरं तु पूर्वमृतानां त्र्यहाशौचं भवत्येव,

*आदिष्टी नोदकं कुर्यादाव्रतस्य समापनात् ।
समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेत् ॥

इति मनूक्तेः । *तत्रापि विकल्पः,

पितर्यपि मृते नैषां दोषो भवति कर्हिचित् ।
आशौचं *कर्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणाम॥

इति छन्दोगपरिशिष्टात् । तथा कृतजीवच्छ्राद्धेन किमप्याशौचं न कार्यमिति हेमाद्रिः । शुद्धितत्त्वे कौर्मे-

*सद्यःशौचं समाख्यातं दुर्भिक्षे चाप्युपद्रवे ।
*डिम्बाहवहतानां च विद्युता पार्थिवैर्द्विजैः ॥

उपद्रवेऽत्यन्तमरके ।

*उपसर्गमृते चैव सद्यःशौचं विधीयते ।

कथमाह-*दशाहमिति । तावत्कालमित्यस्य दशादिनरूपपिण्डदानकालमित्यर्थः । कर्मानधिकारलक्षणाशौचेऽपि आशौचमध्य एव वाचनिके सध्यावन्दनरूपतत्तत्कर्मणि स्नानादेवाधिकारः । आहिताग्नेरिवाग्निहोत्रहोमादावित्यर्थः। *आदिष्टी आदिष्टं व्रतादेशः सोऽस्यास्तीत्यादिष्टी ब्रह्मचारी । अत्र व्याख्यानान्तरम् आदिष्टीति प्रक्रान्तप्रायश्चितः कथ्यते । तस्यैवायमुदकदानादिनिषेधः प्रायश्चित्तसमाप्त्युत्तरमुदकदानादिविधिश्चेति । *तत्रापि अन्त्यकर्मण्यपि। *कर्मणः समावर्तनस्य । *सद्यः शौचमिति । “आपद्यापि च” इति चानुपदम् “तत्तत्कार्येषु” इतिश्लोके स्फुटार्थः । *डिम्बाहवः शस्त्रकलहः । *उपसर्गः विस्फोटादिः । आप-

इति पराशरोक्तेः । उपसर्गोऽत्यन्तमरक इति शूलपाण्यनिरुद्धभट्टादयः । याज्ञवल्क्योऽपि—

आपद्यपि च कष्टायां सद्यःशौचं विधीयते ।

इति । मरणसमयेऽपि नाशौचम् । तथा च शुद्धिरत्नाकरे दक्षः—

स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितम् ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥

अतः सति वैराग्ये संन्यासोप्यातुरस्य भवतीति केचित् ॥

अथ कर्मतः त्रिंशच्छ्लोक्याम्—

*तत्तत्कार्येषु सत्त्रिव्रतिनृपनृपवद्दीक्षितर्त्विक्स्वदेशभ्रंशापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्प्यातुराणाम्
सम्प्रारब्धेषु दानोपनयनयजनश्राद्धयुद्धप्रतिष्ठाचूडातीर्थार्थयात्राजपपरिणयनाद्युत्सवेष्वेतदर्थे ॥ ✓

नाशौचमिति शेषः । सत्त्री अन्नसत्त्रवान् मुख्यसत्त्रस्य दीक्षितपदा*त्सिद्धेः । व्रती *अनन्तव्रतादिनियमवान्, 'न व्रतिनां व्रते' इति विष्णूक्तेः । प्रचेताः—

द्रतो मुमूर्षुः । आतुरसन्यासावाप्तये सूतकनिवृत्तिर्नोक्तेति केचिदित्यस्वरसः । *तत्तत्कार्येष्विति । एकापि सप्तमी विषयभेदाद्भिद्यते । तेन सत्त्राद्यृत्विगन्तेषु तत्तत्सत्त्रव्रतव्यवहारदर्शनादिमन्त्रादियज्ञविषयस्वदेशस्य विस्फोटादिभिरुपसर्गैः राजभयाद्वा भ्रंशे उपस्थिते विद्यमाने वा तदभावार्थे शान्तिकर्मणि । आपदि अन्नाभावेन कुटुम्बपीडाप्राप्तौ तद्वारके प्रतिग्रहादौ । अनेकश्रुतिपठनस्य प्रत्यहाध्ययने । भिषजो नाडीस्पर्शादौ । कार्वादीनां तत्तत्कर्मणि आशौचं नेत्यर्थः । आशौचमिह प्रोक्तकर्मानधिकारः । *सिद्धेरिति तत्राशौचाभावलाभादिति यावत् । *अनन्तव्रता-

कारवः शिल्पिनो वैद्या दासीदासास्तथैव च ।
राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्तिताः ॥

*कारवः *सूपकाराद्याः । *शिल्पिनश्चैलनिर्णेजकाद्याः । *आतुरस्य व्याधिनाशार्थे दानादौ । *तुलादा-

---

दीति । द्वादशाब्दव्रतोपवासादिकं प्रायश्चित्ततयाऽन्यथा वा क्रियमाणं कृच्छ्रचान्द्रायणादि स्नातकव्रतानि भोजनव्यतिरेकेण जलं न पातव्यमित्यादयः सम्यक् सङ्कल्पाश्चाद्यर्थः । यद्यपि पुराणोक्तचतुर्दशाब्दकर्तव्यानन्तव्रतादि तद्दिन एवं स्वयं कार्यमित्याशयो लक्ष्यते तथापि तत्राशौचे उपवासः कर्तव्यः पूजादानादेश्चान्ते इति पूर्वोक्तं युक्तम् । जन्माष्टम्यनन्तव्रतादिकं तु मासानन्तरमुत्तराष्टमीचतुर्दश्यादौ सुकरम् । नृपः प्रजापालनाधिकृतः कश्चित् । नृपवान् अमात्यादिः । *कारवः स्वशरीरेण कर्मकराः । *सूपकाराद्या इति । आदिना चैलनिर्णेजकादयः । *शिल्पिनः वासीवर्त्तिकादिव्यवधानेन कर्मकराः तक्षवश्चित्रकरादयः । चैलनिर्णेजकपदं च साधनविशेषमादाय निर्णेजनकर्तृताद्विशेषपरम् । *आतुरस्येति । उल्बणव्याध्यादिना मुमूर्षोरित्यर्थः । "आशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारुणां कारुकर्मणि न राजाज्ञाकारिणां तदिच्छायां न देवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः" इति विष्णुः । "आपद्यपि च" इति । याज्ञवल्क्यादिश्च द्रष्टव्यः । अनेकाः श्रुताः शाखा वेदान् वा पठतीत्यनेकश्रुतिपठनः । अवचाङ्ग्र(न्था)ध्ययनमधीयार्थज्ञानं तदर्थानुष्ठानं च द्रष्टव्यम् । तथाच दक्षः—

ग्रन्थार्थं यो विजानाति वेदमङ्गैः समन्वितम् ।
सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकम् ॥ इति ।

सम्प्रारब्धेष्वित्यस्य दानादिषु सम्प्रारब्धेषु एतदर्थे नाशौचमित्यर्थः । परिणयनादीत्यादिना संस्कारग्रहः । चूडोपनयनयोरुपादा-

नादेः प्रारम्भो नान्दीश्राद्धं सङ्कल्पो वा । *यजनं तडागोत्सर्गकोटिहोमादिः । लघुविष्णुः—

*व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥
*प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः ।
नान्दीश्राद्धं *विवाहादौ श्राद्धं पाकपरिक्रिया ॥ इति

पाकस्य परिसमंतात्क्रिया पाकप्रोक्षणमिति शुद्धिप्रदीपस्तन्मन्दम्, *रूढेर्योगाद्बलवत्त्वात् । तीर्थेति आशौचे आकस्मिकतीर्थप्राप्तौ,

विवाह*दुर्गयज्ञेषु यात्रायां *तीर्थकर्मणि ।

नं ब्राह्मणवसिष्ठन्यायेन । तत्र प्रारम्भमाह–*तुलादानादेरिति । दीक्षितपदादिना यज्ञलाभादाह—*यजनमिति । होमार्चनयोर्यजनशब्देन ग्रहणे मूलमाह—*व्रतेति । *प्रारम्भ इति । सत्रं मुख्यं तत्र वरणाभावात् । *विवाहादाविति । आदिना नान्दीश्राद्धवत्कर्ममात्रग्रहः । एतदभिप्रेत्यैव श्लोके उपनयनपदम् । नान्दीश्राद्धवत्कर्माणि च “सीमन्तव्रतचौल” इत्यादिनोक्तानि । *रूढेरिति । पाकपरिक्रियाशब्दस्य पाके इति शेषः,

निमन्त्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि ।
निमन्त्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य च ॥
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ।इति ब्राह्मोक्तेः।

श्राद्धप्रारम्भः निमन्त्रणादन्यः पाकः तत्र श्राद्धकर्त्तुः, भोक्तुस्तु निमन्त्रणादेवाशौचाभाव इति बोध्यम् । “युद्धे सम्प्रारब्धे उपस्थिते सङ्ग्रामे समुपोढे राजानं सन्नाहयेत्” इत्याश्वलायनोक्तेस्तदुपयोगिनि संन्नहनादौ प्रास्थानिके शान्तिहोमादौ च नाशौचम् । प्रतिष्ठायां तु “देव प्रतिष्ठा” इति विष्णुवचनमुक्तम् । *दुर्गयज्ञेष्विति । वैरिवेष्टितदुर्गसंरक्षणार्थेषु यज्ञेषु शान्तिकोच्चाटनादिषु

न तत्र सूतकं तद्वत्कर्म यज्ञादि *कारयेत् ॥

इति पैठीनसिस्मृतेः । अत्र विशेषः प्रागुक्तः । जपः पुरश्चरणादिः स्तोत्रपाठः, अविच्छेदेन सङ्कल्पितहरिवंशश्रवणादिश्च । अत एवोक्तं ब्राह्मे—

गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित् । इति ।

एवं देवपूजादि । मदनपारिजाते यमोऽपि—

*शिवविष्ण्वर्चनं दीक्षा यस्य चाग्निपरिग्रहः ।
श्रौतकर्माणि कुर्वीत स्नातः शुद्धिमवाप्नुयात् ॥

गौडशुद्धितत्त्वे मन्त्रमुक्तावल्याम्—

जपो देवार्चनाविधिः कार्यो दीक्षान्वितैर्नरैः ।
नास्ति पापं यतस्तेषां सूतकं वा *यतात्मनाम् ॥

राघवभट्टीये नारदः—

*अथ सूतकिनः पूजां वक्ष्याम्यागमचोदिताम् ।
स्नात्वा नित्यं च निर्वर्त्य मानस्या क्रियया तु वै ॥
*बाह्यपूजाक्रमेणैव ध्यानयोगेन पूजयेत् ।
यदि कामो न चेत्कामी नित्यं पूर्ववदाचरेत् ॥

यत्तु नृसिंहकल्पे—

सदा मन्त्रजपं मुक्त्वा यदि स्यादशुचिर्नरः ।
मनसावहितस्तत्र स्मरेन्मन्त्रं न तूच्चरेत् ॥

इत्यर्थः । *तीर्थकर्मणीति । अनेनैव तीर्थयात्रासिद्धेः पुनर्यात्रापदमर्थयात्रापरम् । तथाच क्रतुरपि—

पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति । इति ।

*कारयेदिति । कुर्यादित्यर्थः । *शिवेति । यस्य दीक्षा स शिवाद्यर्चनं कुर्वीतेत्यर्थः । तदपि नियमत्वे न त्वन्यथेत्याह—*यतात्मनामिति । कथं कार्यमित्यपेक्षायामाह—*अथेति । *"बाह्यपूजा" इत्यादि "यदि कामः" इत्यन्त एकोऽन्वयः । 'उक्त्वा'

तन्मूत्राद्याशौचपरम् । रामार्चनचन्द्रिकायाम्-

*अशुचिर्वा *शुचिर्वापि गच्छंस्तिष्ठन्स्वपन्नपि ।
मन्त्रैकस्मरणो विद्वान् मनसैव सदाऽभ्यसेत् ॥

कालनियमाभावे तु(१)*स्तोत्रहरिवंशादि हयमेव । उत्सवो रथयात्रादिः । एषु नाशौचम् । अयं चाशौचाभावो*ऽनन्यगतित्वे आर्तौ च ज्ञेयः । अत्र *मूलमाकरे स्पष्टम् ।

अत्र दीक्षितस्य अवभृथात्पूर्वमेवाशौचाभावः। तदादि त्वाशौचमस्त्येव । 'तेन वैतानोपासनाः कार्याः' इति वैतानत्वेऽप्यवभृथादि न भवत्येव । अत एवोक्तं माधवीये ब्राह्मे—

'जप्त्वा' इति वा पाठः । तिष्ठेदिति शेषः । जपे सूतकाभावोक्तेस्तत्र मन्त्रोच्चारणसम्भवादित्याशयः। *अशुचिर्वेति । मूत्राद्याशौचं दृष्टान्तः । *शुचिर्वेति । उच्चारणासम्भवे मन्त्रस्मरणविधिः । गच्छन्नित्यादिस्तत्प्रपञ्चः । *स्तोत्रेति नियमाभावेऽपि "सूतके तु हरिं स्मृत्वा" इत्यादिहर्यादिस्मरणपूर्वकनमनरूपपूजायाः सुकरत्वात्त्यागः । *अनन्येत्यादि । नृपवैद्यादेस्तत्तत्कार्येष्वावश्यकतया सद्यः शौचं विना गत्यभावे अध्ययनाऽऽपदादौ चार्तिसत्त्वे इत्यर्थः । *मूलं "न राज्ञां राजकर्मणि" इत्यादि प्रागुक्तम् । अत्र नव्याः-अत्र यस्य यावत्कालं गतेरसद्भावश्च तस्य तावत्कालमाशौचमिति फलितम् । एवञ्च-

अर्वाक् सञ्चयनादस्थ्नां त्र्यहमे(काहमे)व वा ।
एकाहाद्ब्राह्मणः शुध्येद् योऽग्निवेदसमन्वितः ।
त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः ॥

इत्यादीनामेवंविधविषयत्वमेव । सगतिकस्य राजादेः कुष्ठ-

---

(१) 'स्तोत्रहरिवंशादि' नास्ति ग० ।

*तद्वद्गृहीतदीक्षस्य त्रैविद्यस्य महामखे।
स्नानं त्ववभृथे *यावत्तावत्तस्य न सूतकम्॥ इति।

'वैतानोपासनाः कार्याः' इत्यनेनैव *सिद्धेर्ऋत्विजां *दीक्षितानां चेति पुनर्दीक्षितग्रहणं यजमाने स्वयंकर्तृत्वार्थं स्नानप्राप्त्यर्थं वेति विज्ञानेश्वरः। *वस्तुतस्तु दीक्षणीयासंस्कृतस्य प्रागवभृथात्कर्मप्राप्त्यर्थं दीक्षितग्रहणम्। तेन ततः पूर्वं निषेध एव। यत्तु 'प्रारम्भो वरणं यज्ञे' इति, तदृत्विकपरम्। तथाच छन्दोगपरिशिष्टे—

न दीक्षिण्याः परं यज्ञे न कृच्छ्रादि तपश्चरन्। इति।

लधान्यकादेः पूर्णमेव।

स्वस्थकाले त्विदं सर्वं सूतकं परिकीर्तितम्।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम्॥

इति प्रोक्तवचनस्यापि इदं स्वस्थस्य दशद्वादशाहादिकं पूर्णम्, आपद्गतस्येदं सूतकं न किन्तु यदाऽऽपद्गतास्थितिः तावदेवेत्यर्थ इत्याहुः। *तद्वदिति। ऋत्विग्वदित्यर्थः। *यावदिति मर्यादायाम्। सत्रिव्रतिदीक्षितर्त्विक्प्रारब्धदानोत्सवादीनां तु नियत एव तत्तत्कार्येष्वधिकारः, तस्यालौकिकत्वात्। स्वरूपत आरम्भावश्यकत्वाच्च। अनाशौचिद्वारकत्वे मानाभावात्। *सिद्धेरिति। दीक्षितकर्मण्यप्यधिकारे इत्यादिः। *दीक्षितानां चेति। "यज्ञियं कर्म कुर्वताम्" इति वाक्यशेषः। स्वत्वत्यागातिरिक्ते हेतुः कर्तृत्वात् तत्रापि तथाप्राप्तौ इति शेषः। ननु अग्निमन्मात्रस्य तत्साध्यानन्यगतिकनित्यनैमित्तिककर्मस्वाधिकारो "नित्यानि निवर्तेरन्" "वैतानोपासनाः कार्याः" इति पैठीनसियोगीश्वराभ्यां वाच्यस्तथाच दीक्षितपदं व्यर्थमित्याशङ्क्य दीक्षणीयाया वैतानत्वेऽपि तत्प्रधानात् पूर्वमाशौचसंकोचकतया तत्सार्थक्यमित्याह— *वस्तुतस्त्विति। मधुपर्कशब्दस्य ऋत्विक्पूजाविशेषार्थकतया

शुद्धितत्त्वेऽप्येवम्। ऋत्विजां च मधुपर्कोत्तरमाशौचाभावः,

गृहीतमधुपर्कस्य यजमानात्तु ऋत्विजः।
पश्चादशौचे पतिते न भवेदिति निश्चयः॥

इति ब्राह्मात्। *अत एव रामाण्डारः-*चतुर्णां वरणपक्षेऽन्येषामाशौचेऽन्य आगमयितव्यः' इत्याह। एवं स्मार्तेऽपि तुलाकोटिहोमादौ मधुपर्के सति दोषाभावो ज्ञेयः। यत्तु 'प्रारम्भो वरणं यज्ञे' इति, तत्रापि मधुपर्कान्तं ज्ञेयम्। तेनाधानेष्टिपशुबन्धादौ तदभावादन्ये भवन्तीति सिद्धम्।

अपवादान्तरमाह याज्ञवल्क्यः—

वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात्।

तत्पूर्वभाविविवरणार्थत्वमाह—*अत एवेति। *चतुर्णामिति। ज्योतिष्टोमे इत्यादिः। नन्वेवं दर्शपूर्णमासवृतः सामिधेनीरन्वाह होता इत्युक्तेरवृत्तस्य सामिधेनीषु प्रवृत्तस्याशौचे त्यागः स्यात्। न स्यात्। वरणवत्येव कर्मणि वरणमारम्भोऽवरणवति दर्शपूर्णमासादौ तु स्वीयाद्यपदार्थकरणमेवारम्भ इति नियमादित्येके। वस्तुतस्तु यथा वरणवति वरणम् आरम्भो नावरणवति तथा येवरणवन्तस्तान् प्रत्येव वरणमारम्भः अन्यांस्तु प्रति आद्यपदार्थकरणमेवारम्भः। तथाच ज्योतिष्टोमे चतुर्णां वरणपक्षेऽन्येषां स्वीयाद्यपदार्थप्रवृत्त्युत्तरं न त्यागः। "अन्येषामाशौचे" इति रामाण्डारस्तु स्वीयाद्यपदार्थकरणपरतया नेयः। किञ्च ऋत्विक्त्ववृतत्वयोर्न सामान्यविशेषभावः ऋत्विक्त्वं विहाय च सोमाध्वर्युषु वृतत्वसत्त्वात्, वृतत्वं विहाय चतुर्णां वरणपक्षेऽन्येषु ऋत्विक्त्वसत्त्वात्। अतः ऋत्विक्वाक्यवरणवाक्ययोर्नोपसंहारः। तस्मादृत्विग्वाक्येन दर्शपूर्णमासयोरवृत्तस्य होतुः सामिधेनीषु

तत्र *त्यागमात्रे स्नानोत्तरं स्वयंकर्तृत्वम्,

*श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयात्।

इति स्मृतेः। त्यागातिरिक्ते तु श्रौते स्मार्ते चान्यस्यैव कर्तृत्वम्।

सूतके मृतके चैव अशक्तौ श्राद्धभोजने।
प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्॥

इति बृहस्पत्युक्तेः। 'नित्यानि निवर्तेरन्वैतानवर्ज्यम्, शालाग्नौ चैके*ऽन्य *एतानि कुर्युः' इति पैठीनसिस्मृतेश्चेति विज्ञानेश्वरः। एकग्रहणं पूजार्थम्। तेन स्मार्ते कार्यमेवेति *हारलतायाम्। दाक्षिणात्यास्तु विकल्पमाहुः। *अपरार्कादिनिबन्धास्तु-श्रौतं सर्वं स्वयं कार्यं, स्मार्ते तु त्यागातिरिक्तेऽन्यस्यैव कर्तृत्वम्। त्यागमात्रे

प्रवृत्तस्य चतुर्णां वरणपक्षेऽन्येषां स्वीयाद्यपदार्थे प्रवृत्त्युत्तरं चाशौचाभाव उच्यते। तथाच वरणवतां वरणोत्तरम् अन्येषान्तु स्वीयाद्यपदार्थे प्रवृत्त्युत्तरमाशौचपातेऽपि तत्त्याग इति फलितम्। एवमित्यादिपङ्क्तिश्च वरणस्वीयाद्यपदार्थकरणान्यतरसत्त्वे तत्त्यागोऽन्यथा त्याग इत्यर्थिकैवेति। *त्यागमात्रे इति। तस्यैव प्रधानत्वात्। *श्रौते इति। औपासनमपि ग्राह्यम्। तस्य योगीश्वरेण श्रुतिचोदितत्वकथनात्। *अन्ये अनाशौचिनः। *एतानि त्यागातिरिक्तानि। एवञ्च "सूतके तु समुत्पन्ने" इत्यग्निमजातूकर्ण्योक्तौ स्मार्तपदं वैतानोपलक्षणम् "वैतानोपासनाः" इति सामान्यतोऽधिकारेऽवगतेऽस्य विशेषमात्रबोधकत्वात्। यज्ञे याजमाने स्वयंकर्तृत्वं च प्रागुक्तम्। प्रकारान्तरेण नित्यत्वलाभं विना पूजार्थत्वमयुक्तम्। उक्तास्वरसादुक्तं-*हारेति। स्वसम्मतश्रौतस्मार्तविभागानुसारिमतमाह- *अपरार्कादिनिबन्धास्त्विति। आदिना कल्पसूत्रभाष्यकारादिग्रहः। विशेषान्त-

तु स्वस्य—

कर्म वैतानिकं कार्यं स्नानोपस्पर्शवान् स्वयम् ।

इति हारीतोक्तेः;

दर्शं च पूर्णमासं च कर्म वैतानिकं च यत् ।
सूतकेऽपि त्यजन्मोहात्प्रायश्चित्तीयते द्विजः ॥

इति मरीच्युक्तेः,

जन्महान्योर्वितानस्य कर्मत्यागो न विद्यते ।
शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः ॥

इति जाबालोक्तेश्चेत्याहुः । अपरार्केऽप्येवम् । याज्ञिका अप्येवम् ।

सूतके तु समुत्पन्ने स्मार्तं कर्म कथं भवेत् ।
पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत् ॥

इति जातूकर्ण्योक्तेश्च । चरुः स्मार्तस्थालीपाकः । श्रवणाकर्मादिश्चेति विज्ञानेश्वरः । प्रारब्धं तु सापिण्डेनापि कार्यम्,

न च तत्कर्म कुर्वाणः सनाभ्योऽप्यशुचिर्भवेत् ।

इति मनूक्तेः । *छन्दोगपरिशिष्टेऽपि—

होमः श्रौते तु कर्तव्यः शुष्कान्नेन फलेन वा ।
*अकृतं हावयेत्स्मार्तं तदभावे कृताकृतम् ॥

अकृतं व्रीह्यादि । कृताकृतं तण्डुलादि । स्मार्तहोमादौ तु विकल्पो ज्ञेयः 'शालाग्नौ चैके' इति प्रागुक्तेः । यदा करणं तदाऽन्यद्वारा ।

*अत्रेदं तत्त्वम् । येषां बह्वृचादीनां द्वादशरात्रम-

स्माह-*छन्दोगेति । *अकृतमिति ।

कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम ।
व्रीह्यादि त्वकृतं प्रोक्तमिति हव्यं त्रिधा स्मृतम् ।

इति वचनात् । स्मार्तविकल्पे व्यवस्थामाह-*अत्रेदमिति ।

होमेपि नाग्निविच्छेदस्तैर्न कार्यम्। तैत्तिरीयाद्यैः कार्यम्, (१)'चतूरात्रमहूयमानोऽग्निर्लौकिकः संपद्यते' इति सुदर्शनभाष्ये वचनात्। समारूढे त्वग्नौ तेनापि न कार्यम्, किंतु पुनराधानमेव; *समारोपप्रत्यवरोहयोराशौचापवादाभावादनन्यकर्तृकत्वाच्च। *अन्यथा पुनराधानमपि स्यात्। यत्त्वाश्वलायनः—

*तौ (२)चापि सूतके शावे पर्वणीष्टिं महापदि।
पुष्पवत्यां च भार्यायां न कुर्यात्तां कदाचन॥
*स्मार्ताग्निः सूतके शावे स्वयं न जुहुयाद्द्विजः।
श्रौताग्निस्तु सकृद्धुत्वा समाप्ते वा स्वयं हुनेत्॥ इति।

*तदपि *समारूढपरम्। *तदाह स एव-

स्मार्ताग्निरात्मनोऽन्येषामभावे सूतकादिषु।
समारोप्य तदन्तेषु विहृत्य जुहुयात्स्वयम्॥ इति।

तथाच मनुः-'प्रत्यूहेन्नाग्निषु क्रियाः' इति वैश्वदेवस्य

---

*समारोपेति। अग्निविच्छेदभयेन समारोपे यथा न तथा प्रत्यवरोहेऽपि नेत्यर्थः। *अन्यथा प्रत्यवरोहोपगमे आशौचाभावस्यानपेक्षणेनेति शेषः। *तौ श्रौतस्मार्ताग्नी। इष्टिमिति द्वितीयान्तम्। तथाच "दर्शं च पूर्णमासं च" इत्यनेन विरोधः। *स्मार्ताग्निरिति। तथाच होमाधिकारविधेः सूतकयोरिष्टौ न कार्ये, किन्तु तन्निवृत्त्यनन्तरं कार्ये नतु सर्वथा त्याज्ये इति प्रथमविरोधोद्धारं स्फुटत्वादनभिधाय द्वितीयविरोधं परिहरति-*तदपीति। *समारूढेति। सकृद्धुत्वेति न सूतकशेषहोमपरं नापि समाप्ते इति तत्र होमत्यागपरं किन्तु शेषहोमं दत्त्वा समारोपे सूतके समाप्ते प्रत्यवरुद्धत्वादित्यर्थः। *तदाहेति। स्मार्ताग्नेः समारोप-

---

(१) 'त्रिरात्रमहूयमाने' ग०। (२) 'तौ वापि' क० छ०।

त्व*ग्निसाध्यत्वेऽपि वचनान्निवृत्तिः।

विप्रो दशाहमासीत वैश्वदेवविवर्जितः।

इति संवर्तोक्तेः। यद्यपि—

पञ्चयज्ञविधानं तु न कुर्यान्मृतजन्मनोः।

इति तेनैवोक्तेः पूर्वनिषेधो व्यर्थस्तथाप्यापस्तम्बादीनां वैश्वदेवस्य पञ्चयज्ञाभिन्नत्वात्पृथङ्निषेधः। हरदत्तस्त्वाशौचेऽपि बह्वृचैर्वैश्वदेवः कार्यः, 'तस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः' इति ब्रह्मयज्ञस्यैवाशौचे विशिष्य निषेधात्।

*सन्ध्यादीनामप्यपवादमाहापरार्के पुलस्त्यः-

संन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्।
न त्यजेत्सूतके वापि त्यजन् गच्छेदधो द्विजः॥
सूतके मृतके चैव सन्ध्याकर्म समाचरेत्।
मनसोच्चारयेन्मन्त्रा*न्प्राणायाममृते द्विजः॥

यत्तु चन्द्रिकायां जाबालः—

सन्ध्या पञ्चमहायज्ञा नैत्यकं स्मृतिकर्म च।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया॥

इति। यच्च संवर्तः-

सूतके कर्मणां त्यागः संध्यादीनां विधीयते।

पक्षमाहेत्यर्थः। आत्मनः सूतकादिष्वित्यन्वयः। *अग्नीति। 'प्रत्यूहेन्नाग्निषु क्रियाः' इत्यनेनाग्निसाध्यानां कर्तव्यत्वोक्तेरिति भावः। *सन्ध्यादीनामिति। अग्निसाध्यनित्यनैमित्तिककर्मान्यतया निषेधप्राप्ताविति शेषः। *प्राणायाममिति। प्राणायामे मन्त्रस्य मानसत्वे पर्युदासः, मुखनासावसञ्चारिवाय्ववरोधेरूप तत्र तस्य सिद्धत्वात्। अतः मन्त्र एव सः। तथाचामन्त्रकः

यच्च विष्णुपुराणम्-

सर्वकालमुपास्ता तु संध्ययोः पार्थिवेष्यते ।
अन्यत्र सूतकाशौचविभ्रमातुरभीतितः ॥ इति,

तत्पूर्णसंध्यापरम्,

*अर्घ्यान्ता मानसी संध्या कुशवारिविवर्जिता ।

इति शुद्धिदीपे च्यवनोक्तेः । *पैठीनसिस्त्वर्घ्ये मन्त्रोच्चारणमाह—'सूतके सावित्र्याऽञ्जलिं प्रक्षिप्य*सूर्यं ध्यायन्नमस्कुर्यात्' । प्रयोगपारिजाते भारद्वाजोऽपि—

सूतके मृतके कुर्यात् प्राणायाममन्त्रकम् ।
तथा मार्जनमन्त्रांस्तु मनसोच्चार्य मार्जयेत् ॥
गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् ।
मार्जनं तु न वा कार्यमुपस्थानं नचैव हि ॥

ग्रहणे श्राद्धादावप्याशौचापवादमाह व्याघ्रः—

स्मार्तकर्मपरित्यागो *राहोरन्यत्र सूतके ॥ इति ।

प्राणायामः कार्य इत्यर्थः । *अर्घ्यान्ता इत्यतद्गुणसंविज्ञानबहुव्रीहिणा प्राणायामातिरिक्तं सर्वं मानसमन्त्रैः कार्यम् । तत्रापि अर्घ्यदाने मन्त्रोच्चारमुत्तरकर्मलोपं चाह-*पैठीनसिस्त्विति । पुलस्त्येन सावित्र्या मानसत्वोक्तेः पुनस्तद्ग्रहणमुच्चारणलाभाय । *सूर्यमिति उत्तरकर्मलोपार्थम् । सूतकादौ नित्यस्नानशौचाचमनबलिदानप्राणाहुतिमात्रग्रहणादयो भुजिनियमाः । अस्पृश्यस्य स्नानादि च सर्वं कार्यमिति स्मृत्यर्थसारः । नित्यस्नानं चाङ्गतर्पणसहितं कार्यम्,

अस्पृश्यस्पर्शने वान्ते अश्रुपाते क्षुरे भगे ।
स्नानं नैमित्तिकं कार्यं दैवपित्र्यविवर्जितम् ॥
उद्धृतैरुदकैः स्नायान्न कुर्याद्वस्त्रपीडनम् ॥

इति नैमित्तिकस्नान एव दैवपित्र्यतर्पणाद्यङ्गनिषेधात् । *राहोरिति । राहुदर्शननिमित्तककर्मत्यागो न कदापीत्यर्थमभिप्रे-

लैङ्गेऽपि—

*सूतके मृतके चैव न दोषो राहुदर्शने ।
तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥

प्रयोगपारिजाते बृहस्पतिः—

*कन्याविवाहे संक्रान्तौ सूतकं न कदाचन ।

वृद्धशातातपः—

यदा भोजनकाले तु अशुचिर्भवति द्विजः ।
भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुद्ध्यति ॥
भक्षयित्वा तु तं ग्रासमहोरात्रेण शुद्ध्यति ।
अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुद्ध्यति ॥ ✓

इदमविशेषात्(१)सूतकादिपरमपीति शुद्धितत्त्वे शूलपाणौ च ॥

अथ द्रव्यतः । मरीचिः—

लवणे *मधुमांसे च पुष्पमूलफलेषु च ।
शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च ॥
*तिलौषधाजिने चैव पक्वापक्वे स्वयंग्रहः ।

दम् । यथाश्रुतेऽप्याह—*सूतके इति । *कन्याविवाह इति । अथाऽऽर्यायाः कन्यायाः मूहूर्त्तान्तरालाभेनावश्यके विवाहे इत्यर्थः । एतादृशविषये—

अनारब्धविशुद्ध्यर्थं कूष्माण्डैर्जुहुयाद्घृतम् ।
गां दद्यात् पञ्चगव्याशी ततः शुद्ध्यति सूतकी ॥

इति पूर्वोक्तं विवाहप्रारम्भात् पूर्वं कूष्माण्डहोमादिकमावश्यकम् । *मधु क्षौद्रम् । *तिलेति तैलोपलक्षणम् । तथाच ब्राह्मम्—

लवणं मधुमांसं च पुष्पं मूलं फलानि च ।
काष्ठं लोष्ठं तथा पर्णं दधि क्षीरं घृतं तथा ॥

---

(१) 'सूतकादावपीति' क० ।

पण्येषु चैव सर्वेषु *नाशौचं मृतसूतके ॥

औषधं तैलमाजिनं शुष्कमन्नं च नित्यशः।
आशौचिनो हि तद् ग्राह्यं स्वयं पण्यं च मूलजम् ॥ इति।
मूलजम्। आकरजम्। *नाशौचमिति। नच चेतनेषु।
दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च।
प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तते ॥

इत्यादिषु दानाद्यनधिकारे आशौचस्य निमित्तत्वोक्तेर्निमित्तिर्निमित्तनोरभेदानुपपत्त्या जननादिजन्योऽतिशयविशेषस्तन्निमित्ततया स्वीकार्यः। द्रव्येषु त्वाशौचं नामातिशयो दुर्वचः मानाभावादिति वाच्यम्, तत्राशौचिस्वामिकृतस्य प्रतिग्रहाद्ययोग्यकृतस्यैव आशौचत्वात्। अत्र च 'स्वयङ्गृहः' इत्यादिकमेव मानम्। अशुचित्वेनानधिकारिणा विनियोजितत्वात् द्रव्येषु फलाजनकत्वमेवाशौचं नतु कर्मानर्हत्वं नाप्यतिशयविशेषः। तथा सति एकतरेण भ्रात्रा जननादौ ज्ञाते तस्याशौचित्वात्तत्स्वामिकद्रव्येणाज्ञातनिमित्तकेनाशौचिभ्रात्रन्तरेण कृतस्य कर्मणाऽशुचिद्रव्यकृतत्वाद्वैयर्थ्यं स्यात्। तस्माच्च ततः क्रीतद्रव्येणान्येषां कर्मासिद्धिः, क्रयस्याशौचनिवर्तकत्वाभावात्। अस्मन्मते तु द्रव्याणि शुचीन्येव, परं त्वनधिकारविनियोजिततया न फलमिति न विरोध इति, तत्तुच्छम्, अशुचिभ्रातृतः प्रतिगृहीतैरसिद्ध्यापत्तेः। प्रतिग्रहीत्रा विनियुक्तानां फलाजनकत्वे मानाभावात्। नवाऽशुचिनाऽनधिकारिणा कृतस्य दानस्य फलाजनकतया प्रतिग्रहीतुः स्वत्वं नोत्पद्यत इति वाच्यम्, अनधिकारिकृताच्छास्त्रीयस्य फलस्यानुत्पादेऽपि लौकिकस्य तस्यानुत्पादे मानाभावात् स्वत्वस्य लौकिकत्वात्। तस्य लौकिकत्वं च लिप्सासूत्रे स्फुटम्। किञ्च यदेकभ्रातुरसाधारणं द्रव्यं तत्र भ्रात्रन्तरस्य स्वत्वमेव नास्तीति कथमशुचित्वम्? साधारणं च तदनुमतिं विना न यथेष्टविनियोगार्हमिति कथं तस्य शुचित्वम्?

स्वयमेव स्वाम्यनुज्ञया ग्राह्यं *न तद्धस्तादित्यर्थः । *क्रये तु तद्धस्तादपि न दोषः । पक्वं लड्डुकादि । अपक्वं तण्डुलादि । *एतदन्नसत्रपरम् ।

अन्नसत्रे प्रवृत्तानामा*ममन्नमगर्हितम् ।
भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु व्रती भवेत् ॥

इत्यङ्गिरसोक्तेः । *पक्वान्नमोदनादि नतु भक्ष्यम् । षट्-

एवं क्रयस्याशौचानिवर्तकत्वमपि मन्दम्, तस्य स्वत्वापनयनद्वारा द्रव्याशुद्ध्यपनायकत्वात् (१)तस्या आशौचिस्वत्वप्रयुक्तत्वात् । तत्रैव द्रव्ये कालस्य चेतनाशुद्धिनिवर्तनद्वारा तन्निवर्तकत्ववत् । 'स्वयङ्ग्रहः' इत्यनेन स्वाम्यनुज्ञाया इव ग्रहणफलस्यादनदानयोश्च लाभः। "दद्यादिमानि स्वयमनुमननात्स्वामिनः" इति त्रिंशत्श्लोकीदर्शनात् । मृतसूतके इति स्वयङ्ग्रहविधौ कृत्रिमस्यापि ग्रहः । पण्याशौचनिषेधश्च कृत्रिमोपलक्षणम् । लवणादिनियमार्थं च मृतसूतकग्रहणम् । स्वयमेवेत्यतन्त्रम् । आशौचिहस्तान्न ग्राह्यमित्यत्र तात्पर्यमित्याह—*न तद्धस्तादिति । पण्येषु सर्वेष्वित्यत्र सर्वपदं क्रयार्थं प्रसारिततदन्योभयपरम् । तच्च लवणादिभिन्नमपि तत्स्वामिनो वणिज आशौचेऽपि नाक्रेयत्वम् । तथा सत्याह—*क्रये त्विति । एवञ्च पण्येषु न स्वयङ्ग्रहनियम इति भावः । *एतत् पक्वापक्वाभ्यनुज्ञानम् । *आममन्नमिति पक्वोपलक्षणं 'पक्वापक्वे' इत्युक्तेः । अत एव पक्वान्ने भक्ष्यं पर्युदस्यन्नाह—*पक्वान्नमित्यादि । अनाशौचिभिरन्नसत्रिणामोदनादिकमितरेषां भक्ष्यतण्डुलादिकमपि न ग्राह्यम्, अनुज्ञातभिन्नत्वात् । उभयत्र—

दशाहानि कुलस्यान्नमदोषं मनुरब्रवीत् ।

इति यमोक्तेश्च । कुलस्याशौचिकुलस्यान्नमनाशौचिभिर्न भुज्यते, तदेवान्नं कुलस्य सकुलस्यादोषं भोज्यमित्यर्थ इति नि-

---

(१) द्रव्याशुद्धेः ।

त्रिंशन्मते—

*उभाभ्यामपरिज्ञाते सूतकं नैव दोषकृत् ।
*एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् ॥
*विवाहोत्सवयज्ञेषु त्वन्तरा मृतसूतके ।
परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः ॥
*भुञ्जानेषु तु विप्रेषु त्वन्तरा मृतसूतके ।
अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः ॥

बृहस्पतिः—'विवाहोत्सव' इत्याद्युक्त्वा—

*पूर्वसङ्कल्पितान्नेषु न दोषः परिकीर्तितः ।

ष्कर्षः । एतन्निषेधे विशेषमाह—*उभाभ्यामिति । *एकेनापीति । भोक्त्राऽऽशौचनिमित्तेऽज्ञातेऽपि दात्रा ज्ञाते दातुराशौचत्वात्तत्स्वामिकान्नं निषिद्धम् । भोक्तुः प्रायश्चित्तं त्वल्पमज्ञानप्रवृत्तत्वात् । दात्राऽज्ञातेऽपि भोक्त्रा ज्ञाते तु तद्द्रव्यस्याशौचिस्वामिकत्वाभावेऽपि वचनात् निषिद्धमित्यर्थः । भोक्तुरिति च तन्मात्रेण ज्ञातेऽपि तस्य दोषं वक्तुं, नतु दातृमात्रेण ज्ञातस्य दाननिषेधातिक्रमनिमित्तदोषं निवर्तितुमपि, अर्थद्वयकरणे वाक्यभेदापत्तेः ।

अपि दातृगृहीत्रोस्तु सूतके मृतके तथा ।
अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कथञ्चन ॥
विज्ञाते भोक्तुरेव स्यात्प्रायश्चित्तादिकं क्रमात् ॥

इति ब्राह्ममपि भोक्तुः स्यादेवेत्यर्थम् । तत्र प्रायश्चित्तं पूर्वोक्तम् । आदिनाऽऽशौचं ग्राह्यम् । *विवाहेति । पृथक्कृतासिद्धान्नभोजने । *भुञ्जानेष्विति । विवाहादिष्वप्यपृथक्कृतान्नभोजनेऽन्यत्र ब्राह्मणभोजने च । अवशिष्टं चान्नं त्याज्यम् ।

भोजनार्थे तु संभुक्ते विप्रैर्दातुर्विपद्यते ।
यदि कश्चित्तदोच्छिष्टं शेषं त्यक्त्वा समाहिताः ।
आचम्य परकीयेन जलेन शुचयो द्विजाः ।

इति ब्राह्मात् । *पूर्वेति । आशौचसम्भावनया पूर्वमेव

षडशीतौ—

*संसर्गाद्यस्य वाशौचं यस्यातिक्रान्तकालता ।
तदीयस्य पदार्थस्य नाशौचं विद्यते क्वचित् ॥

शुद्धितत्त्वे—'शुद्ध्येत्' इत्यनुवृत्तौ विष्णुः—'प्रोक्षणेन च पुस्तकम्' इति ॥

अथ *मृतदोषे हेमाद्रौ षट्त्रिंशन्मते कौर्मे च—

व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः ।
विहितं तस्य नाशौचं नापि कार्योदकक्रिया ॥

*शवदर्शने यावदाशौचमस्त्येव,

हतानां नृपगोविप्रैरन्वक्षं चात्मघातिनाम् ।

ब्राह्मणार्थं पृथक्कृते सिद्धान्नमनुज्ञातव्यतिरिक्तमन्यच्च तत्रेत्यर्थः । *संसर्गादिति । निर्हाराद्याशौचेऽतिक्रान्ताशौचे च सर्वद्रव्ये नाशौचम् "आशौचं यस्य संसर्गात्" इति "अतिक्रान्ते दशाहे तु" इति वचनात् । परन्त्वाशौचिहस्तान्न ग्राह्यम् । आशौचिस्पृष्टनिषेधबाधे मानाभावात् । *मृतदोष इति । मृतदोषो द्विविधः—मरणाभिसन्धिना दर्पात् स्वानिष्टानादरणेन वा शास्त्राभ्यनुज्ञां विनाऽग्निजलादिना चण्डालादिभिर्वा मृतानां "सर्वत आत्मानं गोपायेत्" इति विधेः "न संशयमापद्येत तस्मादुह न पुरायुषः स्वः कामी प्रेयात्" इति निषेधस्य चातिक्रमणादेकः । पतितादीनां तत्तन्निषेधातिक्रमादपरः । मृतानां च तेषां तन्निमित्तकः तत्सपिण्डसोदकानां शिष्यदौहित्रादीनां च आशौचोर्ध्वदैहिकयोर्निषेधः । अन्यत्र तदपवादश्चोद्यते इत्यर्थः । तत्र सर्वत्र दशाहत्र्यहकालावच्छिन्नमेवाशौचं निषिद्धमित्याह—*शवेति । स्नानमात्रनिर्वर्त्यमित्यर्थः । नृपः अभिषिक्तः क्षत्रियादिः । गोपदं शृङ्गिदंष्ट्र्यादेः । विप्रपदं चण्डालादेश्चोपलक्षणम् । बुद्धिपूर्वं विषोद्बन्धनादिना आत्मानं व्यापादयन्ति ये ते आत्मघातिनः । आत्मघातिपदं "पाखण्ड्यना-

इति याज्ञवल्क्योक्तेः । शुद्धितत्त्वे कौर्मे—

सद्यःशौचं समाख्यातं शापादिमरणे तथा ।

आदिपदादभिचारहते । भविष्ये—

*स्वेच्छया मरणं विप्राच्छृङ्गिदंष्ट्रिसरीसृपैः ।

श्रिताः स्तेनाः” इत्येकयोगनिर्दिष्टपतिताद्युपलक्षणम् । आत्मघात्याद्याशौचनिषेधमाह याज्ञवल्क्यः—

पाखण्ड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः ।
सुराप्य आत्मघातिन्यो नाशौचोदकभाजनाः ॥ इति ।

अस्यार्थः–पाखण्डा नरशिरःकपालादिश्रुतिस्मृतिबाह्यलिङ्गतद्धारिणः । भर्तृघ्न्यः अब्राह्मण्यादिपरिणेतृघातिन्यः । कामगाः स्वापेक्षया जात्या हीनपुंगन्त्र्यः कुलटाः । आदिपदाद्गर्भसुतदुहितॄणामब्राह्मणानामपि विप्राणां च घातिन्यः ग्राह्याः । शिष्यगा गुरुगाश्चेह ग्राह्याः ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता तु या ॥

इति स्मृतेः । स्वस्य निषिद्धा यासां पेयास्ताः सुराप्यः । सुराप्य इति लिङ्गग्रहैकत्ववत् “न ब्राह्मणः सुरां पिबेत्” इत्यादिनिषेधेष्विवाविवक्षितमपि तादृश्याः शूद्रा अपि द्विजातिभार्यायाः सङ्ग्रहस्य द्योतनेन सार्थकम् । अत एव—

पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।

इति स्मृतौ भार्या शूद्रापीति व्याख्यातं विज्ञानेश्वरादिभिः । आत्मत्यागिन्यश्चोक्ता इति । *स्वेच्छयेति । स्वस्यैव विधिप्रयोज्या या इच्छा जलतद्गाम्भीर्यादि ज्वलनतत्तैक्ष्ण्यादि यथायथं ज्ञात्वा तत्र स्वव्यापादने इष्टसाधनताभ्रमेण तत्प्रवृत्तिहेतुः । अनेनाहमात्मानं व्यापादयामीति तात्त्विको भीषणमात्रार्थमतात्त्विको वाऽभिलाषः तत्पूर्वकं मरणम् । विषोद्बन्धनताडनान्त्यान्त्यजवि-

*अन्त्यान्त्यजवि(१)षोद्बन्धैरात्मना चैव ताडनैः ॥
पाखण्डमाश्रिताश्चैव *महापातकिनस्तथा ।
स्त्रियश्च व्यभिचारिण्य आरूढपतितास्तथा ॥
न *तेषां स्नानसंस्कारो न श्राद्धं न सपिण्डनम् ॥

शादिना हननं धरणादिसामर्थ्यगर्वेण अयं मां मारयत्विति बुद्धिविरहेऽपि पाक्षिकमप्यनिष्टमनादृत्य तद्धननग्रहणादौ प्रवृत्तानां तैर्मरणे इत्यन्वयः । *अन्त्याः पूर्वोक्ता अन्त्यावसायिनः । अन्त्यजाश्चाण्डालादयः । एतच्चण्डालादुदकादित्याद्यग्रिमं च बुद्धिपूर्वके एव "प्रायोनाशकशस्त्राग्नि" इत्युत्तरगौतमवाक्ये 'इच्छताम्' इत्युक्तेरेकवाक्यतानुरोधेनोदके तदन्वये तत्साहचर्याच्चण्डालादावपि तदन्वयात् । एतेन—

राजभिर्निहतानां च शृङ्गिदंष्ट्रिसरीसृपैः ।
आत्मनस्त्यागिनां चैव श्राद्धमेषां न कल्पयेत् ॥

इति वचने आत्मत्यागिनां पृथगुक्तेश्चण्डालादित्याद्यविशेषोक्तेश्च जलपश्वादिभिः प्रमादमृतेऽप्याशौचं नेति शङ्क्यम् । *महापातकिन इति । ते च—

ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः ।
एते महापातकिनो यश्च तैः सह संवसेत् ॥
एभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्समः ॥

इति योगीश्वरेणोक्ताः । एवम् "अतिपातकिनोऽनुपातकिनश्च मातृपितृयोनिसम्बन्धसागनास्तिकनिन्दितकर्माभ्यासिपतितात्याज्यपतितत्यागिनः पतिताः पातकसंयोजकाश्च" इति गौतमसूत्रोक्ताश्च द्रष्टव्याः । येषु निषेधमतिक्राम्यत्सु पापततिः पत्यते ते पतिताः सर्वे इह मिताक्षरादिग्रथान् पर्यालोच्य गणनीयाः । मया गौरवभयात्तु न लिख्यन्ते । *तेषां स्नानसंस्कारा-

---

(१) 'द्विषोद्बन्धै' क० छ० ।

गौतमः—'*प्रायोऽनाशकशस्त्राग्निविषोदको(१)द्बन्धनप्रपतनैश्चेच्छताम्' इति। नाशौचमिति शेषः। अङ्गिराः-

*चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥
उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते ।
नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥

षट्त्रिंशन्मतेऽप्येवम् । ब्राह्मेऽपि--

शृङ्गिदंष्ट्रिनखिव्यालविषवह्निक्रियाजलैः ।

व्यालो गजः ।

*सुदूरात्परिहर्तव्यः कुर्वन्क्रीडां मृतस्तु यः ।
नागानां विप्रियं कुर्वन्हतश्चाप्यथ विद्युता ॥
नि(२)गृहीतः *स्वयं राज्ञा *चौर्यदोषेण कुत्रचित् ।

विति केवलशवस्नपनदोषार्थम्। *प्राय इति । प्रायो महाप्रस्थानम्। अनाशकम् अनशनम् । प्रपतनं गिरिशिखरादेरवपातः। *चण्डालादिति । अत्र पापकर्मणां येषां चण्डालादिभिर्मरणमिति नार्थः । श्वादिपदवज्जन्मान्तरीयपापानुमानेऽपि निषेधे विशेषानाधायकतया तद्वैयर्थ्यात्, किन्तु येषां चण्डालादिभिर्मरणं तेषां पापकर्मणामिति। तेन चण्डालादिहेतुकमरणं पापहेतुः। पापं च निषेधातिक्रमः। निषेधास्तु पुरुषव्यापारगोचरः। नच प्रमादमृते सोऽस्तीत्यतोऽस्य प्रमादमरणं न विषयः। शृङ्गिणः गवादयः अश्वाश्वतरादयः। नखिनो व्याघ्रादयः। दंष्ट्रिणः नक्रादयः सर्वतिर्यञ्चो बोध्याः। क्रिया दिव्यं कार्मणमभिचारप्रत्यभिचारादि। *सुदूरात् 'सुतूद्दा' इति पाठः। नागाः सर्पाः। विप्रियं ग्रहणादि। *स्वयमिति। राजादेः शक्यार्थज्ञातिक्रमपरम् । *चौर्येति। साहसादेरुपलक्षणम्। तथाच राज्ञा धनस्वाम्यादिभिर्वा हत इत्य-

---

(१) 'उद्बन्धनं गलपाशादि' ग० : (२) 'निगृहीताश्च ये' क० छ० ।

परदारान् *हरन्तश्च द्वे(१)षात्तत्पतिभिर्हताः ॥
असमानैश्च संकीर्णैश्चण्डालाद्यैश्च विग्रहम्।
कृत्वा तैर्निहतास्तद्वच्चण्डालादीन्समाश्रिताः ॥
शस्त्राग्निगरदाश्चैव पाखण्डाः *क्रूरबुद्धयः।
*क्रोधात्प्रायं*विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥
गिरिवृक्षप्रपातं च ये कुर्वन्ति नराधमाः।
*कुशिल्पजीविनो ये च *सूनालंकारधारिणः ॥
*मुखेभगास्तु ये केचित् क्लीबप्राया नपुंसकाः।
*ब्रह्मदण्डहता ये च ये चापि ब्राह्मणैर्हताः।
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ॥

र्थः। *हरन्तः रमन्त इति वा पाठः। रमयन्त इत्यर्थः। *क्रूरबुद्धय इति। अत्र कान्तारशीर्णनौकाद्यारोहकूपाद्यवरोहादयः सर्वे दर्पोपहतमृतिहेतवो बोध्याः। *क्रोधादिति। शोकादरुपलक्षणम्। *विषमिति। पूर्वं मरणाभिसंध्यभावेऽपि विषादिभक्षणे इदानीं तु तदभिसन्धिना तत्रेति न पौनरुक्त्यम्। *कुशिल्पम्। आपद्यपि निषिद्धचर्मकारादिशिल्पम्। *सूनेति। सूना प्राणिवधस्थानं तदलंकारः तदुपकरणं शस्त्रादि तद्धारिणस्तत्रानर्हास्तत्राधिकृता इत्यर्थः। *मुखेभगाः अयोनौ रेतः सेकिनः। क्लीबेषु नपुंसकेषु च पतित्वोक्तिः मरणोत्तरकालीनौर्ध्वदेहिकदेवतात्वायोग्यतया। तेन तयोर्द्विजातिकर्मण्यपादकपापवत्त्वाभावेऽपि न क्षतिः। *ब्रह्मदण्डहताः। उत्पादितक्रोधजनितशापादिहताः। महापातकिपदं पूर्ववत्। गौतमोक्तानामतिपातक्यादीनां "चतस्रस्तु परित्याज्याः" इत्युक्तानां पतितानामनाश्रितानां चोपलक्षणम्। एवम्—

वृथासंकरजातानां प्रव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया ॥

---

(१) 'द्वेषात्तु पति' ग०।

पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः ।
न चाश्रुपातः पिण्डो वा कार्यं श्राद्धादिकं क्वचित् ॥
*एतानि पतितानां तु यः करोति विमोहितः ।
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥

एतद्बुद्धिपूर्वं *सर्वेषां करणे तु माधवीये वसिष्ठः—

य आत्मत्यागिनां कुर्यात्स्नेहात्प्रेतक्रियां द्विजः ।
*स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम् ॥

अज्ञाने तु—

कृत्वाग्निमुदकं *स्नानं संस्पर्शं वहनं कथाम् ।

पाखण्डमाश्रितानां च चरन्तीनां च कामतः ।
गर्भभर्तृद्रुहां चैव सुरापीणां च योषिताम् ॥

इति मनुवचने वृथाजाता अनाश्रमिणः दम्पत्यादिसाध्यकर्मानधिकारात् । संकरजाता भिन्नवर्णस्त्रीपुरुषजाताः प्रतिलोमजाः । तेषामेवातिनिन्दितत्वात् । प्रव्रज्यासु तिष्ठतां सन्यासिनां हंसपरमहंसैकदण्डत्रिदण्डादिभेदेन बहुत्वम् । यत्तु निन्दितसाहचर्यसम्पादनलोभेन वृथाशब्दान्वयेन कापालिकदिगम्बरादीनां वृथाप्रव्रज्यानां ग्रहणमिति । तन्न, तेषां पाखण्डमाश्रिता इत्यनेन पौनरुक्त्यात् । आत्मत्यागिनः अशास्त्रीयात्मत्यागिनः । अकृतनिष्कृतीनां चैतेषां पाखण्ड्यादीनां दाहादिकरणे त्वाह—*एतानीति । विमोहित इति णिच् । स्नेहाद्यभिप्रायो नतु विषयाज्ञानाभिप्रायः । *सर्वेषामिति । अकृतनिष्कृतीनां चैतेषां पाखण्डयादीनां दाहादिकरणे आशौचमपि कार्यम् ।

नाशौचं नोदकं नाश्रु न दाहाद्यन्तकर्म च ।
ब्रह्मदण्डहतानां च न कुर्यात्कटधारणम् ॥

इति यमेन निषिद्धस्याप्याशौचस्य दाहादिवत् प्राप्तेः । *स तप्तकृच्छ्रेति । तप्तकृच्छ्राभ्यां सहितमिति विगृह्य तप्तकृच्छ्रद्वययुक्तं चान्द्रायणमिति शम्भुभट्टेन व्याख्यातम् । *स्नानं शव-

रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यति ॥

इति ज्ञेयम् । प्रत्येकं बुद्धिपूर्वे एतदिति मदनपारिजातः । *प्रत्येकं तु स्पर्शाश्रुणोर्मिताक्षरायाम्—

तच्छवं केवलं स्पृष्टमश्रु वा पतितं यदि ।
पूर्वोक्तानामकारी चेदेकरात्रमभोजनम् ॥

स्नपनम् । रज्जुच्छेदः काचित्कः । अश्रुपातं चेति चकारादिदमपि सर्वेषां दाहादिकरणे । तप्तकृच्छ्रश्च द्वादशाहसाध्यः ।

तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः ।

इति मनूक्तः । क्षीरादिपरिमाणं च पराशरेणोक्तम्—

अपां पिबेत्तु त्रिपलं द्विपलं तु पयः पिबेत् ।
पलमेकं पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतम् ॥ इति ।

त्रिरात्रमात्मपूरणे उष्णोदकबाष्पं पिबेदित्यर्थः । न तु—

तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् ।
एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः ॥

इत्युक्तः दुग्धसर्पिर्जलानां तप्तानामेकैकं प्रत्यहं पीत्वा एकाहोपवासरूपो दिवसचतुष्टयसाध्यः, किञ्चिन्न्यूनचतुरुपवासात्मकस्य तस्य न दाहाद्यष्टकपापनिवर्तकत्वसम्भवः प्रत्येकं दाहादिकरणे उपवासोक्तेस्तदष्टकस्यौचित्येन ततोऽतिन्यूनत्वात् ।*प्रत्येकामिति । "तच्छवं केवलं स्पृष्टमश्रु वा" इत्युत्तरवाक्ये स्पर्शाश्रुपदयोरुपलक्षणतयाऽज्ञानादेतेष्वेकैककरणे उपवासः, मत्याऽभ्यासे कृच्छ्रातिकृच्छ्रचान्द्राणि योग्यतया कुर्यादित्यन्तेष्टिः । बुद्धिपूर्वं दाहादिगुरुकरणे त्रिरात्रोपवासस्यानौचित्यात्स्पर्शाश्रुभिन्नस्य प्रत्येकं तथाकरणे एतत्कार्यं, परन्तु तप्तकृच्छ्रं पूर्वोक्तं चतुरहसाध्यं, नतु मनूक्तमित्यन्ये । तत्रापि काष्ठाद्यन्तरितस्पर्श एवोपवासः साक्षात् स्पर्शे तु तप्तकृच्छ्रमेवेत्यपरे । प्रतिपदोक्त-

एकरात्रं तु नाश्नीयात्त्रिरात्रं बुद्धिपूर्वकम् ॥

इति माधवीये उत्तरार्धम् । अन्येषु तु संवर्तः—

एषामन्यतमं प्रेतं यो वहेत दहेत वा ।
*कटोदकक्रियां कृत्वा कृच्छ्रं सान्तपनं चरेत् ॥

अज्ञाने त्व*र्धम् । एतदनाहिताग्नेः । आहिताग्नेः कृच्छ्र एवेति माधवः । मिताक्षरायाम्—

*आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि तथा*गङ्गातोये संस्थापनं हितम् ।

आहिताग्नेस्तु विशेषो हेमाद्रौ भविष्ये—

*वैतानं प्रक्षिपेदप्सु *आवसथ्यं चतुष्पथे ।

निष्कृतेरभिधानीयतया एतत् लापनं किमर्थमित्यस्वरसः । अन्ये तु स्पर्शाश्रुपाताभिन्नेषु दाहादिषु प्रत्येकं बुद्धिपूर्वे । *कटः शववहनसाधनं खट्वादिः । सान्तपनं च—

गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकम् ।
एकैकं प्रत्यहं पीत्वा एकरात्रमभोजनम् ॥

इति जाबालोक्तं सप्ताहसाध्यं द्रष्टव्यम् । *अर्धमिति । वस्तुतस्तु "अबुद्धिपूर्वं बन्धने छेदने दहने वा मासं भैक्षाहारस्त्रिषवणं च" इति सुमन्तूक्तं बोध्यम् । तत्त्रयमपि वाशब्दश्रवणात् प्रत्येकविषयम् । अत्र सर्वत्रापि दक्षिणादिरूपप्रत्याम्नायो वा कार्यमिति शिष्टाः । तेषां मरणानन्तरं दाहाद्यकरणे किं कार्यमित्यपेक्षायामाह—*आत्मन इति । *गङ्गेति । सम्भवाभिप्रायम् । एवञ्च तेषां वत्सरान्तादौ पर्णशरदाहः । अत्र प्रतिपत्त्यन्तरं वक्ष्यति गृह्यपारिशिष्टे तु "दग्ध्वा शरीरं प्रेतस्य" इत्यादिना । ननु "आहिताग्निमाग्निभिर्दहन्ति यज्ञपात्रैश्च" इति श्रुतिविहितदाहाभावे तोये स्थापनरूपा यजमानप्रतिपत्तिः, तत्रापि पात्राणां किं कार्यं तत्राह—*वैतानामिति । *आवसथ्यं

पात्राणि तु देहदग्नौ *साग्निके पापकर्मणि ॥

छन्दोगपरिशिष्टेऽपि—

महापातकसंयुक्तो दौरात्म्यादग्निमान्यदि ।
पुत्रादिः पालयेदग्नीन्युक्त आदोषसंक्षयात् ॥
प्रायश्चित्तं न कुर्याद्यः *कुर्वन्वा म्रियते यदि ।
*गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदम् ॥
पात्राणि दद्याद्विप्राय दहेदप्स्वेव वा क्षिपेत् ॥

माधवीये पराशरः—

*आहिताग्निर्मृतो विप्रश्चण्डालेना*त्मघातकः ।
दहेत ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्जितम् ॥
*प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात् ।
दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण क्षालयेत्ततः ॥
स्वेनाग्निना स्वमन्त्रेण पृथगेनं पुनर्दहेत् ॥

हेमाद्रौ तु--

दाहयित्वा शवं तेषां *शूद्रैरविधिपूर्वकम् ।

इत्युक्तम् । *एतद्दर्पादिना मरणे ज्ञेयम् ।

स्मार्त्ताग्निम् । *साग्निके पापकर्मणीति । आहिताग्नौ स्मार्ताग्नौ चात्मघातके इत्यर्थः । "यजमाने वृथा मृते" इति पाठे वृथा अविहितमार्गेणेत्यर्थः । आत्मघातके इति यावत् । *कुर्वन्वेति । प्रधानोपक्रमात् प्रागित्यर्थः, उपक्रान्तप्रधानस्य शुद्धत्वात् । *गृह्यमिति । चतुष्पथे इति शेषः । आहिताग्नेरपि तोये संस्थापनमुक्तम् । प्रतिपत्त्यन्तरमाह—*आहिताग्निरिति । चण्डालेनेत्युपलक्षणम् । *आत्मघातक इति । उद्बन्धनादिनेत्यादि । पतिते तु प्रकारं वक्ष्यति । *प्राजापत्यमिति । शक्तेन तु चान्द्रायणद्वयं कार्यम् । अन्यथा "पुत्रैश्चान्द्रायणत्रयम्" इत्यग्रिमेण विरोधात् । *शूद्रैः वर्णैः, नतु संकरैः । इदं च विप्रालाभे द्रष्टव्यम् । *एतदिति । चण्डालेन मृत इति

तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ।

इति श्रुतावात्महनने एव दोषोक्तेः । प्रमादमरणे त्वाशौचादि सर्वं भवत्येव । तदाहाङ्गिराः—

अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः ।
तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया ॥

ब्राह्मेऽपि—

प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः ।
शृङ्गिदंष्ट्रिनखिव्यालविषविद्युज्जलादिभिः ॥
चण्डालैरथ वा चोरैर्निहतो वापि कुत्रचित् ।
तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः ॥ इति ।

प्रमादमरणे त्रिरात्रमाशौचमिति *गौडाः शुद्धितत्त्वादयः । *दशाहादीति दाक्षिणात्याः । अस्यापवादो हेमाद्रौ भविष्ये—

प्रमादादिच्छया वापि न कुर्यात्सर्पतो मृते ।

नागपूजां विना न कुर्यादित्यर्थः । बौधायनोऽपि—

बुद्धिपूर्वात्महन्तॄणां क्रियालोपो विधीयते ।

क्रियाऽन्त्यकर्म ।

तत्र दुर्मरणनिमित्तं दानादि कार्यम् । तच्च विश्वप्रकाशादौ शातातपीये च—

व्याघ्रेण निहते *विप्रे विप्रकन्यां विवाहयेत् ।
सर्पदष्टे नागबलिर्देयः सर्पश्च काञ्चनः ।
चतुर्निष्कमितं हैमं गजं दद्याद्गजैर्हते ।

आत्मघातक इति चेत्यर्थः । *गौडादीति । मानाभावोऽत्रास्वरसः । *दशाहादीति । बुद्धिपूर्वके निषिद्धस्यैव प्रामादिके प्राप्ते पालाशदाहे तु वक्ष्यति । *विप्रे इति अतन्त्रम्, एतत्सकलस्य सर्ववर्णसाधारण्यात् । सजातीया वा कन्या बोध्या । एतत्सर्वं

राज्ञा विनिहते दद्यात्पुरुषं तं हिरण्मयम् ॥
चौरेण निहते धेनुं वैरिणा निहते वृषम् ।
वृषेण निहते दद्याद्यथाशक्त्या तु काञ्चनम् ।
शय्यामृते प्रदातव्या शय्या तूलीसमन्विता ।
निष्कमात्रसुवर्णस्य विष्णुना समाधिष्ठिता ॥
शौचहीने मृते चैव द्वि(१)निष्कं स्वर्णजं हरिम् ।
*संस्कारहीने च मृते कुमारमुपनाययेत् ॥
निष्कत्रयं स्वर्णमितं दद्यादश्वं हयाहते ।
शुना हते क्षेत्रपालं स्थापयेन्निजशक्तितः ॥
सूकरेण हते दद्यान्माहिषं दक्षिणान्वितम् ।
कृमिभिश्च मृते दद्याद्गोधूमान्पञ्च*खारिकाः ॥
वृक्षं वृक्षहते दद्यात्सौवर्णं वस्त्रसंयुतम् ।
शृङ्गिणा निहते दद्याद्वृषभं वस्त्रसंयुतम् ॥
शकटेन हते दद्याद् द्रव्यं सोपस्करान्वितम् ।
भृगुपातमृते चैव प्रदद्याद्धान्यपर्वतम् ।
अग्निना निहते कार्यमुदपानं स्वशक्तितः ।
दारुणा निहते चैव कर्तव्या सदने सभा ॥
शस्त्रेण निहते दद्यान्महिषीं दक्षिणान्विताम् ।
अश्मना निहते दद्यात्सवत्सां गां पयस्विनीम् ॥
वृषेण च मृते दद्यान्मेदिनीं हेमनिर्मिताम् ।
उद्बन्धनेन च मृते कपिं कनकनिर्मितम् ॥

स्त्रीदुर्मरणेऽपि योज्यम् । *संस्कारहीने इति । अष्टमवर्षादिरूपमुख्यकाले इत्यादि । संस्कारः पुंस उपनयनं स्त्रिया विवाहः, शूद्रस्य षोडशाब्दोर्ध्वं वस्त्रद्वयं च । अयं च दशाब्दान्तादिगौणकालात्यये तु पतितो बोध्यः । *खारी धान्यप्रमाणभेदः ।

---

(१) 'निष्कं च स्वर्णजं' क० ।

मृते जलेन वरुणं हैमं दद्याद् द्विनिष्कजम् ।
विषूचिकामृते स्वादु भोजयेच्च शतं द्विजान् ॥
घृतधेनुः प्रदातव्या (१)कण्ठान्तकवले मृते ।
कासरोगेण च मृते अष्टकृच्छ्रं व्रतं चरेत् ॥
अतिसारमृते लक्षं गायत्र्याः प्रयतो जपेत् ।
शाकिन्यादिग्रहग्रस्ते जपेद्रुद्रं यथोदितम् ॥
विद्युत्पातेन निहते *विद्यादानं समाचरेत् ।
अन्तरिक्षमृते कार्यं वेदपारायणं तथा ॥
सच्छास्त्रपुस्तकं दद्यादस्पृश्यस्पर्शतो मृते ।
पतिते च मृते कुर्यात्प्राजापत्यांस्तु षोडश ॥
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ।
एवं कृते विधाने तु विदध्यादौर्ध्वदैहिकम् ॥

तथा *वैधमरणेऽपि न दोषः । तदाहतुर्मनु(२)वृद्धगार्ग्यौ—

*वृद्धः *शौचस्मृतेर्लुप्तप्रत्याख्याताभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य *त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं(३)कृत्वा चतुर्थे श्राद्धमाचरेत् ॥ इति ।

हेमाद्रौ विष्णुधर्मेऽपि— ।

---

*विद्यादानं शास्त्राध्यापनम् । पतितेचेति विशेषतः पातित्याज्ञाने । *वैधेति । अभ्यनुज्ञाविधिबोध्येत्यर्थः । एतच्च सद्यः शौचोदकदानाभावाववैधात्मघाते एवेति सूचयति । *वृद्ध इति । आसन्नमृतिकाल इत्यर्थः । "यो जीवितुं न शक्नोति" इत्यभिधानात् । *शौचेति । वातजराद्यावेशेन शौचाचमनाद्यावश्यककर्मानुष्ठानासमर्थ इत्यर्थः । *त्रिरात्रमिति सामान्यत आशौचनिषेधो न प्र-

---

(१) 'कण्ठान्नकवले' ग० । (२) 'वृद्ध' नास्ति क० ।
(३) 'दत्त्वा' क० ।

नरस्तु व्याधिरहितो न त्यजेदात्मनस्तनुम् ।
असुर्या नाम ते लोका अन्धेन तमसा वृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये केचात्महनो जनाः ।
अरिष्टैरात्मनो ज्ञात्वा मृत्युकालमुपस्थितम् ॥
व्याधितो भिषजा त्यक्तः पूर्णे (१)त्वायुषि चात्मनः ।
यथा युगानुसारेण संत्यजेदात्मनस्तनुम् ॥
तस्मिन्काले तनुत्यागाद्यथेष्टं फलमाप्नुयात् ।
आयुषस्तु पुरा दृष्टं मरणं ब्राह्मणस्य च ॥

नेति गौडानामपपाठः, उत्तरार्धे असङ्गतेः ।

क्षत्रियस्य तु सङ्ग्रामे मृते भर्तरि योषितः ।

अपरार्के ब्रह्मगर्गः—

यो जीवितुं न शक्नोति महाव्याध्युपपीडितः ।
सोऽग्न्युदकं महायात्रां (२)कुर्वन्नत्र न दुष्यति ॥

*अत्रोक्तवक्ष्यमाणवचोनिचयात्प्रयागातिरिक्तेऽचिकित्स्यरोगाद्युपहतानामधिकारः । *सोऽपि जीर्णवानप्रस्थस्यैवेति विज्ञानेश्वरदेवयाज्ञिकादयः । अतएव मिताक्षरादौ *भृगुपातानशनादिकं वानप्रस्थस्यैवोक्तम् ।

वर्तत इति भावः । *अत्रेति । अपिना वातजराद्याविष्टसमुच्चयः । अत्र प्रयागे वातजराद्याविष्टानामचिकित्स्यकुष्टक्षयादिमहाव्याधिग्रस्तानां च बुद्धिपूर्वकमरणाभ्यनुज्ञानात्तत्र प्रायश्चित्तनारायणबली न कार्यं । विज्ञानेश्वरमतमाह—*सोऽपीति। *भृग्विति । आदिनाऽग्न्यम्बुप्रवेशमहाप्रस्थानपरिग्रहः । "वानप्रस्थो वीराध्वानं ज्वलनाम्बुप्रवेशनं भृगुपतनं वाऽनुतिष्ठेत्" इति स्मरणम् ।

वायुभक्षः प्रागुदीचीं गच्छेदावर्ष्मसङ्क्षयात् ।

इति योगीश्वरस्मरणं च तत्र मानम् । सकलानुष्ठानासमर्थं

---

(१) 'चायुषि' क० ।   (२) 'कुर्वन्वा न प्रदुष्यति' क० छ० ।

*मनुरपि—

आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम् ।
वीतशोकभयो विप्रो ब्रह्मभूयाय कल्पते ॥ इति ।

तेना*न्यत्रापि तद्विषयतैव *मूलैक्यादिति केचित् । तन्न, वानप्रस्थमरणे आशौचनिषेधात् । तेन *गृहस्थादिपरमेवेदम् । तेन *यतेर्नाधिकारः । काम्येऽनधिकाराच्च । *नैमित्तिकत्वे त्वकरणे दोषो नित्यता च स्यात् । प्रयागे त्वरोगिणां रोगिणां च । यत्तु—

शूद्राश्च क्षत्रिया वैश्या अन्त्यजाश्च तथाधमाः ।
एते त्यजेयुः प्राणान्वै वर्जयित्वा द्विजं नृप ॥
पतित्वा ब्राह्मणस्तत्र ब्रह्महा चात्महा भवेत् ॥ इति,

तन्निर्मूलमिति भट्टाः । तत्त्वं तु हेमाद्रौ व्रतकाण्डेऽलिखनान्निर्मूलत्वं चिन्त्यमेव । प्रक्रमात्तु पतित्वेति भृगुपातमात्रपरं युक्तम् । ब्राह्मणस्याप्यनुज्ञातमिति वक्ष्यमाणविरोधाच्च । यत्त्वादित्यपुराणे—

अब्राह्मणो वा स्वर्गादिमहाफलजिगीषया ।

प्रत्याह–*मनुरपीति । तद्व्रतादिकया जीर्णता लाभः । 'ब्रह्मलोके महीयते' इति पाठः । ब्रह्मलोकः स्थानविशेषः, नतु नित्यं ब्रह्म, तत्र लोकपदाप्रयोगात् संन्यासमन्तरेण युक्त्यनङ्गीकाराच्च । 'ब्रह्मभूयाय कल्पते' इति पाठेऽप्ययमेवार्थः । *अन्यत्रापि वक्ष्यमाणमहाप्रस्थानादावपि । तद्विषयतैवेत्येवकारेण वानप्रस्थान्यजीवनाशक्तव्यक्तच्छेदः । *मूलैक्यादिति । नराणामथ नारीणामित्यादिकं तु यत्र सर्वप्राणिनामाधिकारस्तत्र वानप्रस्थानामित्यत्र किं वक्तव्यमिति रीत्या स्तावकमित्यभिमानः । *गृहस्थादीति । आदिना स्त्रीशूद्रादिग्रहः । *यतेरिति । तन्मरणे आशौचाभावात् । ननु वृद्धादिमरणस्य मनूक्तार्थवादिकफलमस्तु मा वा, आशौचलोपादिनिमित्तकत्वं तु दुर्वारमित्यत आह·

प्रविशेज्ज्वलनं तोयं करोत्यनशनं तथा ॥ इति, तत्प्रयागातिरिक्तपरमिति केचित् । हेमाद्रौ त्वेतदग्रे 'प्रयागवटशाखाग्रात्' इत्युक्तेर्ब्राह्मणस्य प्रयागेऽपि नेति *प्रतीयते ।

माधवीयेऽपरार्के चादित्यपुराणे —

दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि ।
प्रविशेज्ज्वलनं दीप्तं करोत्यनशनं तथा ॥
अगाधतोयराशिं च भृगोः पतनमेव च ।
गच्छेन्महापथं वापि तुषारगिरिमादरात् ॥
*प्रयागवटशाखाग्राद्देहत्यागं करोति च ।
स्वयं देहविनाशस्य काले प्राप्ते महामतिः ।
*उत्तमान् प्राप्नुयाल्लोकानात्मघाती भवेत्क्वचित् ।
*महा(२)पापक्षया*त्स्वर्गं दिव्यान्भोगात्समश्नुते ॥
एतेषामधिकारस्तु सर्वेषां सर्वजन्तुषु ।
नराणामथ नारीणां सर्ववर्णेषु *सर्वदा ॥
ईदृशं मरणं येषां जीवतां कुत्रचिद्भवेत् ।
आशौचं स्यात्त्र्यहं तेषां *वज्रानलहते तथा ॥

*नैमित्तिकत्वेति । *प्रतीयते इति । अनेन स्वर्गादीत्यस्यापि सम्बन्धात्काम्यं प्रयागमरणं ब्राह्मणभिन्नस्यैवेति लभ्यते । तच्चानिष्टं । कामनाया असत्त्वे इव रोगिणामिव प्रायश्चित्तार्थतयैव च काम्यस्यापि युक्तत्वात् । तस्मादत्राब्राह्मण इत्यादेर्न सम्बन्ध इति सूचितम् । *प्रयागेति । अभ्यनुज्ञाविधिः । *उत्तमानिति काम्यविधिः । *महापापक्षयादिति प्रायश्चित्तार्थे नैमित्तिकविधिः । तत्र महापापवशेन नष्टप्रत्यापत्तिमाह—*स्वर्गे इति । 'सर्वेषाम्' इति वा पाठः । *सर्वदेति । रोग्यरोगिलम्भकम् । *वज्रानलहते इति । एतच्च वृद्धादीनामेव तादृशमरण-

---

(३) इदमर्धं नास्ति क०छ० ।

वाराणस्यां म्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः ।
काष्ठपाषाणमध्यस्थो जाह्नवीजलमध्यगः ॥
अविमुक्तोन्मुखस्तस्य कर्णमूलगतो हरः ।
प्रणवं तारकं ब्रूते नान्यथा कुत्रचित्क्वचित् ॥

हेमाद्रौ चैवम् । अत्र *प्राप्तकाले इत्युक्तेरप्राप्तमरणकालायाः स्त्रिया अन्वारोहणे सम्पूर्णमेवाशौचम् । पृथ्वीचन्द्रस्त्वत्रापि त्र्यहमाह । शुद्धितत्त्वादिगौडग्रन्थेष्वप्येवम् । ✓

एतच्च वृद्धादिमरणं कलौ निषिद्धम् ।

भृग्वग्निपतनैश्चैव वृद्धादिमरणे तथा ।

इति माधवेन पृथ्वीचन्द्रेण च कलिवर्ज्येषूक्तेः । नचात्र यावदुक्तनिषेधः *विशिष्टोद्देशे *वाक्यभेदात् । नच कलौ वानप्रस्थाश्रमनिषेधादेव सिद्धेर्मरणनिषेधोऽपर्थ इति वाच्यम्, सर्ववर्णेष्वित्यादिभिस्तद्भिन्नस्यापि प्राप्तेः । *काम्यं भवत्येव 'ये वै तन्वं १ विसृजन्ति' इति श्रुतेः *स्मृत्या सङ्कोचायोगात् । नचेयं स्वाभा-

---

प्रकारविधानपूर्वकं त्र्यहाशौचं विधत्ते, दर्पादिना प्रमादेन वा मृतावाशौचाभावसम्पूर्णाशौचयोरुक्तेः । *प्राप्तेति । प्राप्तकालानां ज्वलनादिना मरणे त्रिरात्रमित्यर्थः । प्रयागे तु वक्ष्यति । पृथ्वीचन्द्रादिमते ऽस्वरसः स्फुटः । *विशिष्टोद्देशे भृग्वादिपातप्रयुक्तान्याविशिष्टमरणोद्देशे । *वाक्यभेदादिति ।

आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ।

इति वाक्यं भिद्यतेसर्थः । *काम्यमिति । प्रयागे इति प्रकृतम् । काम्यमेवेति नोक्तम्, अकाम्यस्यापि प्रयागमरणस्येष्टत्वात् । *स्मृत्येति । यद्यपि कलिवर्ज्येषु प्रमाणं वेदवद् भवेदिति श्रुतेरपि सङ्कोच उक्तस्तथापि यावता श्रुतेः सङ्कोचं विनाऽति-

विकमृत्युपरा, धीरपदोक्तेः । मात्स्यभारतादिषु—

*नलोकवचनात्तात न *वेदवचनादपि ।
मतिरुत्क्रमणीया ते प्रयागमरणं प्रति ॥

इत्युक्तेः । *अतएव विष्णुधर्मे रोग्यादिमरणमुक्त्वोक्तम्—

*यथा युगानुसारेण संत्यजेदात्मनस्तनुम् । इति ।

काश्यामप्युक्तं मात्स्ये—

अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः ।
प्रविशन्ति मुखं ते मे निःसन्दिग्धं वरानने ॥

हेमाद्रौ विवस्वान्—

*सर्वेन्द्रियविमुक्तस्य स्वव्यापाराक्षमस्य च ।
प्रायश्चित्तमनुज्ञातमग्निपातो महापथः ॥
धर्मार्जनासमर्थस्य कर्तुः पापाङ्कितस्य च ।

स्तावत एव सङ्कोचो नात्रेत्यर्थः । कृत्स्नेपि प्रयागमरणे उपलम्भकमाह— *न लोकेत्यादिना । लोकेति "सर्वत आत्मानं गोपायेत्" इत्यादीत्यर्थः । *वेदेति । "तस्मादुह नः पुरायुषः स्वःकामी प्रेयात्" इत्यादीत्यर्थः । नित्यकर्माद्यनुष्ठाननिरतो नाशितस्वीयान्तःकरणकल्मषः श्रवणादिसम्पत्तिद्वाराऽऽत्मसाक्षात्कारेण नित्यनिरतिशयानन्दब्रह्मावाप्तिलक्षणं मोक्षं साधयेन्नतु अनित्याल्पसुखात्मस्वर्गार्थमायुःक्षयमिति हि तदर्थः । प्रयागे च मुक्तेरपि भावान्न तद्विरोध इत्यर्थः । तादृशं मुख्यफलमनिच्छतामवृद्धानामपि रोगनिवृत्त्यर्थं स्वर्गाद्यर्थं वा कलावपि प्रयागमरणं भवतीत्याशयवानाह—*अत एवेति *यथायुगेति च । काश्यामग्निप्रवेशः काम्य एव, प्रकरणात् । *सर्वेन्द्रियेति । एतच्च मरणान्तिकपर्यवसायि अनिर्देश्यम्,

मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ।

ब्राह्मणस्याप्यनुज्ञातं तीर्थे प्राणविमोक्षणम् ॥

अपरार्के चैवम् । सहगमनं *कलौ भवत्येव,

कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते ।

इति ब्रह्मवैवर्तात् । एतेन मरणान्तिकप्रायश्चित्तं काशीखण्डादौ चातुर्वर्ण्यस्य तनुत्यागविधयश्च युगान्तरपरा एव ।

प्रयागेऽपि त्रिस्थलीसेतौ स्कान्दे—

यथाकथञ्चित्तीर्थेऽस्मिन्प्राणत्यागं करोति यः ।
तस्यात्मघातदोषो न प्राप्नुयादीप्सितान्यपि ॥

पाद्मे विष्णुः--

देहत्यागं तथा धीराः कुर्वन्ति मम संनिधौ ।
मत्तनुं प्रविशन्त्येव न पुनर्जन्मने नराः ॥

कौर्मे--

व्याधितो यदि वा (१)दीनो वृद्धो वापि भवेन्नरः ।
गङ्गायमुनमासाद्य यस्तु प्राणान्परित्यजेत् ॥
ईप्सितांल्लभते कामान्वदन्ति मुनिपुंगवाः ॥

इति स्मरणात् । *कलाविति । ननु स्त्रीणामप्यात्मघाते दोषोक्तेः अतिप्रवृद्धस्वर्गाभिलाषिण्याः प्रतिषेधशास्त्रमुत्क्रामन्त्या अयमुपदेशोऽस्तु तीव्रक्रोधाक्रान्तस्य प्रतिषेधशास्त्रमुत्क्रामतः श्येनोपदेशवदिति । मैवं, श्येनवैषम्यात् । श्येनकरणिकायां भावनायां भाव्यायां विध्यसंस्पर्शेन निषेधसंस्पर्शात् फलद्वारा श्येनस्य निन्द्यत्वमिति मते तत्र मरणस्यैव अनुगमनशास्त्रेणाग्नीषोमीयशास्त्रेण हिंसाया इव विधीयमानत्वात्प्रतिषेधासंस्पर्शात् । श्येनस्य मरणानुकूलव्यापारत्वेन हिंसात्वात्तत्र रागतः प्रवृत्तिसम्भवेन विधेरप्रवर्तकत्वात्स्वरूपेणैव रागप्रयुक्ताहिंसारूपत्वान्नि-

---

(१) 'दीनः क्रुद्धो' क० छ० ।

तथा—

या गतिर्योगयुक्तस्य सत्त्वस्थस्य मनीषिणः।
सा गतिस्त्यजतः प्राणान् गङ्गायमुनसङ्गमे॥

वाराहे—

तत्र यो मुञ्चति प्राणान् वटमूलेषु सुन्दरि।
सर्वलोकानतिक्रम्य मम लोकं प्रपद्यते॥

तथा—

अकामो वा सकामो वा वटमूलेषु सुन्दरि।
शीघ्रं प्राणान्प्रमुञ्चेत यदीच्छेत्परमां गतिम्॥

तथा—

पञ्चयोजनविस्तीर्णे प्रयागस्य तु मण्डले।
व्यतीतान् पुरुषान् सप्त भविष्यांश्च चतुर्दश॥
नरस्तारयते सर्वान् यस्तु प्राणान्परित्यजेत्॥

ब्राह्मे—

ध्यात्वा विष्णुपदाम्भोजं प्रयागे विष्णुतत्परः।

पेध्यत्वमिति पक्षे आत्ममरणे रागतः प्रवृत्ताया अपि तदनुकूले इतिकर्तव्यतारूपेऽग्निप्रवेशे विधित एव प्रवृत्तेः "वायव्यं श्वेतमालभेत भूतिकामः" इतिवन्न निषेधावकाश इति दिक्। सहगमनं प्रयागमरणं च न कस्यापि वर्जनीयम्, आचाण्डालसाधारणधर्मत्वात्। 'यथाकथञ्चित्' इत्यादिसर्वोऽपि संदर्भः काम्यप्रयागमरणबोधक इति नाभिप्रायः, किन्तु रोगिणामरोगिणां वृद्धानां पुंसां स्त्रीणां चाचाण्डालं प्रयागे देहपातोऽभ्यनुज्ञायते आपादत्रयेणान्येन च वचनसंदर्भेण। "प्राप्नुयादीप्सितान्यपि" इतिचतुर्थपादेन तु काम्यः। यागतिरित्यादिस्तत्प्रपञ्चः। नैमित्तिकस्तु पुर्वजानामात्मनश्च प्रायश्चित्तरूपतया स्वयमेवान्योपदेशेन शास्त्रादितो वा निश्चित्य कार्यो नतु निर्देश्यः, पूर्वोक्तवचनात्। "ध्यात्वा" इत्वादीतिकर्तव्यताविशेषपूर्वकं क्रियमाणस्तु झटि-

तनुं त्यजति वै माघे तस्य मुक्तिर्न संशयः ॥
दुष्कृतोऽपि दुराचारो ब्रह्महत्यादिपातकी ।
हरिं ध्यात्वा त्यजेद्देहं (१)प्रयागे मुक्तिमान्भवेत् ॥

भविष्योत्तरे—

*समाः सहस्राणि तु सप्त वै जले
दशैकमग्नौ पतने च षोडश ।
महाहवे षष्टिरशीतिगोग्रहे
अनाशके भारत चाक्षया गतिः ॥

इति सामान्यतोपि फलम् । एवमन्येऽपि विधयो ज्ञेयाः । यत्तु गौडाः प्रयागादिमरणं ब्राह्मणभिन्नविषयमित्याहु*स्तद्दूषणं पितामहचरणैः प्रयागविधौ कृतमिति नात्रोच्यते ।

अत्र *दशाहमाशौचम् । त्रिरात्रस्य *प्राप्तकालगोचरत्वादिति भट्टाः । युक्तं तु त्रिरात्रम् । दिवोदासीयेप्येवम् । शुद्धितत्त्वेऽपि काश्यपः–'अनशनमृतानामशनिहतानामग्निजलप्रविष्टानां भृगुसंग्रामदेशान्तरमृतानां

ति मुक्तिसाम(ग्री?)सम्पादकः । *"समाः सहस्राणि तु सप्त वै जले" इति तु प्रयागेतरपरम् । *तद्दूषणमिति । दूषणस्य ग्रन्थ एव प्रागुक्तत्वान्नेह प्रस्तूयते । *दशाहं सम्पूर्णमिति यावत् । *प्राप्तकालेति । प्रयागे सर्वस्वाशदाविव विहितोपायेन मरणेऽपि अप्राप्ततत्कालतया त्रिरात्राप्राप्तेरिति भावः । युक्तं तु त्रिरात्रमिति स्वशुद्धमेव, प्राप्तकालपरतया वा नेयम् । सङ्ग्रामेऽनिच्छतः कातरत्वादिना हनने "क्षत्रधर्महतस्य च" इति सद्यःशौचाविधौ विशेषणात् प्राप्तमृत्युकालविषयं वा, भृग्वादिसाह-

---

(१) 'प्रायशो' ग० ।

जातदन्तानां च त्रिरात्रम्' इति । *एवं मरणान्तप्रायश्चित्तेऽपि । पूर्वोक्तश्चात्महादेर्दाहाशौचादिनिषेधस्तदानीमेव, वत्सरान्ते तु सर्वमौर्ध्वदेहिकं कुर्यात्,

*गोब्राह्मणहतानां च पतितानां तथैव च ।
ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकम् ॥

इति हेमाद्रौ षट्त्रिंशन्मतात् । एवं *म्लेच्छीकृतानामपि गयाश्राद्धमपि कार्यम्;

ब्रह्महा च कृतघ्नश्च गोघाती पञ्चपातकी ।
सर्वे ते निष्कृतिं यान्ति गयायां पिण्डपातनात् ॥

इत्यग्निपुराणात् । एवं ब्राह्मेपि—

क्रियते पतितानां तु गते संवत्सरे क्वचित् ।
देशधर्मप्रमाणत्वाद्गयाकूपे स्वबन्धुभिः ॥
मार्तण्डपादमूले वा श्राद्धं हरिहरौ स्मरन् ।

चर्यात् । *एवमिति । सम्पूर्णमाशौचमिति प्रकृतम्, अप्राप्तमरणकालत्वात् । और्ध्वदेहिकं च तदैव, "यस्य मरणान्तिकं प्रायश्चित्तं स मृतः शुद्ध्येत सर्वाण्येतास्मिन् उदकादीनि प्रेतकार्याणि कुर्यात्" इति गौतमोक्तेः । प्रक्रान्तप्रायश्चित्तश्चेदन्तरा म्रियते तस्यापि आशौचं पूर्णमेव;

प्रायश्चित्ते व्यवसिते कर्ता यदि विपद्यते ।
शुद्धस्तदहरेवासाविहलोके परत्र च ॥

इति हारीतेन तस्य शुद्धत्वोक्तेर्निर्दुष्टमरणे पूर्णाशौचस्यैव न्याय्यत्वात् । युद्धहतानां सद्यःशौचं वचनादित्युक्तं वक्ष्यति च । *गोब्राह्मणेति । नन्वेवं गोब्राह्मणहतभिन्नानां पाखण्डचात्मघातकादीनां वर्षादर्वागेव नारायणबल्यादिपूर्वकौर्ध्वदैहिकं स्यात् । न स्यात्,

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।

सूर्यपद इत्यर्थः ।

*तत्र वर्षमध्ये कृत्यमुक्तमपरार्के वायुपुराणे—

शुक्लपक्षे तु द्वादश्यां कुर्यात् श्राद्धं तु वत्सरम् ।
द्वादशाहनि वा कुर्याच्छुक्ले च *प्रथमेऽहनि ॥

छागलेयः—

नारायणबलिः कार्यो लोकगर्हाभयान्नरैः ।

सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥

इति वचनात् । *म्लेच्छीकृतानामिति । तेषामपि पतितेषु प्रवेशादिति भावः । पाखण्ड्यादीनां क्रियाधिकारार्थमाह— *तत्र वर्षमध्ये इत्यादि ! *प्रथमेऽहनीति । अत्रायं वीरभोजनप्रयोगः—नारायणबलिदिनात् पूर्वदिने तद्दिने वा देशकालौ सङ्कीर्त्य अमुकगोत्रनाम्नः आत्मघाताद्यन्यतमदोषानिवृत्तिपूर्वकं नारायणबल्यधिकारार्थं क्रियाधिकारार्थं वा वीरभोजनविधिं करिष्ये इति सङ्कल्प्य द्वादशाष्ट चतुरो वा विप्रान् निमन्त्र्य तेभ्यः भो वीररूप ब्राह्मण इदं ते पाद्यमिति पाद्यं दत्वा एषामासनगन्धाक्षतपुष्पसिन्दूरपिष्टान्तकमालाधूपदीपासनादिपदोहेन पूर्वमन्त्रेण दत्त्वा मधुरान्नानि परिविष्य "इदं विष्णुः" इति मन्त्रानन्तरं पृथिव्यादिस्थवीरेभ्य इदमन्नं परिविष्टं परिवेक्ष्यमाणं चाऽऽतृप्तेः स्वाहा हव्यं न ममेति सजलं सक्त्वा प्रार्थयेदेभिर्मन्त्रैः—

पृथिव्यां ये स्थिता वीराः प्रेतमोक्षप्रदायकाः ।
प्रलयानलमुख्यास्ते गृह्णन्त्वन्नादि कल्पितम् ॥
येऽन्तरिक्षे स्थिता वीराः प्रेतपिण्डविघातकाः ।
यातुधानास्तु ते प्रेतं मुञ्चन्तु सुरपूजिताः ॥

ततः भुक्तवत्सु द्विजेषु सोदकुम्भां दक्षिणां ताम्बूलं च दत्त्वा प्रेतमुक्त्याशीस्तेभ्यो गृहीत्वा विष्णुं स्मरेदिति । प्रेताभ्युदयादिकामेनाप्रयुक्तत्व कामनाया असत्त्वेऽकरणे गर्हा नेति तत्परिहारार्थ-

तथा *तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः ॥
व्यासः—

*नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते ।
तस्य शुद्धिकरं कर्म तद्भवेन्नैतदन्यथा ॥ इति ।

सचा*त्मघातादिप्रायश्चित्तं कृत्वा कार्यः । तदुक्तं हेमाद्रौ षट्त्रिंशन्मते—

कृत्वा चान्द्रायणं पूर्वं क्रिया कार्या यथाविधि ।
नारायणबलिः कार्यो लोकगर्हाभयान्नरैः ॥
पिण्डोदकक्रियाः पश्चाद्वृषोत्सर्गादिकं च यत् ।
एकोद्दिष्टानि कुर्वीत सपिण्डीकरणं तथा ॥

दिवोदासीये वृद्धशातातपस्तु—

पतिते च मृते शुद्ध्यै प्राजापत्यांस्तु षोडश ।
मृते चापत्यरहिते कृच्छ्राणां नवतिं चरेत् ॥

त्वेन निसत्वलाभः । *तेषामिति पाखण्ड्यादीनां बुद्धिपूर्वकात्मघातकानां चेत्यर्थः । प्रेतशुद्धिकारकत्वमुक्तौ शुद्धिरौर्ध्वदेहिकयोग्यतासम्पादकत्वमप्याह—*नारायणमिति । शिवं वेति वाशब्दश्चार्थे । द्वितीयेऽन्हि शैवपिण्डसत्त्वात् । शवं यावदिति पाठे तु नारायणं शवं समुद्दिश्येत्यस्य विष्णुरूपं प्रेतं ध्यात्वेत्यर्थः, 'विष्णुं बुद्धौ समालम्ब्य' इत्युक्तेः । *आत्मघातादीति । आदिना आत्मघातकाभिन्नस्य पाखण्ड्यादेस्तद्योग्यप्रायश्चित्तपरिग्रहः । न केवलमात्मघातिनामेव नारायणबलिः किन्तु वत्सरादूर्ध्वं येषामौर्ध्वदेहिकं विहितं तेषां सर्वेषां तदर्हतासम्पत्तये इति । प्रायश्चित्तार्हस्य ब्रह्महादेरपि तमाह-*नारायणबलिमिति । यत्र मरणं यस्य यस्य तत्र तत्रेति पाठासत्त्वे सुगमं । तत्पाठे तु अभिशस्तेत्यादि निर्धारणषष्ठ्योर्यस्य यस्येत्यनेनान्वयः । ब्राह्मणहतानामिति दर्पपरम् । अभिशस्तादीनां द्वादशवर्षाणीति ब्राह्मण-

इत्याह । इदं प्रायश्चित्तार्हपित्रादिविषयम् ;

इन्द्रियैरपरित्यक्ता ये च मूढा विषादिनः
घातयन्ति स्वमात्मानं चाण्डालादिहताश्च ये ॥
तेषां पुत्राश्च पौत्राश्च दयया समभिप्लुताः ।
यथा श्राद्धं प्रतन्वन्ति विष्णुनामप्रतिष्ठितम् ॥
यथा ते संप्रवक्ष्यामि नमस्कृत्य स्वयंभुवे ॥

इति हेमाद्रौ तेनैवोक्तेः । तत्रैव बौधायनोपि-*नारायणबलिं व्याख्यास्यामः-

(‘(१)चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥
विषशस्त्ररज्जुपाषाणाद्देशान्तरमृते वा’) अभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानां च द्वादशवर्षाणि त्रीणि वा य(२)त्र मरणं यस्य तत्र कुर्वीत’ इति ।

*गृह्यपरिशिष्टे तु-चण्डालादित्याद्युक्त्वा—

*दग्ध्वा शरीरं प्रेतस्य संस्थाप्यास्थीनि यत्नतः ।
प्रायश्चित्तं तु कर्तव्यं पुत्रैश्चान्द्रायणत्रयम् ॥

हतानां त्रीणीति यथासंख्येनान्वयः । अशक्तौ सर्वेषामेव त्रीणीति सूचनाय वाकारः । एतच्च तद्योग्यप्रायश्चिताभिप्रायम् । यत्रेति क्वाचित्कसम्पातः । मदनरत्ने मरणं यस्य यस्य तत्र तत्रेति न दृश्यते इत्यनुपदं स्फुटम् । कृत्वा चान्द्रायणं पूर्वमित्येकं चान्द्रायणं नारायणबल्यधिकारार्थत्वेनोक्तं तच्चाशक्तस्य । शक्तं प्रत्याह-*गृह्येति । *दग्ध्वेति ।

न संस्कारविधिस्तेषां नैव कार्योदकक्रिया ।
दहनं नैव कर्तव्यं सूतकं च न बन्धुभिः ॥

---

(१) अत्रत्यधनुश्चिह्नान्तर्गतो भागो नास्ति क०छ०
(२) ‘यत्र मरणं यस्य यस्य तत्र तत्र कुर्वीत’ क०इदं नास्ति ग०

इत्युक्तम् । (मद(१)नरत्ने–"ब्राह्मणहतानां द्वादशवर्षाणि त्रीणि वा कुर्वीत" इति ।) मदनरत्ने ब्राह्मे–

*प्रमादादपि निःशङ्कस्त्वकस्माद्विधिचोदितः ।
चाण्डालैर्ब्राह्मणैश्चौरैर्निहतो यत्र कुत्रचित् ॥
तस्य दाहादिकं कार्यं यस्मान्न पतितस्तु सः ।
चान्द्रायणं त(२)प्तकृच्छ्रं द्वयं तस्य विशुद्धये ॥
यद्वा कृच्छ्रान्पञ्चदश कृत्वा तु विधिना दहेत् ।
बुद्धिपूर्वमृतानां तु त्रिंशत्कृच्छ्रं समाचरेत् ॥

इत्युक्तम् । स्मृतिरत्नावल्यां तु–'*द्विगुणं प्रायश्चित्तं कृत्वाऽर्वागब्दात्सर्वं कार्यम्' इत्युक्तम् ।

आत्मनो घातशुद्ध्यर्थं चरेच्चान्द्रायणद्वयम् ।
तप्तकृच्छ्रचतुष्कं च त्रिंशत्कृच्छ्राणि वा पुनः ॥
अर्वाक् संवत्सरात्कुर्याद्दहनादि यथोदितम् ।
कृत्वा नारायणबलिमनित्यत्वात्तदायुषः ॥ इति ।

इति पूर्वश्लोकात् प्रतिपत्तिलाभः । *प्रमादादपीति । चाण्डालादिप्रमादमृतानां वत्सरान्तप्रतीक्षानां नारायणबलिश्च नास्ति किन्तु प्रायश्चित्तोत्तरं तदैवोर्ध्वदेहिकमित्यर्थः । विधिचोदित इत्यनन्तरं—

शृङ्गिदंष्ट्रिनखिव्यालाविषाविद्युज्जलादिभिः ।

इति पाठः । चान्द्रायणं तप्तकृच्छ्रद्वयसमुच्चितं नतु तयोर्विकल्पः । *द्विगुणमिति । बुद्धिपूर्वमृतानामिति वर्तते ।

जलयुद्धधनभ्रष्टाः प्रव्रज्यानाशकच्युताः ।
विषप्रपतनप्रायशस्त्रघातहताश्च ये ॥

इत्यात्मघातिन उपक्रम्य—

चान्द्रायणेन शुद्ध्यन्ति तप्तकृच्छ्रद्वयेन च ।

---

(१) कंसान्तर्गतं नास्ति छ० (२) 'तप्तकृच्छ्रद्वयं' ग०छ०

२२८॥

इदं चात्मवधनिमित्तं तज्जातिवधप्रायश्चित्तेन समुच्चितं कार्यम्। *अतएव बौधायनेनोक्तं 'द्वादश वर्षाणि त्रीणि वा' इति। मदनपारिजाते स्मृत्यर्थसारे च-'ब्रह्महादीनां तद्योग्यं प्रायश्चित्तं कृत्वा नारायणबलिः कार्यः' इत्युक्तम्। एवं *म्लेच्छीकृतानामपि। यत्तु कश्चिदाह-'पुत्रकृतेन प्रायश्चित्तेन पितुः पापनाशे मानाभावः, आत्मघाते तु *वचनादस्तु, महापातके तु कथं स्यात्' इति। सः स्वयमेवात्मवधप्रायश्चित्तस्य जातिवधनिमित्तेन समुच्चयं वदन् हृदयशून्य एव। नहि जातिवधनिमित्तं पुत्रैः कार्यमिति वचनमस्ति। पुत्रकर्तृकसर्वप्रायश्चित्तादिविप्लवापत्तेः प्रागुक्तबौधायनवचनाच्चेति *दिक्। 'इदं प्रायश्चित्तार्हाणामेव। प्रायश्चित्तान-

इति यमोक्तादित्यादिः। अत्र तप्तकृच्छ्रद्वयेन वेति वाशब्दस्यैव सत्त्वाच्छक्त्या विकल्प इति तु न सत्। तथापाठकल्पने मानाभावात्। जातिवधप्रायश्चित्तविधिमाह—*अत एवेति। ब्रह्महादीनां प्रायश्चित्तार्हाणामिति शेषः। *म्लेच्छीकृतानामिति। प्रा(१)यश्चित्तार्हाणां तेषां तद्योग्यप्रायश्चित्तमित्यादि अर्वागशब्दात्तदौर्ध्वदेहिकं द्विगुणं प्रायश्चित्तं कृत्वेत्यादि च वर्तते। तदनर्हाणां तु तेषां पतितोदकमेव। *वचनात् "शस्त्रघातहताश्च ये" इत्युक्तवचनात्। नन्वेवं—

जलाग्निपतने चैव प्रव्रज्यानाशकेषु च।

इति पराशरवचने मर्त्तुमुद्यम्य जीवितानामेवेदं नतु मृतानां तत्कर्तुरेवाभावादिति माधवेनोक्तं कथं सङ्गच्छते इत्यत आह—*दिगिति। स्मृत्यर्थसारादिवशान्माधवग्रन्थो जीवतां जातिवधेन समुच्चितस्य तस्यावश्यकतापरो नतु तन्मरणोत्तरं

---

(१) कैश्चित् प्रलोभ्य म्लेच्छीकृतानामित्यर्थः।

र्हाणां तु पतितोदकमात्रं कार्यम्' इति केचित् । मदनपारिजातादिस्वरसोऽप्येवम् ।*वस्तुतस्तु 'तदर्हानर्हयोर्वचनेऽनुपादानादविशेषात्तत्रापि नारायणबलिर्गयाश्राद्धं चेति युक्तम् ।

पतितोदकविधिस्तु *'पित्राद्यतिरिक्तविषयः' इत्यपरे । स यथा हेमाद्रौ ब्राह्मे–

पतितस्य तु कारुण्याद्यस्तृप्तिं कर्तुमिच्छति ।
स हि दासीं समाहूय सर्वगां दत्तवेतनाम् ॥
अशुद्धघटहस्तां तां यथावृत्तं ब्रवीत्यपि ।
हे दासि गच्छ मूल्येन तिलानानय सत्वरम् ॥
तोयपूर्णं घटं चेमं सतिलं दक्षिणामुखी ।
उपविष्टा तु वामेन चरणेन ततः क्षिप ॥
कीर्तयेः पातकीसंज्ञां त्वं पिबेति मुहुर्वद ।
निशम्य तस्य वाक्यं सा लब्धमूल्या करोति तत् ॥
एवं कृते भवेत्तृप्तिः पतितानां च नान्यथा ॥ इति ।

इदं च मृताहे कार्यम्; "पतितस्य दासी मृताहि यदा घटमपवर्जयेत्तावताऽयमुपचरितो भवति" इति मदन-

---

तत्समुच्चितस्य तस्याप्रामाणिकत्वपरोऽपि, बौधायनवाक्यस्यैव तत्प्रमाणत्वात् ।

ग्रंथद्वयस्याप्यविरोधनिर्वाहाच्चेतिदिगर्थः । ब्रह्मचारिणां प्रायश्चित्तार्हाणां तद्योग्यप्रायश्चित्तोत्तरं नारायणबलिर्भवतीति च दिगर्थः । एतेन यतीनां तादृशानां तद्योग्यप्रायश्चित्तं नारायणबलिं च कृत्वा संस्कारारम्भ इति प्रतीयते । *वस्तुतस्त्विति । इदमापाततः 'कारुण्यात्' इति हेतुना प्रायश्चित्तनारायणबलिसहितौर्ध्वदेहिकायोग्यत्वसिद्धेः । *पित्रादीति आदिना मातृभर्त्रोः परिग्रहः । प्रायश्चित्तानर्हस्य प्रायश्चित्तेच्छोश्चाऽजातप्रायश्चित्तादेश्च पित्रादेर्वर्षो-

रत्ते विष्णूक्तेः। *इदं चात्मत्यागिविषयम्; "आत्मत्यागिनः पतितास्ते नाशौचोदकभाजः स्युः" इत्युपक्रम्य विष्णुना एतस्याभिधानादिति गौड़ाः। (उप(१)लक्षणत्वात्सर्वेषामिति तु युक्तम्।) यत्तु कश्चिदाह–'यः पतितो घटस्फोटेन बान्धवैर्बहिष्कृतस्तद्विषयाणि क्रियानिषेधवाक्यानि। जीवत्येव तस्मिन्नन्त्यकर्मणः कृतत्वात्तत्पुनः करणाभावात्' इति सस्वबन्धुत्यागेन जातवैराग्यस्य कृतप्रायश्चित्तस्याप्यकरणापत्ते*र्मिताक्षरादिविरोधमपश्यन् मूर्ख इत्युपेक्षणीयः। नच कृतघटस्फोटस्य संग्रहविधिर्नेति वाच्यम्। मनुनाऽकृतघटस्फोटस्य त्यागमुक्त्वा–

प्रायश्चित्ते तु चरिते पूर्णं कुम्भमपां नवम्।
तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये॥

इत्युक्तेः। *अन्यथा प्रायश्चित्तमात्रे एतत्प्रसङ्गात्। अतो घटस्फोटेन बहिष्कृतस्यापि पित्रादेरद्धान्ते *ना-

---

र्ध्वं तद्योग्यप्रायश्चित्तानन्तरं नारायणबलिं कृत्वा दाहाद्यौर्ध्वदेहिकमित्याशयः। अत्र पित्रादेः प्रायश्चित्तानर्हस्य घटस्फोटं विना मृतस्य प्रायश्चित्तस्य पुत्रादिना दुष्करत्वात्। अत एव तद्वैगुण्याद्यसम्भवान्निषेधाभावाच्च पतितोदकविधिर्दुर्वारः। "एतावताऽयमुपचरितो भवति" इति ऋषिभिरभिहितस्योपचारस्य 'एतावता' शब्दध्वनितदाहाद्यकरणस्य च निवर्तनं चानुचितं 'पतितस्य' इत्यस्य पितृव्यादिमृतविशेषार्थत्वकल्पनापत्तेश्चेति पूर्वमतानुवर्तिनः। *इदं चेति। प्रायश्चित्तार्हात्मघातकेषु दासीघट "एतावतायमुपचरितो भवति" इति वाक्याविरुद्ध इत्यस्वरसः। *मिताक्षरादीति। पतितोदकविधेः तत्रोक्तेस्तद्विरोध इत्यर्थः। *अन्यथा घटस्फोटं विना प्रायश्चित्तस्थले एव मनूक्तविध्युपगमे। *नारायणबलि-

---

(१) कंसान्तर्गतं नास्ति ग०

रायणबलिः का(१)र्यः । *निषेधास्तु पितृव्यादिपरा इति तत्त्वम् । केचित्तु नारायणबलौ कृतेऽप्यन्त्यकर्म सपिण्डनवर्जं कार्यम् ,

गोब्राह्मणहतानां च पतितानां तथैव च ।
व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता ॥

इति वचनात् ।

ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते ।

इति श्राद्धप्रकारोक्तेश्चेत्याहुः । ते हेमाद्रिस्थपूर्वोक्तषट्त्रिंशन्मतविरोधा*न्निर्मूलत्वाच्छ्राद्धप्रकारस्य *वृद्धिश्राद्धविषयत्वादुपेक्ष्याः ॥

नारायणबलिस्तु हेमाद्र्याद्यनुसारेणोच्यते । तत्रादौ क्रियानिबन्धे गारुडे तर्पणमुक्तम्—

कार्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि ।
दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन् ॥
अनादिनिधनो देवः शङ्खचक्रगदाधरः ।
अक्षय्यः पुण्डरीकाक्षः प्रेतमोक्षप्रदो भव ॥ इति ।

रीति । 'सङ्ग्रहयोग्यप्रायश्चित्तपूर्वकम्' इत्यादि । ततो दाहाद्यौर्ध्वदेहिकं भवतीति शेषः । *निषेधाः क्रियानिषेधाः । ननूक्तषट्त्रिंशतवशात्सपिण्डननिषेधः पित्रादिभिन्नविषय एवास्तु तत्राह— *निर्मूलत्वादिति । नच—

व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता ।
यदि माता यदि पिता भर्ता नैष विधिः स्मृतः ॥

इति वचनात्कथं निर्मूलत्वमिति वाच्यम्, निर्मूलत्वोक्तेः पित्रादिभिन्नस्य सर्वथाऽकरणपक्षाभिप्रायकत्वात् । *वृद्धीति । संवत्सरान्तःक्रियमाणेत्यादि । न च पतितस्य नारायणबल्यादिनौर्ध्वदे-

---

(१) 'कार्यः' नास्ति ग० छ०

*शुक्लैकादश्यां देशकालौ सङ्कीर्त्यामुकगोत्रस्यामुकस्य *दुर्मरणात्मघातजदोषनाशार्थमौर्ध्वदेहिकसम्प्रदानत्वयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्ये इति सङ्कल्प्य । ब्रह्माणं विष्णुं शिवं यमं प्रेतं च पञ्चकुम्भेषु-

विष्णुः स्वर्णमयः कार्यो रुद्रस्ताम्रमयस्तथा ।
ब्रह्मारौप्यमयस्तत्र यमो लोहमयो भवेत् ॥
प्रेतो दर्भमयः कार्य (१)इति देवप्रकल्पना ॥

इति गारुडोक्तासु सर्वासु हैमीषु वा प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्याग्निं प्रतिष्ठाप्य चरुं पुरुषसूक्तेन प्रत्यृचं नारायणायेदमिति हुत्वा देवानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नामगोत्राभ्यां मधुघृततिलयुतान् दश पिण्डान् यज्ञोपवीत्येवामुकगोत्रामुकशर्मन् प्रेत विष्णुरूपाऽयं ते पिण्ड उपतिष्ठतामिति दत्त्वा पुरुषसूक्तेनाभिम(२)न्त्र्य 'यत्ते यमम्' इति सूक्तेन पिण्डाननुमन्त्र्य शङ्खोदकेनाभिषिच्याभ्यर्च्यामुकशर्माणममुकगोत्रं विष्णुरूपं प्रेतं तर्पयामि इति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एकमामान्नं ब्रह्मादिपञ्चभ्यो दद्यात् ॥

हिके जाते तदाद्येव देयत्वात् पतितपदं प्रायश्चित्तानर्हपतितपरं, तस्य चौर्ध्वदेहिकासत्त्वे सपिण्डनानिषेधासंगतिरिति वाच्यम्, एवमपि ब्राह्मणहतादिग्रहणासामञ्जस्यापत्तेः । प्रायश्चित्तानर्हतदप्रसिद्धेः । *शुक्लैकादश्यामिति ।

एकादश्यां तु शुक्लायां पञ्चम्यां श्रवणेन वा ।
तथा मृतानां शुद्ध्यर्थं कार्यो नारायणो बलिः ॥

इति वचनात् पञ्चम्यां श्रवणे वा कार्यः । *दुर्मरणेति । विशि-

---

(१) 'इति देवप्रकल्पना' नास्ति क० छ०
(२) 'मन्त्र्य तनैव शङ्खो' ग०

मन्त्रस्तु—

ब्रह्मविष्णुमहादेवा यमश्चैव सकिङ्करः ।
बलिं गृहीत्वा कुर्वन्तु प्रेतस्य च शुभां गतिम् ॥ इति ।

मिताक्षरायां तु होमबल्यादि नोक्तम् । ततः प्रतिदैवतं त्रिविधं फलं शर्करामधुगुडघृतानि च निवेद्य पिण्डानभ्यर्च्य नद्यां क्षिप्त्वा रात्रौ नव सप्त पञ्च वा विप्रान्निमन्त्र्योपोषितो जागरं कृत्वा श्वोभूते पुनर्विष्णुं यम संपूज्यैकोद्दिष्टविधिना श्राद्धपञ्चकं करिष्य इत्युक्त्वा विष्णुब्रह्मशिवयमप्रेतान्स्मरन्विप्रानुपवेश्य प्रेतस्थाने चैकं विष्णुं स्मरन् पाद्यावाहनार्घ्ययुतं तृप्तिप्रश्नान्तं कृत्वोल्लेखनादि कृत्वाऽन्नशेषेण विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय चतुरः पिण्डान् दत्त्वा प्रेतनामगोत्रे स्मृत्वा विष्णुनाम्ना पञ्चमं दत्त्वाऽभ्यर्च्याचान्तेभ्यो दक्षिणां दत्त्वैकं प्रेतं स्मृत्वा विशेषतः संतोष्य विप्रैः प्रेतायेदं तिलोदकमुपतिष्ठतामिति सतिलमुदकं दापयित्वा भुञ्जीतेति । अत्र *विशेषान्तरं भट्टकृतान्त्येष्टिपद्धतौ ज्ञेयम् ।

ष्योहः कार्यः । *विशेषान्तरमिति । पञ्चकलशस्थापनादि, तत्र प्रतिमासु पुरुषसूक्तेन विष्णुः, हिरण्यगर्भ इति ब्रह्मा, कद्रुद्रायेति रुद्रः, यमाय सोम इति यमः, नाममन्त्रेण प्रेतश्च पूज्यः । स्वगृह्योक्तविधिना स्थण्डिलेऽग्निप्रतिष्ठापनम् । अन्वाधाने आज्यभागान्त नारायणं षोडशकृत्वश्चरुणा शेषेण स्विष्टकृतमित्यादि स्वगृह्योक्तमार्गेण निर्वापादिना चरुं कुर्यात् । स्विष्टकृदादिहोमशेषं समाप्य देवाग्रे दशपिण्डदानमपसव्येन कुर्यात् । यज्ञोपवीत्येवेति आधुनिकेन केनचित् कल्पितः पाठः । भट्टैस्तु कुशैः पुरुषसूक्तेनाभिषेक उक्तः । अर्चनानन्तरं पिण्डान् प्रवाहनद्यां क्षिपेत् न पत्न्यै दद्यात् । मन्त्रेण प्रार्थ्य विष्णवादिभ्य इमं बलिं समर्पयामीति दद्यात् । शर्क-

सर्पहते तु वर्षपर्यन्तं पूर्वेऽह्न्येकभक्तपूर्वं शुक्लपञ्चम्यामुपवासं नक्तं वा कृत्वा पिष्टमयं *नाग*मनन्तवासुकिशङ्खपद्मकम्बलकर्कोटकाश्वतरधृतराष्ट्रशङ्खपालकालियतक्षककपिलेतिनामभिः प्रतिमासं सम्पूज्य पायसेन विप्रान् सम्भोज्य वत्सरान्ते हैमं नागं गां च दत्त्वा नारायणबलिं कुर्यात् । मूलं तु हेमाद्रौ ज्ञेयम् । बौधायनसूत्रे-सर्पमृतानां 'नमोस्तु सर्पेभ्यः' इति तिस्र आहुतीर्हुत्वा, उदके मृतानां समुद्राय वयुनाय हुत्वेति क्रियां कुर्यादिति शेषः । व्यासः—

सौवर्ण*भारनिष्पन्नं नागं कृत्वा तथैव गाम् ।
व्यासाय दत्त्वा विधिवत्पितुरानृण्यमाप्नुयात् ॥

रेत्यादि निवेदनानन्तरं पिण्डानभ्यर्च्य नद्यां क्षिप्त्वेति भट्टैर्नोक्तम् । मध्यान्हे विष्णवादेः पूजा । विप्रा यथाज्येष्ठमुदङ्मुखा उपवेश्याः। भूमिहिरण्यादिना प्रेतविप्रसंतोषानन्तरम् अक्षय्यस्थाने तिलदर्भतुलसीपुष्पशङ्खोदकधारां दद्यात् । एवं नारायणबलिं विधाय स्नात्वा गुडशर्करापायसादियुक्तं स्वजनैः सह भुञ्जीतेति पद्धतिस्थं विशेषान्तरमित्यर्थः । *नागः दारुमयो मृन्मयो वा पञ्चफण इति भट्टाः । *अनन्तेति । अनन्तो वासुकिः शङ्खो पद्मः कम्बल एव च । कर्कोटकश्चाश्वतरः धृतराष्ट्रः शङ्खपालः कालीयस्तक्षकश्चेति कपिलोऽत्राक्रमागतः । अनन्तो वासुकिस्तक्षकः शङ्खः पद्मकम्बलौ कर्कोटकश्चाश्वतरः धृतराष्ट्रः शङ्खपालः कालीयः कपिलश्चेति क्रमो भट्टैरुदाहृतः । अतोऽन्त्येष्टिपद्धतिस्थप्रकारेण शिष्टानुष्ठानमिष्यते । *भारनिष्पन्नमिति । भारः पलसहस्रद्वयम्,

तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुलाः ।
(अ० को० ९७३)

इति कोशात् । परन्तु प्रायोऽशक्यार्थविधिः । तारनिष्पन्नमिति

हेमाद्रौ भविष्ये—

*पञ्चम्यां पन्नगं हैमं स्वर्णनैकेन कारयेत् ।
क्षीराज्यपात्रमध्यस्थं पूज्य विप्राय दापयेत् ॥
प्रायश्चित्तमिदं प्रोक्तं नागदष्टस्य शम्भुना ॥ इति ।

अपरार्के स्मृत्यन्तरेऽपि—

तदैव शुद्ध्यति प्रेतो नारायणबलौ कृते ।
यो ददाति क्रियापिण्डं तस्मै प्रेताय वै सुतः ॥
तस्यैवाशौचमुद्दिष्टं त्र्यहमेव न संशयः ।
विष्णुश्राद्धसमाप्तौ तु *त्रयोदश्यां दिनत्रयम् ॥
आशौचं पिण्डदः कुर्यान्न तु तद्बन्धुगोत्रजाः ।
यस्य वै मृत्युकाले तु व्युच्छिन्ना संततिर्भवेत् ॥
स वसेन्नरके नित्यं पङ्कमग्नः करी यथा ॥

इत्युपक्रम्य—

बलिं नारायणं कुर्यात्तस्योद्देशेन भक्तिमान् ।

इति गारुडोक्तेरपुत्रस्यापि पत्न्याद्यैः कार्यं इत्युक्तं देवयाज्ञिकेन ॥

अथ विधानादाशौचाभावः । यथा-यतियुद्धमृतादिषु—

त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रियाः ।
यतेः किञ्चिन्न कर्तव्यं न चान्येषां करोति सः ॥

पाठान्तरम् । तदा यथाशक्ति हेम लभ्यते । अशक्तौ प्रकारान्तरमाह—*पञ्चम्यामिति । अत्रोभयोः पञ्चमीषु भूमौ नागं पिष्टेनालेख्य सितैः गन्धपुष्पादिभिस्तिलतण्डुलैश्चाभ्यर्च्य गव्यं क्षीरं मोदकं च भूमौ निवेद्योपस्थाय मुञ्च मुञ्चामुमिति वदेत् । एवमब्दं नागमभ्यर्च्य ततः सौवर्णं नागं गां च दद्यादिति प्रयोगः । *त्रयोदश्यामिति "द्वादशाहनि" इति पूर्वोक्तपक्षमभिप्रेत्य । यस्य जन्मान्तरेण ब्राह्मणवधादिना एतज्जन्मनि प्रेतकृतः संतत्यादिप-

इति ब्राह्मात्। उशनाः—

एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा।
अहन्येकादशे प्राप्ते पार्वणं तु विधीयते॥
सपिण्डीकरणं तेषां न कर्तव्यं सुतादिभिः।
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते॥

तत्संस्कारं वक्ष्यामः। दत्तात्रेयः—

एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियां।
न कुर्याद्वार्षिकादन्यद्ब्रह्मभूताय भिक्षवे॥

वार्षिकादिति पूर्वभाविमासिकादिनिषेधो नतु दर्शादेः

संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्या*द्यथाविधि।

इति वायवीयोक्तेः। पृथ्वीचन्द्रोदये प्रजापतिः—

अहन्येकादशे प्राप्ते पार्वणं तु विधीयते।
सपिण्डीकरणं तस्य न कर्तव्यं सुतादिभिः॥

एषु सपिण्डनादिनिषेधानुवादेन पार्वणोक्तेस्तत्स्थानापन्नत्वं पार्वणस्य गम्यते। 'न गिरागिरेति ब्रूयादैरं कृत्वोद्गेयम्' इतिवत्। इदं वार्षिकादिविधानं च त्रिदण्डिनामेव। एकदण्डिपरमहंसादीनां तु न किमपि कार्यम्, पूर्वोक्तोशनोवाक्येत्रिदण्डग्रहणादिति' शूलपाण्यादयो गौडाः। *त्रिदण्डिशब्देन मनोदण्डादिदण्डत्रयोक्तेः।

यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते।

इति स्मृतेः।

कृतिवधः तन्नाशो वा, तेन तन्निवृत्त्यर्थमपि नारायणबलिः कार्यः। तत्र प्रतिबन्धनिवृत्तिसन्देहे वीरभोजनपूर्वकं नारायणबलिं कृत्वा तदुत्तरं पञ्चदिनमध्ये प्रेतस्यौर्ध्वदेहिकं कार्यम्। ततोऽप्यनुवृत्तौ तद्गयाश्राद्धं चेत्यनन्तदेवादयः *यथाविधीति।

महालये तु यच्छ्राद्धं द्वादश्यामेव तद्भवेत्।

बौधायनः—

नारायणबलिश्चास्य कर्तव्यो *द्वादशेऽहनि ।

अस्य पार्वणेन समुच्चयो ज्ञेयः । तं च स एवाह—

कृत्वा विष्णोर्महापूजां पायसं विनिवेदयेत् ।
*अग्नौ कृ(१)त्वा तु तच्छेषं व्याहृतीभिः समाहितः ॥
यतीन् गृहस्थान्साधून्वा निमन्त्र्य द्वादशावरान् ।
अभ्यर्च्य गन्धपुष्पाद्यैर्मन्त्रैर्द्वादशनामभिः ॥
संभोज्य हव्येनान्नेन दक्षिणां च निवेदयेत् ।
त्रयोदशं द्विजश्रेष्ठमात्मज्ञं संयतेन्द्रियम् ॥
विष्णुं यथातथाऽभ्यर्च्य पाद्याद्यैश्च विधानतः ।
दद्यात् पुरुषसूक्तेन गन्धपुष्पादिकं क्रमात् ॥
वस्त्रालंकरणादीनि यथाशक्ति प्रदापयेत् ।
उच्छिष्टसंनिधौ तस्य दर्भानास्तीर्य भूतले ॥
भूर्भुवःस्वःस्वधायुक्तैस्तस्मै दद्याद्बलित्रयम् ।
*अश्वमेधसहस्रस्य वाजपेयशतस्य च ॥
य(२)त्फलं तल्लभेदेवं यः करोति यतिक्रियाम् ॥

शौनकस्तु—

शौनकोऽहं प्रवक्ष्यामि नारायणबलिं परम् ।
चण्डालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि ॥
दंष्ट्रिभ्यश्च पशुभ्यश्च रज्जुशस्त्रविषाश्मभिः ।

इत्युत्तरार्धम् । गौडमतेऽक्षरसमाह—*त्रिदण्डीति । *द्वादशेऽहनीति । त्रयोदशाहादिव्यावृत्तिः । *अग्नाविति । व्याहृतिभिरग्नौ हुत्वा तच्छेषं पायसं निवेदयेदित्यन्वयः । *अश्वमेधेति ।

एवं यः कुरुते विद्वान्नारायणबलिं द्विजः ।
विष्णुलोकमवाप्नोति पुरुषो नात्र संशयः ॥

---

(१) 'अग्नौ हुत्वा' क० छ० । (२) 'तत्फलं लभते देव' ग० ।

देशान्तरमृतानां च मृतानां वाऽन्यसाधनैः ॥
जीवच्छ्राद्धमृतानां च कनिष्ठानां तथैव च ।
यतीनां योगिनां पुंसामन्येषां मोक्षकाङ्क्षिणाम् ॥
पुण्यापापक्षयार्थाय द्वादशेऽहनि कारयेत् ।
द्वादश्यां श्रवणेऽब्दान्ते पञ्चम्यां पर्वणोऽस्तु वा ॥

इत्युक्त्वा पूर्वोक्तं सर्वं विधिमुक्त्वा अतोदेवेति षड्भिः पुरुषसूक्तेन प्रत्यृचं पायसं हुत्वा केशवादिद्वादशनामभिस्तद्रूपिणे पित्रे द्वादश विप्रान् संभोज्य तैरेव द्वादश पिण्डान्दद्यादित्यधिकमाह । युद्धमृते तु प्रागुक्तम् । कृतजीवच्छ्राद्धे मृते सपिण्डैराशौचादि कार्यं न वा । तदुक्तं हेमाद्रौ लैङ्गे—

मृते कुर्यान्न कुर्याद्वा जीवन्मुक्तो यतः स्वयम् ।
कालं गते द्विजे भूमौ खनेद्वापि दहेत वा ॥
पुत्रकृत्यमशेषं च कृत्वा दोषो न विद्यते ॥

जीवत्यपि विशेषस्तत्रैवोक्तः—

नित्यं नैमित्तिकं यत्तु कुर्याद्वा संत्यजेत वा ।
बान्धवेऽपि मृते तस्य नैवाशौचं विधीयते ॥
सूतकं च न संदेहः स्नानमात्रेण शुद्ध्यति ॥

*एतद्योगिविषयम्; 'योगमार्गरतोऽपि च' इति तस्याप्युक्तेः । तथा आहिताग्नौ प्रोषितमृते तदस्थिदाहात्पूर्वं *पुत्रादीनामाशौचं संध्यादिकर्मलोपश्च नास्ति,

अनग्निमत उत्क्रान्तेराशौचादि द्विजातिषु ।
दाहादग्निमतो विद्याद्विदेशस्थे मृते सति ॥

इति स्मृतेः । आहिताग्नेर्दाहात्प्रागपि दशाहः संस्का-

इत्यादि । *एतदिति । योगिना नित्यमिति नैमित्तिकद्वयं कृताकृतं, सपिण्डमरणे सद्यःशौचमेवेत्यर्थः । *पुत्रादीनामिति ।

राद्धं च भिन्नो दशाह इति धूर्तस्वामी रामाण्डारश्च । तच्चिन्त्यम्, मूलैक्याद्वचोविरोधाच्च । एतत्प्रागुक्तम् । अत्र देहस्यैव संभवे दाहः;

आहिताग्नौ विदेशस्थे मृते सति कलेवरम् ।
*निधेयं नाग्निभिर्यावत्तदीयैरपि दह्यते ॥

इति ब्राह्मोक्तेः ।

तदभावे छन्दोगपरिशिष्टे--

*विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा ।
दाहयेद्बर्हिषाच्छाद्य पात्रन्यासादि पूर्ववत् ॥
अस्थ्नामलाभे *पार्णानि शकलान्यु*क्तयावृता ।

आदिना पत्नीदुहितृदौहित्रादिग्रहः । *निधेयं तैलद्रोण्यादौ । पर्युषितदोषापवादः । अत्र मृताग्निहोत्रं वक्ष्यते । *विदेशेति । देशान्तरमरणे पराकषट्कमष्टौ वा कृच्छ्रात् कृत्वाऽस्थीनि दहेत् । पराको द्वादशाहोपवासः तत्प्रत्याम्नायस्तु एकोपवासे एकब्राह्मणभोजनम् । पराके पञ्च त्रयो वा प्राजापत्याः;

पराकतप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं भवेत् ।

इति चतुर्विंशतिमतात् । यद्यस्थीनि चण्डालादिभिः स्पृष्टानि तदा पञ्चगव्यगङ्गोदकाभ्यां प्रक्षाल्य विधिना दाहः । अन्ये तु पञ्चगव्यादिप्रोक्षणमविशेषेणेच्छन्ति । *पार्णानि पालाशानि । तदुक्तं कल्पतरौ—

अस्थीनि चेन्न लभ्यन्ते प्रोषितस्याग्निहोत्रिणः ।
पालाशपत्रवृन्तानां षष्ट्यधिकशतत्रयम् ॥
कृष्णाजिने नराकारं कृत्वा वेष्ट्याऽऽजिनेन तम् ।
उर्णासूत्रेण बध्वैव यवपिष्टैः प्रलेपयेत् ॥
निर्दिश्य दद्यात्तत्तोयं नाम्नेत्याहाश्वलायनः ।
अङ्गाराऽऽज्येन दहेत्कृत्वा मृद्दिग्धं तं च पार्श्वतः ॥ इति ।
२२९॥

दाहयेद*स्थिसंख्यानि *ततः प्रभृति सूतकम् ॥

हेमाद्रौ षट्त्रिंशन्मते—

*कुर्याद्दर्भमयं प्रेतं दर्भैस्त्रिशतषष्टिभिः।
पालाशीभिः समिद्भिर्वा संख्या चैवं प्रकीर्तिता ॥

भविष्ये—

*चत्वारिंशाच्छिरःस्थाने ग्रीवायां च दशैव तु।
बाह्वोश्चैव शतं दद्याद्विंशतिं च तथोरसि ॥
उदरे विंशतिं दद्यात्त्रिंशतं कटिदेशयोः।
ऊर्वोश्चैव शतं दद्यात् त्रिंशतं जानुजङ्घयोः ॥

नराकारं कृत्वेति। शिरोमणिः—"पुनन्तु मा" "इमं मे वरुण" इति च प्रेतस्य धारणं कुर्यात्। शालिग्रामशिलायां जलैः विच्छिन्नेऽग्नौ तदादिप्रायश्चित्तहोम्यद्रव्यदानपूर्वकमग्निं संपाद्य सर्वप्रायश्चित्तं कुर्यात्।

विष्णुमुद्दिश्य दातव्या सुशीला गौः पयस्विनी।
तिला लोहं हिरण्यं च कार्पासं लवणं तथा।
सप्तधान्यं क्षितिर्गौश्च एकैकं पावनं स्मृतम् ॥

इत्यादिकं वैतरण्यादिकं चान्यतोऽवगन्तव्यम्। मृद्दिग्धमिति। यत्रापिष्टलेपोत्तरं मृदादिभिः आलिप्य दग्ध्वाऽस्थ्नां स्थाने तां दग्धां मृदं सञ्चिनुयादित्यर्थः। *उक्तयाऽऽवृता स्वशाखोक्तया अनुष्ठानपद्धत्या। *अस्थिसंख्यानि षष्ट्यधिकशतत्रयमितानि। *ततः प्रभृतीति पुत्रादीनां दुहितृदौहित्रादीनां चेति शेषः। "आहिताग्निश्चेत् प्रवसन् म्रियेत पुनः संस्कारं कृत्वा शववदाशौचम्" इति प्रोक्तवासिष्ठवचनात् प्राथमिकदाहमपेक्ष्य वैदिकदाहस्य द्वितीयत्वमालोच्य पुनःपदम्। इदं च देहालाभेऽस्थ्नां दाहविधानमाहिताग्निभिन्नस्यापि, तदभावे पर्णशरविधानात्। पलाशवृन्ताभावे त्वाह—*कुर्यादिति। वृन्त-

पादाङ्गुलीषु दश वै एषा च प्रेतकल्पना ॥

मदनरत्ने यज्ञपार्श्वः—

*शिरस्यशीत्यर्धं दद्याद् ग्रीवायां तु दशैव तु ।
बाह्वोश्चैकशतं दद्याद्दश चैवाङ्गुलीषु च ॥
उरसि त्रिंशतं दद्याद्विंशतिं जठरोदरे ।
द्वादशार्धं वृषणयोरष्टार्धं शिश्न एव तु ॥
ऊर्वोश्चैकशतं दद्यात्त्रिंशतं जङ्घयोर्द्वयोः ।
पादाङ्गुलीषु द्वे दद्यादेतत्प्रेतस्य कल्पनम् ॥
मस्तके नारिकेरं तु अलाबुं तालुके तथा ।
पञ्चरत्नं मुखे न्यस्य जिह्वायां कदलीफलम् ॥
चक्षुषोस्तु कपर्दौ द्वौ नासिकायां तु कालकम् ।
कर्णयोर्ब्रह्मपत्राणि केशे वटप्ररोहकाः ॥
नालकं कमलानां तु आन्त्रस्थाने विनिक्षिपेत् ।
मृत्तिका तु वसा धातुर्हरितालकगन्धकौ ॥
शुक्रे तु पारदं दद्यात्पुरीषे पित्तलं तथा ।
संधीषु तिलपिष्टं तु मांसे स्याद्यवपिष्टकम् ॥
मधु स्याल्लोहितस्थाने त्वचास्थाने मृगत्वचा ॥
स्त(१)नयोर्जम्बीरे देये नासायां शतपत्रकम् ।
कमलं नाभिदेशे स्याद्वृन्ताके वृषणाश्रिते ॥
लिङ्गे च रक्तमूलं तु परिधानं दुकूलकम् ॥
गोमूत्रं गोमयं गन्धं सर्वौषध्यादि सर्वतः॥ इति ।

'क्रि(२)यानिबन्धे गारुडेऽप्येवमुक्त्वान्यदपि—

घृतं नाभ्यां प्रदेयं स्यात्कौपीने च त्रपु स्मृतम् ।
मौक्तिकं स्तनयोर्मूर्ध्नि कुङ्कुमेन विलेपनम् ॥

त्रिभागमाह—*चत्वारिंशादिति । *शिरसीति अन्त्येष्टिपद्धति-

---

(१) 'स्तनयोर्गुञ्जके' क० छ० (२) कंसान्तर्गतं नास्ति ग० ।

सिन्दूरं नेत्रकोणेषु ताम्बूलाद्युपहारकैः ।
सर्वौषधियुतं प्रेतं कृत्वा पूजां यथोदिताम् ॥

इदं निरग्नेरपि । तत्रैव वृद्धमनुः—

प्रोषितस्य तथा कालो गतश्चेद् द्वादशाब्दिकः ।
प्राप्ते त्रयोदशे वर्षे प्रेतकार्याणि कारयेत् ॥

बृहस्पतिः—

यस्य न श्रूयते वार्ता यावद् द्वादशवत्सरान् ।
कुशपुत्रकदाहेन तस्य स्यादवधारणा ॥

भविष्ये—

पितरि प्रोषिते यस्य न वार्ता नैव चागमः ।
ऊर्ध्वं पञ्चदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम् ॥
कुर्यात्तस्य तु संस्कारं यथोक्तविधिना ततः ।
तदादीन्येव सर्वाणि प्रेतकर्माणि कारयेत् ॥

द्वादशाब्दप्रतीक्षा पितृभिन्नविषयेति मदनरत्ने उक्तम् । *गृह्यकारिकायां तु—

तस्य पूर्ववयस्कस्य विंशत्यब्दोर्ध्वतः क्रिया ।
ऊर्ध्वं पञ्चदशाब्दात्तु मध्यमे वयसि स्मृता ॥
द्वादशाद्वत्सरादूर्ध्वमुत्तरे वयसि स्मृता ।
चान्द्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि वा सुतैः ॥
कुशैः प्रतिकृतिं दग्ध्वा कार्या शौचादिका क्रिया ॥

इत्युक्तम् । पराशरः—

देशान्तरगतो नष्टस्तिथिर्न ज्ञायते यदि ।
कृष्णाष्टमी ह्यमावास्या कृष्णा चै(१)कादशी च या ॥
उदकं पिण्डदानं च तत्र श्राद्धं च कारयेत् ॥

स्थप्रकारः । तत्रैव मनःशिलादिकमपि द्रष्टव्यम् । *गृह्येति ।

---

(१) 'चैकादशी तथा' क०छ० ।

*इदं मासज्ञाने ।

तत्राहिताग्नेः पूर्णाशौचम् । अनाहिताग्नेस्तु त्रिरात्रम्;

अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना स्वयम् ।
तदभावे पलाशानां वृन्तैः कार्यः *पुमानपि ॥
वेष्टितव्यस्तथा यत्नात् कृष्णसारस्य चर्मणा ।
ऊर्णासूत्रेण बद्ध्वा तु प्रलेप्तव्यो यवैस्तथा ॥
सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना ।
असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबान्धवैः ॥
एवं *पर्णशरं दग्ध्वा त्रिरात्रमशुचिर्भवेत् ॥

इति ब्राह्मोक्तेः । इदं त्रिरात्रं न दशाहमध्ये दाहे, तत्र *'प्रोषिते कालशेषः स्यात्' इत्युक्तेः; किंतु तदूर्ध्वम् । *तत्र पत्नीपुत्रयोः पूर्वम*गृहीताशौचयोर्दशाहाद्येव । *गृहीताशौचयोस्तु त्रिरात्रम् । पत्नीमृतौ भर्तुश्चैवं सपत्न्योश्चैवमिति स्मृत्यर्थसारे । अन्यसापिण्डानां तु *सर्वत्र

अयं पक्षः शिष्टपरिगृहीतः । *इदमिति । मासाद्यज्ञाने च पूर्वं ग्रन्थ एवोक्तम् । *पुमानपीति ।

शतैस्त्रिभिः षष्ट्यधिकैः शरवृन्तैर्विधानतः ।

इत्युत्तरार्धम् । *पर्णशरं पर्णः पालाशः तस्य शरः पर्णस्यवृन्तं तन्निमित्तं प्रतिरूपकमिति यावत् । *प्रोषिते इति । देशान्तरस्थे मृते कालशेषोऽवशिष्टः कालः शुद्धिहेतुरित्यर्थः । यदि कथञ्चिच्छरीरादेर्लौकिकाग्निदाहजलादिप्रक्षेपादिना अलाभेन दशाहमध्ये पर्णशरदाहः क्रियते तदापि न त्रिरात्रं, प्रोषितत्वस्याविवक्षितत्वात् । दशाहोर्ध्वमनाहिताग्नेर्विशेषमाह— *तत्रेति । *अगृहीतेति । द्वादशवर्षादिप्रतीक्षास्थले तत्पूर्वं मरणसन्देहादन्यत्र मरणाज्ञानाद्वाऽशौचस्याग्रहः । *गृहीतेति । मरणनिश्चयेनेत्यादि । *सर्वत्र आशौचग्रहाग्रहयोः ।

पर्णशरदाहे त्रिरात्रम् । तदाहाङ्गिराः—

देशान्तरमृतं श्रुत्वा *नाशौचं चेत्कथंचन ।

गृहीतमिति शेषः ।

कालात्ययेऽपि कुर्वीत दाहकाले दिनत्रयम् ॥ इति ।

स्मृत्यर्थसारे तु गृहीताशौचानां स्नानमात्रमुक्तम् । बह्वृचपरिशिष्टेऽपि—*अथातीतसंस्कारः स चेदन्तर्दशाहं स्यात्तत्रैव सर्वं समापयेदूर्ध्वमाहिताग्नेर्दाहात्सर्वमाशौचं कुर्यादन्येषु पत्नीपुत्रयोः पूर्वमगृहीताशौचयोः सर्व(१)माशौचम् । गृहीताशौचयोः कर्माङ्गं त्रिरात्रमिति । षडशीतावप्येवम् । विश्वादर्शे तु 'प्रतिकृतिदहने त्वाग्निदे स्यात्त्रिरात्रम्' इत्युक्तम् । *द्वादशवर्षादिप्रतीक्षोत्तरं दाहे

*नाशौचमिति । गृहीतमिति शेषः । ननु दशाहमध्ये पर्णशरदाहे कुतो न त्रिरात्रं प्रोषिते कालशेषः स्यादित्यस्यान्यत्र सावकाशत्वादित्याशङ्क्याह-*अथेति । अग्निषु अस्थिसंस्कारे सपिण्डानां त्र्यहं गृहीताशौचानां स्नानमात्रं बोध्यम्, 'अग्निदे' इति क्त्वाप्रत्ययेन समानकर्तृकत्वलाभात् । अन्येषां तु प्रोषितमरणरीत्याऽऽशौचम् । अत्र सत्यपि क्त्वाप्रत्यये समानकर्तृकत्वं न विवक्षितम्, "पत्नीपुत्रयोः कर्माङ्गं त्रिरात्रम्" इति परिशिष्टादित्यस्वरसः । *द्वादशेति । पत्नीपुत्रभिन्नसपिण्डानां द्वादशाब्दोत्तरं दाहे त्रिरात्रं तत्र मरणकालानवधारणेन कालविशेषव्यवस्थितत्रिरात्राद्यतिक्रान्ताशौचपक्षासम्भवेन प्राथमिकत्रिरात्रपक्षस्यैवोचितत्वात् । अन्यत्र तु व्यवस्थयाऽतीतसंस्कारः, अस्थिपालाशयसंस्कारः, त्रिरात्राद्यतिक्रान्ता-

---

(१) 'दशरात्रं' क० छ० सर्वं दशाहमित्यर्थः । इदं सपिण्डानाम् । दुहितृदौहित्रादयोऽपि स्वस्वाशौचभागिनः स्युः "आहिताग्निश्चेत् प्रवसन् म्रियेत पुनः संस्कारं कृत्वा शववदाशौचम्" इति वसिष्ठोक्तेः । अन्येष्वनाहिताग्निषु सपिण्डानामगृहीताशौचानां त्रिरात्रम् । गृहीताशौचानां तु स्नानमात्रमित्यनन्तभट्टाः ।

तु पुत्रादीनां सर्वेषां त्रिरात्रमिति कल्पतरुदिवोदासादयः

अथ *प्रेतसंस्कारे कालः । हेमाद्रौ गार्ग्यः—

प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् ।
आशौचमध्ये संस्कारे दिनं शोध्यं तु संभवे ॥
आशौचविनिवृत्तौ चेत्पुनः संस्क्रियते मृतः ।
संशोध्यैव दिनं ग्राह्यमूर्ध्वं संवत्सराद्यदि ॥
प्रेतकार्याणि कुर्वीत श्रेष्ठं तत्रोत्तरायणम् ।
कृष्णपक्षश्च तत्रापि वर्जयेत्तु दि(१)नक्षयम् ॥

वाराहे—

चतुर्थाष्टमगे चन्द्रे द्वादशे च विवर्जयेत् ।
प्रेतकृत्यं व्यतीपाते वैधृतौ परिघे तथा ॥
करणे विष्टिसंज्ञे च शनैश्चरादिने तथा ।
त्रयोदश्यां विशेषेण जन्मताराश्रये तथा ॥
जन्मदशमैकोनविंशानि ज(२)न्मताराः ।

भारते—

नक्षत्रे तु न कुर्वीत यस्मिञ्जातो भवेन्नरः ।
न प्रौष्ठपदयोः कार्यं तथाऽऽ*ग्नेये च भारत ॥
* दारुणेषु च सर्वेषु *प्रत्यरे च विवर्जयेत ॥

काश्यपः—

भरण्यार्द्रामघाश्लेषामूलं द्विचरणानि च ।

शौचपक्षा एवेति । अन्ये तु गृहीताशौचानामगृहीताशौचानां वा
सर्वेषां पुत्रादिसपिण्डानां सर्वत्र स्वाशौचकालादूर्ध्वं प्रतिकृतिदाहे
त्रिरात्रमित्याहुः । *प्रेतसंस्कारे इति । त्रिपक्षादिक्रियमाणस-
पिण्डने यथोचितो निषेधकालो वर्ज्य इति बोध्यम् । *आग्नेयं
कृत्तिका । *दारुणानि आर्द्राऽऽश्लेषाज्येष्ठामूलानि । *प्रत्य-

---

(१) 'दिनत्रयम्' क०   (२) 'जन्मताराश्रयं' क० छ०

प्रेतकृत्येऽतिदुष्टानि धनिष्ठाद्यं च पञ्चकम् ॥
फाल्गुनीद्वितयं रोहिण्यनूराधापुनर्वसू ।
आषाढे द्वे विशाखा च भानि द्विचरणानि च ॥
(१)एतानि किञ्चिद्दुष्टानि सम्भवे सति वर्जयेत् ॥

ज्योतिर्नारदः--

चतुर्दशीं तिथिं नन्दां भद्रा शुक्रारवासरौ ।
सितेज्ययोरस्तमयं *द्व्यङ्घ्रिभं विषमाङ्घ्रिभम् ॥
शुक्लपक्षं च संत्यज्य पुनर्दहनमुत्तमम् ।
वसूत्तरार्धतः पञ्चनक्षत्रेषु त्रिजन्मसु ॥
पौष्णब्रह्मर्क्षयोश्चैव दहनात्कुलनाशनम् ॥

अस्यापवादमाह तत्रैव वैजवापः—

प्रेतस्य साक्षाद्दग्धस्य प्राप्ते त्वेकादशेऽहनि ।
नक्षत्रतिथिवारादि शोधनीयं न किंचन ॥
*युगमन्वादिसंक्रान्तिदर्शे प्रेतक्रिया यदि ।
दैवादापतिता तत्र नक्षत्रादि न शोधयेत् ॥

विश्वप्रकाशेऽपि—

गुरुभार्गवयोर्मौढ्ये पौषमासे मलिम्लुचे ।
नातीतः पितृमेधः स्याद्गङ्गां गोदावरीं विना ॥

दानमपि तत्रैवोक्तम्—

भद्रायां भूमिदानं स्यात्त्रिपादर्क्षे हिरण्यदः ।

राणि जन्मनक्षत्रात् पञ्चमचतुर्दशत्रयोविंशानि । *द्व्यङ्घ्रिभमिति । द्विपुष्करात्रपि वर्ज्यौ प्रेतश्राद्धं प्रकृत्य—

नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ।
तत्र श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥

इत्यादिवचनात् । *युगेति । प्रेतक्रियायां दैवात् युगादि

---

(१) 'इदमर्धं नास्ति ग०'

वारेषु तत्तद्वर्णं तु वासोदानं विधीयते ॥
धनिष्ठापञ्चकमृते पञ्चरत्नानि दापयेत् ।
एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकम् ॥
नवषट्त्रिपलं वापि दद्याद्विप्राय शक्तितः ॥

इत्यलं प्रसङ्गेन ॥

हेमाद्रौ वृद्धमनुः—

अमृतं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकम् ।
प्रायश्चित्तमसौ स्मार्तं कृत्वाग्नीनादधीत च ॥
जीवन्यदि समागच्छेद् घृतकुम्भे निमज्ज्य तम् ।
उद्धृत्य स्नापयित्वाऽस्य जातकर्मादि कारयेत् ॥
द्वादशाहं व्रतचर्या त्रिरात्रमथवास्य तु ।
स्नात्वोद्वहेत तां भार्यामन्यां वा *तदभावतः ॥
अग्नीनाधाय विधिवद् व्रात्यस्तोमेन वा यजेत् ।
अथैन्द्राग्नेन पशुना गिरिं गत्वा च तत्र तु ॥
इष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः ॥

अनाहिताग्नेस्तु चरुः । मृ(१)तवार्ताश्रवणे त्वाश्वलायनः—

‘सुरभय एव यस्मिन् जीवे मृतशब्दः’ इति । यस्य तु जीवत एव मृतिवार्तां श्रुत्वा स्त्रिया सहगमनं कृतं तदा तद्वैधमेव, भर्तुर्मरणज्ञानस्यैव निमित्तत्वात् प्रमात्वस्य गौरवेणायुक्तत्वाच्चेति केचित् । तन्न, मरणज्ञानस्य निमित्तत्वेतीतानागतयोरपि त(२)थात्वापत्तेः, भर्तुर्वैधदाहाभावेन तस्याः सहगमनाभावाच्च । तस्मादाशौचवज्ज्ञातमरणस्यैव निमित्तत्वम् । नचात्र तदस्ति । परं काम्यं

मासौ तिथ्यादि न शोध्यम्, नतु शुद्धकाले तदनुष्ठानसम्भवे तत्र निषेधाभाव इत्यर्थः । *तदभावत इति । सहगमनादिना-

---

(१) ‘मृतवार्तामात्रश्रवण इत्याश्वलायनः’ क० छ०

(२) ‘तत्रापत्तेः’ ग०

मरणमस्तु । अत आत्महननदोषोऽस्तीति तातपादाः ।

तथा सर्पसंस्कारे कृते त्रिरात्रमाशौचम् । तद्विधिं चाह शौनकः—

अथ वक्ष्यामि सर्पस्य संस्कारविधिमुत्तमम् ।
सिनीवाल्यां पौर्णमास्यां पञ्चम्यां वापि कारयेत् ॥
कृतसर्पवधो विप्रः पूर्वजन्मनि वा यदि ।
वधं प्रख्यापयेत्पापी चरेत्कृच्छ्रांश्चतुर्दश ॥
विप्राय *लोहदण्डं च तन्मूल्यं वापि दापयेत् ॥
(या(१)ज्ञवल्क्योऽपि *"उरगेष्वा*यसो दण्डः" इति)

मूल्यमाह—

निष्कत्रयं द्विनिष्कं वा निष्कमेकं कनीयसम् ।
अनुमत्यादिकर्तॄणां निष्कमर्धं तदर्धकम् ॥

इदं स्वर्णरूप्ययोः शक्त्या ज्ञेयम् । संस्कारमाह—

प्रियङ्गुव्रीहिगोधूमैस्तिलपिष्टेन वा पुनः ।
कृत्वा सर्पाकृतिं शूर्पे निधाय प्रार्थयेदहिम् ॥
एहि पूर्वमृतः सर्प अस्मिन्पिष्टे समाविश ॥
संस्कारार्थमहं भक्त्या प्रार्थयामि समाहितः ॥
वस्त्रोपवीतगन्धाद्यैः संपूज्य च हरेद्बहिः ।
कुर्यात्संस्कारसंकल्पं प्राणायामपुरःसरम् ॥
यज्ञोपवीतिना कार्यं सर्पसंस्कारकर्म तु ।
लौकिकाग्निं प्रतिष्ठाप्य समिदाधानमाचरेत् ॥
ततोऽग्नेराग्निदिग्भागे भूमिं संप्रोक्ष्य वारिभिः ।
चितिं कृत्वाथ संस्तीर्य कुशैराग्नेयकाग्रकैः ॥

ऽन्यथा वा मरणात् । *लोहं सुवर्णम् । सुवर्णपर्यायेषु तस्य पाठादिति शङ्कावारणायाह—*उरगेष्विति । *आयसः ती-

---

(१) कंसान्तर्गतं नास्ति क० ग०

पर्युक्ष्याग्निं परिस्तीर्य परिषिच्य समर्चयेत् ।
कृत्वेध्माधानमाघारौ चक्षुषी च यथाविधि ॥
सर्पं गृहीत्वा यत्नेन चितिमारोपयेत्सुधीः ।
स्रुवेण जुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः ॥
सर्पास्ये जुहुयादाज्यं व्याहृत्या च समग्रया ।
आज्यशेषं स्रुवेणैव सर्पदेहे निषेचयेत् ॥
चमसस्थैर्जलैः सर्पं व्याहृत्याभ्युक्ष्य पाणिना ।
अग्ने रक्षाण इत्यनया सर्पायाग्निं प्रदापयेत् ॥
उपतिष्ठेद्दह्यमानं नमोस्तु सर्पमन्त्रतः ।
ज्ञानतोऽज्ञानतो वापि कृतः सर्पवधो मया ॥
पूर्वजन्मनि वा सर्प तत्सर्वं क्षन्तुमर्हसि ।
क्षीराज्येन ततश्चाग्निं प्रोक्ष्य व्याहृतिभिर्जलैः ॥
नास्थिसंचयनं कुर्यात् स्नात्वाचम्य गृहं व्रजेत् ।
ब्रह्मचर्यादिकं कार्यं त्रिरात्राशौचमिष्यते ॥
सचैलं तु चतुर्थेऽह्नि स्नात्वा विप्रान् समर्चयेत् ।
सर्पोऽनन्तस्तथा शेषः कपिलो नाग एव च ॥
कालिकः शङ्खपालश्च भूधरश्चेति नामभिः ।
गन्धपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेद् द्विजान् ॥
घृतपायसभक्ष्यैश्च द्विजानष्टौ तु भोजयेत् ।
एवं कृते विधानेन सर्पसंस्कारकर्मणि ॥
सर्पहिंसाकृतात्पापान्मुच्यते नात्र संशयः ॥
इति सर्पसंस्कारः ॥

क्वचित्तु जीवतोप्यन्त्यकर्माशौचं च कार्यम् । यथा—

क्ष्णमान्तोऽयोमयः । तथा च मनुः—

अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः ।

पराशरः- हत्वा मूषकमार्जारसर्पाजगरडुण्डुभान् ।
कृसरं भोजयेद्विद्वान् लोहदण्डश्च दक्षिणा ॥ इति ।

*प्रायश्चित्तानिच्छोः पतितस्य घटस्फोटे,
पतितस्योदकं कार्यं सपिण्डैर्बान्धवैः सह ।

---

*प्रायश्चित्तानिच्छोरिति । प्रायश्चित्तेच्छोर्विना प्रायश्चित्तं मरणे तूक्तम् । गर्भहननादीनि च पतननिमित्तानि त्यागविधौ ग्राह्याणि । येतु बलात्कारेण म्लेच्छीकृताः मासोषिते प्राजापत्यम्, आहिताग्नेः पराकं वाग्रायणं वा । वत्सरोषिते चान्द्रपरातकानुपातकानि अभ्यस्तान्युपपातकानि च । स्त्रीणां पतितानामाह गौतमः— "ब्रह्महसुरापगुरुतल्पगमातापितृयोनिसम्बद्धागस्तेननास्तिकनिन्दितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः पातकसंयोजकाश्च तैश्चाब्दं समाचरन्" इति । ब्रह्महादयः त्रयः प्रसिद्धाः । मातृयोनिसम्बद्धागः । पितृयोनिसम्बद्धागः । स्तेनः स्तुवर्णस्तेनः। नास्तिकः वेदशास्त्रादिष्वप्रामाण्यनिश्चयवान् गुरुवेदवचनादावविश्वस्तश्च । निन्दितकर्मणां यत्कर्माभ्यासेन महापापसाम्यं भवति तादृशस्योपपापादेरसकृत्कर्ता । पतितात्यागी । तत्र पतितत्यागो द्विधा, विशेषणस्य विशेष्यस्य वा त्यागात् । तत्राद्यः पतितेन विधिवन्निष्कृतौ कृतायां पातित्यरूपविशेषणत्यागात् । द्वितीयस्तु विशेष्यस्य पतितस्य घटस्फोटे तत्त्यागात् । तदन्यतरशून्यः तत्सपिण्डः । अत एव प्रायश्चित्तानिच्छोरिति विशेषणं सङ्गच्छते । पतितसंसर्गात्यागीति तु न, पतितपदे तत्संसर्गलक्षणापत्तेः "तैश्चाब्दं समाचरन्" इति संसर्गिणः पृथगुपादानाच्च । अपतितत्यागी निश्चितपापशून्यस्य द्वेषादिना मिथ्याभिशंसनेन बहिष्कर्ता । यथा कृतघटस्फोटस्यापि कृतविहितप्रायश्चित्तानन्तरं पुनर्विधिवदसङ्गृहीता । पातकसंयोजकः पतनीयेषु कर्मसु उपदेशादिना प्रवर्तक इत्यर्थः । एवमितरे वेदाविप्लावकादयः पतिता अन्यतो बोध्याः । अत्रेदं सकलधर्मशास्त्रग्रन्थसम्मतं ग्रन्थकारसम्मतं च परमरहस्यम्— प्रायश्चित्तानिच्छुः तदिच्छुरपि प्रायश्चित्तानर्हश्च तत्सपिण्डानां घट-

स्फोटार्हः । तदकरणे तेषां पतितात्यागित्वेन पातित्यापातात् । तत्राद्यः पश्चात्तापशून्यतया प्रायश्चित्तानर्हः—

कृत्वा पापं न गूहेत गूहमानं विवर्द्धते ।
स्वल्पं वाऽपि प्रभूतं वा धर्मविद्भ्यो निवेदयेत् ॥

प्रायश्चित्ते समुत्पन्ने धीमान् सत्यपराक्रमः ।
मुहुरार्तवसंयुक्तः शुद्धिं याचेत मानवः ॥ इति,
प्रायश्चित्तमकुर्वाणाः पापेषु निरता जनाः ।
अपश्चात्तापिनः कष्टान् नरकान् यान्ति दारुणान् ॥

इति याज्ञवल्क्याच्च ॥ आहार्यानुतापेन दत्तमपि प्रायश्चित्तं वृथा चेष्टेति सौमनसं ग्राह्यम् । अन्त्यश्च—

विधेः प्राथमिकादस्माद्द्वितीये द्विगुणं भवेत् ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिः ॥

इत्याद्युक्तः । युगपत्क्रमाद्वा द्वितीयादिमहापापे तन्त्रेण प्रायश्चित्तं तद्द्विगुणादि । एवं यत्र क्रमेण प्रायश्चित्तान्यपि त्रीणि कृतानि तत्रोभयत्र चतुर्थे निमित्ते प्रायश्चित्ताभावः । तत्र घटस्फोटानन्तरं प्रायश्चित्ताभावात् सङ्ग्रहो न सम्भवति । तस्माद्यदि कश्चित्प्रायश्चित्ताधिकारी घटस्फोटानन्तरमनुतापपूर्वकं प्रायश्चित्तं कुर्यात्तन्मात्रपरः सङ्ग्रहविधिरिति । परन्तु इदानीं सङ्ग्रहार्थो न लक्ष्यते चरितव्रत आयाते इत्यत्र व्रतशब्दोपादानात्तत्प्रत्याम्नायभूतदक्षिणाद्याचरणमपि न कृतघटस्फोटशोधकं व्रतानुकल्पानामिहाविधानात् । तस्माद्घटस्फोटानन्तरं कस्यापि सङ्ग्रहो न कार्य इति । पुंसां स्त्रीणां च महापातकातिपातके इत्यादिप्रायश्चित्तानिच्छवः ये वा ते प्रायश्चित्तेच्छवोऽपि गवादिहिंसनाः उच्छिष्टभोजनमार्जनादिकारिणः खरोष्ट्रविड्वराहाद्यामिषाशिनो म्लेच्छस्त्रीभिः सङ्गतिसहितभोजनादिकारिणः, एवंजातीयकाः । ये वा कामतो म्लेच्छीभूतास्ते परित्यागविधौ ग्राह्याः । उदकदानादेरुपलक्षणं ब्राह्मणैरि-

२३०॥

निन्दितेऽहनि *सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ ॥
*दासी घटमपां पूर्णं पर्यस्येत्*प्रेतवत्तदा ।
अहोरात्रमुपासीरन्नाशौचं बान्धवैः सह ॥

इति मनूक्तेः । निन्दिते रिक्तादौ । अपरार्के वसिष्ठोऽपि—"वेदविप्लावकशूद्रयाजकोत्तमवर्णवर्गपतितास्तेषां पात्रनिनयनमपात्रसंस्कारादकृत्स्नं पात्रमादाय दासोऽसवर्णपुत्रो वा *बन्धुरसदृशो वा गुणहीनः सव्येन पादेन प्रवृत्ताग्रान् दर्भान् *लोहितान् वोपस्तीर्यापः पूर्णं पात्रमस्मै निनयेन्निनेतारं चास्य प्रकीर्णकेशा ज्ञातयोऽ(१)न्वालभेरन्नपसव्यं कृत्वा गृहेषु स्वैरमापद्येरन्नत ऊर्ध्वं तेन तं धर्मयेयुस्तद्धर्माणस्तं धर्मयन्तः" इति । उत्तमवर्णा ब्राह्मणादयः तेषां वर्गः समूहस्तस्मात्पतिता ब्रह्महादयः । अपात्रसंस्कारः कुत्सितपात्रसमूहः । प्रवृत्ताग्राः

त्युपलक्षणम् । बान्धवैरिति केचित् सहमिलितैरित्यर्थः । *सायाह्ने अन्हः पञ्चमे भागे । घटनिनयनं च ज्ञातिभिः कार्यम्,

दासीकुम्भं बहिर्ग्रामान्निनयेरन् स्वबान्धवाः ।
पतितस्य बहिष्कुर्युः सर्वकार्येषु चैव तम् ॥

इति योगीश्वरवचनात् रिक्तादिसायान्हे हि तदर्थः । जीवत एव पतितस्य स्वज्ञातयो बान्धवा मातृपक्षाश्च ते सर्वे सन्निपत्य सपिण्डादिप्रेषितया दास्याऽऽनीतमप्पूर्णं घटं ग्रामाद्बहिर्निनयेयुरिति हि तदर्थः । अथवास्यैव सपिण्डादिनियुक्ता घटं निनयेदित्याह—*दासीति । दासी प्रेष्या । *प्रेतवत् । अपसव्यदक्षिणामुखत्वयोः प्राप्त्यर्थम् । *बन्धुरो ब्रह्मबन्ध्वादिस्तत्सदृशः ततोऽपि निन्द्यः । *लोहितास्तृणभेदाः । आपद्येरन्नित्य-

---

(१) 'न्वारभेरन्' क०

छिन्नाग्राः । स्वैरं यथेच्छं *धर्मादिकार्यं कुर्युः । अस्माद्वचनसामर्थ्यात्पात्रनिनयनात्प्राक्पतितज्ञातीनां धर्मकार्येऽधिकारो नास्तीत्यपरार्कः । *"तस्य विद्यागुरून् योनिसंबन्धांश्च संनिपात्य सर्वाण्युदकादिप्रेतकार्याणि कुर्युः, पात्रं चास्य विपर्यस्येयुर्दासः कर्मकरो वा*ऽवकरादमेध्यं पात्रमानीय दासीघटात्पूरयित्वा दक्षिणाभिमुखः पदा विपर्यस्येदमुमनुदकं करोमीति नामग्राहं सर्वेऽन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो योनिसम्बद्धाश्च वीक्षेरन् अप उपस्पृश्य ग्रामं प्रविशेयुः" इति गौतमोक्तेश्च । उदकादीत्युक्तेर्दाहनिवृत्तिः । प्रेतकार्याण्येकादशाहश्राद्धान्तानि । दास्याऽऽहृतोऽम्बुघटो दासीघटः । *तेनोदकेनामेध्यपात्रं पूरयित्वा *दासादिर्न्युब्जं वामपादेन कुर्यादिति हरदत्तः । अत्र नामग्राहवचनमुदकादिप्रेतकार्ये त(१)द्वत्वार्थम् । तेन तत्तूष्णीं भवति । एतच्च प्रायश्चित्तानिच्छोः । "तस्य गुरोर्बान्धवानां राज्ञश्च समक्षं दोषानभिख्याप्य तमनुभाष्य पुनः पुनराचारं लभस्वेति स यद्येवमप्यनवहितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येत्"

स्यार्थमाह—*धर्मादीति । कार्यमित्याह—*तस्येति । *अवकारो ग्रामात्करः निनयनं न्युब्जीकरणं तच्च सव्येनेत्युक्तेः वामपादेनेत्याह—*तेनेति । *दासादिरिति । ज्ञातिरपि बोध्यः । कृतघटस्फोटेन तृणाद्यन्तरितसम्भाषणे "अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं सावित्रीं जपन् ज्ञानपूर्वकं तु त्रिरात्रम्" इति मिताक्षरोक्तं प्रायश्चित्तम् । एवं सहासनादौ विहितं तत्कार्यम् स्त्रीणां तु नीचाभिगमनं गर्भपातनं भर्तृहिंसनं—

विशेषपतनीयानि स्त्रीणामेतानि च ध्रुवम् ।

---

(१) 'तद्वर्जनत्वार्थम्' ग०

इति शङ्खोक्तेः। जीवन्तमेवोद्दिश्य पिण्डोदकश्राद्धानि नाम्ना दद्यादित्यपरार्कः ॥

कृतप्रायश्चित्तस्य घटस्फोटे कृतेऽपि संग्रहविधिमाह गौतमः—"यस्तु प्रायश्चित्तेन शुद्ध्येत्तस्मिञ्छुद्धे शातकुम्भमयं पात्रं पुण्यह्रदात्पूरयित्वा स्रवन्तीभ्यो वा तत एनमु*पस्पर्शयेयुरथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्य जपेच्छान्ता द्यौः शान्ता पृथिवी शान्तं विश्वमन्तरिक्षं यो रोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानीभि*स्तरत्समन्दीभिः कूष्माण्डैश्चाज्यं जुहुयाद्धिरण्यं दद्याद्गां चाचार्याय। यस्य तु प्राणान्तिकं प्रायश्चित्तं स मृतः शुद्ध्येत्सर्वाण्येव तस्मिन्नुदकादीनि प्रेतकर्माणि कुर्युरेतदेव शान्त्युदकं सर्वेषूपपातकेषु" इति। घटस्फोटोत्तरं प्राणान्तिकप्रायश्चित्ते कृते तु मृत एव शुद्धयेन्न तत्र संग्रहविधिः। अतस्तेन विनापि प्रेतकर्म कुर्यादित्यर्थः। उपपातकेष्वपि घटस्फोटे कृते एवं कार्यमित्यर्थः। या-

---

इति योगीश्वरोक्तासाधारणपतननिमित्तानां मध्ये "चतस्रस्तु परित्याज्याः" इत्यादिसपुरस्कृतपरित्यागवचनात्तासां प्रायश्चित्तानिच्छूनां चेन्न गृहवासादिजीवनहेतूच्छेदेन त्यागोऽन्यासां तु तादृशानां त्यागेऽपि न जीवनहेतूच्छेदः,

पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः।
वासो गृहान्तिके देयमन्नवासः सरक्षणम् ॥

इति योगीश्वरोक्तेः। तृणपर्णमयं कुटीगृहवासः प्रधानगृहान्तिके देयम्। तथा प्राणधारणमात्रमन्नं मलिनं च वस्त्रं पुनः पुरुषान्तरोपभोगनिवारणसहितामित्यर्थः। एष एवेति त्यागसङ्ग्रहाभयातिदेशवशात् कृतप्रायश्चित्तानां स्त्रीणां सङ्ग्रहोऽपि ग्राह्यः। *उपस्पर्शयेयुः ह्रदादौ स्नापयेयुः। *तरत्समन्दीभिरिति।

ज्ञवल्क्यः—

*चरितव्रत आयाते निनयेर*न्नवं घटम् ।
जुगुप्सेरन्नचाप्येनं *संवसेयुश्च सर्वशः ॥

कृतघटस्फोटस्यैवायं परिग्रहविधिरिति मिताक्षरायामपरार्के च । अन्यथा प्रायश्चित्तमात्रे एतत्प्रसङ्गात् । मनुरपि घटस्फोटमुक्त्वा—

निवर्तेरंस्ततस्तस्मात्संभाषण(१)सहासनैः ।

इत्युक्त्वा—

प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम् ।
तेनैव सार्धं *प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥

इति तच्छब्दं प्रायुङ्क्त । अपरार्के वसिष्ठोपि—"पतितानां चरितव्रतानां प्रत्युद्धारोऽथाप्युदाहरन्ति—

अग्रेऽप्युद्धरतां गच्छेत्क्रीडन्निव हसन्निव ।
पश्चात्पातयतां गच्छेच्छोचन्निव रुदन्निव ॥

इत्याचार्यमातृपितृहन्तारस्तत्प्रसादादपगतपापा एषा तेषां प्रत्यापत्तिः । पूर्णहृदात्प्रवृत्ताद्वा सकाञ्चनं पात्रे माहेयं वाऽद्भिः पूरयित्वापोहिष्ठीयाभिरेनमद्भिरभिषिञ्चेयुः, जपेदिति वर्तते । गौतमेन शान्त्युदककरणं विशेष उक्तः । सङ्ग्रहविधायकमाह—*चरितव्रते इति । *नवम् अनुपहतम् । *संवसेयुरिति । इदं तु बोध्यम्—

शरणागतबालस्त्रीहिंसकान् संवसेन्न तु ।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥

इति तु संवासापवादः । चीर्णव्रतान् प्रायश्चित्तेन क्षीणदोषान् । व्यभिचारिणीवधे प्रायश्चित्तस्याल्पत्वेऽपि वाचनिकोयं व्यवहारानिषेधः किमिदं वचनं न कुर्यात् नास्ति वचनस्यातिभार

---

(१) 'सहासने' क० छ०

सर्व एवाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्यातः" इति । प्रत्युद्धारः परिग्रहः । तत्रोद्धरतां हसन्निवाग्रेसरः स्यात् पातयतां घटस्फोटं कुर्वतां शोचन्निव पश्चाद्गच्छेत । मातापित्रादिहन्तॄणां परिग्रहो न कार्यः । तत्प्रसादे सति चीर्णव्रतानां कार्यः । प्रवृत्तं निर्झरः । पुत्रजन्मनेत्यभिषेकोत्तरं जातकर्मादयः संस्काराः पुत्रजन्मवत्कार्या इत्यपरार्को व्याचख्यौ । अत एव विज्ञानेश्वरः—

*घटेऽपवर्जिते ज्ञातिमध्यस्थो यवसं गवाम् ।
प्रदद्यात्प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया ॥

इत्यत्र गवां भक्षणाभावे पुनर्व्रतं चरेदित्येतत्प्रकृते, एवं चरितव्रतविधौ विशेषोऽयमिति वदन् घटस्फोटोत्तरं परिग्रह एवैतन्न सर्वत्रेत्याह । तस्मात्कृतेऽपि घटस्फोटे प्रायश्चित्तं परिग्रहविधिः पुनःसंस्कारो भवतीति सिद्धम् । तथा जीवच्छ्राद्धे कृते हेमाद्रौ बौधायनः—'तत्राशौचं दशाहं स्यात्' इत्यलं प्रसङ्गेन ।

एवं सापवादे आशौचे उक्ते प्रतिज्ञातं भिन्नेऽप्यन्त्यकर्मणि साधारणं किञ्चिदुच्यते । तत्राधिकारिणः (१)श्राद्धप्रकरणे प्रागुक्ताः सर्वाभावे धर्मपुत्रो वा कार्यः,

*अपुत्रेण सुतः कार्यो *यादृक् तादृक् प्रयत्नतः ।
पिण्डोदकक्रियाहेतोर्नामसंकीर्तनाय च ॥

इति । *प्राशयेयुः निनयेयुः । *घटेऽपवर्जिते-ह्रदादेरुद्धृत्य पूर्णकुम्भेऽपनिनीते । गोभिः संस्कारः तद्दत्तयवसभक्षणमेव । यवसः शिरसाऽऽनेयः "स्वशिरसा यवसमादाय गोभ्यो दद्यात्"इति हारीतवचनात् ।*यादृगिति । पतितादिभिन्न इति

---

(१) 'श्राद्धप्रकरणे' नास्ति क०छ० ।

इति व्यासवचनात् । गृह्यपरिशिष्टे—

*असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
प्रथमेऽहनि यो दद्यात्स *दशाहं समापयेत् ॥

दद्या*त्पिण्डमिति शेषः । भविष्ये—

यत्राद्यो दीयते पिण्डस्तत्र सर्वं समापयेत् ।

ब्राह्मेऽपि—

प्रथमेऽहनि यो दद्यात्प्रेतायान्नं समाहितः ।
अन्नं नवसु चान्येषु स एव प्रददात्यपि ॥

विज्ञानेश्वराद्यस्तु 'केचित्तु *अग्निं दद्यात्' इति व्याचक्षते ।

सगोत्रो वाऽसगोत्रो वा योऽग्निं दद्यात्सखे नरः ।
सोऽपि कुर्यान्नवश्राद्धं शुद्ध्येत्तु दशमेऽहनि ॥

इति दिवोदासीये वचनाच्च ।

तत्रैव—

दृष्ट्वा स्थानस्थमासन्नमर्धोन्मीलितलोचनम् ।
भूमिष्ठं पितरं पुत्रो यदि दानं प्रदापयेत् ॥
तद्विशिष्टं गयाश्राद्धादश्वमेधशतादपि ॥

तानि यथा—

मोक्षं देहि हृषीकेश मोक्षं देहि जनार्दन ।
मोक्षधेनुप्रदानेन मुकुन्दः प्रीयतां मम ॥

च स्मृत्यन्तरादवगन्तव्यम् । *असगोत्र इति । यः संनिकृष्टः सगोत्रासन्निधानात् प्रथमेऽहनि दद्यात्स एव पश्चात्तत्सान्निधानेऽपि दद्यान्नान्य इत्यर्थः। *दशाहामिति। तद्दानमिति शेषः। प्रथमदिनारब्धकर्मण एव दशाहसमाप्त्यन्वयप्रतीतेर्दाहस्य तदसम्भवात् पूरयति—*पिण्डमिति । प्रेतोद्देश्यकत्यागार्थोऽत्र ददातिः । *आग्निमिति ! अधिकार्यसन्निधानेऽन्येन दाहे कृते प्रथमपि-

इति मोक्षधेनुमन्त्रः ।

ऐहिकामुष्मिकं यच्च सप्तजन्मार्जितं ऋणम् ।
तत्सर्वं शुद्धिमायातु गामेतां ददतो मम ॥

इति ऋणधेनोः ।

आजन्मोपार्जितं पापं मनोवाक्कायकर्मभिः ।
तत्सर्वं नाशमायातु गोप्रदानेन केशव ॥

इति पापधेनोः । भारते—

शुक्लपक्षे दिवा भूमौ गङ्गायां चोत्तरायणे ।
धन्यास्तात मरिष्यन्ति हृदयस्थे जनार्दने ॥

हेमाद्रौ वाराहे—

*व्यतीपातोऽथ संक्रान्तिस्तथैव ग्रहणं रवेः ।
पुण्यकालास्तदा सर्वे यदा मृत्युरुपस्थितः ॥

व्यासः--

आसन्नमृत्युना देया *गौः सवत्सा तु पूर्ववत् ।
तदभावे तु गौरेव नरकोत्तारणाय वै ॥
तदा यदि न शक्नोति दातुं वैतरणीं तु गाम् ।
श(१)क्तोऽन्योऽरुक्तदा दत्त्वा दद्याच्छ्रेयो मृतस्य तु ॥

ण्डोपक्रमात् प्राक् पुत्रादेरागमनेऽपि दाहकर्तृभिन्नतया निषेधः । अधिकमग्रे । यदि दाहकर्ता दशाहमसमाप्य मृतस्तदा दशाहकर्त्रा दाहोऽप्यावर्तनीयः । तदा देशान्तरे प्रथमदाहे सहागताया अपि द्वितीयदाहे सहगमनं भवेदेवेत्याहुः । *व्यतीपात इति दानस्यावश्यकत्वार्थम् । *गौरिति । वैतरणीं दत्त्वा--

प्रदत्तासि मया देवि तर्तुं दुस्तरकाम्यया ।
तावत्कालं प्रतीक्षस्व यावदागमनं मम ॥

इति प्रार्थयेत् । अरुगिति च्छेदः । मृतस्याभ्युदयार्थमिति

---

(१) 'शक्तोऽन्य उक्तगां दत्त्वा' ग० ।

मदनरत्ने जातूकर्ण्यः—

*उत्क्रान्त्यादीनि दानानि दश दद्यान्मृतस्य तु ।
गोभूतिलहिरण्याज्यं वासो धान्यं गुडानि च ॥
रौप्यं लवणमित्याहुर्दश दानान्यनुक्रमात् ॥
एतानि दश दानानि नराणां मृत्युजन्मनोः ।
कुर्यादभ्युदयार्थं तु प्रेतेऽपि हि परत्र वै ॥

ब्राह्मे--

ताम्रपात्रं तिलैः पूर्णं (१)प्रस्थमात्रैर्द्विजाय तु ।
सहिरण्यं च यो दद्याच्छ्रद्धावित्तानुसारतः ॥
सर्वपापविशुद्धात्मा लभते गतिमुत्तमाम् ।
उत्क्रान्तवैतरिण्यौ च दशदानानि चैव हि ॥
प्रेतेऽपि कृत्वा तं प्रेतं शवधर्मेण दाहयेत् ॥

तत्रैव परिशिष्टे--

म्रियमाणस्य कर्णे तु *पुण्यमन्त्रान् (२)जपेत्ततः ।

क्रियानिबन्धे गारुडे त्वष्टौ दानान्युक्तानि ।

तुलसीसंनिधौ कृत्वा शालग्रामशिलां तथा ।
तिला लोहं हिरण्यं च कार्पासं लवणं तथा ॥
सप्तधान्यं क्षितिर्गाव एकैकं पावनं स्मृतम् ॥ इति ।

दशदानवैतरिणीधेनूत्क्रान्तधेनुदानादि भट्टकृतान्त्ये-

शेषः । *उत्क्रान्तीति मरणात् प्रागकरणे तदुत्तरकर्तव्यत्वार्थम् । मरणात् पूर्वं सर्वं प्रायश्चित्तं कार्यम् , कलौ निष्पापपुरुषाभावात् । तदकृत्वा मृते तु पुत्रादिस्तदैव कुर्यात् । सूतकान्ते कर्तव्यत्वेन सङ्कल्पयेत् सूतकान्ते वा कुर्यात् । इदमाग्रिमाणि च प्रायश्चित्तानि सद्यःकरणे प्रत्याम्नायेनैव सूतकान्ते तु करणे मुख्यतः प्रत्याम्नायेन वा । *पुण्यमन्त्रानिति । "नानानंत्रा" इत्यादयो

---

(१) 'प्रस्थमात्रं' क० छ० । (२) 'जपेन्नरः' क० ।

ष्टिपद्धतौ ज्ञेयम् । *कर्ताऽन्त्यकर्माधिकारार्थं *त्रीन् कृच्छ्रान् कुर्यादिति तत्रैवोक्तम् । अत्र देवयाज्ञिकेन मुमूर्षोर्मधुपर्कदानमुक्तम् । तदुक्तं वाराहे—

दृष्ट्वा सुविह्वलं ह्येनं यममार्गानुसारिणम् ।
प्रयाणकाले तु नरो मन्त्रेण विधिपूर्वकम् ॥
मधुपर्कं त्वरन् गृह्य इमं मन्त्रमुदाहरेत् ।
“ॐगृहाण चेमं मधुपर्कमाद्यं
संसारनाशनकरं त्वमृतेन तुल्यम् ।
नारायणेन रचितं भगवत्प्रियाणां
दाहे च शान्तिकरणं सुरलोकपूज्यम् ॥
अनेनैव तु मन्त्रेण दद्याच्च मधुपर्ककम् ।
नरस्य मृत्युकाले तु परलोकसुखावहम् ॥

अथ दुर्मरणे दिवोदासीये—

*चण्डालादिमृते विप्रे त्वन्तरिक्षमृतेऽपि वा ।
कृच्छ्रातिकृच्छ्रचान्द्रैस्तु शुद्धिस्तत्र प्रकीर्तिता ॥

देवजानीये जाबालिः—

शूद्रेण दग्धो यो विप्रो न लभेच्छाश्वतीं गतिम् ।
प्रायश्चित्तं प्रकुर्वीत *ब्राह्मणः पापशुद्धये ॥
चान्द्रायणं पराकं च प्राजापत्यं *विशोधनम् ॥

वैदिकाः । अन्ये च गीताविष्णुसहस्रनामादयः । अन्यतो विस्तरः ।

*कर्तेति । प्रेतधनहारिणोऽन्त्यकर्माकरणे तु शङ्खः—

प्रेतस्य तु प्रेतकार्याण्यकृत्वा धनहारकः ।
वर्णानां तद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरेत् ॥

*त्रीनिति । अत्यशक्तौ, शक्तौ द्वादशाशक्तौ षड् बोध्याः । *चण्डालादीति । प्रमादत इत्यादिः । तत्र पूर्वोक्तं विप्र इति द्विजोपलक्षणम् । *बान्धवः पुत्रादिः । ब्राह्मण इति पाठेऽप्ययमेवार्थः । *विशोधनमिति ।

गृह्यकारिकायाम्—

उदक्या सूतिका चापि यदि प्रेतं स्पृशन्ति हि ।
तस्यैष विधिरादिष्टो वात्स्येनैव महात्मना ॥

एष *सूतिकोक्तः । मदनरत्ने स्मृत्यन्तरे—

*ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टे तथैव च ।
अस्पृश्यस्पर्शने चैव *खट्वादिमरणेऽपि च ॥
श्वानक्रव्यादसंस्पर्शे क्रिमिकीटोद्भवेऽपि च ।
एतद्दोषानुसारेण प्रायश्चित्तं समाचरेत् ॥

विप्रेभ्यो दक्षिणां दद्यात्ततः स्यादौर्ध्वदेहिकम् ।

इत्युत्तरार्धम् । चान्द्रायणादित्रयं च दक्षिणारूपं । और्ध्वदेहिकं च पञ्चगव्यक्षालितानामस्थ्नां पलाशवृन्तानां वा दाहमारभ्य सर्वं द्रष्टव्यम् । *सूतिकोक्त इति ।

सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ।

इत्यादिना वक्ष्यमाण इत्यर्थः । अत्रोदक्यासूतिकयोरस्पृश्ययोरुपादानाच्छूद्रस्य स्पर्शेऽपि सूतिकामरणोक्तविधिरेव कार्यः;

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् ।
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ॥

इति मनुना शूद्रस्यास्पृश्यत्वव्यञ्जनात् । अस्पृश्यस्पर्शदोषस्यैव हेतुत्वाभिधानाच्च । शूद्रस्पर्शश्च साक्षात् परम्परासाधारणो ग्राह्यः,

स्थापयन्त्यनभिप्रेतमेकाग्निं च कटादिषु ।
शिबिकायां विमाने वा प्रचेतोवचनादिह ॥

इति विहितवहनस्य साक्षात् स्पर्शं विनाऽपि संभवात् परम्परोक्तिः । *ऊर्ध्वेति । मरणे इत्यस्य प्रत्येकं सम्बधादूर्ध्वोच्छिष्टादेरस्पृश्यस्पृष्टस्य च मरणं लभ्यते । *खट्वादीति । आ-

. कृच्छ्रां*स्त्रिषट्पञ्चदशांश्चान्द्रत्रयमथापि वा ॥
शुद्ध्यै तदानीं सम्पाद्य शवधर्मेण दाहयेत् ॥

गृह्यकारिकायाम्--

*खट्वायां मरणे चैव त्रींस्त्रीन्कृच्छ्रान् प्रकल्पयेत् ।
*सप्तान्त्यजैस्तु संस्पृष्टो मृतो दैवात्कथंचन ॥
एकत्रिंशता कृच्छ्रैस्तु शुद्धिरुक्ता मनीषिभिः ।
कुणपे त्वर्धदग्धे तु चिता स्पृष्टान्त्यजादिभिः ।
तत्स्पर्शने दूषणं च त्रिभिः कृच्छ्रैर्विशुध्यति ॥

दिना गृहादिग्रहः । *त्रिषडिति । द्वादशापि द्रष्टव्याः । एवं यथाशक्ति सङ्कल्पः । *खट्वायामिति ।

ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टे तथैव च ।
अस्पृश्यस्पर्शने चैव अन्तरालमृतौ तथा ॥

इति पूर्वश्लोकः । त्रींस्त्रीनित्यस्य पूर्वनिमित्तकात् उत्तरनिमित्तके कृच्छ्रत्रयमधिकं कल्पयेदित्यर्थः । तेन ऊर्ध्वोच्छिष्टमरणे कृच्छ्रत्रयम्, अधरोच्छिष्टे षट्कम्, इत्यादिक्रमेण खट्वामरणेऽष्टादश कृच्छ्राः फलिताः चकारेण निगडबद्धमरणसंग्रहः । तथाच—

ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टे तथैव च ।
अस्पृश्यस्पर्शने चैव अन्तरालमृते तथा ॥
खट्वायां मरणे चैव तथा निगडबन्धने ।
सप्तस्वेतेषु कृच्छ्रांस्त्रीन् षण् नव द्वादश क्रमात् ॥
पञ्चदश क्रमेणैव यथासंख्यं प्रकल्पयेत् ॥

इति गृह्यकारिकायां पठित्वा ‘यथासंख्यं प्रकल्पयेत्” इत्यस्य पञ्चसूक्तमेव द्वयोरष्टादश कल्पयेदित्यर्थं ब्रुवाणा न विरुध्यन्ते । *सप्तान्त्यजैरिति ।

रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैतेन्त्यावसायिनः ॥

धर्मप्रदीपे तु--

चाण्डालसूतिकोदक्या स्पृष्टे प्रेते तथैव च ।
तस्य पापविशुद्ध्यर्थं कृच्छ्रान् पञ्चदशाचरेत् ॥

इत्युक्तम् । मनुः--

*अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसम्पर्कदूषिता ।

अत्रापि कृच्छ्रत्रयम् 'अस्पृश्यस्पर्शने चैव' इत्युक्तेः । तत्रैव कर्मप्रदीपे--

रात्रौ वा रात्रिशेषे वा म्रियन्ते चेद्द्विजातयः ।
दाहं कृत्वा यथान्यायं *द्वौ पिण्डौ नि(१)र्वपेत्सुतः ॥

रजस्वलागर्भिण्यादिमृतौ तु वक्ष्यामः । निर्णयामृते पारिजाते यमः---

सन्ध्यायां वा तथा रात्रौ दाहः पाथेयकर्म च ।
नवश्राद्धं च नो कुर्यात्कृतं निष्फलतां व्रजेत् ॥

एतद्दिनमृतस्य रात्रिनिषेधार्थम् । यत्तु स्कान्दे--

यदि रात्रौ दहेत्तस्य समाप्तिर्दहनस्य तु ।
परेऽहन्युदिते सूर्ये कार्या तस्योदकक्रिया ॥
दग्धस्य तु न वै कार्या रात्रौ जातूदकक्रिया ॥ इति ।

तन्निर्मूलम् । रात्रिमृतस्य तु तत्रैव सङ्ग्रहे—

रात्रौ दग्ध्वा तु पिण्डान्तं कृत्वा वपनवर्जितम् ।
वपनं नेष्यते रात्रौ श्वस्तनी वापनक्रिया ॥ इति ।

इति स्मृतिः । *अस्वर्ग्येति । यद्यप्यत्र—

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण निर्हरेत् ।

इति मृतद्विजस्य शूद्रस्पर्श एव लभ्यते तथापि तत्र सूतिकोक्तविधेरेव दर्शितत्वात् शूद्रसम्पर्केति पुनरुपादानवशाच्छूद्रस्पृष्टमरणमपि ग्राह्यम्। अतोऽस्पृश्यस्पर्शने चैवेत्यस्य नासङ्गतिः । *द्वौ पिण्डाविति ।

---

(१) 'निर्वपेत्सुधीः' क० ।

वपनं तु प्रातः । तच्च सर्वैः पुत्रैः कार्यम्,

गङ्गायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ ।
आधाने सोमयागे च वपनं सप्तसु स्मृतम् ॥

इति मिताक्षरायां स्मृतेः । मरणस्यानङ्गित्वान्नैमित्तिकमिदम् । तदेव सङ्ग्रहवचनेन परेद्युरुत्कृष्यते तीर्थवत् । तेन कस्यचिद्दाहाङ्गत्वोक्तिर्भ्रान्त्या । मदनरत्ने गालवः—

प्रथमेऽहनि कर्तव्यं वपनं चानुभाविनाम् ।
प्रेतस्य केशश्मश्र्वादि वापयित्वाऽथ दाहयेत् ॥

*आशौचान्ते तु पुनः कार्यं विधिबलात् । मदनपारिजातेऽप्येवम् । तेन सर्वस्यास्य निर्मूलत्वोक्तिरज्ञोक्तिरेव स्मृतिरत्नावल्याम्—

*शवं रात्र्युषितं चेत्त्रीन् कृच्छ्रान् कृत्वा दहेत्सुतः ।

मदनरत्नेऽङ्गिराः—

ऊर्ध्वोच्छिष्टाधरोच्छिष्टे ह्यन्तरिक्षमृतेऽपि वा ।
कृच्छ्रत्रयं प्रकुर्वीत आशौचे मरणेऽपि च ॥

परदिने प्रथमद्वितीयदिनावयवपिण्डौ तदानीमेवात्रयवविषमश्राद्धे वा परदिने एव सर्वपिण्डदानं च सङ्गतमित्याशयः । *आशौचान्ते त्विति ।

क्रियां च कुरुते यस्तु तद्दिने तस्य मुण्डनम् ।
लघीयसां दशाहे तु पुत्राणां वपनं भवेत् ॥

इति देवलवचनात् । यथाचारमिति तु भट्टाः । वपनं चादौ वामश्मश्रुणः, "वामकर्णकेशवापनम्" इति प्रघट्टकेऽभिधानात् प्रेतकर्मणोऽप्रादक्षिण्याच्च । *शवमिति । रात्रीति सन्ध्योपलक्षणम् ।

दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित् ।
तत्पर्युषितमित्याहुर्दहने तस्य का गतिः ॥

अथ साग्नेर्विशेषः । कारिकायाम्—

*कृष्णपक्षे प्रमीयेत यद्याहि प्रातराहुतीः ।
शेषास्तु जुहुयाद्दर्शपर्यन्ताः पक्षहोमवत् ॥

प्रतिपत्प्रातर्होमान्ता इत्यर्थः ; 'यद्याहिताग्निरपरपक्षे म्रियेताहुताग्निरेनं पूर्वपक्षे हरेयुः' इत्याश्वलायनोक्तेः ।

तदानीमेव जुहुया*त्सायंकालाहुतीरपि ।
*सायं म्रियेत चेत्सायमाहुतीर्जुहुयादथ ॥

पञ्चगव्येन संस्नाप्य प्राजापत्यत्रयं चरेत् ॥

इति गालवोक्तं पञ्चगव्यस्नानमपि कार्यम् । *कृष्णपक्षे इति । अन्त्येष्टिपद्धतौ औपासनाग्नेरेतदुक्तावपि आहिताग्नेरप्येतदावश्यकत्वार्थं यद्याहिताग्निरित्युक्तम् ,

यश्चाहिताग्नेर्धर्मः स्यात्स औपासानिकस्य तु ।

इत्युक्तेः । अयमर्थः–कृष्णपक्षे प्रातर्होमे जाते तत्काले वा सायंहोमपर्यन्तं यदि मरणशङ्का तदा यजमानस्तत्पुत्रादिर्वा देशकालौ सङ्कीर्त्य तदुत्तरदिनप्रातर्होमप्रभृति तत्प्रातर्होमप्रभृति वाऽऽगामिदर्शोत्तरप्रातिपत्प्रात्तर्होमान्तानवशिष्टान् सायमौपासनहोमांश्चेदानीं तण्डुलैः पयसा वा होष्यामीति सङ्कल्प्य तदारभ्य प्रतिपत् प्रातर्होमान्तान् औपासनहोमान् पक्षहोमवत्कृत्वा तदानीमेव तद्दिनसायंहोममारभ्य दर्शसायंहोमान्तानौपासनहोमान् कुर्यादित्यर्थः । *सायमिति । सायंहोमे जाते तत्काले वा प्रातर्होमपर्यन्तं यदि मरणशङ्का तदा यजमानः तत्पुत्रादिर्वा देशकालौ संकीर्त्य तदुत्तरदिनसायंहोमं तत्सायंहोमं वा आरभ्य तदुत्तरदर्शसायंहोमान्तानवशिष्टानौपासनहोमान् तथा प्रातर्होमप्रभृतिदर्शोत्तरशुक्लप्रतिपत्प्रातर्होमान्तानवशिष्टान् प्रातरौपासनहोमांश्चेदानीं तण्डुलैः पयसा वा होष्यामीति संकल्प्य तदारभ्य दर्शसायंहोमन्तानौपासनहोमान् कृत्वा तदानीमेव तत्प्रातर्होममारभ्य प्रतिपत्प्रातर्होमा-

तदानीमेव जुहुयात्प्रातःकालाहुतीरपि ।
*सकृद्गृहीतमन्त्रेष्टं भिन्नं तन्त्रं च होमयोः ॥
दर्शं चापि प्रकुर्वीत स्थालीपाकं तदैव तु ॥

छन्दोगपरिशिष्टे—

*हुतायां सायमाहुत्यां दुर्बलश्चेद्गृही भवेत् ।
प्रातर्होमस्तदैव स्यात् जीवेच स पुनर्न वा ॥

*इदं शुक्लपरम् । दुर्बलो मुमूर्षुः । त्रिकाण्डमण्डनः—

*दर्शेष्टिं च तदा कुर्यादिष्टिर्यदि न सम्भवेत् ।
देवतानां प्रधानानामेकैकस्य हुनेत्पृथक् ॥
पुरोनुवाक्यायाज्याभ्यां चतुरात्तघृताहुतीः ॥

न्तानौपासनहोमान् कुर्यादित्यर्थः । *सकृद्गृहीतमिति । उक्तसंकल्पानन्तरं पर्युक्षणान्ते बृहत्पात्रे प्रकृतहोममारभ्य शुक्लप्रतिपत्प्रातःपर्यन्तहोमानां प्रत्येकमाहुतिद्वयपर्याप्तं तथा दर्शसायपर्यन्तहोमानामाहुतिद्वयपर्याप्तं च गृण्हीयात् । ततः समिद्वयसहितं तदुदगग्नेर्नित्यवत्संस्कृत्य प्रातर्होमार्थमेकां समिधमाधाय प्रातर्होमाहुतिद्वयं हुत्वा सायंहोमार्थमन्यां समिधमाधाय सायमाहुतिद्वयं हुत्वा होमद्वयस्य नित्यमन्त्रैः सकृदुपस्थानं कुर्यात् हविष्यान्तेति पञ्चभिः प्राजापत्यैश्चोपतिष्ठेतेति । एवं सायं म्रियेतचेदित्यत्रापि उक्तम् ,

होमदर्शौ न कर्तव्यौ पुनर्यदि स जीवति ।

इति कारिकोक्तेः । *हुतायामिति । शुक्लपक्षे रात्रौ मरणशङ्कायां प्रातर्होमस्यैवापकर्ष इत्यर्थः । यदि होमं विना मृतस्तदा कृष्णपक्षेऽहर्मरणे प्रातराहुतिमारभ्य रात्रिमरणे सायमाहुतिमारभ्य पक्षहोमवन्मरणदिनादिदर्शपर्यन्तादिनसङ्ख्यया चतस्र आहुतीर्जुहुयात् । दर्शस्थालीपाकं च कुर्यात् । शुक्लपक्षे रात्रिमृतस्य प्रातराहुतिं जुहुयादिति । अपकृष्टौ होमदर्शौ यजमानजीवने पुनर्न कुर्यात् । *दर्शेष्टिमिति । एवञ्च स्मार्ताग्नेर्दर्शस्थालीपाकासम्भवे

पूर्णाहुतिः ।

अथ प्रयोगः–देशकालादिस्मरणान्ते इदानीमपकृष्य दर्शस्थालीपाकप्रधानदेवताभ्यः प्रत्येकं चतुर्गृहीतमाज्यं होष्यामीति संकल्प्य समन्त्रमाज्यमुत्पूय स्रुक्स्रुवौ संमृज्य स्रुचि चतुर्गृहीतेनाज्येनाऽग्नये स्वाहाऽग्नये न ममेति हुत्वा विष्णुं स्मरेदिति । म्रियमाणस्य न यज्ञलोपो भवतीति आपस्तम्बोक्तेः यथाऽऽहिताग्नेर्मृतिशङ्कायां "विष्णुं बुभूषन् यजेत" "वायव्यं श्वेतमालभेत भूतिकामः" इत्यादय आरब्धाः काम्या व्याध्युपशमनार्था नैमित्तिक्यश्चेष्ट्यादिविकृतयः प्रकृतिवदपकृष्य कार्याः । तदसम्भवे तद्वदेव चतुर्गृहीताज्यहोमः । तथौपासनाग्नेरपि मृतिशङ्कायां नैमित्तिकारब्धकाम्यानां स्थालीपाकानामपकर्षः कार्य एव । तदसंभवे तु प्रधानदेवताभ्यः पूर्णाहुतिः । तत्सूत्रस्येहापि प्रवृत्तेः । "य आहिताग्नेः पुरोडाशास्त इह च खादन्ति नामधेयेन होमः" इति बौधायनवचनाच्च । रेणुकारिकादिश्रौतोक्तमविरोध्यन्यन्मृग्यं तु शतशाखित्वादिति । एवञ्चारब्धश्रवणाकर्मप्रत्यवरोहणादेरपि अपकर्षः । अतिनैकट्ये तु प्रधानदेवतानां चतुर्गृहीताज्येन पूर्णाहुतिः । अष्टकाश्राद्धे त्वपकर्ष एव न तु पूर्णाहुतिः । तथा सति प्रधानभूतब्राह्मणभोजनादेर्लोपापत्तेः । एवञ्च पूर्वेद्युः श्राद्धारम्भेऽपकर्षप्रसक्तौ त्रयं तस्मिन् जाते तु द्वयम् । एकदिनेऽनेकनैमित्तिकश्राद्धपाते निमित्तोत्पत्त्यनुक्रमेणैव तत्कार्यमतिनैकट्यात् । पाकासंभवे तु आमेनैव "आपद्यनग्नौ" इत्यनेनाऽऽमविधानात् । मृताहसपिण्डनादिवदष्टकादौ पाकानियमाच्च ।

अथ प्रयोगः-पूर्वेद्युः श्राद्धे निमन्त्रणोक्तेस्तदभावे तदैवोपासनाग्निं प्रज्वाल्येध्माधानान्तं व्यतिषङ्गतन्त्रं कृत्वा ब्राह्मणवच्छौचाद्यन्ते चतुर्गुणं समं वामं त्यक्त्वा सक्तुपायसादिना पिण्डान् दत्त्वा पूर्वेद्युः श्राद्धं समाप्याष्टमीश्राद्धं कुर्यात् । तत्रातिनैकट्ये स्थालीपा-

तथा—

अग्नावरण्योरारूढे प्रमीयेत पतिर्यदि ।
प्रेतं स्पृष्ट्वा मथित्वाग्निं *जप्त्वा चोपावरोहणम् ॥
घृतं च द्वादशोपात्तं तूष्णीं हुत्वा शवक्रिया ॥

विच्छिन्नश्रौताग्नेर्मृतौ तु प्रेताधानं तत्रैवोक्तम् ,

*प्रेतं स्वाग्न्यालये क्षिप्त्वा मथिताग्न्यानलेऽरणी ।
सन्निधायारणीं मन्थेद्यस्येति यजुषा ततः ॥

कदेवतानां पूर्णाहुतिं हुत्वाऽष्टमीश्राद्धप्रधानं संकल्प्याच्छादनान्ते आमं त्यक्त्वा श्राद्धं समापयेत् । ततोऽन्वष्टक्यं संकल्प्येध्माधानान्ते आमादिना श्राद्धं सप्तमीश्राद्धवत्समापयेदिति । अन्यशाखीयानामप्येवम् । एवं होमारम्भे कृतेऽधिश्रिते होमद्रव्ये कुशेषु स्थापिते वा यदि यजमानो मृतः । तदा तत्सर्वं हविर्निःशेषं दहेन्न होमः । अनधिश्रिते तु होम्ये मृतौपासनवद्धविःसंस्कारं कृत्वा होमः । तथाच कारिका—

म्रियेताधिश्रिते निस्सहोमद्रव्ये हवेषु च ।
यथा निःशेषदग्धानि तथा तानि दहेत्तदा ॥
बर्हिष्यासादितेष्वेवं हव्येषु म्रियते यदा ।
सायं प्रातिगृहीतानि देवतानां हवींषि तु ॥
चतुर्थ्यन्तानि नामानि तावतीनां वदेदथ ।
स्वाहाकारेण युगपत्सर्वाणि जुहुयादथ ॥
नेष्टं त्विष्टकृदाद्यन्तं शेषं कार्यमिति स्थितिः ।

*जप्त्वा चोपावरोहणमिति । "उपावरोह जातवेद इमं प्रेतः स्वर्गाय लोकाय जनय प्रजानन् । आयुः प्रजां रयिमस्मासु धेहि प्रेताहुतीश्चास्य जुषस्व स्वाहा" इत्युपावहरोहमन्त्रः । *प्रेतामिति ।

विच्छिन्नवह्निमुत्सृष्टपावकं विधुरानलम् ।

"यस्याग्नयो जुह्वतो मांसकामाः
संकल्पयन्ते यजमानमांसम् ।
जायन्तु ते हविषे सादिताय
स्वर्गं लोकमिमं प्रेतं नयन्तु" इति मन्त्रतः ॥
प्रणीय पावकं तूष्णीं द्वादशोपात्तसर्पिषा ।
तूष्णीं हुत्वा ततः कुर्यात्प्रेते माल्या इति क्रियाम् ॥
नष्टेष्वग्निष्वथारण्योर्नाशे स्वामी म्रियेत चेत् ।
आहरेदरणीद्वन्द्वं मनोज्योतिर्ऋचा ततः ॥

यज्ञपार्श्वः—

यजमाने चितारूढे पात्रन्यासे कृते सति ।
वर्षाद्यामिहते वह्नौ कथं कुर्वन्ति याज्ञिकाः ॥

आहिताग्निं मृते दग्धुं त्रेताग्न्युत्पत्तिसिद्धये ॥
भरद्वाजादयः प्राहुः प्रेताधानविधिं पृथक् ।
प्राचीनावीतवानुद्धृत्यावोक्ष्याऽऽयतनान्यथ"इत्यादिः ॥
प्राचीनावीतवान् कुर्यादग्न्यगारे तथा खरान् ।
तत्राग्निना च संस्कृत्य प्रेतं स्वाग्न्यासने क्षिपेत् ॥
नर्यालयेऽरणी स्थाप्य मन्थेद्यस्येति मन्त्रतः ।

नर्यो गार्हपत्यः ।

तूष्णीमुद्धृत्य शंस्याग्निं संस्कृतेन च सर्पिषा ॥
शंस्ये हुत्वा स्रुचा तूष्णीं गृहीत्वा द्वादशस्रुवान् ।

शंस्य आहवनीयः ।

दक्षिणाग्निं समुद्धृत्य निर्दहेत् पूर्ववच्छवम् ॥

उत्सन्नाग्नेररणी सत्त्वे इदम् । अरण्योरभावे तु उत्सन्नाग्नेर्मृतस्याथ न स्तः । पूर्वं यदारणी—

आनीयान्ये तयोः प्रेतपाणिं स्थाप्याथ दक्षिणाम् ।
आयन्तु इति पुत्रादिः समारोप्य यजुर्जपेत् ॥

तदर्धदग्धकाष्ठेन मन्थनं तत्र कारयेत् ।
तच्छेषालाभतोऽन्येन *दग्धशेषेण वा पुनः ॥
हुत्वाज्यं लौकिके वह्नौ हुतशेषं दहेत्तु वा ।

अत्राग्निषु सत्सु पर्णशरैः शरीरोत्पत्तिः । शरीरे वा सति प्रेताधानेनाग्न्युत्पत्तिः । उभयाभावे तु प्रेताधानेऽनधिकाराद्दाहादिसंस्कारलोपः । उदकदानाद्येव कार्यमिति केशवीकारशतद्वयीप्रमुखाः । तन्न,

निषेकाद्याः श्मशानान्तास्तेषां वै मन्त्रतः क्रियाः ।

इति विरोधात् । 'क्रियालोपगता ये च' इति निषेधात्,

तदभावे पलाशानां वृन्तैः कार्यः पुमानपि ।

मृताग्न्याधानवत्सर्वं कृत्वा तं पूर्ववद्दहेत् ।
अनाहिताग्नेरप्येवं मृताधानं यथोदितम् ॥

अनाहिताग्नेरिति स्मार्ताग्निकातीयादिपरं, तेषां स्मार्ताधानात् । तदितरस्य विच्छिन्नस्मार्तस्य मृतस्य मते पुनःसंधानमेव । तच्चेत्थम्—पितुर्मातुः पत्न्यादेर्वा गृह्याग्निं विच्छेददिनादारभ्य एतावन्तं कालं गृह्याग्निविच्छेदजनितप्रत्यवायपरिहारार्थममुकप्राजापत्यात्मकं प्रायश्चित्तममुकप्रत्याम्नायद्वारा सद्यः सूतकान्ते वा इति सङ्कल्प्य अग्निविच्छेदेन लुप्तानां सायंप्रातर्होमानां दर्शपूर्णमासस्थालीपाकानां च पर्याप्तं व्रीह्याद्याज्यं द्रव्यं च तद्द्रव्यनिष्क्रयं वा नानानामगोत्रेभ्यो दातुमहमुत्सृजे इत्युत्सृज्यामन्त्रकं प्राणानायम्य यथाशाखं प्रेतपुनःसंधानसंकल्पं कुर्यादिति । अत्र नास्तिक्यादालस्यादितः प्रमादाद्वाऽग्नित्यागे भिन्नं प्रायश्चित्तं भट्टकृतान्त्येष्टितो बोध्यम् । एवमाहिताग्नेर्मृतिशङ्कायामाधानं स्मार्ताग्नेः पुनःसंधानं यजमानस्य तत्पत्न्या वाऽनुज्ञया तदन्वारब्धः पुत्रादिः कुर्यात् । *भस्मशेषेणेति ।

अग्निनाशे मृतिश्चेत्स्यादाहिताग्नेस्तदोच्यते ।

इत्य*भावे विधानस्याऽन्यभावेऽपि साम्याच्च । तेन प्रेताहुत्यभावेऽपि* स्विष्टकृद्वद्द्रव्यान्तरोक्तेरदृष्टार्थत्वात् प्रेताधानं दाहोऽपि भवत्येव । प्रतिकृतेरग्नीनां च प्रेताधानप्रयोजकत्वाक्षतेः ।

*पत्न्या अप्येवम्,

*दाहयित्वाग्निहोत्रेण *स्त्रियं वृत्तवतीं पतिः ।

इति याज्ञवल्क्योक्तेः । यत्तु—

द्वितीयां चैव यो भार्यां दहेद्वैतानिकाग्निभिः ।
जीवन्त्यां प्रथमायां तु सुरापानसमं स्मृतम् ॥

इति, तदाधाने सहानधिकृताविषयमिति विज्ञानेश्वरः । मदनरत्ने ब्राह्मेपि—

आहिताग्न्योश्च दंपत्योर्यस्त्वादौ म्रियते भुवि ।
नयोल्मुकं मथित्वैनं संस्कुर्युस्तदभावतः ॥
तद्भस्मस्पृष्टकाष्ठेन मथित्वा निर्दहेच्च तम् ॥

इति कारिकोक्तेः दग्धशेषेणेति व्यर्थः पाठः । *अभावे शरीराभावे । क्वचित्तथैव पाठः । *स्विष्टकृद्वदिति । (१)यथा हुतशेषनाशे आज्येन स्विष्टकृद्यागः तथा मृतशरीरनाशे पर्णशराहुतिरित्यर्थः । *पत्न्या अप्येवमिति । यन्मृतिशङ्कादौ कर्त्तव्यं होमदर्शादिकमारभ्य एतदन्तमुक्तं तत् न केवलं यजमानस्यैव; किन्तु पत्न्या अपि तस्या अपि आहिताग्नित्वस्मार्ताग्नित्वयोः सत्त्वात् एतच्च तस्यास्तदायत्व एव लभ्यते इत्यतस्तं दर्शयति–*दाहयित्वेति । वृत्तहीनायाः केवलाग्निभिर्दाहः पात्राणां तु चितेरुत्तरतः समीपे त्रेताग्न्येकदेशेन पृथग्दाहः । अतिनिन्दितायास्तु केवलाग्निभिरपि न दाह इति मयूखः । *स्त्रियं स्त्रीमात्रम् ।

---

(१) अस्य 'यद्द्रव्येण होमस्तेनैव स्विष्टकृदिति सिद्धान्तसत्त्वेऽपि' इत्यादिः ।

त(१)स्य देहः सपिण्डैश्च दग्धव्यस्त्रिभिरग्निभिः ॥
पश्चान्मृतस्य देहस्तु दग्धव्यो *लौकिकाग्निना ।
*अनाहिताग्निदेहस्तु दाह्यो गृह्याग्निना द्विजैः ॥

त्रिकाण्डमण्डनस्तु विकल्पमाह—

ज्येष्ठायां विद्यमानायां द्वितीयायै स्वयोषिते ।
काम्यं नित्याग्निहोत्रं वा न कथंचित्प्रयच्छति ॥
स्त्रीमात्रमविशेषेण दग्ध्वान्यैर्वैदिकाग्निभिः ।
विवाह्यादधते यद्वाधानमेवास्ति चे*द्वधूः ॥ इति ।

अत्रेदं तत्त्वम् । साग्नेः पत्नीमृतौ द्वौ पक्षौ । पुनर्विवाहेच्छायां पूर्वाग्निभिर्दहेदित्येकः पक्षः,

भार्यायै पूर्वमारिण्यै दत्त्वाग्नीनन्त्यकर्मणि ।
*पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥

इति मनूक्तेः ।

दाहयित्वाग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ।

इति याज्ञवल्क्योक्तेश्च । पुनर्विवाहाशक्तौ निर्मन्थ्येन तां दग्ध्वा पूर्वाग्निष्वेवाग्निहोत्रेष्ट्यादि कार्यमित्यन्यः । *'आहार्येणाहिताग्निं पत्नीं च' इत्याश्वलायनोक्तेः ।

---

*लौकिकाग्निनेति । अधिकाराभावे तत्सत्त्वेऽपि वा आलस्यादिनाऽग्नेरस्वीकारे विच्छेदे वा पूर्वासंस्कृतेनाग्निनेत्यर्थः । एवञ्च—

अनग्निकां दहेदेवं कापालेन हविर्भुजा ।

इतिवक्ष्यमाणा निरग्निका व्याख्याता । *अनाहिताग्नीति । एवञ्च सहानधिकृतताया न आहिताग्न्येकदेशेन दाहः किन्तु गृह्याग्निसत्त्वे तेनैवान्यथा लौकिकाग्निनेति सूचितम् । *वधूरिति । ज्येष्ठा वा तदन्या वेत्यभिप्रायः । *पुनर्दारक्रियां कुर्यादिति । अत्रापि ज्येष्ठादिसत्त्वे आधानमेव । *आहा-

---

(१) 'तस्य दाहः सपिण्डैश्च कर्तव्य' क०

भरद्वाजोपि—'निर्मन्थ्येन पत्नीम्' इति। *पूर्वाग्न्येकदेशेन दहेदिति यज्ञपार्श्वदेवयाज्ञिकादयः। यानि च—'तस्मादपत्नीकोऽप्यग्निहोत्रमाहरेत्' इति श्रुतिः, विष्णुः छन्दोगपरिशिष्टे च—

मृतायामपि भार्यायां वैदिकाग्निं नहि त्यजेत्।
उपाधिनापि तत्कर्म यावज्जीवं समाचरेत्॥

उपाधिर्हेमकुशपत्न्यादिः,

अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः।
अग्निहोत्रमुपासन्ते यावज्जीवमनुव्रताः॥

इत्यपरार्के स्मृत्यन्तरात्। कात्यायनोऽपि—

रामोऽपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीम्।
ईजे बहुविधैर्यज्ञैः सह भ्रातृभिरच्युतः॥

इत्यादीनि, तानि पूर्वाग्निष्वेवाग्निहोत्रादिपराणि नत्वपत्नीकस्याधानार्थानि, क्रतुविधीनामाधानाप्रयोजकत्वात्। अपत्नीकस्याधानाप्रवृत्तिरिति मानवपरिशिष्टाच्च। सोमो न भवत्येव, 'अपत्नीकोऽप्यसोमपः' इति श्रुतेः। यत्तु भरद्वाजापस्तम्बसूत्रम्—'दारकर्मणि यद्यशक्त आत्मार्थमग्न्याधेयम्' इति। अस्यार्थः—पुनर्विवाहाशक्तौ यदग्न्याधेयं पूर्वं कृतमस्ति तदात्मार्थमेव न पत्न्यै दद्यादिति। ब्राह्मणभाष्यापरार्काशार्करामाण्डारादितत्त्वमप्येवम्। त्रिकाण्डमण्डनस्तु पक्षद्वयमाह। अन्येऽप्यपत्नीकस्याधानमाहुस्तदाशयं न विद्मः। वृद्धयाज्ञवल्क्यः-

---

र्यो निर्मन्थ्यः। *पूर्वाग्नीति।

तस्मान्नयैकदेशेन दग्धव्या पूर्वमारिणी।
पत्नी ज्येष्ठतरा वाऽपि यज्ञपार्श्वे निरूपितम्॥

इति कारिकोक्तेः। एवञ्च संसृष्टस्मार्ताग्न्योः पूर्वं ज्येष्ठामरणे

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ।
अनाहिताग्निरेकेन लौकिकेनापरो जनः ॥

क्रतुः—

एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वमारिणीम् ।
दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित् ॥

कारिकायाम्—

पत्नीमपि दहेदेवं भर्तुः पूर्वं मृता यदि ।
*अनाग्निकां दहेदेवं कपालेन हविर्भुजा ॥

(छ(१)न्दोगपरिशिष्टे—

अनयैवावृता नारी दग्धव्या या व्यवस्थिता ।
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य इति स्थितिः ॥

इदं छन्दोगानामेव । तथा—

अग्निनैव दहेद्भार्यां स्वतन्त्रां पतिता न चेत् ।
तदुत्तरेण पात्राणि दाहयेत्पृथगन्तिके ॥
इदमपि तेषामेव ।)

आशौचप्रकाशे क्रतुः—

*विधुरं विधवां चैव कपालस्थाग्निना दहेत् ।

स्मार्ताग्निना दाहः कनिष्ठया पुनः संधानं, कनिष्ठामरणे तु लौकिकाग्निना स्मार्ताग्न्येकदेशेन वेति यज्ञपार्श्वानुयायिनः। "दक्षिणपूर्वे आहवनीयं निदधाति उत्तरपश्चिमे गार्हपत्यं दक्षिणपश्चिमे दक्षिणाग्निम्" इति स्मरणात्। त्रिभिरित्युक्तेः सभ्यावसथ्ययोर्न दाहसाधनता। "सभ्यावसथ्यौ आहिताग्नेर्दाहकर्माणि न प्रयुज्यंते चिताप्रदेशात् प्रागुदीच्यां दिशि पञ्चप्रक्रमानतिक्रम्योत्सृजति" इति शाट्यायनिवचनात्। *अनाग्निकामिति। भर्तुः पूर्वं मृतेति वर्तते। *विधुरमिति। स्त्रीपुंसयोः पूर्वं मृतस्य गृह्याग्निना दाहः पश्चान्मृतस्य

---

(१) कंसान्तर्गतं नास्ति ग०

ब्रह्म(१)चारी यती चैव दह्येतोत्तपनाग्निना ॥
तुषाग्निना च दग्धव्यः *कन्यका बाल एव च ।
अग्निवर्णं कपालं तु कृत्वा तत्र विनिक्षिपेत् ॥
करीषादि ततो वह्निर्जातो यः स कपालजः ॥

अनुपनीते यद्यपि *जातारण्यग्निः कैश्चिदुक्तस्तथापि तस्य कलौ निषिद्धत्वोक्तेरयमेव ज्ञेयः । स्मृत्यन्तरे —

*गृहस्थो ब्रह्मचारी च विधुरो विधवाः स्त्रियः ।
औपासनश्चोत्तपनस्तुषाग्निस्तु कपालजः ॥

उत्तपनस्तु—

दर्भाग्रेऽग्निं तु प्रज्वाल्य पुनर्दर्भैस्तु संयुतः ।
पुनर्दर्भैस्तृतीयोऽग्निरेष उत्तपनः स्मृतः ॥

यमः—

यस्यानयति शूद्रोऽग्निं तृणकाष्ठहवींषि च ।
प्रेतत्वं च सदा तस्य स चाधर्मेण लिप्यते ॥

तु कापालाग्निनेत्यर्थः । *कन्यका अविवाहिता । बालोऽनुपनीतः । *जातारण्यग्निरिति । जाते पुत्रे तत्संबन्ध्यग्निसाध्यकर्मार्थं स्वशाखोक्तविधिना संपाद्योऽग्निः प्रजारण्यभिधानः, तन्मथितोऽग्निरित्यर्थः । *गृहस्थ इति यथासंख्यम् । ब्रह्मचारिणः कापालाग्निविकल्पः,

कपालाग्नेर्दहेदेनमुपनीय यथा नरः ।

इति वृत्तावुक्तेः । सर्वेषामनाग्निकानां कापालेन लौकिकेन वा दाह इति भट्टाः । तदाशयं न विद्म इति । वस्तुतस्तु आग्निसाध्यकामनासत्त्वे पत्न्या अपि प्राधान्यं तदसत्त्वे त्वङ्गत्वम् । आद्ये पूर्वं मृतां पत्नीमग्निभिर्दग्ध्वाऽपूर्वाधानं कुशादिपत्नीसहितस्तद्रहितो

---

(१) 'ब्रह्मचारिणं यतिं चैव दहेदुत्तप' क० छ० 'ब्रह्मचारी यती चैव दहेदुत्तप' ग०

देवलः—

चण्डालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित् ।
पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः ॥

त्वा कुर्यात् "तयोर्यः पूर्वं म्रियते तत्र त्रेतायां पितृमेधः संपद्यते" इत्युपक्रम्य "यद्ययं दारकर्मण्यशक्त आत्मार्थमग्न्याधेयं कुर्यात्" इति भारद्वाजसूत्रात् । अग्न्याधेयम् अपूर्वाधानम् । पुनराधेयशब्दाभावात् । अनयोश्च भेदो रामाण्डारभाष्येऽग्नीनां संभारेषु विधानेन स्थापनम् अग्न्याधेयं । पुनर्विधानान्तरेण स्थापनं पुनराधानम् । तस्यैव गुणाधिकार इति । अन्ये तु पूर्वमृतानां निर्मन्थ्येन दग्ध्वा तानग्नीन् उत्सर्गेष्ट्या त्यक्त्वा पुनराधानं कुर्यात्, नापूर्वाधानम् । अनेकभार्यस्य द्वयोरपि प्राधान्ये ज्येष्ठा चेत्पूर्वं मृता तदा सर्वाग्निभिस्तां दग्ध्वा कनिष्ठया पुनरग्न्याधेयं कुर्यात् । कनिष्ठा चेत्पूर्वं मृता तस्यै अर्धाग्नीन् दत्त्वा अर्धाग्निषु नित्यहोमादि कुर्यात् । द्वयोरन्यतरस्या अङ्गत्वे तु निर्मन्थ्येन दाहः कुशपत्न्यादिना पुनराधानम् । तयोरप्राधान्ये निर्मन्थ्येन दाह उत्सर्गेष्टिः पुनराधानं च । तथाच त्रिकाण्डमण्डनः—

पुनः परिणयाधानं स्वामिनौ यदि सिध्यतः ।
पत्न्यै मृतायै श्रौताग्निं दद्यान्निर्मन्थ्यमन्यथा ॥
तथैवानेकभार्यस्य यद्येकाऽत्र प्रमीयते ॥ इति ।

नह्यत्र श्रौताग्निनिर्मन्थ्ययोर्विकल्पः प्रतीयते । यत्तु "साग्नेः पत्नीमृतौ" इत्यादिसामान्यतस्तत्र पुनर्विवाहाशक्तौ प्रधानायाः कथं निर्मन्थ्यः साग्निवदग्निस्वाम्याविशेषात् । अङ्गभूतायाश्च पुनर्विवाहेच्छायामपि कथं पूर्वाग्नयः ऋत्विग्वानाहिताग्नित्वेन अग्निस्वाम्याभावात् । नहि पत्नी प्रधानैवाऽङ्गमेव वेति विरुद्धिः सुवचा । एवञ्च यावज्जीवं समापयेदित्यस्य विधुराधाने नित्यतयाऽधिकारपरता नतु पूर्वाग्निष्वग्निहोत्रादिपरता । तस्या अप्राधान्यस्य दु

मनुः—

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजातयः ॥

अत्र *प्रातिलोम्येन क्रमः,

पूर्वामुखस्तु नेतव्यो ब्राह्मणो बान्धवैर्गृहात् ।
उत्तराभिमुखो राजा वैश्यः पश्चान्मुखस्तथा ॥
दक्षिणाभिमुखः शूद्रो निर्हर्तव्यः स्वबान्धवैः ॥

इत्यादिपुराणादित्यपरार्कः । तेन त्रिंशच्छ्लोकयुक्तो*ऽनुलोमक्रमो *हेयः। आश्वलायनः—*'ज्येष्ठप्रथमाः कनिष्ठजघन्या गच्छेयुः'

कल्प्यत्वात् । एवञ्च व्यवस्थयाऽग्निनिर्मन्थ्ययोः सिद्धौ एकदेशाग्निदाहः प्रधानकनिष्ठापरः। "अपत्नीकोऽप्यग्निहोत्रमाहरेत्" इत्यैतरेयब्राह्मणभाष्ये पूर्वं मृताया निर्मन्थ्येन दाह उत्सर्गेष्टिः पुनराधानं चेति यदुक्तं तदङ्गत्वपक्षे बोध्यम् । अग्निहोत्रादिवद्विधुरस्यौपासनमपि भवति ।तथाच भरद्वाजः "यद्ययमपत्नीकः स्यादुभाभ्यां तस्य संस्कार औपासनाग्निहोत्राभ्याम्" इति आकरे धर्मप्रकाशादौ विस्तरः। *त्रिभिरिति । "दक्षिणपूर्वमाहवनीयं निदधाति उत्तरपश्चिमे गार्हपत्यं दक्षिणपश्चिमे दक्षिणाग्निम्" इति स्मरणात् त्रिभिरित्युक्तम् । *प्रातिलोम्येनेति । शूद्रोपक्रमेणाव्यवधानाद्वैश्यस्यैव प्रथममुपस्थितत्वात् । अन्यथा शूद्रोपक्रमाभिधानस्य निरभिप्रायकत्वापत्तेरिति भावः । *अनुलोमेति यथायोगमिति क्रमेऽनुलोमप्रतिलोमविशेषापेक्षायामुपस्थिततयाऽनुलोमक्रमस्यैवौत्सर्गिकत्वात् । पूर्वोपस्थितशूद्रेण पूर्वावधिना वर्णावधित्वसादृश्यादुत्तरावधिभूतब्राह्मणस्यापि प्रथममुपस्थित्या ब्राह्मणादिक्रमेणैव पश्चिमाद्यन्वयः। शूद्रोपक्रमस्य प्रतिलोमक्रमानियामकत्वादित्यभिमानः । *हेय इति । प्रागुदक्पश्चिमद्वारैरिति

आधानोत्तरं द्वितीयविवाहे कृते यजमानमरणे श्रौतस्मार्ताग्न्योः संसर्गः। बौधायनसूत्रे–"अथ यद्याहिताग्निर्द्वे भार्ये विन्देत प्राक्संयोगान्निर्मथ्यैतौपासनं परिस्तीर्याज्यं विलाप्य चतुर्गृहीतं गृहीत्वा समिद्धत्यग्नौ जुहोति संमितं संकल्पयेथामिति मिन्दाहुतीर्व्याहृतीश्च हुत्वाथैतमग्निमयं ते योनिर्ऋत्विय इति समिधि समारोप्य गार्हपत्ये समिधमभ्यादधाति भवतं नः समनसाविति गार्हपत्य आज्यं विलाप्य चतुर्गृहीतं गार्हपत्ये जुहोत्यग्नावग्निश्चरति प्रविष्ट इत्यपरं चतुर्गृहीत्वा चित्तिः स्रुगिति संग्रहं जुहोत्यथ गार्हपत्ये स्रुवाहुतीर्जुहोति ब्राह्मण एक होतेति दशभिरथ प्राचीनावीत्यन्वाहार्यपचने जुहोति ये समाना ये सजाता इति द्वाभ्यामथ तत्रैव स्रुवाहुतिं जुहोत्यग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहेत्यथ यज्ञोपवीती द्वादशगृहीतेन स्रुचं पूरयित्वा पुरुषसूक्तेनाहवनीये जुहोत्यथ स्रुवाहुतीर्जुहोत्य-

---

पाठान्तरविरोधोऽपि बोध्यः। द्वारपदं द्वारसत्त्वे तदभावे तु दिङ्मात्रनियमः, संभवतस्तस्य त्यागायोगात्। द्वारैक्येन तु सोऽपि। जीवतो नयने न दिगादिनियमः, मृतग्रहणात्। विशेषान्तरमाह हारीतः–"नगराभिमुखं प्रेतं हरेयुः" इति। *ज्येष्ठेति। यो यो ज्येष्ठः स पुरो गच्छेत् तथा यः कनिष्ठः स पश्चादित्यानुपूर्वीसिद्ध्यर्थमुभयोपादानम् तेन न सर्वज्येष्ठस्य प्राथम्यप्रसङ्गः।

ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः।
आश्मशानादनुव्रज्यादितरो ज्ञातिभिर्मृतः॥

इति योगीश्वरेणोनद्विवर्षादितर इति विशेषणादूनद्विवर्षस्यानुयाने नियमो बाध्यः। अनुयाने नियमान्तरमाहाश्वलायनः "अधो निवीताः प्रवृत्तशिखाः" इति। अधः कृतं निवीतमुपवीत-

ग्नये विविचये स्वाहाऽग्नये व्रतपतयेऽग्नये पवमानायाग्नये पावकायाग्नये शुचये स्वाहाऽग्नये पथिकृते स्वाहाऽग्नये तन्तुमतेऽग्नये वैश्वानरायेत्यथ चतुर्गृहीतं जुहोति मनोज्योतिरित्यत ऊर्ध्वं पैतृकं कर्म प्रतिपद्यते” इति।

आहिताग्नौ विदेशमृते *पथिकृतीष्टि*र्मृताग्निहोत्रं तद्दाहः पात्रयोजनं च कल्पसूत्रादिभ्योऽस्मात्पितामहकृतपद्धतेश्च ज्ञेयमिति बहुवक्तव्येऽप्युपरम्यते। स्मार्ताग्नेस्तूक्तं मदनरत्ने छन्दोगपरिशिष्टे च—

दुर्बलं स्नापयित्वा तु शुद्धचैलाभिसंवृतम्।
दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत्॥
घृतेनाभ्यक्तमाप्लाव्य शुद्धवस्त्रोपवीतिनम्।
चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषयेत्॥

मुपरि वस्त्रं वा यैस्तादृशाः। *पथिकृतीष्टिरिति। स्मार्ताग्नेस्तु—

यस्मिन् देशे स्थितो वह्निस्ततोऽन्यत्र मृतो यदि।
चरुः पथिकृतः कार्यः पूर्णाहुतिरथापि वा॥

इति वचनात्पथिकृतः चरुः प्रधानदेवतापूर्णाहुतिर्वा। *मृताग्निहोत्रमिति। तद्विधिर्ब्राह्मे—

तावत्कालं दक्षिणाग्रैः कुशैरास्तीर्य वेदिकाम्।
अधोमुखं च समिधं धारयित्वा विधानवत्॥
परकीयेन वत्सेन दुग्ध्वा तां गां च तद्गृहे।
गोक्षीरेणाथ तेनैव जुहुयादग्निहोत्रकम्॥
पश्चादग्निं समारोप्य यज्ञभाण्डानि तान्यपि।
उपयच्छेत विप्राय ततो वृषभमेव च॥
मथित्वाऽग्निं प्रणयनं कृत्वा तत्कुणपं दहेत्॥ इति।

तत्प्रकारः कारिकायाम्—

मृताग्निहोत्रं होतव्यं प्राग् दाहात्तत्र कथ्यते।

हिरण्यशकलान्न्यस्य क्षिप्त्वा छिद्रेषु सप्तसु ।
मुखेष्वथापिधायैनं निर्हरेयुः सुतादयः ॥
आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम् ।
एकोऽनुगच्छेत्तस्यार्धमर्धं पथ्युत्सृजेद् भुवि ॥
ऊर्ध्वमादहनं कार्यमासीनो दक्षिणामुखः ।
सव्यं जान्वाच्य शनकैः सतिलं पिण्डदानवत् ॥
अथ पुत्रादिराप्लुत्य कुर्याद्दारुचयं महत् ।
तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे ॥
आज्यपूर्णं स्रुवं दद्याद्दक्षिणाग्रां नासि स्रुचम् ।
पादयोरधरां प्राचीमरणीमुरसीतराम् ॥
पार्श्वयोः शूर्पचमसौ सव्यदक्षिणयोः क्रमात् ।
सुसमे तु न्यसेन्न्युब्जमन्तरूर्वोरुलूखलम् ॥

प्राचीनावीतिना सर्वं शंस्यमेवोद्धरेत् खरेत् (?) ॥
साधनाभावतः कूर्चस्थापनं न भवेदिह ।
प्रागग्रैर्दक्षिणाग्रैश्च तृणैः शंसपरिस्तृतिः ॥
पर्युक्षणं च तस्यैव कार्यमत्राप्रदक्षिणम् ।
नर्यदक्षिणतो भस्म निरुह्योह्यं च सन्धिनीम् ॥
दुग्ध्वा भस्मन्यधिश्रित्याभिद्योतासनवर्जितम् ।
उद्वासयेत्तदासाद्य दक्षिणास्रुक् स्रुवं ततः ॥
प्रतप्य प्रैषरहितं तत् पयः सकृदुन्नयेत् ।
धारयेत्समिधं चाधो नर्यदक्षिणतो नयेत् ॥
तूष्णीं समिधमाधाय सव्यं जानु निपात्य च ।
अपसव्यं स्रुचं कृत्वा सकृत्सर्वं विनिक्षिपेत् ।
ततः कृष्णाजिनेऽस्थीनि पुरुषाकारवत् न्यसेत् ॥
स्वर्णादि स्थापयेत्तत्र घृतेनाभ्यज्य पूर्ववत् ।
पात्राणि योजयित्वा तं दहेत्त्रेताग्निभिस्ततः ॥ इति ॥

वात्रोविलीढमत्रैव *अनग्नेरप्ययं विधिः ।
अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः ॥
अथाग्निं सव्यमावृत्को दद्याद्दक्षिणतः शनैः ।
अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः ॥

देशान्तरकलेवरागमानन्तरमिदं प्रेताग्निहोत्रं हुत्वा कलेवरं दग्धव्यमित्येके । वस्तुतस्तु प्राकृताग्निहोत्रस्थाने मृताग्निहोत्रविधानात्कलेवरस्यास्थ्नां वा गृहागमनपर्यन्तं प्रत्यहं सायंप्रातर्यथोपदिष्टं होतव्यम् ,

अन्यदीयेन वत्सेन या गौः स्नुतपयोधरा ।
आशरीराहृतेस्तस्याः पयसा होम इष्यते ॥
अन्यस्या अपि होतव्यं पयसा तदसम्भवे ।

इत्यन्तेष्टौ वचनात् । अथ चाध्वप्रमीतस्याहिताग्नेस्तूष्णींधर्मकोऽग्निहोत्रहोमस्तथा तादृशस्यौपासनाग्नेरपि तादृश औपासनहोमः, ब्राह्मवाक्यस्य श्रौतस्मार्ताग्न्योः धर्मैकत्वेन स्मार्ताग्नावपि प्रवृत्तेः । अथ तत्प्रयोगः-मरणानन्तरं पुत्रादिर्देशकालौ सङ्कीर्त्य प्राचीनावीती अहर्मरणे प्रातर्होममारभ्येत्यादि च पूर्ववदुक्त्वा रात्रिमरणे वैपरीत्येन च तदुभयमुक्त्वा पयसा तूष्णीं होष्यामीति संकल्प्य पर्युक्षणान्ते एकपात्र एव प्रातः सायं चाहुतिद्वयपर्याप्तं सकृद् गृहीतं गृहीत्वौपासनदक्षिणार्थे तूष्णीमधिश्रित्योल्मुकेनावज्वल्य त्रिः पर्यग्निकृत्वा तत्रैव यकर्शवान्निव(?) दक्षिणत उद्वास्य तत् पात्रं किञ्चित् कालमाकाशे धृत्वा भूमौ निधायाधस्तात्समिधं पालाशीं धृत्वाऽग्नेः पश्चात्कुशेषु समिधा सह निधाय सकृदेव तूष्णीं सर्वं जुहुयात् । प्रजापतिं मनसा ध्यात्वा प्रजापतये न मम इति त्यजेत् । अन्यत्सर्वं लुप्यत इति । होमश्च विद्यमानाग्नावेव सर्वविधः । मरणोत्तरं पुनःसन्धाने तु होम्यद्रव्यदानमात्रम् ।

---

*अनग्नेरपीति । इयांस्तु विशेषः—

असौ स्वर्गाय लोकाय स्वाहेति परिकीर्तयेत् ॥

तथा—

एवमेवाहिताग्नेश्च पात्रन्यासादिकं भवेत् ।
कृष्णाजिनादिकं चात्र विशेषोध्वर्युचोदितः ॥

तत्रैव

अनयैवावृता नारी दग्धव्या या व्यवस्थिता ।
अग्निप्रदानमन्त्रोऽस्या न प्रयोज्य इति स्थितिः ॥

*इदं छन्दोगानामेव । पात्रन्यासोक्तेरुत्तानदेहत्वं साग्निपरम्, निराग्निस्तु पुमानधोमुखः स्त्री तूत्ताना दाह्या,

सगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः ।
अधोमुखो दक्षिणादिक्चरणस्तु पुमानिति ॥
उत्तानदेहा नारी तु सपिण्डैरपि बन्धुभिः ॥

इत्यादित्यपुराणादिति *शुद्धितत्त्वहारलतादयः । उत्तरशिरस्त्वं सामगेतरपरम् । वाराहे त्वग्निदानेऽन्यो मन्त्रः—

कृत्वा तु दुष्कृतं कर्म जानता वाऽप्यजानता ।

आहितानाहिताग्न्यादेर्विशेषो वक्ष्यतेऽधुना ।
विगुल्फं बर्हिराज्यं चेत्येवमन्तं समं भवेत् ॥
नास्यानुस्तरणी कार्या पात्राणां न च योजनम् ।
पृषदाज्यं तथा चर्यादिति गृह्यविदां मतम् ॥
तां दिशं तु नयेदग्निमेतं चापि ततः परम् ।
अयुजो मिथुना वृद्धाः पीठचक्रेण भावतः ॥
प्रेतस्य पृष्ठतो भूत्वा ईयुः पूर्ववदेव च ।
भूमिभागं ततः प्राप्य कर्ता प्रोक्षति पूर्ववत् ॥ इति ॥

अग्निप्रदानमन्त्रः श्रौतः । *इदं दक्षिणाशिरस्त्वम् । *शुद्धी-

मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥
धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ।
दहेयं सर्वगात्राणि दिव्याँल्लोकान्स गच्छतु ॥
ज्वलमानं महावह्निं *शिरःस्थाने प्रदापयेत् ।
चतुर्वर्णेषु संस्थानमेवं भवति पुत्रके ॥

अत्र क्रियानिबन्धे गारुडे षट्पिण्डदानमुक्तम्—

मृतस्योत्क्रान्तिसमये षट् पिण्डान् क्रमशो ददेत् ।
मृतिस्थाने तथा द्वारि चत्वरे तार्क्ष्य कारणात् ॥
विश्रामे काष्ठचयने तथा संचयने च षट् ॥

तथा—

आदौ देयास्तु षट् पिण्डा दश देया दशाहिकाः ।
*स्थाने चार्धपथेऽतीते चितायां शवहस्तके ॥
श्मशानवासिभूतेभ्यः षष्ठं संचयने तथा ॥

ततः—

त्वं भूतकृज्जगद्योने त्वं लोकपरिपालकः ।
उक्तः संहारकस्तस्मादेनं स्वर्गं मृतं नय ॥

इत्यग्निं दत्त्वा अस्मात्त्वमिति मन्त्रेणार्धदग्धे आज्याहुतिरुक्ता । आहिताग्नौ पराशरः-

शम्यां शिश्ने विनिक्षिप्य अरणी मुष्कयोरपि ।
जुहूं च दक्षिणे हस्ते वामे तूपभृतं न्यसेत् ॥
ओ(१)ष्ठे तूलूखलं दद्यात्पृष्ठे च मुसलं न्यसेत् ॥
उरसि क्षिप्य दृषदं तण्डुलाज्यतिलान्मुखे ।
श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थालीं च चक्षुषोः ॥

ति । उत्तानत्वस्य ललाटादिपिण्डादिस्थापनाद्यनुगुणतयाऽधोमुखत्वं कैमुत्यन्यायलाभार्थमित्यस्वरसः । *शिरः स्थाने इति ।

---

(१) 'शिश्ने तूलूखलं' ग० ।

कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत् ।
अग्निहोत्रोपकरणमशेषं तत्र निक्षिपेत् ॥

प्रचेताः—

स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं ततः ।
नग्नदेहं दहेन्नैव *किञ्चिद्देयं परित्यजेत् ॥

यमः—

प्रेतं दहे*च्छुभैर्गन्धैः स्नापितं स्रग्विभूषितम् ।

आश्वलायनसूत्रे 'संस्थिते प्रेतालंकारान् कुर्वन्ति *केशश्मश्रुलोमनखानि वापयन्ति नलदेनानुलिम्पन्ति नलदमालां प्रतिमुञ्चन्ति' इति । माधवीये ब्राह्मे-

दरिद्रोऽपि न दग्धव्यो *नग्नः कस्यांचिदापदि ।

तथा—

निःशेषस्तु न दग्धव्यः शेषं किंचित्यजे*त्ततः ।

दाहकालेऽग्निनाशे तु मदरत्ने यज्ञपार्श्वः—

यजमाने मृते क्वापि चितादौ वा प्रवेशिते ।
*वर्षाद्यभिहतेऽग्नौ तु कथं प्रेतविकल्पना ॥
शेषं दग्ध्वा प्रदग्धेषु निर्मन्थ्यैव तु कारयेत् ॥

पाददेशे इति बोध्यम् । *स्थाने मृतिस्थाने । *किञ्चिद्देयं शववस्त्रैकदेशं श्मशानवास्यर्थं देयम् । *शुभैर्गन्धैः धूपसुगन्धचूर्णादिभिः । *केशेति । प्रेतवापनं कारिकानुक्तत्वाच्छिष्टानानुचरन्ति "नलदानुलेपनं भाले जीवताऽनुशार्य" इत्येवालङ्कारत्वात् । *नग्न इति । "अहतेन वाससाऽऽच्छाद्य" इत्याश्वलायनः । *ततः शवच्छादनवस्त्रात् । नर इति पाठे शवच्छादनवस्त्रशेषः शेषपदार्थः । *वर्षादीति । अग्निनाशपरम् । लौकिकाग्नौ व्याहृत्याऽऽज्यं हुत्वा तेन वा दाहः पूर्वोक्तः प्रेतमरणं हत्वा यथोक्तमग्निं गमयित्वा अनवेक्षमाणा अरण्यान्तिक एव वा

(क्रि(१)यानिबन्धे—

उदधारामविच्छिन्नां सिञ्चेत्कर्ता प्रदक्षिणम् ।
स्कन्धावसिक्तकुम्भेन पादतः परितश्चितेः ॥)

अथ पर्णशरादिदाहेनाग्निनाशे पश्चात्तदेहलाभे मदनरत्ने ब्राह्मे—

अथ पर्णशरे दग्धे पात्रन्यासे कृते सति ।
गतेष्वग्निषु तद्देहो यद्यूर्ध्वं लभ्यते क्वचित् ॥
तदाऽर्धदग्धकाष्ठानि तानि निर्मथ्य तं दहेत् ।
यद्यर्धदग्धकाष्ठं तु तदीयं वै न लभ्यते ॥
तदा तदस्थिखण्डं तु निक्षेप्तव्यं महाजले ॥

दंपत्योरेकदा मृतौ विशेषमाहापस्तम्बः-तथैव प्रेते सहैव पितृमेधो द्विवचनलिङ्गान्मन्त्रान्सन्धारयन्ति। पितृमेधो दाहान्तं कर्म, 'दाहान्तमेकतन्त्रत्वम्' इति बौधायनोक्तेः। अस्थिसंचयनमप्येकम् । उदकपिण्डदानादि पृथगेव । सहगमनेऽप्येवम् । तदाह मदनरत्ने भाष्यार्थसंग्रहकारः—

एककालमृतौ भार्या भर्ता च यदि चेत् द्वयोः ।
तन्त्रेण दहनं कुर्यात्पिण्डश्राद्धं पृथक् पृथक् ॥
एककाले मृतौ जायापती यदि तदा पितुः ।
विभज्याग्निं क्रियां कुर्यादिति यत्तदसांप्रतम् ॥
दाहान्तमेकतन्त्रत्वमिति याज्ञिकसंमतम् ॥
मृतं पतिमनुव्रज्य या नारी ज्वलने गता ।
अस्थिसंचयनान्तोऽस्या भर्तुः संस्कार एव हि ॥
कीकसानां तु संस्कारो न्यायसिद्धोऽपि यो मतः ।
एककाले मृतेप्येवं कीकसानां विधिः स्मृतः ॥

---

(१) कंसान्तर्गतं नास्ति ग० ।

नवश्राद्धं सपिण्डान्तं भिन्नकालमृतौ यथा ॥

कपर्दिकारिकापि—

मृते भर्तरि तद्दाहात्प्राक् पत्नी म्रियते यदि ।
पत्न्यां वा प्राक् प्रमीतायां दाहादर्वाक्पतिर्मृतः ॥
तत्र तन्त्रेण दाहः स्यान्मन्त्रेषु द्वित्वमूह्यते ।
कीकसानां तु संस्कारः पृथगेव तयोर्भवेत् ॥
एकाहमृत्यौ युगपन्नवश्राद्धादिकं तयोः ।
मृतं पतिमनुव्रज्य पत्नी चेदनलं गता ॥
तत्रापि दाहस्तन्त्रेण पृथगस्थिक्रिया भवेत् ।

अस्थिसंचयनपृथक्त्वे विकल्पः । सहगमने सर्वत्र पाकैक्यमाह प्रचेताः—

एकचित्यां समारूढौ म्रियेते दंपती यदि ।
तन्त्रेण श्रपणं कुर्यात्पृथक्पिण्डं समाचरेत् ॥

अथोदकदानं वसिष्ठः— "शरीरमग्नौ संयोज्यानवेक्षमाणा अपोऽभ्यवयन्ति *सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वन्त्ययुग्मम्" । आपस्तम्बः—"मातुश्च योनिसंबन्धेभ्यः पितुश्चासप्तमात्पुरुषाद्यावतां वा संबन्धो ज्ञायते तेषां प्रेतेषूदकक्रिया" इति । याज्ञवल्क्यः—

सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ।
अप नः शोशुचदघमनेन पितृदिङ्मुखाः ॥

ततोऽरतीभूताः कनिष्ठभूता इति । अरण्यं श्मशानम् । तत्र स्नानार्थमागमने बैजवापः "अपोऽभ्युपयन्ति" इति अभ्युपगमप्रयोजनतया स्नाने लक्षणा उद्धृतजलेन स्नाननिवृत्त्यर्थम् । दाहस्य शाखाभेदेन भेदाद्यथोक्तम् । अरतीभूताः उद्विग्नाः । रीतीभूता इति पाठे श्रेणीभूताः । *सव्येति ।

अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ।

सकृत्प्रसिञ्चन्त्युदकं नामगोत्रेण वाग्यताः ॥

*सप्तमाद्दशमाद्वा दि(१)वसादर्वागिति विज्ञानेश्वरः । कातीयास्तु सप्तमाद्दशमाद्वा *पुरुषादित्याहुः, "सप्तमाद्दशमाद्वा पुरुषात्समानग्रामवासे *यावत्सम्बन्धमनुस्मरेयुः" इति पारस्करोक्तेः । *मन्त्रस्नानाङ्गमेवेति हेमाद्रिः । प्रचेताः—"*प्रेतस्य बान्धवा यथावृद्धमुदकमवतीर्य नोद्धर्षयेयुरुदकान्ते प्रसिञ्चेयुरपसव्ययज्ञोप-

इत्यस्य बाधार्थम् । वा आ अपीति च्छेदेऽर्थमाह—*सप्तमादिति । "अपोऽभ्युपयन्ति" इति अजहत्स्वार्थलक्षणम् । अपोऽभ्युपगम्योदकन्ददतीत्यर्थः, न तु स्नान्तीति,

एवं मातामहाचार्यप्रेतानामुदकक्रिया ।

इति अतिदेशानुपपत्तेः । अत्र बहुवचनान्मातामही बोध्या । मन्त्रस्योदकदानेऽन्वयः । अनेन प्रसिञ्चन्तीत्यन्वयादेतद्वाक्ये स्नानाभावाच्च । "अप" इति मन्त्रं पठित्वा "अमुकनामा अमुकगोत्रः प्रेतस्तृप्यतु" इति प्रयोगः । *पुरुषादिति । अर्वाग्ज्ञातयो अपोऽभ्युपयान्ति । उदकसमीपं गत्वा स्नात्वोदकं ददतीत्यर्थः । सप्तमादिग्रहणमतन्त्रमित्याह—*यावत्सम्बन्धमिति । जन्मनामज्ञानपर्यन्तमित्यर्थः । *मन्त्र इति । "सव्यानामिकयाऽपनोद्यापनः शोशुचदघमिति दक्षिणामुखा निमज्जन्ति" इति । पारस्करोक्तेः । एवं सति मन्त्रे विकल्पः समुच्चयो वा । उदकदाने नामादियुक्त एव तन्यते मन्त्रः "असावेतत्ते उदकम्" इति तेनैवोक्तेः । असाविति प्रेतसम्बुद्धिः । स्नानप्रकारमाह—*प्रेतस्येति । नोद्धर्षयेयुरङ्गम् । न ह्येतावताऽन्यत्रोद्धर्षणं कार्यं तस्य मालिन्यनिवृत्त्यर्थत्वात् । वासस इत्युत्तरीयं क्षत्रवैश्यविषयम् । राजन्यवैश्यौ अपसव्ये वासोयज्ञोपवीते कृत्वेति शङ्खोक्तेः ।

---

(१)'दिवसादातदन्त' क छ०

वीतवाससो *दक्षिणामुखा ब्राह्मणस्योदङ्मुखा प्राङ्मुखाश्च राजन्यवैश्ययोः" । स एव *'नदीकूलं ततो गत्वा' इत्युक्त्वा—

सचैलस्तु ततः स्नात्वा शुचिः प्रयतमानसः ।
पाषाणं तत आदाय विप्रे दद्याद्दशाञ्जलीन् ॥
द्वादश क्षत्रिये दद्याद्वैश्ये पञ्चदश स्मृताः ।
त्रिंशच्छूद्राय दातव्यास्ततस्तु प्रविशेद् गृहम् ॥
ततः स्नानं पुनः कार्यं गृहशौचं च कारयेत् ॥

प्रेतस्नाने विशेषः शुद्धितत्त्वे (१)आदिपुराणे—

आदौ वस्त्रं च प्रक्षाल्य तेनैवाच्छादितैस्ततः ।
कर्तव्यं तैः सचैलं तु स्नानं सर्वमलापहम् ॥

ब्राह्मणानां त्वेकं वासः तथा बैजवापोक्तेः । योगीश्वरोक्तं पितृदिङ्मुखत्वं विप्रस्यैवेत्याह-*दक्षिणेति । शूद्रे त्वनियमः, उदकदानस्य सर्ववर्णसमत्वात् । तत्र कानिचिदङ्गानि वर्णविशेषनियन्त्रितानि कानिचित्तु सर्ववर्णसमानीति । *नदीकूलमिति । शौचं कृत्वा यथार्थवत् ।

वस्त्रं संशोधयेदादौ ततः स्नानं समाचरेत् । इति पादत्रयम् । नदी च भागीरथ्यादिः, "धर्म्यास्वप्सु" इति बैजवापोक्तेः । दश द्वादशाद्यञ्जलिदानं सर्वाशौचदिनानि मिलित्वा, तथा सति प्रत्यहमेकाञ्जलिदानसिद्धेः । प्रथमदिन एव दशाद्यञ्जलिदानविधिरिति केचित् । गृहप्रवेशः प्रथमदिन एव "उत्तीर्य वासांसि परिधाय सकृदेनान्यापीड्यादग्दशानि विसृज्यासीत आनक्षत्रदर्शनात्" इत्याश्वलायनोक्तेर्नक्षत्रदर्शनोत्तरं कार्यः स्नानगृहप्रवेशयोः पाठक्रमादार्थक्रमो विपरीतः । पुनः पदेन सकलपूर्वस्नानधर्मातिदेशेन नदीरूपाधिकरणप्राप्तेः गृहप्रवे-

---

(१) 'आदित्यपुराणे' ग० ।

पूर्वपारिहितं वस्त्रं प्रक्षाल्य पुनः परिधाय स्नायादित्यर्थः । *'अप नः' इति (१)मन्त्रेण वामहस्तानामिकया जलालोडनम् । अवतरणे वृद्धपुरःसरत्वोक्तेः । 'यथाबालं पुरस्कृत्य' इति बौधायनीयं जलादुत्थानपरमिति हारलतादयः । आश्वलायनः—*"सव्यावृतो व्रजन्त्यनीक्षमाणा *यत्रोदकमवहद्भवति तत्प्राप्य सकृदुन्मज्ज्यैकाञ्जलिमुत्सृज्य तस्य गोत्रं नाम गृहीत्वा" इति । प्रचेतसाऽन्वहमञ्जलित्रयमप्युक्तम् । तत्र 'त्रिःप्रसेकं कुर्युः प्रेतस्तृप्यतु' इति । तथा—

*दिनेदिनेऽञ्जलीन् पूर्णान् प्रदद्यात्प्रेतकारणात् ।
तावद्वृद्धिश्च कर्तव्या यावत्पिण्डः समाप्यते ॥

*एकवृद्धिस्त्रिकवृद्धिर्वेत्यर्थः । मदनरत्ने भरद्वाजगृह्ये

शोत्तरं तदसम्भवात् । पुनर्नदीगमनकल्पने गौरवात् तथैव शिष्टाचारात् । गृहशौचं त्वाशौचान्तादिने ।

*अप न इति । प्रोक्तपारस्करवाक्येऽपेतिमन्त्रस्य स्नानाङ्गत्वोक्तेरपनोदनममन्त्रकमेवेति बोध्यम् । *सव्यावृत इति । संस्कारानन्तरं चितामप्रदक्षिणमावर्त्य जलसमीपं स्नातुं व्रजन्तीत्यर्थः । "निर्हृत्य बान्धवाः प्रेतं संस्कृत्य प्रदक्षिणेन चितामभिगम्याप्सु सवाससो निमज्जनं कुर्यात्" इति विष्णूक्तेः । *यत्रेति । स्थिरजलं तडागादि । पूर्वोक्तनद्यसम्भवे । यद्यपि योगीश्वरेण सप्तमदिनपर्यन्तमेवोदकदानमुक्तं, गौतमेन तु "प्रथमतृतीयपञ्चमसप्तमनवमेषूदकाक्रिया" इति विषमदिने तदुक्तं, तथापि शिष्टाचारमनुरुध्याह—*दिने दिने इति । *एकवृद्धिः प्रथमदिने एकः द्वितीये द्वौ तृतीये त्रय इत्यादिक्रमेण । त्रिकवृद्धिः प्रथमे त्रयः द्वितीये षट् तृतीये नवेत्यादि । द्वैगुण्यत्रैगुण्यादिवृद्धि-

---

(१) 'मन्त्रेण' नास्ति क० छ० ।

तु द्विकवृद्धिरप्युक्ता—

आशौचान्ते प्रदद्यात्तु प्रेतपुत्रस्तिलाञ्जलीन् ।
प्रथमेऽह्नि सकृद्दद्यात् *पिण्डयज्ञावृता *दिवा ॥
त्रींश्च दद्याद्द्वितीयेऽह्नि तृतीये *पञ्च एव च ।
चतुर्थे सप्तसंख्यास्तु पञ्चमे नव चोत्सृजेत् ॥
षष्ठेऽह्नि चैकादशकाः सप्तमे तु त्रयोदश ।
अष्टमे पञ्चदशका नवमे दश सप्त च ॥
एकोनविंशतिं चाग्रे शताञ्जलिमतं स्मृतम् ।
केचिद्दशाञ्जलीन् प्रोचुः केचिदाहुः शताञ्जलीन् ।
पञ्चपञ्चाशतं चान्ये स्वशाखोक्त्यवस्थया ॥

छन्दोगपरिशिष्टे—

अथानवेक्षयन्पापः सर्वे चैव शवस्पृशः ।
गोत्रनामपदान्ते तु तर्पयामीत्यनन्तरम् ॥
*दक्षिणाग्रान्कुशान्कृत्वा सतिलं तु पृथक् पृथक् ॥

विष्णुपुराणे—–

*सपिण्डीकरणं यावदृजुदर्भैः पितृक्रिया ।
सपिण्डीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् ॥

रामायणे—–

इदं पुरुषशार्दूल विमलं दिव्यमक्षयम् ।
पितृलोकेषु पानीयं मद्दत्तमुपतिष्ठताम् ॥

पक्षाः स्मृत्यन्तरोक्ता बोध्याः । अत्रैकाञ्जलिपक्षः अञ्जलिपक्षः अञ्जलिवृद्धिपक्षश्चेति त्रयः पक्षाः । तत्रान्यतमानुष्ठानेन शास्त्रार्थसिद्धावपि गुरुपक्षावलम्बे प्रेतोपकारातिशयः कल्पनीयः । अन्यथा तदा स्नानानर्थक्यापातात् । *पिण्डयज्ञावृता पितृयज्ञप्रक्रियया प्राचीनावीतित्वादिरूपेण । *दिवेति रात्रिव्यावृत्तिः । *पञ्चेति एकवृद्धिपक्षे । उदकं तिलकुशसहितं देयमित्याह—*दक्षिणाग्राविति । कुशानामिह द्विगुणभुग्नतां निषेधति—*सपि-

*दानवाक्ये विकल्पः । याज्ञवल्क्यः—

कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजाम् ।

काम इच्छा । प्रेततृप्तीच्छायां देयमन्यथा नेत्यर्थः ॥ शङ्खपारस्करौ*"आचार्ये चैवं मातामहयोश्च स्त्रीणां चाप्रत्तानां कुर्वीरंस्ताश्च तेषाम्" इति । द्विवचनान्मातामह्या अपि । शङ्खलिखितौ—"उदकक्रिया कामं श्वशुरमातुलयोः शिष्ये सहाध्यायिनि राजनि च" इति । वृद्धमनुः—

*क्लीबाद्या नोदकं कुर्युः*स्तेना*व्रात्या*विधर्मिणः ।
गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः ॥

याज्ञवल्क्यः—

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ।

षडशीतौ—

स्वीयाचारादपि भ्रष्टाः पतिता ये च दूषिताः ।
न कुर्युरुदकं ते वै तेभ्योऽप्यन्ये न चैव हि ॥

ण्डीति । *दानवाक्ये । प्रेतस्तृप्यतु इति । प्रचेताः—अमुष्मै स्वधेति । बैजवापो—असावेतत्ते उदकमिति । पारस्करोऽसौ तृप्यतामिति । हारीतः गोत्रनामपदान्ते च तर्पयामीत्येवं वदेदिति हारीतः कात्यायनश्चेति तत्तदानमन्त्रैः सह रामायणदानवाक्ये । सखा मित्रम् । प्रत्ता परिणीता दुहितृभगिन्यादिः । सपिण्डसोदकानामुदकदानस्य नित्यत्वार्थं कामपदम् । अन्यत्रापि नित्यं, तदाह—*आचार्ये इति । स्त्रीणां दुहितृभगिन्यादीनाम् । *क्लीबाद्या इति । आद्यपदेन ब्रह्महादयः । *स्तेनाः सुवर्णतत्समद्रव्यहर्त्तारः । *व्रात्याः कालेऽनुपनीताः । *विधर्मिणः पाखण्डिनः । गर्भपदं पुत्रदुहित्रोरुपलक्षणम् । गर्भादयश्चत्वारोऽब्राह्मणं प्रति । योषितोऽसवर्णा अपि अपविद्धाः बहिष्कृताः ।

मदनरत्ने हारीतः--

पतितानामवृद्धानां चरन्तीनां च कामतः ।
*प्रत्तानां चैव कन्यानां निर्वर्त्या सलिलक्रिया ॥

अपरार्के शङ्खलिखितौ–"अपपात्रितस्य रिक्थपिण्डोदकानि व्यावर्तन्ते" । अपपात्रितः कृतघटस्फोटः । तस्यापि संग्रहविधौ कृते आशौचोदकादि कुर्यादेवेत्याशौचप्रकाशः ॥

अथा*शौचे नियमाः । याज्ञवल्क्यः—

*इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः ।

---

*प्रत्तानां स्वस्रादीनाम् ।

*आशौचे मरणाशौचे । *इतीति ।

कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान् ।
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसंम्भवे ॥
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥

इति प्रकृतम् । ग्रामात् उदकात् सम्यगुत्तीर्णान् । मृदुशाद्वलेति तत्रैव "शवस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनाद्रात्रौ चेदादित्यस्य" इति पारस्करोक्तेः बहिरेव वस्त्रशोषणादिकं कर्तव्यम् । बहिःस्थित्यशक्तौ स एव "ब्राह्मणानुमत्या वा" इति । तान् पुत्रादीन् प्रति । कुलवृद्धा इति अर्थलभ्यम् । शोकनिर-

*विदश्य निम्बपत्राणि *नियता द्वारि वेश्मनः ॥
आचम्या*ग्न्यादिसलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः ॥
प्रवेशनादिकं कर्म *प्रेतसंस्पर्शिनामपि ।
*क्रीतलब्धाशना भूमौ स्वपेयुस्ते *पृथक् *क्षितौ ॥

सनसमर्थोतिहासमाह–मानुष्येति । जलबुद्बुदोऽचिरविनश्वरः । पञ्चधा भूतपञ्चकात्मतया । स्वशरीरं प्राग्जन्मतः यदि फलोपभोगक्षयः । परिदेवनाऽनुशोचनम् । वस्तुतस्तथात्वात् । वस्तुस्थिते केनाप्यतिक्रमितुमशक्यत्वात् । नेदमाश्चर्यं यन्मरणमित्याह–गन्त्रीति । कथमिति । तथाच मरणधर्मिणः नाशस्यावश्यकतया शोको निष्फल इति भावः । अनिष्टापादकत्वादपि न शोको युक्त इत्याह–श्लेष्मेति । अतो नेति । इतः परं रोदननिषेधः । ग्रन्थे–*विदश्येति । विदशनं (१)खण्डनं न तु भक्षणम् । *नियताः मूत्रपुरीषाद्युत्तरं विहितशौचेन शुचयः । अत्रार्थक्रम ऊह्यः । *अग्न्यादीति । "अश्मानमग्निं गोमयमक्षतां तैलमप उपस्पृशन्ति" इत्याश्वलायनः । तत्र दृश्यस्पर्शः पादेन, "कृत्वाश्मनि पदम्" इत्युल्लङ्घनव्यावर्तनात् । "दूर्वाप्रवालमग्निवृषभौ वा" इति शाङ्खः । दूर्वाप्रवालं दूर्वाङ्कुरः इदमादिपदग्राह्यम् । केषाञ्चिदालम्भे मन्त्रानपि वक्ष्यति–शमीमित्यादिना । *प्रेतसंस्पर्शिनाम् । सपिण्डानां शवनिर्हरणस्नानालङ्करणकर्तॄणाम् । *क्रीतम् । अयाचितं लब्धं वा । एतदेवोत्पन्नम् । महागुरुमृतौ त्र्यहमेकाहं वोपोष्य पारणा क्रीतोत्पन्नेनैव । *पृथक् एकाकिनः । *क्षितौ तार्णास्तीर्णायाम् । क्षितिपदं खट्वाकम्बलादिनिषेधार्थं न तु कटस्य, "भूमौ प्रस्तरशायिनः" इति विष्णुपुराणात् । दिवाऽप्युपवेशनं तार्णास्तीर्णक्षितावेवेत्याह–

---

(१) खण्डनं दन्तैरिति यावत् ।

इदं चाद्येऽह्नि । वसिष्ठः-“*अधः(१)प्रस्तरे त्र्य(१)हमनश्नन्त आसीरन् क्रीतोत्पन्नेन वा वर्तेरन्” । शुद्धितत्त्वे बैजवापः-“शमीमालभन्ते शमी पापं शमयत्विति, अश्मानमश्मेव स्थिरो भूयासमिति, अग्निमग्निर्नः शर्म यच्छत्विति, (२)ज्योतिरित्यन्तरा गामजमुपस्पृशन्तः क्रीत्वा लब्ध्वा वाऽन्यगेहोदकान्नमलवणमेकरात्रं दिवा भुञ्जीरंस्त्रिरात्रं च कर्मोपरमणम्” क्रीताद्यशनमुपवासाशक्तस्य । आश्वलायनस्तु-“नैतस्यां रात्र्यामन्नं पचेरन् क्री(३)तोत्पन्नेन वा वर्तेरंस्त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रं वा” इत्याह । अशक्तौ रत्नाकरे आपस्तम्बः-“भार्यापरमगुरुसंस्थायां चाकालभोजनानि कुर्वीरन्” । यदा मृतिः, परदिने तावत्कालमित्यर्थः । बृहस्पतिः—

अधःशय्यासना *दीना *मलिना भोगवर्जिताः ।
अ*क्षारलवणान्नाः स्युर्लब्धक्रीताशनास्तथा ॥

भोगोऽभ्यङ्ग*ताम्बूलादिः । *क्षाराः परिभाषाया-

---

*अधःप्रस्तरे इति । आशौचिनां शयनासनार्थं निर्मितः कटादिरधः प्रस्तारः । *दीना इति मङ्गलहर्षरहस्यादेर्निषेधः । *मलिना इति । मार्जनवस्त्रक्षालनादेः । *क्षारो यवक्षारादिः, लवणविशेषणं वा । तेन सैन्धवादेरनिषेध इति । मेधातिथिस्त्वक्षारलवणान्ना इत्यत्रैव अक्षारालवणाशिन इति आश्वलायनेन नञ्द्वयोपादानात्पृथक् क्षाराणां गोधूमगुडादीनां निषेध इत्याह । *ताम्बूलादिरिति । आदिना स्रक्चन्दनादिधारणव्यसनोच्चासनादिग्रहः । *क्षारा इति ।

---

(१) ‘अद्य प्रस्तरे गृहमनश्नन्त’ ग० ।
(२) ‘ज्योतिष अन्तरा’ ग० । (३) ‘क्रीतोत्पन्नेन वा वर्तेरन्’ ग० ।

मुक्ताः । यत्तु मार्कण्डेयपुराणे—

तैलाभ्यङ्गो बान्धवानामङ्गसंवाहनं च यत् ।
तेन चाप्यायते जन्तुर्यच्चाश्नन्ति स्वबान्धवाः ॥
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ।
वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात्तिलोदकम् ॥ इति ।

तदन्त्यदिनपरम्, "आशौचान्ते *तिलकल्कैः स्नाता गृहं प्रविशेयुः" इति विष्णूक्तेः । विष्णुपुराणे त्वास्थिसंचयनोर्ध्वं *भोगोप्युक्तः—

शय्यासनोपभोगस्तु *सपिण्डानामपीष्यते ।
अस्थिसंचयनादूर्ध्वं *संयोगस्तु न योषिताम् ॥

भारते—

तिलान् द(१)दतु पानीयं दीपं द(१)दतु जाग्रतु ।
ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम् ॥

मनुः—

*मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ।

तिलमुद्गाद्यृते शैब्यं सस्ये गोधूमकोद्रवौ ।
धान्याके देवधान्यं च शमीधान्यं तथैक्षवम् ।
सिन्नधान्यं तथा पण्यं मूलं क्षारगणाः स्मृताः ॥ इति ।

*तिलकल्कैरिति । तिलकल्काविकल्पितत्वादन्त्यदिनमात्रगामीति भावः । *भोगोपीति लोलुपताऽर्थः । *सपिण्डानामिति । पुत्रस्य तु दशाहं कटम् यावदाशौचं यावद्भोगनिषेधः, "दशाहं कटमुपासीरन्मातापित्रोर्मरणे" इति बौधायनस्मृतेः । *संयोगो मैथुनम् । सपिण्डानामिति वर्तते । *मांसाशनमिति गौतमेन "ब्रह्मचारिणो न मार्जयीरन् मांसं न भक्षयेयुराप्रदानात्" इति प्रदानमैकादशाहिकश्राद्धं तत्पर्यन्तं मार्जनरहितस्ना-

---

(१) 'ददत' क० ।

देवजानीये कारिकायाम्—

लवणक्षीरमाषान्नापूपमांसानि पायसम् ।
वर्जयेदाहृतान्नेषु बालवृद्धातुरैर्विना ॥
उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य वा भवेत् ॥

मरीचिः—

*प्रथमेऽह्नि तृ(१)तीये च सप्तमे दशमे तथा ।
ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम् ॥

भोजनं च दिवैव,

दिवा चैव तु भोक्तव्यममांसं मनुजर्षभ ।

इति विष्णुपुराणात् । 'क्रीत्वा लब्ध्वा वा दिवान्नमश्नीयुः' इति पारस्करोक्तेश्च । मदनरत्ने हारीतः—'पाणिषु मृन्मयेषु पर्णपुटकेषु वाऽश्नीरन्' । देवजानीये ब्राह्मे (शु(२)द्धितत्त्वे आदिपुराणे-)

आशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान् ।

अन्त्यदिने तु मदनरत्ने ब्राह्मे—

यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः ।
स तत्र गृहशुद्धिं च *वस्त्रशुद्धिं करोत्यपि ॥

अन्त्यकर्मकालीनवस्त्रयोस्तु तत्रैवोक्तम्—

ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी ।
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोत्यथ॥इति ।

नं मांसभक्षणवर्जनं चोक्तम् । "त्र्यहं मांसाशनं च नाश्नीयुः" इति मनुस्तु मांसलोलुपपरः । दिनविशेषे सहभोजनपक्षमाह-*प्रथमेऽह्नीति । एकान्नमिति । "क्रीत्वा लब्ध्वा वाऽन्यगृहादेकान्नमलवणमेकां रात्रीं भुञ्जीरन्" इति बैजवापोऽपि द्रष्टव्यः । *वस्त्रशुद्धिः निर्णेजकादिद्वारा निर्णेजनम् । "प्रथमतृतीयपञ्चमसप्तम-

---

(१) 'तृतीये च चतुर्थे सप्तमे तथा' क० ।
(२) धनुश्चिन्हान्तर्गतं नास्ति ग० ।

शङ्खः—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च ।
प्रेतपिण्डक्रियावर्ज्यमाशौचे विनिवर्तते ॥

काठकगृह्ये–'यत्र प्राणोत्क्रमस्तत्रान्वहं महाबलिं कुर्यात्' इति । पारस्करः–'तदानीमेव वस्त्रं तण्डुलं दीपं कांस्यभाजनं प्रेताय दद्यात्' । आशौचप्रकाशे भरद्वाजः–

वासोऽन्नं च जलं कुम्भं प्रदीपं कांस्यभाजनम् ।
नग्नप्रच्छादने श्राद्धे ब्राह्मणाय निवेदयेत् ।

भृगुः—

तिलोदकं तथा पिण्डान् नग्नप्रच्छादनादिकम् ।
रात्रौ न कुर्यात्संध्यायां यदि कुर्यान्निरर्थकम् ॥

अथ *प्रेतपिण्डः । यद्यपि हेमाद्रौ पारस्करेण—

ब्राह्मणे दशपिण्डास्तु क्षत्रिये द्वादश स्मृताः ।
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिताः ॥

इ(१)त्युक्तं, तथापि—

प्रेतेभ्यः सर्ववर्णेभ्यः पिण्डान्दद्याद्दशैव तु ।

इति तेनैवोक्तेः सर्वेषां दशैव ज्ञेयाः । मदनरत्नेऽप्येवम् । *तथा च हेमाद्रौ ब्राह्मपाद्मयोः—

जात्युक्ताशौचतुल्यांस्तु वर्णानां क्वचिदेव हि ।

नवमेषु वाससां त्यागः" इति गौतमोक्तत्यागस्तु परिवर्तनमात्रम् । *प्रेतपिण्डः—

तिलमन्नं च पानीयं धूपं दीपं तथैव च ।
मधु सर्पिः खण्डयुतं पिण्डमष्टाङ्गमुच्यते ॥

इत्यष्टाङ्गः । नन्वेवं पूर्वोक्तसंख्या बाध्येतेत्यत आह–*तथा·

---

(१) अत्र शक्तं प्रति पक्षान्तरमुक्तं धर्मप्रदीपे–प्रथमेऽह्नि तृतीये वा पञ्चमे सप्तमे तथा । द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषास्तु दशमेऽहनि॥इति।

*देशधर्मान्पुरस्कृत्य प्रेतपिण्डान्वपन्त्यपि ॥

इत्युक्त्वा विप्रान्येषु दशमपिण्डोत्कर्ष उक्तः—

देयस्तु दशमः पिण्डो राज्ञां वै द्वादशेऽहनि ।
वैश्यानां वै पञ्चदशे देयस्तु दशमस्तथा ॥
शूद्रस्य दशमः पिण्डो मासे पूर्णेऽह्नि दीयते ॥ इति ।

युद्धमृतादेः सद्यःशौचे त्र्यहादौ च तेनैवोक्तम्—

सद्यःशौचे प्रदातव्याः सर्वेऽपि युगपत्तथा ।
*त्र्यहाशौचे प्रदातव्यः प्रथमेऽह्न्येक एव हि ॥
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि ॥

त्र्यहे *प्रकारान्तरं प्रागुक्तम् । शातातपः—

आशौचस्य च ह्रासेऽपि पिण्डान्दद्याद्दशैव तु ।

तत्रैकपात्रे सकृत्पक्त्वा दश पिण्डान् दद्यात,

*उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये ।
पूर्वदत्ताञ्जलीन्दद्यात्पूर्वपिण्डांस्तथैव च ॥

इति गृह्यकारिकायां पात्रविपर्यये दोषोक्तेः । शि-

चेति । सर्वेषां दशैव पिण्डा इति सिद्धौ चेत्यर्थः । *देशेति । पूर्वोक्तसंख्याया देशविशेषविषयतया न विरोध इति भावः । *महाशौचेति । त्र्यहादाविति पाठे आदिपदेन शूद्रपञ्चाहादि ग्राह्यम् । *प्रकारान्तरम्—

प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥
त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादि क्षालयेत्ततः ।

इति पारस्करोक्तम् । *उत्तरीयेति । आचार्यविपर्ययेऽप्येवमिति (१)वदतामयमभिप्रायः-आचार्यस्यापि कारयितृत्वेन प्रयो-

---

(१) अन्त्येष्टिपद्धतौ भट्टानामित्यर्थः ।

लाविपर्यये घटस्फोटादेर्नावृत्तिः । *अत्राभ्यञ्जनादिपदकर्मणः एकहायनीनयनवदप्रयोजकत्वात् । तद्वच्चात्र लौकिकग्रहणम् । केचित्तु—

नवान्यादाय भाण्डानि आरुकं चरुकं तथा ।

इति प्रचेतसोक्तेः पात्रानेकत्वमाहुः । *क्रियाकर्तुर्नाशेऽन्येन शेषः समापनीयः,

एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते ।
तद्बन्धुना क्रिया कार्या सर्वैर्वा सहकारिभिः ॥

इति शुद्धितत्वे बृहस्पतिस्मृतेः । पत्न्याः कर्तृत्वे रजोदर्शने च तदन्ते कुर्यात्, 'शावाद् द्विगुणमार्तवम्' इत्युक्तेः । आशौचान्ते आर्तवे कर्तुरस्वास्थ्ये वाऽन्येन क्रिया सर्वाऽऽवर्तनीया, कर्तुर्विपर्ययात्कालातिक्र-

---

जककर्तृत्वमिति । *अत्रेति । ज्योतिष्टोमे "एकहायन्या क्रीणाति" इति सोमक्रय आम्नातः । सेयमेकहायनी गौर्यदा सोमं क्रेतुमानीयते तदाऽध्वर्युः पृष्ठतोऽनुगच्छन् सप्तमे पदे हिरण्यं निधाय हुत्वा तत्पदगतं रजो गृह्णीयात् गृहीतेन च तेन रजसा हविर्धानयोः शकटयोरक्षमञ्ज्यात् इत्यक्षाञ्जनमपि "यदि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यात्" इत्यभिहितम् । तत्र यथा क्रयः सन्निकृष्टः तथा पदकर्माप्यक्षाञ्जने सन्निकृष्टमिति क्रयवत् पदकर्मापि सोमक्रयण्यानयनस्य प्रयोजनमिति पूर्वपक्षे एकहायन्या सोमं क्रीणातीति तृतीयाश्रुत्या गोः क्रयार्थत्वावगमाद् गोद्वारा तदानयनक्रयार्थमिति क्रय एवानयने प्रयोजकः । ननु पदकर्मार्थत्वं गोर्वा तदानयनस्य वा क्वचिद् ब्रूयते इति न पदकर्मानयनप्रयोजकमिति सिद्धान्तः । तद्वद् घटस्फोटो न शिलानयनस्य प्रयोजकः किन्त्वौर्ध्वदेहिकमित्यर्थः । शुद्धितत्त्वोक्तविपर्ययपदोपादानफलमाह—*क्रियाकर्तुरिति । पित्रोर्दशाहं कुर्वन् यदि पुत्रो

मायोगाच्च ।

वाराहे—

स्थण्डिले प्रेतभागं तु दद्यात्पूर्वाह्ण एव तु ।
कृत्वा तु पिण्डसंकल्पं नामगोत्रेण सुन्दरि ॥

मरीचिः—

प्रेतपिण्डं बहिर्दद्याद्दर्भमन्त्रविवर्जितम् ।
प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः ॥

दर्भवर्जनमनुपनीतपरम्, 'असंस्कृतानां भूमौ पिण्डं दद्या*त्संस्कृतानां कुशेषु' इति प्रचेतसोक्तेः । मिताक्षरायां स्मृत्यन्तरे- *'भूमौ माल्यं पिण्डं पानीयमुपले वा दद्युः' ।

मृतः पुत्रान्तरं शेषपिण्डं दद्यात् तदसत्त्वे तु तत्पुत्रः प्रत्यहमादौ स्वपितुः पिण्डं दत्त्वा स्नात्वा पितामहस्य शेषपिण्डं दद्यात् अन्यस्याधिकाराभावात् । दत्तकसत्त्वे यथामतं स वा पौत्रो वा शेषपिण्डं दद्यात् । एवमेवान्यस्मिन् कर्त्तरि । न त्वपकृष्य शेषः समापनीय इत्यर्थः । एतच्च दाक्षिणात्या न मन्यन्ते । सपिण्डने पितामहमृतौ दशाहान्तः पितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वं भावयेत् वृत्ते दशाहे नैवमिति स्वयमभिधानस्य मानत्वात् । *संस्कृतानामिति । "संस्तरे दर्भान्" इत्युत्तरब्राह्मं तूपनीतपरमिति भावः । *भूमाविति । सकलस्मृतिपुराणेषु भूमिः कुशास्तीर्णैव "गृहद्वारि तस्मै प्रेताय पिण्डं निर्वपेयुः भूमौ माल्यं पानीयं चोपलिप्तायां दद्युः" इति प्रचेतोवचनाच्चात्रापि उपलिप्तायामित्येव पाठः । केचित्तु भूमावित्यसंस्कृतपरम् । तत्परमेव चोपले इति । पाषाणमयदेशे इत्यर्थ इत्याहुः । स्मृत्यन्तरे तु—

भूमौ पिण्डप्रदानं च कर्षूं कृत्वा विधानतः ।

(हा(१)रीतः—

अकृतचूडा ये बाला ये च गर्भाद्विनिःसृताः ।
मृता अनुपनीता ये अनूढा अपि कन्यकाः ॥
ये मृताश्चाप्यसंस्कारास्तेभ्यो भूमौ प्रदीयते ।

पैठीनसिः—

शालिनां सक्तुभिर्वापि पिण्याकैर्वापि निर्वपेत् ॥)

शुनःपुच्छः—

*फलमूलैश्च पयसा शाकेन च गुडेन च ।
*तिलमिश्रं तु दर्भेषु पिण्डं दक्षिणतो हरेत् ॥
*तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च ।
शालिनां सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् ॥
प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् ।

मदनरत्ने मात्स्ये—

तैजसं मृन्मयं वाथ पात्रं संशोध्य यत्नतः ।
लौकिकाग्नावधिश्रित्य पचेदन्नं घृतप्लुतम् ॥
स्नात्वाऽथ तिलसंमिश्रं प्रदद्याद्दर्भसंस्तरे ॥

शुद्धितत्त्वे देवजानीये च ब्राह्मे—

प्रथमेऽहनि यो दद्यात्प्रेतायान्नं समाहितः ।
अन्नं नवसु चान्येषु स एव प्रददात्यपि ॥

इत्युक्तम् । प्रादेशमात्रदीर्घश्चतुरङ्गुलविस्तारस्तावदेव निम्नो गर्तः कर्षूः । *फलेति । फलादीनां साक्षादसाधनत्वेऽपि तन्मिश्रितस्य तत्त्वं, परन्तु फलादीनां बहलत्वमावश्यकं प्राधान्यात् । *तिलमिश्रमिति सर्वशेषः सर्पिःसेकोऽप्यावश्यकः । क्षीरसेकस्तु सति सम्भवे । प्रथमेऽह्निकरणे त्वग्रेऽप्यावश्यकः । एतेन—

फलमूलगुडक्षीरतिलमिश्रं तु कुत्रचित् ।

इति ब्राह्मं व्याख्यातम् । मधुस्थाने गुड उक्तः । *तूष्णी-

---

(१) कंसान्तर्गतं नास्ति क० छ०

मृन्मयं भाण्डमादाय नवं स्नातः *सुसंयतः ।
तण्डुलप्रसृतिं तत्र त्रिः प्रक्षाल्य पचेत्स्वयम् ॥
सपवित्रैस्तिलैर्मिश्रं कृमिकेशविवर्जितम् ।
द्वारोपान्ते ततः क्षिप्त्वा शुद्धां वा गौरमृत्तिकाम् ॥
भूपृष्ठे संस्तरे दर्भान् याम्याग्रान्देशसंभवान् ।
ततोऽवनेजनं दद्यात् संस्मरन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः संसिक्तं *तप्तमेवहि ।
दद्यात्प्रेताय पिण्डं तु दक्षिणाभिमुखः स्थितः ।
अर्घ्यैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः ।
ऊर्णातन्तुमयैः शुद्धैर्वासोभिः पिण्डमर्चयेत् ॥
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ।
सद्यःशौचे प्रदातव्याः सर्वेऽपि युगपत्तथा ॥
त्र्यहाशौचेऽपि दातव्यास्त्रयः पिण्डाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥
त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादि क्षालयेत्ततः ।
दशाहेऽपि च दातव्यः प्रथमे त्वेक एव हि ॥
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकं च दीयते ।

मिति । प्रसेकोऽर्घ्यः । *सुसंयत इति । एतदुत्तरं—

लकुडं सर्वदोषघ्नं गृहीत्वा तोयमानयेत् ।
ततश्चोत्तरपूर्वस्यामग्निं प्रज्वालयेद्दिशि ॥

इत्येतदनन्तरं तण्डुलप्रसृतिमित्यादि । द्विः प्रक्षाल्य पचेदिति पाठः । *तप्तमिति ।

न याति यावदाकाशं पिण्डाद्बाष्पमयी शिखा ।
तावत्तत्संमुखं तिष्ठेत् सर्वं तोये क्षिपेत्ततः ।

इति ब्राह्मं च द्रष्टव्यम् । तण्डुलेति मुख्यः कल्पः फलमूलैरित्यादिस्त्वनुकल्पः । शुद्धां वेति वाकार उपान्त्यदेशानियतार्थः,

द्वितीये द्वौ तृतीये त्रीन्'

*इत्याद्युक्त्वा—

एवं स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः ॥इति ।

पात्रं कुम्भः । अत्राहःपदमहोरात्रपरम् । तेन रात्रावपि देय इति गौडाः । *दिवसपदाद्रात्रौ नेति मै-

---

"प्रेतपिण्डं बहिर्दद्यात्" इत्युक्तेः ।

ग्रामाद् बहिश्च कर्तव्यं जलाशयसमीपतः ।
पिण्डदानं दशाहानि प्रेतायारण्यमाश्रितैः ॥

इति ब्राह्माच्च । शुनःपुच्छोपि--

द्वारदेशे प्रदातव्यो देवतायतनेषु च । इति ।

गौरमृत्तिकाप्रक्षेपस्तु स्थण्डिलार्थः, "स्थण्डिले" इत्युक्तवाराहात् । मधु क्षौद्रं कलिवर्ज्यमित्याहुः । *इत्याद्युक्त्वेति ।

"चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त चैव हि ।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ॥

इत्युक्तेरर्थः । पञ्चपञ्चाशत्तोयाञ्जलिदानं च पिण्डोपरि, द्वितीयतृतीयादिशब्दैः सन्निहितपिण्डानामेवोक्तेः । पिण्डानामवयवपूरकत्वमुक्त्वा--

एकादशैवेन्द्रियाणि सन्ति बुद्धिवधैः(?) सह ।
सर्वेषामेव भूतानां परलोकसमागमे ॥
प्रेतभावगतानां तु रौरवादिषु वर्तताम् ।
पञ्चभिः पञ्चभिस्त्वेभिः पात्रैरञ्जलिभिस्तथा ॥
एकादशैवेन्द्रियाणि पूर्यन्ते शास्त्रदर्शनात् ।

इति ब्राह्मे सपात्राञ्जलीनामिन्द्रियपूरकत्वाभिधानाच्चापूर्वतोयाञ्जलीनां च तापोपशान्त्यर्थत्वात्। अत्रास्वरसं सूचयन्नाह-*दि-

थिलाः। स एवेत्युक्तेः सपिण्डेन दशपिण्डे प्रक्रान्ते पुत्रागमेऽपि स न दद्यात्, *'असगोत्रः सगोत्रो वा' इति प्रागुक्तेः। *दाहकर्त्रैव दशाहं कुर्यादिति मिताक्षराया-

---

वसेति। रात्रिमृतौ त्ववयवकरणपिण्डमपवादः। *असगोत्र इति। यः सान्निकृष्टासन्निधानात् प्रथमेऽहनि दद्यात् स मध्ये सन्निकृष्टासन्निधानेऽपि दद्यात् नान्य इत्यर्थः। यत्तु—

स्वगृहे विद्यते पुत्रः पिता ग्रामान्तरे मृतः।
केनापि तत्र चारब्धमग्निपिण्डोदकादिकम्॥
पुत्रः संचयनात् प्राक् चेद् गच्छेदूर्ध्वं स आचरेत्।
स्वगृहे तत्र वा सर्वं प्रेतकार्यं सपिण्डनम्॥

इति मैत्रायणीयपरिशिष्टोक्तेः कथं कर्तृनियम इति ? तन्न, तस्य निर्मूलत्वात्। यद्वा कर्ता चेत् पुत्रेण प्रतिषिद्धः सन् दशाहकर्म त्यजति तदा पुत्रो दशाहमावर्तयेत्। पुत्रश्चेद्गच्छेत्तदा सञ्चयनात् प्रागूर्ध्वं च स आचरेदित्यर्थः। सञ्चयनं यदि कृतं तदा पुत्रो न तदाचरेत्, अन्यथा तु तदपि। ननु—

भयस्थानेऽथवा मार्गे मृतस्तत्र च संस्कृतः।
न तिष्ठति जनस्तत्र तत्र पिण्डं च वर्जयेत्॥

इति वाक्यवेद्यदाहास्थिसञ्चयौ संस्कारौ यत्र कृतौ तत्र भयादिना स्थातुमशक्तौ यत्र यत्र प्रेतकार्यकृद्गच्छेत्तत्रैव पिण्डोदकदानादि सपिण्डान्तं कुर्यादित्यापत्तिरितिचेत् ? न, दशाहक्रियादेशस्य दाहास्थिसञ्चयदेशबाधेऽपि भेदाऽयोगात्। यदि पित्रोर्दशाहं कुर्वन् पुत्रो रोगेणान्येन वा केनचित्प्रतिबन्धेन समापयितुमशक्तः तदा तत्पुत्रः पितामहस्य दशाहमावर्तयेत्। तस्य पुत्रान्तरसत्त्वे तु स एव। दत्तकसत्त्वे यथामतं स वा पौत्रो वा। मातुः पक्षिणीमध्ये मातृक्रिया कार्या, त्र्यहत्र्यहवृद्धौ त्र्यहाशौचवत्। *दाहकर्त्रैवेति। पुत्राद्यसन्निधानेऽन्येन दाहे कृते प्रथमपिण्डो-

म्र । शुद्धितत्त्वे वायवीयेऽपि—

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि ॥ इति ।

तत्रैव—

*पूरकेण तु पिण्डेन देहो निष्पद्यते यतः ।
कृतस्य करणायोगात् पुनर्नावर्तयेत् क्रियाम् ॥

शुद्धिप्रकाशे वायवीयेऽपि—

निवर्तयति यो मोहात् क्रियामन्यनिवर्तिताम् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥
तस्मात् प्रेतक्रिया येन केनापि च कृता यदि ।
न तां निवर्तयेत्प्राज्ञः सतां धर्ममनुस्मरन् ॥ इति ।

आदिपुराणे—

पितृशब्दं स्वधां चैव न प्रयुञ्जीत कर्हिचित् ।
*अनुशब्दं तथा चेह प्रयत्नेन विवर्जयेत् ॥
उपतिष्ठतामयं पिण्डः प्रेतायेति समुच्चरेत् ।

क्रियानिबन्धे व्यासः—

प्रेताय पिण्डं दत्त्वा तु ततोऽश्नीयाद्दिनात्यये ॥

भविष्ये—

ओदनामिषसक्तूनां शाकमूलफलादिषु ।
प्रथमेऽहनि यद्दद्यात्तद्दद्यादुत्तरेऽहनि ॥
गृहद्वारे श्मशाने वा तीर्थे देवगृहेपि वा ।
यत्राद्ये दीयते पिण्डस्तत्र सर्वं (१)समाचरेत् ॥

मक्रमात्पूर्वं पित्राद्यागमनेऽपि दाहकर्तृभिन्नतया निषेधात्कथञ्चिद्दग्धुर्विपर्यासे क्रियामात्रावृत्तिर्वाचनिकत्वात् । *पूरकेण त्विति । आद्यपिण्डानन्तरं पुत्राद्यागमे देहस्य प्रारब्धत्वात्तन्निष्पत्तावेव यते-

---

(१) 'समापयेत्' ग० ।

ब्राह्मे—

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकाश्च समासतः ॥
गलांसभुजवक्षांसि तृतीयेन यथाक्रमम् ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
जानू जङ्घे तथा पादौ पञ्चमेन तु सर्वदा ।
सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ॥
दन्तलोमान्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥ इति ।

याज्ञवल्क्येन तु—

*पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ।

इत्युक्तम् । अत्र फलतारतम्यं ज्ञेयमिति विज्ञानेश्वरः । तेन त्र्यहाशौचपरत्वं देवयाज्ञिकोक्तं चिन्त्यम् ।

आशौचस्य च ह्रासेपि पिण्डान्दद्याद्दशैव तु ।

इति वचनाच्च । दिनत्रयावश्यकत्वार्थमिति हारलतादयः ।

शातातपः—

जलमेकाह*माकाशे स्थाप्यं क्षीरं च मृन्मये ।

पारस्करः—"मृन्मये तां रात्रिं क्षीरोदके विहायसि

तेत्यर्थः । *अनुशब्दं ये च त्वामत्रान्विति । *पिण्डयज्ञावृतेति । पितृयज्ञवत् आवृत् अनुष्ठानप्रकारः तया प्राचीनावीतित्वादिना दिनत्रयं प्रेतायान्नं क्षितौ दद्यादित्यर्थः । पितृयज्ञप्रकारोक्तावपि स्वधाशब्दादिनिषेधः पूर्वोक्तः । *आकाश इति । शिक्यादौ द्रव्यद्वयविधानसामर्थ्याद्द्वयोः शरावयोर्भेदेन विधानम् । 'मृन्मये' इति एकवचनादेकत्रैवोभयविधानमिति तु न युक्तम्,

पृथक्शरावयोर्दद्यादेकाहं क्षीरमम्बु च ।

निदध्युः, *प्रेतात्र स्नाहीत्युदकं, पिब चेदमिति क्षीरम्"। इदं रात्रावेवेति गौडाः । गारुडे तु—

अपक्वे मृन्मये पात्रे दुग्धं दद्याद्दिनत्रयम् ।

इत्युक्तम् । हेमाद्रौ पाद्मे तु दशाहमुक्तम्—

*तस्मान्निधेयमाकाशे दशरात्रं पयो जलम् ।
सर्वतापोपशान्त्यर्थमध्वश्रमविनाशनम् ॥

देवजानीये कारिकायाम्—

तत्र प्रेतोपकृतये दशरात्रमखण्डितम् ।
कुर्यात्प्रदीपं तैलेन वारिपात्रं च मार्तिकम् ॥
भोज्याद्भोजनकाले तु भक्तमुष्टिं च निर्वपेत् ।
नामगोत्रेण सम्बुद्ध्या धरित्र्यां पितृयज्ञवत् ॥

शातातपः—

भूलोकात्प्रेतलोकं तु गन्तुं श्राद्धं समाचरेत् ।
तत्पाथेयं हि भवति मृतस्य मनुजस्य तु ॥

अथ दशाहमध्ये दर्शपाते निर्णयः । भविष्ये—

प्रवृत्ताशौचतन्त्रस्तु यदि दर्शं प्रपद्यते ।
समाप्य चोदकं पिण्डान् *स्नानमात्रं समाचरेत् ॥

ऋष्यशृङ्गः—

आशौचमन्तरा दर्शो यदि स्यात्सर्ववर्णिनाम् ।
समाप्तिं प्रेततन्त्रस्य कुर्यादित्याह गौतमः ॥

पैठीनसिः—

आद्येन्दावेव कर्तव्या प्रेतपिण्डोदकक्रिया ।
द्विरैन्दवे तु कुर्वाणः पुनः शावं समश्नुते ॥

इति गारुडात् । निधानभेदेन मन्त्रभेदमप्याह—*प्रेतात्रेति । *तस्मादिति ।

तस्मात्प्रेतपुरं प्रेतो द्वादशेऽहनि नीयते ।
गृहं पुत्रकलत्रं च द्वादशाहं स पश्यति ॥

मातापित्रोस्तु श्लोकगौतमः—

अन्तर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत् ।
पित्रोस्तु यावदाशौचं दद्यात्पिण्डान् जलाञ्जलीन् ॥

इदमपि त्र्यहमध्ये दर्शपाते । तदूर्ध्वं दर्शे तु पित्रोरपि तन्त्रं समाप्यमेव,

पित्रोराशौचमध्ये तु यदि दर्शः समापतेत् ।
तावदेवोत्तरं तन्त्रं पर्यवस्येत् त्र्यहात्परम् ॥

इति गालवोक्तेः । अन्येषां तु त्र्यहमध्येपि समाप्तिरिति पराशरमाधवीये निर्णयामृते चोक्तम् । कालादर्शेपि—

दर्शे दशाहमध्ये स्यादूर्ध्वं तन्त्रं समापयेत् ।
त्रिरात्रादुत्तरं पित्रोर्मृताविति विनिश्चयः ॥

मदनपारिजाते तु गालवीयमा*पदनौरसपुत्रादिविषयम् । 'त्र्यहोर्ध्वमपि पित्रोर्न तन्त्रसमाप्तिः' इत्युक्तम् । मदनरत्नेप्येवम् । *मम तु देशाचाराद्व्यवस्थेति प्रतिभाति ।

अथास्थिसंचयः । तत्राश्वलायनेन च कृष्णपक्षे *एकादशीत्रयोदशीदर्शेषु *आषाढाफल्गुनीप्रोष्ठपदाभिन्नर्क्षे उक्तम्, तदाशौचमध्येऽसंभवे तदूर्ध्वं च प्राग-

---

इति पूर्वश्लोकः । *स्नानमात्रं प्राक्पादिकं । *आपादिति । अत्र गौतमीयस्यापदनौरसपुत्रादिपरतया च वैपरीत्यमपि सुवचमित्यस्वरसः । *मम त्विति । इदमापाततः, अत्रोर्ध्वपित्रोस्तन्त्रसमाप्तौ धार्मिकाणां माधवादिनां प्रामाण्यात् ।

"सञ्चयनमूर्ध्वं दशम्याः कृष्णपक्षस्यायुजास्वेके"इत्यस्य "नक्षत्रे"इत्यस्य कृष्णपक्षसम्बन्धिदशम्युत्तरास्वित्यर्थं दर्शयति—*एकादशीति । एकनक्षत्रे इत्यस्यार्थमाह—*आषाढेति ।

न्दा*त्करणे ज्ञेयम् । आशौचमध्ये तु मदनरत्ने संवर्तः—

*प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ।
अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह ॥

छन्दोगपरिशिष्टे तु--

अपरेद्युस्तृतीये वा अस्थिसंचयनं भवेत् ।

इति द्वितीयेप्युक्तम् । विष्णुकात्यायनौ -'संचयनं चतुर्थ्याम्' इति । माधवीये यमः--

भौमार्कमन्दवारेषु तिथियुग्मे विवर्जयेत् ।
वर्जयेदेकपादर्क्षे द्विपादर्क्षेऽस्थिसंचयम् ॥
प्रदातृजन्मनक्षत्रे त्रिपादर्क्षे विशेषतः ।

ब्राह्मे--

चतुर्थे ब्राह्मणानां तु पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात्परम् ॥

दशमेऽहनीति वा पाठः । शौनकः--

पलाशोष्वास्थिदाहे च सद्यःसंचयनं भवेत् ॥

---

*करणे । सपिण्डीकरणे । *प्रथमेन्हीति ।

अनग्निमत उत्क्राते साग्नेः संस्कारकर्मणः ॥
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथाविधि ।

इत्याङ्गिरसा दिनं गणितम् । वर्णविशेषेण कालव्यवस्थापक्षमाह ब्राह्मे—

काचित्तृतीये विप्रस्य चतुर्थे क्षत्रियस्य च ।
पञ्चमे वैश्यजातेश्च शूद्रस्य दशमेऽहनि ॥
अस्थ्नां च सञ्चयः प्रेते क्रियते देशगौरवात् ॥ इति ।

अत्र—

चतुर्थे ब्राह्मणां तु पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात् परम् ॥

काम्यमरणे तु——

तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः ।

इत्युक्तम् । अङ्गिराः——

*प्रेतीभूतं तथोद्दिश्य यः शुचिर्न करोति चेत् ।
देवतानां तु यजनं तं शपन्त्यथ *देवताः ॥

तद्विधिः स्वस्वसूत्रे भट्टकृतौ च ज्ञेयः ।

हेमाद्रौ नागरखण्डे——

त्रीणि सञ्चयनस्यार्थे तानि वै शृणु साम्प्रतम् ।
यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् ॥
एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ।
ततः संचयनस्यार्थे तृतीयं श्राद्धमिष्यते ॥

अपरार्के मदनरत्ने च ब्राह्मे——

सद्यःशौचे तथैकाहे सद्यःसंचयनं भवेत् ।
त्र्यहाशौचे तृतीयेऽह्नि कर्तव्यस्त्वस्थिसञ्चयः ॥

*तत्रैव——

*श्मशानदेवतायागं चतुर्थे दिवसे चरेत् ।
मृन्मयेषु च भाण्डेषु कुम्भेषु रुचकेषु वा ॥
सुपक्वैर्भक्ष्यभोज्यैश्च पायसैः पानकैस्तथा ।
फलैर्मूलैर्वनोत्थैश्च पूज्याः क्रव्याददेवताः ॥

इति तु प्रमादपाठ इत्यग्रे स्फुटम् । द्वादशाहे सपिण्डने आशौचमध्य एव सञ्चयनं, "तदुत्तरं श्राद्धं चास्मै दद्युः" इत्येकोद्दिष्टविधानात् सपिडनानन्तरं तन्निषेधात् । *प्रेतीभूतमिति ।

अस्थिसञ्चयने यागो देवानां परिकीर्तितः ।

इति पूर्वार्द्धम् । यागः पूजा । *देवता इति ।

श्मशानवासिनो देवाः शवानां परिकीर्तिताः ।

इत्युत्तरार्द्धम् । श्मशानदेवतापूजाप्रकारमाह—*तत्रैवेति । *श्मशानेति ।

धूपो दीपस्तथा माल्यमर्घ्यं देयं त्वरान्वितैः।
तत्र पात्राणि पूर्णानि श्मशानाग्रे *समन्ततः॥
निवेदयद्भिर्वक्तव्यं तैः सर्वैरनहंकृतैः।
नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा॥
येऽत्र श्मशाने देवाः स्युर्भगवन्तः सनातनाः।
तेऽस्मत्सकाशाद्गृह्णन्तु बलिमष्टाङ्गमक्षयम्॥
प्रेतस्यास्य शुभान् लोकान् प्रयच्छन्तु च शाश्वतान्।
अस्माकमायुरारोग्यं सुखं च ददतां चिरम्॥
एवं कृत्वा बलीन्सर्वान्क्षीरणाभ्युक्ष्य *वाग्यतैः।
एवं दत्वा बलिं चैव दद्यात्पिण्डत्रयं बुधः॥
एकं श्मशानवासिभ्यः प्रेतायैव तु मध्यमम्।
तृतीयं तत्सखिभ्यश्च दक्षिणासंस्थमादरात्।
ततो याज्ञियवृक्षोत्थां शाखामादाय *वाग्यतः।
प्रेतस्यास्थीनि गृह्णाति प्रधानाङ्गोद्भवानि च॥

स्नात्वा त्रिरात्रं कुर्वन्ति प्रेतायोदकतर्पणम्।

इति पूर्वार्द्धम्। *समन्तत इति।

कैश्चिद्देयानि सर्वाणि पानीयान्यक्षतानि च।

इत्युत्तरार्धम्। धूपैः इत्यारभ्य प्रत्येकं कैश्चिदित्यस्यान्वयादार्थक्रमेणार्थो युक्तः। पुष्पाणि मालाः धूपो दीपः तण्डुलादिपूर्णपात्राणि केषुचित्पात्रेषु प्रणीयानि यवाद्यक्षताश्चेति पूजाङ्गानि भिन्नभिन्नपुरुषैः खलेकपोतन्यायेन दातव्यानि। अत एव त्वरान्वितैः निवेदयद्भिरिति बहुत्वम्। भक्ष्यभोज्यपायसपानकफलमूलात्मको बलिः, प्रधानभक्ष्यादीनां पूजाकरणत्वोक्तेः। *वाग्यतैरिति।

विसर्जनं च देवानां कर्तव्यं च समाहितैः।

इत्युत्तरार्धम्। *वाग्यत इति॥

अपसव्यं क्रमाद्वस्त्रं कृत्वा काश्चित्सगोत्रजः।

*शिरसो वक्षसः पाण्योः पार्श्वाभ्यां चैव पादतः ।
पञ्चगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च ॥
प्रक्षिप्य मृन्मये भाण्डे नवे साच्छादने शुभे ।
अरण्ये वृक्षमूले वा शुद्धे संस्थापयत्यपि ॥
गृहीत्वाऽस्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ।
ततः संमार्जनं भूमेः कर्तव्यं गोमयाम्बुभिः ।
पूजां च पुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमात् ॥ इति ।

अथ तीर्थेऽस्थिक्षेपविधिः । तत्रैव—

*तत्स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले ।
कश्चित्क्षिपति सत्पुत्रो दौहित्रो वा सहोदरः ॥
मातृकुलं पितृकुलं वर्जयित्वा *नराधमः ।
अस्थीन्यन्यकुलस्थस्य नीत्वा चान्द्रायणं चरेत् ॥

तत्रैव ब्रह्माण्डपुराणे—

अस्थीनि मातापितृपूर्वजानां नयन्ति गङ्गामपि ये कथंचित् ।
सद्बान्धवस्यापि दयाभिभूतास्तेषां तु तीर्थानि फलप्रदानि ॥
*स्नात्वा ततः पञ्चगव्येन सिक्त्वा

इत्युचरार्धम् । प्रधानाङ्गान्याह—*शिरस इति ।

अप्रदक्षिणमस्थीनि गृण्हातीत्यादिगोभिलः ।

इत्युत्तरार्धम् । गर्ते इति पाठः । तोये इति पाठे वर्षाकालादन्यत्रेति बोध्यम् ।

भूमेराच्छादनार्थं च वृक्षः पुष्करकोऽपि वा ।
पादिको वा प्रकर्तव्यः तत्र सर्वैर्विधानतः ॥

इति ग्रन्थान्तरे । पुष्करः पुष्कारिणी । पादिकः चत्वरः । संचितास्थिप्रतिपत्तिमाह—*तत्स्थानादिति । वैधनिखातस्थानादित्यर्थः । *नराधम इति । भ्रातिग्रहणे । अत एव सद्बान्धवस्यापीति अपिना तदितरस्यापि समुच्चयात् । सत्त्वं चेह स्वाचारशा-

हिरण्यमध्वाज्यतिलैश्च योज्य ।
ततस्तु मृत्पिण्डपुटे निधाय
पश्यन् दिशं प्रेतगणोपरूढाम् ॥
नमोऽस्तु धर्माय वदेत्प्रविश्य
जलं स मे प्रीत इति क्षिपेच्च ।
*उत्थाय भास्वन्तमवेक्ष्य सूर्यं
स दक्षिणां विप्रमुखाय दद्यात् ॥
एवं कृते प्रेतपुरःस्थितस्य ।
*स्वर्गे गतिः स्यात्तु महेन्द्रतुल्या ॥

यमः—

गङ्गातोयेषु यस्यास्थि क्षिप्यते शुभकर्मणः ।
न तस्य पुनरावृत्ति*र्ब्रह्मलोकात्सनातनात् ॥

तथा—

*अस्तं गते गुरौ शुक्रे तथा मासे मलिम्लुचे ।
गङ्गायामस्थिनिक्षेपं न कुर्यादिति गौतमः ॥

लित्वमबान्धवेऽपि । *स्नात्वेति । तीर्थपात्रप्रक्षेपे । *उत्थायेति ।

स्नात्वा तथोत्तीर्य दिवाकरं च दृष्ट्वा प्रदद्यादथ दक्षिणं तु ।

इति सेतुः । *स्वर्गे इति । अन्यत्रापि—

यस्मिन् काले नृणामस्थि गङ्गायां क्षिप्यते नृभिः ।
तं कालमादितः कृत्वा स्वर्गलोके भवेत् स्थितिः ॥ इति ॥

अत्रोत्तरावध्यसत्त्वात्कल्पांतोऽवधिः । *ब्रह्मेति । प्रयागादिक्षेत्रविशेषे ब्रह्मलोकः अन्यथा स्वर्गः ।

भविष्ये—

कावेरी तुङ्गभद्रा च कृष्णवेणी च गौतमी ।
जान्हवी चेति विख्याताः पञ्च गङ्गाः प्रकीर्तिताः ॥

इत्युक्तम् । *अस्तं गते इति । प्रथमार्द्धे न निषेध इति

*दशाहान्तर्न दोषः,

दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति ।
गङ्गायां मरणे यादृक् तादृक् फलमवाप्नुयात् ॥

इति मदनरत्ने वृद्धमनूक्तेः ।

शौनकः—

शौनकोऽहं प्रवक्ष्यामि अस्थिक्षेपविधिं क्रमात् ।
आदौ ग्रामाद्बहिर्गत्वा स्नानं कुर्यात्सचैलकम् ॥
प्रोक्षयेत्पञ्चगव्येन भुवं मन्त्रैर्विचक्षणः ।

*गायत्र्याद्यैः पञ्चगव्यमन्त्रैर्निखातास्थिभूमिं प्रोक्षेदित्यर्थः ।

उपसर्पादिभिर्मन्त्रैः प्रार्थनं खननं तथा ।
मृत्तिकोद्धरणं चास्थ्नां ग्रहणं च यथाक्रमम् ।

उपसर्पेति चतुर्भिर्मन्त्रैः क्रमेण प्रार्थनादि ज्ञेयम् ।

*स्नात्वाऽस्थिशुद्धिं कुर्वीत *एतोन्विन्द्रेति सूक्ततः ।
स्पृष्ट्वा स्पृष्ट्वा ततः स्नानं पञ्चगव्येन शुध्यति ॥
*दश स्नानानि कुर्वीत *तत्तन्मन्त्रैर्विचक्षणः ।

वक्ष्यति । *दशाहन्त इति गङ्गारहितग्राममृतस्य तु गङ्गातीरे दाहसम्भवे तत्र शवो नेयः । तदनयने तु पिण्डदानादिकमारभ्य प्रक्षेपः । दशाहमध्ये गङ्गाप्राप्त्यसंभवे तु सपिण्डनोत्तरमेव, आरब्धप्रेतकर्मणो देशैक्यनियमात् । द्वादशाहोत्तरसपिण्डने त्वेकादशाहोत्तरमपि । *गायत्र्याद्यैरिति । आदिना गन्धद्वाराम् आप्यायस्व दधिक्राव्णः घृतं मिमि इति ग्रहः । गोमूत्रगोमयपयोदधिसर्पींषि पञ्चगव्यम् । सेतौ तु पयोदधिगोमूत्रगोमयसर्पींषि तत्तन्मन्त्रैरुक्तानि । *स्नात्वेति । जलाशयेऽस्थिसहित इत्यादिः ।

ततो जलाशयं गत्वा स्नानं कुर्याद्यथाविधि ।

इति सेतौ वचनात् । *एतोन्विति । एतोन्विन्द्रेति सूक्तेन स्पृष्ट्वा पञ्चगव्येन स्पृष्ट्वा प्रक्षाल्य शुध्यति ततः शुद्धोदकेन स्नापयेदित्यर्थः । *दशेति । सास्थिरित्यादि । *तत्तन्मन्त्रैः । गा-

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
भस्म मृन्मधु वारीणि मन्त्रतस्तानि वै दश ॥
कुशैः संमार्जयेदस्थीन्यतोदेवेति मन्त्रतः ।
*एतोन्विन्द्रं शुचिवेति नतमंह इतीति च ॥
पावमानीर्ममाग्ने च रुद्रसूक्तं यथाक्रमम् ॥

*एतैः कुशैर्मार्जनम् ।

हेमश्राद्धं ततः कुर्या*त्पितॄनुद्दिश्य यत्नतः ।
पिण्डदानं प्रकुर्वीत ततश्च तिलतर्पणम् ॥

अस्थिक्षेपाङ्गं चेदम् ।

*अजिनं कम्बला दर्भा गोकेशाः शाण एव च ।

यज्या गोमूत्रम्, गन्धद्वारामिति गोमयम्, आप्यायस्वेति पयः दधिक्राव्ण इति दधि, घृतं मिमिक्षे इति घृतम्, आपोहिष्ठेति कुशोदकम् । देवस्य त्वेति केचित् । मानस्तोके इति भस्म, "बाळित्था पर्वतानाम्" इति अश्वक्रांते इति इत्यादिभिर्वा मृत्, मधुवातेति मधु आपोहिष्ठेति कुशोदकम् । *एतोन्विन्द्रमिति । एतोन्विन्द्रमिति तृचं शुचीवोहव्येति तृचं नतमंह इति अष्टर्चम् "इति मे मन" इति त्रयोदशर्चं यदन्ति यच्चेति तृचं ममाग्ने वर्च इति नवर्चं कद्रुद्रायेति नवर्चं च सूक्तम् ; मन्त्रत इति विशेषोक्त्याऽतोदेवेत्यत्रैव सूक्तसम्बन्धाभावात् । *एतैरिति । प्रतिमन्त्र इति यावत् । *पितॄनिति । यदस्थीनि तद्दैवत्यम् । कृते सापिण्डने पार्वणं पुरूरवार्द्रवौ विश्वेदेवाः । सक्तुभिः तण्डुलेन वाऽग्नौकरणं, सक्तुभिः पायसेन वा पिण्डदानम् । अकृते सपिण्डने त्वेकोद्दिष्टम् । नमो वः पितर इति मन्त्रे इषेपदस्थाने हेम्ने इत्यूहः । स्मृत्युक्तप्रकारे तु "उशन्तस्त्वा" इत्यादिमन्त्रेष्वपि ऊहः । श्राद्धांते यद्दैवत्यं श्राद्धं तद्दैवत्यं तिलतर्पणम् । यक्षकर्दमादिलेपः पुष्पैः पूजा च । *अजिनमिति ।

भूर्जपत्रं ताडपत्रं सप्तधा वेष्टनं स्मृतम् ॥
हेमं च मौक्तिकं रौप्यं प्रवालं नीलकं तथा ।
निक्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा ॥
ततो होमं प्रकुर्वीत तिलाज्येन विचक्षणः ।
*उदीरतेति सूक्तेन हुनेदष्टोत्तरं शतम् ॥
ततो गत्वा क्षिपेत्तीर्थे स्पर्शदोषो न विद्यते ।
मूत्रं पुरीषाचमनं कुर्वन्नास्थीनि धारयेत् ॥

अत्र दशदानं वैतरणीऋणमोक्षपापधेनुदानमुक्तम् । दिवोदासीये काशीखण्डे—

धनञ्जयोऽपि धर्मात्मा मातृभक्तिपरायणः ।
आदायास्थीन्यथो मातुर्गङ्गामार्गस्थितोऽभवत् ॥

अजिनं कम्बला दर्भा गोकेशा भूर्जपत्रकम् ।
ताडपत्रं च नेत्रं चेत्यस्थ्नां वेष्टनसप्तकम् ॥

इति पाठान्तरम् । *उदीरतेति । सूक्तग्रहणात्सूक्तस्याष्टोत्तरशतमावृत्तयः । एकमन्त्राणि कर्माणीति न्यायेन ऋगन्त एव होमः । होमसंख्याबाहुल्येऽपि यावद्वचनन्यायाददोष इत्येके । चतुर्दशऋगात्मकमुदीरतेति सूक्तं तस्य ऋगन्ते होमात्सप्तावृत्त्याऽष्टनवतिहोमान् संपाद्य पुनरुदितिमन्त्रैर्दशभिर्हुत्वाऽष्टोत्तरसंख्यापूर्तिः अवशिष्टमन्त्रचतुष्टयत्यागः । अत एवाग्निमुखं कृत्वा शताष्टकृत्व इति बौधायनसूत्रे शतंचाष्टचेति अष्टोत्तरशतं तत्पूरणाय षडर्चसूत्रस्याष्टादशावृत्तयः कार्याः । एवं चाश्विनं कपालमित्यादौ अतिदेशप्राप्तानां कपालोपधानमन्त्राणां बहुत्वेऽपि आद्यद्वितीयमन्त्राभ्यां कपाले उपधाय शेषमन्त्रलोपवदिति कौस्तुभे इत्यन्ये । होमशेषं समाप्य ताम्रसंपुटेऽस्थीनि निदध्यात् । ततः चण्डालपतितश्वासोक्तशौचाचमने कृत्वा तानि गृह्णीयात् । ततस्तीर्थे सास्थि स्नात्वा पलाशपत्रपुटेऽस्थीनि निधाय अमुकगोत्रस्या-

पञ्चगव्येन संस्नाप्य तथा पञ्चामृतेन वै ।
यक्षकर्दमलेपेन लिप्त्वा पुष्पैः प्रपूज्य च ॥
आवेष्ट्य (१)तत्र वस्त्रेण ततः पट्टाम्बरेण च ।
ततः सुरसवस्त्रेण ततो माञ्जिष्ठवाससा ॥
नेपालकम्बलेनाथ मृदा चाथ विशुद्धया ।
ताम्रसंपुटके कृत्वा मातुरङ्गान्यथो वहत् ॥

व्यासः—

पट्टवस्त्रं च कौशेयं माञ्जिष्ठं श्वेतवस्त्रकम् ।
कम्बलं शाणपट्टं च अजिनं च तथोत्तरम् ॥

*एषां विकल्पः । अन्यश्चात्र विशेषस्त्रिस्थलीसेतौ दिवोदासीये च ज्ञेयः । संचयनोत्तरं श्राद्धमाहाश्वलायनः—'श्राद्धमस्मै दद्युः' इति । स्मृत्यर्थसामुकशर्मणोऽपुनरावृत्तिब्रह्मलोकावाप्तये गङ्गायां मोक्षप्राप्तये तीर्थान्तरे अस्थिनिक्षेपं करिष्ये इति सङ्कल्प्यास्थीनि तूष्णीं पञ्चगव्येन प्रक्षाल्य शुद्धोदकेन स्नापयित्वा हिरण्यशकलमधुघृततिलैर्मिश्रीकृत्य मृत्पेटिकायां संस्थाप्य दक्षिणतोऽवेक्ष्यमाणो नाभिमात्रजलस्थो नमोस्तु धर्मराजाय स मे प्रीतोऽस्त्विति मन्त्रेण निक्षिप्य जलाद्बहिरागत्य सूर्यं दृष्ट्वा नत्वा च हरिं स्मृत्वा यज्ञोपवीती अमुकगोत्रशर्मणः कृतास्थिनिक्षेपस्य साद्गुण्यायेदं रजतं पितृदैवत्यं चन्द्रदैवत्यं सम्प्रददे इति यथाशक्ति दक्षिणां ब्राह्मणाय दद्यात् । पितृकृत्यत्वाद्रजतम् । अस्थिग्रहणादि प्रक्षेपान्तं दक्षिणावर्तं प्राचीनावीती कुर्यात् । *एषामिति । वेष्टनसाधनानां वेष्टनक्रमाणां चेत्यर्थः । तीर्थमात्रेऽयं विधिः, प्रयागे तु अत्यावश्यकः । अस्थिक्षेपोत्तरमेव तीर्थविधिरिति दिवोदासः । अन्ये तु तीर्थकृत्यानन्तरमास्थिक्षेपः, तीर्थश्राद्धादौ विलम्बनिषेधात् 'आगन्तू-

---

(१) 'नेत्रवस्त्रेण' ग० ।

रे–'संचयने कृते म(१)नुष्यलोकात्प्रेतलोकं गच्छतः पाथेयश्राद्धमामेन कार्यमिति । अनुपनीतस्य न संचयनम्' ।

अथ नवश्राद्धम् । पृथ्वीचन्द्रोदयेऽङ्गिराः—

प्रथमेऽह्नि तृतीये च पञ्चमे सप्तमे तथा ।
नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥

शिवस्वामी—

नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः ।
आपस्तम्बाः षडित्याहु*र्विभाषा त्वितरेषु हि ॥

पञ्च एकादशाहिकं विना, *'मरणाद्विषमेषु दिनेष्वेकैकं नवश्राद्धं कुर्यादानवमात्, यदि नवमं विच्छिद्येतैकादशे तत्कुर्यात् ।' इति मदनरत्ने बौधायनोक्तेः ।

भविष्ये—

नव सप्त विशां राज्ञां नवश्राद्धान्यनुक्रमात् ।
आद्यन्तयोर्वर्णयोस्तु षडित्याहुर्महर्षयः ॥

हेमाद्रौ वृद्धवसिष्ठः-

*अलब्ध्वा तु नवश्राद्धं प्रेतत्वान्नैव मुच्यते ।

नामन्ते निवेशः' इति न्यायाच्चेत्याहुः । वस्तुतस्तु अस्थिप्रक्षेपफलोद्देशेन चेद्गतः तेनादौ स एव कार्यः, उद्देश्यकृतश्राद्धादिविलम्बस्य तच्छ्राद्धेनाभ्यनुज्ञातत्वात् ; अत्र तीर्थनिमित्तकक्षौरादिकृत्यान्यपि पश्चादेव । यस्तु तीर्थफलोद्देशेन गच्छन् अनुषङ्गादस्थीनि नयति स सकलतीर्थकृत्यानन्तरं तानि निक्षिपेदिति मयूखे । संक्षिप्तोऽस्थिनिक्षेपप्रयोगस्तत्रैव द्रष्टव्यः । *विभाषा त्वितरेषु हीति । विभाषामैतरेयिण इति रघुनाथपाठः । *मरणादिति । नवश्राद्धानि पञ्च । नवमदिनकर्तव्यं तु तत्रासम्भवे एकादशे

---

(१) 'मनुष्यलोकं गच्छतः' क० घ० ।

अर्वाक् तु द्वादशाहस्य लब्ध्वा तरति दुष्कृतम्॥

अतः षडेव। एतान्येव विषमश्राद्धानीत्युच्यन्ते। नागरखण्डे तु—

*पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा।
दशमैकादशे चैव नवश्राद्धानि तानि च॥

इत्युक्तम्। कात्यायनस्तु—

चतुर्थे पञ्चमे चैव नवमैकादशे तथा।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते॥

प्रथमे सप्तमे चैवेत्याद्यपादे व्यासपाठः। बह्वृचानां तु—

*नवश्राद्धं दशाहानि नवमिश्रं तु षड्ऋतून्।

ऽन्हि कार्यमित्यर्थः। नवश्राद्धानां प्रेतत्वनिवर्तकतामाह-*अलब्ध्वेति। षट् पञ्च वा नवश्राद्धानि। अनयोः पक्षयोर्व्यवस्था च शिवस्वाम्युक्तैवेत्यन्ये। *पञ्चमे इति। त्रीणि सञ्चयनस्यार्थे इत्यादि प्रागुक्तश्राद्धत्रयसाहित्यमिह विवक्षितम्। तथाच नवत्वसंख्यालाभः। चतुर्थाहनवश्राद्धे त्वन्यदपि देयम्,

चतुर्थेऽहनि विप्रेभ्यो देयमन्नं हि बान्धवैः।
गावः सुवर्णं वित्तं च प्रेतमुद्दिश्य शक्तितः॥
(?)यदीनृङ्गीवतश्चासीन्न दद्यात्तस्य यत्नतः।

इति बृहस्पत्युक्तेः। क्षत्रियादिभिस्तु पञ्चमादिषु,

चतुर्थे ब्राह्मणानां च पञ्चमेऽहनि भूभुजाम्।
नवमे वैश्यजातीनां शूद्राणां दशमात्परे।

इति ब्रह्माण्डात्। शय्यादिकं त्वेकादशाह एव। अत्रिणा त्वेकमेवोक्तम्—

नवश्राद्धनिमित्तं तु एकमेकादशेऽहनि। इति।

*नवश्राद्धमिति। नवश्राद्धं नवनवमिश्रपुराणभेदात्त्रिधा। प्रथमाद्येकादशाहान्तं नवम्। षड्ऋतूनमासिकानि न-

इत्युक्तं नारायणवृत्तौ । दीपिकायाम्–'अथ तनुयादाद्ये चतुर्थे दिने श्राद्धं पञ्चमसप्तमाष्टनवादियुग्मेषु *युग्माद्विजैः' ।

*प्रथमेह्नि तृतीयेऽह्नि पञ्चसप्तनवस्वपि ।
द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषेष्वेकं तु विन्यसेत् ॥

एको विषमश्राद्धेऽथयवापिण्डश्चैक इति द्वावित्यर्थः ।

वमिश्रम् । 'षडुत्तरम्' इति पाठे नवश्राद्धानामुत्तरत्र उपरि कर्तव्यमित्यर्थः ।

अतः परं पुराणं च त्रिविधं श्राद्धमुच्यते ।

इत्युत्तरात्प्रत्याब्दिकात्तृतीयमित्यर्थः । संज्ञाकरणं "चान्द्रायणं नवश्राद्धे" इत्यादिप्रायश्चित्तविशेषविधानार्थम् । *युग्मद्विजैरिति । यद्यपि नवश्राद्धानाम्—

नव श्राद्धानि कुर्वीत प्रेतोद्देशेन यत्नतः ।
एकोद्दिष्टविधानेन नान्यथा तु कदाचन ॥

इति ब्रह्माण्डपुराणात्सपिण्डनप्राग्भावित्वाच्चैकोद्दिष्टत्वं, तथापि—

पञ्चमे नवमे चैव तथैवैकादशेऽहनि ।
युग्मांस्तु भोजयेद्विद्वान्नवश्राद्धं तु तद्विदुः ॥

इति कौर्मवचनाद्ब्राह्मणयुग्मं कार्यम् । अत्रानुक्तेष्वपि युग्मद्विजा एव, नवश्राद्धं तु तद्विदुरित्युक्तत्वात् । एतेन—

अयुग्मान् भोजयेद्विप्रांस्तन्नवश्राद्धमुच्यते ।

इति शूलपाणिः । *प्रथमेऽन्हीति । एतेन—

प्रथमेऽन्हि तृतीयेऽन्हि पञ्चमे सप्तमे तथा ।
द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषास्तु दशमेऽहनि ॥

इति व्याख्यातम् । द्वितीयाद्यत्रयवपिण्डाः क्रमेण दशमेऽन्हि समापनीया इति चतुर्थपादार्थात् । ननु नवश्राद्धे कः पक्ष आश्र-

*अत्र शाखाभेदाद्व्यवस्था ।

अपरार्के भविष्ये--

नवश्राद्धं त्रिपक्षं च षण्मासं मासिकानि च ।
न करोति सुतो यस्तु तस्याधः पितरो गताः ॥

वाराहे---

*गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात्पथः ।
मनसा वायुभूतेन विप्र त्वाहं नियोजये ॥
पूजयिष्यामि भोगैस्त्वामेवं विप्रं निमन्त्रयेत् ॥

आवाहनेऽपि तत्रैव—

इहलोकं परित्यज्य गतोसि परमां गतिम् ।
मनसा वायुभूतेन विप्रे त्वाहं नियोजये ॥ इति ।

तत्रैव बह्वृचपरिशिष्टे—

अनूदकमधूपं च गन्धमाल्यविवर्जितम् ।
नवश्राद्धममन्त्रं च पिण्डोदकविवर्जितम् ॥

उदकमर्घ्यः । पिण्डोदकं 'शुन्धन्तां पितरः' इत्य*वनेजनादिः ।

*एकोद्दिष्टेषु सर्वेषु न स्वधा नाभिरम्यताम् ।
नाग्नौकरण(१)मन्त्रश्च एकं वाथ तिलोदकम् ॥

णीय इत्यत आह—*अत्रेति । यदि गृह्येषु नवश्राद्धान्युक्तानि तदा एतान्येव कार्याणि, अन्यथाऽऽङ्गिरसोक्तानि, आचारात् । नागरखण्डाद्युक्तानि तु यत्र तदाचारस्तत्रैवेत्यर्थः । *गतोसीति । द्वयमैकादशाहिकश्राद्धे । *अवनेजनादीति । आदिना प्रत्यवनेजनग्रहः । *एकोद्दिष्टेषु सर्वेष्विति । यद्यपि याज्ञवल्क्यादिभिरेकोद्दिष्टसामान्ये 'अभिरम्यताम्' इति विसर्जनमन्त्र उक्तः गोभिलेनापि "अभिरम्यताम् इति विसर्जनमेतत्

---

(१) 'मन्त्राश्च एक चार्थ'क० ।

अनपत्येषु सर्वेषु न स्वधा नाभिरम्यताम् ।
स्वस्त्यस्तु विसृजेदेवं सकृत्प्रणववर्जितम् ॥
एकोद्दिष्टस्य पिण्डे तु *अत्रशब्दो न विद्यते ।
पितृशब्दं न कुर्वीत पितृहा चोपजायते ॥

सपिण्डनात्प्रागिति हेमाद्रिः । तेन—

न च स्वधां प्रयुञ्जीत प्रेतश्राद्धे दशाहिके ।

इति ऋष्यशृङ्गोक्तौ दशाहिकोक्तेरेकादशाहे स्वधाप्रयोग एवेति हारलता परास्ता ।

रत्नावल्याम्—

आशिषो द्विगुणा दर्भा जयाशीः स्वस्तिवाचनम् ।
पितृशब्दः (१)स्वसम्बद्धः शर्मशब्दस्तथैव च ॥
*पात्रालम्भो*ऽवगाहश्च उल्मुकोल्लेखनादिकम् ।
तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च ॥
प्रदक्षिणा विसर्गश्च सीमान्तगमनं तथा ।
अष्टादश पदार्थां*श्च प्रेतश्राद्धे विवर्जयेत् ॥

अत्र स्वधापितृनमः*शब्दानां “तिलोऽसि” इतिमन्त्रे *प्रेतशब्दोहेन तूष्णीं वा तिलावपनम् । *तूष्णीमर्घ्यंप्रेतश्राद्धम्” इति विशेषतोऽपि तथापि आश्वलायनानां प्रेतश्राद्धे न भवति तत् परिशिष्टे तन्निषेधात् मन्त्रान्तरविधानाच्चेत्याशयः । *अत्रशब्दः अत्र ‘पितरो मादयध्वम्’ इति मन्त्रः । ‘अनुशब्दो न विद्यते’ इति पाठे ‘ये च त्वामत्रानु’ इतिमन्त्रः । *पात्रालम्भः समन्त्रः । *अवगाहः द्विजाङ्गुष्ठनिवेशनम् । महैकोद्दिष्टप्रयोगमाह—*चेति । *शब्दानामिति । इदमुपलक्षणं न धूर्यादयो नाभिश्रवणं न श्राद्धशेषभोजनमित्यपि बोध्यम् । *प्रेतशब्दोहेन—मत्तः प्रेतमिमानित्यूहः—*तूष्णीमिति । अमुकगोत्रामुकप्रेत

---

(१) ‘स्वसम्बन्धः’ क० छ० ।

दानम् । अमुष्मै स्वाहेति प्रेतनाम्ना पाणिहोमः *नाम्ना एकः पिण्डः । निनयनमन्त्रे ऊहः । अनुमन्त्रणादि स्वमन्त्रकम् । अभिरम्यतामिति विसर्जनम् । एवं *नवश्राद्धवर्जैकोद्दिष्टेषु । 'नवश्राद्धे स्वमन्त्रकं सर्वम्' इति नारायणवृत्तिः । क्रियानिबन्धे--

उत्तानं स्थापये*त्पात्रमेकोद्दिष्टे सदा बुधः ।
न्युब्जं तु पार्वणे कुर्यात्तस्योपरि कुशान्न्यसेत् ॥
*नवश्राद्धं गृहे कुर्याद्भार्या यत्राग्नयोऽपि वा ।
सापिण्डीकरणान्तानि प्रेतश्राद्धानि यानि वै ॥
तानि स्युर्लौकिके वह्नावित्याह स्वाश्वलायनः ॥

इदं सम्भवे*ऽन्नेन कार्यम्,

नवश्राद्धेषु य*च्छिष्टं *ग्रहपर्युषितं च यत् ।
दंपत्योर्भुक्तशेषं च न तद्भुञ्जीत कर्हिचित् ॥

इत्यङ्गिरोवचनालिङ्गात् ।

द्वाभ्यां तदा तु कृच्छ्राभ्यां शुद्धिः स्यात्तु विवेकिनाम् ।

इति ब्राह्मे उक्तम् । विघ्ने तु निर्णयामृते कण्वः--

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत् ।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते ॥

हेमाद्रौ गालवः--

शावे तु सूतकं चेत्स्यान्निशायां च मृतौ तथा ।

मैकोद्दिष्टे इदमर्घ्यं तवोपतिष्ठतामिति सङ्कल्प्यापोशनादि दद्यात् । *नाम्नेति । अमुकगोत्रामुकप्रेताऽयं ते पिण्डमुपतिष्ठतामिति मन्त्रः । *नवश्राद्धवर्जेति । नवश्राद्धभिन्नेत्यर्थः । *पात्रम् । अर्घ्यस्य । *नवश्राद्धमिति । प्रयोगोन्त्येष्टिपद्धतौ बोध्यः । *अन्नेनेति । सक्तुशेषादिलक्षणेऽप्युक्तैव निष्कृतिः । *शिष्टं शेषः । *ग्रहः ग्रहणम् । निशायां मृतावित्यन्वयादाह--

नवश्राद्धानि देयानि यथाकालं यथाक्रमम् ॥

निशायामाशौचान्ते*द्व्यहवृद्धौ । अन्वारोहणे तु—

नवश्राद्धानि सर्वाणि सपिण्डीकरणं पृथक् ।
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥

आशौचान्त्यदिने कार्यमुक्तं ब्राह्मे—

यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः ।
स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि ॥
समाप्य दशमं पिण्डं प्रेतस्पृष्टे तु वाससी ।
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोत्यपि ॥
श्मश्रुलोमनखानां च यत्त्याज्यं तज्जहात्यपि ।
गौरसर्षपकल्केन तिलकल्केन संयुतम् ॥
शिरःस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः ।
वृषभं गां सुवर्णं च स्पृष्ट्वा शुद्धो भवेन्नरः ॥

क्रियानिबन्धे गृह्यकारिकायाम्—

*अत्र पिण्डत्रयं दद्युस्तत्सखिभ्यस्तथाऽऽदिमम् ।
प्रेताय मध्यमं तद्वत्तृतीयं च यमाय वै ॥

तथा—

कर्ताऽत्र प्रार्थिताः सन्तो ज्ञातिसंबन्धिबान्धवाः ।
दद्युरभ्यङ्गतः पूर्वं त्रींस्त्रीन्धर्मोदकाञ्जलीन् ॥
पूर्ववन्नामगोत्राभ्यां नियमो नेह कश्चन ॥

मदनरत्ने विष्णुहारीतौ—'आशौचान्ते कृतश्मश्रुकर्माणस्तिलकल्कैः सर्षपकल्कैर्वा स्नाताः शुक्लवाससो गृहं

---

*द्व्यहवृद्धाविति । यद्यपि तत्र पुत्रस्याग्निदस्य च पूर्णमेवाशौचं तथाप्यन्यस्मिन् क्रियाकर्त्तरि तद् द्रष्टव्यम् । *अत्रेति । अत्र पञ्च कुम्भाः स्थाप्याः । तत्र मध्यमे प्रेताय पूर्वे प्रेतसखिभ्यः दक्षिणे यमाय पश्चिमे वायसायोत्तरे प्रेताधिपतये तद्राजायेति पञ्च पिण्डा इति प्रका-

प्रविशेयुस्तत्र *शान्तिकं कृत्वा ब्राह्मणपूजनं कुर्युः।’इति । देवलः—

*दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥

अपरार्के बृहस्पतिः—

*नवमे वाससां त्यागो नखरोम्णां तथान्तिमे ।

तत्रैव व्यासः—

आशौचान्त्यदिने क्षौरं जनन्या च गुरौ मृते ।

एतत्प्रेताल्पवयसामित्याहापस्तम्बः–*‘अनुभाविनां च (१)परिवापनम्’ इति । अनुभाविनः कनिष्ठा इति विज्ञानेश्वररत्नाकरादयः ।

आशौचमनुभवतः पुंसां सर्वाशौचे तु मुण्डनम् ।
आज्ञया नरपतेर्द्विजन्मनां दारकर्ममृतसूतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोडुषु ॥

इति रत्नमालोक्तेर्जननाशौचेऽपीति शुद्धितत्त्वादयः । अत्र देशाचारतो व्यवस्था । परि शिखावर्जम्, ‘केशश्मश्रुलोमनखानि वापयीत शिखावर्जम्’ इति गोभिलोक्तेः । यत्त्वापस्तम्बः–‘न समावृत्ता वपेयुरन्यत्र विहारादित्येके’ । विहारो दर्शादियागः । तेन विना समावृत्ता गृहस्था न वपेयुरित्यर्थः । यच्च—

वृथा छिनत्ति यः केशांस्तमाहुर्ब्रह्मघातिनम् । इति,

रान्तरमन्त्येष्टौ । *शान्तिकं सपिण्डनोत्तरपाथेयश्राद्धानन्तरम् । *दशमेऽहनीति । अन्त्यदिने इत्यर्थः । उपान्त्यदिनं विकल्पयति–*नवमे इति । वाससां त्यागो निर्णेजकादौ निर्णेजनार्थः । *अनुभाविनां चेति । दशमेऽहनीति पूर्वोक्तदेवलवाक्यात्स्नानवत्सर्वेषां वपने प्राप्ते अनेन मृतकनीयःसपिण्डानां तन्नियम्यते । एवं च

---

(१) ‘परिवपनम्’ ग०

तत्—

केशश्मश्रु धारयतामग्र्या भवति संततिः।

इति दानधर्मोक्तकाम्यपरम्। अनुभाविनः *पुत्रादय एवेत्येके,

*पुत्रः पत्नी च वपनं कुर्या(१)दन्ते यथाविधि।
पिण्डदानोचितोऽन्योपि कुर्यादित्थं समाहितः॥

इत्यपरार्के व्यासोक्तेः। यत्तु मिताक्षरायाम्—

द्वितीयेऽहनि कर्तव्यं क्षुरकर्म प्रयत्नतः।
तृतीये पञ्चमे वापि दशमे वाऽऽप्रदानतः॥ इति।

आप्रदानतः इति *चतुर्थादीनि। तत्प्रथमादिनेऽसंभवे ज्ञेयम्,

"कृतश्मश्रुकर्माणः" इति वाक्यान्तराण्यपि संकुचद्वृत्तीन्येव। श्मश्रुपदं तु तत्पूर्वकत्वलाभाय, तत्कल्पनस्यावश्यकत्वार्थं च तेन क्षणमपि न यवनाचारप्रसङ्गः। एवं च शिष्यस्यापि पुत्रधर्मातिदेशेन तत्सिद्धौ "गङ्गायां भास्करक्षेत्रे" इत्यादिवचनात् मातापित्राचार्यमरणे तदावश्यकम् अन्यत्र चानियतम्। अन्यथैतदानर्थक्यापत्तेः। गङ्गापदं च सर्वतीर्थोपलक्षणं, "सर्वतीर्थेष्वयं विधिः" इत्युक्तत्वात्। *पुत्रादय एवेत्येके इति। एकशब्दाभिधानं भ्रात्रादेर्निवृत्तावस्वारस्य सूचकम्, तेषामपि प्रेताभ्युदयकामनायां तत्प्राप्तेः। पत्न्यास्तु पुत्रवत्तन्नित्यमित्याह—*पुत्र इति। पत्न्याः प्रथमेऽन्हि दशमे वा यथाचारम्। यतिपत्न्यास्तु तदैव। यत्तु—

सूतके मृतके क्षौरं न कुर्याद्दशमेऽह्नि यः।
तस्याशौचं भवेन्नित्यं पितरो नरके स्थिताः॥ इति।

तन्निर्मूलम्। समूलत्वे त्वनुभाविविषयतया संकुचितमिति मृतके सूतके इत्यस्य मृतिनिमित्तकाशौचे इत्यर्थः *चतुर्थादीनीति। प्रदा-

---

(१) 'अन्त्ये' क०

*अलुप्तकेशो यः पूर्वं सोऽत्र केशान्प्रवापयेत् ।
द्वितीयेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमेऽपि वा ॥
यावच्छ्राद्धं प्रदीयेत तावदित्यपरं मतम् ॥

इति माधवीये मदनरत्ने च बौधायनोक्तेः । मदनपारिजाते तु दशमे प्रथमे च समुच्चय उक्तः । यत्तु—

दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत् । इति,

तदे*कादशाहश्राद्धाङ्गविप्रनिमन्त्रणार्थं ज्ञेयम् ॥

अथैकादशाहः । मनुः—

*विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधे ।
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ॥

शुद्धितत्त्वे देवलः—

अघाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गलाः ।
आशौचाद्विप्रमुच्यन्ते ब्राह्मणान्स्वस्ति वाच्य च ॥

याज्ञवल्क्यः—

(मृ(१)तेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैव) आद्यमेकादशेऽहनि ॥

क्षत्रियाद्यैराशौचेऽप्येकादशेऽह्नि श्राद्धं कार्यम्,

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥

नमैकादशाहिकश्राद्धमिति स्वतन्त्रविधिः । *अलुप्तकेश इति । तथाच दग्धृपरं मिताक्षरावचनम्, दाहाङ्गभूतस्य वपनस्य प्रथमदिन उक्तेः । *एकादशाहेति । विज्ञानेश्वरमते महैकोद्दिष्टाह्न्येव प्रातर्विप्रनिमन्त्रणं युक्तम् ।

*विप्र इति । कृतक्रियः कृतस्नान इति विप्रादीनां विशेषणम् । तथाच यस्य विप्रादेर्यावत्कालमाशौचमुक्तं स तत्काला-

---

(१) कंसान्तर्गतं नास्ति । क० छ०

इति हेमाद्रौ शङ्खोक्तेः । पैठीनसिः—

एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् ।
चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक् ॥

यत्तु मरीचिः—

आशौचान्ते ततः सम्यक् पिण्डदानं समाप्यते ।
ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः ॥ इति ।

तत्सर्ववर्णानां दशाहाशौचपरम् । यत्तु विष्णुः—'अथाशौचापगमे' इति । यच्च गौडग्रन्थे हारीतः—'श्वोभूते एकोद्दिष्टं कुर्यात्' । यच्च बैजवापः—'ऊर्ध्वं दशम्या अपरेद्युः' इति; तद्विप्रविषयम् । एतेन *दशमपिण्डो-

---

तिक्रमे सति स्नायात् । ततो विप्रो हस्तेनापः स्पृष्ट्वा शुद्ध्यति । एवं क्षत्रिय इति। स्पृष्ट्वेति स्पर्शक्रियैवोच्यते नतु स्नानमाचमनं वा, तस्यैवाग्रेऽनुषङ्गात् । अत्र कृतक्रियो यावदाशौचं कृतक्रियोदको विप्रादिक्रमेणोदकादिकं स्पृष्ट्वा विशुद्ध्यतीति आशौचकालानन्तरभाविस्नानप्रतिनिधिरुच्यते इति पक्षान्तरं शिष्टा नाचरन्ति ।

*दशमेति ।

ब्राह्मणे दश पिण्डाः स्युः क्षत्रिये द्वादश स्मृताः ।
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत् प्रकीर्तिताः ॥

इत्येको गात्रपूरकपिण्डपक्षः । अपरश्च—

सर्वेभ्यः प्रेतवर्णेभ्यः पिण्डान् दद्याद्दशैव तु ।

इतिपारस्करोक्तपक्षे—

राज्ञस्तु दशमः पिण्डो द्वादशेऽहनि दीयते ।
वैश्यस्य पञ्चदशमे ज्ञेयस्तु दशमस्तथा ॥
शूद्रस्य दशमः पिण्डो मासे पूर्णेऽह्नि दीयते ॥

इत्यादिपुराणोक्त इत्यर्थः । याज्ञवल्क्योक्तावयवपिण्डपक्षे पूर्वोक्तसर्ववर्णदशाहाशौचपक्षे च अवयवपिण्डसमाप्तिलाभादुक्तम्-

त्कर्ष*पक्षे अवयवपिण्डासमाप्तौ कथमेकादशाहे श्राद्धमिति मूर्खोक्तिः परास्ता, *वचनादाशौचमध्य इव तत्राप्यविरोधात् ।

भविष्ये—

एकादशभ्यो विप्रेभ्यो दद्यादेकादशेऽहनि ।
भोजनं तत्र वैकस्मै ब्राह्मणाय महात्मने ॥

यत्तु मात्स्ये—

एकादशेऽहनि तथा विप्रानेकादशैव तु ।
क्षत्रादिः सूतकान्ते तु भोजयेदयुजो द्विजान् ॥ इति ।

तद्रु*द्रगणश्राद्धपरमिति मदनपारिजातः । गौडास्त्व*स्माद्वचनात्क्षत्रियादीनामाशौचान्त एवेत्याहुः ।

---

*पक्षे इति । *वचनादिति । तथाच वचनबलादेकादशाहश्राद्धं कृत्वा पिण्डसमाप्तौ न क्षतिः “नास्ति वचनस्यातिभारः” इति न्यायादित्यर्थः । अत एव शूद्रस्य मृताहावधिकद्वादशाहे षोडशश्राद्धपूर्वकं सपिण्डनं विज्ञानेश्वरसंमतमाचक्षते रघुनाथप्रभृतयः । *रुद्रगणेति । वस्तुतस्तु तस्याऽऽद्यश्राद्धपरत्वमेव, ब्राह्मण एकादशाहे आद्यश्राद्धे एकादश द्विजान् भोजयेदेव क्षत्रियादिस्तु तत्रैव तत्कुर्वन्नपि न पक्वेनान्नेन तदा ब्राह्मणान् भोजयेत् । किन्तु तदा त्यक्तेन तावद्ब्राह्मणभोजनपर्याप्तेनाऽऽमेन सूतकांते पक्त्वा भोजयेदिति तदर्थात् । अयं च विधिरावश्यकः विष्णुना सूतकान्तमात्राभिधानात्तस्य सर्ववर्णसाधारण्यापातात् । तस्य विप्रपरत्वोपगमे एकादशाहे क्षत्रियादेर्भोजनप्रसङ्गात् । *अस्मात् मात्स्यात् । एतन्मते च सपिण्डनमाद्यश्राद्धोत्तरदिन एवेति बोध्यम् । गौडास्त्वित्यस्वरसः । मात्स्यवचनस्य “एकादशेऽहनि” इत्युक्तस्य श्राद्धीयस्यामस्य सूतकान्ते पाकेन भोजनार्थकत्वेनोपपत्तेः सूतकान्तकर्त्तव्यत्वबोधकत्वाभावात् । नच—

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।

रामायणेऽपि—

समतीते दशाहे तु कृतशौचो यथाविधि ।
चक्रे द्वादशिकं श्राद्धं त्रयोदशिकमेव च ॥

द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥
गलांसभुजवक्षांसि तृतीयेन तु सर्वदा ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
ऊरुजङ्घे तथा पादौ पञ्चमेन विधीयते ।
षष्ठेन सर्वमर्माणि सप्तमेन च नाडयः ॥
दन्तलोमाद्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥
दशाहप्रेतपिण्डेन ज्ञानं प्रेतेषु जायते ॥

इति ब्रह्मपुराणात् दशपिण्डदानस्य पूर्णप्रेतशरीरावयवनिष्पादकत्वम् ।

प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता ॥

इति वचनाच्च । तथाचोत्तरश्राद्धसहकारेण तद्विनाशफलकस्याद्यश्राद्धस्य तत्पूर्वकपितृत्वप्राप्तिफलकानां वा सपिण्डनान्तानां दशमपिण्डात् पूर्वकरणं विरुध्यते इति वाच्यम् । प्रेतशरीरस्य—

क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनन्दन ।

इति वचनात् दुःखैकहेतुत्वेन वैधकर्मफलत्वासम्भवात् । एतच्छरीरपातावशिष्टकर्मभिः शुक्रशोणिताहारपरिणामविशेषादिभिर्दृष्टैश्च तदारम्भोपपत्तेरेतत्पिण्डदानानपेक्षणात् । अन्यथा चण्डालतिर्यगादिशरीरपातानन्तरं न स्यात्, तत्र पिण्डदानाभावात् । तस्मात् पिण्डदानफलं नावयवनिष्पत्तिः किन्तु तदकरणनिमित्तकप्रेतनरकनिवृत्तिः । तथाच ब्राह्मे—

ग्रामाद्बहिश्च कर्तव्यं जलाशयसमीपतः ।
पिण्डदानं दशाहानि प्रेतायारण्यमाश्रितैः ॥

अरण्ये पिण्डदानं तु मोहान्न क्रियते यदि ।
तदा रौरवमायाति प्रमीतः प्रथमेऽहनि ॥
पुन्नामसंज्ञं त्वपरे महारावं तृतीयके ।
तामिस्राख्यं चतुर्थे तु प्रयात्यथ सुदारुणम् ॥
पञ्चमे चान्धतामिस्रं षष्ठे घोरं च सुप्रभम् ।
अमेध्यं कृमिसम्पूर्णं सप्तमेऽहनि घातकम् ॥
असिपत्रवनं घोरमष्टमेऽहनि सर्वथा ।
महारौरवसञ्ज्ञं तु नवमे याति मानवः ॥
अवीचिरिति विख्यातं दशमेऽहनि भीषणम् ॥ इति ।

नच पिण्डदानाकरणस्यारण्यसम्बन्धांशे एवेयं निन्दा, नानाविधविशेषणवत्तया पिण्डदानस्यैव प्रागवगमात् । नचैवं वाराणसीमरणादिनिमित्तकमुक्तौ नरकादर्शनफलकप्रवृत्तकर्मणा वा प्रेतगतानिष्टासत्त्वेन पिण्डदानं व्यर्थमिति वाच्यम्,

तण्डुलैः सक्तुभिः शाकैः फलैर्वा श्रद्धया ततः ।
देशकालानुसारेण कुर्यात् प्रेतस्य तर्पणम् ॥

इत्यादिशाकेङ्गुदीपिण्याकादिनिःसारद्रव्यविधानेन तदकरणे कर्त्तुरेव प्रत्यवायकल्पनात् । अथवा पिण्डदानस्य प्रेतत्वावस्थानिवृत्तिरेव फलं—

स्वगोत्रा वाऽन्यगोत्रा वा स्त्रियो वा पुरुषास्तथा ।
प्रेतास्तु पिण्डसम्बन्धान्मुच्यन्ते तेन कर्मणा ॥
वायुभूतास्तु तिष्ठन्तः कालापेक्षेण सर्वदा ॥

इत्यादित्यपुराणात् । एवं च प्रागुक्तवचनस्याधर्मारब्धं प्रेतशरीरं दुःखैकभोगहेतुस्तन्निवर्तकाभावे दुःखभोगार्थं तांस्तान् नरकान् गच्छेत् पिण्डदानेन तु तदारम्भकादृष्टनाशेन तच्छरीरनिवृत्तौ तदप्राप्तिरित्यत्र तात्पर्यम् । तस्मात् क्षत्रियादिभिर्दशमपिण्डदानात्प्राक् प्रेतत्वनिवर्तकस्यैकादशाहस्य शूद्रेण वा द्वादशाहे सपिण्डनान्तस्य करणे न कोपि विरोधः । प्रेतत्वनिवृत्तिस्तु दशमपि-

*द्वादशिकं (१)द्वादशाहेन निर्वर्त्यं त्रयोदशाहश्राद्धम्। त्रयोदशिकं चतुर्दशाहविधेयं सपिण्डनपाथेयादि। क्षत्रियाणां द्वादशाहाशौचे त्रयोदशे महैकोद्दिष्टं चतुर्दशे सपिण्डनम्। *द्विविधवाक्यादेकादशाहाशौचान्तयोर्विकल्प इत्येके। *सद्यःशौचादौ युद्धहतादेरेकादशाहे *अन्येषामाशौचान्त इति वयम्। कौर्मे—

एकादशेऽह्नि कुर्वीत प्रेतमुद्दिश्य भावतः।
द्वादशे वाऽह्नि कर्तव्यमनिन्द्येऽप्यथवाऽहनि ॥

ण्डोत्तरमेव। द्वादशाहादिसपिण्डने प्रेतत्वनिवृत्तेर्वत्सरोत्तरत्ववत्तदन्त एव सकलनिवर्तकसम्पत्तेः। समतीते इत्यादि रामायणवाक्यस्य चायमर्थः—सत्यपि द्वादशाहाशौचे दशाहोत्तरादिने एकादशाहिकं चक्रे, ततो द्वादशाहिकं श्राद्धं, ततस्त्रयोदशाहिकं पाथेयश्च श्राद्धमिति। गौडमते दशाहपदस्याशौचकालद्वादशाहपरत्वाद्व्याचष्टे—*द्वादशिकमिति। मतान्तरमाह—*द्विविधेति। एकपक्षाङ्गीकारसम्भवाद्विकल्पोऽष्टदोषग्रस्तो नाङ्गीकार्य इत्यस्वरसः। सिद्धान्तमाह—*सद्य इति। आदिना त्र्यहैकाहग्रहः।

तृतीये तूदकं दत्त्वा चतुर्थे श्राद्धमाचरेत्।

इत्यादौ तु तद्बाधोऽनुसन्धेयः। *अन्येषामिति। अयं भावः—प्रायशः एकसंवत्सरस्थायी वायवीयः प्रेतदेहः, तदारम्भकश्च मनुष्यशरीरारम्भकाधर्मशेषः पितृत्वप्राप्तिप्रतिबन्धकः तद्देहभोग्यदुःखभोगैकनाश्यः, तदधर्मनाशार्थं दुःखभोगस्तदर्थं च प्रेतदेह आवश्यकः तदुत्पत्त्यर्थं च पिण्डदानमिति प्रेतदेहोत्पत्तिर्भवत्येव पिण्डदानफलम्। अत एवैकादशाहादिश्राद्धानां पूर्णप्रेतशरीरनिवृत्तिः फलं,

यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश।

---

(१) 'द्वादशाहेऽतीते श्राद्धम्' क० छ०।

निन्द्यं प्रेतक्रिया(१)काले उक्तम् । एकादशे तु न निषेध इत्युक्तं प्राक् । बृहस्पतिः—

वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकम् ।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत् ॥
श्रोत्रिया भोजनीयास्तु नव सप्त त्रयोदश ।
(२)ज्ञातयो बान्धवा निःस्वास्तथा चातिथयोऽपरे ॥

पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥

इति यमोक्तेः ।

एकादशाहादिभिः श्राद्धैर्मृतस्याप्यायनं भवेत् ।
सम्यक् संवत्सरे प्रेतः पितॄणां स्थानमृच्छति ॥

इति देवलोक्तेश्च । आप्यायनं प्रेतत्वपरिहार इति हि शूलपाणिः । "सगोत्रा वाऽन्यगोत्रा वा" इति वचनं तु चिरकालमृताकृतौर्ध्वदेहिककेवलदुरितप्राप्तप्रेतदेहविषयं, "कालापेक्षेण तिष्ठन्तः" इति तत्रैवाभिधानात् । यत्तु त्रिरात्रं दशरात्रं वा प्रेतमुद्दिश्योदकं क्षीरं च स्नानपानार्थं दीयते तेन तदानीमेव प्रेतो न स्नानपाने कुरुते तयोः प्रत्यक्षतोऽदर्शनात् किन्तु तदा तज्जन्यापूर्वेण तदानीमेव तस्य स्नानपानयोग्यदेहलाभोऽनन्तरं तत्सजातीयनीरक्षीरान्तरोपस्थितिः । एवं दशाहमध्ये शालीनां सहभोजनादेः प्रेताप्यायकत्वेऽपि । अथवा यथा गर्भिण्युपभुक्तं दोहदान्नपानादि अपूर्णस्यैव गर्भस्याप्यायकं तथा क्षीरोदकदानादि अपूर्णद्वारेण प्रेतदेहपुष्टिकरम् । ततश्च मरणानन्तरमेव दत्तैर्गात्रपूरकैः पिण्डैः प्रेतभावाहार्णामक्लेशेन क्षिप्रं प्रेतशरीरं भवति इति वा व्यवस्थायामवैधं बुद्धिपूर्वं वा मरणे दुर्मरणे च प्रायश्चित्तविशेषादिनाऽधिकारं सम्पाद्य दत्तैः पिण्डैस्तत् । अधिकारासम्पादने तु क्षिप्रमप्यतिमूढं पिण्डदानवत्त्वेऽप्यनर्हम् । सर्वथा पिण्डदाने तु विलम्बेन क्लेशेन च तदिति सिद्धम् । तथाच दशमपिण्डदानात् पूर्वं

---

(१) 'कालयुक्तम्' ग । (२) 'जातयो' ग० ।

देवयाज्ञिकनिबन्धे—

एकादशसु विप्रेषु प्रेतमावाह्य भोजयेत् ।

प्रेतदेहस्यैवानिष्पन्नत्वात्तन्निवृत्त्यर्थानामेकादशाहादिश्राद्धानामाशौचमध्ये कथं करणमिति याज्ञवल्क्यादिवाक्ये पैठीनसिवचने चैकादशाहग्रहणमाशौचान्त्यदिनोत्तरदिनार्थकं विष्णुवचनैकवाक्यत्वात् । "ततः श्राद्धमशुद्धौ तु" इति शङ्खवचनपाठे श्राद्धं प्रथमादिदिनेष्वशुद्धौ कुर्यादित्यर्थः । अशुद्धौ कथं श्राद्धं स्यादित्यत्राह-कर्त्तुरिति । एकादशाहे अशौचोत्तरदिने च कुर्यादिति व्याख्येयम् ।अशुद्धोऽपीति पाठे सर्वेषामपि आशौचान्त्यदिनस्य महैकोद्दिष्टाङ्गविप्रनिमन्त्रणपरत्वम् ।तत्सिद्धं सर्वैरपि दशमपिण्डे दत्ते स्वस्वाशौचोत्तरेऽह्नि एकादशाहश्राद्धं कार्यं तदितरैकादशाहकृत्यं च तत्रैव, तयोरेकदिनकर्त्तव्यत्वात् । द्वादशाहाशौचकारिक्षत्रियाणां मासाशौचकारिशूद्राणां चाचारोऽप्येवमेव । तदुत्तरेऽह्नि च सपिण्डनम् । सर्वेषां दशाहाशौचपक्षे तु एकादशाहद्वादशाहयोरेव तत्कृत्यम् । शूद्राणां द्वादशे सपिण्डनविधानं तु न मरणाद्द्वादश इति वक्ष्यामः । एकादशभ्य इति । एकस्यैव प्रेतस्थाने एकादश ब्राह्मणा इति मुख्यः कल्पः । विष्णुना तु यथाशक्ति ब्राह्मणा उक्ताः । यथा—"आशौचव्यपगमे प्रातः सुप्रक्षालितपाणिपादः स्वाचान्तः ब्राह्मणान् यथाशक्ति उदङ्मुखान् गन्धमाल्यवस्त्रादिभिः पूजितान् भोजयेत्" इति । ग्रन्थेऽपि एतदभिप्रेत्यैव "नव सप्त त्रयोदश" इत्युक्तम् । एकैको वा, "गतोऽसि दिव्यलोकं त्वम्" इति प्रागुक्तवाराहात् ।

स्नापनाभ्यञ्जनं दद्याद्द्विजाय विधिपूर्वकम् । इति,

ब्राह्मणं शीघ्रमेवानयेत् ।

आगतं च द्विजं दृष्ट्वा कर्तव्या स्वागतक्रिया । इति ।

आवरणार्थं छत्रं तद्ब्राह्मणाय प्रदीयते ।

तत्रा*द्याय च शय्यादि दद्यादाद्यामिति स्मृतम् ॥

विष्णुः—'एकवन्मन्त्रानूहेतैकोद्दिष्टे' बहुवचनान्तानेकवचनान्तान्वदेदित्यर्थः । एतत् *दृष्टार्थत्वे ।

पश्चादुपानहौ दद्यात् पादस्पर्शकरे शुभे ॥
सन्तप्तवालुकां भूमिं महीं कण्टकितां तथा ।
सन्तारयति दुर्गाणि प्रेतं दददुपानहौ ॥
तिलोपचारं कृत्वा तु विप्रस्य नियतात्मवान् ।

इत्यनेकवाक्येष्वेकवचनाच्च ।

नवश्राद्धनिमित्तं तु एकमेकादशेऽहनि ।

इत्यत्रिवचनाच्च । बहुपक्षेऽपि प्रेतोपभुक्तवस्त्रादिकं नवशय्या च तन्मध्ये एकस्मै गुणवते देया "तस्मात्तेषामेकस्मै गुणवते शय्या देया" इति सत्यव्रतवचनात् । गुणवांश्चाऽऽद्यः कर्तव्य इत्याह—*आद्यायेति । एवं चेतरेभ्यो यथाशक्ति दक्षिणैव, एकस्मै वस्त्रादिदानमुक्त्वा—

प्रदद्याद्दक्षिणां तेषां सर्वेषामनुरूपतः ।

इति बृहस्पत्युक्तेः । अयं च सर्वैकोद्दिष्टप्रकृतिरिति मिताक्षरादर्शनान्मासिकसांवत्सरिकाद्येकोद्दिष्टेषु तद्धर्मातिदेशो बोध्यः । ननु वैष्णवं पुराणैकोद्दिष्टे एव प्रवर्तते न तु सपिण्डनप्राक्तने मासिके एकादशाहिके च प्रेतैकोद्दिष्टे । तदानीं पितृत्वाभावेन तद्वाच्यावस्थाविशेषात्मकपितृत्वाभावेन तद्वाचिबहुवचनान्तपितृपदोपेतमन्त्राणां तत्राप्रवृत्तेः।"पितृशब्दं न युञ्जीत" इति निषेधश्च न्यायमाप्तानुवादप्रायत्वात् । अत एवान्वष्टक्ये पितृपदे न मातृपदोह इति वृत्तिकृतः । नच पवित्रच्छेदनमन्त्रे द्विवचनान्तः पवित्रशब्दस्तत्रैकवचनोह इति वाच्यं तथापि 'मन्त्रान्' इतिबहुत्वानुपपत्तेरिति चेत् ? न, वैष्णवस्य प्रेतैकोद्दिष्टमुपक्रम्याम्नानेन तत्साधारण्यस्यावश्यकत्वात् । *दृष्टार्थत्वे इति । दृष्टार्थत्वार्थमप-

अस्य विघ्ने गौणकालमाह हेमाद्रौ बौधायनः—

एकोद्दिष्टं श्व एव स्याद् द्वादशेऽहनि वा पुनः ।
अत ऊर्ध्वमयुग्मेषु कुर्वीताहःसु शक्तितः ॥
अर्धमासेऽथवा मासि ऋतौ संवत्सरेऽपि वा ॥ इति ।

तत्रैव लघुहारीतः—

एकोद्दिष्टं तु कुर्वीत पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहः समुपोषणम् ॥

गोभिलः—

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेदेकं द्विरावृत्तिर्भवेदिति ॥

एतदाद्यमासिकाद्याब्दिकयोः सिद्ध्यर्थमिति भट्टाः । (ते(१)न महैकोद्दिष्टं षोडशश्राद्धाद्भिन्नमेव । अत एवायम् सर्वैकोद्दिष्टप्रकृतिभूतमेकादश इति विज्ञानेश्वरः । अन्ये त्वाद्यमासिकाब्दिकयोः 'आद्यमेकादशेऽहनि' इति नियमादभेदमाहुः । द्वयोस्तन्त्रत्वबाधार्थं गोभिलीयमित्यन्ये ।) युद्धहतादौ तु हेमाद्रौ पृथ्वीचन्द्रोदये पैठीनसिः—

सद्यःशौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि ।
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु ॥

एवमेकाहादौ । अतोऽत्र द्वितीयेऽह्न्येकादशाहं वदन् ढौण्डुः शूलपाणिः स्मार्तगौडश्च परास्ताः । एतेन 'आद्यमेकादशेऽहनि' इत्याशौचानन्तरदिनपरमिति विष्णू-

वेतार्थतादिभिरूहः कार्यः तेन शुन्धनमन्त्रादौ जनकवाचिबहुवचनान्तपितृशब्दसत्त्वेऽपि नोहः, अवनेजनादिनिषेधात् । पुराणैकोद्दिष्टेऽपि "नमो वः पितरः" इत्यादौ समुदितपित्राद्यभिप्रायेण बहु-

---

(१)कंसान्तर्गतं नास्ति । क० छ० ।

Nepal Sanskrit University, Balmeekj Campus, Kathmandu

क्तेः प्रागुक्तशङ्खादिवचनानां चानाकरत्वादिति वदन्तः कल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबन्धविरोधादुपेक्ष्याः । उशनाः—

त्र्यहाशौचेऽपि कर्तव्यमाद्यमेकादशेऽहनि ।
अतीतविषये सद्यस्त्र्यहोर्ध्वं वा तदिष्यते ॥

याज्ञवल्क्यः—

एकोद्दिष्टं दैवहीनमे*कार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥
उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने ।

त्वस्य समवेतार्थतयोहः । न तु समवेतार्थत्वात् । नापि—

एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् ।

इति ब्रह्मपुराणोक्तपक्षे एतद्व इति मन्त्रे एतादिति यथाह्निकस्यावश्यकत्वं तथा वक्ष्यामः। *एकार्घ्यैकपवित्रकमिति। एकोऽर्घ्यः एकं पवित्रमिति एकः पिण्डानिति अर्घ्यपिण्डकत्वश्रवणं न्यायप्राप्तानुवादः दैवतैक्यादेव तत्सिद्धेः । यत्त्वेकं पवित्रमित्यनुवादः । तथाहि, 'पवित्रान्तर्हितेष्वप आसिच्य' इत्युक्तेः पात्रद्वाराऽर्घ्योदकसंस्कारकं पवित्रम् । तच्च न "अस्त्री कुशं कुथो दर्भः पवित्रम्" इति कोशात्कुशसामान्यं, किन्त्वनन्तर्गर्भिणं साग्रमिति लक्षणात्कुशद्वयदलविशेषः, वाक्येन होमप्रकरणपाठबाधात् । तत्र पार्वणे पितृपात्रत्रये पवित्रमित्यनुवाद इति । तन्न, अप्राप्तदलैक्यविधायकत्वात् । पवित्रशब्दो हि "अथ पवित्रे करोति" इति वाजसनेयिब्राह्मणे "पवित्रे कृत्वा" इति पारस्करादिसूत्रे "बर्हिषः प्रादेशमात्रे पवित्रे कुरुते", "पवित्राभ्यामाज्यस्योत्पवनम्" इति गोभिलाश्वलायनादौ "पवित्रे स्थो वैष्णव्यम्" इति मन्त्रे च द्विवचनान्ततया एकदलवचन एव । एवं च क्वचित् पवित्रमित्येकवचनं समुदायाभिप्रायं नतु तद्दलाद्दलद्वयसमुदाय एव

अभिरम्यतामिति वदेद् ब्रूयुस्तेभिरताः स्म *ह ॥

इत्यग्नौकरणनिषेधोऽन्यपरः । *बह्वृचानां सर्वैकोद्दिष्टेषु तद्भवत्येवेत्युक्तं *प्राक् । स्वादितमिति तृप्तिप्रश्न इति कात्यायनः । प्रथमे पात्रे संस्रवानित्यस्य तृतीयेनापिधानस्य च बाधान्न पात्रन्युब्जतेति शूलपाणिः । प्रचेताः—'नात्र पात्रालम्भो नाशिषः प्रार्थयेत्' ॥

अत्र विशेषो हेमाद्रौ वाराहे—

श्मश्रुकर्म तु कर्तव्यं नखच्छेदस्तथैव च ।
स्नपनाभ्यञ्जने दद्याद्विप्राय विधिपूर्वकम् ॥

तथा—

उपवेश्यासने भद्रे छत्रं तत्र प्रकल्पयेत् ।
पश्चादुपानहौ दद्यात्सर्वाण्याभरणानि च ॥

विष्णुः—'दक्षिणान्तं श्राद्धमुक्त्वा दत्ताक्षय्योदकेषु चतुरङ्गुलपृथ्वीस्तावदन्तरालास्तावदधःखाता वितस्तथा-

---

तद्वाच्यः । श्रुत्यादौ बहुषु लक्षणापातात् । न च होमाङ्गपवित्रादेकैकदलरूपादिदं न भिन्नमेव दलद्वयरूपं, तस्यैवान्यत्रापि विनियोगसम्भवेन भेदे मानाभावात् । ततश्च द्वित्वाविशिष्टस्य दलरूपस्य पवित्रस्योत्पन्नत्वात्पार्वणे प्रतिपात्रं दलद्वयरूपमिव एकोद्दिष्टे एकपात्रे द्वयदले प्राप्ते इति एकतद्विधानार्थमेकं पवित्रम् । वस्तुतस्तु "तिस्रास्तिस्रः शलाकास्तु" इति वचनात् पार्वण इवात्रैकैकदलात्मकानि त्रीणि पवित्राणि प्राप्तानि, तत्र एकदलं विधीयते । तथाचोक्तम्—"एकोद्दिष्टे शलाकैकम्" इति । *हेति । प्रसिद्धौ । प्रसिद्धपार्वणसम्बन्धिशेषधर्मप्रायकम् । *बह्वृचानाम् । आश्वलायनसूत्रानुसारिणाम् । *प्रागिति । "अथातः पार्वणे श्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे च" इति चत्वारि श्राद्धानि प्रक्रम्याग्नौकरणादीनां समानविधानादित्यादि । *दत्तेति । अ-

यतास्तिस्रः कर्षूः कुर्यात् । कर्षूणां समीपेऽग्नित्रय(१)मआधाय परिस्तीर्यैकैकस्मिन्नाहुतित्रयं जुहुयात् सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय यमायाङ्गिरस्वते इति ॥' स्थानत्रये प्राग्वत्पिण्डनिर्वपणं दधिमधुघृतमांसैः कर्षूत्रयं पूरयित्वैतत्त इति जपेत् । शेषं नवश्राद्धवत् । अत्र साग्नेरप्यन्ते वैश्वदेव इत्युक्तं प्राक् । इदं दशाहकर्त्रा पुत्रेण वा कार्यमित्युक्तम् । क्रियानिबन्धे गृह्यकारिकायाम्—

तिलोसि प्रेतदेवत्यः प्रेतं लोकान्हिनोन्तकम् ।
मन्त्रमुक्त्वा तिलानेवं प्रक्षिपेदर्घ्यपात्रतः ॥
दक्षिणामुदकुम्भं च सान्नं दत्त्वा तथैव गाम् ।
तस्मै दद्याद् *भुक्तशेषं तद्भाण्डान्यपि भाजनम् ॥

विप्राभावेऽग्नावेकोद्दिष्टम्, 'अग्नौ पायसं श्रपयित्वाऽऽज्यभागान्ते तदग्रे श्राद्धप्रयोगं कृत्वाऽग्नौ प्रेतमावाह्य गन्धाद्यैः सम्पूज्य पृथिवी ते पात्रमित्यादिनाऽन्नं सङ्कल्प्योदीरतामवर इत्यष्टाभिश्चतुरावृत्ताभिर्द्वात्रिंशदाहुतीर्हुत्वा पिण्डदानादिश्राद्धं समापयेत्' इति । याज्ञवल्क्यः—

एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि ॥

अथ वृषोत्सर्गः । स च नित्यः काम्यश्च,

थाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपाद आचान्तस्त्वेवंविधान् ब्राह्मणान् यथाशक्त्युदङ्मुखान् गन्धमाल्यवस्त्रालङ्कारादिभिः पूजितान् भोजयेदेकवन्मन्त्रानूहेतैकोद्दिष्टे उच्छिष्टसन्निधावेकमेव तन्नामगोत्राभ्यां पिण्डं निर्वपेत् । भुक्तवत्सु ब्राह्मणेषु दक्षिणयाऽभिपूजितेषु प्रेतनामगोत्राभ्याम्" इत्यादि । *भुक्तशेष-

---

(१) 'त्रय' नास्ति । ग० ।

न करोति वृषोत्सर्गं सुतीर्थे वा जलाञ्जलिम् ।
न ददाति सुतो यस्तु पितुरुच्चार एव सः ॥

उच्चारः पुरीषम् ।

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

इति मात्स्यकौर्मोक्तेः,

एकादशेऽह्नि प्रेतस्य यस्य नोत्सृज्यते वृषः ।
प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥

इति षट्त्रिंशन्मते निन्दाश्रुतेः,

एवं कृत्वा ह्यवाप्नोति फलं वाजिमखोदितम् ।
यमुद्दिश्योत्सृजेन्नीलं स लभेत परां गतिम् ॥
वृषोत्सृष्टः पुनात्येव दशातीतान्दशापरान् ।

इति देवीपुराणे भविष्यादौ फलश्रुतेश्च । अयं द्वादशाहे उक्तो भविष्ये—

*चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशेह्नि वा ।

इति ।

विष्णुधर्मे तु मृताहेप्युक्तः—

*विषुवद्द्वितये चैव मृताहे बान्धवस्य च । इति ।

अयं गृहे न कार्यः,

न गृहे मोचयेन्नीलं कामयन्पुष्कलं फलम् ।

इति कालिकापुराणात् । कामधेनौ—

वत्सराभ्यन्तरे पित्रोर्वृषस्योत्सर्गकर्मणि ।
वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत ॥

मिति । श्राद्धशेषभोजनाभावात् । *चैत्र्यामिति ।

कार्तिक्यामथवा माघ्यामयने वा युधिष्ठिर ।

इत्यादि । *विषुवदिति ।

तल्लक्षणं तु ब्राह्मे—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

श्वेतवर्णस्य मुखादीनि श्यामानि श्यामस्य वा श्वेतानि यस्य सोऽपि नीलवृष उक्तो मात्स्यादौ । देवीपुराणे—

*चतस्रो वत्सिका भद्रा द्वे वा संभवतोऽपि वा ।

यत्तु—पठन्ति—

वृषोत्सर्जनवेलायां (१)वृषाभावे कथंचन ।
मृद्भिः पिष्टैश्च दर्भैर्वा वृषं कृत्वा विमोचयेत् ॥
न शक्यते वृषोत्सर्गो होमं वा तत्र कारयेत् ॥ इति,

तन्निर्मूलम् । तद्विधिर्हेमाद्रौ भट्टकृतौ च ज्ञेयः । अत्र देवयाज्ञिकेन वृषोत्सर्गात्पूर्वं पुरुषसूक्तेन विष्णुरूपिप्रेतोद्देशेन विष्णुतर्पणमुक्तम् । तत्र मूलं चिन्त्यम् ।

पारस्करः—

सव्येन पाणिना पुच्छं समालभ्य वृषस्य तु ।
दक्षिणेनाप आदाय सतिलाः सकुशास्ततः ॥
प्रेतगोत्रं समुच्चार्य अमुकस्मै इति ब्रुवन् ।
वृष एष मया दत्तस्तं तारयतु सर्वदा ॥
सहेम सतिलं भूमावित्युच्चार्य विनिक्षिपेत् ॥

उत्सृजेन्नीलकण्ठं वै कौमुद्याः समयागमे ।

इति शेषार्थम् । कौमुदी आश्वयुजी पूर्णिमा ।

चरणाश्च मुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णं तु तं नीलमिति निर्दिशेत् ॥

इति लक्षणान्तरम् । *चतस्र इति ।

अयं हि गोपो मद्दतः सर्वासां पतिरुत्तमः ।
तुभ्यं च ता मया दत्ताः पत्न्यः सर्वा मनोरमाः ॥

---

(१) 'वृषाभावः' ग० ।

तथा—

विधारयेन्न तं कश्चिन्न च कश्चन वाहयेत् ।
न दोहयेच्च ता धेनूर्न च कश्चन बन्धयेत् ॥

स्त्रीषु विशेषः संग्रहे—

पतिपुत्रवती नारी भर्तुरग्रे मृता यदि ।
वृषोत्सर्गं न कुर्वीत गां दद्याच्च पयस्विनीम् ॥

पतिपुत्रयोः *साहित्यं विवक्षितम् । अन्वारोहणेऽपि गोदानमेवेत्युक्तं प्राक् । आशौचान्तरेऽपि वृषोत्सर्गाद्यमासिकशय्यादि दद्यादेवेत्युक्तम् । क्रियानिबन्धे स्मृत्यन्तरे—

सूतके मृतके चैव द्वितीयं मृतकं यदि ।
पिण्डदानं प्रकुर्वीत वृषोत्सर्गं तथैव च ॥
न हन्यात्सू(१)तकं कर्म द्वादशैकादशाहिकम् ।
शुद्धो वा यदि वाऽशुद्धः कुर्यादेवाविचारयन् ॥ इति ।

अत्र पददानमुक्तं देवजानीये गारुडे एकादशाहं प्रक्रम्य—

तदहि दीयते (२)सर्वं द्वादशाहे विशेषतः ।
पदानि सर्ववस्तूनि वरिष्ठानि त्रयोदश ॥
यो ददाति मृतस्येह जीवतोऽप्यात्महेतवे ।
सुखी भूत्वा महामार्गे वैनतेय स गच्छति ॥

इति मन्त्रो बहुगोपक्षे एकाद्विपक्षेऽनूह्य इत्येके । एकगोयुक्तप्रयोगस्य बहुगोयुक्तप्रयोगेन प्रकृतिविकृतित्वाभावात् । 'व्रीहीणां मेध' इत्यस्य यवप्रयोग इवास्यापि लोप इत्यन्ये । *साहित्यमिति । अत्राहुः—सत्यपि वृषोत्सर्गाधिकारिणि पुत्रे भर्तृसमक्षं मृताया यदि न वृषोत्सर्गः, तदा सुतरां पुत्राभावे, भर्तृसमक्षमृतेरेव तदकरणप्रयोजकत्वात् "अपि पुत्रवती नारी" इति पाठान्तराच्च । तस्मात्सा-

---

(१) 'सूतके' ग० । (२) 'सर्वैः' ग० ।

तथा—

आसनोपानहौ छत्रं मुद्रिका च कमण्डलुः ।
(१)भाजनं भोजनाधारो वस्त्राण्यष्टविधं पदम् ॥

तथा—

भाजनासनदानेन मुद्रिकाभोजनेन च ।
महिषीरथगोदानात्सुखी भवति निश्चितम् ।
सर्वोपस्करयुक्तानि पदान्यत्र त्रयोदश ॥
यो ददाति मृतस्येह जीवन्नप्यात्महेतवे ।
स गच्छति परं स्थानं महाकष्टविवर्जितः(२) ॥
*त्रयोदश पदानीत्थं प्रेतायैकादशेऽहनि ।
दातव्यानि यथाशक्ति तेनासौ प्रीणितो भवेत् ॥
अन्नं चैवोदकं चैवोपानहौ च कमण्डलुः ।
छत्रं वस्त्रं तथा यष्टिं लोहदण्डं तथाष्टमम् ॥
अग्नीष्टिकां च दीपं च तिलांस्ताम्बूलमेव च ।
चन्दनं पुष्पदानं चोपदानानि चतुर्दश ॥
योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत् ।
स्वमहिम्नोऽनुसारेण तत्तत्सुखमवाप्नुयात् ॥ इति ।

अत्र मूलं चिन्त्यम् ॥

अथ शय्यादानम् । हेमाद्रौ भविष्ये—

तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ।
दन्तपत्रचितां रम्यां हैमपट्टैरलंकृताम् ॥
हंसतूलीप्रतिच्छन्नां शुभगण्डोपधानिकाम् ।

हित्यं न विवक्षितमिति । *त्रयोदशेति । अशक्तौ तु–
त्रयोदश तथा पञ्च तत्र त्रीणि यथाक्रमम् ।

---

(१) 'भोजनं' ग० ।

(२) चतुःषष्टिपदान्याद्ये द्वात्रिंशन्मध्यमे पदम् । षोडशापि कनिष्ठे स्युस्त्रयोदश त्वनाद्यके ॥ एवं निर्णयामृते इत्येकस्मिन्पुस्तकेऽधिकम् ।

प्रच्छादनपटीयुक्तां गन्धधू(१)पादिवासिताम् ।
तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितम् ॥

अत्र हरिस्थाने प्रेतम् ।

उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ।
ताम्बूलं कुङ्कुम(२)क्षोदं कर्पूरागरुचन्दनम् ॥
दीपिकोपानहच्छत्रं चामरासनभाजनम् ।
पार्श्वेषु स्थापयेद्भक्त्या सप्त धान्यानि चैव हि ॥
शयनस्थस्य भवति यदन्यदुपकारकम् ।
भृङ्गारकरकाद्यं तु पञ्चवर्णवितानकम् ॥

मन्त्रस्तु—

यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥

अर्धं तत्रैव ।

दत्त्वैवं तस्य सकलं प्रणिपत्य विसर्जयेत् ।
एकादशाहेपि तथा विधिरेष प्रकीर्तितः ॥
विशेषं चात्र राजेन्द्र कथ्यमानं निशामय ।
तेनोपभुक्तं यत्किंचिद्वस्त्रवाहनभाजनम् ॥
यद्यदिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् ।
तमेव पुरुषं हैमं तस्यां संस्थापयेत्तदा ॥
पूजयित्वा प्रदातव्या मृतशय्या यथोदिता ॥

पाद्मे—

मृतकान्ते द्वितीयेऽह्नि शय्यां दद्यात्सु(३)लक्षणाम् ।
काञ्चनं पुरुषं तद्वत्फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदांपत्यं नानाऽऽभ(४)रणभूषितम् ।

---

(१) 'धूपाधि' क० । (२) 'क्षोदक' क० ।
(३) 'सलक्षणाम्' ग० । (४) 'मणिविभू' ग० ।

उपवेश्य तु शय्यायां मधुपर्कं ततो (१)ददेत् ॥
रजतस्य तु पात्रेण दधिदुग्धसमन्वितम् ।
*अस्थि लालाटिकं गृह्य सूक्ष्मं कृत्वा सपायसम् ॥
भोजयेद्द्विजदांपत्यं विधिरेष सनातनः ।
एष एव विधिर्दृष्टः पार्वतीयैर्द्विजोत्तमैः ॥

एतत्प्रतिग्रहे तत्रैवोक्तम्—

गृही(२)तायां तु तस्यां वै पुनः संस्कारमर्हति ।

शय्यादानफलं भविष्ये—

स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा ।
सुखं वसत्यसौ जन्तुः शय्यादानप्रभावतः ॥
आभूतसंप्लवं यावत्तिष्ठत्यातङ्कव(३)र्जितः ॥ इति ।

अथोदकुम्भः । हेमाद्रौ स्मृतिसमुच्चये—

*एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः ।
दिनेदिने प्रदातव्यो यावत्संवत्सरं सुतैः ॥

इति द्रष्टव्यम् । *अस्थीति । अयं पार्वतीयाचारोऽन्यदेशीयानां निन्द्यः । एतद्वचनानां निर्मूलत्वमिति धार्मिकाः । अन्तरितमुत्क्रान्तिधेनोर्वैतरण्याश्च दानम् एवमासनस्य ताम्रादिभाजनस्योदकुम्भस्य महिष्या गन्त्र्या हिरण्यस्य कार्पासस्य सप्तधान्यानां भुवः गोर्घृतस्य शालग्रामस्य रुद्राक्षस्य वेदपुराणस्मृत्यादिपुस्तकस्य चैवञ्जातीयस्य प्रेतकल्पोक्तस्य दानमपि अमुकस्मै इत्येकोद्देशेन क्रियमाणे बहूनां नामभिः एकादशेऽह्नि कुर्वन्ति । *एकादशाहादिति । वर्षान्तसापिण्डनपक्षे ।

प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता ।
क्षुत्तृष्णे प्रत्यहं तत्र यतो हि भृगुनन्दन ॥

---

(१) 'वदेत्' ग० । (२) 'गृहीत्वा मृतशय्यां' इति पाठः ।
(३) 'वार्जितम्' ग० ।

लौगाक्षिः—

*यस्य संवत्सरादर्वाक् सपिण्डीकरणं भवेत् ।
मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम् ॥

उत्तरार्धे—

तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजे ।

इति याज्ञवल्क्यपाठः । सपिण्डनापकर्षेऽस्यापकर्षप्राप्तेर्बाधकमिदमिति शूलपाणिः । तन्न, प्रकृतिविकाराभावेन तदन्तन्यायाविषयत्वात् । मात्स्ये—

यावदब्दं च यो दद्यादुदकुम्भं विमत्सरः ।
प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् ॥

केचित्त्रयोदशाहमारभ्याहु*स्तन्निर्मूलम् ॥ अ(१)त्र देवयाज्ञिकः-'सपिण्डनापकर्षे संवत्सरं यावदुदकुम्भं अर्वागेव दद्यात् नोर्ध्वम्'

प्रेतलोकगतस्यान्नं सोदकुम्भं प्रयच्छत ।

इति गोविन्दराजधृतविष्णूक्तेः ।

अन्नं चैव स्वशक्त्या तु संख्यां कृत्वाब्दिकावधि ।
दातव्यं ब्राह्मणे स्कन्द घटादौ निष्क्रयं तु वा ॥
अपि श्राद्धशतैर्दत्तैरुदकुम्भं विना नराः ।
तदर्थमिह दातव्यं जलान्नमभिवत्सरम् ।

इति च । द्वादशाहादौ सपिण्डनपक्षेऽपि षोडशश्राद्धापकर्षवन्नास्यापकर्षः, "श्राद्धानि षोडशादत्त्वा" इतिवद्वचनाभावात् । प्रत्युतानपकर्षमेवाह-*यस्येति । पूर्वार्द्धे च—

अर्वाक् सपिण्डीकरणं यस्य संवत्सराद्भवेत् ।

इति पाठः । *तन्निर्मूलमिति । एकादशाहात्प्रभृति कर्तव्ये उदकुम्भश्राद्धे मासिकसापिण्डनयोः प्रेतस्य अनुमासिके अन-

---

(१) 'अत्र' नास्ति क० ग० ।

दरिद्रा दुःखिनस्तात भ्र(१)मन्ति च भवार्णवे ॥
तेनापकृष्य दातव्यं प्रेतस्याप्युदकुम्भकम् ॥

इति गोभिलभाष्ये स्कान्दाच्च सपिण्डनात्प्रागेव तस्य विधानादूर्ध्वं निषेधादित्याह । तन्न, उदकुम्भे पार्वणविधिनानुपपत्तेरेवं व्याख्यायां मानाभावान्मिताक्षरादिविरोधाच्च । वचनं यदि समूलं तदा *वृद्धावपकर्षं विधत्ते,

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा ।

इति हेमाद्रौ शाट्यायनोक्तेः । 'तस्याप्यन्नं सोदकुम्भम्' इति याज्ञवल्क्यविरोधाच्च ।

मदनरत्ने गौतमः—

अदैवं पार्वणं श्राद्धं सोदकुम्भमधर्मकम् ।
कुर्या*त्प्रत्याब्दिकाच्छ्राद्धात्संकल्पविधिनाऽन्वहम् ॥

अधर्मकं *ब्रह्मचर्यादिनियमहीनम् । *एतन्मासिकवदे-

न्तरमृतस्य च ब्राह्मणायैवं उदकुम्भं दद्यात् न तु पृथगुदकुम्भश्राद्धमिति तु ध्येयम् । *वृद्धाविति । एतच्च न सपिण्डननिमित्तापकर्षविधायकं, याज्ञवल्क्यवचनाविरोधात् । किन्तु यदा कदापि सपिण्डने प्रत्यहं सोदकुम्भान्नदानाशक्तौ नैकस्मिन्नेव दिने आमेन तन्निष्क्रयेण वाऽपकृष्यापि तावत् कर्तव्यमित्येवमर्थमित्यन्ये । *प्रत्याब्दिकात् । आप्रत्याब्दिकात् । सङ्कल्पविधिश्च—

सङ्कल्पं तु यथा कुर्यान्न कुर्यात्पात्रपूरणम् ।
नावाहनाग्नौकरणे न पिण्डान् विकिरं न च ॥

इत्यादि । *ब्रह्मचर्यादीति । कर्तृभोक्त्रोरित्यादि । सपिण्डनात्प्राक् क्रियमाणस्य तस्यैकोद्दिष्टत्वात् तदुत्तरं क्रियमाणमधिकृत्याह—*एतदिति । "पार्वणं वा" इति यथाश्रुतार्थं दूषयन्ते-

---

(१) 'भवन्ति' क० ।

कोद्दिष्टं पार्वणं वा कार्यम् । *अपरार्कस्तु—

सपिण्डीकरणे वृत्ते पृथक्त्वं नोपपद्यते ।
पृथक्त्वे तु कृते पश्चात्पुनः कार्या सपिण्डना ॥ इति ।

लघुहारीतोक्तावपि—

*तस्याप्यन्नं सोदकुम्भं देयं संवत्सरं द्विजे ।

इति याज्ञवल्कीये तस्येत्येकत्वोक्तेः सपिण्डनोत्तरमप्येकोद्दिष्टमेवेत्याह । अत्र पिण्डदानं कृताकृतम्, 'अहरहरन्नम*स्मै ब्राह्मणायोदकुम्भं च दद्यात्पिण्डमप्येके निपृणन्ति' इति हेमाद्रौ पारस्करोक्तेः । श्राद्धाशक्तौ पिण्डमात्रमिति गौडाः । तन्न, अपिशब्दबाधापत्तेः । हारीतः—

मृते पितरि वै पुत्रः पिण्डमब्दं समाचरेत् ।
अन्नं कुम्भं च विप्राय *प्रेतनिर्देशधर्मतः ॥

*प्रेतशब्दोच्चारणेनेति हलायुधः । यद्वा प्रेतस्य निर्देशो यत्र तदेकोद्दिष्टं तद्धर्मकमित्यर्थः । अत्राशौचान्तदिनाद्यब्दान्तं यावद्वत्सरपूर्तेः शौचं नाधिकारिविशेषणम् । तेन मृतिदिनमारभ्यैतत्कार्यमिति केचित् । तन्न, हेमाद्रिधृतवचोविरोधात् । मध्ये आशौचादिना बाधे तु लोप एव दार्शवत् ।

वाह-*अपरार्केत्यादि । *तस्यापीति । यथाचानन्तरमृतस्यैकमृतस्यैवोद्देश्यत्वं न्याय्यमिति भावः । *अस्मा इति । एकवचनस्य विवक्षितत्वात्सपिण्डनात् प्राक् प्रेतशब्देन पश्चात्त्वनुमासिकवत् पितृशब्देन नतु प्रेतशब्देन । एवञ्च पूर्ववाक्ये पार्वणश्राद्धमिसस्य पार्वणविधिना प्रेतशब्दं विहायेति यावत् श्राद्धमित्यर्थः । अत्रोत्तरत्र चान्नमुदकं चेत्यभिधानात्सोदकुम्भादिपदेन प्रधानगुणभावविवक्षा । तेनैष उदकुम्भः इदमन्नमिति पृथगेव त्यागः । *प्रेतनिर्देशधर्मत इति । प्रेतशब्देन प्रेतोद्देश्यत्वरूपधर्मेणेत्यर्थः ।

तथा प्रथमाब्दे दीपदानमुक्तम् देवजानीये गारुडे—

प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः ।
यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया ॥
प्राङ्मुखोदङ्मुखं दीपं देवागारे द्विजालये ।
कुर्याद्याम्यमुखं पित्र्ये अद्भिः संकल्प्य सुस्थि(१)रम् ॥

अथ मासिकानि । *तानि च कृत्वैव सपिण्डनं कार्यम् । तथा च गोभिललौगाक्षी—

श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिण्डनम् ।
श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ॥

तानि त्वाह जातूकर्ण्यः—

*द्वादश प्रतिमास्यानि आद्यषाण्मासिके तथा ।
त्रैपाक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश ॥

आद्यषाण्मासिकाब्दिकशब्दाः *ऊनमासिकोनषष्ठोनाब्दिकपराः । हेमाद्रौ तु—

सपिण्डीकरणं चैव इत्येतच्छ्राद्धषोडशम् ।

*प्रेतेति । धर्मपदवैयर्थ्यापत्तिरस्वरसः । *तानिचेति अकृतनवश्राद्धादिकस्य न मासिकेष्वधिकारः,

नवश्राद्धादिश्राद्धानि न कृतानि तु यस्य वै ।
नाधिकारी भवेत्तत्र मासषाण्मासिकाब्दिके ॥

इति वचनात् । *द्वादशप्रतिमास्यानीति । मासश्च मृततिथिं गृहीत्वा चान्द्रत्रिंशत्तिथिसमुदायः । अवयवपिण्डे जाते यदि नवश्राद्धमात्रमन्तरितं करोति तदा एकादशाहे तदीयगौणकाले वा तत्कार्यम् । तत्र च नाशौचं, कर्मणो वृत्तत्वात् । अन्यथा एकादशाहे अन्तरितनवश्राद्धकरणे तत्प्रसङ्गात् । इदानीन्तनाचारसंवादिपक्षमाह—*ऊनमासिके इति । द्वादशाहे इत्यर्थः,

---

(१) 'सुस्थितम्' ग० छ० ।

इत्युत्तरार्धे पाठः। तदा आद्यमूनमासिकं द्वादशाहे, षाण्मासिके ऊनषष्ठोनाब्दिके इत्यर्थः। कात्यायनस्त्वन्यथाह—

द्वादश प्रतिमास्यानि आद्यषण्मासिके तथा।
सपिण्डीकरणं चैव इत्येतच्छ्राद्धषोडशम्॥
एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः।
न्यूनः संवत्सरश्चैव स्यातां षण्मासिके तदा॥

द्विवचनादूनषष्ठोनाब्दिके इत्यर्थमाह पृथ्वीचन्द्रः। व्यासस्त्वन्यथाह—

द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके।
श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः॥

द्वादशाहपदमूनमासिकपरं तस्य द्वादशाहेऽप्युक्तेरिति कालादर्शः। मदनरत्ने ब्राह्मे त्वन्यथोक्तम्—

नृणां तु त्यक्तदेहानां श्राद्धाः षोडश सर्वदा।
चतुर्थे पञ्चमे चैव नवमैकादशे तथा॥
ततो द्वादशभिर्मासैः श्राद्धा द्वादशसंख्यया॥ इति।

चतुर्थादीनि दिनानि। भविष्ये त्वन्यथोक्तम्—

अस्थिसंचयनं श्राद्धं त्रिपक्षे मासिकानि तु।
रिक्तयोश्च तथा तिथ्योः प्रेतश्राद्धानि षोडश॥ इति।

रिक्तयोस्तिथ्योरित्यूनषष्ठोनाब्दिकपरमिति हेमाद्रिः। अत्र देशकुलशाखाभेदाद्व्यवस्थेति सर्वनिबन्धाः। गालवः—

ऊनषाण्मासिकं षष्ठे मासे वाप्यूनमासिकम्।
त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा॥

ऊनमासिके तु गोभिलः—

मरणाद्द्वादशाहे स्यान्मास्यूने चोनमासिकम्॥

मदनरत्ने कालादर्शे च श्लोकगौतमः—

एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा।

श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः ॥
क्रियानिबन्धे क्रतुस्तु--

सार्धे एकादशे मासे सार्धे वै पञ्चमे तथा ।
ऊनाब्दमूनषण्मासं भवेतां श्राद्धकर्मणि ॥

इत्युक्तं, तत्र मूलं चिन्त्यम् ।
ऊनेषु वर्ज्यान्याह मरीचिः—

*द्विपुष्करे च नन्दासु सिनीवाल्यां भृगोर्दिने ।
चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे ॥

गालवः—

त्रिभिर्वा दिवसैरूने त्वेकेन द्वितयेन वा ।
आद्यादिषु च मासेषु कुर्यादूनाब्दिकादिकम् ॥

*एकन्यूनपक्षे पञ्चम्यां मृतस्य तृतीयायां त्रिभिर्न्यूने प्रतिपदि द्व्यूने द्वितीयायामिति केचित् । माधवस्तु—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा ॥

इति पैठीनसिवाक्ये *ऊनषाण्मासिकं सप्तममासगत

ऊने मासि द्वादशाहे वा तस्य कर्त्तव्यत्वात् । आद्यमेकादशाहिकं षण्मासे ऊने षष्ठे मासे मासिकाब्दे ऊनमासिकस्य ऊनाब्दे । मासिकैः सह द्वादशाहरूपकालो जातूकर्ण्याद्विशेषः । रिक्तत्वमेकतिथिन्यूनत्वम् । *द्विपुष्करे चेति । गार्ग्योऽपि-

नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ।
ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥ इति ।

निषेधश्च द्वित्रिदिनन्यूनपक्षे । अत्र "एकाहेन तु षण्मासाः" इत्यादिवाक्यान्तरे चोनत्वोक्तेः फलितमाह-*एकेति । मासः आद्यमृताहं गृहीत्वोत्तरमृताहपूर्वतिथिपर्यन्तात्रिंशत्तिथिसमुदायः, तथैव लोकप्रसिद्धेः । तस्यैकाहन्यूनता उपान्त्यातिथावेव, अन्त्यायां पूर्तेः । एवं त्र्यहन्यूनताप्यन्तपूर्वचतुर्थ इति । *ऊनेति ।

*मृताहात्पूर्वेद्युः कार्यम्, ऊनाब्दिकं तु द्वितीयाब्दे मृताहदिनात्पूर्वेद्युः कार्यमित्यर्थमाह । पूर्वेद्युर्मृताहादित्यर्थः, 'मासिकानि स्वकीये तु दिवसे' इत्युक्तेः । *इदमेव युक्तम् । मदनरत्नेप्येवम् । याज्ञवल्क्यः—

मृतेहनि तु कर्तव्यं प्रतिमासं तु *वत्सरम् ।

षाण्मासिकाब्दिकशब्दयोरूनषाण्मासिकोनाब्दिकपरत्वात् । *मृताहादिति । मृताहपूर्वतिथीत्यर्थः। पूर्वमतेऽस्वरसं सूचयति-*इदमेवेति । एकाहन्यूनतापक्षेऽमान्ततन्मासान्त्यतिथावेव करणम्, अन्यथा पैठीनसिवचनविरोधात् । किञ्च अन्त्यतिथ्यन्त्यक्षण एव मासपूर्तेर्यदेकातिथ्यभावप्रयुक्ता मासस्यैकाहन्यूनता तस्यां तिथाविति एकाहन्यूनता लभ्यते उपान्त्यतिथौ तु तत्करणे द्व्यहन्यूनता स्यात् । यत्तिथित्रयाभावप्रयुक्ता त्र्यहन्यूनता तन्मध्ये प्रथमतिथाविति त्रिभिर्न्यून इत्यस्येति । अत्रोक्तं मयूखे-सत्यमन्त्यतिथ्यन्तक्षण एव मासपूर्तिः । परन्तु षष्ठ्यां मृतस्य पञ्चम्यां माससमाप्तिर्न तु षण्मासा इति जातूकर्ण्येनापि एकाहेन न्यूनइत्यनेनैकाहरहितमासस्यैव ऋतुतया प्रतिपादनात् दर्शितवक्रपरिष्कारस्याप्रामाणिकत्वात् ।

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।

इति पैठीनसिवाक्ये माससमाप्तेः पूर्वेद्युरित्यर्थो नतु मृताहात् पूर्वेद्युरिति, ऊनानां मृताहकर्त्तव्यताया अप्रसक्तत्वेन तदुक्तिवैयर्थ्यात् । एवं च "एकाहेन तु षण्मासाः" इत्यादौ "एकद्वित्रिदिनैरूने" इत्यादौ "पूर्वेद्युरेव ते" इत्यादौ च अहरादिपदस्य तिथिपरत्वे प्रमाणाभावाद्यथामासिकादीनामूनैरेकाहोऽव्यवधानं भवति तथा तत्कालो ग्राह्य इति । *वत्सरमिति । यावदिति शेषः । मासे भवं मासिकमित्येव मासिकाद्यमासिकादिशब्दव्युत्पत्तिः । नचैवं समुदायान्तर्गततया किञ्चित्तिथौ तत्करणे मासिकत्वं स्यात्

अत्रा*द्यमासिकमा*द्याऽब्दिकं *चैकादशेह्नीति निर्णयामृतादयः ।

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति ॥

इति गोभिलीयं च *तद्विषयमाहुः । *अन्ये तु 'मासपक्षतिथिस्पष्टे' इत्यादि *विरोधादाऽब्दिकं *वर्षान्ते एव । मासिकं तु मासादौ । द्विरावृत्तिस्तु एकादशाहिकाद्यमासिकपरा । देवयाज्ञिकोऽप्येवमाह । लौगाक्षिरपि—

मासादौ मासिकं कार्यमाऽब्दिकं वत्सरे गते ।

ज्योतिष्टोमादेर्वसन्तकालत्ववदापरपाक्षिकत्ववच्छ्राद्धस्येति वाच्यं, प्रथमातिक्रमे कारणाभावात् "मृतेहनि तु कर्तव्यम्" इति वचनाच्च तत्तन्मासाद्यतिथावेवाद्यमासिकादेः सिद्धेः । एवञ्च मृततिथावेवाद्यमासिकस्य कर्त्तव्यत्वे प्राप्ते तदुत्कर्षमाह—*आद्यमिति । *आद्याब्दिकं चेति । वर्षे भवं वार्षिकमिति व्युत्पत्तौ प्रथमातिक्रमे कारणाभावात् प्रतिसंवत्सरं चैवमित्यत्र मृताहनि इत्यनुवृत्तेश्च मरणोत्तरमेव प्राप्तमाद्यवार्षिकमाद्यमित्यनेनोत्कृष्यते तस्याप्याद्यत्वाद्विशेषानुक्तेश्चेत्यर्थः । *एकादशेऽहनि । आशौचोत्तरदिने । *तद्विषयमिति । आद्याब्दिकाद्यमासिके महैकोद्दिष्टेन सह तन्त्रेण कार्ये इति तु मयूखे । मलमासमृतस्याद्याब्दिकं तु तत्र प्रथमदिने प्राप्तमप्येकादशेह्न्येव, दाहादिसपिण्डनान्तकर्मणो मलमासे प्रतिप्रसूतत्वात् । द्वितीयाद्यदिनकर्तव्यतया विहितं शुद्धमास एव । इदानीन्तनाचारसंवादिमतमाह—*अन्ये त्विति । *विरोधादिति । तथाभूतमासादिना मृतातिथिसाजात्यम् । तद्वत्येवोत्पन्नस्याब्दिकस्य तन्निरूपकमरणतिथौ करणे तद्विरोधः । वार्षिकत्वं तस्य दर्शयति—*वर्षान्ते इति । वर्षान्ते भवं वार्षिकं नतु वर्षे भवम्, सपिण्डनं विधाय "अत ऊर्ध्वं संवत्सरे वत्सरे प्रेता-

आद्यमेकादशे कार्यम*धिके त्वधिकं भवेत् ॥

दीपिकायां तु—'*आद्यं रुद्रमितेऽर्कसंमितदिने वा स्यात्' इत्युक्तम् । गौडास्तु मृततिथ्यवधिके एकादिनाधिके । *माससंवत्सरपदं गौणम् । *पूर्णाब्दे इति ईष-

---

यान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात्” इति गोभिलवचनात् । एवञ्च मरणतिथावप्राप्तस्य नैकादशेऽन्हि उत्कर्षः नापि एकस्यैवाब्दिकस्यैकादशेऽन्हि प्रेतदैवत्यं द्वितीयादितत्तिथौ पितृत्वप्राप्तेस्तद्दैवत्यमिति वैरूप्यम् । *अधिके इति । मलमासमृते तु मरणादेकादशेऽह्नि अधिकाद्यं कृत्वा स्वकाले ऊनं कुर्यात् । 'षष्ट्या तु दिवसैर्मासे' इत्युक्तावपि “अधिके त्वधिकं भवेत्” इति दर्शनान्मासिकेषु त्रिंशत्तिथीनामेकमासत्वात् । ततः शुद्धमासादौ द्वितीयाद्यं कृत्वा त्रैपक्षिकं ततो द्वितीयमासिकम् । एवं सति—

मलमासमृतानां तु सौरं मासं समाश्रयेत् ।

इति वचोनुगृहीतमाब्दिकं सुकरम् । द्वितीये मलमासे तु एकादशेऽह्नि आद्यमासिकं स्वकाले चोनमासिकं कृत्वा मलेऽधिकमासिकं कृत्वा त्रैपक्षिकं, ततो द्वितीयमासिकम् । एवं च यत्र षष्ठद्वादशौ मलमासौ तत्र तयोराधिकमासिकं कृत्वा तदुत्तरयोः षष्ठद्वादशमासिके तत ऊनषाण्मासिकोनाब्दिके अधिकमासस्य पूरणप्रत्ययान्तेनाव्यवहारात् । *आद्यामिति । तन्मासादिस्पृष्टाहः तेन मरणतिथेरपि संग्रहो दुर्वारः, तथाभूतेत्यनेन तद्भेदालाभात्, “आब्दिकं वत्सरे गते” इति लौगाक्षिवाक्येऽप्यगते इति च्छेदाच्च । तस्माद्वर्षभवमित्येव व्युत्पत्तिर्न तु वर्षान्तेभवमित्याशयः । *माससंवत्सरपदमिति । प्रथममासिकप्रथमसांवत्सरिकादिप्रकृतिभूतमाससंवत्सरादिपदं तादृशमासे तद्घटितवत्सरे च लाक्षणिकमित्यर्थः । द्वितीयादिमासवर्षयोस्तत्रानुपपत्तेरिति शेषः । मृततिथेर्मृततिथिं यावत्त्रिंशत्तिथ्यात्मको मास इति लक्षणेऽपि दर्शश्चान्द्र-

दसमाप्तपरत्वमिति शूलपाणिः । *तेन द्वितीयमासादावाद्यमासिकादीति तन्मौर्ख्यकृतम् ।

अशक्तौ तु हारीतः—

मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति ।
द्वादशाहेन वा भोज्या एकाहे द्वादशापि वा ॥

*ऋतुं प्रति द्वे द्वे इत्यर्थः । *यदा पितुर्मरणात्त्रयोविंशतितमे दिने *दर्शो वृद्धिर्वा स्यात्तदा *द्वादशादिनेषु द्वादशमासिकानि कार्याणीत्यर्थः । त्रैपाक्षिकं तु त्रिपक्षेऽतीते मृताहे कार्यम्,

---

दवधौ पञ्चमीतिवन्मृततिथेर्न मासान्तर्गतत्वम्, एवं त्रिपक्षशब्दोऽपि तादृशपञ्चचत्वारिंशत्तिथिरूपसार्धमासवाची । नन्वेवं द्वितीयवर्षाद्यादिने सापिण्डीकरणप्रसङ्ग इत्यत आह--*पूर्णे इति । *तेनेति । आदिना आद्याब्दिकं द्वितीयवर्षाद्यतिथौ कार्यमित्यस्य ग्रहः । अत्राद्याब्दिकस्य द्वितीयवर्षाद्यतिथौ कर्तव्यत्वेपि आद्यमासिकस्य द्वितीयमासाद्यतिथौ कथं करणं तत्राद्यमासत्वाव्यवहारात् आद्यमासो गत इति व्यवहाराच्चेत्यस्वरसः । अपर्याप्तौ प्रतिमासं श्राद्धकरणाशक्तौ ऋतुं प्रतीत्यस्यार्थमाह-*ऋतुमिति । मुख्यस्य चान्द्रस्य सौरस्य वा नेह ग्रहणम्, असम्भवात्; किन्तु मृततिथिमारभ्य त्रिंशत्तिथिरूपमासद्वयम् तथाचैकं मृताहमतिक्रम्य तदुत्तरमृताहेऽतिक्रान्तं प्राप्तकालं चेति श्राद्धद्वयं कार्यमित्यर्थः । एवं करणे क्वचित्त्रयमपि । यथा एकादशे आद्यं, स्वकाले ऊनं, द्वितीयमासिकत्रैपाक्षिकाभ्यां सह तृतीयं मासिकं, चतुर्थेन सह पञ्चमं, षष्ठोनषाण्मासिकाभ्यां सप्तमम्, अष्टमेन नवमं, दशमेनैकादशं, द्वादशेनोनाब्दिकमिति । सपिण्डनापकर्षपक्षे पक्षद्वयं द्वादशाहेन वेत्यनेनोक्तं, तत्राद्यपक्षविषयमाह-*यदेति । *दर्श इति । तत्राहिताग्नेः पितृयज्ञार्थं सपिण्डनस्यावश्यकत्वात् । *द्वादशादिनेषु

त्रैपक्षिकं भवेद्वृत्ते त्रिपक्षे तदनन्तरम् ।

इति भविष्योक्तेरिति मदनरत्ने उक्तम् । पृथ्वीचन्द्रकालादर्शनिर्णयामृतादयस्तु—

ऊनान्यूनेषु मासेषु विषमाहे समेपि वा ।
त्रैपक्षिकं त्रिपक्षे स्यान्मृताहे त्वितराणि तु ॥

इति कार्ष्णाजिनिस्मृतेः पूर्वत्र वृत्ते प्रवृत्ते इत्यर्थमाहुः । ते तदनन्तरशब्दविरोधात् त्रैपक्षिकद्वितीयमासिकयोः संकरापत्तेरेवं व्याख्यायां मानाभावाच्चोपेक्ष्याः । त्रिपक्षसपिण्डने त्वेवंशब्दाभावादधिकरणत्वमेव ज्ञेयम् । यत्तु क्रियानिबन्धे गारुडे—

त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते विषमे दिने ।
मासिकान्यपि चोनानि अष्टाविंशतिमे दिने ॥ इति,

तन्निर्मूलम् । स्मृतिरत्नावल्याम्—

द्वादशाहे यदा कुर्यात्पितुः पुत्रः सपिण्डनम् ।
एकादशेऽह्नि कुर्वीत प्रेतश्राद्धानि षोडश ॥

पैठीनसिः—

सपिण्डीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥

द्वादशमासिकानीति । मध्यवर्तीनि ऊनमासिकादीन्यपि ग्राह्याणि । ततश्चैकादशाहे आद्यं, तदुत्तरदिने ऊनं द्वितीयं च, तदुत्तरदिने त्रैपक्षिकं तृतीयं च, तदुत्तरादिनेषु चतुर्थपञ्चमषष्ठानि, तदुत्तरदिने ऊनषाण्मासिकं सप्तमं च, तत्तदुत्तरदिनेष्वष्टमनवमदशमैकादशानि, तदुत्तरदिने द्वादशमूनाब्दिकं चेति मरणदिनाद्द्वाविंशतिदिनानि गतानि । ततस्त्रयोविंशतितमे दिने सापिण्डनं कृत्वा पितृयज्ञं वृद्धिं वा कुर्यात् द्वादशाहे सापिण्डने तु एकादशाहे एकाह इत्यर्थः । तत्र तु द्वादशाहे एव मासिकान्यपि क्रियन्ते । तत्राद्यस्य

सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः ।
प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि ॥

मदनरत्ने कात्यायनः—

श्राद्धम*ग्निमतः कार्यं दाहादेकादशेऽहनि ।
ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा ॥

ध्रुवाणि त्रैपाक्षिकादूर्ध्वानि । क्रियानिबन्धे गारुडे—

*त्रिपक्षात्पूर्वतः साग्नेर्भवेत्संस्कारवासरे ।
ऊर्ध्वं मृतदिनेऽनग्नेः सर्वाण्येव मृताहनः ॥

*एतानि च *यदा सपिण्डनात्पूर्वं युगपत्कुर्यात्तदा देशकालकर्त्रैक्ये तन्त्रत्वादे*कः पाक इति केचित् । पाकभेद इति भट्टचरणाः । *अत्र केचिदाहुः—

पूर्वेऽह्नि जातत्वादूनमारभ्य पञ्चदशमासिकानि कार्याणि न षोडश । एवं यदा वृद्धिपूर्वदिनादौ सापिण्डनार्थं क्रियन्ते तदा स्वकालवाचिनौ न यदि तर्ह्यनर्थकौ तथात्वे सापिण्डनात्पूर्वं परस्ताद्वा सकृदेवानुष्ठानापत्तेः । *अग्निमत इति । आहिताग्नेरित्यर्थः ।

मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निभिः ।
दाहादूर्ध्वमशौचं स्याद्यस्य वैतानिको विधिः ॥

इति शङ्खवचनात् एकादशपदं च नवश्राद्धादेरप्युपलक्षणम् । *त्रिपक्षादिति । त्रैपक्षिकान्तं पूर्वश्राद्धं दाहवासरमारभ्य भवेदित्यर्थः ।

ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत् ।
अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः ॥

इति जातूकर्ण्यवचनात् । *एतानि चेति । षोडशश्राद्धानीति प्रकृतं । *यदेति । वृद्ध्यर्थं चोत्तराणि कुर्यादिति शेषः । *एकः पाक इति । एतच्च यावत्संनिपाति आरादुपकारकं च तस्य तन्त्रत्वार्थम् । ये तु प्रधानयोर्विप्रभोजनपिण्डदानयोरपि तन्त्रं मन्यन्ते तन्मतं दर्शयति—*अत्र केचिदाहुरिति। प्रधा-

देशकालकर्तृदैवतैक्ये तन्त्रत्वात श्राद्धकालातिक्रमापत्तेः,

*द्वादशाहेऽथ सर्वाणि संक्षेपेण समापयेत् ।
तान्येव तु पुनः कुर्यात्प्रेतशब्दं न कारयेत् ॥

इति कात्यायनोक्तेः,

नैकः श्राद्धद्वयं कुर्यात् समानेऽहनि कुत्रचित् ।

इत्यस्य दैवतैक्यपरत्वेऽप्यत्र तत्सत्वात्—

श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न कारयेत् ।

इति जाबाल्युक्तेः । *षोडशसंख्यायाश्च वाजपेये प्राजापत्ययागसप्तदशत्ववत्सान्नाय्ययागद्वित्ववच्च दर्शपातसंक्रान्तिश्राद्धवद्युगपदनुष्ठानेऽप्युपपत्तेः–'आद्यमासिकाद्यूनाब्दिकान्तेषु षोडशश्राद्धेषु क्षणः क्रियताम्' इत्येवं प्रयोगेणैको विप्रः पिण्डोऽर्घश्चेति । *विरुद्धविधिविध्वंसेऽप्येवम् । तन्मन्दम्,

द्वादशाहेन वा भोज्या*एकाहे द्वादशापि वा ।

इति हेमाद्रौ हारीतवचोविरोधात् । तेन विप्रभेदात् पिण्डाद्यर्घाद्यपि भिन्नमिति सिद्धम् ।

एतानि द्वादशाहादौ सपिण्डनात्पूर्वं कृतान्यपि वृद्धिं विनाऽपकर्षे पुनः स्वकाले कार्याणि,

---

नतन्त्रस्य वाचनिकत्वमप्याह–*द्वादशाहे इति । ननु प्रयोगैक्ये षोडशत्वव्याघात इत्यत आह–*षोडशेति । *विरुद्धविधीति । अथाहिताग्नेर्मरणदिनात् पञ्चमे मासि दाहः तदा षष्ठे मासि सपिण्डनं चेत् यानि सुकराणि तानि कृत्वा सापिण्डनप्राग्दिने सर्वाणि कृत्वा सापिण्डनं तदा तस्मात्त्रैपक्षिकान्तं कृत्वा मृताहनि सप्तममासि तृतीयमासिकादि ऊनषाण्मासिकान्तानि । तत्रैकैकं, ततः शेषमप्यपकृष्य कुर्यात्, ततः सपिण्डनमित्याद्यूह्यम् । *एकाहे द्वा-

यस्य संवत्सरादर्वाक् सपिण्डीकरणं कृतम्।
मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम्॥

इति मदनरत्नेऽङ्गिरसोक्तेः। न चेदं मासिकानामपकर्षं *विधत्ते किंतु सपिण्डनोर्ध्वं स्वकालेऽनुष्ठानमेवेति वाच्यम्,

श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सापिण्डताम्।

इति विरोधात्,

यस्य संवत्सरादर्वाग्विहिता तु सपिण्डता।
विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश॥

इति माधवीये गोभिलोक्तेश्च।

अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं कृतम्।
षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतमः॥

इति तत्रैव गालवोक्तेः। षोडशत्वं चैकादशाहसपिण्डनपक्षे तत्राद्यमासिकस्य कालसत्त्वात्,अन्यपक्षे-

---

दशेति। अयं भावः–यत्र द्रव्यगता संख्या तत्र कर्मणस्तन्त्रत्वेऽपि न बाधः यथा "सप्तदश प्राजापत्यान्" इत्यादौ। यत्र तु कर्मगता संख्या तत्र कर्मणः तन्त्रत्वेऽपि संख्यायाः पृथक्त्वसन्निवेशित्वाद्बाधः यथा षोडशश्राद्धे। एकाहे द्वादश विप्रा भोज्या इति च भोजनरूपप्रधानपृथक्त्वे पर्यवसानादिति। एकाहश्चैकादशाहः उत्तरत्राद्येस्यैकादशे कृतत्वात्तं विनैवानुष्ठानं स्यात्। तदुत्तरादिने वा,

मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा।

इति वचनात्। यदा तु तदुत्तरं वृध्यादिवशादपकर्षः प्राप्तस्तदा मृताहे एव अवशिष्टानि कर्तव्यानि एकस्यापि तावत्स्वकालानुग्रहलाभात् इतरेषामपि मृताहसामान्यकालानुग्रहात्। मृताहालाभे तु सपिण्डनादिने एव, तन्निमित्तस्यापकर्षस्य तद्दिन एव कर्तुमुचितत्वात्। *विधत्ते इति। अन्यथोदकुम्भानामप्यपकर्षः

षु यथासंभवं ज्ञेयम्। यत्तु दीपिकायाम्—'अनुमासिकानि तु चरेत्तान्येव सापिण्ड्यतः पश्चात् द्वादश' इत्युक्तेरूनानां न पुनः कृतिरित्युक्तं, तदेतद्विरोधाच्चिन्त्यम्। यत्तु गौडाः—

सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधैः।

इति शातातपोक्तेर्मासिकानां प्रेतत्वविमोक्षार्थत्वात्सपिण्डनापकर्षे तदन्तन्यायेन तेषामप्यपकर्षान्मासिकानां न पुनः कृतिः। यत्तु 'मासिकं चोदकुम्भं च' इति लौगाक्ष्यादिवचनं, तन्निर्मूलम्। समूलत्वेपि दार्शपरं चेत्याहुः। त उक्तवक्ष्यमाणवचोनिबन्धविरोधान्मूर्खा इत्युपेक्ष्याः। यत्तु मिताक्षरायां सपिण्डनोर्ध्वं स्वकाले एव कार्याणि अपकर्षस्त्वनुकल्प इत्युक्तम्, तदपि पूर्वविरोधाच्चिन्त्यम्। तेन वृद्धिं विनाऽपकर्षे पुनः *कृतिः।

अर्वाक्संवत्सराद्यस्य सपिण्डीकरणं भवेत्।
प्रेतत्वमिह तस्यापि ज्ञेयं संवत्सरं नृप॥

इत्यग्निपुराणात्। वृद्धिनिमित्तापकर्षे त्वस्त्येव तन्निवृत्तिः, अन्यथा वृद्ध्यसंभवादिति शूलपाणिः। कार्ष्णाजिनिः—

*सपिण्डीकरणादर्वागपकृष्य कृतान्यपि।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात्॥

स्यात्। *कृतिरिति। प्रेतत्वपरिहारार्थमेव तत्करणादिति भावः। अत एवापकृष्य कृतानां स्वकाले पुनः क्रियमाणानां वृद्ध्युपस्थितौ पुनरपकर्षमाह-*सपिण्डीति।

सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम्।
सांवत्सरविधानेन दद्यादित्याह शौनकः॥

इति छन्दोगपरिशिष्टं तु येषामुत्तराक्रियाऽनावश्यिका ते-

निषेधं चाह कात्यायनः—

निर्वर्त्य वृद्धितन्त्रं तु मासिकानि न तन्त्रयेत् ।
*अयातयामं मरणं न भवेत्पुनरस्य तु ॥ इति ।

द्विरनुष्ठानं चोत्तरेषामेव, न पूर्वेषां स्वस्वकालकृतानाम् । तदाह माधवीये कार्ष्णाजिनिः—

अर्वागब्दाद्यत्र यत्र सपिण्डीकरणं कृतम् ।
तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिः ॥

हेमाद्रौ शाट्यायनिः—

प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणं तथा ।
अपकृष्यापि कुर्वीत कर्तुं नान्दीमुखं द्विजः ॥

वृद्धिं विनापकर्षे दोषमाहोशनाः--

*वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् ।
स श्राद्धी नरके घोरे पितृभिः सह मज्जति ॥ इति ।

आधानेऽपकर्षमाह हेमाद्रावुशनाः--

पितुः सपिण्डीकरणं वार्षिके मृतिवासरे ।
*आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् ॥

षां पुनःकरणं निषिध्यान्येषां तत्प्रापकम् । सांवत्सरं पार्वणम् । प्रागुक्तलघुहारीतं तु अशक्त्यारोपेणानावश्यकवृद्ध्यर्थं वा अपकर्षो न कार्य इति बोधयदेव वत्सरान्तान्यसपिण्डनकालानामनुकल्पत्वव्यञ्जकं । *अयातयामं नूतनम् । वृद्धिश्राद्धोत्तरं मासिकाकरणेऽस्य मरणं न नूतनं अन्यथा तु नूतनमिति परिग्रहः । *वृद्धिश्राद्धविहीनः तदुपस्थितिविहीनः । *आधानादीति । आदिना इष्टापूर्तिपरिग्रहः । यत्तु आधानाद्यङ्गभूतनान्दीश्राद्धाधिकारसिध्यर्थमयं सपिण्डनापकर्षः नान्दीश्राद्धस्य चापूर्वाधानेऽङ्गत्वं न पुनराधाने । तस्मात्पित्रादिमरणोत्तरं प्रथमाब्दे अपूर्वाधानसोमयागादि कार्यमिति । तदसत्, एतद्वाक्यस्यापूर्वाधाने प्रवृ-

विशेषस्तूक्तो विवाहनिर्णये। कण्वः—

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत्।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते॥

गारुडेऽपि—

आपदाद्यकृतं यत्तु कुर्यादूर्ध्वं मृतेऽहनि।

अथ सपिण्डीकरणम्। माधवीये हारीतः—

या तु पूर्वममावास्या मृताहाद्दशमी भवेत्।
सपिण्डीकरणं तस्यां कुर्यादेव सुतोऽग्निमान्॥

त्तेरभावात् यथाचैतत्तथोक्तं—"पितुरब्दमशौचं स्यात्" इत्यत्र पुनराधाने च,

स्नानाधानविवाहेषु नान्दीश्राद्धं विधीयते।

इत्यविशेषेणैव पुनरुपनयनपुनर्विवाहयोरिव नान्दीश्राद्धस्याङ्गतया प्राप्तेः तत्रैवैतत्प्रवृत्तेरुपपत्तेः। इदं तु बोध्यं प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणादर्वाग् इति विध्योः "निर्वर्त्य वृद्धितन्त्रं तु" इति निषेधस्य च सामान्यरूपत्वेपि चौलोपनयनविवाहाधानेष्टापूर्तेष्वेव प्रवृत्तिः नतु गर्भाधानपुंसवनसीमन्तजातकर्मनामान्नप्राशनादिषु, दाक्षिणात्यानां तथैवाचारात्। जातकर्मादौ केषांचिदनुमासिकाद्यपकर्षाचारस्तु नादरणीयः, न्यायविरोधात्। यथा हि यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं विना क्षिपेत् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तस्मै भक्षं प्रयच्छेन्नसोममिति राजन्यवैश्यनिमित्तविहिते फलचमसे सोमाङ्गानां क्रयाभिषवादिविधीनां न प्रवृत्तिः नित्यानित्यसंयोगविरोधात्। नित्यस्य सोमधर्मस्य क्रयादेरनित्येन फलचमसेन संयोगः सर्वथा विरुद्धो नित्यक्रयादिभिर्ज्योतिष्टोमे उपकुर्यादनित्यफलचमसद्वारेति वाक्यार्थोपगमेन उपपन्न इति यावत्। तथात्रापि यतोऽनुमासिकापकर्षो मृताह एव कार्यः, एकस्यापि स्वकाललाभात्,

*मृताहादूर्ध्वं दशमी एकादशीत्यर्थः ।
सपिण्डीकरणं कुर्यात्पूर्ववच्चाग्निमान्सुतः ।
परतो (१)दशरात्राच्चेत्कुहूरब्दोपरी*तरः ॥

इतरेषामपि मृताहरूपसामान्यकालानुग्रहात् नान्यतिथौ । तथाच जातकर्मादिष्वपि । अधिकृतस्यैवापकर्षेऽधिकारो नान्यस्य । नच जननात् प्राग् जातकर्माधिकारोऽस्ति येन सोऽपकर्षे स्यात् । जन्मोत्तरं जातकर्माधिकारे च सूतकेन प्रतिबन्धात्तन्निवृत्तावेकादशाहनियमेन मृताहासम्भवान्नित्यानित्यसंयोगविरोधः जातकर्मणि नित्यमपकर्षः कार्यः स चानियतमृताहप्राप्ताविति वाक्यार्थसम्भव इति यावत् । एवं गर्भाधाने षोडशदिनावधिकऋतुकालेऽप्यनियत एव मृताहः । एवं नामकर्मणि । षष्ठे मास्यन्नप्राशनमित्यादौ प्रायशो मृताहसम्भवेऽपि यस्य मृताहो दर्शे तदुत्तरप्रतिपदि शिशोः षष्ठमासप्रवृत्तिः, तत्र मध्ये मृताहासम्भवादुत्तरे वर्षे मासस्यैव समासत्वान्न नियमेन मृताह इति न तत्रापकर्षः नापि वृद्ध्युत्तरनिषेधप्रवृत्तिः । तृतीये वर्षे चौलमिति वर्षादिविहितचौलादिषु च नियमेन मृताहसम्भवात्तत्रैवापकर्षः । एवमनियतकालेष्विष्टापूर्तादिष्वपकर्षः नियमेन मृताहसम्भवात् । ननु वर्षाधिकारेऽप्युपनयनादौ अष्टमवर्षान्त्यकाले मुहूर्तो धृतः तन्मास एव कर्तुः पित्रादेर्मृतत्वात्सपिण्डनार्थमपकृष्टानामपि मासिकानामुपनयने वृद्धिश्राद्धार्थमपकर्षे मृताहासम्भवात् पूर्वोक्तन्यायप्रवृत्तिर्दुर्वारेति चेत् ? ईदृशान्तिममुहूर्तनिश्चयस्य पुरुषापराधप्रभवत्वेन मृताहापकर्षकर्तव्यताविध्याविघातत्वात् । अतस्तत्र नवमवर्षे एवोपनयनं कार्यम् । तस्माच्चौलादिष्वेवापकर्षो न गर्भाधानादिषु । अत एव कालकाण्डहेमाद्रिप्रयोगपारिजातादिषु गर्भाधानाद्युल्लङ्घ्य चौलादिष्वेवापकर्षविधिवि-

---

(१) 'दशरात्रस्य पूर्णे त्वब्दे तथेतरे' क०

इति कार्ष्णाजिनिस्मृतेः । *आहिताग्नेस्तेन विना श्रौतपिण्डपितृयज्ञासिद्धेः । तदाह गालवः-

सपिण्डीकरणात्प्रेते पैतृकं पदमास्थिते ।
आहिताग्नेः सिनीवाल्यां (१)पितृयज्ञः प्रवर्तते ॥

मदनरत्ने प्रजापतिः-

*नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।

षयो दर्शित इति । आहिताग्नेः पुत्रस्य पित्रोः सपिण्डने कालत्रयं दर्शरूप एकादशाहः दशाहात् परं दर्शात् पूर्वं यत्किञ्चिद्दिनं द्वादशाहो वेति क्रमेण दर्शयति-*या त्वित्यादि । अत्र साग्निकपदान्याहिताग्निपराणि । तत्राग्निपदं विधुरान्याग्निपरं, विच्छिन्नाग्नेः पितृयज्ञस्याकर्तव्यत्वात् पार्वणश्राद्धस्यानावश्यकत्वाच्च । अनग्न्यादिपदान्यनाहिताग्निपराणि । *मृताहादिति । यदि तु मृताहाद्दशमी या रात्रिस्ततः परो दर्श इति व्याख्यायते तदा दशाहात् परो दर्शः कालो लभ्यते नान्यथा दर्शात्मकैकादशाहस्यानियतत्वात् । *इतरः अनाहिताग्निः । *आहिताग्नेरिति । औपासनाग्निमतस्तु दशाहान्तःपातिदर्शवत् पितृयज्ञलोपः नतु तस्य पितृयज्ञानुरोधादुक्तकाले सपिण्डनमपि । *नासपिण्डयेति ।

पापी भवत्यकुर्वन् हि पितृहा चोपजायते ।

इत्युत्तरार्धेन स्मार्ताग्निमतः पितृयज्ञाकरणे पापाभावो ध्वन्यते । तस्योक्तकालाविधानात् । यथाऽनाहिताग्नेर्विहितो "यदहर्वा वृद्धिरापद्येत" इति कालः आहिताग्नेर्न प्रवर्तते एवमाहिताग्नेर्विहितकालोऽप्यनाहिताग्नेः, आहिताग्न्यधिकारिककालनियमाबाधवदनाहिताग्न्यधिकारिकतन्नियमाबाधस्यैवौचित्यात् । अन्ये तु साग्निकेन पितृयज्ञाधिकारिणा सम्भवे आशौचोत्तरदिनमारभ्य द्वादशसु दिनेषु प्रोक्तरीत्या षोडशश्राद्धानि विधाय तदुत्तरादि-

---

(१) 'प्रेतयज्ञः' क०

अपरार्के कात्यायनः—

एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि ।
प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिण्डताम् ॥

आशौचान्तप्रथमदर्शयोर्मध्ये कस्मिंश्चिदह्नीत्यर्थः । पित्रादीनां सपत्नीकानां देवतात्वेन *मातुरपि तत्रानुप्रवेशान्मातुरपि प्राग्दर्शात्सपिण्डनं *युक्तमित्यपरार्कः ।

ने पितृपितामहप्रपितामहान्यतमस्य मात्रादीनां च सपिण्डनं कार्यम्। तदुत्तरदर्शे पितृयज्ञः दर्शात्पूर्वं तावत्कालासम्भवे "एकाहे द्वादशाथवा" इति पक्षेणाशौचोत्तरदिने तन्त्रेण षोडशश्राद्धानि विधाय तदुत्तरदिने दर्शादर्वाग् यत्र क्वापि दिने वा सपिण्डनं कृत्वा दर्शे पितृयज्ञः "एकादशाहान्तं निर्वर्त्य" इति वाक्यात् । द्वादशादिन एव दर्शपाते तत्रैव सपिण्डनं पितृयज्ञश्च । एकादशाहे तत्पाते तु तत्रैव षोडशश्राद्धानि सपिण्डनं पितृयज्ञश्च । "सपिण्डीकरणं कुर्यात्" इत्यत्र दशरात्रस्य परतः पूर्वे दर्शे इत्यन्वयेन "या तु पूर्वममावास्या" इत्यत्र मृताहावधिकदशमीत्वोक्त्या चाशौचान्त्यदिनानन्तरभाविदर्शविषयत्वात् । सपिण्डनं कृत्वा पितृयज्ञस्तु दुष्करः तथाचोक्तं "नासपिण्ड्याग्निमान्" इत्यादीनि वदन्ति। *मातुरपीति । पितामह्यादेरुपलक्षणमनुप्रवेशादिति ।

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।

इति वचनात् । *युक्तमिति । मातापित्रोरिति स्पष्टमुक्तमित्यर्थः । नचैवं श्राद्ध इव पिण्डपितृयज्ञेऽपि सपत्नीकत्वेन पित्रादिनिर्देशापत्तिः तं विनाप्यसम्भावित्वोपपत्तेः मातुर्मातामहेन सपिण्डने तत्पिण्ड इव एकमूर्तित्वमायातीतिवचनात् अन्यथा मातामहांशभागित्वार्थं तस्यापि सदुहितृकत्वेन निर्देशापत्तेः । अत्र सुतः पुत्रः मातापित्रोरितिपदवशात्साग्निकः पुत्र एव । अनग्निकोऽपि स एव तत्प्रतियोगित्वादिति मतं निराकर्तुमाह—

*एवं पितामहादेरपि सपिण्डनं प्राग्दर्शात्कार्यम् । *तेन विना *पार्वणायोगात् । द्वादशाहे वा कार्यम् ।

साग्निकस्तु यदा कर्ता प्रेतश्चानग्निमान्भवेत् ।
द्वादशाहे भवेत्कार्यं सापिण्डीकरणं सुतैः ॥

इति गोभिलोक्तेः । साग्नेः प्रेतस्य तु त्रिपक्षे,

प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत् ।
सापिण्डीकरणं तस्य कुर्यात्पक्षे तृतीयके ॥

इति सुमन्तूक्तेः । मदनरत्ने लघुहारीतोपि–

अनग्निस्तु यदा वीर भवेत्कुर्यात्तदा गृही ।
प्रेतश्चेदाग्निमांस्तु स्यात्त्रिपक्षे वै सापिण्डनम् ॥

---

*एवमिति । पिण्डपितृयज्ञार्थं साग्निकस्य कर्तुः साग्नेर्निरग्नेर्वा प्रेतस्य सपिण्डने द्वादशाहादित्रिधिषु पितृग्रहणं पितामहप्रपितामहयोर्मातृग्रहणं पितामहीप्रपितामह्योश्चोपलक्षणं पुत्रग्रहणं च पौत्रप्रपौत्रयोः । अन्यथा तद्देवताकपितृयज्ञानिर्वाहात् । निरग्नेस्तु कर्तुः साग्निकस्य निरग्निकस्य वा प्रेतस्य त्रिपक्षद्वादशाहादिविधिषु पितृपुत्रग्रहणं नोपलक्षणं मानाभावादित्यर्थः । हेत्वन्तरमाह–*तेनेति । *पार्वणेति । मृतपितृकस्य साग्निकस्य पितृयज्ञवद्दर्शश्राद्धमप्यावश्यकम्,

नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् ॥

इति प्रजापतिनाऽऽवश्यकाभ्युदयसाहचर्येण पार्वणोक्तेः त्रिपक्षे वै इति अधिकरणसप्तमीवशात्तृतीयपक्षः स कालः न तु तत्पूर्त्यनन्तरा मृतसजातीया तिथिः, तस्यास्तर्हि भूतत्वात् । एवं त्रिमासषण्मासादावपि । प्रेतश्राद्धनिषिद्धतिथिनक्षत्रादिकं तु तत्र त्याज्यम् । वैशब्दादाहिताग्नेस्त्रिपक्ष एवेति नियमः । न त्वस्यैव त्रिपक्ष इति अग्रिमभविष्यविरोधात् । विरुद्धनियमोपगमे

द्वयोः साग्निकत्वे द्वादशाह एव,

साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान्भवेत् ।
द्वादशाहे तदा कार्यं सापिण्डीकरणं *पितुः ॥

इति तेनैवोक्तेः । द्वयोरनग्निमत्वे तु भविष्ये—

सापिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ।
अनाहिताग्नेः प्रेतस्य *पूर्णेऽब्दे भरतर्षभ ॥

त्रिपक्षेऽकृतसापिण्डनस्य नैव सापिण्डनं स्यादिति चेत् ? न, नियमेन एकादशाहद्वादशाहयोः पूर्वकालयोरेव निवृत्तिर्नतूत्तरभाविनां तृतीयमासादीनां, द्वादशाहादिकालेष्विति गोभिलवाक्यात् ।

स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः ।

इति मण्डनोक्तेश्च । अत्र विच्छिनाग्नेस्त्रिपक्ष एवात्मन्यग्निसत्त्वेन साग्नित्वात् । यत्र च दम्पत्योरन्यतरस्य पूर्वं मरणेनाग्नयो गतास्तत्रेतरस्य कालान्तरे मरणे साग्नित्वाभावान्न त्रिपक्षानियमः । उत्सृष्टाग्नेरप्येवम् । *पितुरिति । पितुरित्युक्तेः पित्रादिभिन्नस्य साग्निकस्यापि कर्तुर्न द्वादशाहनियमः । नच पितुरित्यविवक्षितम् , उभयोः साग्निकस्यापि कर्तृत्वापत्तेः । एवं साग्निकायाः पत्न्याः पुत्राभावात् पत्या सापिण्डने न द्वादशाहनियमः पुत्रग्रहणात् साग्निपदस्य विद्यमानाग्निपरत्वाच्च । नापि तस्या अनग्निककर्तृके साग्नेः सपिण्डने त्रिपक्षविधानात्त्रिपक्षानियमः,

प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत् ।

इत्यत्राहिताग्निपदवशादनग्निनाऽनाहिताग्नेरेव ग्रहणात् । एवं साग्निकः पतिः पत्न्याः सपिण्डनं करोति तत्र न द्वादशाहत्रिपक्षयोर्नियमः । *पूर्णेऽब्दे इति । अतीते इत्यनेन व्यक्तम् । तत्राशक्तावेकादशो मासः, तत्राप्यशक्तौ नवमः, तत्राप्यशक्तौ आशौचान्त्यदिनोत्तरं दिनमारभ्य द्वादशसु अहःसु षोडशश्राद्धानि कृत्वा त्रयोदशोन्हि, तत्राप्यशक्तौ एकादशाहे द्वादशाहेऽप्येव वा

द्वादशेऽहनि षण्मासे त्रिपक्षे वा त्रिमासि वा ।
एकादशेऽपि वा मासि *मङ्गलस्याप्युपस्थितौ ॥

तानि कृत्वा मृतिदिनाद् द्वादशाहे इत्यर्थः षाण्मासादित्रिके पूरणप्रत्ययार्थविवक्षया षष्ठमासादावित्यर्थः । तेषां च षष्ठमासादीनां समस्तानामेवाङ्गत्वमधिकरणत्वात् । नतु तदुत्तरातिथेः 'पूर्णे' इत्यस्मरणात् । संवत्सरान्वयित्वेन श्रुतस्यानुषङ्गे प्रमाणाभावात्—"मासं दर्शपूर्णमासाभ्याम्" इत्यादिषु "उपसद्भिश्चरित्वा" इत्यस्यैव । तेन षष्ठमासादिगते इति हेमाद्रिः प्रत्युक्तः । नतु आहिताग्नेः प्रेतस्याहिताग्निश्चेत् कर्ता तदा द्वादशाहनियमात् अनाहिताग्निश्चेत्कर्ता तदा त्रिपक्षनियमादेतौ कालौ अनाहिताग्नौ प्रेते अनाहिताग्नेः कर्तुः कथं स्याताम् ? नहि तयोरयमेव कालो नान्य इत्येवनियमो नान्यादृश इति मन्तव्यम् । "वसन्ते ब्राह्मणोग्निमादधीत" इत्यादिषु एकवाक्योपादानाद्ब्राह्मणादयो वसन्तादिष्वेव वसन्तादिषु ब्राह्मणादय एवेति द्वयोरपि कर्तृकालयोर्मिथोनियमद्वयस्य दुर्वारत्वात् । मैवं, तत्र कर्तृकालविशेषयोरेककर्म्यादरुणैकहायनीवद्युक्तो मिथोनियमः । इह तु सापिण्डनस्य वाक्यान्तरेण विधानेनाविधेयत्वात्क्रियानुवादेन गुणद्वयविधेरसम्भवात्, यदा चेत्यादिशब्दैः कर्तृप्रेतसाग्निकत्वादेर्निमित्तत्वेन स्पष्टमुपादानाच्च तयोः स एव कालो नान्य इत्येक एव नियमः । अत एवाऽऽनन्त्यात्कुलधर्माणामिति व्याघ्रवचनमपि साग्निप्रेतकानग्नौ कर्तरि न प्रवर्तते । एवं हेमाद्रिमाधवादिसकलनवीनप्राचीनधार्मिकसंमते साग्नौ प्रेते अनग्नौ कर्तरि त्रिपक्ष एवेति नियमे स्थिते, ये—

आहिताग्निः पिता चाथ पुत्रश्चानाग्निमान् भवेत् ।
त्रिपक्षादौ द्वादशेऽह्नि त्रयोदशादिनेऽथवा ॥
सापिण्डीकरणं तस्य कुर्यादिति पितामहः ॥

कात्यायनगोभिलौ—'यदहर्वा वृद्धिरापद्येत' इति । तच्च वृद्धिदिन एवेति वाचस्पतिः । तन्न, 'प्रातर्वृद्धिनिमित्तकम्' इति नियमात्सापिण्डनस्य चा*पराह्णकालीनत्वेन पूर्वत्वबाधापत्तेः । *वृद्धिदिने तत्पूर्वदिने वेति श्रीदत्तः । *स्मार्तगौडस्तु 'वृद्धिपूर्वो वर्षान्त्यश्च क्षणः सापिण्डनस्य प्रेतत्वनाशे सहकारी । तेन परेद्युर्विघ्नाद्वृद्ध्यभा-

---

इति पद्यं वृद्धगार्ग्यनाम्ना—

उभयोः साग्निकत्वेऽपि निरग्नित्वेऽपि वै सुतः ।
पितुः सापिण्डनं कुर्याद् द्वादशेऽह्न्येव नित्यशः ॥

इति पद्यमाङ्गिरोनाम्ना—

कर्ताऽनग्निर्यदा प्रेतः साग्निकस्तु भवेत्तदा ।
त्रिपक्षादौ च सापिण्ड्यं द्वादशेऽह्न्यथवा भवेत् ॥

इति पद्यं लघुहारीतनाम्ना च मुक्तकण्ठाः पठन्ति तत्र "यवमयश्चरुर्भवति" इत्यादौ यथा दीर्घशूकेषु यवशब्दप्रसिद्धिरार्याणां कंगौ तत्प्रसिद्धिर्म्लेच्छानाम् । अतो म्लेच्छप्रसिद्धिं विहायार्यप्रसिद्धेरुपग्रह आर्यम्लेच्छन्याये दर्शितस्तथा त्रिपक्षादिरेवानाहिताग्नौ कर्तरि साग्नेः प्रेतस्य सपिण्डीकरणकालः हेमाद्रिमाधवप्रभृतिसमस्तानामार्याणां संमतः द्वादशाहस्तु तदितरेषामिति इतरमतं कालं विहायार्यमतः काल एवोपादेयः । किञ्च प्रेतत्वनिवृत्तिसहितापितृत्वप्राप्तिमुद्दिश्य सपिण्डनं विहितं, तच्च कथं धार्मिकाननुमते द्वादशाहे तस्य तत्कर्तृकसपिण्डनाद् वृथा चेष्टारुपालभ्येत, तत्र तथाचेष्टां कुर्वन् वा पितृद्रोग्धा न स्यादिति ? वृद्धिनिमित्तं सपिण्डनापकर्षमाह—*मङ्गलस्यापीति । *अपराण्हकालीनत्वेनेति । मध्याह्नकालीनत्वेन वेति शेषः । *वृद्धिदिने इति । यत्र नान्दीश्राद्धमपराण्हे तत्र वृद्धिदिने, यत्र तत्र प्रातस्तत्र पूर्वदिने इत्यर्थः । वृद्धिपूर्वदिनस्य सापिण्डनकालत्वं दूषयतां मतमाह—*स्मार्तगौड-

वेऽपि 'तत्कर्तव्यतानिश्चयसहितमेव कालान्तरक्रियमाणवृद्धिपूर्वक्षणसहकृतं प्रेतत्वनाशकम्' इत्याह । तन्न, *अकाले कृतस्य फलाजनकत्वात् । एतेन निमित्तनिश्चयवत एवाधिकाराद्वृद्ध्यभावेऽपि न क्षतिरिति मिश्रोक्तिः परास्ता । वृद्धिपूर्वदिनस्य *वर्षान्तस्य च कालस्याङ्गत्वेन निमित्तत्वाभावात् । तेन पुनः कार्यमित्यन्ये ।

मदनरत्ने पुलस्त्यः—

निराग्निकः सापिण्डत्वं पितु*र्मातुश्च धर्मतः ।
पूर्णे संवत्सरे कुर्याद्वृद्धिर्वा यदहर्भवेत् ॥

चतुर्विंशतिमते—

सापिण्डीकरणं चाब्दे संपूर्णेऽभ्युदयेपि वा ।
द्वादशाहे *तु केषांचिन्मतं चैकादशे तथा ॥

हित्वाति । *अकाले इति । मासानन्तरं वृद्धिः कर्तव्येति निश्चयवतोऽप्यधिकारापातादिति भावः । *वर्षान्तस्येति मृताहस्य वर्षान्तस्य पक्षेण स्मृत्यर्थसारमतेन च । वस्तुतस्तु आपद्येतेति गोभिलस्य सन्निधीयेतेत्यर्थाद् वृद्धिसन्निहिते दिने इत्यर्थः ॥

पितुः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम् ।
वृद्धिरागामिनी चेत्स्यात्तदाऽर्वागपि कारयेत् ॥

इति नागरखण्डात् । सन्निहितादिनं च पूर्वं तत्रासम्भवे तत्पूर्वादिकम् । सम्भवति च मृताहे मासिकानि कृत्वा सपिण्डनं ततो वृद्धिरिति । *मातुश्चेति । चकारो मातामहादिसङ्ग्रहार्थः अतो वृद्धिनिमित्तकः सपिण्डनापकर्षो वृद्धिश्राद्धार्थः, सपिण्डनं विना पितृत्वप्राप्त्यभावेन श्राद्धस्यैव दुष्करत्वात् । *तु केषांचिदिति । द्वयोर्निरग्निकयोरेकादशाहोपि सपिण्डीकरणकाल इत्यर्थः। न चायं दर्शात्मक एकादशाहः पिण्डपितृयज्ञाधिकारिकसाग्निककर्तृविषय एवास्तीति वाच्यं, वर्षान्तरूपसपिण्डनकालान्तरानुरो-

पृथ्वीचन्द्रोदये बौधायनः—*‘अथ सपिण्डीकरणं, त्रिपक्षे वा तृतीये वा मासि, षष्ठे वैकादशे वा द्वादशे वा द्वादशाहे वैकादशाहे वा’ इति । एतत्प्रक्रमे विष्णुः—‘मासिकार्थं द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यात् । मन्त्रवर्ज्यं हि शूद्राणाम् । द्वादशेऽह्नि संवत्सराभ्यन्तरे यद्यधिमासो भवेत्तदा मासिकार्थं दिनमेकं वर्धयेत्’ इति । आशौचोत्तरं द्वादशस्वहस्सु मासिकानि । तेष्वेवाद्यषष्ठद्वादशादिनेषून*मासिकादीनि कृत्वा त्रयोदशेऽह्नि सपिण्डनं कुर्यात् । अधिमासे तु चतुर्दशेऽह्नि कुर्यात् । *शूद्रस्त्रयोदशे “द्वादशेऽह्नि’ इत्यस्य मासिकान्त्यदिनपरत्वादिति पृथ्वीचन्द्रः । पैठीनसिः—‘संवत्सरान्ते सपि(१)ण्डनं नवमे मासीत्येके ।’ अत्र*साग्नेरनग्नेर्वोक्तकालाभावे त्रिपक्षादिसंवत्सरान्ता अनुकल्पा ज्ञेयाः । कल्पतरुस्त्वग्रे वृद्धिनिश्चय एव सर्वेऽपकर्षप्रकारा इत्याह । तन्न, ‘यदहर्वा’ इति स्वातन्त्र्यश्रुतेः । यद्यपि

धेनैतद्वाक्यस्य द्वयोरनाग्निविषयत्वात् । एकादशाहद्वादशाहशब्दौ तु आशौचान्त्यदिनोत्तरादिनतदुत्तरदिनपराविति स्मर्तव्यम् ।

*अथ सपिण्डीकरणमिति । द्वादशेवेत्यत्रातीते इति शेषः । अथ संवत्सरे पूर्णे सपिण्डीकरणमिति पाठे द्वादशे वेति न पाठः, मयूखादौ तदलेखात् । मासिकानामर्थः प्रयोजन प्रेतत्वानिवृत्तिस्तद्वत् ।*ऊनमासिकादीति । आदिना त्रैपक्षिकोनषष्ठोनाब्दपरिग्रहः । श्राद्धशब्दस्य षोडशश्राद्धपरत्वात् । *शूद्र इति । अधिमासे इति वर्तते । अयमर्थः—द्विजातीनामाशौचापगमोत्तरं त्रयोदशे अधिमासपाते चतुर्दशेऽह्नि अपकर्षं विधाय शूद्राणां न तत्राह्नि किन्तु द्वादशादिन एव आधिकपाते त्रयोदशादिन एव तत्र कर्त-

---

(१) ‘संसर्जनं’ ग० ।

वृद्धिनिमित्तोपकर्षो निरग्नेरेवोक्तस्तथापि साग्नावपि ज्ञेयः। उक्तकालासंभवे वर्षान्तादिगौणकालवद्वृद्धेरपि प्राप्तेः, वक्ष्यमाणगोभिलवचनात्;

अयातयामं मरणं न भवेत्पुनरस्य तु।

इति दोषश्रुत्यविशेषाच्च । अपरार्कपृथ्वीचन्द्रादिस्वरसोऽप्येवम्। अत्र वृद्धिपदं चूडोपनयनविवाहमात्रपरम्। सीमन्तादौ तु वृद्धिश्राद्धलोप एवेत्याचार्यचूडामणिः। पुंसवनाद्यन्नप्राशनान्तेष्वावश्यकेष्वपकर्ष इति श्राद्धविवेकः। स्मृ(१)तिसागरेपि बृहस्पतिः—

प्रत्यवायो भवेद्यस्मिन्नकृते वृद्धिकर्मणि।
तन्निमित्तं समाकृष्य पित्रोः कुर्यात्सपिण्डनम्॥

गर्भाधानस्य ऋत्वन्तरेऽपि संभवात्।

अन्यश्राद्धं परान्नं च गन्धमाल्यं च मैथुनम्।

इति देवलेन प्रथमाब्दे मैथुननिषेधाच्च न तत्रापकर्ष इति श्राद्धकौमुद्यादयः। तन्न, 'ऋतुस्नातां तु यो भार्याम्' इति निषेधात्, 'ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्' इति मैथुने दोषाभावाच्च। पितामहमरणे पौत्रस्य वृद्धौ नापकर्षः तस्य *महागुरुत्वाभावात्। तत्र तदूर्ध्वेभ्यो वृद्धिश्राद्धमिति श्राद्धचन्द्रिका। तन्न, 'भ्राता

व्यं मासिकं कृत्वा सपिण्डनापकर्षः कार्यः। मासिकार्थवदिति पूर्वभागैकवाक्यत्वादिति। *साग्नेरिति। साग्नेर्द्विविधस्यापि कर्तुर्द्वादशाहः निरग्नेस्तु साग्निप्रेतस्य त्रिपक्षः निराग्निप्रेतस्याब्दान्तः वृद्ध्युपस्थितिमांश्च कालो मुख्यः, तदभावे इत्यर्थः। अत्रेत्यादिपतत्रये वक्ष्यमाणदाक्षिणात्याचाराविरोधोऽस्वरसः। *महेति।

महागुरौ प्रेतभूते वृद्धिकर्म न चाचरेत्।

---

(१) 'श्रुतिसागरे ग०।

च' इत्यादौ तदभावेऽप्यपकर्षोक्तेः । तेन *निर्देशोऽप्युपलक्षणम् ।

व्याघ्रः—

*आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते ॥

*एतदाशौचान्तोपलक्षणम्--

इति निषेधात् । *निर्देशः महागुरोः ।

*आनन्त्यादिति कुलधर्माणां सपिण्डीकरणाभावेऽनुष्ठातुमशक्यानां तृतीयपञ्चमवर्षादौ चूडाकरणादीनां प्रतिकुलं व्यवस्थितानां मङ्गल्यानां च । एतेन सपिण्डनाधिकारिणा तदनुष्ठानं यावद् वृद्धिश्राद्धानङ्गकमपि कुलाचारादिप्राप्तं मङ्गल्यं कर्म न कर्तव्यमिति ध्वन्यते । शरीरस्यास्थितिः परचक्राक्रमणादिनिमित्तकपलायनादिना सपिण्डनसामग्रीमद्देशानवस्थानं रोगादिना कर्मकरणसामर्थ्यरूपस्थित्यभावो वा । एतच्च वचनमायुःक्षयादिसम्भावनानिमित्तं सपिण्डनापकर्षं विदधन्निरग्न्युभयमात्रविषयं, साग्निककर्तृसपिण्डनापकर्षस्य पितृयज्ञादिनिमित्तत्वात् । एवं सति द्वादशाहस्य प्रशस्तत्वं भवति । संवत्सरान्त एव वस्तुतोऽनुष्ठेयस्य सपिण्डनस्योक्तत्रयान्यतमसम्भावनयाऽर्वाक्त्रिपक्षादावप्यनुष्ठानं चेदनन्तरद्वादशाहे एव तदस्थितिः । एतच्च द्वयोर्निरग्निप्रकरणस्थमिति स्वयमवोपनिबद्धमयुक्तं चान्यत्र । साग्निककर्तृकसपिण्डने द्वादशाहेतरकालस्य गौणतया तदभावे स्वत एव प्रशस्ते द्वादशाहे तद्बोधानुपयोगात् । साग्निप्रेतमात्रे द्वादशाहस्य विधातुमनीशतया तद्बोधे बाधाच्च । केचित्तु एतद्यत्र द्वादशाहः प्राप्तः तत्र तस्य प्राशस्त्यबोधकम् । तथाच प्रेतमात्रस्य साग्नित्वे तस्याप्राप्तत्वान्न द्वादशाहः किन्तु त्रिपक्ष एवेत्याहुः । द्वादशं च तदहश्चेति विग्रहः ततः मृतिदिनाद्

सर्वेषामेव वर्णानामाशौचान्ते सपिण्डनम् ।

इति निर्णयामृते कात्यायनोक्तेः । सर्वेषामिति त्रैवर्णिकपरम् । शूद्राणां त्वाशौचमध्ये,—

मन्त्रवर्ज्जं हि शूद्राणां द्वादशेऽहनि कीर्तितम् ।

इति विष्णूक्तेः । एतद्दर्शश्राद्धकारिशूद्रविषयमित्यपरार्के कल्पतरौ च । वृद्धमनुः—

*द्वादशेऽहनि विप्राणामाशौचान्ते तु भूभुजाम् ।
वैश्यानां तु त्रिपक्षादावथ वा स्यात्सापिण्डनम् ॥

निर्णयामृते गोभिलः—

द्वादशाहादिकालेषु प्रमादादननुष्ठितम् ।
सपिण्डकिरणं कुर्यात्कालेषूत्तरभाविषु ।

इदं *साग्नेरुक्तकालासम्भवे गौणकालविधानार्थमिति मदनपारिजातः । मदनरत्नेऽप्येवम् । ऋष्यशृङ्गः—

*सपिण्डीकरणं श्राद्धं*मुक्तकाले न चेत्कृतम् ।
रौद्रे हस्ते च रोहिण्यां मैत्रभे वा समाचरेत् ।

द्वादशे त्वस्य विप्रमात्रपरत्वं स्यादत आह—*एतद्दिति । दशमपिण्डदानस्याजातत्वादिति । सच्छूद्रस्य दशाहाशौचस्य ज्ञापितत्वात् । ततश्च तस्य दर्शश्राद्धार्थतया साग्निकविप्रवद्यं सापिण्डनापकर्षः । अत्र मासाद्याशौचिशूद्राणामपि द्वादशाहे सपिण्डने कथं विरोधः ? प्रेतत्वानिवृत्तेः सत्त्वात् । दशमपिण्डानन्तर्यस्य वचनवशेन त्यागादिसस्वरसः । दर्शितनिष्कर्षमालोच्य त्रैवार्णिककालं व्यवस्थाप्याह—*द्वादशेऽहनीति । *साग्नेरिति । साग्निमेतमात्रस्येत्यपि द्रष्टव्यम् । तेन द्वयोरनग्नित्वे वचनवैयर्थ्यं न शङ्क्यम् । साग्निनिराग्निसाधारण्येन संवत्सरान्तेऽपि यदि सपिण्डनं जातं तदा कथमित्यत्राह—*सपिण्डीति । *उक्तकाले वत्सरान्ते । प्रोक्ताः सपिण्डनकाला लाघवात्तदधिकारा अन्यैर-

कालादर्शेऽपि—

*एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा।
षष्ठे चैकादशे वाऽब्दे संपूर्णे वा शुभागमे॥
सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्तिताः।
साग्नौ कर्तर्युभावाद्यौ प्रेते साग्नौ तृतीयकः॥
अनग्नेस्तु *द्वितीयाद्याः सप्त काला मुनीरिताः।
*रोहिणीरौद्रहस्तेषु मैत्रभे वापि तच्चरेत्॥

नारदसंहितायां तु—

सपिण्डीकरणं कार्यं वत्सरे वा*र्धवत्सरे।
त्रिमासे वा त्रिपक्षे वा*मासि वा द्वादशेऽह्नि वा॥

इत्युक्तं, *तच्च वत्सरेऽतीते ज्ञेयम्,

ततः सपिण्डीकरणं वत्सरात्परतः स्थितम्।

ऽपि संगृहीता इत्याह-*एकादशे इति। *द्वितीयाद्या इति। एकादशाहं नवममासं च कालं कालादर्शकृतो न लिखन्ति। *रोहिणीति नक्षत्रम्। सपिण्डनं यावद्वार्षिकपार्वणानुष्ठातॄणामपि वार्षिकमेकोद्दिष्टं श्राद्धं पितृत्वप्राप्त्यभावात्। *अर्धवत्सरे इत्यधिकरणसप्तमी। *मासि वेति। मृताहात्त्रयोविंशतितमे दिनेऽधिकपाते विंशतितमे दिने इति पक्षे। ननु प्राक् पूर्णेऽब्दे इत्यत्र न सतिसप्तमी कारकसप्तम्या बलीयस्या बाधात्। नच पूर्णत्वं न पूर्तिक्षणस्य सपिण्डनाधारत्वासम्भवादिति वाच्यं, लक्षणया पूर्तितिथिपरत्वसम्भवात्। अत एवात्र वत्सरस्यैवाधिकरणत्वमुक्तमित्यत्राह—*तच्च वत्सरेऽतीते इति। शूलपाण्यादयस्तु आद्यमृताहावधिकषष्ठ्यधिकशतत्रयतिथ्यात्मकः संवत्सरः, तदन्त्यमृताहे सपिण्डनम् "ततः संवत्सरे पूर्णे" "समाप्ते संवत्सरे" इत्यादिष्वधिकरणसप्तमी। पूर्तिसमाप्ती च नान्त्यकलारूपे तत्र श्राद्धासम्भवात्, किन्त्वन्त्यदिनरूपे--

इति भविष्योक्तेः,

पितुः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम् ।

इति नागरखण्डोक्तेः ।

पितुः सपिण्डीकरणं वार्षिके मृतिवासरे ॥

इत्युशनसोक्तेश्च ।

*पूर्णे संवत्सरे पिण्डः षोडशः परिकीर्तितः ।
तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥

इति हेमाद्रौ वचनाच्च । अस्यामाकरत्वोक्ति*र्मूर्खोक्तिरेव । यत्तु—

पूर्णे संवत्सरे कुर्यात् सपिण्डीकरणं सुतः ।
*एकोद्दिष्टं च तत्रैव (१)मृतेऽहनि समापयेत् ॥

सम्पूर्णे तु ततो मासे पिण्डशेषं समापयेत् ।
शूद्रस्य दशमः पिण्डो मासे पूर्णेऽन्हि दीयते ॥

इत्यादिवत् । यद्वा, संवत्सरपदमेकादिनाधिकवत्सरपरम् । "संवत्सरान्ते प्रेताय" इत्यादिवैष्णवेऽधिकैकादिनकवर्षस्यान्तो मृताह इत्यर्थ इति । तत्र वस्तुतः सपिण्डनकालस्याभेदेऽपि मृताहं गृहीत्वैव वत्सरो निर्वाच्यः । तथा सति 'वत्सरात् परतः' इत्यादिप्रागुक्तसङ्गतिः । अत एव नैकदिनांतभावेनार्थ इत्यभिप्रायः । पूर्णशब्दसहिताब्दादिपदात् वचनवशाद् वत्सरोत्तरदिनमेव ग्राह्यमितिस्थितेऽपि पूर्णसंवत्सरपदस्य तत् लक्षकत्वे स्फुटं वचनमप्याह—*पूर्ण इति । सपिण्डनाब्दिकयोरेकादिनकर्तव्यत्वोक्तेस्तल्लाभः । तत्र सतिसप्तमीप्रकृतेर्लक्षणयाऽधिकरणसप्तमी उत्तरादिने इति शेषो वा वाच्यः । स एव "संवत्सरान्ते प्रेताय" इत्यादावप्यालम्ब्यः । *मूर्खोक्ति । तथाच सपिण्डनमात्रेणैवाब्दिकनिर्वाह इति ग्रन्थकृत्सम्मतोऽर्थः । *एकोद्दिष्टम मासिकम् ।

---

(१) 'मृताहनि' ग० छ०

इति धवलनिबन्धे जाबाल्युक्तेः

पुत्रः सपिण्डनं कृत्वा कुर्यात्स्नानं सचैलकम् ।
एकोद्दिष्टं ततः कुर्यात् कुतपं न विचारयेत् ॥

अत्र वदन्ति सपिण्डीकरणं कृत्वा प्रथमसांवत्सरिकमनुष्ठेयम् । यतः हेमाद्रिवचने षोडशेत्यस्य कोऽर्थः । न तावद् द्वादशमासिकम्, तेन सपिण्डनादिकार्यानिर्वाहात् । नापि सपिण्डीकरणं पितृत्वापन्नतृप्तिरूपस्याब्दिककार्यस्य तेनासम्भवात् । किन्तु ऊनाब्दिकपिण्डः,

पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्तितम् ।

इति पाठात् । तेनैवेत्यस्य च—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।

इत्यत्र मृताहात् पूर्वेद्युरित्यर्थे तदनन्तरं मृताहे नेति फलितार्थः । अर्थान्तरे तु तेनैव संदृब्धमिति पूरणेन तदधिकरणदिनोत्तरमृताहे नेत्यर्थः । अथ संदृब्धार्थकसांवत्सरिकं दुष्करं यतः मुख्यकालः सपिण्डनेनावरुद्धः । नच गौणकालः सम्भवति श्राद्धशेषभोजनरूपोतराङ्गं विना सपिण्डीकरणप्रयोगासमाप्तेः । न च—

एकोद्दिष्टस्य शेषं तु ब्राह्मणेभ्यः समुत्सृजेत् ।
ततः स्वयं तु भुञ्जीत पुनर्मङ्गलभोजनम् ॥

इति मते श्राद्धभोजनमिति प्रेतश्राद्धशेषभोजनमिति प्रेतश्राद्धशेषभोजनं निषिद्धमेवेति वाच्यम्, पार्वणैकोद्दिष्टयोः पाकस्य भिन्नत्वादेकोद्दिष्टांशशेषस्याभोजनेऽपि पार्वणांशशेषभोजनस्यावश्यकत्वात् । वृद्धिमद्दिनसपिण्डने त्वगत्या शेषभोजनलोपे नैव तत्समाप्तिः—

मलमासेऽपि कर्तव्यमाब्दिकं प्रथमं सुतैः ।

इत्याब्दिकं तु द्वादशाहात्तु सपिण्डनपक्ष एवेति चेत् ? नैवम्, विसर्जनेन समाप्ते श्राद्धप्रयोगे पश्चादनियमेन प्राप्तस्य भोजनस्य नियमः श्राद्धशेषप्रतिपत्त्यर्थः । तद्दिनरात्रिगतब्रह्मचर्यादिनियम-

इति स्वल्पमात्स्योक्तेश्चाब्दिकं तद्दिने पुनः कार्यमिति केचित् । ते निर्मूलत्वाद्धेमाद्रिविरोधाच्चोपेक्ष्याः । षोडशत्वं च सपिण्डनस्य षोडशश्राद्धान्तर्भावपक्षे । स्मृत्यर्थसारे तु वर्षान्त्यदिने संवत्सरविमोक्षश्राद्धं सपिण्डनं च कृत्वा परेद्युर्मृताहे वार्षिकं कार्यमित्युक्तम् । गौडा अप्येवमाहुः । तत्पूर्वविरोधाच्चिन्त्यम् ।

वत्प्रयोगबहिर्भूत एव श्राद्धाङ्गव्यवधानबीजाभावात्तु प्रायशोऽव्यवधानम् । एवं च सपिण्डनवत्यां तिथौ अवश्यं प्राप्तं वार्षिकमनुष्ठाय तन्त्रेण श्राद्धद्वयाङ्गतया तत्करणे न क्षतिः,

पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः ।

इति वचनादेकदिने क्रियमाणेषु सांवत्सरिकश्राद्धेष्विव । नित्यत्वाच्च गौणकालेऽप्यनुष्ठानमदोषः । वस्तुतस्तु सपिण्डीकरणस्य मध्याह्नः कालः वार्षिकस्यापराह्ण इति पार्वणविधिनाऽनुष्ठाने क्व गौणकालः । नच सपिण्डनस्यैकोद्दिष्टांशेन मध्याह्नप्राप्तावपि पार्वणांशेनापराह्ण एवेति वाच्यम्, एकोद्दिष्टस्य मुख्यतया मध्याह्नस्य तद्धर्मस्यैव युक्तत्वात् । मुख्यत्वं च प्रेतदेवत्वात् । पार्वणांशस्य तु तदभावे संयोजनस्य दुष्करतया तदुपकारितयाऽनुष्ठानात् एकोद्दिष्टस्य प्रथमानुष्ठेयत्वाच्च । चत्वार्युदकपात्राणि एकं प्रेतस्य त्रीणीतरेषां प्रथमं प्रेतपात्रं पितृपात्रेषु नियोजयेत् । एवमेव प्रथमं पिण्डं त्रिषु पिण्डेषु नियोजयेदित्याश्वलायनादिगृह्यात् । त्रीणि पितॄणामेकं प्रेतस्येति गोभिलीयं यदि छन्दोगानां क्रमस्यापि कल्पकं तदोपजीव्यत्वादेकोद्दिष्टकाल एव ग्राह्यः । नच पार्वणे यागत्रयसत्त्वाज्जघन्यस्यापि तस्य मुख्यस्य धर्मत्वेन काल इति ग्राह्य इति वाच्यम्, कर्मण एकत्वादेव समुच्चितदेवतानुरोधेनाभ्यासमात्रभेदात्तेषां कालादिधर्मानन्वयात् कालस्य देवताधर्मत्वाभावाच्च । तस्मात्कुतपप्रभृतिमध्याह्ने सपिण्डीक-

तच्च पुत्रे सति नान्यः कुर्यात्,

श्राद्धानि षोडशादत्त्वा नतु कुर्यात्सपिण्डताम् ।
*प्रोषितावासिते पुत्रः कालादतिचिरादपि ॥

इति वायवीयोक्तेः । *षोडशश्राद्धानां वर्षादूर्ध्वं कालाभावेपि तान्यदत्त्वा न कुर्यात्, किंतु *दत्त्वैव । *ता-

---

रणकमनुष्ठायापराह्णमध्य एव पार्वणविधिना सांवत्सरिकमुपक्रमितुं शक्यते न तत्र गौणकालताप्रसङ्गः । एकोद्दिष्टविधिना सांवत्सरिकमनुतिष्ठतां तु नित्यत्वाद्गौणकाले तदनुष्ठाने न कश्चिद्दोषः । यत्तु पूर्णे संवत्सरे सपिण्डनमभिधायात ऊर्ध्वं संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादिति गोभिलसूत्रात् प्रथमाब्दे वार्षिकं न कार्यमिति । तदशुद्धम्, प्रथमाब्दे सर्वथा वार्षिकासत्त्वे मलमासीयप्रथमवार्षिकनिर्णयवैयर्थ्यापत्तेः, अत ऊर्ध्वं गोभिलीये सपिण्डनोर्ध्वमित्यर्थेन प्रथमवत्सरेऽपि तस्य प्राप्तेः । एवञ्च—

पूर्णे संवत्सरे वृत्ते मृताहे पुनराब्दिकम् ।
सपिण्डीकरणं कृत्वा कुर्यात् पुत्रस्तु नेतरः ॥

इत्यत्र ग्रन्थोक्तजाबालस्वल्पमात्स्ययोश्च पुत्रपदमुत्तरक्रियाधिकारिपरम् । सपिण्डनानन्तरं स्वल्पमात्स्यात् सचैलस्नानं कृत्वा वार्षिकमिति कृतं पल्लवितेन । *प्रोषितेति । प्रोषितेन सता पितृमरणे ज्ञाते चिरादपि कालात् वर्षान्तरूपचरमकालातिक्रमेऽपि सपिण्डनं पुत्र एव कुर्यान्नान्य इत्यर्थः । *षोडशेति । यथाऽशक्त्यादिना वर्षान्तरूपस्य सपिण्डनकालत्वं तथा प्रवासादिना तदुत्तरस्य पूर्वोक्तवचनान्नाक्षत्रस्य । एवञ्च तत्र नियमवशात् षोडशश्राद्धे प्रसक्ते शास्त्रीयं कालं विना कृतस्य शास्त्रीयकर्मणः फलाजनकत्वात्सपिण्डनस्य शास्त्रीययत्किञ्चित्काललाभेनानुष्ठानेऽपि तेषां कालालाभादननुष्ठाने प्राप्ते श्राद्धानीति विधिद्वारा कालं विधत्ते इति भावः । *दत्त्वैवेति । एतद्वाक्यस्य सपिण्डनाविषये "पुत्राभावे

नि यदि कनिष्ठभ्रात्रादिना कृतानि तदा सपिण्डनमेव कुर्यादित्यपरार्कः। सपिण्डने तु कनिष्ठानां नैवाधिकार इत्यर्थः। तत्रैव—

अज्ञानादथवा मोहान्न कृता चेत्सपिण्डता।
तत्रापि विधिवत्कार्या कालादतिचिरादपि॥

तेष्वपि ज्येष्ठस्यैवाधिकारः,

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः।

इति मनूक्तेः। अपरार्के प्रचेता अपि—

*एकादशाद्याः क्रमशो ज्येष्ठस्तु विधिवत्क्रियाः।
कुर्यान्नैकैकशः श्राद्धमाब्दिकं तु पृथक्पृथक्॥

मरीचिः—

*सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम्।
द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥

यत्तु वाचस्पतिशूलपाणिभ्यामुक्तं द्रव्यदानानुमत्यभावे कनिष्ठैः पृथक्कार्यमिति। तन्न, एवकारस्य तदभा-

---

तु पत्नी स्यात्" इत्यादिसामान्यविध्यपवादकतया पुत्रासन्निधाने तद्भिन्नकृतम् 'अनधिकारिणा कृतमप्यकृतमेव' इति पुत्रेण सपिण्डनमावर्तनीयम्। मासिकापकर्षोऽप्यावर्तनीयः। तत्र सपिण्डनाधिकृतस्यैवाधिकारादित्यर्थः। अपरार्कमतमाह—*तानीति। अत्र—

श्राद्धानि षोडशापाद्य विदधीत सपिण्डताम्।
श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डताम्॥

इति समानकर्तृकत्वभङ्गापत्तेरित्यस्वरसः। *एकादशाद्या इति। एकादशपदं षोडशश्राद्धार्थकं श्राद्धानीत्येकवाक्यत्वात्, न तु महैकोद्दिष्टादिपरम्। तेन तस्य पत्न्यादिना करणेऽपि नावृत्तिः। ननु "कुर्यान्नैकैकशः श्राद्धम्" इत्यनेन सपिण्डनान्तश्राद्धस्य विभक्तपुत्रेषु पृथक्त्वनिषेधे कनीयःपुत्रादेस्तत्फलानुपपत्तिरित्यत्राह—*सर्वेषां त्विति। तस्य द्रव्यदानानुमतिद्वारा फल-

वेऽपि पृथक्करणाभावार्थत्वात् *अन्धादेरिव ज्येष्ठे सति कनिष्ठानामनधिकाराच्च । *अतस्तेषां प्रत्यवायमात्रम् । आहिताग्निः कनिष्ठस्तु *कुर्यादेव । अन्यथा *पितृयज्ञासिद्धेः । *एवमावश्यकवृद्धावपि कनिष्ठोऽन्यः सपिण्डो लाभ इति भावः । *अन्धादेरिति । अग्न्याधाने इति विशेषः । *अत इति । ज्येष्ठे सति तदन्यः पितुः सपिण्डनं न कुर्यादित्येवकारवशनिषेधविध्युल्लङ्घनादिति भावः । *कुर्यादेवेति । एवकार आवृत्तिव्यवच्छेदार्थः । अयं चाधिकारः ज्येष्ठस्यासन्निधाने सूतकादिबन्धे वा । *पितृयज्ञेति ।

एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि ।
प्रकुर्वीताग्निमान् पुत्रो मातापित्रोः सपिण्डनम् ॥
नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् ॥
प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु ।
आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते ॥

इत्यादिवचनात् । नचेमानि पितृयज्ञस्य प्रमाणान्तरप्राप्तसपिण्डनप्रयोजकत्वबोधनेनैवार्थवन्ति एतदुपात्तार्थान्तरस्य प्रमाणान्तरप्राप्तत्वात् । परन्तु क्लृप्ताधिकारं ज्येष्ठं प्रति चरितार्थानि नाक्लृप्तं कनीयसोऽधिकारमपि कल्पयन्ति गौरवादिति वाच्यम्, आरब्धपिण्डपितृयज्ञस्यानिर्वाहापत्त्या कनिष्ठेऽपि प्रवृत्त्यनङ्गीकारात् । यद्वा,

पितुः पुत्रेण कर्तव्याः पिण्डदानादिकाः क्रियाः ।

इत्यादिभिः पुत्रमात्रस्य सर्वक्रियाधिकारे प्राप्ते “एकादशाहाद्याः क्रमशः” इत्यादिना एकादशाहादिषु कनिष्ठं प्रत्यपवादे जाते उक्तवाक्यं प्रतिप्रसवविधित्वेन लाघवात्कनिष्ठं प्रत्येव प्रवर्तते, न ज्येष्ठं प्रति; अपूर्वविधित्वे गौरवादनुवादत्वेन वैयर्थ्यात् । शेषं क्रमाधिकारिप्रकरणे । *एवमिति । तथाचेहापि ज्येष्ठस्य

वा कुर्यात् ।

*भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव च ।
सहपिण्डक्रियां कृत्वा कुर्यादभ्युदयं ततः ॥
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति मदनरत्ने लघुहारीतवचनात् । *वृद्ध्यनन्तरं प्रथमाब्दमध्येऽपि काम्यं कुर्यात् । वृद्ध्यभावे तु प्रथमाब्दादूर्ध्वमेवेत्यर्थः । काम्योक्ते*रनावश्यकेष्टापूर्तादौ *नापकर्षः । *एतद् *भ्रातृपुत्रादिसंस्कारे प्राप्ताधिकारस्य *ना-

---

पुत्रस्य वा न सपिण्डनिवृत्तिरितिभावः । *भ्राता वेति । "अर्धमन्तर्वेदि" इत्यादिन्यायेन भ्रात्रादिपदैराभ्युदायिककर्तृमात्रं ग्राह्यमित्याहुः । काम्यमनावश्यकमपि कर्म वत्सराद् प्रथमादृते तदुत्तरसपिण्डनं कृत्वैव कुर्यात् नतु प्रथमवर्षे तदर्थं सपिण्डनमपकृष्य काम्यस्यापकर्षनिमित्तत्वाभावादित्यर्थे फलितमाह--*वृद्धीति । श्राद्धाङ्गकयोरभ्युदयकाम्ययोरत्र ग्रहणात्तदुत्तरं सपिण्डनापकर्षेऽपि प्रथमाब्दे न कार्यमित्यपि केचित् । *अनावश्यकत्वं सगतिकत्वम् । *नापकर्ष इति । षोडशश्राद्धपूर्वकसपिण्डनस्येति शेषः । अत्र यस्य कस्यापि सपिण्डस्य गृहे वृद्ध्युपस्थितौ येन केनापि सपिण्डेन स्वपित्रादेः सपिण्डनं कार्यमिति दाक्षिणात्यमूर्धन्यतमाचारं प्रदर्शयितुमाह--*एतदिति । अशक्त्यादिनाऽनुकल्पकाले तदनुष्ठाने तु अनुमासिकापकर्षो भवत्येवेत्युक्तं-*भ्रात्रिति । "पितैवोपनयेत्पुत्रम्" इत्यादि । "पिता पितामहो भ्राता" इत्यादिना क्रमेण योऽधिकारस्तद्वत इत्यर्थः । *नान्दीति ।

स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥

इति कातीये तस्याभावे तत्क्रमात् "पितैवोपनयेत् पुत्रम्"इत्यादिः "पिता पितामहो भ्राता"इत्यादिश्च यत्क्रमोऽधिकारिक्रमस्तेन

न्दीश्राद्धाधिकारार्थम् । *अभ्युदयपदं च नान्दीश्राद्धनिमित्तकर्ममात्रपरमिति हेमाद्रिः । तेन ज्येष्ठे देशान्तरस्थे कनिष्ठः सपिण्डनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः परास्ता । *भ्रातृशिष्याद्युक्ते*र्नान्दीश्राद्धेज्यदेवतामात्रपरोऽपकर्ष इ*त्यपास्तम् । अस्य क्रममात्रपरत्वाद्वृद्धिकर्तैव सपिण्डनं कुर्यादिति न नियम इति

क्रमेण स्वपितृभ्य एव दद्यान्न संस्कार्यपितृभ्य इत्यर्थादिति भावः । अभ्युदयक्रियापदे नान्दीश्राद्धकर्मणो लाभं वारयति—*अभ्युदयेति । तेन नान्दीश्राद्धस्य सपिण्डननियमत्वपूर्वेण नियमेन । दर्शिताचारनिर्वाहार्थं जेष्ठापेक्षां निरस्यति--*भ्रात्रिति । *नान्दीति । येषां नान्दीश्राद्धे देवतात्वं तेषामेव पितृत्वासिद्ध्यर्थं । लघुहारीतेन सपिण्डनं कर्तव्यतयोक्तम्, आकाङ्क्षितविधानस्य न्याय्यत्वात् । *अपास्तमिति । अत्र भ्रातृशिष्याद्युक्तेरिति हेतुः । न च "स्वपितृभ्यः पिता दद्यात्" इत्यादौ चतुर्थपादस्य भ्रात्राद्यपत्यसंस्कारे संस्कार्यपितृभ्य एव नान्दीश्राद्धोक्तेः भ्रातावेत्यादेर्भ्रात्राद्यपत्यसंस्कारविषयत्वेनैवोपपत्तेर्न तद्विरोधः । एवमनाकाङ्क्षितविधानोपगमे सपिण्डान्यगुरोरसपिण्डनापत्तिरिति वाच्यम्, सुतसंस्कारकर्मसु स्वपितृभ्यो दद्यादिति तावत् सामान्यतो विशेषतश्च प्राप्तं नान्दीश्राद्धमनूद्य—

नानिष्ट्वा तु पितृन् श्राद्धे कर्म वैदिकमाचरेत् ।

इति वचनादन्यसंस्कारे कथमित्यपेक्षायां चतुर्थचरणस्य विधायकत्वमुपेयम् । अन्यथा वैयर्थ्यापत्तेः । तथा च तत्र स्वपितृभ्य इत्यस्यैव सम्बन्धो नतु संस्कार्यपितृभ्य इत्यस्य "सिद्धमन्त्रम्" इति न्यायात् । नहीदं सपिण्डनं नान्दीश्राद्धे देवतात्वासिद्ध्यर्थं किन्तु कर्तुरधिकारासिद्ध्यर्थम् । समानकर्तृकत्वं तु काचित्कत्वेनाप्युपपद्यते । अत एव—

गौडाः । अत एव कन्याया मातृमरणे भ्रात्रा सपिण्डने कृते पितुर्दानाधिकारः ।

*शूलपाणिस्तु—

*महागुरौ प्रेतभूते वृद्धिकर्म न युज्यते ।

इति निषेधात्*मृतस्य भ्रात्रादिः सपिण्डनं कृत्वा तत्पुत्रकन्यादेरभ्युदयं कुर्यान्न तु स्वपुत्रसंस्कारे संस्कार्यपितुः सपिण्डनं विना वृद्धौ देवतात्वाभावादित्याह । तन्न, देवताप्रयुक्तापकर्षस्य निरस्तत्वात् । वृद्धिं विना क-

---

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ।

इत्येतत्समानकर्तृकत्वस्यापि प्रायिकत्वाद्यदा कनिष्ठेन षोडशश्राद्धानि कृतानि तदा ज्येष्ठेन सपिण्डनमेव कार्यमित्यपरार्केऽप्युक्तम् । तथाच भ्राता चेत्यादिवाक्येनाभ्युदायिकश्राद्धदेवताभिन्नस्यापि सपिण्डनस्य सपिण्डनं कार्यमिति दाक्षिणात्याचारः सुस्थ एव । तस्याभावे तु तत्क्रमादित्यस्य भ्रात्राद्यपत्यसंस्कारे संस्कार्यपितृभ्य एव दद्यादित्यर्थमनुसृत्य भ्राता वेत्यादि वाक्यं व्याचक्षाणस्य मतमाह—*शूलपाणिस्त्विति । तत्र संस्कार्यपित्रादेः सपिण्डनं तत्संस्कारोपस्थितौ तदधिकारिणा तदङ्गनान्दीश्राद्धार्थमपकृष्य कार्यमिति प्रथमतः साधयति—*महागुराविति । नहि भ्रात्रादेर्भ्रात्रादिर्महागुरुर्भवति स्वापत्यस्येति । तदनुसृत्य भ्राता वेत्यस्यार्थमाह—*मृतस्येति । भ्रात्रादयश्च सन्निहिताधिकार्यन्तराभावान्मृतस्य सपिण्डनाधिकारिणः सन्तस्तदपत्यसंस्काराधिकारिणः क्त्वाप्रत्ययात् । पुत्रस्याग्रहणं च पित्रादेः सपिण्डनं कृत्वैव स्वापत्यस्य भगिन्यादेश्च संस्कारं कुर्यादित्यस्य वचनान्तरसिद्धत्वात् । अथ मातापितृमृतिवत्सरे तदपत्यानां कथं संस्कारः?

पितरौ तु मृतौ यस्य देहस्तस्याशुचिर्भवेत् ।
न दैवं नापि पित्र्यं वा यावत्पूर्णो न वत्सरः ॥

निष्ठेन कृते तु विदेशस्थेन ज्येष्ठेन पुनः कार्यम्,

यवीयसा कृतं कर्म *प्रेतशब्दं विहाय तु ।
तज्ज्यायसापि कर्तव्यं सपिण्डीकरणं पुनः ॥

इति स्मृतेः ।

ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते ।

आद्यपादे 'मातापित्रोः कनिष्ठेन' इति वा पाठः ।

देशान्तरगतानां च पुत्राणां तु कथं भवेत ।
श्रुत्वा तु वपनं कार्यं दशाहान्तं तिलोदकम् ॥
ततः सपिण्डीकरणं कुर्यादेकादशेऽहनि ।
द्वादशाहे न कर्तव्यमिति शातातपोऽब्रवीत् ॥

इति वचनाच्चेति भट्टाः । सिङ्गाभट्टीयेऽप्येवम् । *पूर्ववचनेऽत्र च मूलं चिन्त्यम् । स्मृत्यर्थसारे तु-'*त्रिभ-

---

इति निषेधादिति चेत् ? न, अशुचित्वोक्तेरनावश्यककर्मपरत्वात् । अपकर्षस्यावश्यकवृद्धिविषयत्वात् । "आधानाद्युपसंप्राप्तौ" इत्यभिधानात् "तथैव काम्यं यत्कर्म" इति लघुहारीताच्च । *प्रेतशब्दमिति । न च सपिण्डनस्य ज्येष्ठमात्राधिकारित्वेऽनधिकारिकनिष्ठकृतसपिण्डनेन प्रेतत्वानिवृत्त्या कथं प्रेतशब्दत्यागेन पुनरावृत्तिरिति वाच्यं दशाहोत्तरदर्शे कनिष्ठस्य पितृयज्ञार्थं सपिण्डनेऽधिकारात् । तत्र प्रेतशब्दं विनाऽर्घ्यसंयोजनादिरूपं सपिण्डनमन्यत्र तु प्रेतशब्दसहितं तत्कार्यम् । अत एव कनिष्ठाधिकारस्येवार्घ्यसंयोजनादित्यागस्याप्रामाणिकतामनुपदं द्रढयति । यत्र कनिष्ठेन पुत्रातिरिक्तेन वाऽभ्युदयार्थं सपिण्डनं कृतं तत्र ज्येष्ठेन पुत्रेण वा नावर्तनीयमित्यावेदनाय वृद्धिं विनेत्युक्तम् । *पूर्ववचने यवीयसेति वचने । तथाच पितृयज्ञार्थं कनीयसा सपिण्डने कृतेऽपि ज्येष्ठस्य सपिण्डनावृत्तिः प्रेतशब्दसहितैव । तेन वृद्ध्यर्थमपकृष्टे तु तत्र न ज्येष्ठस्यावृत्तिरिति नव्यमतामित्यर्थः । *वि-

क्ता ऋद्धिकामाश्चेत्पुत्राः पृथक्सपिण्डीकरणं कुर्युः' इत्युक्तम्। अत्र दत्तकस्य तत्पुत्रादीनां विशेषः प्रागुक्तः। केचित्तु वृद्धिं विनाऽपि कनिष्ठस्य सपिण्डनमाहुः—

मातापित्रोर्मृतेः काले ज्येष्ठे देशान्तरस्थिते।
कनिष्ठेन प्रकर्तव्यं सपिण्डीकरणं तथा॥

इति कार्ष्णाजिनिस्मृतेः।

गते वा रोधिते ज्येष्ठे पित्रा वा प्रेषिते सति।
षण्मासान्न निवर्तेत तदा कार्यं कनीयसा॥

संवर्तः—

पुनः सपिण्डीकरणं श्राद्धं पार्वणवच्चरेत्।
अर्घ्यसंयोजनं नैव पिण्डसंयोजनं न च॥ इति।

ते *वचसां निर्मूलत्वात्-'प्रोषितावसिते पुत्रे' इत्यादिविरोधाच्चोपेक्ष्याः।

व्युत्क्रममृतौ तु हेमाद्रौ ब्राह्मे—

मृते पितरि यस्याथ विद्यते च पितामहः।
तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः॥
तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यस्तु पूर्ववत्।
मातर्यथ मृतायां च विद्यते च पितामही॥

भक्ता इति।

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश।
एकेनैव तु कार्याणि संविभक्तधनेष्वपि॥

इत्यस्यात्रापवादः। वृद्धिकामनया प्राप्ताधिकारेण कनीयसा कृते तु ज्येष्ठेन प्रेतशब्दरहितमेवावर्तनीयम्। *वचसामिति। अत एव--

काश्यादिषु गयायां च प्रेतकार्यं तु यत्कृतम्।
सपिण्डैरसपिण्डैर्वा पुत्रैरेव कृतं भवेत्॥

प्रपितामहीपूर्वस्तु कार्यस्तत्राप्ययं विधिः ॥

एवं प्रपितामहजीवने तत्पित्रादिभिर्ज्ञेयम् । तदाह सुमन्तुः—

त्रयाणामपि पिण्डानामेकेनापि सपिण्डने ।
पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥

यत्तु—

*व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिण्डता । इति, तन्मातापितृभर्तृभिन्नविषयम्,

व्युत्क्रमेण मृतानां न सपिण्डीकृतिरिष्यते ।
यदि माता यदि पिता भर्ता नै*ष विधिः स्मृतः ॥

इति माधवीये स्कान्दोक्तेः । मदनरत्नादौ चैवम् । अत्र 'प्रपितामहादिभिः पितुः सपिण्डने कृते पितामहे मृते तत्सपिण्डने सति पुन*स्तेन सह पितुः सपिण्डनं कार्यम्' इति हेमाद्रिर्मतमाह । अन्ये *नैतन्मन्यन्ते । तत्त्वं तु पितुः सपिण्डनाभावे पितामहेन सह पुनः कार्यं, न तत्सत्त्वे,

त्रयाणामपि पिण्डानामेकेनापि सपिण्डने ।
पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥

इति विष्णुधर्मोक्तेः । पितामहे प्रपितामहे वा पुत्रान्तरै*रसंस्कृतेऽप्यसंस्कृताभ्यामेव पितुः सपिण्डनं-

---

इत्यादीन्यपि निर्मूलानि तीर्थप्रशंसापराणि वा । एवमिदं तीर्थं प्रशस्तं यद्दशाहान्तप्रेतकार्ये पुत्रेतरकृतेऽपि पुत्रकरणप्रयुक्तफलवदिति, नतु ज्येष्ठेतरेण येन केनापि सपिण्डनं कार्यमित्यर्थपराणि तथापदाभावात् । तत्र ज्येष्ठस्यैवाधिकारादिति माधवः । *व्युत्क्रमादिति । गोब्राह्मणादिहतोपलक्षणम् । *एष निषेधरूपो विधिः । * तेन पितामहेन । *नैतादिति । पितुः पुनः सपिण्डनवचनासत्त्वादिति शेषः । *असंस्कृते अकृतसपिण्डने ।

कुर्यात् ,

असंस्कृतौ न संस्कार्यौ *पूर्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्यादिति कात्यायनोऽब्रवीत् ॥

इति छन्दोगपरिशिष्टात् । असंस्कृतौ दाहाद्यैरिति केचित् । असपिण्डीकृताविति तु तत्त्वम् । अत एवोक्तं तत्रैव--

पापिष्ठमपि शुद्धेन *शुद्धं पापकृतापि वा ।
पितामहेन पितरं संस्कुर्यादिति निश्चयः ॥

पापिष्ठमकृतसपिण्डनं न तु पतितादि, 'अभिशस्तपतितभ्रूणघ्नाः स्त्रियश्चातिचारिणीर्न संसृजेत्' इति बैजवापोक्तेः 'पापकर्मिणो न संसृजेरन्' इति गौतमोक्तेश्चेत्युक्तं निर्णयामृते ॥

पूर्वयोः पुत्राभावे तु पौत्रः कुर्यादेव,

पितामहः *पितुः पश्चात्पञ्चत्वं यदि गच्छति ।

एतच्चान्तिमकाले एव । पूर्वकाले तु पितामहप्रपितामहयोः तत्पुत्रादिना तदभावे स्वयं वा सपिण्डनं संपाद्यैव पितुः सपिण्डनसम्भवात् । न चैवं वर्षान्तपर्यन्तातिक्रमेऽपि तयोः सपिण्डनं कृत्वैव पितुः सपिण्डनं नक्षत्रेषु सुकरमिति वाच्यं, वचनवैयर्थ्यापत्त्या कृतसपिण्डनाभ्यां ताभ्यां वर्षान्तकाले पितुः सपिण्डनस्य वाचनिकत्वोपगमात् । तावता वचनसार्थक्यात् तत्पूर्वकालेषु पितामहादिपितृभावानपेक्षपितृसपिण्डनाबोधनात् । *पूर्वौ पितामहप्रपितामहौ । *शुद्धमिति । पितामहेनेति प्रपितामहेनेत्यपि बोध्यम् । अकृतसपिण्डनेन पितामहादिना सह सम्यक् शुद्धं कुर्यादिति भावः । मातामहादित्रयाणां सपिण्डनासत्त्वे तु चतुर्थेन सपिण्डनस्यैवासम्भवात् । वर्षान्तकालेपि पितुः सपिण्डनं न सम्भवति । किन्तु शुद्धैरशुद्धसपिण्डनानन्तरं पितामहेनैवेति । *पितु-

पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम् ॥
नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः ।
पितुः सपिण्डतां कृत्वा कुर्यान्मासानुमासिकम् ॥

इति कात्यायनोक्तेः । अपरार्के शूलपाणौ चैवम् । तेन सपिण्डनस्यानित्यत्वादकृतसपिण्डनयोरेव पार्वणानुप्रवेश इति *मूर्खोक्तिः परास्ता ।

*कृते सपिण्डीकरणे प्रेतः पार्वणभाग्भवेत् ।

इति हारीतविरोधाच्च । केचित्पुत्रान्तराभावे पितामहवार्षिकमप्याहुः । तन्न, श्राद्धषोडशमिति नियमात् । इच्छया भवत्येव ।

पितामहस्य चेद्दद्यादेकोद्दिष्टं न पार्वणम् ।

इति वाचस्पतिधृतगर्गोक्तेः । *त्रयाणां यौगपद्ये तु प्राधान्यात्पितुः सपिण्डनं कृत्वा पूर्वयोः कुर्यात् । *पितामहे मृते दशाहान्तः पितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमावर्तयेत् । वृत्ते दशाहे नैवम् ।

रिति । तत्र दर्शश्राद्धमप्यकृतसपिण्डनाभ्यां ताभ्यां सह कार्यं नतु तदर्थं तयोः सापिण्डनप्रतीक्षेत्यर्थः । *मूर्खोक्तिरिति । सामान्यतोऽकृतसपिण्डनयोरित्युक्तिरित्यर्थः । वर्षान्तान्यकाले कृतसापिण्डनयोः पार्वणानुप्रवेशापत्तेरिति भावः । नच वर्षान्ते तादृशाभ्यां ताभ्यां सपिण्डने तयोः पार्वणानुप्रवेशो मास्त्विति वाच्यं, तथा सति “पापिष्ठमपि शुद्धेन” इति वचनोत्तरं “पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम्” इति वचनविरोधात् । *कृते इति । निरग्निकस्य प्रायिकं साग्निकस्य तु दर्शादर्वाक् सपिण्डनं दर्शश्राद्धार्थमुक्तम् । *त्रयाणामिति । एतदपि पितुः वर्षान्तकाल एव । *पितामहे मृते इति । क्रियाकर्तुर्नाशे क्रियावृत्तिर्नास्तीति प्रागुक्तशुद्धितत्त्वमतं तु हेयम् । अग्निसंस्कारा-

*अशक्त्या पित्रानुज्ञातेन पौत्रेण पितामहश्राद्धे प्रक्रान्ते पितृमृतौ तदाशौचं वहन्नेव पौत्रः पितामहकर्म कुर्यात्प्रक्रान्तत्वादिति मदनपारिजातपृथ्वीचन्द्रौ । यत्तु—

उत्तरात्रितयरौद्ररोहिणी
याम्यसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म सकलं च वर्जये
त्प्रेतकार्यमपि बुद्धिमान्नरः ॥

इति सपिण्डनप्रकरणे पाठा*न्मुख्यकाले निषिद्धर्क्षे सपिण्डनापकर्षः । सर्वकालेषु तद्धरत्वे तद्वर्ज्यान्येव । पूर्वोक्तब्रह्मोक्तानि षोडशश्राद्धानि कार्याणीति वाचस्पतिमिश्राः । तन्न, अस्य परिभाषात्वेन वाक्यात्सावकाशकर्मपरत्वात्, अस्य प्रेतमात्रदैवत्याभावाच्च ॥

अथ स्त्रीषूच्यते । हेमाद्रौ बृहस्पतिः—

भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिण्डनम् ।

यत्तु भविष्ये—

पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः । इति,

तदा*सुरादिविवाहोढापरम्,

आसुरादिविवाहेषु पितृगोत्रेण धर्मवित् ।

इति वृद्धशातातपोक्तेः । तच्चानेकवचनेषु पितामह्याः पत्या मातामहेन वा सहोक्तम् । तत्र व्यवस्थोक्ता भविष्ये—

जीवत्पिता पितामह्याः मातुः कुर्यात्सपिण्डनम् ।

वृत्तिर्केचिन्मते । *अशक्त्येति । इदं तु बोध्यम्—अशौचान्तरमध्ये क्रिया एकादशाहान्तैव सपिण्डनस्य शुद्धकालसम्भवात् ।

*मुख्यकाले वर्षान्ते ।

*आसुरादीति । आदिना गान्धर्वराक्षसपैशाचा ग्राह्याः ।

प्रमीतपितृकः पित्रा ततपित्रा पुत्रिकासुतः ॥

ततपित्रा मातुः पित्रा । लौगाक्षिः—

पितामह्यादिभिः सार्धं मातरं तु सपिण्डयेत् ।
पितरि ध्रियमाणे तु *तेनैवोपरते सति ॥

शङ्खः—

मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतः ।
पितामह्यादिभिः सार्धं सपिण्डीकरणं स्मृतम् ॥

येन केनापि मातुः सापिण्ड्ये यत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तं तत्र पितामह्या सह कार्यम् ।

नान्दीमुखेऽष्टकाश्राद्धे गयायां च मृतेऽहनि ।
पितामह्यादिभिः सार्धं मातुः श्राद्धं समाचरेत् ॥

इति शातातपोक्तेः । अपुत्रायां तु पैठीनसिः—

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डनम् ।
श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत् ॥

यत्तु लघुहारीतः—

पुत्रेणैव तु कर्तव्यं सपिण्डीकरणं स्त्रियाः ।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये ॥ इति ।

यच्च मार्कण्डेयपुराणे—

सपिण्डीकरणं स्त्रीणां पुत्राभावे न विद्यते । इति,

तत्पुत्रपत्यभावे ज्ञेयम् । अत्र सपत्नीपुत्रोऽपि ज्ञेयः,

बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥

इति मनूक्तेरेतत्परत्वात् । यत्तु शातातपः—

मृते पितरि मातुस्तु न कार्या सहपिण्डता ।

तथा च भर्तृगोत्रेणेति वचनं ब्राह्मदैवार्षप्राजापत्यान्यतमविवाहोढापरम् । *तेनैवेति । यत्र सहगमनेनान्यथा वा स्त्रियाः सपिण्डनं

पितुरेव *सापिण्डत्वे तस्या अपि कृतं भवेत् ॥ इति, तदशक्तपरम्, केषाञ्चिद्वा मतमिति हेमाद्रिः। अन्वारोहणे तु भर्त्रैव सापिण्ड्यम्,

मृता यानुगता नाथं सा तेन सहपिण्डताम्।
अर्हति स्वर्गवासं च यावदाभूतसंप्लवम् ॥

इति शातातपोक्तेः।

पत्या चैकेन कर्तव्यं सापिण्डीकरणं स्त्रियाः।
सा मृतापि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥

इति यमोक्तेश्च। अत्रैकशब्दः पितामह्यादिपत्नीनिवृत्त्यर्थः। पतिपदं वर्गपरम्। सापिण्डनस्य पार्वणैकोद्दिष्टरूपत्वादिति माधवकल्पतरुमदनरत्नादयः। अन्ये तु भर्त्रैवैकेनाहुः—

*स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं भवेत्।

इत्येवकारश्रवणात्। पृथ्वीचन्द्रोदयेऽपि विकल्प उक्तः। इदं तु तत्त्वम्–यदा हेमाद्र्यादिमते द्वयोरेकः पिण्डस्तदा वर्गेण सह। यदा माधवपृथ्वीचन्द्रादिमते पृथक्पिण्डस्तदैकेन पत्यैकवचनाच्चैकेनापि। अतो *मातृपिण्डमसापिण्डीकृतेनैव पतिपिण्डेन संयोज्यैकीकृतं पि-

---

पत्या सह तत्र भर्तरि अकृतसापिण्डनेऽपि प्रेतीभूते "पापिष्ठमपि शुद्धेन" इति न्यायेनेति। *सापिण्डत्वे सपत्नीकत्वे।

पूर्वमतेऽस्वरसमाह—*स्वेनेति। *मातृपिण्डमिति। पितृभावापन्नेनैव सपिण्डनं न प्रेतेनेति नियमे मानाभावात्। अत्र पितृमातृपितामहादित्रयाणां पञ्चार्घ्यपात्राणि तत्र मातृपात्रदत्तार्घ्यशेषं पितृपात्रे आसिच्य दत्तार्घ्यजलशेषं पितृपात्रं पितामहादिपात्रत्रये सिञ्चेदित्यर्घ्यप्रकारो बोध्यः। विवेचनकृतस्तु पत्युः सापिण्डनं कृत्वा तद्दिन एव कालान्तरे वा भिन्नप्रयोगं स्त्रियाः

ण्डद्वयं तत्पित्रादिभिः संयोजयेत् । *अन्त्यपक्ष एव युक्तः । स्मृत्यर्थसारे तु–'अन्वारोहणेनैकदिनमरणे स्त्रियाः पृथकसपिण्डनं नास्ति । भर्तुः कृते स्त्रिया अपि कृतं भवति इत्युक्तम्, तन्मतान्तरमस्तु । इदं ब्राह्मादिविवाहेषु ज्ञेयम् ।

आसुरादिषु तु शातातपः—

तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सपिण्डनम् ।
आसुरादिविवाहेषु विन्नानां योषितां भवेत् ।

मातामह्या मातुःपितामह्या तत्प्रपितामह्या चेत्यर्थः । सुमन्तुः—

पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः ।
माता मातामहे तद्वदित्याह भगवाञ्छिवः ॥

इदमासुरादिपरं पुत्रिकापुत्रपरं चोक्तं प्राक् । हेमाद्रिस्तु *ब्राह्मादिष्वपि सर्वत्र देशभेदाद्विकल्पमाह ।

सपिण्डनं कार्यम्, आहत्य प्रयोगैक्यस्य प्रेतीभूतभर्तृपिण्डसंयोजनस्य च विध्यदर्शनात् । तत्रापि पत्नीपिण्डसंयोजनमेकेनैव भर्तृपिण्डेन । "पत्या चैकेन" इति वचनादिति प्राहुः । वस्तुतस्तु आहत्यैकप्रयोगविध्यभावेऽपि एकदेशकालकर्तृत्वादेकप्रयोगत्वं भविष्यति, "पत्या चैकेन" इति सामान्यवचनादेव च प्रेतपिण्डसंयोजनम् । नच सपिण्डनजन्यपितृभावापन्नैरेव सपिण्डनं "पितृत्वजनकपितृपात्रेषु प्रेतपात्रमासिञ्चति एतेन पिण्डो व्याख्यातः" इति कात्यायनोक्तेरिति वाच्यम्, "शुद्धं पापकृताऽपि वा" इत्यादिवशेन सम्भवन्त्याः पितृत्वापत्तेरत्याग इत्येतावन्मात्रबोधनात् भिन्नप्रयोगस्यावाचनिकत्वात् तत्कल्पनस्याचारविरोधेन दुर्घटत्वाच्चेत्याशयेनाह—*अन्त्यपक्ष एवेति । एवकारो भिन्नप्रयोगपक्षव्यावृत्त्यर्थः । आचारमपि तत्र दर्शयति—*ब्राह्मेति ।

अत ए(१)व गुर्जरेषु कोकिलमतानुसारिणां मातृमातामहप्रमातामहा इति श्राद्धप्रयोगः *सपिण्डनं च दृश्यते । हेमाद्रावापस्तम्बेपि—

कोकिलस्य यथा पुत्रा अन्यसंचयजीविनः ।
पुष्टास्ते स्वकुलं यान्ति एवं नारी मृता सती ॥

यदपि विज्ञानेश्वरो मातामहेन मातुः सापिण्ड्ये पितृश्राद्धवन्मातृश्राद्धं *नित्यमित्याह, यच्च वृद्धिश्राद्धे छन्दोगपरिशिष्टम्—

षड्भ्यः पितृभ्य*स्तदनु श्राद्धदानमुपक्रमेत् । इति,

तदेतद्विषयमेव, *मातुः पृथक् श्राद्धाभावात् । अत एव हेमाद्रौ भविष्ये मातुः सपिण्डनं प्रक्रम्य—

उदितेऽनुदिते चैव होमभेदो यथा भवेत् ।
तथा कुलक्रमायातमाचारं च चरेद्बुधः ॥

इत्युक्तम् । अस्य वृद्धावपवादमाह तत्रैव व्याघ्रपात्—

कुर्यान्मातामहश्राद्धं सर्वदा मातृपूर्वकम् ।
विधिज्ञो विधिमास्थाय वृद्धौ मातामहादिवत् ॥

केचिदेतत्पुत्रिकापुत्रपरमाहुः ।

पत्युः सापिण्ड्यमाह लौगाक्षिः—

सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाममन्त्रकम् ।
सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च ॥ इति ।

यत्तु वचनम्—

अपुत्रस्य परेतस्य नैव कुर्यात्सपिण्डताम् । इति,

यच्चापस्तम्बः—

अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा ।

*सपिण्डनं चेति । मातामहेन सहेत्यादिः । *नित्यमिति । पृथगित्यर्थः । *तदनु सपिण्डनानन्तरम् । *मातुरिति । अ-

---

(१) 'एव' नास्ति ग०

तेषां सपिण्डनाभावादेकोद्दिष्टं न पार्वणम् ॥ इति, तत्पुत्रोत्पादनविधिप्रशंसार्थमिति माधवः ।

सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं विधीयते ।
अपुत्राणां तु सर्वेषामपत्नीनां तथैव च ॥

इति हेमाद्रौ प्रचेतसोक्तेश्च । अन्ये तु द्विविधवाक्यदर्शनाद्विकल्पमाहुः । स्मृत्यर्थसारेपि–'ब्रह्मचारिणामनपत्यानां च सापिण्डनं नास्ति, तेषां सदैकोद्दिष्टमेव *व्युत्क्रममृतानां सापिण्ड्यं कार्यं न वा । केचि*त्सर्वत्र

न्यथेत्यादिः । अन्यत्र "पतिना सह" इत्युक्तेः । *व्युत्क्रमेति ।

पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्तयेत् प्रपितामहम् ॥

इति मनूक्तौ पितुर्नाम संकीर्त्य पितरं देवतात्वेनोद्दिश्य प्रपितामहं तदादित्रीनुद्दिशेदित्यर्थात् "यस्य पिता प्रेतः स्यात्स पित्रे पिण्डं निधाय पितामहात्पराभ्यां दद्यात्" इति विध्युक्तौ "पित्रे पिण्डं निधाय पितामहात् पराभ्यां द्वाभ्याम्" इत्यत्र तृतीयस्याप्युपलक्षणादितिव्याख्यापक्षे कार्यम् अन्यव्याख्यायां तु न कार्यम् । सा चेत्थम्, व्युत्क्रममृतपुत्रेण दर्शादौ पितामहादीनामेव पार्वणं कार्यम्,

ब्राह्मणादिहते ताते पतिते संगवर्जिते ।
व्युत्क्रमाच्च मृते देयमेभ्य एव ददात्यसौ ॥

इति कात्यायनोक्तेः । एवञ्चोक्तमानवं पितुः पितामहप्रपितामहवृद्धप्रपितामहेभ्य इति प्रयोगनियमार्थम् । पितृप्रपितामहवृद्धप्रपितामहोद्देश्यकपार्वणविध्यर्थत्वासम्भवेन पितुर्नाम सङ्कीर्त्येत्यादेः तत्सम्बन्धित्वेन स्वप्रपितामहादिबुद्धिरेवेत्यर्थात् । ईदृशपार्वणेन सदा पितुरेकोद्दिष्टं च कार्यं, प्रोक्तविष्णुना "पित्रे पिण्डं निधाय" इत्युक्तेः । एवञ्च तद्वाक्ये पितामहादित्यादेः

सपिण्डनमाहुरिति । अपुत्रे व्युत्क्रममृते विशेषो रेणुकारिकायाम्—

*भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा ।
सर्वबन्धुविहीनस्य पत्नी कुर्यात्सपिण्डताम् ।
ऋत्विजं कारयेद्वापि पुरोहितमथापि वा ॥
वसुरुद्रादितिसुतैः कार्या तेषां सपिण्डता ।
व्युत्क्रमाच्च प्रमीता *ये *तद्विना प्रेतता ध्रुवम् ॥
पुनः सपिण्डनं तेषां कुर्यात्प्रेते पितामहे । इति ।

*अत्र मूलं मृग्यम् । यतीनां सपिण्डनं नास्ति किन्त्वेकादशेऽह्नि पार्वणं कार्यम् । तदपि त्रिदण्डिनः । एकदण्ड्यादीनां तदपि नेत्युक्तं प्राक् । दण्डग्रहणात्पूर्वं मृते तु दाहादिसपिण्डनान्तं सर्वं कार्यमिति भट्टचरणाः ।

सपिण्डनविधिमाह बैजवापः—'समाप्ते संवत्सरे चत्वार्युदपात्राणि प्रयुनक्ति एकं प्रेताय, त्रीणि पितृभ्यः प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्या*मेवं पिण्डोऽथाभिमृशाति—

एष वोऽनुगतः प्रेतः पितरस्तं ददामि वः ।

पितुर्यः पितामहस्तत्पराभ्यां द्वाभ्यां दद्यादित्यर्थः । पितामहस्त्वात्मनः प्रपितामहः सम्प्रदानभूतः स्थित एवेति पितुः पितामहादित्रयलाभः । *सर्वत्रेति । इदानींतनाः शिष्टाः परिगृह्णन्ति । *भ्राता वेति । एकादशाहान्तश्राद्धकर्ता स तदन्यो वेत्यत्र न विशेषः । *ये इति । तेषां सपिण्डतां कुर्यादित्यनुवर्तते । हेतुमाह—*तद्विनेति । सपिण्डनं विनेत्यर्थः । *अत्रेति । पुनः सपिण्डनांशे इत्यर्थः । यदि च व्युत्क्रममृतस्य सपिण्डनमकृतं तदा पितामहे मृते तेन कुर्यादिति व्याख्या तेषां पुनरिति योजनयोचितेति बोध्यम् । *एवंपिण्ड इति । पिण्डोत्थानपर्यन्तं पिण्डदा-

शिवं भवतु शेषाणां जायन्तां चिरजीविनः ॥

"समानी वः" "संगच्छध्वं संवदध्वम्" इति (१)द्वाभ्याम्' इति । यद्यपि—

तच्चापि देवरहितमेकार्घ्यैकपवित्रकम् ।
नैवाग्नौकरणं तत्र तच्चावाहनवर्जितम् ॥

इति मार्कण्डेयेनोक्तम्, तथापि—

सपिण्डीकरणं श्राद्धं दैवपूर्वं नियोजयेत् ।

इत्यादिविरोधाद्विकल्पः, प्रेतांशे वा ज्ञेयम् ।

अत्र कामकालौ विश्वेदेवावपीत्युक्तं प्राक् । मैत्रायणीयपरिशिष्टे—

पित्र्यविप्रकरे होमः साग्नेरपि भवेदिह ।

यत्तु गोभिलः—

अनुक्तकालेष्वपि तु व्युत्क्रमेण मृतावपि ।
आमेन वापि सापिण्ड्यं हेम्ना वापि प्रकल्पयेत्॥इति,

तदापदि मातापितृभिन्नपरम्,

आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ।

इति तेनैवोक्तेः । शुद्धितत्त्वे कामधेनौ च लघुहारीतः—

सपिण्डीकरणं यावत्प्रेतश्राद्धं तु षोडशम् ।
पक्वान्नेनैव कर्तव्यं सामिषेण द्विजातिभिः ॥

विश्वप्रकाशे—

प्रेतः सपिण्डनादूर्ध्वं पितृलोकेऽनुगच्छति ।
कुर्यात्तस्य तु पाथेयं द्वितीयेऽह्नि सपिण्डनात् ॥

न्त्रप्रयोगं कृत्वा पिण्डसंयोजनं कार्यं, "दत्त्वा पिण्डान्" "निरूप्य चतुरः पिण्डान्" इत्यादिपिण्डदानभावनोत्तरं तद्विधानात् । विष्णुना तु विसर्जनोत्तरमुक्तम् "उच्छिष्टसंनिधौ पिण्डत्रयं कुर्यात्

---

(१) 'द्वाभ्याम् इति यद्यपि' नास्ति ग० ।

स्मृत्यर्थसारेऽप्येवम् । ततो वृद्धिश्राद्धं कुर्यात् । एतन्मलमासेपि कार्यम्,

अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा ।
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति हेमाद्रौ हारीतोक्तेः ॥

इति भट्टकमलाकरकृते निर्णयसिन्धौ सपिण्डीकरणम् ॥

अथ प्रथमाब्दे निषिद्धानि । हेमाद्रौ—

*स्नानं चैव महादानं *स्वाध्यायं चा*ग्नितर्पणम् ।
प्रथमाब्दे न कुर्वीत महागुरुनिपातने ॥

अन्यतर्पणमिति शुद्धितत्त्वे पाठः ।

अग्नितर्पणं लक्षहोमादि नत्वा*धानम् ।

तत्तु प्रथमाब्दे भवत्येव । तदाह हेमाद्रावुशनाः—

पितुः सपिण्डीकरणं वार्षिके मृतवासरे ।
आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् ॥

आदिपदं *वृद्धिनिमित्तनित्यकर्मपरम् । दिवोदासीये-

महातीर्थस्य गमनमुपवासव्रतानि च ।
संवत्सरं न कुर्वीत महागुरुनिपातने ॥

देवपूर्वान् ब्राह्मणानाचान्तानदत्तदक्षिणांश्चानुव्रज्य विसर्जयेत् । ततः प्रेतपिण्डमर्घ्यपात्रोदकवत् पिण्डत्रये निदध्यादिति" । केचित्तु संयोजितान् त्रीन् पिण्डान् इदानीन्तनमृतमारभ्य पुरुषत्रयपर्यन्तं पुनरपि पार्वणवन्नामगोत्राण्युच्चार्य दद्यादित्याहुः । तत्तु न ग्रन्थकृत्संमतम्, तथावचनानुपलम्भात् । अक्षय्यादौ तु प्रेतशब्द एव । पिण्डमात्रेण पितृत्वाप्राप्तेः सङ्गस्य जनकत्वात् ।

*स्नानं समावर्तनं काम्यस्नानं वा । *स्वाध्यायं काम्याध्ययनम् । *अग्नितर्पणमिति पितृतर्पणमिति पाठान्तरम् । *आधानं पुनराधानम् । *वृद्धीति । आवश्यकेषु वि-

इदं श्राद्धकौमुद्यां देवीपुराणस्थमुक्तम् ।
गौडनिबन्धे मात्स्ये—

सापिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।
वृद्धीष्टापूर्तयोग्यश्च गृहस्थश्च सदा भवेत् ॥

वर्षान्तसपिण्डनाभावे नाधिकारीत्यर्थः । गृहस्थः सपिण्डोऽपीत्यर्थः । अत एव—

*प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् ।
आचतुर्थं, ततः पुंसि पञ्चमे शुभदं भवेत् ॥

इति ज्योतिषे उक्तम् । माधवीये देवलः—

प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।
न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः ॥

इदं वर्षान्तसपिण्डनपरम्,

तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ।

इति लघुहारीताद्येकवाक्यत्वात् । वृद्धिनिमित्तापकर्षे तु वर्ष(१)मध्येऽपि काम्यादि भवत्येवेति गौडाः । पित्र्यं सपिण्डनम् । अत एव लौगाक्षिः—

अन्येषां प्रेतकार्याणि महागुरुनिपातने ।
कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत् ॥

वाहचौलोपनयनेष्टापूर्तेषु वर्षमध्येऽधिकार इत्यर्थः । *प्रेतकर्माणीति । येषां करिष्यमाणवृद्धिश्राद्धे देवतात्वं तेषामेवापकर्षो नान्येषां प्रमाणाभावादिति मते आत्मानमारभ्य चतुर्थः प्रपितामहः तत्पर्यन्तसापिण्डनमावश्यकम् । स्वकर्तृकाभ्युदयिकश्राद्धे पितृपितामहप्रपितामहानां देवतात्वात्सापिण्डीकरणाभावे वृद्धिश्राद्धाभावात् । पञ्चमस्य वृद्धप्रपितामहस्य पौत्रपुत्रकर्तृकाभ्युदये देवतात्वाभावात् सपिण्डीकरणान्तश्राद्धाभावेऽपि तत्कर्तृकमाभ्युद-

---

(१) 'वर्षमध्येऽपि' नास्ति ग० ।

दाहाद्येकादशाहान्तं कार्यम् । तत्राशौचान्तरस्याप्रतिबन्धकत्वात् ।

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।

इत्युक्तेश्च । एकं सपिण्डनम् ।

पत्न्यादौ त्वपवादमाह माधवीये ऋष्यशृङ्गः--

पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य च ।
स्नुषास्वस्रोश्च पित्रोश्च संघातमरणं यदि ॥
अर्वागब्दान्मातृपितृपूर्वं सापिण्ड्यमाचरेत् ॥

लौगाक्षिः—

पत्नी पुत्रस्तथा पौत्रो भ्राता तत्पुत्रका अपि ।
पितरौ च यदैकस्मिन् (१)म्रियेरन्वासरे तदा ॥
आद्यमेकादशे कुर्यात्त्रिपक्षे तु सपिण्डनम् ॥

धवलनिबन्धे—

महागुरुनिपाते तु प्रेतकार्यं यथाविधि ।
कुर्यात्संवत्सरादर्वागेकोद्दिष्टं न पार्वणम् ॥

भृगुः—

माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा ।
एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पितुः ॥

एतदपि सपिण्डनपरम् । पितुर्मृतावन्यस्य श्राद्धं न चरेदित्यर्थः । शुद्धितत्त्वे श्रा(२)द्धकौमुद्यां च देवलः-

अन्यश्राद्धं परान्नं च गन्धमाल्यं च मैथुनम् ।

ार्थिकं शुद्धमित्यर्थः । यस्यकस्यापि सपिण्डस्य गृहे वृद्ध्युपस्थितौ येन केनापि सपिण्डेन स्वपित्रादेः सपिण्डनं कार्यमिति दाक्षिणात्यरीतौ च वर्षमध्ये सपिण्डनेऽप्यनाधिकारश्चतुर्थान्तः । अत एव गृहस्थः सपिण्डोऽपि इत्युक्तम् । पञ्चमादौ तु उक्तदाक्षिणा-

---

(१) 'म्रियेताम्' । (२) 'श्राद्धकौमुद्यां च' नास्ति ग० ।

वर्जयेद् गुरुपाते तु यावत्पूर्णो न वत्सरः ॥

पारस्करभाष्ये बृहस्पतिः—

पितर्युपरते पुत्रो *मातुः श्राद्धान्निवर्तते ।
मातर्यपि च वृत्तायां पितृश्राद्धादृते समम् ॥

समं पितरं विनाऽन्यश्राद्धं नेत्यर्थः । शुद्धितत्त्वे देवलः—

महागुरुनिपाते तु काम्यं किंचिन्न चाचरेत् ।
आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं देवक्रियां तथा ॥

एतत्सपिण्डनात्प्रागिति केचित् । तदुत्तरमपीत्यन्ये । श्राद्धकौमुद्यां कालिकापुराणे पू(१)र्वार्धे—

विशेषतः शिवपूजां प्रमीतपितृको नरः ।
यावद्वत्सरपर्यन्तं *मनसापि न चाचरेत् ॥

केचित्तु—

पित्रोरब्दमशौचं स्यात्षण्मासं मातुरेव च ।
त्रैमासिकं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥

इति स्मृतेः सापत्नमातु*रब्दार्धमाहुः । श्राद्धकौमुदीकारस्तु—

द्वयोरेव महागुर्वोरब्दमेकमशौचकम् ।
नान्येषामधिकाशौचं स्वजातिविहितात्किल ॥

त्याचाराद् वर्षमध्ये सपिण्डने इष्टापूर्तादिकमपि शुभदामिति । *मातुः श्राद्धादिति । यत्र मातृमरणानन्तरं पिता मृतस्तत्र मातुः सपिण्डनस्यावश्यकतया स्वपुत्रादिना तत्कारणीयम् । अथवा यत्र मातुः सपिण्डनमपि न कार्यं तत्रान्यसपिण्डने किं वक्तव्यमित्यन्यसपिण्डनानिन्दायां तात्पर्यम् । *मनसापीति । अपिः संक्षेपपूजाविशेषलाभार्थः *अब्दार्धमिति । पूजाऽनाचरणार्थं·

---

(१) 'पूर्वार्धे' नास्ति क० छ० ।

इति समूलजातूकर्ण्यविरोधान्निर्मूलमाह । हेमाद्रौ भविष्ये—

गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते ।

त्रिस्थलीसेतौ गारुडे—

तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकम् ।
अ(१)ब्दमध्ये न कुर्वीत महागुरुविपत्तिषु ॥

इदं वृद्ध्यर्थसपिण्डनाभावे । वृद्धौ सपिण्डनापकर्षेऽब्दमध्येऽपि दर्शादि कार्यमेव,

पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम् ।

इति छन्दोगपरिशिष्टात्;

सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।

इति मात्स्यात्;

ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते ।
विन्दते पितृलोकं च ततः श्राद्धं प्रवर्तते ॥

इति हारीताच्चेति शूलपाणिः । यत्तु कातीयम्—

सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम् ।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः ॥ इति ।

तत्रैकोद्दिष्टविधिना न दद्यादित्यन्वयः । *तुर्यपादेन पार्वणे विकल्प उक्तः ।

(ब्रह्म(२)वैवर्ते—

उद्वाहश्चोपनयनं प्रथमेऽब्दे महीपते ।
कृते सपिण्डनेऽप्यूर्ध्वमस्थ्नां चोद्धरणं त्यजेत् ॥
तथापि कर्तुमिच्छन्ति त्रीणि चैतानि वै सुताः ।

मिति शेषः । ननु पुनर्दद्यादित्यधिकं स्यादित्यत आह—*तुर्येति ।

प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि ।

---

(१) 'प्रथमाब्दे' क० (२) कंसान्तर्गतं नास्ति । क० छ०

मासिकान्यवशिष्टानि चापकृष्य चरेत्पुनः ॥)

अत्रेदं तत्त्वम् । वृद्धिं विनाऽर्वागपि सपिण्डनापकर्षे पितृत्वप्राप्तिर्वर्षान्त एव,

कृते सापिण्डीकरणे नरः संवत्सरात्परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥

इति विष्णुधर्मोक्तेः—

अर्वाक्संवत्सराद्यस्य सपिण्डीकरणं भवेत् ।
प्रेतत्वमिह तस्यापि विज्ञेयं वत्सरं नृप ॥

इत्यग्निपुराणाच्च । तेन तत्सत्त्वेऽपि वृद्धिदैवपित्र्येष्वनधिकारः । वृद्धिनिमित्ते त्व*नन्तरमेव,

अर्वाक्संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा ।
ये सपिण्डीकृताः प्रेता न तेषां तु*पृथक् क्रिया ॥

इति शातातपोक्तेः । तथैव काम्यमिति हेमाद्रिधृतहारीतादिवशाच्चैवमिति । तथा--

अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् ।
प्रथमेऽब्दे न कुर्वीत *(१)कृतेऽपि तु सपिण्डने ॥

अस्यापवादः—

अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकम् ।
प्रथमेऽब्देऽपि कुर्वीत*यदि स्याद्भक्तिमान्सुतः ॥

*भक्त्याख्यं श्राद्धं तद्वानिति मदनपारिजातादयः । अन्ये यथाश्रुतमाहुः । तत्त्वं तु यदीदं समूलं तदा वृद्धिं

इति प्रागुक्तत्वादिति भावः । *अनन्तरमेवेति । पितृत्वप्राप्तिरिति वर्तते । *पृथक्क्रियेति । आभ्युदयिकश्राद्धदेवतात्वात् पृथक्कार्येत्यर्थः । एवञ्च पितृत्वावाप्तिरर्थसिद्धैवेति । *कृतेपि त्विति । यदि न स्यात्सापिण्डनामिति अन्यत्र पाठः । *यदि स्यादिति । कृतं यस्यौर्ध्वदेहिकमिति केचित् । *भ-

---

(१) 'कृते पितुः' ग०

विनापकर्षे पूर्वं,*वृद्ध्यर्थं तु परमिति योज्यम् । पतितानां गयायां विशेषो ब्राह्मे—

क्रियते पतितानां च गते संवत्सरे क्वचित् ।
देशधर्मप्रमाणत्वाद्गयाश्राद्धं स्वबन्धुभिः ॥

अथ विधानानि । तत्र पञ्चकमृते मदनरत्ने गारुडे—

आदौ कृत्वा *धनिष्ठार्धमेतन्नक्षत्रपञ्चकम् ।
रेवत्यन्तं सदा दूष्यमशुभं दाहकर्मणि ॥
शवस्य च समीपे तु क्षेप्तव्याः पुत्तलास्तदा ।
दर्भमयास्तु*चत्वार ऋक्षमन्त्राभिमन्त्रिताः ॥
ततो दाहः प्रकर्तव्यस्तैश्च पुत्तलकैः सह ।
सूतकान्ते ततः पुत्रैः कार्यं शान्तिकपौष्टिकम् ॥
*पञ्चकेषु मृतो यो वै न गतिं लभते नरः ।
तिलांश्चैव हिरण्य च तमुद्दिश्य घृतं ददेत् ॥

क्रियानिबन्धे—

भाजनोपानहौ छत्रं हैममुद्रां च वाससी ।

त्याख्यामिति । देवतात्वसंपादकं चेदम् । *वृद्ध्यर्थं तु इति । अपकर्षे इति वर्तते । एवञ्च भक्तिमानिति यथाश्रुतमेव सिद्धाया भक्तेरनुवादः ।

यतिधर्मे—

नाश्नन्ति पितरो देवा मृते वै गृहमेधिनि ।
भिक्षुर्भिक्षां न गृह्णाति यावत्कुर्यात्सपिण्डनम् ॥

अत्र वर्षान्ते वृद्ध्यर्थं वा सपिण्डनमवधिः । पितुरब्दमशौचं स्यादिति वचनानुसारिणो यतयः । *धनिष्ठार्धमिति । अतिनिषिद्धं धनिष्ठाया एव निषेधात् । *चत्वार इति चतुर्नक्षत्राभिप्रायकम् । तेन दर्भाणां प्रतिमाः कार्याः इत्यादिना न विरोधः । ऋक्षमन्त्रा जप्याः । अत्र वसवोरन्त १, तत्त्वायामि ब्रह्मणा २, सुतनोहिर्बुध्न्यः ३, ऋद्रुद्राय ४, पूषा गा अन्वेतु ५ । शान्तिकपौष्टिकं वक्ष्यति ।

दक्षिणा दीयते विप्रे सर्वपातक*मोचनी ॥

मदनरत्ने गार्ग्यः—

यदि भद्रातिथीनां स्याद् भानुभौमशनैश्चरैः ।
त्रिपादृक्षैश्च संयोगो द्वयोर्योगे द्विपुष्करः ॥
द्वित्रिपुष्करयोगे तु मृतिर्मृत्यन्तरावहा ।
दहने मरणे चैव त्रिगुणं स्यात्त्रिपुष्करे ॥
खननेऽप्येवमेव स्यादेतद्दोषोपशान्तये ।
तिलपिष्टैर्यवैर्वापि शरीरं कारयेत्ततः ॥
शूर्पे निधायालंकृत्य दाहयेत्पैतृकोपरि ॥

तद्दाहे मन्त्रमाह बौधायनः—

अस्मात्त्वमिति मन्त्रेण तिलपिष्टं प्रदाहयेत् ।
द्वित्रिपुष्करयोर्दोषस्त्रिभिः कृच्छ्रैर्व्यपोहति ॥
वासवे मरणं चेत्स्याद् गृहे वापि पुनर्मृतिः ।
सुवर्णं दक्षिणां दद्यात्कृष्णवस्त्रमथापि वा ॥

वासवं धनिष्ठा । ब्राह्मे—

कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते ।
न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत् ॥
न तस्य दाहः कर्तव्यो विनाशात्स्वेषु*जन्तुषु ।
अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकम् ।
धनिष्ठापञ्चके जीवो मृतो यदि कथंचन ।
त्रिपुष्करे याम्यभे वा कुलजान्मारयेद्ध्रुवम् ॥
तत्रानिष्टविनाशार्थं विधानं समुदीर्यते ।

प्रेतस्य गतिसिद्ध्यर्थमाह—*पञ्चकेष्विति । *मोचनीति ।

बालवृद्धस्य यूनश्च पञ्चकेषु मृतस्य च ।
विधानं यो न कुर्वीत विघ्नस्तस्य प्रजायते ॥

इत्युत्तरश्लोकः । *जन्तुष्विति । ततः पञ्चकानन्तरं

दर्भाणां प्रतिमाः कार्याः पञ्चोर्णासूत्रवेष्टिताः ॥
यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् ॥
प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ।
प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ॥

अत्र प्रतिमा गन्धपुष्पैः पूजयित्वा प्रथमां शिरसि, द्वितीयां नेत्रयोः, तृतीयां वामकुक्षौ, चतुर्थीं नाभौ, पञ्चमीं पादयोर्न्यस्य तदुपरि नामभिर्घृतं*हुत्वा—"यमाय सोमं" "त्र्यम्बकम्" इति मन्त्राभ्यां प्रत्येकं तास्वाज्यं हुनेदिति भट्टाः ।

सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ।
कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्मने ॥
ब्रह्मविष्णुमहेशेन्द्रवरुणप्रीतये ततः ।
माषमुद्गयवव्रीहिप्रियंग्वादि प्रयच्छति ॥
स्वर्णदान रुद्रजाप्यं लक्षहोमो द्विजार्चनम् ।
गोभूदानं षडंशेन कुर्याद्दोषोपशान्तये ॥

अपरार्के—

धनिष्ठापञ्चकमृते पञ्चरत्नानि तन्मुखे ।
प्रास्याहुतित्रयं तत्र हुनेद्वहवपामिति ॥
ततो निर्हरणं कुर्यादेष साग्नेर्विधिः स्मृतः ।
इतरं निखनेदेव जले वा प्रतिपादयेत् ॥
त्रिपादर्क्षमृते तद्वद्धिरण्यशकलं मुखे ।
न्यस्य पिष्टमयं कुर्यात्पुरुषत्रितयं ततः ।
होमं प्रतिमुखं कुर्यात्तथा वहवपामिति ।
कार्ष्णायसं च कार्पासं कुसुम्भं प्रतिपाद्य च ।
निर्यात्य साग्निं संस्कुर्याद्भुव्यग्नौ वान्यमुत्सृजेत् ॥

कार्यं दाहादिकं मध्ये न त्वित्यर्थः । *हुत्वेति । उदकधारां च द-

तत्रैव—

कनकं हीरकं नीलं पद्मरागं च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्वदर्शिभिः ॥
रत्नानां चाप्यभावे तु स्वर्णं कर्षार्धमेव च ।
सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः ॥

मदनरत्नेऽप्येवम् । तथा—

एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकम् ।
नवषट्त्रिपलं वापि दद्याद्विप्राय शक्तितः ॥

तथा*न्यत्र—

*स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः ।
अन्वाधानं निर्वपणं देवतानां तथाहुतिः ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दघ्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात् ॥
विधिना श्रपणं कृत्वा एकैकामाहुतिं *हुनेत् ॥

त्रिपादर्क्षेऽप्येतदेव । अपरार्के—

पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी ।
पूर्वाभाद्रा विशाखा च ज्ञेयमेतत्त्रिपादभम् ॥

मयूरचित्रे गर्गः—

मृतः श्मशानं यो नीत उपजीवति मानवः ।

त्वेति अन्त्येष्टिः । *अन्यत्र बौधायनीयशान्तिसर्वस्वे । *स्वगृह्योक्तेति ।

पञ्चके ये मृता विप्रास्तेषां शान्तिं विधानतः ।
अतीते सूतके कुर्यात्कोचित्तदृक्षयोगतः ॥

इत्यादि । *हुनेदिति ।

कृष्णां गां कृष्णवत्सां च हैमानिष्कसमन्विताम् ।

गृहे यस्य प्रविष्टोसौ तिष्ठेदथ कदाचन ॥
अचिरान्मृत्युमायाति हृतदारपरिग्रहः ।
तत्र शान्तिं प्रवक्ष्यामि धर्मराजमतं यथा ॥
सक्षीराणां घृताक्तानामग्नेर्हुत्वा मुखे बुधः ।
औदुम्बराणां विधिवत्ततः शान्तिः कृता भवेत् ॥
सावित्र्यष्टसहस्रेण क्षीरशान्तिं च कारयेत ।
कापिलां तिलकांस्यं च हुतान्ते भूरिदक्षिणा ॥ इति ।

अथ ब्रह्मचारिमृतौ शौनकः—

ब्रह्मचारिमृतौ रीतिं कथयामि समासतः ।
तत्रावकीर्णदोषस्य प्रायश्चित्तं प्रशान्तये ॥
द्वादशाब्दं षडब्दं वा त्र्यब्दं शक्त्याथवा*चरेत् ।
स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि ॥
संयोज्य चार्कविधिना संयोज्यौ तौ ततः परम् ॥

देशकालौ स्मृत्वा—'अमुकगोत्राऽमुकनाम्नो मृतस्य ब्रह्मचारिणो व्रतविसर्गं कारिष्ये' इत्युक्त्वा हेम्ना नान्दीश्राद्धं कृत्वाऽग्निं प्रतिष्ठाप्याघारान्ते चतसृभिर्व्याहृतिभिरग्नये व्रतपतये व्रतानुष्ठानसंपादनाय विश्वेभ्यो देवेभ्यश्चाज्यं हुत्वा स्विष्टकृदादि समाप्य पुनर्देशकालौ स्मृत्वाऽर्कविवाहं करिष्ये इत्युक्त्वा हेम्ना नान्दीश्राद्धं कृत्वाऽर्कशाखां शवं च हरिद्रया लिप्त्वा पीतसूत्रेण वस्त्रयुग्मेन चावेष्ट्याऽग्निं प्रतिष्ठाप्याघारान्तेऽग्नये बृहस्पतये विवाहविधियोजकाय च "यस्मै त्वं कामकामाय" इति कामाय व्याहृतिभिश्चाज्यं हुत्वा स्विष्टकृदादि

दद्याद् विप्राय शान्ताय प्रीतो भवतु मे यमः ॥
इत्यपि क्वचित् । *चरेदिति ।
ततो वृषविसर्गाख्यं विधिं सम्यक् समाचरेत् ।

समाप्यार्कशाखां शवं च दहेत् । विधानमालायाम्—

येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि ।
तत्कुलं क्षयमाप्नोति सोऽपि*दुर्गतिमाप्नुयात् ॥
मृतस्य म्रियमाणस्य षडब्दं व्रतमादिशेत् ॥
त्रिंशद्भ्यो *ब्रह्मचारिभ्यो दद्यात्कौपीनकान्नवान् ।
हस्तमात्रान्कर्णमात्रान्दद्यात्कृष्णाजिनानि च ॥
पादुकाछत्रमाल्यानि गोपीचन्दनमेव च ।
मणिप्रवालमालाश्च *भूषणादि समर्पयेत् ॥
एवं कृते विधाने च विघ्नः कोऽपि न जायते ।

अत्र मूलं मृग्यम् ॥

कुष्ठिमृतौ तु यमः—

मृतस्य कुष्ठिनो देहं निखनेद्गोष्ठभूमिषु ।
वासरात्रितयं पश्चादुद्धृत्यान्यत्र तं दहेत् ॥
न गङ्गाप्लवनं कार्यं निक्षेपे विधिरुच्यते ।
षडब्दव्रतपूर्णेन विधिनान्त्यं क्रतुं चरेत् ॥
ततोऽस्थिसंचयं तस्य गङ्गायां प्रक्षिपेत्सुधीः ।
मासिमासि ततः कुर्यान्मासि श्राद्धानि पार्वणान् ॥
इत्येतत्कुष्ठिमरणे कथितं शास्त्रकोविदैः ॥

शुद्धितत्त्वे भविष्ये—

शृणु कुष्ठिगणं विप्र उत्तरोत्तरतो गुरुम् ।
विचर्चिका तु दुश्चर्मा चर्चरीयस्तृतीयकः ॥

इत्युत्तरार्धम् । एवमेव ब्रम्हचारिपदस्थाने स्नातकपदं योजयित्वा विधिर्द्रष्टव्यः । *दुर्गतिमिति । सा च तत्रैव—

ग्रहत्वमाप्नुयाद् बोधिद्रुमेऽनवरतं वसेत् । इति ।

*ब्रह्मचारिभ्य इति । तदभावे “ये सकृद्रात्रौ संयुज्यन्ते ब्रह्मचारिण एव ते” इत्युक्तब्रह्मचारिभ्यः । साधुगृहस्थेभ्य इत्य-

विकर्चूर्व्रणताम्रौ च कृष्णश्वेते तथाष्टकम् ॥

इत्युक्त्वा—

मृते तु प्रापयेत्तीर्थमथवा तरुमूलकम् ।
न पिण्डं नोदकं कार्यं नच दानक्रियां चरेत् ॥
षण्मासीयस्त्रिमासीयो मृतः कुष्ठी कदाचन ।
यदि स्नेहाच्चरेद्दाहं यतिचान्द्रायणं चरेत् ॥

अकृतप्रायश्चित्तकुष्ठ्यादिदाहे इदं प्रायश्चित्तम् ॥ अत एव कुनख्यादिवत्कुष्ठिनोपि द्वादशरात्रं शूलपाणिनोक्तम् । अतएवान्यदीयकुष्ठिनो मरणान्तमाशौचमुक्तं कौर्मे—

क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥

महारोगास्तु—

वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिताः ॥ इति ।

रजस्वलायास्तु वृद्धशातातपः—

रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत् ।
ऊर्ध्वं त्रिरात्रात्स्नातां तां शवधर्मेण दाहयेत् ॥

अतः प्रक्षाल्य काष्ठवद्दग्ध्वा *त्र्यहोर्ध्वं दहेत् ॥ सङ्कटे तु मदनरत्ने स्मृत्यन्तरे—

उदक्या सूतिका वापि मृता स्याद्यदि तां तदा ।
आशौचे त्वनतिक्रान्ते दाहयेदन्तरा यदि ॥
उद्धृतेन तु तोयेन स्नापयित्वा तु मन्त्रतः ।
आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाश्चतसृभिः ॥
पवमानानुवाकेन यदन्तीति च सप्तभिः ।

न्ये । *भूषणादीति । ब्रह्मसूत्राणि चार्पयेदिति अन्त्येष्टिः। *त्र्य-

ततो यज्ञपवित्रेण गोमूत्रेणाथ ते द्विजाः ॥
स्नापयित्वाऽन्यवसनेनाच्छाद्य शवधर्मतः ।
दाहादिकं ततः कुर्यात्प्रजापतिवचो यथा ॥

यज्ञपवित्रमापो अस्मानिति । मिताक्षरायाम्—

पञ्चभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलाम् ।
वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकम् ॥

गृह्यकारिकायाम्—

अन्तरिक्षमृता ये च वह्नावप्सु प्रमादतः ।
उदक्या सूतिका नारी चरेच्चान्द्रायणत्रयम् ॥

ततो यवपिष्टेना*नुलिप्याष्टोत्तरशतं शूर्पोदकैः *संस्नाप्य *भस्मगोमयमृत्कुशोदकपञ्चगव्यशुद्धोदकै*रापोहिष्ठापावमानीभिः संस्नाप्यान्यवस्त्रे धृते दहेदिति भट्टाः ।

अत्र प्रायश्चित्तमाह बौधायनः—

उदक्यासूतिकामृत्यौ चरेच्चान्द्रायणत्रयम् । इति ।

सूतिकायास्तु मिताक्षरायाम्—

सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ।
कुम्भे सलिलमादाय पञ्चगव्यं क्षिपेत्ततः ॥
पुण्यार्ग्भिरभिमन्त्र्यापो वाचा शुद्धिं लभेत्ततः ।
तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥
अब्लिङ्गाभिर्मन्त्रिताभिर्वामदेव्याभिरेव च ।
अन्यैश्च वारुणैर्मन्त्रैः संस्नाप्य विधिना दहेत् ॥

होर्ध्वमिति अतन्त्रम् । *अनुलिप्येति । स्वयं स्नात्वेति शेषः। *संस्नाप्येति । प्रेतं प्रक्षाल्येति शेषः । *भस्मेति । संस्नापयेत्यनुवर्तते । *आपोहिष्ठेति । पावमानीः स्वस्त्ययनीः, यदन्ति यच्च दूरके, आपोहिष्ठेति चतसृभिः, कया नः इति

गृह्यकारिकायाम्—

सूतिकामरणे प्राप्ते सर्वौषध्यनुलेपनम् ।
असूतकी तु संस्पृष्टः शूर्पाणां तु शतं क्षिपेत् ॥

प्रायश्चित्ते विशेषस्तत्रैव—

सूतिका तु यदा साध्वी विस्नाता मरणं गता ।
त्रिवर्षपूर्णपर्यन्तं शुध्येत्कृच्छ्रेण सर्वदा ॥

इदं चाद्यत्र्यहे ॥

सूतिका तु यदा नारी रजसा तु परिप्लुता ।
म्रियते चेत्तु सा नारी द्विवर्षं कृच्छ्रमाचरेत् ॥

इदं द्वितीयत्र्यहे ॥

सूतिका तु यदा साध्वी विस्नाता मरणं गता ।
अब्दं कृच्छ्रेण शुद्ध्येत व्यासस्य वचनं यथा ॥

इदं तृतीयत्र्यहे । अत्राशक्तौ पक्षान्तरमुक्तं तत्रैव—

सूतिका तु यदा नारी विस्नाता मरणं गता ।
त्रिषण्णवदिनादर्वागे*काब्देन विशुद्ध्यति ॥

ऊर्ध्वं तु—

सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।
मासमेकावधिं यावत्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥

गर्भिणीमृतौ मदनरत्ने शौनकः—

गर्भिण्युदक्यासंस्कारं शिशुसंस्कारमेव च ।

त्रिभिरित्यर्थः । *एकाब्देनेति । एककृच्छ्रेणेति पठित्वा दशाहोर्ध्वमेककृच्छ्रमित्यन्ये ।

सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।
मासमेकावधिर्यावत्त्रिभिः कृच्छ्रैर्व्यपोहति ॥

इति तु दशाहोर्ध्वम् । सर्वं च प्रायश्चित्तं तदैव प्रत्याम्नायेन सूतकान्ते वा कार्यम् ।

प्रवक्ष्यामि समासेन शौनकोऽहं द्विजन्मनाम् ॥
गर्भिणीमरणे प्राप्ते गोमूत्रेण जलैः सह ।
आपोहिष्ठादिभिर्मन्त्रैः प्रोक्ष्य भर्ता समास्थितः ॥
प्रेतं श्मशाने नीत्वाऽथोल्लिख्य सव्योदरं ततः ।
पुत्रमादाय जीवंश्चेत्स्तनं दत्त्वा सुताय तु ॥
यस्ते स्तनः शशय इत्यृचा ग्रामे निधाय च ।
उदरं चाव्रणं कुर्यात्पृषदाज्येन पूर्य च ॥
मृद्भस्मकुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः ।
स्नाप्य चाच्छाद्य वासोभिः शवधर्मेण दाहयेत् ॥

तत्रैव षडशीतिमते गद्यानि—"गर्भिण्यां मृतायां दक्षिणाशिरसं निधाय तस्या नाभिरन्ध्रात्सव्यमुदरं चतुरङ्गुलं हिरण्यगर्भः समवर्ततेति छित्त्वा गर्भश्चेदप्राणस्तं प्रक्षाल्य निखनेत्स यदि जीवन् 'जीव त्वं मम पुत्रक' इत्युक्त्वा क्षेत्रियेत्वेति पञ्चभिः स्नापयित्वा हिरण्यमन्तर्धाय भूमौ निधाय व्याहृतिभिरभिमन्त्र्य यस्ते स्तनः शशय इति स्तनं पाययित्वा शिशुं ग्रामं प्रापयेत् । गर्भच्छेदस्थले शतायुधायेति पञ्चाहुतीर्हुत्वा प्राणाय स्वाहा पूष्णे स्वाहेत्यनुवाकाभ्यां व्याहृत्या वाऽऽज्यं हुत्वा भिन्नमुदरं सूत्रेण संग्रथ्य घृतेनानुलिप्य ब्राह्मणाय तिलान् गां भूमिं सुवर्णं दद्यादथ यथोक्तेन कल्पेन दहेत्" । बौधायनेन तु शतायुधायेति पञ्चहोमानन्तरं प्रयासाय यासाय वियासाय संयासायोद्यासाय शुचे शोकाय तप्यते तपत्यै ब्रह्महत्यायै सर्वस्मै इति स्वाहान्तैराहुतयोऽप्यधिका उक्ताः । गृह्यकारिकायाम्—

यदा गर्भवती नारी सशल्या संस्थिता भवेत् ।
कुक्षि भित्त्वा ततः शल्यं निर्हरेद्यदि जीवति ॥
प्रमीतं निखनेत्तं तु प्रायश्चित्तमतः परम् ।

सा त्रयस्त्रिंशता कृच्छ्रैः शुध्यते शल्यदोषतः ॥
सगर्भदहने तस्या वर्णजं वधपातकम् ।
प्रायश्चित्तं चरित्वा तु शुद्ध्यन्ति पापकारिणः ॥
दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत् ॥
अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव च ।
सर्वपापक्षयकरं निरयोत्तारणाय च ॥
अनेकस्वर्गफलदं मुक्तिदं च तथैव च ।
जन्मान्तरे च सौभाग्यधनपुत्रादिवृद्धिदम् ॥

देशकालौ स्मृत्वाऽरुन्धतीसमाचारत्व-*स्वर्गलोकमहीयमानत्व-मनुष्यलोमसमसंख्याब्दावच्छिन्नस्वर्गवास-भर्तृसहितचतुर्दशेन्द्रावच्छिन्नकालिकक्रीडमानत्व-मातृपितृश्वशुरकुलत्रयपूतत्व-ब्रह्मघ्नमित्रघ्नकृतघ्नपतिपूतत्व-पत्यावियोग-कामा भर्तृ*ज्वलच्चितारोहणं करिष्ये । अनुगमने तु-फलमुल्लिख्यान्वारोहणं करिष्ये इत्युक्त्वा *हरिद्राकुङ्कुमाञ्जनादियुतशूर्पाणि सुवासिनीभ्यो दद्यात् । मन्त्रस्तु—

लक्ष्मीनारायणो देवो बलस्सत्वगुणाश्रयः ।

---

*स्वर्गलोकेति । भत्रा स्वरोमसमिताब्दानां सहस्रं स्वर्गमाचरेत् । *ज्वलच्चितारोहणं स्वर्गमनम् । *हरिद्रेति ।

देवैः सम्पादितो मह्यं पतिस्त्वं सार्वदैवतः ।
त्वया सह गमिष्यामि भर्ता त्वं चान्यजन्मनि ॥

इत्युक्त्वा स्नात्वा कुङ्कुमादिना स्वात्मानमलङ्कृत्य पुत्रादिभ्यो बन्धुभ्यश्चाशिषो दत्त्वा—

चितिस्थो भगवानग्निर्विष्णुरूपी जनार्दनः ।
पतिलोकसमावाप्त्यै गृहाणार्घ्यं नमोऽस्तु ते ॥

इति विष्णुरूपिणेऽग्नयेऽर्घ्यं दत्त्वा—

गाढं सत्त्वं च मे देया(१)द्वायनैः परितोषितः ॥
सोपस्कराणि शूर्पाणि (१)वायनैः संयुतानि च ।
लक्ष्मीनारायणप्रीत्यै सत्त्वकामा ददाम्यहम् ॥
अग्नेः समीपमागत्य *पञ्चरत्नानि पल्लवैः ।
नीलाञ्जनं तथा बद्ध्वा मुखे मुक्ताफलं न्यसेत् ॥
ततोऽग्निप्रार्थनं कृत्वा मन्त्रेणानेन मिश्रितम् ।
स्वाहासंश्लेषनि(२)र्विण्ण सर्वगोत्र हुताशन ॥
सत्त्वमार्गप्रदानेन नय मां भर्तुरन्तिकम् ॥

ततोऽग्नावाज्येनाऽग्नये तेजोऽधिपतये, विष्णवे सत्त्वाधिपतये, कालाय ध(३)र्माधिपतये, पृथिव्यै लोका-

---

एष चार्घ्यो मया दत्तः सूर्य साक्षिंस्त्वदग्रतः ।
प्रसादं कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥

इति सूर्याय तं दत्त्वा—

त्वं ब्रह्मा त्वं च वै रुद्रस्त्वं रविस्त्वं प्रजापतिः ।
त्वमिन्द्रो वसवस्त्वष्टौ परमात्मा त्वमेव हि ॥
त्वमेव शरणं विष्णो शरणं त्वं पतिर्मम ।
स्वर्गे वा नरके वाऽपि यत्र यत्र गमिष्यसि ॥
तत्र तत्र त्वहं पृष्ठे गमिष्यामि तवाशु वै ।
ब्रह्महत्यादिभिः पापैर्मोक्ष्यामि च यमालयात् ॥
अहं ब्रह्मा ह्यहं विष्णुरहं सूर्यश्च दिक्पतिः ।
आदित्यचन्द्रावानिलोऽनलश्च द्यौर्भूमिरापो(?)प्यहर्निशा च ।
एते च सर्वे मम साहसेन तुष्यन्तु ते देववराश्च सर्वे ॥

इति पठित्वा पञ्च शूर्पाणि हारिद्राकुङ्कुमाञ्जनकञ्चुक्यादियुतानि दद्यादित्यर्थः । *पञ्चेति । स्ववस्त्रपल्लवे पञ्चरत्ननीलाञ्जनबन्धः ।

---

(१) 'वाणकैः' ग० । (२) निर्वाण सर्वगात्र, क० ।
(३) 'सर्वाधिष्ठात्रे' क० ।

धिष्ठात्र्यै, अद्भ्यो रसाधिष्ठात्रीभ्यः, वायवे बलाधिपतये, आकाशाय सर्वाधिपतये, कालाय धर्माधिष्ठात्रे, अभ्यः सर्वसाक्षिणीभ्यः, ब्रह्मणे वेदाधिपतये, रुद्राय श्मशानाधिपतये च हुत्वाऽग्निं प्रदक्षिणीकृत्य दृषदमुपलां च संपूज्य पुष्पाञ्जलिं गृहीत्वाऽग्निं प्रार्थयेत्--

त्वमग्ने सर्वभूतानामन्तश्चरासि साक्षिवत् ।
त्वमेव देव जानीषे न विदुर्यानि मानुषाः ॥
अनुगच्छामि भर्तारं वैधव्यभयपीडिता ।
सत्त्वमार्गप्रदानेन नय मां भर्तुरन्तिकम् ॥
मन्त्रमुच्चार्य शनकैः प्रविशेच्च हुताशनम् ॥

गौडास्तु—'इमा नारीरविधवाः' इति,

ॐ इमाः पतिव्रताः पुण्याः स्त्रियोऽपापाः सुशोभनाः
सह भर्तुः शरीरेण संविशन्तु विभावसुम् ॥

इति च विप्रः पठेदित्याहुः । कातरां तु—प्रेतोत्तरे सुप्तां देवरः शिष्यो वा उदीर्ष्वेति द्वाभ्यामुत्थापयेत् । एतन्महिमा मिताक्षरादौ ज्ञेयः ।

पृथ्वीचन्द्रोदये स्कान्दे—

*अनुव्रजन्ती भर्तारं गृहात्पितृवनं मुदा ।
पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यनुत्तमम् ॥

यत्त्वाङ्गिराः—

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ।
सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥ इति,

शीलापूजोत्तरं तदारोहणं कार्यम् । *अनुव्रजन्ती भर्तारमिति ।

मृते भर्त्तरि या नारी धर्मशीला दृढव्रता ।
अनुगच्छति या नारी शृणु तस्यास्तु यत्फलम् ॥
तिस्रः कोट्योऽर्धकोटी च यावन्त्यङ्गरुहाणि वै ।

यच्च व्याघ्रपात्—

न म्रियेत समं भर्त्रा ब्राह्मणी (१)शोककर्शिता ।
न ब्रह्मगतिमाप्नोति मरणादात्मघातिनी ॥ इति,

तत् पृथक्चितिपरम्,

पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृतः ॥

इत्युशनसोक्तेः ।

पृथक्चितिस्तु क्षत्रियादिपरा । तद्विधिर्ब्राह्मे—

देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत् ॥

इमा नारीरविधवा इति ऋग्वेदवादः । त्र्यहाशौचमन्वारोहणपरमिति स्मार्ताः । *निषेधवाक्यानि प्रायश्चित्तार्थं मृतेन पतितेन वा सह मरणनिषेधपराणीत्य-

तावन्त्यब्दसहस्राणि स्वर्गलोके महीयते ॥
मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ।
कुलत्रयं पुनात्येषा भर्त्तारं याऽनुगच्छति ॥

व्यासः—

यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः ।
संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः ॥
तिष्ठते विवशो दीनश्चेष्टमानः स्वकर्मभिः ।
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥
तद्वदुद्धृत्य सा नारी तेनैव सह मोदते ॥

*निषेधेति । यस्तु प्रायश्चित्तार्थं मृत एव शुद्धस्तेन सह

---

(१) 'शोकपीडिता' क० ।

प्याहुः । अस्थिदाहे पलाशदाहे वा न *पृथक्चितिदोषः । अङ्गत्वेन स्थानापत्त्या वा शरीरतुल्यत्वात् । यत्तु—

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः।
पुनात्यविधवा नारी तमादाय मृता तु या ॥

इति हारीतीयम्, त*त्पतितदाहादिनिषेधेन सहगमनस्य दूरतोऽपास्तत्वादर्थवादमात्रमिति पृथ्वीचन्द्रः। जन्मान्तरीयपापवता सह मरणे नोद्धार इति स्मार्तगौडाः । शुद्धितत्त्वे व्यासः—

दिनैकगम्यदेशस्था साध्वी चेत्कृतनिश्चया ।
न दहेत्स्वामिनं तस्या यावदागमनं भवेत् ॥

तत्रैव भविष्ये—

तृतीयेऽह्नि उदक्याया मृते भर्तरि वै द्विजाः !।
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम् ॥
एकां चितिं समासाद्य भर्तारं याऽनुगच्छति ।
तद्भर्तुर्यः क्रियाकर्ता स तस्याश्च क्रियां चरेत् ॥

*एतद्दशाहान्तम्,

यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात्स एव हि ।

इति वायवीयोक्तेः । आपस्तम्बः—

चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत् ।

कथं निषेधः स्यादित्यस्वरसः । *पृथगिति । यूपादिशब्दवाच्चितिशब्दस्य दृष्टादृष्टार्थचित्वादन्यदेशे काष्ठवद्दाहे संस्काराभावान्न चितिभेदः, समन्त्रदाहे तु विप्राया दोषो न क्षत्रियादेः । *पतितेति । प्रायश्चित्ताधिकारी प्रायश्चित्तमकृत्वा मृतस्तस्य प्रायश्चित्तं दत्त्वौर्ध्वदेहिके सहगमनस्तावकमिदमिति तु वस्तुगतिः । *एतद् दशाहान्तमिति । एकादशाहादिभिन्नमित्यभिप्रायः । परे तु यदि मृतस्य भिन्नमातृका अनेके पुत्रास्तदा पितुः सर्वज्येष्ठ एवौर्ध्वदे-

प्राजापत्येन शुध्येत तस्माद्वै पापकर्मणः ॥

तथा—

अन्वारोहे तु नारीणां पत्युश्चैकोदकक्रियाम् ।
पिण्डदानक्रियां तद्वच्छ्राद्धं प्रत्याब्दिकं तथा ॥
अन्वारोहे कृते पत्न्या पृथक्पिण्डांस्तिलाञ्जलीन् ।
पृथक्शिले न कुर्वीत दद्यादेकशिले तथा ॥

*अन्यत्प्रागुक्तम् ।

इदं गर्भिणीबालापत्यासूतिकारजस्वलाऽव्यभिचारिणीभिर्न कार्यम्,

स्वैरिणीनां गर्भिणीनां पतितानां च योषिताम् ।
नास्ति पत्याऽग्निसंवेशः पतितौ हि तथा उभौ ॥

इति मदनरत्ने स्मृतिसंग्रहोक्तेः । मदनरत्ने बृहस्पतिः—

बालसंवर्धनं मुक्त्वा बालापत्या न गच्छति ।
व्रतोपवासनियता रक्षेद्गर्भं च गर्भिणी ॥

तृतीयपादे 'रजस्वला सूतिका च' इति पृथ्वीच-

हिकं कुर्यात् । अन्वारूढायास्तु कनीयानपि साक्षात्पुत्र एव सर्वं कुर्यात्; नतु सपत्नीपुत्रो ज्येष्ठ एव, तत्र तन्निरूपितपुत्रत्वाभावात् । दाहस्तु एकस्यामेव चितौ । सपिण्डीकरणं तु ज्येष्ठेन पितुरेव पितामहादिभिः, कनिष्ठेन तु पत्या मातुः पितृसपिण्डनादिने दिनान्तरे वा कार्यमिति प्राहुः । अत्रैकदिने दिनान्तरे वा सपिण्डनं पितृसपिण्डनोत्तरमेव सम्भवति, पितृभावापन्नेन संयोजने प्रेतसंयोजनायोगादित्यप्याहुः । तत्रापि मातुः पितुश्चैकोद्दिष्टद्वयमेव । मातुरेकोद्दिष्टं पितुः पार्वणमित्यन्ये । *अन्यदिति ।

नवश्राद्धानि सर्वाणि सापिण्डीकरणं पृथक् ।
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥ इति ।

अवयवपिण्डार्थः पाकस्तन्त्रेण, पिण्डः पृथगित्यादि ।

न्द्रोदये गौडीयशुद्धितत्त्वे च पाठः । तत्रैव बृहन्नारदीयेऽपि—

बालापत्या च गर्भिण्यो ह्यदृष्टऋतवस्तथा ।
रजस्वलाराजसुते नारोहन्ति चितां तु ताः ॥ इति ।

अत्र—

पतिव्रता सुसंदीप्तं प्रविशेद्या हुताशनम् ।

इति भारतात्, 'ऋग्वेदवादात्साध्वी स्त्री' इति ब्राह्माच्च पतिव्रतानामेवाधिकारो न दुर्वृत्तानाम् । यत्तु—

अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा ।
वर्तन्ते याश्च सततं भर्तॄणां प्रतिकूलतः ॥
तत्रानुमरणं काले याः कुर्वन्ति तथाविधाः ।
कामात्क्रोधाद्भयान्मोहात्सर्वाः पूता भवन्त्युत ॥

इति भारतम्, तत् कैमुतिकन्यायेन स्तावकमिति पृथ्वीचन्द्रः । ब्राह्मण्या एकचितिरेव न पृथक्चितिः । क्षत्रियादीनां पृथगेका वेति कल्पतरुरत्नाकरमदनपारिजातादयः । शुद्धिचिन्तामणौ चैवम् । तत्रान्वारोहणे भर्त्रशौचमध्ये तदूर्ध्वं वा कृते त्रिरात्रमध्ये एव दशपिण्डाः । सहगमने तु भर्तृशौचतुल्यमाशौचं पिण्डदानं च,

अन्वितायाः प्रदातव्या दश पिण्डास्त्र्यहेण तु ।
स्वाम्याशौचे व्यतीते तु तस्याः श्राद्धं प्रदीयते ॥

इति शुद्धितत्त्वे शूलपाणौ च पैठीनसिस्मृतेः ।

संस्थितं पतिमालिङ्ग्य प्रविशेद्या हुताशनम् ॥
तस्याः पिण्डादिकं देयं क्रमशः पतिपिण्डवत् ।

इति (१)शूलपाणिशुद्धितत्त्वधृतव्यासोक्तेः । अन्यत्प्रागुक्तम् । यदा तु रजस्वलाऽपि पत्नी मृते पत्यौ देश-

---

(१) 'जिकनशूल' छ० क०

कालवशात्तदैवानुगच्छति न शुद्धिं प्रतीक्षते तत्र देवयाज्ञिकनिबन्धे—

यदा स्त्रियामुदक्यायां पतिः प्राणान्समुत्सृजेत् ।
द्रोणमेकं तण्डुलानामवहन्याद्विशुद्धये ॥
मुसलाघातैस्तदसृक् स्रवते योनिमण्डलात् ।
विरजस्कां मन्यमाना स्वे चित्ते तदसृक्क्षयम् ॥
दृष्ट्वा शौचं प्रकुर्वीत पञ्चमृत्तिकया पृथक् ।
त्रिंशद्विंशतिर्दश च गवां दत्त्वा त्वहःक्रमात् ॥
विप्राणां वचनाच्छुद्धा समारोहेद्धुताशनम् ।
नारीणां सरजस्कानामियं शुद्धिरुदाहृता ॥

अत्र श्राद्धादौ निर्णयः पूर्वमुक्तः ।

इति श्रीभट्टकमलाकरकृते निर्णयसिन्धावन्त्यकर्मनिर्णयः ।

* * *

अग्निप्रवेशाशक्तौ तु विष्णुः—'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा' इति । ब्रह्मवैवर्ते—

सहानुगमनं शस्तं वैधव्यस्याथ पालनम् ।

यत्तु तत्रैव—

कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते । इति,

तद्ब्रह्मचर्याशक्यत्वपरम् । तथा च मनुः—

ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशनम् ।

काशीखण्डेऽपि—

पत्यौ मृतेऽपि या योषिद्वैधव्यं पालयेत्क्वचित् ।
सा पुनः प्राप्य भर्तारं स्वर्गलोकं समश्नुते ॥
अनुयाति न भर्तारं यदि दैवात्कथंचन ।

तत्रापि शीलं संरक्षेच्छीलभङ्गात्पतत्यधः ॥
तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा ।
तस्याः पिता च माता च भ्रातृवर्गस्तथैव च ॥

अथ विधवाधर्माः । मदनरत्ने स्कान्दे—

विधवाकबरीबन्धो भर्तृबन्धाय जायते ।
शिरसो वपनं तस्मात्कार्यं विधवया सदा ॥

एकाहारः सदा कार्यो न द्वितीयः कदाचन ।
मासोपवासं वा कुर्याच्चान्द्रायणमथापि वा ॥

पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम् ।
नैवाङ्गोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित् ॥

गन्धद्रव्यस्य सम्भोगो नैव कार्यस्तथा पुनः ।
तर्पणं प्रत्यहं कार्यं भर्तुस्तिलकुशोदकैः ॥
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम् ।

इदमपुत्रापरमिति मदनपारिजातः ।

नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि ॥

कञ्चुकं न परिदध्याद्वासो न विकृतं वसेत् ।
वैशाखे कार्तिके माघे विशेषनियमं चरेत् ॥

प्रचेताः—

ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

श्राद्धादौ तु विशेषः प्रागुक्तः । यत्तु बौधायनः—

संवत्सरं प्रेतपत्नी मधु मांसं विवर्जयेत् ।
अधःशयीत षण्मासानिति मौद्गल्यभाषितम् ॥ इति,
तदसवर्णापरमित्यपरार्कः ।

अथ संन्यासः । याज्ञवल्क्यः—

वनाद् *गृहाद्वा कृत्वेष्टिं *सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥

एतदाश्रमसमुच्चयपक्षे । *जाबालश्रुतौ त्वन्येऽपि पक्षा उक्ताः—'यदि चे*तरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा । *अथ पुनर*व्रती वा व्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा *यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति । अङ्गिराः—

प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेद्वा गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखितः ॥

संसारमेव निःसारं दृष्ट्वा पारदिदृक्षया ।
प्रव्रजत्यकृतोद्वाहः परं वैराग्यमाश्रितः ॥

इत्यङ्गिरसोक्तेः । *गृहादिति । आश्रमपक्षः । *सार्ववेदसं सर्वस्वम् । आश्रमचतुष्टयसमुच्चयश्च—

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥

इति मनुनोक्तः । यदा तु प्राग्भवीयसुकृतपरिपाकादिवशाद्बाल्य एव वैराग्योत्पत्तिस्तदाऽऽह—*जाबालश्रुतौ त्विति । *इतरथा वैराग्ये । *अथेति । तथाच संन्यासो ब्रह्मचार्यादिभिरेव ग्राह्य इति न नियमः । किन्तु स्नातकविधुरादिभिरपीत्यर्थः । *अव्रतीति । उपनयनस्यापि नापेक्षा शुकवामदेवादिवत् सुकृतपाकातिशयसत्त्वे । *यदहरेवेति । अविरक्तस्य तु—

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥

आतुरो मुमूर्षुः । दुःखित*श्चौर*व्याघ्रादिभीतः । भारते—

आतुराणां तु संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् ॥

जाबालश्रुतावपि-*यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्' इति । अत्र विप्रस्यैवाधिकारः 'ब्राह्मणाः प्रव्रजन्ति' इति जाबालश्रुतेः;

आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।

इति मनूक्तेश्चेति विज्ञानेश्वरादयः । वृद्धयाज्ञवल्क्ययोऽपि—

अनधीत्य गुरोर्वेदाननुत्पाद्य तथाऽऽत्मजान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

इति मनूक्तनिषेधाभिप्रायक एवकारः । *चौरेति ।

उत्पन्ने सङ्कटे घोरे तथा व्याघ्रादिसङ्कटे ।
भयभीतस्य संन्यासमङ्गिरा मुनिरब्रवीत् ।

इति महाभारतात् । *व्याघ्रादीति । आदिना नद्यादिग्रहः । *यद्यातुरः स्यादिति । नन्वत्र किं विधीयते ? न तावत्संन्यासः, तस्य यदहरेवेति प्रागेव विधानात् । नापि तदनुवादेन वाङ्मनसी । नहि तद्विधिर्नियमरूपः, प्रैषादिविधिपर्यालोचनया वाङ्मनसोर्नित्यं प्राप्तेरप्राप्तांशपूरणफलकस्य तस्यायोगात् । नापि परिसंख्या, त्रैदोष्यात् । नच संन्यासमनूद्यातुरः कर्ता विधीयताम्, तथा सति कर्तृस्वरूपमात्रस्य क्रियाऽविनाभावबललब्धतयाऽऽतुरत्वे विधिपर्यवसानापत्तेः । नचैवमेवास्तु, क्रियागुणभूतकर्तृविशेषणं हि तदङ्गं स्यात् । तच्च यद्युपादेयं, संन्यासदशायां नियमेनानुष्ठीयेत, वाग्यतस्तिस्रो दोहयित्वेति दोहदशायां वाग्यमवत् । अनुपादेयत्वे तु राजत्ववदधिकारिसङ्कोचकं स्यात् । उभयथापि

अनातुरस्य संन्यासाननुष्ठानापत्तिरिति चेत्? न, यतः ज्ञानार्थतया काम्ये संन्यासकर्मणि सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारादतथाभूतस्यातुरस्याधिकाराप्राप्तौ तत्प्राप्तिफलकोऽयमपूर्वविधिरेव "यदि ब्राह्मणो यजेत" इत्यादिवत्। परं चास्य कर्तृपक्षाविशेषः, आतुरार्थतया संन्यासस्यैव विधेयत्वात्। तादर्थ्यं च तस्य तदपेक्षितफलजनकत्वेनैव सम्भवतीति। किं तत्फलमित्यपेक्षायां यद्वा प्रागवगतं वाक्यशेषात्तदेवात्रापि सम्बध्यते। यथा "यदि ब्राह्मणो यजेत" इत्यादिब्राह्मणादीन् प्रति नित्याप्राप्ताऽवेष्टिप्रयोगविधायकवाक्ये फलापेक्षायाम् "एतयाऽन्नाद्यकामं याजयेत्" इत्येतत्। इयांस्तु विशेषः—तत्र राजसूयान्तर्गतत्वेनावेष्टेरितरसापेक्षतयैव साधनत्वावगमाद्राजसूयसाध्यत्वेनावगतस्य स्वाराज्यस्यावेष्टिफलत्वेनानुपस्थानाद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन वा फलस्यावेष्टिसाध्यत्वेन प्राप्तौ 'एतयान्नाद्यकामम्' इत्येतस्य प्रवृत्तेरपेक्षितविधानात्सार्थक्यम्, अत्र तु प्रागेव संन्यासस्य निरपेक्षसाधनतावगमात्सन्न्याससाध्यत्वेनावगतस्याप्रत्यूहमुपस्थितस्यापरित्यागान्न फलोपस्थापकवाक्यापेक्षेति। यावज्जीवादिवाक्येषु तूपस्थितोऽपि स्वर्गस्त्यज्यते, निमित्तवशेन प्रयोगस्यावश्यकत्वसिद्धौ निष्कामं प्रति प्रयोगनिर्वाहाय पापक्षयार्थत्वस्यैव कल्प्यत्वात्। ननु "यदि रथन्तरसामा सोमः स्यात्" इत्यादाविवात्रापि यदिशब्दवशादातुरत्वं निमित्तं स्यादिति चेत्? पीडावत्त्वं ह्यातुरत्वम्। तच्च संसृतस्य शरीरत्वान्नित्यमतो न निमित्तम्। अत एव "यस्य पुरोडाशौ क्षायतः" इत्यत्र पुरोडाशक्षामस्य पुनः प्रयोगनिमित्तत्वे एकदेशक्षामस्य स्थायिनिमित्तत्वं प्रापय्य एकदेशक्षामस्यावर्जनीयत्वेन नित्यतया निमित्तत्वायोगाद् 'इयानवर्जनीयो दाहो नाधिकः' इत्यपरिज्ञानाच्चावर्जनीयदाहातिरिक्तस्यैकदेशेऽपि वर्त्तमानस्य दाहस्य निमित्तत्वासम्भवात्सर्वक्षाममेव निमित्तमिति स्थापितं "क्षामे तु सर्वदाहे स्यात्" (जै०सू०६-४-५-१७) इत्यधिकरणे। अधिकारपक्षे तु

सर्वाङ्गोपसंहारासमर्थमात्रोपलक्षणतयाऽऽतुरशब्दार्थे नानुपपत्तिः । तथाचातुरस्य यथासम्भवमङ्गोपसंहारौ प्रत्युक्तौ । अनुवादोऽयं “मनसा वाचा वा” इति । यथाकथञ्चित् प्रधानमात्रेणापि आतुरस्य फलसिद्धिरिति वाक्यतात्पर्यम्, “आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी” इति न्यायेन विधिनैवातुरत्वतारतम्यानुरोधेनाङ्गोपसंहारतारतम्याभ्यनुज्ञानात् । नच काम्ये यथाशक्त्यङ्गोपसंहारोपगमे तिर्यगधिकरणविरोधः, आतुरसंन्यासविधिबलेनेह तदुपगमात् । एक एव संन्यासः स्वस्थातुररूपकर्तृभेदेन अङ्गान्यपेक्षते नापेक्षते इति विरुद्धमिति चेत् ? सन्ध्यावन्दनादौ नित्ये तथादर्शनात् । यच्चातुरसन्न्यासो भिन्न एव इडो यजतीत्यादाविवाभ्यासेन कर्मभेदादिति । तन्न, अनन्यपरपुनःश्रवणरूपो ह्यभ्यासः कर्मभेदकः । नचेह सोऽस्ति, पुनःश्रवणस्यातुराधिकारसिद्धिप्रयोज्यकत्वेनान्यपरत्वात् । विधेर्हि प्रयोजनमात्रं वाच्यम् । नच पुनर्विधाने विधित्रैविध्यभङ्गः, इतरनिवृत्तिप्रयोजकत्वस्यैवापूर्वविधित्वेन तत्र प्रवेशात् । तत्त्वं च साक्षात्परंपरया वेत्यन्यदेतत् । यद्वा विधिस्त्रिधेति प्रायोवादः । “षडस्माकमनादयः” “समासश्चतुर्धा” “अनुपस्थितस्याप्रकारत्वम्” इति तत्तद्दर्शनस्थोद्घोषवत् । अस्ति हि मूलावरणादेरप्यनादिता । अस्ति च “सुप् सुपा” इति समासः । अस्ति चानुपस्थिताभावत्वादेः प्रकारतेति । ननु तथापि यदिशब्दः कथं योज्य इति चेदत्र भट्टपादाः—यदिशब्दपरित्याग उताध्याहारकल्पना । व्यवधानेन सम्बन्धो हेतुहेतुमतोश्च लिङिति । अस्यार्थः— “यदि ब्राह्मणः” इत्यत्रेव हुंफडादौ निपातानामनर्थकत्वदर्शनाद्यदिशब्दस्य तथात्वकल्पनया इह परित्यागः, अथवा यदि रोचेतेत्यध्याहारः, अथवा व्यत्ययेन सम्बन्धः यदि सन्यस्येत्तर्ह्यातुर इति “यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्” इत्यादौ यदि गृह्णीयात्तर्हि रथन्तरसामा सोमः स्यादिति रथन्तराधिकरणपूर्वपक्षवत् । वस्तुतस्त्विह न व्यत्ययः कार्यः यद्यातुररूपेप्सितं फलं भावयेत्तर्हि

सन्न्यासेनेति तं विनैवोपपत्तेः। फलांशस्यातुरशब्देन समर्पणात्तत्र विधेरनुष्ठापकत्वात्। उक्तं हि सौभराधिकरणपूर्वपक्षे—पुरुषशेषता च तदभिलषितफलसाधनतयेति। अथवा सोमः स्यादिति हेतौ लिङ्, गृह्णीयादिति विधौ रथन्तरसामसोमहेतुकान् ऐन्द्रवायवाग्रान् गृह्णीयादिति अक्रियमाणस्य हेतुत्वासम्भवादर्थात्सोमविधिः। यद्वा गृह्णीयादिति हेतुमति। सोमः स्यादिति विधौ। हेतुपदादि……

………सोमस्यैव च ग्रहाग्रतारूपफलजनकः सोमया………

संन्यासस्य श्रवणांगत्वादातुरस्य प्रधानभूतश्रवणाभावादनुष्ठानं व्यर्थमिति चेत्? न, अङ्गत्वासिद्धेः। तथाहि "एतमेव लोकमिच्छन्तः प्रव्राजिताः प्रव्रजन्ति" इतिश्रुतिर्विधिर्नार्थवादः। "एतद् ब्रह्म" इत्यर्थवादसम्बद्धत्वात्। अर्थवादस्यार्थवादान्तरापेक्षानुपगमात्। तस्मादनया संन्यासो विधीयते। स च फलमाकाङ्क्षमाणः एकवाक्योपात्तकामनार्थकधातुपदसमभिव्याहृतकर्मप्रत्ययान्तलोकशब्देनैतच्छब्दसमानाधिकरणेनोपस्थापितं प्रकृतं ज्ञानविशिष्टमात्मानं फलत्वेन गृह्णाति। तत्र विशेष्यस्य कूटस्थनित्यस्य स्वरूपेण भाव्यत्वायोगादानर्थक्यतदङ्गावतरणन्यायेन सविशेषणे हीति न्यायेन वा ज्ञानमेव भाव्यं गृहीत्वा पर्यवस्यति। न च प्रकरणप्रायपाठाभ्यां सन्न्यासस्य श्रवणाङ्गत्वाद्गुणार्थवादोऽयं "वर्म वा यद्यज्ञस्य" इत्यादिवदिति वाच्यं, प्रकरणापेक्षया वाक्यस्य प्राबल्यात्। प्रयाजादौ अन्यतराकाङ्क्षयाऽऽर्थवादिकं फलं कल्प्यमिति तदपेक्षया दर्शपूर्णमासाङ्गताग्राहकस्य प्रकरणस्य प्राबल्यमिति वैषम्यात्। न च संन्यासस्य ज्ञानफलकत्वे तुल्यार्थत्वाच्छ्रवणेन सह विकल्पापत्तिरिति वाच्यं, द्वारभेदात्। अद्वितीये ब्रह्मणि वेदान्तानां तात्पर्यावधारणानुकूलव्यापाररूपमुपक्रमोपसन्धानं श्रवणम्। तच्च प्रमाणताऽसम्भावनानिवृत्तिद्वारोपयुज्यते। संन्यासस्तु प्रतिबन्धककल्मषनिवृत्तिद्वारा,

ये च संतानजा दोषा ये च स्युः कर्मसम्भवाः।

चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः ।
क्षत्रियस्य त्रयः प्रोक्ता*द्वावेको वैश्यशूद्रयोः॥इति।

संन्यासस्तान् दहेत्सर्वांस्तुषाग्निरिव काञ्चनम् ॥

इतिमाधवोक्तस्मरणात्;

मृत्तोयैः शोध्यते शोध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥

इतिमनूक्तेश्च। एवञ्च संन्यासस्य ज्ञानाङ्गत्वे स्थिते श्रवणाङ्गत्वायोगाद् “दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत” इत्यादिवद् “वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्” इत्यादिवाक्यानि क्रममात्रविधायकानि । अतएव “अन्तरा चापि तु तद्दृष्टेः” (ब्र०सू०३-४-९-३६) इत्यधिकरणे विधुरस्यापि श्रवणाधिकारः समर्थितः, जन्मान्तरीयेणापि क्रमनिर्वाहात् । यदि च माधवोक्तरीत्याऽग्निहोत्राद्यभावात्सत्कर्मजन्यान्तःकरणशुद्ध्यभावेन साधनासम्भवाद्विधुराणां न सन्न्यासाङ्गविशिष्टश्रवणेऽधिकार इति पूर्वपक्षः। जप्यादिना चित्तशुद्धिसम्भवात्साङ्ग एवाधिकार इति सिद्धान्त इत्युच्यते । तदापि गार्गीप्रभृतिष्वगतिरेव “पुराकल्पेतु” इत्यादिना तासां वेदाध्ययनाधिकारावगमात् । अत एव गार्गीप्रभृतीनां विद्याधिकारोऽपि तत्रैव भाष्यकारैः समर्थितः। अत एव वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैरिति संक्षेपशारीरकं नकेवलमैहिकमेव पारिव्राजकं किन्तु जन्मान्तरीयमपि ………
…………………………… त्वाद् श्रवणं न विरुद्ध्यते । जन्मान्तरीयसंन्यासकल्पनात् । नत्वेतज्जन्मन्येव संन्यासोत्तरं गार्हस्थ्यम्,

त्रयाणामानुलोम्यं स्यात् प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः ॥

इति दक्षेण निषेधात् उत्तरमीमांसायां तृतीयाध्याये “तद्भूतस्य तु नातद्भावः” इत्याद्यधिकरणेऽवरोहाभावस्य निर्णीतत्वा-

*माधवस्तु—

ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ।

इति कौर्माद्युक्तेर्वर्णत्रयस्याप्यधिकारः । पूर्ववाक्यं तु काषायदण्डादिनिषेधार्थम् ,

मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।
राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः ॥

इति बौधायनोक्तेरिति पक्षान्तरमाह । तत्त्वं तु कुटीचकादिपरमेव तदिति । योऽपि 'संन्यासं पलपैतृकम्' इति कलौ निषेधः, सोऽपि त्रिदण्डादिपर इत्युक्तं प्राक् ।

च्च । *द्वाविति । द्वौ वैश्यस्य एकः शूद्रस्येत्यन्वयः । यत्तु—

चत्वार आश्रमाः प्रोक्तास्तेषु शूद्रस्तु नार्हति । इति,

तत्समन्त्रकविवाहनिषेधार्थम् । *माधवास्त्विति । अत्रायमस्वरसः-यद्यपि सुरेश्वरवार्तिके एव—

त्रयाणामविशेषेण संन्यासः श्रूयते श्रुतौ ।
पदोपलक्षणार्थं स्याद्ब्राह्मणग्रहणं तदा ॥ इति ।
प्रत्ययार्थात्म्यविज्ञानस्वभावश्चेत्समर्थ्यते ।
उत्थानं यस्य यस्य स्यात्स स व्युत्थातुमर्हति ॥

इति द्विजानां संन्यास उक्तस्तथापि भाष्यकृद्भिर्ब्राह्मणस्यैव संन्यासे अधिकारोक्तेः स एव युक्तः। न च क्वचित्सामान्यशब्दश्रवणबलात्सर्वत्र ब्राह्मणशब्दस्य द्विजपरत्वं सांप्रतम् , "पुरोडाशं चतुर्धा करोति" "आग्नेयं चतुर्धा करोति" इत्यत्रेव सामान्यस्य विशेषे उपसंहारात् । नतु विपरीतम्, अभिधात्र्यश्रुतेः। द्विजशब्दस्य ब्राह्मणपरत्वे च न कोपि बाधः । किञ्च क्षत्रियादिसंन्यासनिषेधानां मुखजानामिति वचनमालम्ब्य काषायादिनिषेधपरत्वमयुक्तलक्षणापत्तेः । मुखजानामित्यनेनापि हि अंगनिषेधमुखेन क्षत्रि-

सच सन्यासश्चतुर्धेत्याह हारीतः—

कुटीचको बहूदको हंसश्चैव तृतीयकः ।
चतुर्थः परमो हंसो यो यः पश्चात्स उत्तमः ॥

*आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन् काषायवासाः शिखोपवीतत्रिदण्डवान् बन्धुषु स्वगृहे वा भुञ्जान आत्मज्ञो भवेत् । एतदत्यन्ताशक्तपरम् । द्वितीयस्तु बन्धून् हित्वा सप्तागाराणि भैक्षं चरन् पूर्वोक्तवेषः स्यात् । हंसस्तु पूर्वोक्तवेषोऽप्येकदण्डः,

एकं तु वैणवं दण्डं धारयेन्नित्यमादरात् ।

इति स्कान्दात् । विष्णुरपि—

यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम् ।
तावान् परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः ॥

यादीन् प्रति प्रधानमेव बाध्यते, ज्ञानार्थतया काम्ये संन्यासे सर्वाङ्गोपसंहारेणैवाधिकारात् । तत एवातुरवाक्यस्याप्यप्रवृत्तिः सजातीययोरातुरानातुरयोरधिकारसिद्धेः । एतेन मुखजानामिति वाक्यस्य कुटीचकादिपरत्वमप्ययुक्तं पारहंस्यस्याप्यननुमतत्वादिति । *आद्य इत्यादि । तथाच स्कान्दे—

कुटीचकश्च संन्यस्य स्वे स्वे सद्मनि नित्यशः ।
भिक्षामादाय भुञ्जीत स्वबन्धूनां गृहेऽथवा ॥
शिखायज्ञोपवीती स्यात्त्रिदण्डः सकमण्डलुः ।
बहूदकश्च संन्यस्य बन्धुपुत्रादिवर्जितः ॥
सप्तागारं चरेद्भैक्ष्यमेकान्नं तु परित्यजेत् ।
गोवालरज्जुसंबद्धं त्रिदण्डं शिक्यमुद्धृतम् ॥
जलपात्रं पवित्रं च खनित्रीं च कृपाणिकाम् ।
शिखां यज्ञोपवीतं च देवताराधनं चरेत् ॥

चतुर्थोऽपि स्कान्दे—

*परहंसस्त्रिदण्डं च रज्जुं गोवालनिर्मिताम्।
शिखां यज्ञोपवीतं च *नित्यं कर्म परित्यजेत्॥

अयमप्येकदण्ड एव। ये तु शिखोपवीतादित्यागनिषेधास्ते कुटीचकादिपराः। यत्तु मेधातिथिः—

यावन्न स्युस्त्रयो दण्डास्तावदेकेन वर्तयेत्। इति,

तदपि तत्परमेव। यच्चात्रिः—

चतुर्धा भिक्षवः प्रोक्ताः सर्वे चैव त्रिदण्डिनः। इति,

तद्वाग्दण्डादिपरं न यष्टिपरम्,

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च।
यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते॥

इति मनूक्तेः। तस्मात्परमहंसस्यैकदण्ड एव। सोऽप्यविदुषः। विदुषस्तु सोऽपि नास्ति,

'न दण्डं न शिखां नाच्छादनं चरति परमहंसः'

इति महोपनिषदुक्तेः; 'ज्ञानमेवास्य दण्डः' इति वाक्यशेषाच्च। यत्तु यमः—

काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः।
स याति नरकान् घोरान् महारौरवसंज्ञितान्॥ इति,

हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च।
कन्थां कौपीनमालाद्यमङ्गवस्त्रं बहिःपटम्॥
एकं तु वैणवं दण्डं धारयेन्नित्यमादरात्।
……………………कुर्याद् ध्यानं समर्चयन्॥

इत्युक्त्वा परमहंस उक्तस्तमाह—*परहंस इति। *नित्यं कर्म। संध्यावन्दनगायत्रीजपादि। तथा—

कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम्।
अक्षमालां च गृह्णीयाद्वैणवं दण्डमव्रणम्॥

तद्वैराग्यं विना जीवनार्थसंन्यासपरम्,
एकदण्डं समाश्रित्य जीवन्ति बहवो नराः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥

इति स्मृतेः । यच्चाश्वमेधिके—

एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा ।
काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिर ॥ इति,
तस्यापि पूर्वोक्तव्यवस्था ज्ञेया ।

*अथ तद्विधिः । बौधायनः—

कृत्वा श्राद्धानि सर्वाणि पित्रादिभ्योऽष्टकं पृथक् ।
वापयित्वा च केशादीन् मार्जयेन्मातृका इमाः ॥

सर्वाणीति स्वस्य नवश्राद्धषोडशश्राद्धादि कृत्वेत्यर्थः । स्मृत्यर्थसारेऽपि—

एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि षोडश ।
अग्निमान्पार्वणेनैव विधिना निर्वपेत्स्वयम् ॥ इति ।

कात्यायनः—

कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् ॥

बौधायनः—

सदैवमार्षकं दिव्यं पित्र्यं मातृकमानुषे ।
भौतिकं चात्मनश्चान्ते अष्टौ श्राद्धानि निर्वपेत् ॥

अत्र क्रममाह हेमाद्रौ शौनकः—"देवश्राद्धे ब्रह्मविष्णुमहेश्वरा देवताः । आर्षे देवर्षिब्रह्मर्षिक्षत्रर्षयः, देव-

---

माधूकरमथैकान्नं परहंसः समाचरेत् ॥ इति ।

आद्यौ त्रिदण्डावन्त्यावेकदण्डौ । इष्टः प्राक्कर्तव्यतया श्राद्धादि वक्तुं प्रतिजानीते—*अथेति । एतच्च विश्वेश्वर्यादि-

र्षिक्षत्रर्षिमनुष्यर्षयो वा" । मरीच्यादिऋषय इति संन्यासपद्धतौ । तच्चिन्त्यम् । दिव्ये वसुरुद्रादित्याः । मानुषे सनकसनन्दनसनातनाः । भूतश्राद्धे पृथिव्यादिभूतानि चक्षुरादिकरणानि चतुर्विधो भूतग्रामश्चेति तिस्रः । पित्र्ये पित्रादित्रयो मातामहाश्च । मातृके मात्रादयास्तिस्रः । आत्मश्राद्धे आत्मपितृपितामहा देवताः । आत्मश्राद्धं परमात्मदैवत्यमिति संन्यासपद्धतौ । तच्चिन्त्यम् । सर्वत्र च नान्दीमुखत्वं विशेषणं ज्ञेयम् । सर्वत्र पिण्डदानम् । युग्मा विप्राः । दक्षक्रतू सत्यवसू वा विश्वेदेवौ । अन्यन्नान्दीश्राद्धवदिति हेमाद्रिः । स्मृत्यर्थसारे—

केशश्मश्रुलोमनखं वापयित्वोपकल्पयेत् ।
दण्डं जलं पवित्रं च शिक्यं पात्रं कमण्डलुम् ॥

आसनं कौपीनमाच्छादनं कन्थां पादुके इति दश पञ्च वा । एतच्च पूर्वेद्युर्नान्दीमुखं कृत्वा परेद्युः पुण्याहवाचनं कृत्वा कार्यमिति शौनकः ।

बौधायनः—

त्रीन्दण्डानङ्गुलीस्थूलान्वैणवान् मूर्धसंमितान् ।
एकादश नव द्वित्रिचतुःसप्तान्यपर्वकान् ॥
वेष्टितान्कृष्णगोवालरज्ज्वा तु चतुरङ्गुलान् ।
एको वा तादृशो दण्डो गोवालसदृशो भवेत् ॥
अनग्निरग्निमुत्पाद्य नित्येन विधिना ततः ॥

पृष्ठोदिविविधानेनेत्यर्थः ।

स्वाग्नावेवाग्निमान्कुर्यादपवर्गोक्तमादितः ।
आज्यं पयो दधीत्येनात्त्रिवृद्धा जलमेव वा ॥
ॐभूरित्यादिना प्राश्य रात्रिं चोपवसेत्ततः ।
अथादित्यस्यास्तमयात्पूर्वमग्नीन्विहृत्य सः ॥

आज्यमग्नौ गार्हपत्ये संस्कृत्यैतेन च स्रुचा ।
पूर्णयाहवनीये तु जुहुयात्प्रणवेन तत् ॥
ब्रह्मान्वाधानमेतत्स्यादाग्निहोत्रे हुते ततः ।
संस्तीर्य गार्हपत्यस्य दर्भानुत्तरतोऽत्र तु ॥
पात्राण्यासाद्य दर्भेषु ब्रह्मायतन एव तु ।
जागृयाद्रात्रिमेतां तु यावद्ब्राह्मो मुहूर्तकः ॥
अग्निहोत्रं स्वकाले तु हुत्वा प्रातस्तनं ततः ।
इष्टिं वैश्वानरीं कुर्यात्प्राजापत्यामथापि वा ॥

जाबालश्रुतौ–‘तद्धैके प्राजापत्यामेवाष्टिं कुर्वन्ति तदु तथा न कुर्यादाग्नेयीमेव कुर्यात्पश्चात् त्रैधातवीयामेव कुर्यात्” इत्युक्तम् । तेनात्र विकल्पः । अत्राहुः–त्रेताग्नेः प्राजापत्या, तद्वाक्यशेषेऽग्नीनिति बहुत्वश्रुतेः; एकाग्नेस्त्वाग्नेयी इति । अनाहिताग्नेरिष्टिस्थाने वैश्वानर आग्नेयो वा चरुरिति माधवः । कात्यायनः—

आत्मन्यग्नीन्समारोप्य वेदिमध्ये स्थितो हरिम् ।
ध्यात्वा हृदि त्वनुज्ञातो गुरुणा प्रैषमीरयेत् ॥

कपिलः—

विधिवत्प्रैषमुक्त्वाऽथ त्रिरुपांशु त्रिरुच्चकैः ।
अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यपो भुवि ॥
निनीय दण्डाशिक्यादि गृहीत्वाऽथ बहिर्व्रजेत् ॥

निबन्धेष्वतिविस्तृतमिति तत एव न्यूनातिरिक्तं निश्चेतव्यमित्युपरम्यते ॥

इति आर्डोपाह्वकृष्णभट्टविरचिता रत्नमाला ॥

श्रीरस्तु । शुभं भवतु ।

(अ(१)भयमिति मन्त्रेणापां पूर्णमञ्जलिं निनीयेत्यर्थः।)

बौधायनः—

सखे मेत्यादिना दण्डं येन देवाः पवित्रकम् ।
यदस्य पारे शिक्यं तु पात्रं व्याहृतिभिस्तथा ॥
युवासुवासाः कौपीनं गृहीत्वा बान्धवांस्त्यजेत् ।

अथ क्रमः। तत्र संन्यासेऽधिकारसिद्ध्यर्थं स्वस्य नवश्राद्धषोडशश्राद्धसपिण्डनानि साग्निः पार्वणान्यनग्निस्त्वेकोद्दिष्टविधिना कृत्वाऽनाश्रमी चेत्कृच्छ्रचतुष्टयम्, अन्यस्तु तप्तकृच्छ्रं कृत्वोदगयने एकादश्यां द्वादश्यां वा साग्निरमावास्यायां पौर्णमास्यां चतुर्दश्यां वा यथा पर्वणि प्राजापत्या स्यात्। तत्र देशकालौ स्मृत्वा परमहंसादिसंन्यासग्रहणं करिष्य इति संकल्प्य गणेशं संपूज्य पुण्याहं वाचयित्वा मातृकापूजां वृद्धिश्राद्धं च कृत्वाऽस्तमयात्प्रागौपासनं समिध्याहिताग्निस्तु गार्हपत्यं, विधुरोऽग्निहोत्री तु त्रिकाण्डमण्डनोक्तदिशा कुशपत्न्या सह पवमानेष्ट्यन्तं पूर्णाहुत्यन्तं वाधानं कुर्यात्। ब्रह्मचारी चेल्लौकिके विधुरश्चेद्व्याहृतिभिः प्रणवेन चाग्निमाधायान्वग्निरुषसामित्यानीय पृष्ठोदिवीति निधाय तेनैव समिध्य "तत्सवितुः" "तां सवितुः" "विश्वानि देव" इति तिस्रः समिधोऽभ्यादध्यात्। एवमग्नौ सिद्धे कक्षोपस्थवर्ज्यं वपनं कृत्वा पयोदधियुतमाज्यमपो वा—"ॐभूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम्" इति प्राश्याचम्य पुनरादाय—"ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि" इति द्वितीयम्, ॐस्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात्" इति

---

(१) कंसान्तर्गतं नास्ति ग० पुस्तके ।

तृतीयम्, समस्तया चतुर्थम्-ॐभूर्भुवः स्वः सावित्रीं प्रविशामि तत्सवितु०यात् इति। संन्यासपद्धतौ तु त्रिवृदसीति प्रथमं, प्रवृदसीति द्वितीयं, विवृदसीति तृतीयं प्राश्यापः पुनन्त्विति जलं प्राश्य सावित्रीप्रवेश उक्तः। तत आहवनीयं विहृत्य ब्राह्मणमुपवेश्याज्यं संस्कृत्य चतुर्द्वादश वा गृहीत्वा समित्पूर्वमोंस्वाहा परमात्मन इदमिति हुत्वोपवसेत् ।(इ(१)दं ब्रह्मान्वाधानम् ।) ततः सायंहोमं वैश्वदेवं च कृत्वा अग्नेरुदक्कुशानास्तीर्य दण्डादीनि दश पञ्च वाऽऽसाद्य ब्रह्मासने कृष्णाजिनोपविष्टो रात्रौ जागरणं कृत्वा प्रातर्होमानन्तरं प्राजापत्यां वैश्वानरीं वा कृत्वा ऋत्विग्भ्यः सर्वस्वं ब्रह्मणे च मधुपूर्णं तैजसपात्रं दत्त्वा दारुपात्राण्याहवनीयेऽश्ममृन्मयानि च जले क्षिपेत्। कृष्णाजिनं त्वाददीत। अनाहिताग्निस्तु वैश्वानरमाग्नेयं वा चरुं हुत्वा पात्राण्यग्नौ क्षिप्त्वा भूर्भुवः स्वरित्यपः स्पृष्ट्वा "तरत्समन्दी" इति सू(२)क्तं जप्त्वा विप्रान्संभोज्य पुण्याहं वाचयित्वा अत्र वा वपनं कृत्वा हेमरूप्यकुशजलैः स्नात्वा पुरुषाय चरुं कृत्वा प्राणाय स्वाहेति पञ्चाज्याहुतीर्हुत्वा पुरुषसूक्तेन प्रत्यृचमाज्यं चरुं च जुहुयात्।

अत्र विरजाहोमं केचिदाहुः। यथोक्तं शिवगीतासु—

जुहुयाद्विरजामन्त्रैः प्राणापानादिभिस्ततः।
अनुवाकान्तमेकाग्रः समिदाज्यचरून्पृथक्॥
आत्मन्यग्नीन्समारोप्य यातेअग्नेति मन्त्रतः।
भस्मादायाग्निरित्याद्यैर्विमृज्याङ्गानि संस्पृशेत्॥
पापैर्विमुच्यते सत्यं मुच्यते नात्र संशयः।

---

(१) कंसान्तर्गतं नास्ति ग० पुस्तके।
(२) 'सूक्तं' नास्ति ग० पुस्तके।

यथा—"प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्माभूयासꣳ स्वाहा।" सर्वत्र लिङ्गोक्तदेवताभ्य इदमिति त्यागः। वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसङ्कल्पा मे शुध्यन्तां ज्योति०। त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योति०। शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं०। उत्तिष्ठ पुरुष हरितपिङ्गललोहिताक्षि देहिदेहि ददापयिता मे शुध्यन्तां ज्योति०। पृथिव्यापस्तेजोवायुराकाशा मे शुध्यन्तां ज्योति०। शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योति०। मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योति०। अव्यक्तभावैरहंकारैर्ज्योति०। आत्मा मे शुध्यन्तां०। अन्तरात्मा मे शुध्यन्तां०। परमात्मा मे शुध्यन्तां०। क्षुधे स्वाहा। क्षुत्पिपासाय स्वाहा। विविध्यै स्वाहा। ऋग्विधानाय स्वाहा। कषोत्काय स्वाहा। क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्। अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा। अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयमात्मा मे शुध्यन्तां ज्योति०। ततः स्विष्टकृदादि हुत्वा ब्रह्मणे हिरण्यमाज्यपात्रं धेनुं च दत्त्वा "समासिञ्चतु" इत्युपतिष्ठेत। अत्र केचिदनग्नेः सावित्रीप्रवेशं पूर्णाहुतिं चाहुः।

ततो—"यात अग्ने यज्ञिया तनूः" इति त्रिस्त्रिरेकैकं जिघ्रन्नात्मन्यग्नीन् समारोप्य गुरवे सर्वस्वं दत्त्वा—

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।'

इत्युपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्याधीहि भगवो ब्रह्मेति वदेत् । ततो गुरुरात्मानं ब्रह्मरूपं ध्यात्वा शङ्खं द्वादशप्रणवैरभिमन्त्र्य तेन शिष्यमभिषिच्य—"शन्नो मित्रः" इति शान्तिं पठित्वा तच्छिरसि हस्तं दत्त्वा पुरुषसूक्तं जप्त्वा—"मम व्रते हृदयं ते दधामि" इति च जप्त्वोदङ्मुखः प्रणवार्थमनुसंदधद्दक्षिणे कर्णे प्रणवमुपदिश्य तदर्थं च पञ्चीकरणाद्यवबोध्य अयमात्मा ब्रह्म, तत्त्वमसि, प्रज्ञानं ब्रह्मेत्याद्युपदिशेत् । तदर्थं च वदेत् । ततो नाम दद्यात् । ततः शिष्यस्तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन् देवान्साक्षिणः कृत्वा ॐभूर्भुवःस्वः संन्यस्तं मयेति त्रिरुपांशु त्रिरुच्चैस्त्रिरत्युच्चैश्चोक्त्वा जलसमीपं गत्वा स्नात्वा अभयं सर्वभूतेभ्यो मत्तः स्वाहेति त्रिरञ्जलिं क्षिप्त्वा "युवा सुवासाः" इति काषायं कौपीनं वासश्च परिधाय (१)सखे मा गोपायेति मुख्यं वैणवं पालाशं बैल्वमौदुम्बरं वा दण्डं गृह्णीयात् । अत्र पुत्रकामो गृहस्थः शङ्खेन पुरुषसूक्तेन दण्डमभिषिच्य दद्यादित्याचारः । ततः शिखामुत्पाट्य ॐभूःस्वाहेत्यग्नौ जले वा हुत्वा तथैवोपवीतं हुत्वा "येन देवाः पवित्रेण" इति जलपवित्रं, "यदस्य पारे" इति शिक्यम् , सावित्र्या कमण्डलुं, सप्तव्याहृतिभिर्भोजनपात्रमिदं विष्णुरित्यासनं बृसीं वा गृहीत्वा ॐभूस्तर्पयामीति व्यस्तसमस्ताभिर्महर्नम इति तर्पयित्वा ॐभूः स्वधों भुवः स्वधोंस्वः स्वधोंभूर्भुवःस्वर्महर्नमः स्वधेति पितॄंस्तर्पयित्वा "उदुत्यं" "चित्रम्" "तच्चक्षुः"हंसःशुचिषद्" "नमो मित्रस्य"इति

---

(१) 'सखा' क० छ०

स्नात्वा सुरभिमतीभिरापोहिष्ठेति हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिश्च मार्जयित्वा अष्टोत्तरशतवारमघमर्षणं प्राणायामांश्च कृत्वा ॐभूर्भुवः स्वरिति च पठित्वा "नमःसवित्रे" इति सूर्यं चोपस्थाय पुनः स्नात्वा जङ्घे क्षालयित्वा ओमिति ब्रह्मोमितीदं सर्वमोमिति ब्रह्म वा एष ज्योतिर्य एष तपति वेद्यमेवैतद्य एष वेदो यदवनमस्तीति जपित्वा अष्टसहस्रं गायत्रीं जपेदिति ॥

अथ यतिधर्माः—प्रातरुत्थाय "ब्रह्मणस्पते" इति जपित्वा दण्डादीनि मृदं च निधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाऽऽचम्य पर्वद्वादशीवर्ज्यं प्रणवेन दन्तधावनं कृत्वा तेनैव मृदा बहिः कटिं प्रक्षाल्य जलतर्पणवर्ज्यं स्नात्वा पु(१)नर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनान्तं कृत्वा केशवादिनमोन्तनामभिस्तर्पयित्वा ॐभूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत्। ॐभूःस्वाहेति स्वाहाशब्दान्तैः स्वधाशब्दान्तैश्चैभिरेव पुनस्तर्पयेदिति केचित्। तत आचम्याञ्जलिना प्रणवेन जलमादाय व्याहृतिभिरुद्धृत्य गायत्र्या त्रिःक्षिप्त्वा गायत्रीं जपेत्। उदिते सूर्ये प्रणवेन व्याहृतिभिर्वार्घ्यं त्रिर्दत्त्वा मित्रस्य चर्षणीत्याद्यैः पूर्वोक्तसौरीभिरिदं विष्णुस्त्रिर्देवो ब्रह्मजज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्तते। ततो नत्वा "आदित्याय विद्महे सहस्राक्षाय धीमहि। तन्नः सूर्यः प्रचोदयात्" इति त्रिर्जपेत्। एवं त्रिकालं विष्णुपूजां ब्रह्मयज्ञं च कुर्यात् ॥

---

(१) 'पुनः' नास्ति ग०

अथ भिक्षा ।

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
कालेऽपराह्ले भूयिष्ठे नित्यं भिक्षां यतिश्चरेत् ॥

इत्युक्ते काले उद्वयमिति चतसृभिरादित्यमुपस्थाय तेनैक्यं ध्यात्वा आकृष्णेनेति प्रदक्षिणं कृत्वा “येते पन्थानः” इति जप्त्वा—

योऽसौ विष्णवाख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः ।
सोऽहं नारायणो देव इति ध्यात्वा प्रणम्य तम् ।
त्रिदण्डं दक्षिणे त्वङ्गे ततः संधार्य बाहुना ॥
पात्रं वामकरे क्षिप्त्वा श्लेषयेद्दक्षिणेन तु ।

इति बौधायनोक्तदिशा त्रीन्पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वां भिक्षां याचित्वा “पूर्णमासि पूर्णं मे भूयाः” इत्यागत्य शुचिरन्नं प्रोक्ष्य ॐभूःस्वधा नम इत्यादिव्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वा प्रणवेन षोडशप्राणायामान्कुर्यादिति संक्षेपः । गौतमव्याख्यायां भृगुः—

यतिहस्ते जलं दत्त्वा भैक्ष्यं दद्यात्पुनर्जलम् ।
भैक्ष्यं पर्वतमात्रं स्यात्तज्जलं सागरोपमम् ॥

अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयम् ।

कण्वः—

एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र, वर्षासु मासांस्तु चतुरो वसेत् ॥

जाबालश्रुतौ—“शून्यागारदेवगृहतृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः” इति । मात्स्ये—

अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।

आत्रिः—

भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् ।
कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥
मञ्चकं शुक्लवस्त्रं च स्त्रीकथा लौल्यमेव च ।
दिवास्वापं च यानं च यतीनां पतनानि षट् ॥
आसनं पात्रलोभश्च संचयः शिष्यसंग्रहः ।
दिवास्वापो वृथाजल्पो यतेर्बन्धकराणि षट् ॥

दक्षः—

नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंचन ।
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ॥

मदनरत्ने आत्रिः—

पित्रर्थं कल्पितं पूर्वमन्नं देवादिकारणात् ।
वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा ॥

बृहस्पतिः—

न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः ।
न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् ॥

एतद्वेदार्थभिन्नपरम् । आत्रिः—

स्नानं सुरार्चनं ध्यानं प्राणायामो बलिः स्तुतिः ।
भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च ॥

एते यतिधर्मा इत्यर्थः । अन्येऽपि माधवमिताक्षरादौ ज्ञेयाः । यतिधर्मसमुच्चये—

न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते ।
पितृमातृक्षयं श्रुत्वा स्नात्वा शुध्यति साम्बरः ॥

अथ यतिसंस्कारः स्मृत्यर्थसारे—

(१)संन्यसेद् ब्रह्मचर्याद्वा संन्यसेच्च गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाऽथ दुःखितः ॥
आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं च संन्यास आतुराणां विधीयते ॥
उत्पन्ने सङ्कटे घोरे चौरव्याघ्रादिगोचरे ।
भवभीतस्य संन्यासमङ्गिरा मनुरब्रवीत् ॥
"यद्यातुरः स्यान्मनसा वाचा वा संन्यसेद्द्विजः ॥"

इति जाबालश्रुतिः ।

आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र कारयेत् ॥
संन्यस्तोऽहमिति ब्रूयात्सवनेषु त्रिषु क्रमात् ।
त्रिवारं च त्रिलोकात्मा शुभाशुभसुधाद्रवे ॥
यत्किंचिद्बाधकं कर्म कृतमज्ञानतो मया ।
प्रमादालस्यदोषाद्यत्तत्संत्यक्तवानहम् ॥
एवं संत्यज्य भूतेभ्यो दद्यादभयदक्षिणाम् ।
पद्भ्यां कराभ्यां विहरन्नाहं वाक्कायमानसैः ॥
करिष्ये प्राणिनां हिंसां प्राणिनः सन्तु निर्भयाः ॥

इत्यातुरस्य स्वशक्त्याऽवस्थानुरूपमङ्गलभूतप्रैषोच्चारणादियथाशास्त्रं मनसा वाचा वा कुर्वतस्तावतैव कृच्छ्रचान्द्रायणनान्दीश्राद्धनखकृन्तनादीनि कृत्वा संन्यासपूर्तिरिति प्रतीयते । आङ्गिराः—

षष्टिः कुलान्यतीतानि षष्टीनामधिकानि च ।
कुलान्युद्धरते प्राज्ञः संन्यस्तामिति यो वदेत् ॥

---

(१) कंसान्तर्गतो भागो ग० पुस्तकं विहायान्यपुस्तकेषु नास्ति ।

विष्णुः—

एकरात्रोषितस्यापि यतेर्या गतिरुच्यते ।
न सा शक्या गृहस्थेन आतुरोऽपि च संन्यसेत् ॥
संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि ।
न तत्क्रतुशतैः पुण्यं प्राप्तुं शक्नोति मानवः ॥

मनुः—

यो दत्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥

अथ श्रौतातुरस्य विलम्बितस्य—

प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूजयेत् ॥ इति ।

अत्र मात्रत्वोपसम्भवादङ्गकलापाव्यापकत्वेनाप्युपपत्तौ कर्तुर्यागत्यागकलापव्यावृत्तस्यैकत्वानुपपत्तेः कृच्छ्रनान्दीश्राद्धविरजाहोमादिकर्तुमशक्तस्यातुरस्य विद्यमानाग्नेरिष्टदेवतायै पूर्णाहुतिं हुत्वा असौ स्वर्गाय लोकाय स्वाहेति आहवनीये दारुमयानि पात्राणि प्रज्वाल्य मृन्मयान्यप्सु प्रक्षिप्य समाप्तिं च मरुन इत्युपस्थाय याते अग्ने इत्यनेन हस्तं प्रताप्य आत्मन्यग्नि समारोप्य सर्वप्रायश्चित्तपूर्वकं सप्तपञ्चकेशान् विसृज्य वापयित्वा यथाविधि स्नात्वा आतुरसंन्यासं कुर्यात् ॥

अथातुरसन्यासविधिः। अपां समीपे गत्वा तिथ्याः स्मरणपूर्वकं स्नानसन्ध्यावन्दनादि कृत्वा देशकालौ सङ्कीर्त्य ममाशेषदुःखनिवृत्तिनिरतिशयानन्दप्राप्तिपरमपुरुषार्थप्राप्तये च परमहंससंन्यासं करोमीति सङ्कल्पयेत् । तत्र प्रधानानि प्रेषोच्चारप्रणवोपदेशमहावाक्यानि । ततः संन्यासोचितं क्षौरं कृत्वा पूर्ववत्सप्तपञ्चकेशान् विसृज्य स्नात्वाचम्य पात्रेण तोयमादाय उपस्पृ-

त्य दक्षिणेन पाणिनाऽप्सु जुहोति । एष वोग्नेर्योनिर्यः प्राणं गच्छ स्वाहा इति प्रथमाहुतिः । आपो वै सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोमि स्वाहा इति द्वितीया । ततो हुतशेषम् आशुःशिशान इत्यनुवाकेनाभिमन्त्र्य पुत्रेषणा वित्तेषणा लोकेषणा मया त्यक्ता स्वाहेति प्रथमां पिबेत् । ॐ ॐभूर्भुवः स्वरोम् मया संन्यस्तं स्वाहेति द्वितीयां पिबेत् । अभयं सर्वभूतेभ्यो मत्तः स्वाहेति तृतीयां पिबेत् । ततोऽन्यत्तोयमञ्जलिपूर्णमादाय प्रागादिदिक्षु प्रत्येकं निनयेत् ॐभूः सावित्रीं प्रवेशयामि, ॐभुवः सावित्रीं प्रवेशयामि, ॐस्वः सावित्रीं प्रवेशयामि, ॐभूर्भुवः स्वः सावित्रीं प्रवेशयामि इति सावित्रीप्रवेशं कृत्वा अथोर्ध्वबाहुः सूर्याभिमुखो भूत्वा ॐभूः संन्यस्तं मया, ॐभुवः संन्यस्तं मया, ॐस्वः संन्यस्तं मया, ॐभूर्भुवःस्वः संन्यस्तं मयेति प्रैषोच्चारं ब्रूयात् । एवं मन्द्रमध्योच्चैस्त्रिरुक्त्वा तूष्णीं शिखां निकृत्य स्नात्वाचम्य यज्ञोपवीतमुद्धृत्याञ्जलिना गृहीत्वा भूःस्वाहेति अप्सु हुत्वा दिगम्बरो भूत्वा पुत्रेषणावित्तेषणालोकेषणातो मुक्तोऽहमिति ब्रूयात् । अत ऊर्ध्वं न पुत्रगृहं गच्छेत् । मृते च पुरुषसूक्तेन विष्णुबुद्ध्याऽभिषिञ्चति संस्कारमेव कुर्यात् । एवं विरक्तस्यातुरस्य स्वस्थस्य संन्यासविहिताङ्गेषु यन्मन्त्रानुष्ठाने शक्तिर्यथाविधिस्तदनुष्ठानपूर्वकं प्रधानं प्रैषोच्चारणमात्रं मत्वा संन्यासयुक्तिरिति श्रवणात् । तदुत्तरकालमेव मृतस्योपदेशविकलस्यापि खननसंस्कारमेव कुर्यात् । जीवतश्चेच्छिखां यज्ञोपवीतं च नित्यक्रियाविधिवद्विसृज्य दण्डकाषायवस्त्रादीनि चाऽऽदाय यतिधर्मानेवानुतिष्ठेत् । सद्गुरुमन्विष्य तदुपदेशं गृ-

हीत्वा स्वधर्मनिष्ठो भवेत् । अयमर्थो विद्वत्संमतः प्रयोक्तव्यः । इत्यातुरसंन्यासः)।

सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च ।
न तस्य दहनं कार्यं नाशौचं नोदकक्रिया ॥

तथा—

कुटीचकं तु प्रदहेत्पूरयेत्तु बहूदकम् ।
हंसो जले तु निक्षेप्यः परहंसं (१)प्रपूरयेत् ॥

पालाशमूले नदीतीरेऽन्यत्र वा गन्धपुष्पालङ्कृतं शवं वाद्यघोषेण नीत्वा दण्डमात्रं व्याहृतिभिः खात्वा सप्तव्याहृतिभिस्त्रिः प्रोक्ष्य दर्भानास्तीर्य नवघटे पञ्चरत्नोदकं क्षिप्त्वा नारायणः परं ब्रह्मेत्यभिमन्त्र्य तेनैव संस्नाप्याष्टाक्षरेण वस्त्रगन्धपुष्पधूपदीपान् दत्त्वा विष्णो हव्यं रक्षस्वेति शवं गर्ते निधाय "इदं विष्णुः" इति दक्षिणहस्ते दण्डं "यदस्य पारे" इति सव्ये शिक्यं "येन देवाः पवित्रेण" इति मुखे जलपवित्रं सावित्र्योदरे (२)भिक्षापात्रं "भूमिः श्वभ्रे" इति गुह्ये कमण्डलुं निधाय "चित्तिः स्रुक्" इति दशहोत्राभिर्मन्त्रयोदिति विश्वादर्शटीकायां स्मृत्यर्थसारे च । बृहच्छौनकस्तु—

यतिं पुरुषसूक्तेन स्नापयित्वाऽवटं ततः ।
प्रणवेनाष्टवारं तं प्रोक्षयेदथ सर्वतः ॥
विष्णो हव्यं रक्षस्वेति यजुषा प्रणवेन च ।
गर्ते प्रेतं विनिक्षिप्य चेदं विष्णुर्विचक्रमे ॥
इति मन्त्रेण दण्डं तु दद्याद्दक्षिणहस्तके ।
मूर्धानं भूर्भुवः स्वश्चेत्युक्त्वा शङ्खेन भेदयेत् ॥
गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् ।
गालश्वादिरक्षार्थं सम्यग्गर्तं प्रपूरयेत् ॥ इति ।

'प्रपूजयेत्' क० छ० । (२) 'भिक्षा' नास्ति ग० ।

कुटीचकस्य तु दाहः कार्यः । यथा सर्वं प्राग्वत्कृत्वाऽग्निं प्रज्वाल्य साग्नेर्दक्षिणकरे उपावरोहेत्यवरोह्य निर्मथ्य वा गर्ते चितिं कृत्वा “अग्निनाग्निः समिध्यते” इत्यग्निं दत्त्वा सावित्र्या प्रणवेन वा दहेत् । ततोऽष्टशतं प्रणवं नारायणः परं ब्रह्मेति जप्त्वा सशिरःप्रणवव्याहृत्या गायत्र्या तद्भस्मास्थीनि तीर्थे क्षिप्त्वा स्नानाच्छुचिः । नास्यान्यदौर्ध्वदेहिकम्,

त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ।

इति उशनःस्मृतेः । एकादशेऽह्नि पार्वणं तदपि त्रिदण्डिनः । हंसपरमहंसादीनां पार्वणादिकमपि न कार्यम्, इति शूलपाणिः । श्राद्धचिन्तामणौ दत्तात्रेयः—

एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् ।
न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूताय भिक्षवे ॥

प्रेतक्रिययैकोद्दिष्टनिषेधे सिद्धे पुनस्तद्ग्रहणमाब्दिकपरम् । तेन तत्पार्वणमेव । त्रिदण्डिनां द्वादशे नारायणबलिः । तद्विधिरन्यश्च विशेषः प्रागुक्त इत्यलं बहुना ॥

एवं निरूपितमिदं गहनं तु धर्म-
तत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेचनीयं
विद्वद्भिरित्यविरतं प्रणतोऽस्मि तेषु ॥ १ ॥
मया सद्वाऽसद्वा यदिह गदितं मन्दमतिना
किमेतच्छक्यं वाऽऽध्यवसितुमपि स्वल्पमतिना ।
तदेवं यत्किंचिद्गदितमिह विख्यातमहिमा
प्रतापोऽयं सर्वो विकसति तु पित्रोश्चरणयोः ॥ २
यो भाट्टतन्त्रगणनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।

योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनाऽस्तु सुकृती बुधरामकृष्णः ॥ ३ ॥
श्रीभट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसूनोः ।
श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबन्धं कमलाकराख्यः ॥ ४ ॥

नानानिर्णयवत्त्वान्निर्णयसिन्धुः प्रोच्यतां विबुधाः ।
निर्णयसरोजवत्त्वान्निर्णयकमलाकरोऽप्यस्तु ॥ ५ ॥
वसुऋतुऋतुभूमिते १६६८ गतेऽब्दे
नरपतिविक्रमतोऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितोऽयं
रघुपतिपादसरोरुहेऽर्पितश्च ॥ ६ ॥
जगति सकलविद्यासिन्धुमुष्टिंधयानां
परभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
यदि भवति विदग्धैस्तद्ध्यवश्यं विमृश्यम् ॥ ७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसुतविद्वन्मुकुटहीराङ्कुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ तृतीयः परिच्छेदः ॥